ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)



प्रो० योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग प्रकाशक

ब्रह्मसूत्रशांकरभाष्यमिदं टीकाभिरेकादशभिः सह भागेष्वष्टसु प्रकाश्यते। सर्वासां टीकानां क्रम एवं व्यवस्थापितः। भामती-ऋजुप्रकाशिका- भाष्यभावप्रकाशिका- प्रदीप-ऋजुविवरण- तत्वदीपन- वार्त्तिक- पञ्चपादिका-पञ्चपादिकाविवरण-श्रीकण्ठभाष्य-शिवार्कमणिदीपिकाख्याः।

एतासां सर्वासां टीकानां केचिदंशाः प्रकाशिता आसन् केचिच्चाप्रकाशिताः। ते सर्वेऽशाः इतस्ततः प्रकाशितेभ्यो ग्रन्थेऽभ्योऽप्रकाशितेभ्यो ग्रन्थेभ्यो वा यथासम्भवं संकलय्यात्र व्यवस्थापिताः। अधुनापर्यन्तं सर्वा एताः टीकाः सममेव प्रकाशिताः आसन्। परमधुना प्रतिवर्णकं टीकैका पूर्वं सामग्र्येण प्रकाशिता।

तदनन्तरं द्वितीया टीका प्रारब्धा। आशास्यते च वेदान्तविषयाब्धिं प्रविविक्षूणां शोधकानां कृते प्रयास एष समर्द्धिकरो भविता।

ब्रह्मसूत्रशाङ्करभाष्यम्

(एकादशटीकासंयुतम्)

प्रो. योगेश्वरदत्तशर्मा (पाराशरः)

NAG PUBLISHERS

नाग पब्लिशर्स

ब्रह्मसूत्रशाङ्करभाष्यम्

पञ्चम् खण्ड

वार्त्तिकम्
प्रदीपः
भामती

श्रीकण्ठभाष्यम् (ब्रह्मसूत्रस्य)
शिवार्कमणिदीपिका (श्रीकण्ठभाष्यस्य)

सम्पादकः
प्रो. योगेश्वरदत्तशर्मा (पाराशरः)
हिन्दू कालेज, दिल्ली विश्वविद्यालय
दिल्ली-110007

नाग पब्लिशर्स
11 ए. यू. ए. जवाहर नगर, दिल्ली-110007
भारत

This Publication has been brought out with the financial assistance from Rashtriya Sanskrit Sansthan, New Delhi.

नाग प्रकाशक

(१) 11ए/यू. ए. जवाहर नगर, दिल्ली-110007
टेलिफोन-3915883, 3967975, 3957440

(२) जलालपुर माफी (चुनार-मिर्जापुर) उ० प्र०

© प्रकाशक

ISBN : 81-7081-365-4 (set)
81-7081-514-2 (Vol V)

प्रथम संस्करण : 2002

मूल्य 171.00

श्री सुरेन्द्र प्रताप द्वारा नाग प्रकाशक 11 ए० यू० ए०, जवाहर नगर, दिल्ली 110007 द्वारा प्रकाशित तथा जी. प्रिंट. प्रोसेस, 308/2 शहजादा बाग, दयाबस्ती दिल्ली द्वारा 110035 द्वारा मुद्रित। अक्षरयोजक ए० आर० प्रिंटर्स, डी-102 न्यू सीलमपुर, दिल्ली-110053 ।

विषयनुक्रमणिका

(अ०१ पा०३ सू० १-७)

अथ द्युभ्वाद्यधिकरणम्

शाङ्करभाष्यम्	२१७५-२१७८
वार्त्तिकम्	२१७९-२१८५
प्रदीप:	२१८६-२१९०
भामती	२१९१-२१९३
श्री कण्ठभाष्यम्	२१९४-२१९६
शिवार्कमणिदीपिका	२१९७-२२०५

(अ०१ पा०३ सू० ८-९)

अथ भूमाधिकरणम्

शाङ्करभाष्यम्	२२०६-२२०९
वार्त्तिकम्	२२१०-२२१६
प्रदीप:	२२१७-२२२०
भामती	२२२१-२२२३
श्री कण्ठभाष्यम्	२२२४-२२२५
शिवार्कमणिदीपिका	२२२६-२२३३

(अ०१ पा०३ सू० १०-१२)

अथ अक्षराधिकरणम्

शाङ्करभाष्यम्	२२३४-२२३५
वार्त्तिकम्	२२३६-२२३७
प्रदीप:	२२३८-२२३९
भामती	२२४०-२२४१
श्री कण्ठभाष्यम्	२२४२-२२४३
शिवार्कमणिदीपिका	२२४४-२२५२

(अ०१ पा०३ सू० १३)

अथ ईक्षतिकर्माधिकरणम्

शाङ्करभाष्यम् २२५३-२२५४
वार्त्तिकम् २२५५-२२५८
प्रदीप: २२५९-२२६०
भामती २२६१-२२६२
श्री कण्ठभाष्यम् २२६३-२२६३
शिवार्कमणिदीपिका २२६४-२२६४

(अ०१ पा०३ सू० १४-२१)

अथ दहराधिकरणम्

शाङ्करभाष्यम् २२६५-२२७२
वार्त्तिकम् २२७३-२२८१
प्रदीप: २२८२-२२८५
भामती २२८६-२२९४
श्री कण्ठभाष्यम् २२९५-२२९७
शिवार्कमणिदीपिका २२९८-२३१०

(अ०१ पा०३ सू० २२-२३)

अथ अनुकृत्यधिकरणम्

शाङ्करभाष्यम् २३११-२३१२
वार्त्तिकम् २३१३-२३१६
प्रदीप: २३१७-२३१८
भामती २३१९-२३२०
श्री कण्ठभाष्यम् २३२१-२३२२
शिवार्कमणिदीपिका २३२३-२३२४

(अ०१ पा०३ सू० २४-२५)

अथ प्रमिताधिकरणम्

शाङ्करभाष्यम् २३२५-२३२६
वार्त्तिकम् २३२७-२३२८
प्रदीप: २३२९-२३३०

भामती २३३१-२३३२
श्री कण्ठभाष्यम् २३३३-२३३४
शिवार्कमणिदीपिका २३३५-२३३९

(अ०१ पा०३ सू० २६-३३)

अथ देवताधिकरणम्

शाङ्करभाष्यम् २३४०-२३५०
वार्त्तिकम् २३५१-२३६३
प्रदीपः २३६४-२३७१
भामती २३७२-२३८७
श्री कण्ठभाष्यम् २३८८-२३९०
शिवार्कमणिदीपिका २३९१-२४०७

(अ०१ पा०३ सू० ३४-३८)

अथ अपशूद्राधिकरणम्

शाङ्करभाष्यम् २४०८-२४१०
वार्त्तिकम् २४११-२४१३
प्रदीपः २४१४-२४१६
भामती २४१७-२४२१
श्री कण्ठभाष्यम् २४२२-२४२३
शिवार्कमणिदीपिका २४२४-२४३५

(अ०१ पा०३ सू० ३९)

अथ कम्पनाधिकरणम्

शाङ्करभाष्यम् २४३६-२४३७
वार्त्तिकम् २४३८-२४४०
प्रदीपः २४४१-२४४२
भामती २४४३-२४४३
श्री कण्ठभाष्यम् २४४४-२४४४
शिवार्कमणिदीपिका २४४५-२४४५

(अ०१ पा०३ सू० ४०)

अथ ज्योतिरधिकरणम्

शाङ्करभाष्यम्	२४४६-२४४६
वार्त्तिकम्	२४४७-२४४८
प्रदीप:	२४४९-२४५०
भामती	२४५१-२४५२
श्री कण्ठभाष्यम्	२४५३-२४५३
शिवार्कमणिदीपिका	२४५४-२४६१

(अ०१ पा०३ सू० ४१)

अथ अर्थान्तरत्वाधिकरणम्

शाङ्करभाष्यम्	२४६२-२४६२
वार्त्तिकम्	२४६३-२४६५
प्रदीप:	२४६६-२४६६
भामती	२४६७-२४६७
श्री कण्ठभाष्यम्	२४६८-२४६८
शिवार्कमणिदीपिका	२४६९-२४७२

(अ०१ पा०३ सू० ४२-४३)

अथ सुषुप्त्युत्क्रान्त्यधिकरणम्

शाङ्करभाष्यम्	२४७३-२४७४
वार्त्तिकम्	२४७५-२४७६
प्रदीप:	२४७७-२४८३
भामती	२४८४-२४८५
श्री कण्ठभाष्यम्	२४८६-२४८७
शिवार्कमणिदीपिका	२४८८-२४९४

(अ०१ पा०४ सू० १-७)

अथ आनुमानिकाधिकरणम्

शाङ्करभाष्यम्	२४९५-२५०१
वार्त्तिकम्	२५०२-२५१०
प्रदीप:	२५११-२५१७

भामती	२५१८-२५२२
श्री कण्ठभाष्यम्	२५२३-२५२५
शिवार्कमणिदीपिका	२५२६-२५३५

(अ०१ पा०४ सू० ८-१०)

अथ चमसांधिकरणम्

शाङ्करभाष्यम्	२५३६-२५३७
वार्त्तिकम्	२५३८-२५४०
प्रदीपः	२५४१-२५४२
भामती	२५४३-२५४४
श्री कण्ठभाष्यम्	२५४५-२५४६
शिवार्कमणिदीपिका	२५४७-२५५०

(अ०१ पा०४ सू० ११-१३)

अथ सङ्ख्योपसङ्ग्रहाधिकरणम्

शाङ्करभाष्यम्	२५५१-२५५३
वार्त्तिकम्	२५५४-२५६०
प्रदीपः	२५६१-२५६३
भामती	२५६४-२५६६
श्री कण्ठभाष्यम्	२५६७-२५६८
शिवार्कमणिदीपिका	२५६९-२५७२

(अ०१ पा०४ सू० १४-१५)

अथ कारणत्वाधिकरणम्

शाङ्करभाष्यम्	२५७३-२५७५
वार्त्तिकम्	२५७६-२५७८
प्रदीपः	२५७९-२५८०
भामती	२५८१-२५८३
श्री कण्ठभाष्यम्	२५८४-२५८४
शिवार्कमणिदीपिका	२५८५-२५८९

(अ०१ पा०४ सू० १६-१८)

अथ बालाक्यधिकरणम्

शाङ्करभाष्यम् २५९०-२५९२
वार्त्तिकम् २५९३-२५९५
प्रदीप: २५९६-२५९८
भामती २५९९-२६०२
श्री कण्ठभाष्यम् २६०३-२६०४
शिवार्कमणिदीपिका २६०५-२६१४

(अ०१ पा०४ सू० १९-२२)

अथ वाक्यान्वयाधिकरणम्

शाङ्करभाष्यम् २६१५-२६१९
वार्त्तिकम् २६२०-२६२३
प्रदीप: २६२४-२६२७
भामती २६२८-२६३४
श्री कण्ठभाष्यम् २६२५-२६३६
शिवार्कमणिदीपिका २६३७-२६४६

(अ०१ पा०४ सू० २३-२७)

अथ प्रकृत्यधिकरणम्

शाङ्करभाष्यम् २६४७-२६४९
वार्त्तिकम् २६५०-२६५२
प्रदीप: २६५३-२६५५
भामती २६५६-२६५८
श्री कण्ठभाष्यम् २६५९-२६६१
शिवार्कमणिदीपिका २६६२-२६७०

अथ द्युभ्वाद्यधिकरणम्॥ ॥ सू० १–७ ॥

शाङ्करभाष्यम्

द्युभ्वाद्यायतनं स्वशब्दात्॥१॥

इदं श्रूयते–''यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुरि''– (मुण्ड० २/२/५) ति। अत्र यदेतद् द्युप्रभृतीनामोतत्ववचनादायतनं किञ्चिदवगम्यते, तत् किं परं ब्रह्म स्यात् आहोस्विदर्थान्तरमिति संदिह्यते, तत्रार्थान्तरं किमप्यायतनं स्यादिति प्राप्तम्। कस्मात्? ''अमृतस्यैष सेतुः'' इति श्रवणात्। पारवान्हि लोके सेतुः प्रख्यातः। न च परस्य ब्रह्मणः पारवत्त्वं शक्यमभ्युपगन्तुम्; ''अनन्तमपारम्'' (बृह० २/४/१२) इति श्रवणात्। अर्थान्तरे चायतने परिगृह्यमाणे स्मृतिप्रसिद्धं प्रधानं परिग्रहीतव्यम्; तस्य कारणत्वादायतनत्वोपपत्तेः। श्रुतिप्रसिद्धो वा वायुः स्यात्; ''वायुर्वै गोतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानिभवन्ती'' (बृह० ३/७/२) ति वायोरपि विधारणत्वश्रवणात्। शारीरो वा स्यात्; तस्यापि भोक्तृत्वाद्भोग्यं प्रपञ्चं प्रत्यायतनत्वोपपत्तेरिति॥

एवं प्राप्त इदमाह– *द्युभ्वाद्यायतनमिति*॥ द्यौश्च भूश्च द्युभुवौ, द्युभुवावादी यस्य तदिदं द्युभ्वादि। यदेतदस्मिन् वाक्ये द्यौः पृथिव्यन्तरिक्षं मनः प्राण इत्येवमात्मकं जगदोतत्वेन निर्दिष्टम्, तस्यायतनं परं ब्रह्म भवितुमर्हति॥

कुतः? स्वशब्दात्=आत्मशब्दादित्यर्थः। आत्मशब्दो हीह भवति–''तमेवैकं जानथ आत्मानम्'' इति। आत्मशब्दश्च परमात्मपरिग्रहे सम्यगवकल्पते, नार्थान्तरपरिग्रहे। क्वचिश्च स्वशब्देनैव ब्रह्मण आयतनत्वं श्रूयते–''सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा'' (छा० ६/८/४) इति। स्वशब्देनैव चेह पुरस्तादुपरिष्टाश्च्च ब्रह्म संकीर्त्यते–''पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्'' इति। ''ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेणे'' (छा० २/२/११) इति च; तत्र। त्वायतनायतनवद्भावश्रवणात्, सर्वं ब्रह्मेति च सामानाधिकरण्यात्। यथाऽनेकात्मको वृक्षः शाखा

स्कन्धो मूलं चेति, एवं नानारसो विचित्र आत्मेत्याशङ्का संभवति, तां निवर्तयितुं सावधारणमाह–''तमेवैकं जानथ आत्मानम्'' इति। एतदुक्तं भवति–न कार्यप्रपञ्चविशिष्टो विचित्र आत्मा विज्ञेयः। किं तर्हि? अविद्याकृतं कार्यप्रपञ्चं विद्यया प्रविलापयन्तस्तमेवैकमायतनभूतमात्मानं जानथैकरसमिति। यथा 'यस्मिन्नास्ते देवदत्तः,तदानये' त्युक्ते आसनमेवानयति, न देवदत्तम्; तद्वदायतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते। विकारानृताभिसन्धस्य चापवादः श्रूयते–''मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'' (का० २/४/११) ति। ''सर्वं ब्रह्मे'' ति तु सामानाधिकरण्यं प्रपञ्चप्रविलापार्थम्, नानेकरसताप्रतिपादनार्थम्। ''स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'' (बृह० ४/५/१३) त्येकरसताश्रवणात्। तस्माद् द्युभ्वाद्यायतनं परं ब्रह्म॥

यत्तूक्तम्–सेतुश्रुतेः सेतोश्च पारवत्त्वोपपत्तेर्ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भवितव्यमिति अत्रोच्यते–विधारणत्वमात्रमत्र सेतुश्रुत्या विवक्ष्यते, न पारवत्त्वादि। न हि मृद्दारुमयो लोके सेतुर्दृष्टः, इत्यत्रापि मृद्दारुमय एव सेतुरभ्युपगम्येत। सेतुशब्दार्थोऽपि विधारणत्वमात्रमेव, न पारवत्त्वादि; षिञो बन्धनकर्मणः सेतुशब्दव्युत्पत्तेः॥

अपर आह–''तमेवैकं जानथ आत्मानम्'' इति यदेतत्संकीर्तितमात्मज्ञानम्, यच्चैतत् ''अन्या वाचो विमुञ्चथे'' ति वाग्विमोचनम्, तदत्रामृतत्वसाधनत्वात् ''अमृतस्येष सेतुरि'' ति सेतुश्रुत्या संकीर्त्यते, न तु द्युभ्वाद्यायतनम्। तत्र यदुक्तं सेतुश्रुतेर्ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भाव्यम्–इति, एतदयुक्तम्॥१॥

***मुक्तोपसृप्यव्यपदेशात्*॥२॥**

इतश्च परमेव ब्रह्म द्युभ्वाद्यायतनम् यस्माद्मुक्तोपसृप्यतास्य व्यपदिश्यमाना दृश्यते। मुक्तैरुपसृप्यं मुक्तोपसृप्यम्। देहादिष्वनात्मस्वहमस्मीत्यात्मबुद्धिरविद्या, ततस्तत्पूजनादौ रागः, तत्परिभवादौ द्वेषः, तदुच्छेददर्शनाद्भयम्, मोहश्चेत्येवमयमनन्तभेदोऽनर्थव्रातः संततः सर्वेषां नः प्रत्यक्षः। तद्विपर्ययेणाविद्यारागद्वेषादिदोषमुक्तैरुपसृप्यं गम्यमेतदिति द्युभ्वाद्यायतनं प्रकृत्य व्यपदेशो भवति। कथम्? ''भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे'' (मुण्ड० २/२/८) इत्युक्त्वा ब्रवीति–''तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्'' (मुण्ड० ३/२/८) इति। ब्रह्मणश्च मुक्तोपसृप्यत्वं प्रसिद्धं शास्त्रे–''यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत'' (बृह० ४/४/७) इत्येवमादौ। प्रधानादीनां तु न क्वचिन्मुक्तोपसृप्यत्वमस्ति प्रसिद्धम्। अपि च ''तमेवैकं जानथ आत्मानमन्या वाचो

विमुञ्चथामृतस्यैष सेतुरि'' ति वाग्विमोकपूर्वकं विज्ञेयत्वमिह द्युभ्वाद्यायतनस्योच्यते। तच्च श्रुत्यन्तरे ब्रह्मणो दृष्टम्-''तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः। नानुध्यायेद् बहूञ्शब्दान् वाचो विग्लापनं हि तदि'' (बृह० ४/४/२१) ति। तस्मादपि द्युभ्वाद्यायतनं परं ब्रह्म॥२॥

***नानुमानमतच्छब्दात्*॥३॥**

यथा ब्रह्मणः प्रतिपादको वैशेषिको हेतुरुक्तः नैवमर्थान्तरस्य वैशेषिको हेतुः प्रतिपादकोऽस्तीत्याह। नानुमानिकं साङ्ख्यस्मृतिपरिकल्पितं प्रधानमिह द्युभ्वाद्यायतनत्वेन प्रतिपत्तव्यम्। कस्मात्? अतच्छब्दात्। तस्याचेतनस्य प्रधानस्य प्रतिपादकः शब्दस्तच्छब्दः, न तच्छब्दोऽतच्छब्दः। न ह्यत्राचेतनस्य प्रधानस्य प्रतिपादकः कश्चिच्छब्दोऽस्ति, येनाचेतनं प्रधानं कारणत्वेनायतनत्वेन वाऽवगम्यते। तद्विपरीतस्य चेतनस्य प्रतिपादकशब्दोऽत्रास्ति-''यः सर्वज्ञः सर्वविदि'' (मुण्ड० १/१/९) त्यादिः। अत एव न वायुरपीह द्युभ्वाद्यायतनत्वेनाश्रीयते॥३॥

***प्राणभृच्च*॥४॥**

यद्यपि प्राणभृतो विज्ञानात्मन आत्मत्वं चेतनत्वं च संभवति; तथाप्युपाधिपरिच्छिन्नज्ञानस्य सर्वज्ञत्वाद्यसम्भवे सत्यस्मादेवातच्छब्दात्प्राणभृदपि न द्युभ्वाद्यायतनत्वेनाश्रयितव्यः। न चोपाधिपरिच्छिन्नस्याविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यक्सम्भवति। पृथग्योग- करणमुत्तरार्थम्॥४॥

कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः? *भेदव्यपदेशात्*॥५॥

भेदव्यपदेशश्चेह भवति-''तमेवैकं जानथ आत्मानम्'' इति ज्ञेयज्ञातृभावेन। तत्र प्राणभृत्तावन्मुमुक्षुत्वाज्ज्ञाता। परिशेषादात्मशब्दवाच्यं ब्रह्म ज्ञेयं द्युभ्वाद्यायतनमिति गम्यते, न प्राणभृत्॥५॥

कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः? *प्रकरणात्*॥६॥

प्रकरणं चेदं परमात्मनः; ''कस्मिन्नु भगवो विज्ञाते सर्व विज्ञातं भवती'' (मुण्ड० १/१/३) त्येकविज्ञानेन सर्वविज्ञानापेक्षणात्। परमात्मनि हि सर्वात्मके विज्ञाते सर्वमिदं विज्ञातं स्यान्न, न केवले प्राणभृति॥६॥

कुतश्च न प्राणभृद् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः? *स्थित्यदनाभ्यां च*॥७॥

द्युभ्वाद्यायतनं च प्रकृत्य ''द्वा सुपर्णा सयुजा सखाया'' (मुण्ड० ३/१/१) इत्यत्र स्थित्यदने निर्दिश्येते-''तयोरन्यः पिप्पलं स्वाद्वत्ती'' ति कर्मफलाशनम्, ''अनश्नन्नन्योऽभिचाकशीती'' त्यौदासीन्येनावस्थानं च। ताभ्यां च स्थित्यदनाभ्यामीश्वरक्षेत्रज्ञौ तत्र गृह्येते। यदि चेश्वरो

द्युभ्वायतनत्वेन विवक्षितस्ततस्तस्य प्रकृतेश्वरस्य क्षेत्रज्ञात्पृथग्वचनमवकल्पते। अन्यथा ह्यप्रकृत-वचनमाकस्मिकमसंबन्धं स्यात्।।

ननु–तवापि क्षेत्रज्ञस्येश्वरात्पृथग्वचनमाकस्मिकमेव प्रसज्येत? न; तस्याविवक्षितत्वात्। क्षेत्रज्ञो हि कर्तृत्वेन भोक्तृत्वेन च प्रतिशरीरं बुद्ध्याद्युपाधिसंबद्धो लोकत एवं प्रसिद्धः, नासौ श्रुत्या तात्पर्येण विवक्ष्यते. ईश्वरस्तु लोकतोऽप्रसिद्धत्वात् श्रुत्या तात्पर्येण विवक्षितः, इति न तस्याकस्मिंक वचनं युक्तम्। ''गुहां प्रविष्टावात्मानौ ही'' त्यत्राप्येतद्दर्शितम्–''द्वा सुपर्णा'' इत्यस्यामृचीश्वरक्षेत्रज्ञावुच्येते इति। यदापि पैङ्ग्युपनिषत्कृतेन व्याख्यानेनास्यामृचि सत्त्वक्षेत्रज्ञावुच्यंते, तदापि न विरोधः कश्चित्।।

कथम्? प्रणभृद्धीह घटादिच्छिद्रवत्सत्त्वाद्युपाध्यभिमानित्वेन प्रतिशरीरं गृह्यमाणो द्युभ्वाद्यायतनं न भवतीति निषिध्यते। यस्तु सर्वशरीरेषूपाधिभिर्विनोपलक्ष्यते, परमात्मैव स भवति। यथा घटादिच्छिद्राणि घटादिभिरुपाधिभिर्विनोपलक्ष्यमाणानि महाकाश एव भवन्ति, तद्वत्प्राणभृतः परस्मादन्यत्वानुपपत्तेः प्रतिषेधो नोपपद्यते। तस्मात्सत्त्वाद्युपाध्यभिमानिन एव द्युभ्वाद्यायतनत्वप्रतिषेधः। तस्मात् परमेव ब्रह्म द्युभ्वाद्यायतनम्।।

तदेतत् ''अदृश्यत्वादिगुणको धर्मोक्तेरि'' त्यनेनैव सिद्धम्। तस्यैव हि भूतयोनिवाक्यस्य मध्य इदं पठितम्–''यस्मिन्द्यौः पृथिवी चान्तरिक्षम्'' इति। प्रपञ्चार्थं तु पुनरुपन्यस्तम्।।७।। इति प्रथमं द्युभ्वाद्यधिकरणम्।।

इति शांकरभाष्य द्युभ्वाद्यधिकरणम् समाप्तम्

वार्तिकम्

द्युभ्वाद्यायतनं स्वशब्दात्।।१।। अस्पष्टब्रह्मलिङ्गानि निर्विशेषब्रह्मविषयाणि विचार्यत्वेन प्रधानीकृत्यायं चरणः प्रवर्तत इत्युक्तं न विस्मर्तव्यम्। स्याद् वैश्वानरशब्दस्य योगाद् वृत्तिः परमात्मनि, न तथा सेतुशब्दस्य; तेन तस्याप्रवर्तनात्। मुण्डके श्रूयते–''यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनस्सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथामृतस्यैष सेतुरि'' ति। अत्र यदेतद् द्युप्रभृतीनामोतत्ववचनादायतनं किञ्चिद् अवगम्यते, तत् किं परं ब्रह्म स्यात्, आहोस्विदर्थान्तरमिति सन्दिह्यते।।

अत्र चोद्यते–ननु–''अदृश्यत्वादिगुणको धर्मोक्ते'' रित्यनेनैव न्यायेनास्य मन्त्रस्य ब्रह्माभिधानपरत्वं सिद्धम्; तस्यैव हि भूतयोनिवाक्यस्य मध्य एतस्य मन्त्रस्य पठितत्वात्, अतोऽत्र पुनरयं संशयो नोपपद्यते–इति।।

अत्र वदन्ति–तन्न्यायसिद्धस्यैव प्रपञ्चार्थमिदमधिकरणम्–इति, तन्न युक्तम्; तत्रैव तत्प्रपञ्चस्यानेकैर्हेतुभिः कृतत्वात् पुनरिह तत्कारणवैयर्थ्यात् तदपेक्षायाः शान्तत्वात्। 'शतकृत्वः पथ्यमुपदेष्टव्यमि' ति न्यायात् पुनरुपदेश इति चेत्, न; अतिप्रसङ्गात्, सर्वस्याप्यभिहितन्यायस्य पुनरभिधानप्रसङ्गः ; तुल्यन्यायत्वात्। अपिच 'स्वशब्दात्' इति न्यायान्तरमेवाभिधीयते। न च न्यायान्तरसिद्धस्यार्थस्य न्यायान्तरेण प्रपञ्च उपपद्यते; सिद्धसाधनतादोषपराहतत्वेन तस्य प्रवृत्यानुपपत्तेः। संक्षेपेणोक्तस्य विस्तरेण कथनं हि प्रपञ्च इत्युच्यते। तत्र यदि पूर्वमन्यदभिधायोत्तरत्रान्यदभिधीयते, स कथं तस्य प्रपञ्चः स्यात्? इति।।

अन्ये पुनर्मन्यन्ते–अयं मन्त्रो नास्मिन् प्रकरणे पठित इति कृत्वा चिन्तेयम्–इति, तदपि न; ''मुक्तोपसृप्यव्यपदेशात्'' ''प्रकरणात्'' ''स्थित्यदनाभ्यां च'' इति सूत्राणि तथा सति विरुद्धेयरन्। न च–तेषां कृत्वाचिन्तोद्घाटनार्थत्वादविरोध–इति–वाच्यम्; तथा सत्येकेनैव सूत्रेण तदुद्घाटनोपपत्तेस्तदर्थं सूत्रत्रयकरणवैयर्थ्यापत्तेः। तस्मादन्यदेव समाधनं पुनरुक्तत्वस्य वाच्यम्–इति।।

तदुच्यते "अदृश्यत्वादिगुणको धर्मोक्ते" रित्यस्याक्षेपेणेदमधिकरणं प्रवर्तते। भवेददृश्यत्वादिगुणकः परमेश्वरः, यदि तद्वाक्यशेषे श्रूयमाणं द्युभ्वाद्यायतनं तदन्यद् न भवेत्। अस्ति च द्युभ्वाद्यायतनस्य वाक्यशेषगतस्य परमेश्वरादन्यत्वं निश्चितम्। अतः "सन्दिग्धे तु वाक्यशेषादि" ति न्यायेन वाक्यशेषगतमीश्वरादन्यत् प्रधानमव्याकृतं वा सूत्रात्मा वा जीवो वा सेत्स्यति, स एवोपक्रमेऽदृश्यत्वादिगुणको भूतयोनिर्भविष्यति, न परमेश्वर इति। कुतः पुनर्द्युभ्वाद्यायतनस्य परमेश्वरादन्यत्वं निश्चितम्? उच्यते–

अमृताद् भेदनिर्देशाद् भेदे षष्ठयाः प्रयोगतः।
सेतुशब्दप्रयोगाच्च द्युभ्वाद्यायतनं तु तत्॥

"अमृतस्यैष सेतुरि" ति हि प्राधान्याद् द्युभ्वाद्यायतनमेवामृतसम्बन्धितया सेतुतया च परामृश्यते; सम्बन्धस्य षष्ठयर्थत्वात्। न चामृताद् द्युभ्वाद्यायतनस्य सेतोर्भेदाभावे षष्ठयर्थयोग उपपद्यते; तस्य स्वप्रतियोग्यनुयोगिनोर्भेदनियतत्वात्। यत्रापि 'राहोः शिरः' 'पुरुषस्य चैतन्यम्' इत्यादौ तत्प्रतियोग्यनुयोगिनोर्नास्ति परमार्थतो भेदः ; राहुशिरसोः पुरुषचैतन्ययोरैक्यात् तत्रापि केनचिदुपाधिना तयोर्भेदं कल्पयित्वैव तद्व्यपदेशः। न चात्र सति संभवे तत्कल्पना युक्ता; षष्ठीश्रुतिव्याकोपापत्तेः। न च–एवममृतप्रातिपदिकार्थ एव ब्रह्मणोऽन्योऽस्त्विति–वाच्यम्; "तदेवामृतमुच्यते" "एतदमृतमभयम्" "आयुर्होपासतेऽमृतम्" इत्यादिश्रुतिष्वमृतशब्दस्य ब्रह्मण्येव प्रसिद्धेरत्रापि तत्रैव तस्यावधारणाद् देवानां पेयामृतस्य प्रकृतेऽसंभवेन ग्रहीतुमशक्यत्वात्। अपि चोपपद्यतां वाऽभेदेऽपि भेदं कल्पयित्वा 'राहोः शिर' इतिवत् षष्ठीश्रुतिः, कल्प्यतां वाऽमृतप्रातिपदिकार्थो ब्रह्मणोऽन्यः, तावतापि न द्युभ्वाद्यायतनं परं ब्रह्म भवितुमर्हति। कुतः? तत्र सेतुशब्दप्रयोगात्। सेतुशब्दो हि लोके पारावारवति जलस्य विधारके मृद्दार्वादिचये समुदायप्रसिद्धया वर्तते, नावयवप्रसिद्धया; तथा सति निगडादावपि तत्प्रयोगप्रसङ्गात्, षिञो बन्धनार्थात् सेतुशब्दनिष्पत्तेर्निगडादेरपि बन्धनहेतुत्वस्य तेनाविशिष्टत्वात्। तस्मात् सास्नादिमति गोशब्दवद् योगे सत्यपि रूढयैव जलविधारके मृद्दारुचये सेतुशब्दः, न योगेनेति वाच्यम्। प्रकृते चोक्तलक्षणस्य सेतोर्द्युभ्वाद्यायतनत्वासंभवाद् अन्यशब्दोऽन्यत्र प्रयुज्यमानो "यजमानः प्रस्तर" इतिवद् गुणयोगेनैव द्युभ्वाद्यायतने सेतुशब्दः प्रयुज्यते इत्यपि वाच्यम्। गुणोऽपि पारावारव्यवच्छिन्नत्वम्, अवनविधारकत्वम्। गुणवृत्त्यापि पुनर्निगडादौ प्रयोगाप्रसङ्गात्, तस्य च तत्रादर्शनात्। न च ब्रह्मणि पारावारगुणव्यवच्छेदोऽस्ति; तस्यानन्तत्वात्, "अनन्तमपारमि" ति श्रुतेः। तस्माद् यत् पारावारव्यवच्छेदगुणवत् प्रकृते संभवति, तदेव द्युभ्वाद्यायतनं ग्राह्यम्। तच्च प्रधानं परकल्पितं

संभवेत्; तस्य पुरुषाद् भिन्नत्वेन वस्तुपरिच्छिन्नत्वात्। तथाच श्रुति:-"अव्यक्तात् पुरुष: पर:। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गितिरि" ति, द्युभ्वाद्यायतनत्वेन तैरङ्गीकाराच्च।।

यदि चाशब्दत्वात् तदुपेक्ष्यते भवता; "महत: परमव्यक्तमि" ति श्रुते:-"आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति चे" त्यत्रान्यथा व्याख्येयत्वात्, अस्तु तर्हि भूतसूक्ष्मं द्युभ्वाद्यायतनम्; "तद्धेदं तर्ह्यव्याकृतमासीदि" त्यादिश्रुते:, तस्यापि पुरुषावधित्वेन पारवत्त्वात् सेतुत्वोपपत्ते:। सर्वकारणस्वभावत्वाच्च तत्रात्मशब्दप्रयोगोपपत्ति:; 'भूतात्मेन्द्रियात्मे' त्यादौ स्वभावेऽप्यात्मशब्दप्रयोगदर्शनात्। यदि ब्रूयात्-अव्याकृतमपि कारणब्रह्मोपाधित्वेनैव श्रुत्या प्रतिपाद्यते, न साक्षादायतनत्वेन कुत्रचित् श्रुत्युक्तम्-इति, एवं तर्हि वायुरेव द्युभ्वाद्यायतनम्; "वायुना वै गौतम सूत्रेणायं च लोक: परश्च लोक: सर्वाणि च भूतानि संदृब्धानि भवन्ती" ति श्रुत्यन्तरे तस्य साक्षाद् भूतायतनत्वश्रुते:। भवति चात्मोपाधित्वात् स आत्मा। यदि चात्मोपाधित्वेऽपि न स साक्षादात्मेति मन्यते, भवतु तर्हि शारीर: ; तस्य भोक्तुर्भोग्यद्युप्रभृतिना सरूपस्यायतनत्वोपपत्ते:। तस्माद् न द्युभ्वाद्यायतनं परं ब्रह्म। एवं च सति य एव वाक्यशेषे द्युभ्वाद्यायतनं निश्चित:, स एवोपक्रमेऽप्यदृश्यत्वादिगुणक इति।।

एवं प्राप्ते ब्रूम:- *द्युभ्वाद्यायतनं स्वशब्दात्*।। 'द्युभ्वाद्यायतनमि' त्यत्रेतरेतरद्वन्द्वगर्भस्तद्गुणसंविज्ञानो बहुव्रीहि:, तदुत्तरश्च षष्ठीतत्पुरुष:। विग्रहवाक्यं तु भाष्ये। द्युभुवोरादित्वं तु मन्त्रपाठापेक्षया, उभयग्रहणं च विषयावाक्योपलक्षणार्थम्। आयतनमिति मान्त्रवर्णिकसमस्यार्थनिर्देश:। परमेव ब्रह्मेह द्युभ्वाद्यायतनं ग्राह्यम्, नान्यत् प्रधानादि। कुत:? "तमेवैकं जानथ आत्मानमि' ति तद्वाचकात्मशब्दप्रयोगात्। न च-जीवात्मन्यनैकान्तिकोऽयं हेतुरिति-वाच्यम्; तस्याप्यमुख्यात्मत्वात्, मुख्यया वृत्त्या तत्रात्मशब्दस्याप्रवृत्ते:। एतदेव दर्शयितुं "स्वशब्दादि" ति हेतु: कृत: ; नात्मशब्दादिति। स्वशब्दादिति तन्त्रोच्चारणमभिप्रेत्य "क्वचिच्चे" ति भाष्यं प्रवृत्तम्। ननु-अत्र मुख्यमात्मानमेव विवक्षित्वाऽऽत्मशब्द: प्रयुक्त इति कुतोऽध्यवसीयते? "तमेवैकं जानथ" इति तन्मात्रज्ञेयत्वेन विशेषितत्वादिति ब्रूम: ; जीवात्मन: सर्वदा ज्ञातत्वेन तज्ज्ञानविधानानुपपत्ते:, तज्ज्ञानेऽप्यज्ञानावश्यकत्वात्, "तमेवैकम्" इत्यवधारणानुपपत्तेश्च। तदेतदभिप्रेत्यावधारणकृत्यमाह भाष्यकार:- *तत्र त्वायतनायतनवद्भावश्रवणादिति*।। एतेन-पराभिमतमुभयात्मकं ब्रह्मेत्यपि-निराकृतं द्रष्टव्यम्; ब्रह्मण एकरसत्वनानारूपतयो: पारमार्थिकत्वे "तमेवैकमि" त्यवधारणानुपपत्ते:। एकानेकत्वेऽपि ब्रह्मण एकरूपतैव मोक्षफलाय ज्ञातव्येत्युपदेशो न विरुद्ध इति चेत्, न; तथात्वे एकरूपतया एव निष्कृष्य ज्ञातुमशक्यत्वात् तदुपदेशानर्थक्यापत्तेराकाशहननोपदेशवत्। न हि वृक्ष: शाखास्कन्धविटपादिभ्यो निष्कृश्येश्वरेणापि

ज्ञातुं शक्यते। संसाररूपस्य मिथ्यात्वे रज्जुरिव भुजगादिभ्य एकरसं ब्रह्म पारमार्थिकं तस्माद् विविच्य ग्रहीतुं शक्यत एव। अपि च यदि ब्रह्म वृक्षवदेव परमार्थतः सावयवं स्यात्, स्यात् तर्हि तद्वदेवानित्यमपि; सावयवस्यानित्यत्वनियमात्, कार्यत्वनियमाच्च। न चैतद् युक्तम्; ''अजो नित्यः शाश्वतोऽयं पुराण'' इत्यादि श्रुतिशतविरोधात्। एकरसत्वमात्रावधारणेऽपि–''इदं सर्वं यदयमात्मा'' ''सर्वं खल्विदं ब्रह्म'' त्यादिश्रुतिशतविरोध इति चेत्, न; 'रज्जुरेवायं सर्पः' 'शुक्तिरेवेदं रजतम्' इत्यादिवद् बाधायां सामानाधिकरण्याभिप्रायेण तद्वाक्यसङ्गत्युपपत्तेः। कुत एतदवसीयते बाधायां सामानाधिकरण्यमिति? यतो विकारात्मकं नानाभूतं जगत् पश्यतो निन्दावादः श्रूयते–''मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'' इति। तदिदमुक्तम्– *विकारानृताभिसन्धस्य चापवादः श्रूयत इति*।। विकारात्मकेऽनृतेऽभिसन्धा=अभिसन्धानम्, दृष्टिर्यस्य स विकाराभिसन्धः, तस्येति यावत्। अपवादः=दोष इत्यर्थः। इतोऽपि नानात्मकता ब्रह्मणो न पारमार्थिकीत्याह– *स यथा सैन्धवघन इति*।। तस्मात् स्वशब्दात् द्युभ्वाद्यायतनं परं ब्रह्मैवेति सिद्धम्।।

यदुक्तम्–द्युभ्वाद्यायतनस्य सेतुत्वश्रुतेः सेतोश्च परावारवत्त्वाद् ब्रह्मणस्तु तदसंभवाद् न द्युभ्वाद्यायतनं परं ब्रह्म–इति, तत्रोच्यते; सेतुशब्दप्रयोगो ब्रह्मणि न संभवतीति कोऽभिप्रायः? किं गुणवृत्त्या तदसंभवस्तत्रोच्यते, किं वा रूढया? तत्र नाद्यः : ''रामभद्रो रघुकुलसेतु'' रितिवद् विधारणत्वगुणमात्रविवक्षयाऽत्र सेतुशब्दप्रयोगात्, ब्रह्मणि च सर्वाधारे तत्संभवात्, न पारवत्त्वादिविवक्षया; प्रकृते तदसंभवात्। न हि 'सिंहो देवदत्तः' इत्यत्र सत्यपि सिंहस्य केसरादिमत्त्वे गुणे प्राकरणिके देवदत्ते तद्विवक्ष्यते। न च प्रधानादिपक्षपरिग्रहेऽपि तदुपपत्तिरस्ति; उभयान्तावच्छिन्नो हि लोके पारावारवान् दृष्टः। न च प्रधानादेरुभयान्तावच्छेदसत्वया वस्तुपरिच्छेदे सत्यप्यभ्युपगम्यते। यद्यपि वायोरुभयान्तावच्छेदः संभवति; तथापि न स प्राकरणिक इति विवक्ष्यते। एतेन–पारवत्त्वमात्रं विवक्षितम्, न पारावारवत्त्वम्। तथाच नोभयान्तप्राप्तिरिति–पारास्तम्; पारवतोऽवारवत्वनियमात्। ननु–विधारणत्वमात्रगुणविवक्षायां हडिनिगडादावपि तस्य विद्यमानत्वात् सेतुशब्दप्रयोगप्रसङ्ग इति–चेत्, न; न हि निमित्तमस्तीति नैमित्तिकेनावश्यं भवितव्यमिति नियमोऽस्ति, अपि तु नैमित्तिके सति निमित्तमाश्रयणीयमिति हि लौकिकतान्त्रिकमर्यादा। कुतः? सत्यपि निमित्ते नैमित्तिकादर्शनात्। अपि च तवापि मते तुल्योऽयमतिप्रसङ्गः ; हडिनिगडादावपि पारवत्त्वादेर्दर्शनात्, वस्तुव्यवच्छेदस्यैव पारवत्त्वेन त्वयाऽभ्युपेतत्वात्। तस्माद् विधारकत्वगुणयोगाद् उपपद्यते ब्रह्मणि सेतुशब्दप्रयोगः। तदिदमुक्तम्– *विधारणत्वमात्रं सेतुशब्दश्रुत्या विवक्ष्यते न पारवत्त्वादीति*।। अस्तु तर्हि रूढया सेतुशब्दस्य ब्रह्मण्यसंभव इति चेत्, न; त्वत्पक्षेऽपि तदसंभवस्य तुल्यत्वात्। मृद्दार्वादिमये जलविधारक एव लोके सेतुशब्दस्य रूढत्वात्, प्रकृते च तस्यासंभवात्। तदिदमाह स्म– *न हि

मृद्दारुमयो लोके सेतुर्द्रष्टः, इत्यत्रापि मृद्दारुमय एव सेतुरभ्युपगम्येतेति*।। अभ्युपेत्य च सेतुशब्दस्य रुढिमेतदवोवाम, वस्तुतस्तु पाचकादिशब्दवत् सर्वत्र योगेनैव सेतुशब्दस्य प्रवर्तनम्; "षिञो बन्धन" इत्यस्य सेतुरिति रूपनिष्पत्तेरित्युक्तत्वात्, ब्रह्मणि च तद्योगसंभवस्य गुणवृत्तिप्रदर्शनेनैव दर्शितत्वात्, बन्धनशब्दार्थस्य विधारकत्वादनर्थान्तरत्वात्। न च–एवं सति हडिनिगडादावपि लोके तत्प्रयोगः स्यादित्युक्तमिति–वाच्यम्; दत्तोत्तरत्वात्। उक्तमेतत्–न हि निमित्ते सति नैमित्तिकेनावश्यं भवितव्यमिति; पङ्कजनित्वयोगे सत्यपि शैवालादिषु पङ्कजशब्दप्रयोगाभावात् तत्र तत्प्रयोगाभावदर्शनोपपत्तेः। यथाच पङ्कजशब्दो न तामरसे रूढः, किं तर्हि? यौगिक एव, तथोपपादितमधस्तात्। अपि चास्तु वा लोके सेतुशब्दो मृद्दार्वादिमये जलविधारके रूढः ; तथापि प्रकृते तदसंभवाद् योगार्थोऽव्याहतः। तस्माद् योगेनैवात्र सेतुशब्दो ब्रह्मणि प्रयुज्यत इति। तदिदमुक्तम्–*सेतुशब्दार्थोऽपि विधारकत्वमात्रमेव, न पारवत्त्वादि; षिञो बन्धनकर्मणः सेतुशब्दव्युत्पत्तेरिति*।। यद्वा–ननु एवं तर्हि पारवत्त्वादिरेव लोकवेदसाधारणः सेतुशब्दार्थोऽस्तु, नेत्याह–*सेतुशब्दार्थोऽपीति*।। न च–एवं ब्रह्मणः सेतुत्वेऽमृतस्येति षष्ठीप्रयोगो नोपपद्यत इत्युक्तमिति–वाच्यम्; तस्याः पुरुषस्य चैतन्यमितिवद् औपचारिकभेदाभिप्रायत्वात्, "अमृतस्य नाभि" रित्यादि बहुषु स्थानेषु तथा प्रयोगोपपत्तेः। भावप्रधानत्वाद्वाऽमृतपदस्य; "अमृतस्येशान" इति श्रुत्यन्तरात्। अस्तु वा षष्ठीश्रुतेरमृतप्रातिपदिकार्थसेतुशब्दार्थयोर्भेदः, अस्तु वा पारवत्त्वाद्येव सेतुशब्दार्थः ; तथापि द्युभ्वाद्यायतनस्य ब्रह्मत्वमक्षतमेव; ततोऽर्थान्तरस्यैव तज्ज्ञानादेः सेतुस्तुत्योपात्तत्वात्। एष इति प्राधान्येन पुंलिङ्गेन च तत्परामर्शस्य विधेयतया विशेष्यसेतुलिङ्गापेक्षया वोपपत्तेरित्याह–*अपर आहेति*।। अमृतत्वसाधनत्वादिति*।। अस्मिन् पक्षेऽपि भावप्रधानो निर्देशो विवक्षित इत्यभिप्रायः। एवं च सति काकस्य कार्ष्ण्याद् धवलः प्रासाद इतिवद् व्यधिकरणत्वादसिद्धोऽयं पूर्वपक्षिणो हेतुरित्याह–*तत्र यदुक्तमिति सेतुश्रुतेरिति*।। उपलक्षणमेतत्। षष्ठीश्रुतेरित्यपि द्रष्टव्यम्।।१।।

मुक्तोपसृप्यव्यपदेशात्।।२।। इतश्च परमेव ब्रह्म; द्युभ्वाद्यायतनं प्रकृत्य तस्याविद्यादिदोषैर्नामरूपाभ्यां च विनिर्मुक्तेनोपगम्यत्वं दर्शयति श्रुतिः–'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" "तथा विद्वान् नामरूपाद् विमुक्तः परात् परं पुरुषमुपैति दिव्यम्" इति। अत्र हृदयग्रन्थिपदेन पञ्चपर्वाविद्या गृह्यते। सर्वसंशया इति असंभावनाः। कर्माणि धर्माधर्मलक्षणानि। तमेतं हृदयग्रन्थिशब्दार्थं मुक्तिप्रतियोगित्वेन दर्शयति–देहादिष्वनात्मस्वहमित्यात्मबुद्धिरविद्येत्यादिना*।। मोहश्चेत्यनेनास्मितामूलाविद्या च गृह्यते। सापि विवेकविरोधित्वात् हृदयग्रन्थिरित्युच्यते। इत्येवङ्काराभ्यां प्रकारवाचिभ्यां श्रुत्युक्तसंशयादीन् लक्षयति। ननु–मुक्तोपसृप्यता प्रधानादेरप्यविशिष्टेति, नेत्याह–*ब्रह्मणश्चेति*।। चोऽवधारणे।

कामाः=अविद्यादयः।।२।। सूत्रं व्याख्यायोत्सूत्रं हेत्वन्तरमाह– *नानुमानमतच्छब्दात्*।।३।। निगदमस्य भाष्यम्। तत एव न वायुरपीत्यपिशब्देनाव्याकृतं निराकार्यत्वेन समुच्चीयते।।३।।

अस्तु तर्हि चेतन एव प्राणभृद् द्युभ्वाद्यायतनम्, नेत्याह– *प्राणभृच्च*।।४।। चेनातच्छब्दादिति हेतुरनुकृष्यते। पृथग्योगकरणं वक्ष्यमाणसूत्रेषु जीवस्यानुवर्तनार्थम्। शेषं भाष्ये।।४।।

भेदव्यपदेशात्।।५।। ''तमेवैकं जानथ आत्मानमि'' ति ज्ञातृज्ञेयभावेन जीवात्मनो द्युभ्वाद्यायतनस्य च भेदं व्यपदिशति। तस्मादपि न द्युभ्वाद्यायतनं शारीरः।।५।।

इतोऽपि न शारीरः, कुतः? *प्रकरणात्*।।६।। प्रकरणं चेदं परमात्मनः, न शारीरस्य; ''कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवती'' त्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय–यत्तदद्रेश्यमग्राह्यमि'' त्यादिना परमात्मन एव प्रतिपादनात्। न ह्युपाधिपरिच्छिन्नशारीरविज्ञानात् सर्वविज्ञानं भवति, न वा तस्यादृश्यत्वादिगुणकत्वमस्ति, इत्युपपादितम ''दृश्यत्वादिगुणको धर्मोक्तेरि'' त्यत्र। परमात्मनस्तु सर्वात्मकत्वादुपपद्यते तद्विज्ञानात् सर्वविज्ञानम्, अदृश्यत्वादिगुणकत्वं च; सर्ववेदान्तेषु तस्य तद्रूपप्रतीतेरिति।।६।।

इतश्च द्युभ्वाद्यायतनं न शारीरः। *स्थित्यदनाभ्यां च*।।७।। भेदव्यपदेशादिति मण्डूकप्लुत्याऽनुषज्यते। यदि जीवो द्युभ्वाद्यायतनं स्यात्, तर्हि तस्यैव प्राकरणिकत्वाद् ''द्वा सुपुर्णा'' इति मन्त्रे स्थित्यदनाभ्यां तस्माद्भेदेन परमात्मनो व्यपदेशो विफलः स्यात्। त्र्युपसत्तास्तुतये द्वादशोपसत्तावद् जीवस्तुतये तद्भेदेन परमात्मोपदेशो भविष्यति। परमात्मा त्वाकाशवत् संनिहितोऽपि किमपि नाश्नाति, जीवस्तु महानुभावः सर्वं कर्मफलमश्नातीति जीवस्तुतिरिति चेत्, न; वैषम्यात्। युक्तं तत्राहीने वचनान्तरेण प्राप्ताया द्वादशोपसत्ताया अनुवादेन ज्योतिष्टोमप्रकरणे तदङ्गतया विहितायाः त्र्युपसत्तायाः स्तुतिः ''तिस्त्रः साह्नस्योपसदो द्वादशाहीनस्ये''ति। न च परमात्मेहोदासीनो वचनान्तरसिद्धोऽस्ति, येन तदनुवादेन जीवस्तुतिः स्यात्। एतेन–''अर्थवादो वा प्रकरणादि'' ति निर्गताधिकरणन्यायोऽपि–अपास्तः ; परमात्मनोऽनधिगतत्वात्, ''अधस्तात् समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयती'' त्यत्रोपरिधारणवदेतेनैव वाक्येन परमात्मस्वरूपप्रतिपादनाभ्युपगमे वाक्यभेदः स्यात्। न च–''पूष्णोऽहं देवयज्यया प्रजया पशुभिरभिजनिषीये'' ति पपानुमन्त्रणमन्त्रेष्विव लिङ्गेन प्रकरणबाधो न दोषायेति–वाच्यम्; सत्यमेवम्, यदि जीवस्येदं प्रकरणं स्यात्। न चैतदस्तीत्युक्तम्; तस्य भोक्तुः प्रत्यक्षसिद्धत्वेनाप्रतिपाद्यत्वाच्च, अभ्युपेत्य च तत्प्रकरणं दोषस्याभिहितत्वात्, भोक्तृस्वरूपानुवादस्य तस्य परमात्मस्वरूपप्रतिपादनार्थत्वेन सार्थकत्वोपपत्तेः–य एवं विद्वान् पौर्णमासीं यजते'' ''य एवं

विद्वानमावास्यां यजत'' इति समुदायद्वयानुवादस्य ''दर्शपूर्णमासाभ्यां स्वर्गकाम'' इत्यधिकारसम्बन्धविधानार्थत्वेनार्थवत्त्ववत्। एतेन-''समेषु वाक्यभेदः स्यादि'' तिन्यायेनोभयप्रतिपादनम्-अपास्तम्; भोक्तुर्लोकसिद्धत्वेनाविवक्षितत्वात्। तदिदमुक्तम्-*क्षेत्रज्ञो हीत्यादिना*।। यथा चास्यामृचीश्वरो विवक्षितः, तथा प्रदर्शितमस्माभिः-''गुहां प्रविष्टावात्मानौ हि तद्दर्शनादि'' त्यत्र। तस्माद् द्युभ्वाद्यायतनप्रकरणे ''द्वा सुपर्णा सयुजा सखाया'' इत्यस्यामृचि ''तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती'' ति परस्परविरोधिभ्यां जीवपरमात्मानावुपलक्ष्य जीवात्मनो भदेन परमात्मप्रतिपादनात् स एव प्रकरणीह द्युभ्वाद्यायतनमिति सिद्धम्। ननु-पैङ्गिरहस्यब्राह्मणेनास्य मन्त्रस्य सत्त्वक्षेत्रज्ञाभिप्रायतया व्याख्यातत्वात् तद्विरोधेनेश्वराभिप्रायवर्णनं सूत्रकाराणामयुक्तमिति, तत्राह-*यदापि पैङ्ग्युपनिषत्कृतेन व्याख्यानेनेति*।। प्रपञ्चार्थं तु पुनरुपन्यस्तमिति*।। तदाक्षेपसमाधानाभ्यामिति मन्तव्यम्; अन्यथोक्तदोषापत्तेरिति।।७।। इति प्रथमं द्युभ्वाद्यधिकरणम्।।

इति वार्त्तिकम द्युभ्वाद्यधिकरणम् समाप्तम्

प्रदीपः

निर्विशेषपराण्यस्पष्टब्रह्मलिङ्गानि वाक्यानि प्राधान्येनास्य पादस्य विषयः। अत्र त्रयोदशाधिकरणानि वर्तन्ते–(१) द्युभ्वाद्यधिकरणम् (२) भूमाधिकरणम् (३) अक्षराधिकरणम् (४) ईक्षतिकर्माधिकरणम् (५) दहराधिकरणम् (६) अनुकृत्यधिकरणम् (७) प्रमिताधिकरणम् (८) देवताधिकरणम् (९) अपशूद्राधिकरणम् (१०) कम्पनाधिकरणम् (११) ज्योतिरधिकरणम् (१२) अर्थान्तरत्वाधिकरणम् (१३) सुषुप्त्युत्क्रान्त्यधिकरणम्–इति। अत्र प्रथम-द्वितीय-तृतीय तुरीय-षष्ठ-सप्तम-दशमैकादश-द्वादश-त्रयोदशा-धिकरणानि निर्विशेषपराणि, पञ्चमं सगुणपरम्, अष्टम-नवमं तु प्रासङ्गिकस्वतन्त्राधिकारविचारपरे इति विवेकः। तत्र प्रथमपादेऽप्याकाश-ज्योतिः प्राणशब्दानां ब्रह्मपरत्वं यद्यपि निर्धारितम्; तथापि तस्य स्पष्टब्रह्मलिङ्गवाक्यविषयत्वादस्य चास्पष्टब्रह्मलिङ्गविषयत्वात्–दहराधिकरण-कम्पनाधिकरण-ज्योतिरधिकरणार्थान्तरत्वाधिकरणानां न पौनरुक्त्यम्। अक्षराधिकरणं त्वस्पष्टनिर्विशेषब्रह्मलिङ्गमपि पूर्वत्रैव परविद्योपक्रमाभावात् ''ओङ्कार एव वेदं सर्वम्'' इति श्रुत्यन्तर ओङ्कारस्यापि वर्णात्मकस्य सार्वात्म्याम्नानात् तत्रैव ब्रह्मशब्दादिसामानाधिकरण्याभावाच्च नादृश्यत्वाधिकरणेन गतार्थम्। द्युभ्वाद्यधिकरणेन गतार्थत्वशङ्का तु स्वशब्दाभावाद् निर्विशेषप्रकरणाभावाच्च न सावसरा, इति सर्वाण्यधिकरणानि सार्थकानि। अधिकं तत्तदधिकरणावसरे विवेचयिष्यते॥

तत्र प्रथमं द्युभ्वाद्यधिकरणे सप्त सूत्राणि। तत्र षष्ठ-सप्तमे–अदृश्यत्वाधिकरणार्थसंग्रहपरे, स्वतन्त्रयुक्तिनिरूपणपराणि तु प्रथमादीनि पञ्चमान्तानि सूत्राणीति विवेकः॥

नन्वेवं सति–कथमदृश्यत्वाधिकरणेन न गतार्थत्वमिति–चेत्, अदृश्यत्वाधिकरण-स्याक्षरपदार्थनिरूपणपरत्वात्, अक्षरपदस्य तु–''यस्मिन् द्यौः पृथिवी चे'' ति वाक्यपूर्वतनवाक्यपर्यन्तमेवाम्नानेनोत्तरत्रनाम्नानेन परविद्याप्रकरणस्य तावतैव समाप्तिरित्यवगमात्,

"तमेवैकं जानथ आत्मानमि" ति शब्दान्तरेण ज्ञेयस्वरूपनिर्देशात्, प्रकरणविच्छेदेन भिन्नवाक्यताशङ्काया अधिकाया वारणेनास्याधिकरणस्य सार्थक्याच्च। अस्यापि वाक्यस्य ब्रह्मपरत्वे तु–अदृश्यत्वाधिकरणस्यैव विस्तारेणोपपादनं कृतं भवति; यतः–"यस्मिन्, द्यौरि" त्यादिवाक्यानुपपत्तिरप्यक्षरस्य ब्रह्मत्वे युक्त्यन्तरमनेन सूच्यत इति। एतेन–नेदमधिकरणस्य प्रपञ्चार्थमिति शङ्का–प्रत्युक्ता; अन्यथा "नानुमानमतच्छब्दात्" "प्रकरणादि" त्यादीनां सूत्राणां कथमुपपत्तिरिति॥

अत्रानुसन्धेयानि विषयवाक्यानि सर्वाण्यदृश्यत्वाधिकरणविषयवाक्यानि तदनन्तराणि च–"यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चतामृतस्यैष सेतुः। अरा इव रथनाभौ संहता यत्र नाड्यस्स एषोऽन्तश्चरते बहुधा जायमानः। ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पराय तमसः परस्तात्। यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः। मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं संनिधाय। तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति। भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे।" "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति।" इति वाक्यानि॥

तत्र यस्मिन् द्यौरित्यादीनां पुंलिङ्गैतच्छब्दादिघटितत्वम्, यः सर्वज्ञः सर्वविदिति पुनरुक्तिश्च भिन्नवाक्यतायां मूलम्। अत एव–अदृश्यत्वाधिकरणेऽतद्धर्माभिलापो न हेतुरुक्तः, अत्र तु–नानुमानमतच्छब्दादिति सोऽपि हेतुरुक्त इति विशेषः। *द्युभ्वाद्यायतनं स्वशब्दात्*॥१॥ द्युभ्वाद्यायतनम्, परं ब्रह्म, स्वशब्दात्=आत्मशब्दसमानाधिकरणत्वात्। जीवस्य तु न मुख्यमात्मत्वम्। अत्र तु मुख्यात्मैव विवक्षितः; "तमेवैकमि" त्येकपदसामानाधिकरण्यात्, न जीव उपाधिपरिच्छिन्न एक इति सूत्रार्थः॥

अत्र स्वशब्देनात्मशब्द एव ब्रह्मसम्बन्धिताऽपि विवक्षितुं शक्यते। सेतुशब्दस्तु न पूर्वपक्षिणाम्, न वा सिद्धान्तिनां मते स्वशब्दो भवितुमर्हति; षिञो बन्धकर्मणि इति धातोर्निष्पन्नस्य तस्य केवलं यौगिकत्वेन सर्वसाधारण्यात्, इति स्वशब्दोऽयमात्मशब्दमेवाभिधत्ते। अत्र सेतुशब्दार्थप्रसिद्धिः पूर्वपक्षबीजम्, आत्मशब्दस्तु सिद्धान्तबीजमिति तयोर्बलाबलनिर्णयार्थमधिकरणारम्भः, इति द्युभ्वाद्यायतनम्, प्रधानं वा, जीवो वा, ब्रह्म वेति संशयोपपत्तिः। तदिदमाह– *अत्र यदेतदित्यादिना*॥

इयमत्र भामत्याः पूर्वपक्षकारिका–

पारवत्त्वेन सेतुत्वात्, भेदे षष्ठया: प्रयोगत:।
द्युभ्वाद्यायतनं युक्तं नामृतं ब्रह्म कर्हिचित्॥

इति। तत्र भेदे षष्ठया: प्रयोगत इत्यस्य मूलं भाऽयम्– *अमृतस्येति*॥ पारवत्त्वेन सेतुत्वादित्यस्य मूलं भाष्यम्– *पारवानिति*॥ एष शब्दोऽस्मिन् विषयवाक्ये प्रक्रमिष्यमाणपरामर्शी ''एतस्यैव रेवतीषु वारवन्तीयमि'' ति वाक्य इवेति स्वीकर्तव्यम्। तथाचामृतस्यैष सेतुरित्यत्रमृतसेतुरेव द्युभ्वाद्यायतनमिति वक्तव्यम्। न च ब्रह्मणोऽमृतस्य ब्रह्मसम्बन्धो युक्त:, यदि सेतु: परं ब्रह्म स्यात्। वस्तुतस्तु न सेतुत्वमेव युक्तम्। प्रधानेऽपि तदसंभवशङ्कां वारयति– *अर्थान्तर इति*॥ प्रधानस्यापि पारवत्त्वेऽपि नावारवत्त्वं संभवति, इति शङ्कायामाह– *श्रुतिप्रसिद्धो वायुरिति*॥ ननु–अत्र मते नात्मशब्दस्वारस्यमित्यत आह– *शारीरो वेति*॥ तस्यायतनत्वमुपपादयति– *तस्यापीति*॥ अत्रामृतसम्बन्धसेतुत्वयोरब्रह्मलिङ्गयो: प्राबल्यात्, आत्मशब्दस्य च साधारण्यात्, पूर्वाधिकरण इव तद्विशेषकाभावाभिमानाच्च द्युभ्वाद्यायतनत्वं ब्रह्मलिङ्गं तिरोभूतमित्यस्पष्टब्रह्मलिङ्गकत्वम्। पूर्वाधिकरण इव विशेषाभावात् पूर्वपक्ष इत्याक्षेपसङ्गति:। इयमत्र भामत्या: सिद्धान्तकारिका–

धारणाद्वाऽऽमृतत्वस्य साधानाद्वाऽस्य सेतुता।
पूर्वपक्षेऽपि मुख्यार्थ: सेतुशब्दो हि नेष्यते॥

सेतुशब्दस्य ब्रह्मणि प्रवृत्तिर्योगेन वर्तत एव, प्रधानादावपि गुणेनैव तत्प्रवृत्तिर्वक्तव्येति कारिकार्थोऽन्ते–यत्तूक्तमित्यादिना अयुक्तमित्यन्तेन भाष्येण व्युत्पादित:। सांप्रतं तु सूत्रव्याख्यानपूर्वकं सिद्धान्तपक्षमुपपादयति– *द्यौश्चेत्यादिना*॥

स्वशब्दं व्याचष्टे– *आत्मशब्दादिति*॥ 'स्वमात्मात्मीय' इति कोशादिति भाव:। सेतावात्मशब्दं प्रदर्शयति– *आत्मशब्दो हीति*॥ ननु–आत्मशब्दस्य जीवब्रह्मसाधारणत्वाद् विशेषाभावे कुतो ब्रह्मपरत्वमित्यत आह– *आत्मशब्दश्चेति*॥ एकशब्दसमभिव्याहृत इत्यादि:। *परमात्मपरिग्रह इति*॥ ब्रह्मसम्बन्धिसदादिशब्देनायतनप्रतिपत्तेरत्रापि ब्रह्मसम्बन्ध्येव सेतुपदमिति भाव:। अत्रैव पक्षे प्रकृतसन्दर्भस्यापि स्वारस्यं प्रदर्शयन्नाह– *स्वशब्देनैव चेति*॥ स्वीयपरेणेति शेष:॥

''तमेवैकमि'' त्यस्य मतान्तरेऽनुपपत्तिमाशङ्कानिरासपूर्वकं प्रदर्शयति– *यथेत्यादिना*॥ अन्यद् वार्तिकादौ स्पष्टम्॥१॥

सेतोरेवास्य मुक्तप्राप्यत्वनिर्देशानुपपत्तिरपि सिद्धान्तयुक्तिरित्याह– *मुक्तोपसृप्यव्यपदेशात्*।।२।। मुक्तोपसृप्यत्वपरं वाक्यम्–"तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमि' ति। अत्र परात् परत्वस्य दिव्यपुरुषत्वस्य च निर्देशात् "अक्षरात् परतः परः" "दिव्यो ह्यमूर्तः पुरुष" इति वाक्यार्थद्वयं प्रत्यभिज्ञायते, इति परविद्याविषयाक्षरस्यैव सेतुत्वं द्युभ्वाद्यायतनत्वं चावगम्यते, इति न प्रधानत्वं शारीरत्वं वा तस्येति विशदमवधार्यते। अत्र "नामरूपाद्विमुक्त" इति प्रतिपादितो नामरूपविवेक एव "तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चते" तिवाक्येऽपि प्रत्यभिज्ञायते, इति "तमेवैकमि" ति तच्छब्दार्थ एव परात् परो दिव्यः पुरुष इति ज्ञायत इति परविद्याननुकर्षणेऽपि न द्युभ्वाद्यायतनस्य प्रधानत्वादिकमिति गम्यत इत्याह– *अपिच तमेवैकमिति*।। तथाच आत्मशब्दस्य साधारणस्याप्यत्रपि विशेषो वर्तत इति वैश्वानराधिकरणन्यायेनाप्येकवाक्यता सिद्ध्यति। अत्र मुक्तस्यापि प्राप्यं परं ब्रह्मेति वर्णनात गौणमुक्तिर्जीवन्मुक्तानामाधिकारिकाणां हिरण्यगर्भादीनामिति सूच्यते, यानधिकृत्य "जगद्व्यापारवर्जमि"–त्यादिसूत्राणि।।२।।

अथ–अन्तर्याम्यधिकरणगतस्य "न च स्मार्तमतद्धर्माभिलापादि" ति सूत्रस्यानुसारिन्यायेनापि द्युभ्वाद्यायतनस्य परब्रह्मत्वमित्याह– *नानुमानमतच्छब्दादिति*।।३।। अनुमानम्, स्मार्तं प्रधानम्, न द्युभ्वाद्यायतनम् अतच्छब्दात्=अतद्धर्माभिलापादिति सूत्रार्थः। अदृश्यत्वाधिकरणविषयवाक्येषु नातद्धर्माभिलाप इति खलु पूर्वपक्षाशयः। यतः–"यस्सर्वज्ञ" इत्यस्यान्यपरत्वं तत्राभिमतम्। अत्र तु–'यः सर्वज्ञः सर्वविद्यस्यैष महिमा भुवी" ति स्वप्रकरण एव सर्वज्ञत्वं पुनरपि श्रूयमाणं कथं प्रधानत्व उपपद्येतेति भावः।।३।।

अथ–"शारीरश्चोभयेऽपि हि भेदेनैनमधीयते" इति सूत्रार्थमपि द्वाभ्यां संगृह्णाति–"प्राणभृत्' 'भेदव्यपदेशादि" ति।।४।।५।। प्राणभृति हेतुद्वयसंभवमभिप्रेत्य पृथग्योगकरणमिति भावः। तदिदमुक्तम्– *पृथग्योगकरणमुत्तरार्थमिति*।।४।।५।।

अथ यथावसरम्–अदृश्यत्वादिगुणको धर्मोक्तेरिति न्यायेनैवास्यापि निर्णीतार्थत्वमुपपादयन्नाह– *प्रकरणादिति*।।६।। परविद्याप्रकरणादित्यर्थः। न ह्यत्र परविद्याप्रकरणविच्छित्तिकल्पनायां किञ्चित्कारणमस्ति। ब्रह्मात्मनोरभेदेन पुंलिङ्गेनाप्यक्षरग्रहणं "सोऽकामयते" त्यादौ पुच्छब्रह्मण इव न विरुद्धम्। यस्सर्वज्ञ इति पुनरप्याम्नानं तु प्रत्यभिज्ञानार्थत्वाद् भूषणमेव, न दूषणम्। तथाच नावसरलेशोऽपि शङ्काया इति भावः।।६।।

स्थित्यदनाभ्यां च।।७।। व्यपदेशादित्यध्याहियते। जीवपरमात्मनोरेकतरस्योदासी–

नत्वमेकतरस्य भोक्तृत्वं च श्रूयते–''द्वा सुपर्णा सयुजा सुखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनशनन्नन्योऽभिचाकशीती'' ति। यद्यप्यत्र वाक्ये प्रथममशनमनन्तरमनशनं चाम्नायते; तथापि तात्पर्यविषयत्वेनानशनस्याभ्यर्हितत्वम्. अन्यस्य त्वतात्पर्यविषयत्वेनानुवाद इति भावं मनसि निधाय--स्थित्यदनाभ्यामिति सूत्रितम्। तथाच द्युभ्वाद्यायतनम्, न जीवः, भोक्तृभिन्नतया वाक्यशेषतात्पर्यविषयत्वादिति सूत्रार्थः।।

इदं हि प्रकरणं यदि शारीरस्य, तर्हि परमात्मन उपदेशो निरर्थकः स्यात्। न हि परमात्मनः प्रमाणान्तरेण ज्ञानमिति न जीवस्तुत्यर्थ तस्यानुवादः संभवतीति। यदि तु परमात्मनः प्रकरणम्, तर्हि जीवानुवादेन परमात्मोपदेशः सार्थकः, उभयप्रतिपादने तु वाक्यभेद इति भावः। तदिदमुपन्यस्याशङ्कानिरासाभ्यां विशदयति–*ताभ्यां चेत्यादिना–वचनं युक्तमित्यन्तेन*।। इयमेव रीतिः–गुहां प्रविष्टाविति सूत्रविषयवाक्येऽपि दर्शितेति तन्यायेनाप्यस्य वाक्यस्य जीवपरमात्मपरत्वमेव स्वीकर्तव्यमिति हि वस्तुस्थितिः। तदिदं स्मारयति–*गुहां प्रविष्टाविति*।। परमात्मशब्देन चात्र विगतोपाधिकं स्वरूपचैतन्यमेव जीवान्तः करणाधिष्ठानं विवक्ष्यते, न तु सगुणं ब्रह्मेति पैङ्गिरहस्योपनिषद्व्याख्यानमपि न प्रकृतसिद्धान्तविरोधीति सूचयति–*यदापीत्यादिना–द्युभ्वाद्यायतनत्वप्रतिषेध इत्यन्तेन*।।

एतेन–पैङ्गिरहस्ये सत्त्वक्षेत्रज्ञपरतया व्याख्यानात् क्षेत्रज्ञे शारीर एव 'द्वा सुपर्णा' वाक्यस्य तात्पर्यमिति शङ्कापि–प्रत्युक्ता; क्षेत्रज्ञपदेन स्वरूपचैतन्यमात्रविवक्षणात्। नन्वेवं सति–अदृश्यत्वाधिकरणेन कथं न गतार्थत्वमित्यत आह–*तदेतदिति*।। अक्षरपदस्यैतत्पूर्वतन-वाक्येनैवोपरमेणाक्षरपदपरमात्मताव्यवस्थापनमदृश्यत्वाधिकरणसूत्रेरेव संपन्नमिति तत्रैतन्यायान-पेक्षायामपि कारणान्तरैरस्यापि वाक्यस्य ब्रह्मपरत्वे निर्णीतेऽदृश्यत्वाधिकरणार्थस्यैवोपबृंहणमनेनापि न्यायेन भवतीति तस्यैवायं प्रपञ्च इति भावः। *तस्यैव हि भूतयोनिवाक्यस्य मध्य इति*।। एतन्यायसिद्धमप्यर्थ मनसिनिधायेदमुक्तम्।।७।। इति प्रथमं द्युभ्वाद्यधिकरणम्।।

इति प्रदीप द्युभ्वाद्यधिकरणम् समाप्तम्

भामती

इह ज्ञेयत्वेन ब्रह्मोपक्षिप्यते। तत्र

पारबत्त्वेन सेतुत्वाद्भदे षष्ठयाः प्रयोगतः।
द्युभ्वाद्यायतनं युक्तं नामृतं ब्रह्म कर्हिचित्॥

पाराबारमध्यपाती हि सेतुः ताभ्यामवच्छिद्यमानो जलविधारको लोके दृष्टः, न तु बन्धहेतुमात्रम्, हडिनिगडादिष्वपि प्रयोगप्रसङ्गात्। न चानवच्छिन्नं ब्रह्म सेतुभावमनुभवति। न चामृतं सद् ब्रह्मामृतस्य सेतुरिति युज्यते। न च ब्रह्मणोऽन्यदमृतमस्ति, यस्य तत्सेतुः, स्यात्। न चाभेदे षष्ठयाः प्रयोगो दृष्टपूर्वः। तदिदमुक्तम् *अमृतस्यैव सेतुरिनि श्रवणाद् इति*। अमृतस्येति श्रवणात्, सेतुरिति श्रवणाद्—इति योजना। तत्रामृतस्येति श्रवणादिति विशदतया न व्याख्यातम्। सेतुरिति श्रवणादिति व्याचष्टे *पारवान् इति*। तथा च पारवत्यमृतव्यतिरिक्ते सेतावनुश्रीयमाणे प्रधानं वा सांख्यपरिकल्पितं भवेत्। तत् खलु स्वकार्य्योपहितमर्य्यादतया पुरुषं यावदगच्छद्भवति पारवत्, भवति च द्युभ्वाद्यायतनं तत्प्रकृतित्वात्, प्रकृत्यायतनत्वाच्च विकाराणां भवति चात्माऽऽत्मशब्दस्य स्वभाववचनत्वात्, प्रकाशात्मा प्रदीप इतिवत्। भवति चास्य ज्ञानमपवर्गोपयोगि, तदभावे प्रधानाद्विवेकेन पुरुषस्यानवधारणादपवर्गानुपपत्तेः। यदि त्वस्मिन् प्रमाणाभावेन न परितुष्यति, अस्तु तर्हि नामरूपवीजशक्तिभूतमव्याकृतं भूतसूक्ष्मं द्युभ्वाद्यायतर्न, तस्मिन् प्रामाणिके सर्वस्योक्तस्योपपत्तेः। एतदपि प्रधानोपन्यासेन सूचितम्। अथ तु साक्षाच्छुत्युक्तं द्युभ्वाद्यायतनमाद्रियसे, ततो वायुरेवास्तु। वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति' इति श्रुतेः। यदि त्वात्मशब्दाभिधेयत्वं न विद्यत इति न परितुष्वसि, भवतु तर्हि शारीरस्तस्य भोक्तुर्भोग्यान् द्युप्रभृतीन् प्रत्यायतनत्वात्। यदि पुनरस्य द्युभ्वाद्यायतनस्य सर्वज्ञश्रुतेरत्रापि न परितुष्यसि, भवतु ततो हिरण्यगर्भ एव भगवान् सर्वज्ञः सूत्रात्मा द्युभ्वाद्यायतनम्। तस्य हि कार्यत्वेन पारवत्त्वं

चामृतात्परब्रह्मणो भेदश्चेत्यादि सर्वमुपपद्यते। अयमपि वायुना वै गौतम सूत्रेणेति श्रुतिमुपन्यस्यता सूचित:। तस्मादयं द्युप्रभृतीनामायतनमिति।

एवं प्राप्तेऽभिवीयते। द्युभ्वाद्यायतनं परब्रह्मैव, न प्रधानाव्याकृतवायुशारीरहिरण्यगर्भा:। कुत:? स्वशब्दात्।

धारणाद्वाऽमृतत्वस्य साधनाद्वाऽस्य सेतुता।
पूर्वपक्षेऽपि मुख्यार्थः सेतुशब्दो हि नेष्यते॥

नहि मृद्दारुमयो मूर्त्तः पारावारमध्यवर्ती पाथसां विधारको लोकसिद्धः सेतुः प्रधानं वाऽव्याकृतं वा वायुर्वा जीवो वा सूत्रात्मा वाऽभ्युपेयते। किन्तु पारवत्तामात्रपरो लाक्षणिकः सेतुशब्दोऽभ्युपेय:। सोऽस्माकं पारवत्तावर्जं विधारणत्वमात्रेण योगमात्राद्रूढिं परित्यज्य प्रवर्त्स्यति। जीवानाममृतत्वपदप्राप्तिसाधनत्वं वात्मज्ञानस्य पारवत एव लक्षयिष्यति। अमृतशब्दश्च भावप्रधान:, यथा 'द्वयेकयोर्द्विवचनैकवचने' इत्यत्र द्वित्वैकत्वे द्वयेकशब्दार्थौ, अन्यथा द्वयेकेष्विति स्यात्। तदिदमुक्तं भाष्यकृता *अमृतत्वसाधनत्वाद् इति*। तथा चामृतस्येति च सेतुरिति च ब्रह्मणि द्युभ्वाद्यायतन उपपत्स्येते। अत्र च स्वशब्दादिति। तन्त्रोच्चरितगात्मशब्दादिति च सदायतना इति सच्छब्दादिति च ब्रह्मशब्दादिति च सूचयति। सर्वे ह्येतेऽस्य स्वशब्दा:।

स्यादेतत्—आयतनायतनवद्भाव: सर्वं ब्रह्मेति च सामानाधिकरण्यं हिरण्यगर्भेऽप्युपपद्यते। तथा च स एवात्रास्त्वमुतत्वस्य सेतुरित्याशङ्क्य श्रुतिवाक्येन सावधारणेनोत्तरमत्ह *तत्रायतनायतनवद्भावश्रवणाद् इति*। विकाररूपेऽनृतेऽनिर्वाच्येऽभिसन्धोऽभिसन्धानं यस्य स तथोक्त:। भेदप्रपञ्चं सत्यमभिमन्यमान इति यावत्। तस्यापवादो दोषः श्रूयते—''मृत्योः'' इति। ''सर्वं ब्रह्मेति तु'' इति। यत्सर्वमविद्यारोपितं तत्सर्वं परामार्थतो ब्रह्म, न तु यद् ब्रह्म तत्सर्वमित्यर्थ:।

अपर आह इति। नात्र युभ्वाद्यायतनस्य सेतुतोच्यते मेन पारवत्ता स्यात्, किन्तु जानथेति यज्ज्ञानं कीर्त्तितं, यश्च वाचो विमुञ्चथेति वाग्विभोक:, तस्यामृतत्वासाधनत्वेन सेतुतोच्यते। तच्चोभयमपि पारवदेव। न च प्राधान्यादेष इति सर्वनाम्ना द्युभ्वाद्यायतनमात्मैव परामृश्यते, न तु तज्ज्ञानवाग्विमोचने इति साम्प्रतम्, वाग्विमोचनात्मज्ञानभावनयोरेव विधेयत्वेन प्राधान्यात्। आत्मनस्तु द्रव्यस्याव्यापारतयाऽविधेयत्वात्। विधेयस्य व्यापारस्यैव व्यापारवतोऽमृतत्वसाधनत्वात्। न चेदमैकान्तिकं यत्प्रधानमेव सर्वनाम्ना परामृश्यते। क्वचिदयोग्यतया प्रधानमुत्सृज्य योग्यतया गुणोऽपि परामृश्यते॥१॥

द्युभ्वाद्यायतनं प्रकृत्याविद्यादिदोषमुक्तैरुपसृप्यं व्यपदिश्यते 'भिद्यते हृदयग्रन्थिः' इत्यादिना। तेन तद् द्युभ्वाद्यायतनविषयमेव। ब्रह्मणश्च मुक्तोपसृप्यत्वं 'यदा सर्वे प्रमुच्यन्ते' इत्यादौ श्रुत्यन्तरे प्रसिद्धम्। तस्मान्मुक्तोपसृप्यत्वाद् द्युभ्वाद्यायतनं ब्रह्मेति निश्चीयते। हृदयग्रन्थिश्चाविद्यारागद्वेषभयमोहाः। मोहश्च विषादः शोकः, परं हिरण्यगर्भाद्यवरं यस्य तद् ब्रह्म तथोक्तम्, तस्मिन् ब्रह्मणि यद् दृष्टं दर्शनं तस्मित् तदर्थमिति यावत्; यथा 'चर्मणि द्वीपिनं हन्ति' इति चर्मार्थमिति गम्यते। नामरूपादित्यप्यविद्याभिप्रायम्। 'काया येऽस्य हृदि श्रिताः' इति कामा इत्यविद्यामुपलक्षयति।।२।।

नानुमानमित्युपलक्षणं, नाव्याकृतमित्यपि द्रष्टव्यं, हेतोरुभयत्रापि साम्यात्।।३।।

चेतनातच्छब्दत्वं हेतुरनुकृष्यते। स्वयञ्च भाष्यकृद्धेतुमाह *न चोपाधिपरिच्छिन्नस्य इति*। *न सम्यक् सम्भवति* नाञ्जसमित्यर्थः। भोग्यत्वेन हि आयतनत्वमतिक्लिष्टम। स्यादेतत्–यद्यतच्छब्दत्वादित्यत्रापि हेतुरनुक्रष्टव्यः, हन्त कस्मात् पृथग्योगकरणं, यावता न प्राणभृदनुमाने इत्येक एव योगः कस्मान्न कृत इत्यत आह *पृथग् इति*। भेदव्यपदेशादित्यादिना हि प्राणभृदेव निषिध्यते, न प्रधानं, तच्चैकयोगकरणे दुर्विज्ञानं स्यादिति।।४–५।।

न खलु हिरण्यगर्भादिषु ज्ञातेषु सर्वं ज्ञातं भवति किन्तु ब्रह्मण्येवेति।।६।।

यहि जीवो हिरण्यगर्भो वा द्युभ्वाद्यायतनं भवेत्, ततस्तत्प्रकृत्यानश्नन्नन्यो अभिचाकशीतीति परमात्माभिधानमाकस्मिकं प्रसज्येत। न च हिरण्यगर्भ उदासीनः तस्यापि भोक्तृत्वात्। न च जीवात्मैव द्युभ्वाद्यायतनं, तथा सति स एवात्र कथ्यते तत्कथनाय च ब्रह्मापि कथ्यते, अन्यथा सिद्धान्तेऽपि जीवात्मकथनमाकस्मिकं स्यादिति वाच्यम्। यतोऽनधिगतार्थावबोधनस्वरसेनाम्नायेन प्राणभृन्मात्रप्रसिद्धजीवात्मा धिगमायात्यन्तानवगतमलौकिकं ब्रह्मावबोध्यत इति सुभाषितम्। *यदापि पैङ्ग्युपनिषत्कृतेन व्याख्यानेन इति*। तत्र ह्यनश्नन्नन्यो अभिचाकशीतीति जीव उपाधिरहितेन रूपेण ब्रह्मस्वभाव उदासीनोऽभोक्ता दर्शितः। तदर्थमेवाचेतनस्य बुद्धिसत्त्वस्यापारमार्थिकं भोक्तृत्वमुक्तम्। तथा चेत्यम्भूतं जीवं कथयतानेन मन्त्रवर्णेन द्युभ्वाद्यायतनं ब्रह्मैव कथितं भवति, उपाध्यवच्छिन्नश्च जीवः प्रतिषिद्धो भवतीति न पैङ्गिब्राह्मणविरोध इत्यर्थः। *प्रपञ्चार्थम् इति*। तन्मध्ये न पठितमिति कृत्वाचिन्तयेदमधिकरणं प्रवृत्तमित्यर्थः।।७।।

इति भामति द्युभ्वाद्यधिकरण समाप्तम्

श्री कण्ठभाष्य

अथ द्युभ्वाद्यधिकरणम्॥१॥

इह पादे स्पष्टास्पष्टब्रह्मलिङ्गानां वेदान्तवाक्यानां विचारः, प्रसङ्गात् अधिकारिनिरूपणं च क्रियते–

॥ सू०॥ द्युभ्वाद्यायतनं स्वशब्दात्॥१॥

'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः। तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः' (मुण्ड० २.२.) इति अस्य विषयः श्रूयते मुण्डकोपनिषदि॥ अत्र श्रुतौ द्युभ्वाद्याधारतया श्रूयमाणः परमेश्वरः अन्यो वेति संशयः॥ एवंसति परमेश्वरादन्यो वायुरेव द्युभ्वाद्याधार इति गम्यते; 'वायुना वै गौतम सूत्रेणायं च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति' (बृह. ५.७) इति श्रुतौ तस्य सर्वाधारत्वप्रसिद्धेः॥ इति प्राप्ते ब्रूमः–परमेश्वर एव द्युभ्वाद्यायतनं, तमेवैकं जानथ आत्मानम्' इत्यात्मशब्दात्॥ सूत्रात्मनो वायोरप्यात्मशब्दवाच्यत्वे को दोष इत्यत आह–

॥ सू॥ मुक्तोपसृप्यव्यपदेशाच्च॥२॥

'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।' (मुण्ड. २.२) 'यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान् नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यम्।' (मुण्ड. ३.२.२) इति पुण्यापुण्यप्रवृत्तनामरूपविनिर्मुक्तनां मुक्तानां प्रापयतया व्यपदेशाच्चायं परमेश्वर एव।

कथमेतद्वायोः संभवति? परमेश्वरात्मक एव वायुः सूत्रात्मा, पारमेश्वरीष्वष्टासु मूर्तिष्वेकत्वात्। ततो न वायुरिति निर्णयः।

॥ सू॥ नानुमानमतच्छब्दात् प्राणभृच्च॥३॥

अनुमानगम्यं प्रधानमेव द्युभ्वाद्यायतनं, तस्य सर्वोपादानत्वात् इति न वाच्यम्; अतच्छब्दादात्मशब्दात्। न प्राणभृज्जीवश्च, अनुपपत्तेरिति॥

॥ सू॥ भेदव्यपदेशात्॥४॥

अत्रेश्वरस्य जीवाद्भेदो व्यपदिश्यते–'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः।' (मुण्ड. ३.१) इति। अतः स्वतः परमेश्वर एव द्युभ्वाद्याधारः॥

॥ सू॥ प्रकरणात्॥५॥

'अथ परा यया तदक्षरमधिगम्यते (मुण्ड. १.१) इति परस्य खल्विदं प्रकरणम्। अतश्च परमेश्वरः॥

॥ सू॥ स्थित्यदनाभ्यां च॥६॥

'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्न्यो अभिचाकशीति।' इति जीवस्य कर्मफलादनमुक्त्वा अनश्नत एव दीप्यमानस्याभिधानाच्च। तस्मादर्थान्तरभूतः परमेश्वर एव द्युभ्वाद्यायतनमिति निर्णयः।

अथ भूमाधिकरणम्॥२॥

मुक्तप्राप्यतयेह प्रतिपादितस्म परमेश्वरस्य प्राप्तिप्रयोजनं निरतिशयसुखं दर्शयति–

॥ सू०॥ भूमा संप्रसादादध्युपदेशात्॥७॥

छान्दोग्ये 'भूमैव सुखम्' इत्युक्त्वा भूम्नः स्वरूपमाह 'यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छा. ७.१) इति। तत्र सन्देहः–भूमशब्दनिर्दिष्टः परमेश्वरस्तदन्यो वेति। परमेश्वरादन्यः प्राण एव भूमा; पूर्वेषु नामादिषु तत्त्वेषु 'अस्ति भगवो नाम्नो भूयः' इत्यादिनारदप्रश्ने सनत्कुमारो 'वाग्वाव नाम्नो भूयसी' इत्यादिना वागादीनि निर्दिश्य प्राणस्योपरि प्रश्नप्रत्युक्तिभ्यां विनैव यतो भूमानमवतारयति न परमेश्वरस्तत्र प्रसक्तः, अतो भूमा प्राणः। इति प्राप्ते ब्रूमः–परमेश्वर एव भूमशब्दनिर्दिष्टः, संप्रसादादध्युपदेशात्। संप्रसादो जीव उच्यते 'अथ य एष संप्रसादः (छा० २६) इति श्रुतेः। स चात्र प्राणशब्देन निर्दिश्यते; तस्मादूर्ध्वमात्मान्तरत्वेन

भूमोपदिश्यते 'एष तु वा अतिवदति यः सत्येनातिवदति' इत्यादिना। अत्र हि पूर्वं 'स वा एष एवं पश्यन् एवं मन्वान एवं विजानन्नतिवादी भवति' इति प्राणातिवादिनोऽतिवादित्वमुक्त्वा तदनन्तरं 'एष तु वै' इति तुशब्देन पूर्वस्मात् प्राणातिवादितः सत्यातिवादिन आधिक्यप्रदर्शनात् पूर्वातिवादनिमित्तात् प्राणात् एतदतिवादनिमित्तस्य सत्यशब्दाभिधेयस्याधिक्यमवसीयते। स एवाग्रे भूमगुणविशिष्टः प्रतिपाद्यते। 'अथात आत्मादेशः' इत्यात्मत्वेनाप्यग्रे वर्ण्यते। ततः प्राणशब्दनिर्दिष्टाज्जीवादधिक आत्मा भूमा परमेश्वर एव॥

इति श्रीकण्ठभाष्य द्युभ्वाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

येषु विषयावक्येषु श्रुतानां ब्रह्मलिङ्गानां पूर्वपक्षे न ब्रह्मलिङ्गत्वाक्षेपः नाप्यन्यत्रान्वयसमर्थनं किंतु विचारणीय एव धर्मिण्यन्वयः तद्विरोध्यब्रह्मलिङ्गप्राबल्योपपादनेन तत्समर्पकशब्दानां यथाकथञ्चिदब्रह्मणि योजनामात्रं तानि स्पष्टब्रह्मलिङ्गानि प्रथमपादे विचारितानि। येषु श्रुतानां तेषां ब्रह्म.....येन तल्लिङ्गत्वाक्षेपः विचारणीय एव धर्मिण्यन्वयश्च तान्यनतिस्पष्टब्रह्मलिङ्गानि ब्रह्मापलापान्यान्वयरहितपूर्वपक्षविषयत्वसाम्यात् तदनन्तरं द्वितीयपादे विचारितानि। येषु श्रुतानां तेषां पूर्वपक्षे ब्रह्मलिङ्गत्वानाक्षेपेण ब्रह्मानपलापेन चान्यान्वयसमर्थनं तानि ब्रह्मापलापरहितपूर्वपक्षविषयत्वसाम्यादिदानीं विचार्यन्त इति पादार्थभेदः सङ्गतिश्च।।सू।। **द्युभ्वाद्यायतनं स्वशब्दात्॥१॥** 'यस्मिन्द्यौ'रिति मन्त्रे सप.....द्युपृथिव्यादीनामाधारत्वेन श्रूयमाणः परमेश्वरो वायुर्वेति संशयं दर्शयति–**अत्रेति**। परमेश्वरकोटेरात्मश्रुतिर्बीजमिति स्पष्टम्। पूर्वपक्षकोटे 'रमृतस्यैष सेतु' रित्यनेन द्युभ्वाद्याधारस्य परमेश्वरान्यत्वप्रतीतिर्बीजमित्येतत्परमेश्वरादन्यो वेति पूर्वपक्षकोटिप्रदर्शनेन सूचितम्। तत्प्रतीतिमुपजीव्यैव पूर्वपक्षयति–**एवं सतीति**। 'अमृतस्य सेतु' रित्यनेन द्युभ्वाद्याधारः परमेश्वरादन्यः प्रतीयते। अमृतशब्दो ह्यनादिमुक्तस्य परमेश्वरस्य वाचक इति निर्णीतमन्तर्याम्यधिकरणे। सोऽत्र 'यस्मिन्द्यौ'रिति मन्त्रात्पूर्व 'तदेतत्सत्यममृत'मिति ततः पश्चा 'दानन्दरूपममृतं यद्विभाती'ति परमेश्वरे प्रयुक्तश्च। तस्य सेतुरिव सेतुः परतीरस्य सेतुरिव तस्यायं प्रापयितेति हि तदर्थः। एवं परमेश्वरादन्यत्वेन सिद्धोऽयं द्युभ्वाद्याधारो वायुरिति युक्तम्। स खल्वर्चिरादिमार्गे पर्वविशेषतया तत्प्राप्तिहेतुः। यद्यपि देवतान्तराणामपि तत्र पर्वत्वमस्ति तथापि 'वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ती'ति श्रुत्यन्तरे वायोर्द्युभ्वाद्याधारत्वप्रसिद्धेर्वायुरेवायम्। एवं 'यस्मिन्द्यौः पृथिवी चे' त्यत्रा 'यं च लोकः परश्च लोक' इति वायुविषयश्रुत्यन्तरार्थप्रत्यभिज्ञां स्फुटीकर्तुमेव सूत्रे लाघवार्थं दिवाद्यायतनमिति वक्तव्ये द्युभ्वाद्यायतनमित्युक्तम्। एवं च सर्वाधारत्वप्रसिद्धेः परमेश्वरसाधारण्ये-ऽप्यर्चिरादिमार्गपर्वभूतदेवतान्तरव्यवच्छेदहेतुत्वेनोपादानान्न पूर्वपक्षहेतुत्वासम्भवदोषशङ्कावकाशः। यद्वा।

अर्चिरादिमार्गपर्वभूतदेवतान्तरव्यवच्छेदहेतुत्वेन भाष्ये सर्वाधारत्वप्रसिद्धिर्नोपन्यस्ता। 'अमृतस्यैष सेतु'रित्यनेनैव परमेश्वरपरिग्रहशङ्काया इव तत्परिग्रहशङ्काया अपि व्यवच्छेदसिद्धेः। तेन हि सेतुवत्साक्षात्प्रापकत्वं लक्ष्यते। सम्भवदन्तरङ्गसादृश्यत्यागायोगात्। तद्यद्यप्यर्चिरादिमार्गप्रविष्टादित्याधस्तनपर्वभावेन वायोर्न सम्भवति। तथापि 'तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयती'ति श्रुत्युक्तामानवपुरुषभावेन सम्भवत्येव। अमानवपुरुषो हि वायोरेव रूपविशेषः। बृहदारण्यके 'क्व पारिक्षिता अभव' न्निति विद्यासहिताश्वमेधानुष्ठातॄणां प्राप्यलोकप्रश्ने ब्रह्माण्डाद्बहिरेतेषां प्राप्यलोकमभिप्रेत्य तद्गमनार्थं 'तद्यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाश' इति ब्रह्माण्डछिद्रमुक्त्वा 'तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत् तान्वायुरात्मनि धृत्वा तत्रागमयद्यत्राश्वमेधयाजिनोऽभवन्नित्येवमिव वै स वायुमेव प्रशशंसे'ऽति तेन ब्रह्माण्डछिद्रमार्गेण ब्रह्माण्डाभिमानिना प्रजापतिनाश्वमेधिकचित्याग्निरूपसुपर्णतां प्राप्तेन समर्पितानां तेषां वायुरेव साक्षाद्ब्रह्माण्डाद्बहिस्स्थितं परमाकाशरूपं लोकं प्रापयितेत्युक्तत्वात्। एवं च साक्षात्परमेश्वरप्रापकत्ववर्णनेनैव देवतान्तरपरिग्रहशङ्काया अपि व्यवच्छेदसिद्धेः सर्वाधारत्वप्रसिद्धिवर्णनं द्युभ्वाद्याधारत्वश्रवणस्य केवलं वायावुपपादनार्थमेव। एवमुपक्रमोपसंहारैकमत्येन परमेश्वरस्य प्रापको वायुर्मन्त्रप्रतिपाद्य इति स्थिते 'तमेवैकं जानथे'त्येतत्परमेश्वरोपासनासु गत्यनुस्मरणसिद्धये साक्षात्परमेश्वरप्रापको वायुरेक एवानुसन्धातव्यः न तु ततोऽधस्तनाः आतिवाहिका इत्येवंपरं योज्यम्। इतरव्यवच्छेदस्य सजातीयविषयत्वस्वारस्यात्। अत एव गृहमेधीयेष्टौ श्रूयमाणस्या'ज्यभागौ यजती'ति वाक्यस्य दार्शपूर्णमासिकाङ्गेषु सर्वेष्वप्यतिदेशतः प्राप्तेष्वाज्यभागयोरपि प्राप्तत्वेन तद्विधायकत्वायोगात् आज्यभागव्यतिरिक्ताङ्गजातपरिसङ्ख्यारूपत्वमिति गृहमेधीयाधिकरणोक्तपञ्चमपक्षरीत्या तस्यां श्रुतस्य 'अग्नये स्विष्टकृते समवद्यती' त्यस्यापि सङ्ख्यारूपत्वमङ्गीकृत्य कृत्वाचिन्तारूपेण प्रवृत्ते तव्द्यवहितानन्तराधिकरणे आज्यभागवाक्यस्य आज्यभागसजातीययागान्तरप्रतिषेधकत्ववत्स्विष्टकृद्वाक्यस्य स्विष्टकृत्सजातीयद्रव्यप्रतिपत्तिरूपप्राशित्रादिप्रतिषेधकत्वमुक्तम्। आत्मशब्दस्तु वायुदेवतायाश्चेतनत्वादुपपन्नः। मुक्तोपसृप्यव्यपदेशादिकं तु द्युभ्वाद्याधारप्रापणीयामृतशब्दोक्तपरमेश्वरविषयत्वकल्पनादुपपन्नमेवेति पूर्वपक्षाभिप्रायः। द्युभ्वाद्याधारः परमेश्वरः। **आत्मशब्दात्।** आत्मशब्दो हि रूढ्या चेतनमभिदधानो योगेन व्याप्तिमप्याह। 'आप्लृ व्याप्ता' वितिधातोर्मनिन्प्रत्यये बाहुलके दकारे च सति तन्निष्पत्तेः। एवं च 'यं आत्मनि तिष्ठ' न्नित्यादिप्रयोगात् तस्य रूढ्या जीवसाधारण्येऽपि योगरूढ्युभयानुग्रहलाभात् परमेश्वरे तस्य स्वारस्यमिति ततस्स एव द्युभ्वाद्याधार इति युक्तमित्यभिप्रेत्य सिद्धान्तयति—**परमेश्वर एवेति।** सूत्रे योगरूढिभ्यामात्मशब्दस्य परमेश्वरासाधारण्यद्योतनार्थस्तत्र स्वशब्दादिति स्वशब्दप्रयोगः। स्वस्य परमेश्वरस्यासाधारणशब्दादित्यर्थः।

'नन्वमृतस्यैष सेतु' रित्यतः परमेश्वरान्यत्वप्रतीत्यनुसारेण रूढिमात्रं परिगृह्य आत्मशब्दः सूत्रात्मनि वायौ नेतुं युक्तः। 'अत सातत्यगमन' इति धातोर्मनिन्प्रत्यये दीर्घे च सति योगोऽपि वा तत्र सम्भवतीति शङ्कोत्तरत्वेनोत्तरसूत्रमवतारयति- **सूत्रात्मन इति** ।।सू।। **मुक्तोपसृप्यव्यपदेशाच्च**।।२।। **यदा पश्य इति।** नन्वस्मिन्मन्त्रद्वये मुक्तप्राप्यत्वव्यपदेशो मा भूत् द्युभ्वाद्याधारविषयः किं त्वमृतविषयांऽस्त्विति चेदुच्यते। तस्यामृतविषयत्वेऽपि तत्प्राप्तिर्विद्वत्पदोपात्तज्ञानफलत्वेन विवक्षितेति तावदभ्युपगन्तव्यम्। 'लक्षणहेत्वोः क्रियाया' इति (पा० १-२-१४) सूत्रतस्तत्र शत्रादेशस्य वसोर्हेत्वर्थत्वात्। तथा च तत्र मन्त्रद्वये ज्ञानस्य परमेश्वरप्रापयितृत्वप्रतिपादनादिहापि तदेव प्रतिपाद्यमित्युन्नीयते। अत्र प्रतिपाद्य एव ज्ञानस्य परमेश्वरप्रापकत्वे तस्य पुण्यपापविधूनननामरूपविमोक्षपूर्वकत्वरूपविशेषसमर्पकत्वेनैकविषयत्वे सम्भवति तत्र ज्ञानस्य प्रापकत्वमुच्यते इह ज्ञानविषयस्येति वरूप्यकल्पनायोगात्। 'अरा इव रथनाभा' वित्यस्मिन्नेतदनन्तरमन्त्रे 'ॐमित्येव ध्यायथात्मानं स्वस्ति वः पाराय तमसः परस्ता'दिति ध्यानरूपज्ञानस्यैव तत्प्रापकत्वस्य वर्ण्यमानत्वाच्च। सम्भवति चा 'मृतस्यैष सेतु' रित्यत्रैष इत्यस्य प्रकृतज्ञानविषयपरामर्शित्वमिव प्रकृतज्ञानपरामर्शित्वमपि। 'श्येनेनाभिचरन्यजेत यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते अभिमन्थति स हिङ्कारोधूमो जायते स प्रस्तावः अपोऽश्नाति तन्नेवाशितं नेवानशित' मित्यादिषु सर्वनाम्नामाख्यातोपात्तक्रियापरामर्शित्वस्यापि दर्शनात्। तथा च'अमृतस्यैष सेतु' रित्यत्र द्युभ्वाद्याधारस्यामृतशब्दोक्तपरमेश्वरान्यत्वप्रतीत्यसिद्धेरन्योपासनयान्यप्राप्त्युक्तेरनाञ्जस्येन प्राप्योपास्ययोरमृतद्युभ्वाद्याधारयोरैक्यावसायनान्मुक्तोपसृप्यव्यपदेशादेरमृतविषयत्ववादेऽपि द्युभ्वाद्याधारविषयत्वमेव पर्यवस्यतीति भावः। **प्राप्यतया व्यपदेशाच्चेति।** उक्तरीत्यैतन्मन्त्रप्रतिपाद्यप्राप्योपास्ययोरैक्यावगमे सत्यत्रत्यान्मुक्तप्राप्यत्वव्यपदेशात् 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः:' 'शिव एको ध्येयः शिवंकरस्सर्वमन्यत्परित्यज्ये' तिश्रुत्यन्तरप्रसिद्धसर्वेतरज्ञेयान्तरविमोकपूर्वकज्ञेयत्वव्यपदेशात् 'नानुध्यायाद्बहून् शब्दान्वाचो विग्लपनं हि त'दिति श्रुत्यन्तरप्रसिद्धवागन्तरविमोकपूर्वकज्ञेयत्वव्यपदेशाच्चायं द्युभ्वाद्याधारः परमेश्वरोऽवसीयत इति हेतुत्रयमस्यैव सूत्रस्यार्थान्तरभूतं चकारेण समुच्चीयते। द्युभ्वाद्याधारत्वमेतत्पदेन परामृश्यते। ननु 'वायुर्वै गौतम तत्सूत्र' मित्यादिश्रुत्यन्तरे वायोस्तत्प्रसिद्धमित्यतआह- **परमेश्वरात्मक इति।** ततश्च पारमेश्वरमेव द्युभ्वाद्याधारत्वं तन्मूर्तिभूते वायौ व्यपदिष्टं तत्रेति भावः। अत एव तलवकारिणामुपनिषदि परमेश्वरबलायत्तेन दैत्यविजयेन दृप्तान्देवान्दर्पापनोदेनानुग्रहीतुं तेषां दृष्टिगोचरे यक्षरूपेण प्रादुर्भूते परमेश्वरे क एष इति जिज्ञासया देवैस्तत्समीपं प्रेषितो वायुः कस्त्वं तव किं बलमिति तेन पृष्टो वायुरहं मम त्रैलोक्यमपि चालयितुं बलमस्तीत्युक्त्वा तेनेदं चालयेति पुरस्तान्निहितं तृणं स्वीयेन सर्वेणापि प्रयत्नेन चालयितुं न शशाकेति

श्रूयते 'ब्रह्म ह देवेभ्यो विजिग्य' इत्यादिखण्डे। तस्माद्द्युभ्वाद्याधारो न वायुरित्युपसंहरति-**तत इति।** स्यादेतत्। माभूदयं वायुः। प्रधानं तु स्यात्। तथाहि-'यस्मिन्द्यौ' रित्यादिमन्त्रे द्युभ्वाद्याधारत्वस्यानुवादेनापेक्षिता प्राप्तिरानुमानिकी ग्राह्या। न तु श्रुत्यन्तरलब्धा। आनुमानिकी हि प्राप्तिश्श्रौतप्राप्तेश्शीघ्रतरा। अनुमानस्य प्रत्यक्षमात्रापेक्षा श्रुतेर्व्युत्पत्तिग्रहादावुभयापेक्षेत्यनुमानतः श्रुतेः श्रुतितः श्रौतलिङ्गस्येव विलम्बितप्रवृत्तिकत्वात्। ततश्च सर्वोपादानतया द्युभ्वाद्यायतनत्वेनानुमानगम्यं प्रधानमेव 'यस्मिन्द्यौ' रित्यादिनानूद्यत इति मन्त्रोपक्रमस्य तावत्प्रधान एव स्वारस्यमवगम्यते। तथौपसंहारिकस्य सेतुशब्दस्यापि। स हि 'पिञ्बन्धन' इति धातोर्व्युत्पन्नो बन्धनहेतुमाचष्टे। न च बन्धनहेतुमात्रं जलबन्धनहेतुमात्रं वा तदर्थः। घटोदरनिस्सरज्जलबन्धनहेतुमधूच्छिष्टादेरपि तदर्थत्वप्रसङ्गात्। किंतु पारावारमध्यवर्तित्वविशेषितो जलबन्धनहेतुस्तदर्थ इत्यभ्युपगन्तव्यम्। तस्मादिह लक्षकेण सेतुशब्देन पारवत्त्वमेव लक्षयितुमुचितम्। सहजत्वाच्छब्दार्थैकदेशत्वाच्च। न तु प्रापकत्वम्। कादाचित्कत्वात् शब्दार्थबहिर्भूतत्वाच्च। पारवत्त्वं तु प्रधानस्यैवास्ति न ब्रह्मणः। ननु पारवत्त्वलक्षणायाममृतस्य सेतुरिति कथमन्वेति। न खल्वमृतस्य सेतुरित्यन्वयोऽभ्युपगम्यते किं त्वमृतस्यैष इति। तावन्मात्रेण 'तस्येदम्' (पा० ४.३-१२०) इति सूत्रेणैव षष्ठ्यन्तपदवाच्यसम्बन्धित्वमुच्यते। सेतुशब्देन त्वमृतपदानन्वितेनैव पारवत्त्वं लक्ष्यत इति। एवं चोपक्रमोपसंहारानुसारेण प्रतर्दनाधिकरणनयान्मध्यपातिन्यात्मश्रुतिः 'अन्या वाचो विमुञ्चथे' त्युक्तिश्च नेतव्या। कथम्। आत्मशब्दो देहपरः। 'आत्मा जीव धृतौ देह'इत्यभिधानकोशदर्शनात्। एवं च द्युभ्वाद्यायतनं प्रधानमेकमेव युष्माकं देहं जानीध्वं स्थूलशरीररूपदेहान्तरविषया देहत्ववाचोविमुञ्चथेति। एतदुक्तं भवति। देहविविक्तात्मज्ञानार्थं देहो मुमुक्षुभिर्ज्ञातव्यः। देहस्तु न स्थूलो विवक्षितः। आगमापायिनस्ततो विवेकस्य सुज्ञानत्वात्। किं त्वव्याकृतदेहः सूक्ष्मो विवक्षितः। यदनुबन्धादनादिरयं संसारः प्रवर्तत इति। तस्मात्प्रधानं द्युभ्वाद्याधार इति युक्तम्। जीवो वा स्यात्। मनः प्राणसम्बन्धश्रवणात्। न च, जीवस्य मनःप्राणैरुपकरणोपकरणिभावसम्बन्ध एव प्रसिद्धो नाश्रयाश्रयिभावः। इह त्वाश्रयाश्रयिभाव एव प्रतीयते। द्युपृथिव्यन्तरिक्षैरश्रयाश्रयिभाव-वाचकेनैवोतशब्देनोपात्तत्वात् ओतशब्दस्वारस्याच्चेति वाच्यम्। जीवोपकरणानां तेषां जीवादृष्टायत्तोत्पत्तिस्थितिकत्वेन तदाश्रितत्वव्यपदेशोपपत्तेः। 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन्प्राणः पञ्चधा संविवेश। प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येप आत्मे'ति मुण्डक एवाग्रे मनसः प्राणानां चाणुत्वलिङ्गोपस्थापितजीवाश्रयत्वप्रतिपादनाच्च। अत एव जीवः प्राणभृदिति व्यवह्रियते। एवं च जीवे द्युपृथिव्याद्यायतनत्वव्यपदेशोऽपि युज्यते। दिवादीनां तददृष्टायत्तत्वात्। 'यथा वा अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पित'मिति भूमविद्यायां तस्य सर्वाधारत्वप्रसिद्धेश्चेति शङ्काद्वयनिराकरणार्थं सूत्रम्-सू॥ नानुमानमतच्छब्दात् प्राणभृच्च॥३॥

प्रधानविषये शङ्कां दर्शयति-**अनुमानगम्यमिति।** परिहारांशं व्याचष्टे-**अतच्छब्दादात्मशब्दादिति।** आत्मशब्दो हि न स्वरूपेण प्रधानं वक्ति। नापि शरीरत्वेन। शक्तिग्राहकाभावात्। न चाभिधानकोशशक्तिग्राहकः। चेतनवाचिन आत्मशब्दस्य तत्तादात्म्याभिमानविषये शरीरे लक्षणया प्रयोगोपपत्तौ तादृक्प्रयोगदर्शनमूलानामद्यतनाभिधानकोशानां न्यायविरुद्धशक्तिकल्पनायामसामर्थ्यात्। एवं 'तमेवैकं जानथ अन्या वाचो विमुञ्चथे'ति श्रवणमपि श्रुत्यन्तरप्रत्यभिज्ञाद्यनुसारेण परमेश्वरविषयत्वादतच्छब्दः। प्रधानपरत्वकल्पनायां 'तमेवैकं जानथे' त्यादिक'मपशवो वा अन्ये गो अश्वेभ्यः पशवो गो अश्वा' इतिवदर्थवादमात्रं स्यात्। प्रसिद्धशरीरेष्वशरीरत्ववादस्य गवाश्वव्यतिरिक्तपशुष्वपशुत्ववादस्येव विषयान्तरत्यागस्यापेक्षितत्वात्। अथर्वशिखायां तदुपासने ब्रह्मादिसकलदेवतान्तरत्यागस्य विहितत्वात्। एवं 'यस्मिन्द्यौ'रित्यादिरप्यतच्छब्द एव। यत्तु द्युभ्वाद्यायतनत्वं प्रत्यक्षमात्रापेक्षानुमानप्रापितमेवानुवदितुं युक्तं न तु प्रत्यक्षानुमानसापेक्षशब्दप्रापितमित्युक्तं तदयुक्तम्। शब्दानां व्युत्पत्तिवेलायामर्थग्राहि-मानान्तरापेक्षत्वेऽपि तत्प्रतिपादनवेलायां तदपेक्षत्वाभावेन विलम्बासिद्धेः। अन्यथा 'गामानये' त्यादिवाक्यानामसन्निकृष्टार्थविषयाणां प्रत्यक्षसाचिव्याभावेन गवानयनादिप्रतिपादकत्वाभावप्रसङ्गात् प्रधानस्यापि 'क्षरं प्रधानममृताक्षरं हर' इत्यादिश्रुतिगम्यत्वेनानुमानगम्यत्वाभावाच्च। साङ्ख्यानुमानस्य तर्कपादे दूषयिष्यमाणत्वात्। न च वाच्यं श्रुतिप्रापितद्युभ्वाद्याधारत्वं प्रधानेऽप्यस्ति' अक्षरब्राह्मणे 'यदूर्ध्वं गार्गि दिवो यदतः पृथिव्या' इत्यारभ्या'काश एव तदोतं च प्रोतं चे'ति श्रवणादिति। 'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतना' इत्यादिश्रुतिप्राप्तनिरपेक्षाधारानुवादकत्वे सम्भवति सापेक्षाधारानुवादकत्वकल्पनायोगात्। एव'ममृतस्यैष सेतु' रित्यप्यतच्छब्द एव। तत्र'एष' इत्यस्य 'तदा विद्वा' नित्याद्यनुसारेण प्रकृतज्ञानपरामर्शितायास्समर्थितत्वात् सेतुपदे च तदनुसारेणैव च प्रापकत्वलक्षणाया वक्तव्यत्वात्। अत्राधिकरणे बहिरङ्गाप्येकवाक्यत्वयोग्यशब्दान्तरानुसारिण्येव लक्षणा ग्राह्येति व्यवस्थापितत्वात्। भाष्ये 'आत्मशब्दा' दित्यनेनैते सर्वेऽ'प्यतच्छब्दा' दिति सौत्रपदस्यार्थत्वेनोपलक्षिताः। जीवपक्षं दूषयति-**न प्राणभृदिति। अनुपपत्तेरिति।** अणौ जीवे मुख्यस्य द्युभ्वाद्याधारत्वस्येतरपरित्यागेन ज्ञेयत्वस्येतरपरित्यागेन तज्ज्ञानादमृतप्राप्तेर्द्युभ्वाद्याधारत्वो-पयोगितया व्याप्त्यर्थस्यात्मशब्दस्य चानुपपत्तेरित्यर्थः। अनेनैते जीवपक्षेऽप्यतच्छब्दा इत्युक्तं भवति। 'अतच्छब्दात्' इत्यब्भक्षवदवधारणगर्भः समासः। तथा च तद्व्यतिरिक्तस्यैव प्रतिपादकात्तस्मिन्ननुपपन्नाच्छब्दादिति तस्यार्थ इत्यभिप्रेत्य तल्लब्धार्थो 'ह्यनुपपत्ते'रित्यनेन दर्शितः। स्यादेतत्। 'एषोऽणुरात्मे' त्यग्रिममन्त्रप्रदर्शितजीवविषयमनःप्राणाधारत्वप्रत्यभिज्ञानाद्द्युभ्वाद्याधारो जीवः प्रतीयते। न च तत्रात्मशब्दानुपपत्तिः। 'प्रणवो धनुश्शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवे'दिति पूर्वमन्त्रे तत्रैवात्मशब्दस्य प्रयुक्ततयात्रापि तस्य तादर्थ्यस्यैव

युक्तत्वात्। न च तज्ज्ञानादमृतत्वप्राप्त्यनुपपत्तिः शङ्क्या। 'मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय। तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाती' त्यग्रिममन्त्रे तद्विज्ञानस्य ब्रह्मदर्शनहेतुत्वोक्त्या तद्द्वारा तत्प्राप्तिहेतुत्वोपपत्तेः। 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं संदधीत। आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सोम्य विध्ये'दिति व्यवहितपूर्वमन्त्रे च देहस्थौल्यादिविशिष्टतया भासमानस्य जीवस्योपासनया देहादिविवेकदार्ढ्यापादनेन तनूकरणोक्तेश्च। एवं च तस्येतरपरित्यागेन ज्ञेयत्वोक्तिरपि तत्रोपपन्ना। ध्यानरूपाया उपासनाया विजातीयप्रत्ययतिरस्कारगर्भत्वात्। एवं पूर्वापरमन्त्रगतशब्दार्थप्रत्यभिज्ञानबलाज्जीवो मन्त्रप्रतिपाद्य इति निश्चिते तत्रैव द्युभ्वाद्याधारत्वमपि नेतव्यम्। न चानेकमन्त्रपरामर्शसापेक्षशब्दार्थप्रत्यभिज्ञानुसारेणोपक्रमगतसप्तमीश्रुतिप्राप्तं लिङ्गमन्यथा नेतुमयुक्तमिति शङ्क्यम्। सत्यसङ्कल्पे मुक्तजीवे स्वसङ्कल्पवशेन मुख्यस्यापि द्युभ्वाद्याधारत्वस्योपपत्तेरित्याशङ्कानिराकरणार्थं सूत्रम् –सू।। **भेदव्यपदेशात्।।४।।** ननु 'समाने वृक्ष' इति मन्त्रस्यायमर्थः। समान एकस्मिन्वृक्षे वृक्षवद्वृश्चनार्हस्वभावे शरीरे निमग्नः पांसुपुञ्जनिमग्नो जलकण इव तदविवेकमापन्नोऽत एव तद्गतदोषानात्मीयत्वेनाभिमन्यमानः पुरुषो जीवः अनीशया अनैश्वर्येण तद्दोषनिराकरणाशक्त्या शोचति। यदा जुष्टं भक्त्या सेवितं स्वस्मादन्यं परमेश्वरं पश्यति तदा वीतशोकस्सन्नस्य परमेश्वरस्य महिमानं सत्यसङ्कल्पत्वाद्यैश्वर्यरूपम्। इति एति। इणूगताविति धातोर्लटि गुणाभावः। संज्ञापूर्वकविधेरनित्यत्वात्। 'अनीशयेत्यत्र' भावार्थे 'गुरोश्च हल' (पा० ३.२.१०३ सू) इत्यकारप्रत्ययान्त ईशाशब्दः। अत्र यथा जीवाद्भेदेन परमेश्वरो निर्दिष्टः एवं तद्गतभेदप्रतियोगित्वेन जीवोऽपि निर्दिष्ट एव। एवमुभयोर्निर्दिष्टत्वाविशेषे परमेश्वर एव द्युभ्वाद्याधार इत्यत्र किं विनिगमकं 'तमेवैकं जानथ' 'जुष्टं यदा पश्यती' त्युभयत्रापि ज्ञेयतया निर्दिष्टत्वं विनिगमकमिति चेन्न। 'शरं ह्युपासानिशितं सन्दधीत' 'तद्विज्ञानेन परिपश्यन्ति धीराः' 'एषोऽणुरात्मा चेतसा वेदितव्य' इति पूर्वापरमन्त्रेषु जीवस्यापि ज्ञेयतया निर्देशदर्शनादित्याशङ्क्याह-**स्वतः परमेश्वर इति**। अयमाशयः। 'समाने वृक्ष' इति मन्त्रे ईशशब्देन प्रकरणोपपदादिसङ्कोचकरहितेन स्वतस्सिद्धनिरतिशयैश्वर्यशाली परमेश्वरो निर्दिष्टः। जीवस्तु तत्प्रासादाधेयसत्यसङ्कल्पत्वादितदैश्वर्यैकदेशशाली। एवंरूपाद्भेदव्यपदेशात् परमेश्वर एव द्युभ्वाद्याधार इति युक्तम्। अनादिसिद्धपरमैश्वर्यस्यैवानादिसिद्धद्युभ्वाद्याधारत्वोपाधिकत्वादिति। ननु 'यस्मिन्द्यौ'रित्येतन्मन्त्रसमनन्तराम्नाते 'अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमान' इति मन्त्रे प्रकृतं द्युभ्वाद्याधारमात्मानं 'स एष' इति परामृश्य तस्य हृदयान्तस्सञ्चरणमुच्यते। तथा हि–अरनाभिन्यायेन यत्र नाडीनां संहतत्वं श्रुत्यन्तरप्रसिद्धं तद्यत्रेत्यनूद्यते। प्रसिद्धं तु श्रुत्यन्तरेषु 'हृता नाम हृदयस्य नाड्यो द्वासप्ततिः सहस्त्राणि हृदयात्पुरीततमभिप्रतिष्ठन्त' इत्यादिषु हृदय एव तत्। अतो यच्छब्दापेक्षिततच्छब्दाध्याहारेण तस्य

हृदयस्यान्तस्सञ्चरतीति लभ्यते। परब्रह्मण: शिवस्य लीलामङ्गलविग्रहेण कैलासादिषु प्रसिद्धोऽपि सञ्चारो हृदये न प्रसिद्ध:। किं त्वन्तर्यामितया तत्रावस्थानमात्रं प्रसिद्धं 'य आत्मनि तिष्ठन्नि' त्यादिश्रुतिषु। अत एव सूत्रकारोऽपि 'स्थानादिव्यपदेशाच्च' (ब्र० १.२.१४. सू) 'अवस्थितेरिति काशकृत्स्न' (ब्र० १.४.२२.सू) इत्यन्तर्यामितया तत्रावस्थानमात्रमेव व्यवहरति न तु सञ्चारम्। तस्मादशक्यसङ्घटनं ब्रह्मणि हृदयान्तस्सञ्चरणं जीवे त्वणौ तत्सुघटम्। तथैव बहुधा जायमानत्वमपि। यद्यप्यैच्छिकविग्रहपरिग्रहेण तदुपाधिकं जायमानत्वं ब्रह्मण्यपि कथञ्चित्सम्पादयितुं शक्यं तथापि 'बहुधा जायमान' इत्यत्र 'लक्षणहेत्वो: क्रियाया' (पा० ३.२१.२७. सू.) इति प्रथमासमानाधिकरणशानजूविधायकसूत्रानुसारेण यो जायते सोऽन्तस्सञ्चरतीत्यन्तस्सञ्चरण-क्रियालक्षणत्वेनोपन्यस्तं जननं प्रसिद्धतरं जीवगतमेव ग्राह्यम्। प्रसिद्धतरस्यैव लक्षणत्वात्। तस्मादनन्तरमन्त्रश्रुतहृदयान्तस्सञ्चरणबहुधाजायमानत्वलिङ्गबलेन पूर्वापरसन्दर्भसन्निधापितजीव-विषयमन्त्रान्तरगतशब्दार्थप्रत्यभिज्ञानभूयस्त्वबलेन च मत्रोपक्रमगतश्रुतिसमर्पितमप्येकं द्युभ्वाद्या-धारत्वलिङ्गं बाध्यमिति तदौपचारिकं नेतव्यमित्याशङ्कानिराकरणार्थं सूत्रम्–सू.।। **प्रकरणात्**।।५।। प्रकरणमिदं मुण्डकोपनिषदि 'कस्मिन्नु भगवो विज्ञात' इत्युपक्रममारभ्यासमाप्ति बहुतरश्रुतिलिङ्गादिनियमितं भूतयोनेरक्षरस्य परब्रह्मण:। तदेत 'ददृश्यत्वादिगुणक' (ब्र० १. २. २१. सू) इत्यधिकरण एव व्यवस्थापितम्। तथा च प्राकरणिकपूर्वापरमन्त्रगतानि ब्रह्मविषयाणि बहूनि श्रुतिलिङ्गानि समनन्तरमन्त्रगतलिङ्गद्वयापेक्षया बलवन्ति। ते च लिङ्गे हृदयेषु योगिदृश्यसूक्ष्मरूपव' त्यजायमानो बहुधा विजायत' इति श्रुत्यन्तरप्रसिद्धैच्छिकविग्रह-परिग्रहरूपबहुविधजननवति परब्रह्मणि परमशिवेऽप्युपपद्येते। प्राकरणिकशब्दार्थप्रत्यभिज्ञाश्च सन्निहितशब्दार्थप्रत्यभिज्ञातो बलीयस्यस्सन्ति च। प्राकरणिकेषु 'यस्सर्वज्ञस्सर्वविद्यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठित:। 'नायमात्मा प्रवचनेन लभ्य:' 'यस्मिन्लोका निहिता लोकिनश्च। तदेतदक्षरं ब्रह्म स प्राणस्तदु वाङ्भन:। न वेदैतत्परं ब्रह्म धाम यत्रैवं निहितं भाति शुभ्र'मित्यादिमन्त्रेषु प्रकरणिनि ब्रह्मण्यप्यात्मशब्दो लोकाद्याश्रयत्वप्रतिपादनं च। अत: प्रकारणानुसार्येवास्य मन्त्रस्यार्थो ग्राह्य इत्यभिप्रेत्य व्याचष्टे–**अथ परेति**। ननु यद्यस्मिन्नधिकरणे भूतयोन्यधिकरणप्रसिद्धमक्षरप्रकरणमविचलमास्ते कथं तदन्तर्गते मन्त्रे वाय्वादिपरत्वपूर्वपक्षोत्थानं वायुलिङ्गादिकं ब्रह्मप्रकरणाद्बलीय इति। अस्ति खल्वस्मिन्नेव ब्रह्मप्रकरणे श्रुतिलिङ्गादि-नियमितान्यविषयस्तत्र तत्र मन्त्र:। यथा 'काली कराली च मनोजवा चे'ति मन्त्रो होमकालानुसन्धेयाग्निजिह्वाविषय:। यथा वा 'एषोऽणुरात्मा चेतसा वेदितव्य:' इत्यादिर्जीवविषय:। एवं 'यस्मिन्द्यौरि'ति मन्त्रोऽयं ब्रह्मप्रकरणगतोऽपि वायुलिङ्गादिबलादन्यविषय: स्यादिति। ननु तर्हि 'काली कराली' त्यादिमन्त्रान्तरवदयमपि कश्चन मन्त्रोऽन्यविषयोऽस्तु। तावता ब्रह्मप्रकरणस्य किं

हीयते। यदर्थोऽस्य ब्रह्मविषयत्वप्रसाधनप्रयासः। न चास्य मन्त्रस्य ब्रह्मपरत्वप्रसाधनेनाक्षर-विद्यायामेतन्मन्त्रप्रतिपाद्यः कश्चिदपूर्व उपास्यगुणविशेषादिर्लभ्यते। अक्षरे जगदाश्रयत्वगुणस्य इतरपरित्यागस्य च प्राकरणिके 'र्यस्मिँल्लोका निहिताः' 'तदेवाक्षरं सोम्य विद्धि' इत्यादिमन्त्रान्तरैर्लभ्यत्वात्। 'अन्या वाचो विमुञ्चथे' त्यस्य 'तमेवैकं जानथे' त्येवकारप्रतिपाद्य-विषयान्तरपरित्यागार्थलभ्यतद्विषयशास्त्रालोचनपरित्यागानुवादकत्वे तत्र विद्यायां कस्य चिदतिशय-स्यालाभात्। न च सिद्धान्ते प्रधानस्यानभ्युपगमात् प्रधानपूर्वपक्षनिराकरणार्थमधिकरणं स्यादिति वाच्यम्। ब्रह्मप्रकरणगतस्य मन्त्रस्य प्रधानपरत्वेऽपि तत्परतन्त्रप्रधानस्यैव सिद्धिरिति सिद्धान्तानभिमतस्वतन्त्रप्रधानसिध्द्यप्रसङ्गात् परतन्त्रप्रधानस्येहा 'क्षरात्परतः पर' इत्यत्राक्षरपदेनेव श्वेताश्वतरतैत्तिरीयोपनिषदोरजामत्रेणेव च 'यस्मिन्द्यौ' रिति मत्रेणापि प्रतिपादने विरोधाभावादिति चेत् उच्यते। वायुपूर्वपक्षे 'तमेवैकं जानथे' त्यनेनाक्षरविद्याङ्गभूतायां गत्यनुस्मृतावातिवाहिकदेवतासु वायुरेक एव स्मर्तव्यो नार्चिरादय इति लभ्यते। सिद्धान्ते तु विद्यान्तरवदर्चिरादयोऽपि स्मतर्व्या इत्यस्ति फलभेदः। प्रधानजीवपूर्वपक्षौ तु दृष्टान्तार्थौ यथा ह्यतच्छब्दाद्द्युभ्वाद्याधारो न प्रधानं न वा जीव एवं न वायुरपीति। यत्र क्वचिद्विषयवाक्यान्तरे ब्रह्मपरत्वनिर्णयोपयोगिनो न्यायविशेषस्य व्युत्पादनार्थौ वा प्रधानजीवपूर्वपक्षौ। ननु ब्रह्मप्रकरणा 'द्यस्मिन्द्यौ'रिति मत्रप्रतिपाद्यं ब्रह्मैव न तु जीव इत्ययुक्तम्। ब्रह्मण एव जीवरूपत्वात्। मुण्डकस्यापि 'कस्मिन्नु खलु विज्ञाते सर्वमिदं विज्ञातं भवती'त्युपक्रमेण 'ब्रह्म वेद ब्रह्मैव भवती'त्युपसंहारेण च ब्रह्मजीवाभेदे तात्पर्यावसायात्। 'समाने वृक्ष' इति मत्रे तयोर्भेदव्यपदेशस्त्वसिद्धः। अन्यदीयस्य महिम्नोऽन्येन कथमपि प्राप्तुमशक्यतया 'अस्य महिमानमिति' इत्यस्याज्ञानतिरोहितब्रह्मभावाविर्भावपरत्व एव साङ्गत्यात्। तत्र 'जुष्टं यदा पश्यत्यन्यमीश' मित्यस्य पूर्वार्धे देहात्मभ्रमेण शोकवत्तयोक्तं स्वात्मानं यदा देहादन्यमीशं ब्रह्माभिन्नं च पश्यतीत्येवमर्थपरत्वोपपत्तेरित्याशङ्कानिराकरणार्थं सूत्रम्–सू॥ **स्थित्यदनाभ्यां च**॥६॥

'भेदाव्यपदेशा' दिति व्यवहितं सूत्रमिहानुवर्तते। ततश्चायं सूत्रार्थः। 'द्वा सुपर्णे'ति मत्रे 'तयोरन्य' इ'त्यनश्नन्नन्य' इति च जीवब्रह्मणोरेव परस्परभेदो व्यपदिश्यते। स चात्त्यनश्नन्नभिचाक-शीतीत्यत्तृत्वानशनस्थितिरूपपरस्परविरुद्धधर्माभ्यामुपपादनपूर्वकमेव व्यपदिश्यते। तस्मादुपपत्ति-रूपतात्पर्यलिङ्गोपबृंहितभेदव्यपदेशात् संसारिणोऽर्थान्तरभूत एव परमेश्वरः प्रकरणप्रतिपाद्य इति तत्प्रकरणात् स एव द्युभ्वाद्याधार इति युक्तमित्येवं सूत्रार्थमभिप्रेत्य व्याचष्टे–**द्वा सुपर्णेत्यादिना।** सर्वविज्ञानप्रतिज्ञानं विशिष्टशिवाद्वैतरूपे सविशेषाद्वैत एवोपपन्नम्। 'ब्रह्म वेद ब्रह्मैव भवती' त्येतत् ब्रह्मसदृशो भवतीत्येतदर्थकमिति भाष्य एव तत्रतत्रोपपादितम्। 'अस्य महिमानमिती'त्येतदपि सोपपत्तिकभेदव्यपदेशानुसारेण सदृशमहिमावाप्तिपरं द्रष्टव्यम्। 'यदा पश्यः पश्यत' इत्यनन्तरमत्रे तत्साम्यापत्तेः कथ्यमानत्वात्तदनुसारेण 'एषोऽणुरात्मे' त्यग्रिममत्रे 'तस्मिन्विशुद्धे विभवत्येष

आत्मे'त्यस्य विभुवदाचाररूपतत्साम्यप्राप्तेर्विवक्षितत्वाच्च। अधिकरणार्थमुपसंहरति-**इति निर्णय इति।** अत्र यद्यपि प्राग्ब्रह्मपरतया निर्णीते मुण्डके स्पष्टान्येव ब्रह्मलिङ्गानि। तथापि द्युभ्वाद्याधारो वायुः प्रधानं जीवो वा तेन तज्ज्ञानेन वा प्राप्ये ब्रह्मण्यमृतशब्दोदिते प्राकरणिकसर्वधर्मान्वय इति पूर्वपक्षकरणादस्पष्टब्रह्मलिङ्गता। इहा'मृतस्यैष सेतु'रित्यत्र केनचित्प्रकारेण सेतुशब्दावलम्बेन पूर्वपक्षे निरस्तेऽपि 'परमतस्सेतून्मानसम्बन्धे' (ब्र० ३. २. ३०. सू.) त्यधिकरणे प्रकारान्तरेण तदवलम्बनः पूर्वपक्षः करिष्यत इति न पौनरुक्त्यम्।। ।।इति द्युभ्वाद्यधिकरणम्।।१।।

सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति-**मुक्तेति।** द्युभ्वाद्याधारस्य परमेश्वरत्वे मुक्तोपसृप्यत्वं हेतुतयोक्तं तदनुपपन्नम्। न खलु मुक्तानां परमेश्वरोपसर्पणं प्रजानां राजोपसर्पणमिव विषयभोगलिप्सया सम्भवति। सकलविषयभोगविरक्तानामेव मुक्तावधिकाराङ्गीकारादित्याशङ्क्य स्वतस्तस्य निरतिशयानन्दरूपतयैव मुक्तप्राप्यत्वमिति तदुपपादयितुमुत्तराधिकरणमारभ्यत इत्यर्थः। अनेनाक्षेपिकी पूर्वाधिकरणसङ्गतिर्दर्शिता भवति।।सू०।। **भूमा सम्प्रसादादध्युपदेशात्**।।७।।

इति श्रीशिवार्कमणिदीपिका द्युभ्वाद्यधिकरण समाप्तम्

अथ भूमाधिकरणम्। ॥ सू॰ ८–९ ॥

शाङ्करभाष्यम्

भूमा संप्रसादादध्युपदेशात्॥८॥ इदं समामनन्ति–"भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति। यत्र नान्यत्पश्यति नान्यच्छ्रृणोति नान्यद्विजानाति स भूमाऽथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पम्" (छा॰ ७/२३/२४) इत्यादि। तत्र संशय:–किं प्राणो भूमा स्यात्, आहोस्वित्परमात्मेति। कुत: संशय:? भूमेति तावद् बहुत्वमभिधीयते; "बहोर्लोपो भू च बहोरि" (पा॰ ६/४/१५८) ति भूमशब्दस्य भावप्रत्ययान्ततास्मरणात्। किमात्मकं पुनस्तद् बहुत्वमिति विशेषाकाङ्क्षायां "प्राणो वा आशाया भूयान्" (छा॰ ७/१५/१) इति संनिधानात्प्राणो भूमेति प्रतिभाति। तथा "श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति। सोऽहं भगव: शोचामि तं मा भगवाञ्शोकस्य पारं तारयत्वि" (छा॰ ७/१/३) ति प्रकरणोत्थानात्परमात्मा भूमेत्यपि प्रतिभाति। तत्र कस्योपादानं न्याय्यम्, कस्य वा हानमिति भवति संशय:॥

किं तावत्प्राप्तम्? प्राणो भूमेति। कस्मात्? भूय: प्रश्नप्रतिवचनपरम्पराऽदर्शनात्। यथा हि "अस्ति भगवो वाचो भूय: इति वाग्वाव नाम्नो भूयसी" इति। तथा "अस्ति भगवो वाचो भूय इति मनो वाव वाचो भूय" इति च नामादिभ्यो ह्या प्राणाद्भूय: प्रश्नप्रतिवचनप्रवाह: प्रवृत्त:, नैवं प्राणात्परं भूय:प्रश्नप्रतिवचनं दृश्यते–"अस्ति भगव: प्राणाद्भूय इत्यदो वाव प्राणाद् भूय" इति। प्राणमेव तु नामादिभ्य आशान्तेभ्यो भूयांसं "प्राणो वा आशाया भूयान्" इत्यादिना सप्रपञ्चमुक्त्वा प्राणदर्शिनश्चातिवादित्वम्–"अतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नुवीते" त्यभ्यनुज्ञाय "एष तु वा अतिवदति य: सत्येनातिवदती" ति प्राणव्रतमतिवादित्वमनुकृष्यापरित्यज्यैव प्राणं सत्यादिपरम्परया भूमानमवतारयन्प्राणमेव भूमानं मन्यत इति गम्यते॥

कथं पुन: प्राणे भूमनि व्याख्यायमाने "यत्र नान्यत्पश्यती" त्येतद् भूम्नो लक्षणपरं वचनं व्याख्यायेतेति? उच्यते–सुषुप्त्यवस्थायां प्राणग्रस्तेषु करणेषु दर्शनादिव्यवहारनिवृत्तिदर्शनात्सम्भवति प्राणस्यापि "यत्र नान्यत्पश्यती" इत्येतल्लक्षणम्। तथाच श्रुति: "न श्रृणोति न पश्यती" त्यादिना सर्वकरणव्यपारप्रत्यस्तमयरूपां सुषुप्त्यवस्थामुक्त्वा "प्राणाग्नय एवैतस्मिन्पुरे जाग्रति" (प्र॰ ४/२/३)

इति तस्यामेवावस्थायां पञ्चवृत्तः प्राणस्य जागरणं ब्रुवती प्राणप्रधानां सुषुप्त्यवस्थां दर्शयति। यच्चैतद् भूम्नः सुखत्वं श्रुतम्–"यो वै भूमा तत्सुखम्" (छा॰ ७/२३) इति, तदप्यविरुद्धम्; "अत्रैष देवः स्वप्नान्न पश्यत्यथ यदेतदस्मिञ्शरीरे सुखं भवती"-(प्र॰ ४/६) ति सुषुप्त्यवस्थायामेव सुखश्रवणात्। यच्च "यो वै भूमा तदमृतम्" (छा॰ ७/२४/१) इति, तदपि प्राणस्याविरुद्धम्; "प्राणो वा अमृतम्" (कौ॰ ३/२) इति श्रुतेः।

कथं पुनः प्राणं भूमानं मन्यमानस्य "तरति शोकमात्मविदि" त्यात्मविविदिषया प्रकरणस्योत्थानमुपपद्यते? प्राण एवेहात्मा विवक्षित इति ब्रूमः॥

तथाहि–"प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मण" (छा॰ ७/१५/१) इति प्राणमेव सर्वात्मानं करोति। "यथा वा अरा नाभौ समर्पिता एवमस्मिन् सर्वं समर्पितम्" इति च सर्वात्मत्वारनाभिनिदर्शनाभ्यां च सम्भवति वैपुल्यात्मिका भूमरूपता प्राणस्य। तस्मात् प्राणो भूमेत्येवं प्राप्तम्॥

तत इदमुच्यते–परमात्मैवेह भूमा भवितुमर्हति, न प्राणः ; कस्मात्? *संप्रसादादध्युपदेशात्*॥ संप्रसाद इति सुषुप्तं स्थानमुच्यते; सम्यक्प्रसीदत्यस्मिन्निति निर्वचनात्। बृहदारण्यके च स्वप्नजागरितस्थानाभ्यां सह पाठात् तस्यां च संप्रसादावस्थायां प्राणो जागर्तीति प्राणोऽत्र संप्रसादोऽभिप्रेयते। प्राणादूर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः। प्राण एव चेद् भूमा स्यात्, स एव तस्मादूर्ध्वमुपदिश्येतेत्यश्लिष्टमेवैतत्स्यात्। न हि नामैव नाम्नो भूय इति नाम्न ऊर्ध्वमुपदिष्टम्। किं तर्हि? नाम्नोऽन्यदर्थान्तरमुपदिष्टम् "वाग्वाव नाम्नो भूयसी" ति। तथा वागादिभ्योऽप्या-प्राणादर्थान्तरमेव तत्र तत्रोर्ध्वमुपदिष्टम्, तद्वत्प्राणादूर्ध्वमुपदिश्यमानो भूमा प्राणादर्थान्तरभूतो भवितुमर्हति॥

ननु–इह नास्ति प्रश्नोऽस्ति भगवः प्राणाद् भूय इति, नापि प्रतिवचनमस्ति प्राणाद्वाव भूयोऽस्तीति, कथं प्राणादधि भूमोपदिश्यत इत्युच्यते? प्राणविषयमेव चातिवादित्वमुत्तरत्रानुकृष्यमाणं पश्यामः–"एष तु वा अतिवदति यः सत्येनातिवदती" ति। तस्मान्नास्ति प्राणादध्युपदेशः–इति, अत्रोच्यते–न तावत्प्राणविषयस्यैवातिवादित्वस्यैतदनुकर्षणमिति शक्यं वक्तुम्; विशेषवादात्–"यः सत्येनातिवदती" ति॥

ननु–विशेषवादोऽप्ययं प्राणविषय एव भविष्यति? कथम्? यथैषोऽग्निहोत्री यः सत्यं वदतीत्युक्ते न सत्यवदनेनाग्निहोत्रित्वम्? केन तर्हि? अग्निहोत्रेणैव, सत्यवदनं त्वग्निहोत्रिणो विशेष उच्यते। तथा "एष तु वा अतिवदति यः सत्येनातिवदती" त्युक्ते न सत्यवदनेनातिवादित्वम्, केन

तर्हि? प्रकृतेन प्राणविज्ञानेनैव, सत्यवदनं तु प्राणविदो विशेषो विवक्षित:—इति, नेति ब्रूम: ; श्रुत्यर्थपरित्यागप्रसङ्गात्। श्रुत्या ह्यत्र सत्यवदनेनातिवादित्वं प्रतीयते—"य: सत्येनातिवदति सोऽतिवदती" इति। नात्र प्राणविज्ञानस्य संकीर्तनमस्ति। प्रकरणात्तु प्राणविज्ञानं सम्बध्येत। तत्र प्रकरणानुरोधेन श्रुति: परित्यक्ता स्यात्। प्रकृतव्यावृत्त्यर्थश्च तुशब्दो न सङ्गच्छते—"एष तु वा अतिवदती" इति। "सत्यं त्वेव विजिज्ञासितव्यम्" (छा॰ ७/१६) इति च प्रयत्नान्तरकरणमर्थान्तरविवक्षां सूचयति। तस्माद्यथैकवेदप्रशंसायां प्रकृतायामेष तु महाब्राह्मणो यश्चतुरो वेदानधीत इत्येकवेदेभ्योऽर्थान्तरभूतश्चतुर्वेद: प्रशस्यते, तादृगेतद् द्रष्टव्यम्। न च प्रश्नप्रतिवचनरूपयैवार्थान्तरविवक्षया भवितव्यमिति नियमोऽस्ति; प्रकृतसम्बन्धासम्भवकारितत्वादर्थान्तरविवक्षाया:। तत्र प्राणान्तमनुशासनं श्रुत्वा तुष्णीम्भूतं नारदं स्वयमेव सनत्कुमारो व्युत्पादयति—यत्प्राणविज्ञानेन विकारानृतविषयेणातिवादित्वमनतिवादित्वमेव यत्—"एष तु वा अतिवदति य: सत्येनातिवदती" ति। तत्र सत्यमिति परं ब्रह्मोच्यते; परमार्थरूपत्वात्, "सत्यं ज्ञानमनन्तं ब्रह्मे" (तै॰ २/१) ति च श्रुत्यन्तरात्। तथा व्युत्पादिताय नारदाय "सोऽहं भगव: सत्येनातिवदानी" त्येवं प्रवृत्ताय विज्ञानादिसाधनपरम्परया भूमानमुपदिशति। तत्र यत्प्राणादधि सत्यं वक्तव्यं प्रतिज्ञातम्, तदेवेह भूमेत्युच्यत इति गम्यते। तस्मादस्ति प्राणादधि भूम्न उपदेश इति। अत: प्राणादन्य: परमात्मा भूमा भवितुमर्हति। एवं चेहात्मविविदिषया प्रकरणस्योत्थानमुपपन्नं भविष्यति। प्राण एवेहात्मा विवक्षित इत्येतदपि नोपपद्यते। न हि प्राणस्य मुख्यया वृत्त्याऽऽत्मत्वमस्ति। न चान्यत्र परमात्मज्ञानाच्छोकविनिवृत्तिरस्ति; "नान्य: पन्था विद्यतेऽयनाय" (श्वे॰ ६/१५) ति श्रुत्यन्तरात्। "तं मा भगवाञ्शोकस्य पारं तारयत्वि" (छा॰ ७/१/३) ति चोपक्रम्योपसंहरति—"तस्मै मृदितकषायाय तमस: पारं दर्शयति भगवान्सनत्कुमार" (छा॰ ७/२६/२) इति। तम इति शोकादिकारणमविद्योच्यते। प्राणान्ते चानुशासने न प्राणस्यान्यायत्ततोच्येत। "आत्मत: प्राण:" (छा॰ ७/२६/१) इति च ब्राह्मणम्। प्रकरणान्ते परमात्मविवक्षा भविष्यति, भूमा तु प्राण एवेति चेत्, न; "स भगव: कस्मिन् प्रतिष्ठित इति स्वे महिम्नी" (छा॰ ७/२४/१) त्यादिना भूम्न एवाऽऽप्रकरणसमाप्तेरनुकर्षणात्। वैपुल्यात्मिका च भूमरूपता सर्वकारणत्वात्परमात्मन: सुतरामुपपद्यते।।८।।

धर्मोपपत्तेश्च।।९।।

अपि च ये भूम्नि श्रूयन्ते धर्मा:; ते परमात्मन्युपपद्यन्ते। "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे" ति दर्शनादिव्यवहाराभावं भूमन्यवगमयति। परमात्मनि चायं दर्शनादिव्यवहाराभावोऽवगत:—"यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्" (बृ॰ ४/५/१५)

इत्यादिश्रुत्यन्तरात्। योऽप्यसौ षुसुसुप्तावस्थायां दर्शनादिव्यवहाराभाव उक्तः, सोऽप्यात्मन एवासङ्गत्वविवक्षयोक्तः, न प्राणस्वभावविवक्षया; परमात्मप्रकरणात्। यदपि तस्यामवस्थायां सुखमुक्तम्, तदप्यात्मन एव सुखरूपत्वविवक्षयोक्तम्। यत आह–"एषोऽस्य परम आनन्द एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती (बृ० ४/३/३२) ति। इहापि "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखम्" इति सामयसुखनिराकरणेन ब्रह्मैव सुखं भूमानं दर्शयति। "यो वै भूमा तदमृतम्" इत्यमृतत्वमपीह श्रूयमाणं परमकारणं गमयति; विकाराणाममृतत्वस्या पेक्षिकत्वात्, "अतोऽन्यदार्तम्" (बृ० ३/४/२) इति श्रुत्यन्तरात्। तथाच सत्यत्वं स्वमहिमप्रतिष्ठितत्वं सर्वगतत्वं सर्वात्मत्वमिति चैते धर्माः श्रूयमाणाः परमात्मन्येवोपपद्यन्ते, नान्यत्र। तस्माद् भूमा परमात्मेति सिद्धम्॥९॥ इति द्वितीयं भूमाधिकरणम्॥

इति शांकरभाष्यम् भूमाधिकरणम् समाप्तम्

वार्तिकम्

भूमा संप्रसादादध्युपदेशात्।।८।। यदुक्तम्–स्वशब्दात् द्युभ्वाद्यायतनं परं ब्रह्म–इति, तन्न युक्तम्; आत्मशब्दस्य भूमवाक्येऽब्रह्मण्यपि पञ्चवृत्तिप्राणे प्रयोगदर्शनेनैकान्त्यादित्याक्षेपिक्यधिकरणसङ्गतिः। छान्दोग्ये नारदसनत्कुमारसंवाद इदं श्रूयते–"भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यो वै भूमा तत्सुखं यत्र नान्यत्पश्यति नान्यत् श्रृणोति नान्यद् विजानाति स भूमा। अथ यत्रान्यत् पश्यत्यन्यत् श्रृणोत्यन्यद्विजानाति तदल्पं नाल्पे सुखमस्ती" त्यादि।।

तत्र सन्दिह्यते–किमुक्तलक्षणो भूमा पञ्चवृत्तिः प्राणो गृह्यते, किं वा परं ब्रह्म–इति। यदोक्तलक्षणो भूमा प्राणः, तदा तस्यैव विज्ञापनीयस्य प्रकरणात् "तरति शोकमात्मविदि" ति तद्वाक्योपक्रमे श्रूयमाणमात्मपदं यथाकथञ्चित् प्राणविषयमेव व्याख्येयमित्याक्षेपसिद्धिः। यदा च परं ब्रह्म, तदोपक्रमगतात्मशब्दस्य तद्विषयत्वेन विपक्षावृत्तित्वाद् नाक्षेपसिद्धिरिति।।

ननु– "यत्र नान्यत् पश्यति नान्यत् श्रृणोति नान्यद् विजानाति स भूमे" ति दर्शनाद् यथावद्रूपस्य भूमलक्षणस्य मुख्यप्राणेऽसंभवाद् ब्रह्मणि च तदुपपत्तेः–"यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येदि" ति श्रुत्यन्तरात्, तथा–"यो वै भूमा तत्सुखमि" ति भूम्नः सुखत्वश्रुतेः, प्राणस्य च विकार्यनृतात्मकस्यासुखत्वात्, "विज्ञानमानन्दं ब्रह्मे" ति श्रुत्यन्तरे ब्रह्मणः सुखरूपत्वश्रुतेः, "तरति शोकमात्मविदि" ति वाक्योपक्रमाच्च भूम्नो ब्रह्मत्वावधृतेः कुतः पुनस्तस्य मुख्यप्राणत्वशङ्का–इति? उच्यते; भूमशब्देन हि बहुत्वलक्षणो भावोऽभिधीयते भवता, कुतः? "बहोर्लोपो भू च बहोः" इति भूमशब्दस्य भावप्रत्ययान्ततास्मरणात्। प्रकृते च "भूमा त्वेव विजिज्ञासितव्य" इत्यत्र केवलबहुत्वसंख्याया जिज्ञास्यत्वासंभवाद् भावभवित्रोरभेदात् शुक्लादिशब्देनेव शुक्लात्मको भविता कश्चिद् बहुत्वात्मको लक्षणया भूमशब्देनाभिधीयत इति वाच्यम्। तत्र को वा भविता? भविता च बहुत्वात्मक इति तद्विशेषाकाङ्क्षायां, संभवति "प्राणो वा आशाया भूयान्" इति भूमवाक्यसंनिधानपठितप्राणेनापि तदाकाङ्क्षापूरणम्, संभवति च "तरति

शोकमात्मविदि'' ति प्रकृतात्मनापि। अतः किं संनिहितेनाकाङ्क्षापूरणम्, किं वा प्रक्रान्तेनात्मनेति। यद्याद्यः, तदा प्राणो भूमा; अथ द्वितीयः, तदा परं ब्रह्मेति संनिधानप्रक्रमाभ्यां भवति संशयः। तदिदमुक्तम्– *किमात्मकं पुनस्तद् बहुत्वमिति विशेषाकाङ्क्षायामित्यादि*।।

एतेन–यदुक्तं कैश्चित्–'प्रकरणसंनिधानाभ्यां बलवदबलवत्कारणाभ्यां संशयप्रदर्शनं न भाष्यकारस्य युक्तम्–इति, तदपि–प्रत्युक्तं भवति। आकाङ्क्षायोग्यतयोरिव संनिधानस्यापि वाक्यार्थवोधहेतुत्वात्, धहेतुत्वात्, संनिहितेनाकाङ्क्षापूरणे संभवति व्यवहितेन तत्पूरणायोगाद् विपरीतबलालस्यैव प्रकृते संभवात्। न हि भवति 'राज्ञो भार्या' 'पुरुषो देवदत्तस्ये' त्यत्र राज्ञ इति पदस्य संनिहितेन भार्यापदेनाकाङ्क्षापूरणे संभवति व्यवहितेन पुरुषपदेन तत्पूरणम्। तत् कस्य हेतोः? संनिधानस्याप्यन्वयबोधहेतुत्वादित्युक्तम्। यद्यपि–''इतः पश्यसि धावन्तं दूरे यान्तं वनस्पतिम्। त्वां ब्रवीमि विशालाक्षि यापि वक्षि जरद्गवम्'' इत्यत्र व्यवहितेनापि जरद्गवमित्यनेनेतः पश्यसि धावन्तमित्यस्यान्वयो दृष्टः ; ''यस्य येनाभिसम्बन्धो गतस्तस्यापि तस्य सः'' इति न्यायात्, अरुणाधिकरणन्यायविरोधाच्च। न हि–''अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाती' त्यत्र परस्परसंनिहितयोरप्यरुणगुणपिङ्गाक्षीद्रव्ययोरन्वयो भवति, किं तर्हि? व्यवहितयापि क्रयभावनया तयोरुभयोरन्वयः। कुतः? क्रियाकारकयोरेव साध्यसाधनभावेनान्वययोग्यत्वात्, कारककयोस्तद-संभवात्, संभवे वा वाक्यभेदापत्तेरावश्यकत्वात्, तदनापत्तौ च वाजपेयाधिकरणन्यायेण विरुद्धत्रिकद्वयापत्तेः–इति; तथापि तत्रैव संनिधेर्बाधः, यत्र संनिहितोऽयोग्योऽनाकाङ्क्षितो भवति, तद्यथा–धावन्तमित्यस्य संनिधाने पठितो वनस्पतिरयोग्यः, यथा वा भार्यासंनिधाने पठितः पुरुषोऽनाकाङ्क्षिततया; आकाङ्क्षायोग्यतालक्षणे प्रकरणलिङ्गे उपजीव्येव संनिधानस्य स्वार्थसम्पर्कत्वात्। तदुक्तं शेषलक्षणे–''श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रतिकर्षादि'' ति। प्रकृते च संनिधाने पठितः प्राणो भूम्नाऽन्वययोग्यो यथा, तथा पूर्वपक्षं व्युत्पादयन्तो दर्शयिष्यामः। आकाङ्क्षा तु भूम्नस्तद्विषया दर्शितैव।।

ननु–एवमपि न प्रकृते संशयः संभवति; संनिधानस्यैवोक्तरीत्याऽभ्यर्हितत्वेन प्रकरणाद् बलवत्त्वात्। तथाहि–वाक्यैकवाक्यताप्रयोजकाकाङ्क्षाविशिष्टप्रधानवाक्यम्, तदाकाङ्क्षा वा प्रकरणमित्युच्यते। तद्यथा–''वायव्यं श्वेतमालभेत भूतिकाम'' इति ''दर्शपूर्णमासाभ्यां स्वर्गकाम'' इति च वाक्यम्, तद्विध्यन्ताकाङ्क्षा वा प्रकरणमित्युच्यते। विध्यन्तश्च 'क्षेपिष्ठा देवते' त्यादिः, समिधो यजतो'' त्यादिर्वा। स च स्वार्थं निरवयवेन प्रतिपाद्यैव स्वाध्यायाध्ययनविधिवशात् स्वार्थस्य कैमर्थ्याकाङ्क्षया प्रकरणमपेक्षते, नान्यथा। न हि वायोः क्षिप्रकारित्वम्, अनुष्ठेयसमिदादिपदार्थं च स्वार्थमप्रतिपाद्य तस्य कैमर्थ्यजिज्ञासां जनयितुमीष्टे विध्यन्तः। न च कैमर्थ्यजिज्ञासां विना

प्रकरणापेक्षा। न च ''वायुमेव स्वेन भागधेयेनोपधावति'' ''तनूनपातं यजती'' त्यादिसंनिहितवाक्येन तस्य कैमर्थ्याकाङ्क्षा पूर्यते; यतः प्रकरणापेक्षा न स्यात्, संनिहितस्यापि निष्प्रयोजनतया तत्पूरणाक्षमत्वम्। तस्मात् यथा-''अक्षैर्दीव्यति'' ''शौनः शोफमाख्यायती'' त्यादिवाक्यं संनिहितमभिषेचनीयवाक्यं हित्वा कैमर्थ्यवशेन राजसूयवाक्येन व्यवहितेनाप्येकवाक्यतां भजते। यद्यप्यभिषेचनीयोऽपि प्रधानकर्मत्वात् फलवान्; तथाप्याग्नेयादिवत् प्रत्येकमफलत्वात् समुदाये फलश्रवणात् तस्यै दर्शपूर्णमासशब्दवाच्यत्ववद् राजसूयशब्दवाच्यत्वाद् नाभिषेचनीयमात्रस्य फलवत्त्वमस्ति, तद्वत् संनिहितमफलवाक्यं परित्यज्य व्यवहितेनापि फलवत्प्राकरणिकवाक्येन कैमर्थ्याकाङ्क्षापूरकेण वायव्यश्वेतालम्भवाक्येनैकवाक्यत्वं वायुक्षिप्रकारित्वादिना वाक्यस्येति युक्ता तत्र प्रकरणापेक्षा, इह तु भूमवाक्ये साकाङ्क्षतया स्वार्थस्यैवापर्यवसानात् तदपर्यवसाने च कैमर्थ्यस्यैवानुदयाद् दूरत एव तत्पूरणाय प्रकरणापेक्षा। अतस्तत्पर्यवसानाय प्रथमं संनिहितमनुसरणीयम्। तच्चेत् तादृशं लब्धम्, तावतैव स्वार्थपर्यवसानाद् न तदर्थं प्राकरणिकमनुमृग्यते। न हि ''वायुर्वै क्षेपिष्ठा देवते'' ति संनिहितानां परस्परान्वयेन स्वार्थपर्यवसाने संभवति 'वायुरालभेत' क्षेपिष्टा देवता वाऽऽलभेतेति व्यवहितेन प्राकरणिकेन तत्पर्यवसानं क्रियते तथा सति संनिधेर्वाक्यार्थबोधाहेतुत्वापत्तेः। संभवति च वक्ष्यमाणपूर्वपक्षरीत्या संनिहितेन प्राणेन भूमवाक्यार्थपर्यवसानम्। तस्मादेवमपि संनिधान-प्रकरणाभ्यां नास्ति संशयः-इति।।

अत्रोच्यते-भवेत् संनिहितेनैव प्राणेनाकाङ्क्षापूरणनिश्चयः, यदि भूमवाक्ये स श्रुतः स्यात्। न चैतदस्ति; 'प्राणो वाव आशाया भूयानि'' ति वाक्यान्तरे तस्य श्रुतत्वात्। एकवाक्योपात्तानां हि योग्यानां साकाङ्क्षाणां पदार्थानां संनिधानमन्वयबोधे कारणम्, यथा-'गामभ्याज शुक्लां दण्डेने' ति, न भिन्नवाक्योपात्तानाम्; यथा 'भार्या राज्ञः' 'पुरुषो देवदत्तस्य'। भिन्नवाक्योपात्तस्य तत्रैव स्वसमभिव्याहृतपदार्थेन सहानुषङ्गात् तस्य पदार्थस्य वाक्यान्तरेऽपेक्षायामनुषङ्ग एव भवति, यथा-रात्रिसत्रवाक्ये प्रतिष्ठाफलस्य, तद्वदिहापि भूमवाक्ये विशेष्याकाङ्क्षायां स्ववाक्येऽश्रुतस्य तस्य वाक्यान्तरादनुवर्तनेऽनुषङ्ग एव भवेत्। स चानुषङ्गः किं संनिहिताद्वा प्राणवाक्यात्, किं प्रक्रान्ताद्वाऽऽत्मवाक्यात्, इत्युपपद्यते संशयः।।

ननु-एवमपि नोपपद्यते संशयः ; संनिहितानुषङ्गस्य युक्तत्वादिति-चेत्, सत्यम्; अस्ति हि भूमवाक्यस्य प्राणवाक्यादतिसंनिहिततरं वाक्यान्तरम्-''एष तु वा अतिवदति यः सत्येनातिवदती'' ति। तत्र चायमस्ति संशयः- किं प्राणभूयस्त्ववादिनोऽस्मिन् वाक्येऽतिवादित्वमुच्यते, किं वा प्रकृतात्मभूयस्त्ववादिन इति। यद्याद्यः, तर्हि प्राणस्यैव संनिहिततरत्वेनानुषङ्गाद् भूमत्वम्; अथ द्वितीयः, तदा प्रकृतात्मन एव तत्त्वाद् भूमत्वमिति। तदर्थं चायं विचारः प्रवर्तते-किम्-''एष तु वा

अतिवदती'' त्यत्र तुशब्देन प्राणभूयस्त्ववादोऽनुकृष्यते उत निषिद्धयत इति; उभयथापि तत्प्रयोगदर्शनात्। तदर्थं चायमन्यो विचार:–किं सत्यशब्देनात्रानृतवदनाभावो लोकसिद्ध उच्यते, किं वा–''सत्यं ज्ञानमनन्तं ब्रह्म'' त्यादिश्रुते: परमात्मनि तत्प्रतिद्धे: परमात्मेति। यद्याद्य:, तर्हि संनिहितानुकर्षार्थ एव तुशब्दो भविष्यति; अथ द्वितीय:, तदा व्यवच्छेदार्थ इति।। किं प्राप्तम्?

प्राणभूयसत्ववादस्य तुशब्देनानुकर्षणम्।
ततो भूयस्त्वसंप्रश्नप्रत्युक्त्यो: पूर्ववदिह।।

अदृष्टे: सत्यशब्दोऽपि प्रसिद्धयनतिलङ्घनात्।
अनृताभाववाची स्यात् प्राणो भूमाऽत इष्यते।।

प्राणोऽत्र भूमा भवितुमर्हति, न परमात्मा, कुत:? संनिहिततरेण तेनैव भूम्न आकाङ्क्षोपशमात्, व्यवहितेन चात्मनाऽन्वयानुपपत्ते:। ननु–प्राणस्य संनिहिततरत्वमसिद्धम्; प्रकृतात्मन एव तत्वात्, ''एष तु वा अतिवदति य: सत्येनातिवदती'' त्यत्र सत्यशब्देन प्रकृतात्मन एवोपन्यासात्, श्रुत्यन्तरे सत्यशब्दस्यात्मनि प्रसिद्धत्वात्, तुशब्देन प्राणातिवादाद् व्यवच्छिद्य सत्यातिवादिन एवातिवादित्वावधारणादिति–चेत्, न; पूर्वोक्तप्राणातिवादित्वानुकर्षणस्यैव प्रकृते तुशब्दार्थत्वेन तस्य व्यवच्छेदार्थत्वासिद्धे:। अत्र हि नारदं विविदिषुमुपलभ्य सनत्कुमारेण ''नाम ब्रह्मेत्युपास्स्वे'' त्युक्ते नारदस्तं पृच्छति–''किं नाम्नोऽस्ति भूय'' इति। तत्र सनत्कुमारस्य प्रतिवचनम्–''वाग् वाव नाम्नो भूयसीति।'' तदेवंक्रमेण नारदसनत्कुमारयो: प्रश्नोत्तरे वागिन्द्रियमुपक्रम्य मन:-संकल्प-चित्त-ध्यान विज्ञान-बलान्न-तोय-तेजो-नभ:-स्मराशा-प्राणेषु पर्यवसितेषु, प्राणस्य च समस्तक्रियाकारकफलभेदचित्ताद्यात्मकत्वेन च रथनाभिदृष्टान्तेन सर्वप्रतिष्ठात्वेन च प्राणभूयस्त्ववादिनोऽतिवादित्वेन च नामाद्याशान्तप्रपञ्चात् प्राणभूयस्त्वमुक्त्वा नारदेनापृष्ट एव सनत्कुमार एकग्रन्थेनाह ''एष तु वा अतिवदति य: सत्येनातिवदती'' ति। अत्र यदि प्राणादर्थान्तरवादित्वेनातिवादित्वं ब्रूयात्, एवं तर्हि यथा पूर्वोपदिष्टानां वागादिप्राणपर्यन्तानां नामादिभ्यो भूयस्त्वप्रश्नप्रतिवचनाभ्यामुपदिशति, तद्वत्–अस्ति भगव: प्राणाद् भूय: इति अदो वाव प्राणाद् भूयोऽस्तीति प्रश्न-प्रतिवचनाभ्यामेव तमर्थमुपक्रम्य ब्रूयात्, नैकग्रन्थेन; वाक्यवैरूप्यापत्ते:। न चेह पूर्ववत् प्रश्न-प्रतिवचने स्त: ; अदर्शनात्। तस्मात् पश्याम:–प्राणविषयमेवातिवादित्वमुत्तरत्रानुकृष्य ततोऽर्थान्तरविषयत्वम्; ''य: सत्येनातिवदती'' त्यत्र यदि सत्यवदनेनातिवादित्वमुच्येत, स्यात् तर्हि प्राणादर्थान्तरवादित्वेनातिवादित्वम्, न चैतदस्ति; किं तर्हि? प्राणविज्ञानेनैव प्राप्तमतिवादित्वं तु-शब्देनानुकृष्य तस्यैव प्राणातिवादिनोऽनृताभाववदनलक्षणं

विशेषान्तरम्–"यः सत्येनातिवदती" त्यनेन विधीयते। न च–विधेयत्वं यच्छब्दसम्बन्धानुपपत्तिरिति–वाच्यम्; "यदाग्नेयोऽष्टाकपालो भवती" तिवत् तत्सम्बन्धेऽपि विधेयत्वाविरोधात्। तस्मात् "एषोऽग्निहोत्री, यः सत्यं वदती" त्युक्ते न सत्यवदनेनाग्निहोत्रित्वमुच्यते, किं तर्हि? अग्निहोत्रेणैवाग्निहोत्रित्वम्, सत्यवदनं तस्य विशेषान्तरमभिधीयते, तथा–"एष तु वा अतिवदति यः सत्येनातिवदती" त्युक्ते नास्य सत्यवदनेनातिवादित्वम्, कथं तर्हि? प्रकृतेन प्राणविज्ञानेनैव; सत्यवदनं तु प्राणातिवादिनो विशेषो विवक्ष्यत इति युक्तमुत्पश्यामः। अतः संनिहिततरेण प्राणेनैव भूम्नोऽन्वयात् प्राण एव भूमा, नान्य इति। अस्तु वाऽयं तुशब्दो व्यवच्छेदार्थः, तत्राह–*प्राणमेव तु नामादिभ्य इत्यादिना*।। *सत्यादिपरम्परयेति*।। आदिपदेन विज्ञानमनः श्रद्धा-निष्ठा-कृतीनां ग्रहणम्।।

पूर्वपक्षमाक्षिपति–*कथं पुनरिति*।। पूर्वपक्षी समाधत्ते–*उच्यत इत्यादिना*।। सुषुप्तौ प्राणग्रस्तता करणानामसिद्धा; परमात्मन्येव तत्काले लिङ्गस्य लयादिति चेत्, तत्राह–*तथाच श्रुतिरिति*।। वाक्यान्तरविरोधमाशङ्क्याह–*यच्चैतत् भूम्नः सुखत्वं श्रुतमिति*।। प्रकरणविरोधमाशङ्क्य तस्यापि प्राणपरत्वेनाविरोधमाह–*कथं पुनरित्यादिना*।।

एवं प्राप्त इदमाह–"भूमा संप्रसादादध्युपदेशादिति*।। भूमा, परमात्मा भवितुमर्हति। कुतः? संप्रसादादध्युपदेशात्="मञ्चाः क्रोशन्ती" तिवत् स्थानात् प्राणमत्र संप्रसादं ब्रूमः। तस्मादूर्ध्वं ततो भूयस्त्वेनोपदिश्यमानत्वादित्यर्थः। भूमा हि प्राणाद् भूयस्त्वेनोपदिश्यते। स यदि प्राणः स्यात्, न तदुपदेश उपपद्येत; स्वस्मात् स्वस्य भूयस्त्वासंभवात्, संभवे वा नामादेरप्यूर्ध्वं नामादेरेव भूयस्त्वोपदेशः स्यात्। न च तथोपदिश्यते। तस्मात् प्राणादन्य एव भूमेत्यध्यवस्यामः। कोऽसावुपदेशः? अयमेव–"एष तु वा अतिवदति यः सत्येनातिवदती" ति; ब्रह्म-भूयोऽतिपदानामेकार्थत्वेन श्रुत्योपन्यासात्।।

ननु–इह वागादाविव न स्तः प्रश्नप्रतिवचने–"अस्ति भगवः प्राणाद् भूय इति अदो वाव प्राणाद्भूयोऽस्तीति च। तथाच प्राणविषयमेवोक्तमतिवादित्वमुत्तरत्र तुशब्देनानुकृष्य तत्रैव विशेषान्तराभिधानम्–एष तु वा अतिवदति यः सत्येनातिवदतीत्युक्तम्, अतो नास्ति प्राणादध्युपदेश इति–चेत्, मैवम्; प्राणातिवादित्वानुकर्षणे "यः सत्येनानुवदती" ति विशेषवादानुपपत्तेः।।

ननु–उक्तम्–"एषोऽग्निहोत्री यस्सत्यं वदती" तिवत् तत्रैव विशेषाभिधानमुपपत्स्यते–इति, मैवम्;

श्रुत्यादिभ्यः प्रमाणेभ्यः संनिधानं हि दुर्बलम्।
अतः संनिधिमात्रेण न तेषामपबाधनम्॥

संनिधानप्राप्तं हि प्राणविज्ञानमनुकृष्य तत्र विशेषाभिधानपरमेतद् वाक्यमिष्यते भवता-"एष तु वा अतिवदति यः सत्येनातिवदती" ति। तत् तदा स्यात्, यदि संनिधानाद् बलवन्ति श्रुतिलिङ्गवाक्यप्रकरणानि न बाध्येरन्। बाध्यन्ते संनिधानपरिग्रहे तानि। तस्माद् न संनिधानपरिग्रहेण तेषामपबाधनं युक्तम्; वैपरीत्यस्यैव युक्तत्वात्। कानि तानि श्रुत्यादीनि प्रमाणानि?

उच्यते; (१) श्रुतिस्तावत् सत्यपदमेव। तेन हि रूढयाऽनृतविलक्षणं कालत्रयाबाध्यं परमार्थसद् वस्त्वभिधीयते। तादृशं च परं ब्रह्मैव, नान्यत्; "तत् सत्यम्" "सत्यं ज्ञानमनन्तं ब्रह्मे" त्यादिश्रुतौ तत्र तत्प्रयोगदर्शनाच्च। यच्च लोकेऽनृताभावमात्रवचने सत्यशब्दः प्रयुज्यते, तद् आपेक्षिकसत्येऽपि तादृशत्वोपचारादिति मन्तव्यम्। तथा तुशब्दोऽपि संनिहितव्यवच्छेदार्थो लोकवेदप्रसिद्धः। योऽपि कुत्रचित् प्रवृत्तापकर्षार्थः प्रयोगो दृष्टः, सोऽप्यव्ययानां नानार्थत्वादिति न्यायेनैव, न प्रसिद्धया। तदिदं श्रुतिप्रमाणम्-"संप्रसादादध्युपदेशात्" इत्यनेन सूत्रकृतोपन्यस्तम्॥

(२) लिङ्गं च-"धर्मोपपत्ते" रित्यनेन वक्ष्यमाणम्॥

(३) वाक्यं त्विदमेव; यः सत्यात्मकेन परमार्थसता परमात्मनाऽतिवदति, स एष एवातिवदतीति; य यच्छब्दसमभिव्याहृतपदगमयस्यैवोद्देश्यसमर्पकत्वात्, सर्वत्र वाक्ययोजनायां तथात्वदृष्टेः। न चैवं वाक्यान्वये सत्यपूर्वार्थत्वम्; संनिहितेन प्रतिपाद्यत्वादित्युक्तत्वात्। अपिच यद्यस्य वाक्यस्य प्राणविज्ञानादर्थान्तरविषयत्वं न स्यात्, हन्त तर्हि-"सत्यं त्वेव विजिज्ञासितव्यमि" त्यनेन ततः प्रयत्नान्तरकरणविधानमनर्थकं स्यात्। न चैतद् युक्तम्। तस्मात् तदन्यथानुपपत्तिरप्युदाहृतवाक्यस्यार्थान्तरविवक्षां सूचयति। तस्माद् यथैकवेदप्रशंसायां प्रस्तुतायां तत्संनिधाने-"एष तु महाब्राह्मणो यश्चतुरो वेदानधीत" इत्येकवेदेभ्योऽर्थान्तरभूतश्चतुर्वेदः प्रशस्यते, तद्वदत्रापि प्राणविज्ञानसंनिधाने ततोऽर्थान्तरभूतसत्यविज्ञानप्रशंसा न विरुद्धयत इति॥

प्रकरणात्तु प्राणविज्ञानं सम्बद्धयत इति भाष्यम्। तत्र प्रकरणपदं संनिधानपरं मन्तव्यम्; "तरति शोकमात्मविदि" त्यात्मन एव प्रकृतत्वात्। न चात्मपदं प्राणविषयमात्मोपाधित्वेन कथञ्चिद्व्याख्येयम्; श्रुतिविरोधापत्तेः, अग्रिमभाष्यविरोधापत्तेश्च। एवमुत्तरत्रापि नेयम्। यद्वा-प्रकरणमभ्युपेत्यापि दूषणं परपक्षेऽभिधत्त इति मन्तव्यम्। एतेन-यदुक्तम्-पूर्ववत् प्रश्नप्रतिवचनाभावाद् नार्थान्तरविवक्षा-इति, तदपि प्रत्युक्तमित्याह-*न च

प्रश्नप्रतिवचनरूपयैवेति*।। प्रकृते तयोरभावे कारणमाह–*तत्र प्राणान्तमिति*।। तुष्णीम्भूतमित्यत्र प्राण एव मुख्य आत्मेति मत्वेति शेषः। भवत्वेवं सत्यं परं ब्रह्म, भूम्नः किमायातं तावताऽपीति? तत्राह–*तथा व्युत्पादितायेति*।। सत्यात्मविज्ञानेनैवातिवादित्वम्, न प्राणविज्ञानेनेत्येवं व्युत्पादितायेत्यर्थः। ''विज्ञानादी'' त्यादिपदेन मननध्यान-श्रद्धा-निष्ठा-कृतीनां ग्रहणम्। पूर्वं गुडजिह्विकया प्राणप्रकरणमभ्युपेत्य श्रुतिवाक्यविरोधो दर्शितः, संप्रति प्रकरणमप्यात्मानमेव गमयतीत्याह–*एवं चात्मविविदिषयेति*।। ननु–शोकतरणफलमात्रमत्र श्रूयते, न मोक्षः, तच्च प्राणविज्ञानादपि संभवति; ब्रह्मलोकं गतस्याशोकत्वादिति–चेत्, न; शोकपदस्यात्र स्वकारणोपलक्षणार्थत्वात्, अन्यथोपक्रमोपसंहारयोर्वैरूप्यापत्तेः, न च तत्कारणतमोनिवृत्ति-र्मुख्यात्मज्ञानं विनेत्यसकृदावेदितत्वात्, इत्युपसंहारव्याजेन दर्शयति–*तस्मा इति*।। प्रकरण भेदमाशङ्कते–*प्रकरणान्त इति*।। प्राणप्रकरणसमाप्तावित्यर्थः। प्रकरणभेदोऽसिद्ध इति परिहरति–*नेति*।।८।।

अपि च लिङ्गविरोधोऽपि तव मते स्यादित्याह–*धर्मोपपत्तेश्च*।।९।। सुगममस्य भाष्यम्। पूर्वपक्षे प्राण एव तद्गुणविशिष्टतयाऽस्मिन् प्रकरण उपास्यः प्रतिपाद्यत इति। सिद्धान्ते तु परमात्मैवोक्तलक्षणोऽत्र विज्ञेयः ; नामादिप्राणपर्यन्तानामुपन्यासस्तु शाखाचन्द्रन्यायेन तदधिगमार्थमेवेति प्रयोजनमस्य वेदितव्यम्।।९।। इति द्वितीयं भूमाधिकरणम्।।

इति वार्त्तिकम् भूमाधिकरणम् समाप्तम्

प्रदीपः

भूमा संप्रसादादध्युपदेशात्।।८।। भूमा, परमात्मा, प्राणादतिभूयस्त्वेनोपदिश्यमानत्वात्, इति सूत्रार्थः।।

पूर्वाधिकरणे भूतयोनिप्रकरणस्य शब्दान्तरेणोपदेशोपक्रमेऽप्यनुवृत्तिरिवात्रापि "एष तु वा अतिवदति यः सत्येनातिवदती" ति शब्दान्तरेणोपदेशेऽपि प्राणाख्यस्यैवात्मनः प्रकरणं विवक्षणीयमित्याशङ्क्य तुशब्देनात्र प्रकरणनिच्छेदाद् नोक्तन्यायप्रवृत्तिरिति प्रत्युदाहरणसङ्गत्येदमधिकरणं प्रवर्तते। अत्र भूमत्वं यदि संख्यया, तर्हि प्राणः, यदि तु गुणतो निरतिशयत्वपर्यवसानेन तर्हि परमात्मा। तत्र नामादिभूयस्त्वप्रश्नप्रतिवचनशैल्या प्रक्रान्तस्य शोकनिववर्तकज्ञानविषयात्मोपदेशस्य प्राणे समापनात् "यः सत्येनातिवदती" त्यादेरपि तदविरोधेन विवरणस्यैव युक्तत्वात् "यत्र नान्यत् पश्यती" त्यादीनां ब्रह्मलिङ्गानामभिभवादस्य स्पष्टब्रह्मलिङ्गकत्वम्।।

अत्रानुसन्धेयानि विषयवाक्यानि छान्दोग्यसप्तमाध्यायप्रथमादिचतुर्विंशान्तखण्डगतानि नारदसनत्कुमारसंवादमुखेन प्रवृत्तानि–"सोऽहं भगवो मन्त्रविदेवास्मि नात्मवित् श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मवित् तं मा भगवान् शोकस्य पारं तारयत्विति तं होवाच यद्वै किञ्चिदध्यगीष्ठा नामैव तत्।...... स यो नाम ब्रह्मोपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्तेऽस्ति भगवो नाम्नो भूय इति नाम्नो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति"। ततो "वाग्वाव नाम्नो भूयसी" "मनो वाव वाचो भूयः" "संकल्पो वाव मनसो भूयान्" "चित्तं वाव संकल्पाद्भूयः" "ध्यानं वाव चित्ताद्भूयः" "विज्ञानं वाव ध्यानाद् भूयः" "बलं वाव विज्ञानाद् भूयः" "अन्नं बाव बलाद्भूयः" "आपो वावान्नाद् भूयस्यः" "तेजो वावाद्भ्यो भूयः" "आकाशो वाव तेजसो भूयान्" "स्मरो वावाकाशाद्भूयान्" "आशा वाव स्मराद् भूयसी"

इति प्रश्नप्रतिवचनशैल्या नामादिभ्यो भूय उपदिश्य "अस्ति भगव आशाया" इति नारदेन पृष्टे–"प्राणो वा आशाया भूयान् यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पितं प्राणः प्राणेन याति प्राणं ददाति ...प्राणो हि पिता प्राणो हि माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः। ...प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति तं चेद् ब्रूयादतिवाद्यसीत्यतिवाद्यसीत्यतिवाद्यस्मीति ब्रूयान्नापह्नवीत।। एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवो विजिज्ञास इति।। यदा वै विजानात्यथ सत्यं वदति नाजामन् सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवो विजिज्ञास इति। यदा वै मनुतेऽथ विजानाति नामत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवो विजिज्ञास इति। यदा वै निस्तिष्ठत्यथ श्रद्दधाति नानिस्तिष्ठन् श्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवो विजिज्ञास इति। यदा वै करोत्यथ निस्तिष्ठति माकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृतिं भगवो विजिज्ञास इति।। यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव विजिज्ञासितव्यं सुखं त्वेव विजिज्ञासितव्यमिति सुखमेव भगवो विजिज्ञास इति।। यो वा भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति।। यत्र नान्यत् पश्यति नान्यद्विजानाति स भूमाऽथ यत्रान्यत् पश्यति यत्रान्यद्विजामाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यं स भगवः कस्मिन् प्रतिष्ठित इति स्वे महिम्नि यदि वा न महिम्नीति।। गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्योऽन्यस्मिन् प्रतिष्ठित इति।। स एवाधस्तात् स एवोपरिष्टात् स पश्चात् स दक्षिणतः स उत्तरतः स एवेदं सर्वमिति।।

अत्र–"यदा वै मनुत" इत्यादिना मतिश्रद्धानिष्ठाकृतीनां सत्यविज्ञानोपायतया विवेचनानन्तरं सत्यज्ञानरूपेणोपक्षिप्तस्यैव सुखत्वेनानन्दत्वेन वापि विवेचनानन्तरं "यो वै भूमा तत्सुखमि" ति भूमभावनाप्युपसंहार इति पूर्वपक्षिणां मतम्, सिद्धान्तिनां तु शैल्यन्तरेण भूय एव वस्तु प्राणवाक्यानन्तरमपि स्वतन्त्रतयोपदिश्यते। सति चेवम् भूमापि न प्राणो भवितुमर्हति, किन्त्वर्थान्तरमेव। तच्च वाक्यशेषगतलिङ्गैर्ब्रह्मेति। तथाच स भूमा यदि प्राणः, तर्हि यत्र नान्यत् पश्यती" त्यादीनां ब्रह्मलिङ्गानामन्यथा नयनम्, यदि ब्रह्म, तर्हि तेषां विवक्षेति विवेकः। तत्र प्रकरणसमाप्तिः प्रश्न प्रतिवचनशैलीसमाप्त्या यदि मन्यते, तर्हि पूर्वपक्षकोटिः। यदि

प्रक्रान्तशैलीपरित्यागस्याकिञ्चित्करत्वम्, तुशब्दस्य विषयान्तरपरत्वं च मन्यते, तर्हि तु सिद्धान्तकोटिः, इति प्रश्नप्रतिवचनशैलीसमाप्तिः, तुशब्दस्य विषयान्तरपरत्वं च संशयबीजम्। तदिदमभिप्रेत्याह– *तत्र संशय इति*।।

संनिधानादिति।। भूमपदार्थस्य संदिग्धस्य व्यवस्थापनं संनिहितेन प्राणपदेनैव कर्तव्यम्, नाध्याहृतेन ब्रह्मपदेन। अत एव "मनोमयः प्राणमयो भारूप" इत्यत्रापि संनिहितस्य ब्रह्मण एव "समासः सर्वनामार्थः संनिकृष्टमपेक्षत" इति न्यायेन संनिहितस्य ब्रह्मण एव परमार्शः। तथाच सर्वत्रप्रसिद्धोपदेशाधिकरणसिद्धान्तोऽत्र पूर्वपक्षकोटेरुपस्थापक इति भावः। *प्रकरणोत्थानादिति*। परमोपक्रमगतात्मपदेन पूर्यते, उतोपसंहारोपस्थापितप्राणपदेनेत्युपक्रमोपसंहारयोरत्र कस्य प्राबल्यमिति संशयबीजमिति भावः। तत्रोपक्रमोपसंहारयोरुपसंहारस्योपक्रमापेक्षत्व उपक्रमप्राबल्यम्, तन्निरपेक्षत्वे तूपसंहारप्राबल्यमिति वस्तुस्थितौ–"एष तु वा अतिवदती" त्यस्य परमोपक्रमानपेक्षत्वम्, परमोपक्रमस्य प्राणवाक्येनैवोपसंहारेण पुनरुपर्यननुवर्तनमिति पूर्वपक्षिणो मन्यन्ते, सिद्धान्तिनस्तु तस्यैव पुनरप्यनुवृत्तिरिति। तथाच प्रक्रान्तस्य प्राणवाक्य एव समाप्तिर्वा, शंल्यन्तरेण पुनरपि तस्यैवानुवृत्तिर्वेत्यभिप्रायेण संशयप्रवृत्तिरिति भावः।।

पूर्वपक्षं संगृह्णाति–*प्राणो भूमेति*।। *भूयः प्रश्नप्रतिवचनपरम्परादर्शनादिति*।। प्राणपर्यन्तमेवेत्यादिः। तदेतदाह–यथा हीत्यादिना। "एष तु वे" त्यस्यापि प्राणविषयत्वमेव, न ततोऽन्यविषयत्वमित्याह–*एष तु वेति*।। यथा–एष वा अग्निहोत्री यः सत्यं वदतीत्युक्तेऽग्निहोत्रिण एव विशेषान्तरं सत्यवदनम्, एवमत्रापि प्राणातिवादिन एव सत्यवदनं विशेषान्तरमित्येवात्रार्थो वर्णनीय इति भावः "एष तु वा अतिवदती" त्यतिवदनं प्राणवाक्ये श्रुतमेव प्रत्यभिज्ञायते, नापूर्वमिति यावत्। तदेतत्सूचयति–*प्राणव्रतमतिवादित्वमनुकृष्येति*।। यावता चानुकर्षः, तावता तुशब्दोऽविवक्षितार्थ इति फलति, इति तुशब्देन प्राणपरित्यागसंभवोऽपि पर्यवस्यति। तदिदमाह–*अपरित्यज्यैव प्राणमिति*। *सत्यादिपरम्परयेति*।। विज्ञानश्रद्धादिवत् सत्यवचनमपि प्राणविज्ञानिनो व्रतविशेष एवेति भावः। "यत्र नान्यदि" त्यादिना प्राणे समन्वयप्रकारं दर्शयति–*अन्यत इति*।। अनेनास्पष्टब्रह्मलिङ्गत्वं पूर्वपक्षिषो मन्यन्त इति सूच्यते। सिद्धान्तं संगृह्णति–*परमात्मैवेति*।। संप्रसादशब्दस्य प्राणपरत्वमाह–*संप्रसाद इत्यादिना–*संप्रसादोऽभिप्रेयत इत्यन्तेन*।। प्राणादपि भूयस उपदेशादित्यर्थः। अमुमेवार्थमाशङ्का-निरासाभ्यामुपपादयति–*नन्वित्यादिना–परित्यक्ता स्यादित्यन्तेन*।। तथाच पूर्वपक्षे सत्यशब्दश्रुतिबाध इति भावः। तुशब्दश्रुतिविरोधमपि तत्राह–*प्रकृतव्यावृत्त्यर्थ इति*।।

शैल्यन्तरपरिग्रहः पुच्छब्रह्मवाद इव न दोषायेत्याह– *न चेत्यादिना*।। *विज्ञानादिसाधनपरम्परयेति*।। आदिना मति–श्रद्धा निष्ठा कृतीनां परिग्रहः। प्रकरणस्योत्थानम्=प्राणादप्युपर्यनुवृत्तिः। शोकनिवृत्तिः प्राणविज्ञानेनापि सत्यं भवति; तथाप्यत्र शोकपदेन–''तस्मै मृदितकषायाय तमसः पारमि'' त्युपसंहारे शोकपदस्थानेऽविद्यापरतमः पदप्रयोगाद् नाविद्यानिवृत्तिरूपा शोकनिवृत्तिस्तेन भवतीति न प्राण एवात्मेति निरूपयति– *न चान्यत्रेत्यादिना*–अविद्योच्यत इत्यन्तेन*।।८।।

ब्रह्मलिङ्गानां येषामनुसारेणात्र सिद्धान्तः, तानि संगृह्णाति–तथाच *सत्यत्वमिति*।।९।। इति द्वितीयं भूमाधिकरणम्।।

इति प्रदीप भूमाधिकरणम् समाप्तम्

भामती

नारदः खलु देवर्षिः कर्मविदनात्मवित्तया शोच्यमात्मानं मन्यमानो भगवन्तमात्मज्ञमाजानसिद्धं महायोगिनं सनत्कुमारमुपससाद। उपसद्य चोवाच– भगवन्ननात्मज्ञताजनितशोकसागरपारमुत्तारयतु मां भगवानिति। तत्तदुपश्रुत्य सनत्कुमारेण नामब्रह्मेत्युपास्वेत्युक्ते नारदेन पृष्टं किं नाम्नोऽस्ति भूय इति। तत्र सनत्कुमारस्य प्रतिवचनं वाग्वाव नाम्नो भूयसी। तदेवं नारदसनत्कुमारयोर्भूयसि प्रश्नोत्तरे वागिन्द्रियमुपक्रम्य मनःसङ्कल्पचित्तध्यानविज्ञानबलान्नतोयवायुसहिततेजोनभःस्मराशाप्राणेषु पर्य्यवसिते। कर्त्तव्याकर्त्तव्यविवेकः सङ्कल्पः, तस्य कारणं पूर्वापरविषयनिमित्तप्रयोजननिरूपणं चित्तम्। स्मरः, स्मरणम्ः प्राणस्य च समस्तक्रियाकारकफलभेदेन पित्राद्यात्मत्वेन च रथारनाभिदृष्टान्तेन सर्वप्रतिष्ठत्वेन च प्राणभूयस्त्वदर्शिनोऽतिवादित्वेन च नामादिप्रपञ्चादाशान्ताद् भूयस्त्वमुक्त्वाऽपृष्ट एव नारदेन सनत्कुमार एकग्रन्थेन 'एष तु वातिवदति यः सत्येनातिवदतीति सत्यादीन् कृतिपर्य्यन्तानुक्त्वोपदिदेश, 'सुखं त्वेव बिजिज्ञासितव्यम्' इति। तदुपश्रुत्य नारदेन सुखं भगवो विजिज्ञासेत्युक्ते सनत्कुमारो यो वै भूमा तत् सुखमित्युपक्रम्य भूमानं व्युत्पादयाम्बभूव, यत्र नान्यत्पश्यतीत्यादिना। तदीट्टशे विषये विचार आरभ्यते। तत्र संशयः–किं प्राणो भूमा स्यादाहो परमात्मेति। भावभवित्रोस्तादात्म्यविवक्षया सामानाधिकरण्यं संशयस्य वीजमुक्तं भाष्यकृता। तत्र

> ***एतस्मिन् ग्रन्थसन्दर्भे यदुक्ताद् भूयसोऽन्यतः।***
> ***उच्यमानं तु तद् भूय उच्यते प्रश्नपूर्वकम्॥***

न च प्राणात् किं भूय इति पृष्टं, नापि भूमा वाऽस्माद् भूयानिति प्रत्युक्तम्। तस्मात्प्राणभूयस्त्वाभिधानानन्तरमपृष्टेन भूमोच्यमानः प्राणस्यैव भवितुमर्हति। अपि च भूमेति भावो न भवितारमन्तरेण शक्यो निरूपयितुमिति भवितारमपेक्षमाणः प्राणस्यानन्तर्य्येण बुद्धिसन्निधानात्तमेव भवितारं प्राप्य निर्वृणोति। यस्योभयं हविरार्त्तिमार्छेदित्यत्रार्त्तिरिवार्त्त हविः। यथाहुः–'मुष्यायहे हविषा विशेषणम्' इति। न चात्मनः प्रकरणादात्मैव बुद्धिस्त्थ इति तस्यैव भूमा स्यादिति युक्तम्,

सनत्कुमारस्य नामब्रह्मेत्युपास्वेति प्रतीकोपदेशरूपेणोत्तरेण नारदप्रश्नस्यापि तद्विषयत्वेन परमात्मोपदेशप्रकरणस्यानुत्थानात्। अतद्विषयत्वे चोत्तरस्य प्रश्नोत्तरयोर्वैयधिकरण्येन विप्रतिपत्तेरप्रामाण्यप्रसङ्गात्। तस्मादसति प्रकरणे प्राणस्यानन्तर्य्यात्तस्यैव भूमेति युक्तम्। तदेतत् संशयवीजं दर्शयता भाष्यकारेण सूचितं पूर्वपक्षसाधनमिति न पुनरुक्तम्। न च भूयोभूयः प्रश्नात्परमात्मैव नारदेन जिज्ञासित इति युक्तम्, प्राणोपदेशानन्तरं तस्योपरमात्तदेवं प्राण एव भूमेति स्थिते यद्यत्तद्विरोध्यापाततः प्रतिभाति तत्तदनुगुणतया नेयं, नीतं च भाष्यकृता। स्यादेतत्—एष तु वातिवदतीति तुशब्देन प्राणदर्शिनोऽतिवादिनो व्यवच्छिद्य सत्येनातिवादिनं वदन् कथं प्राणस्य भूमानमभिदधीतेत्यत आह *प्राणमेव तु इति*। *प्राणदर्शिनश्चातिवादित्वम् इति*। नामाद्याशान्तमतीत्य वदनशीलत्वमित्यर्थः। एतदुक्तं भवति—नायंतुशब्दः प्राणातिवादित्वाद् व्यवच्छिनत्ति, अपि तु तदतिवादित्वमपरित्यज्य प्रत्युत तदनुकृष्य तस्यैव प्राणस्य सत्यस्य श्रवणमननश्रद्धानिष्ठाकृतिभिर्विज्ञानाय निश्चयाय सत्येनातिवदतीति प्राणव्रतमेवातिवादित्वमुच्यते। तुशब्दो नामाद्यतिवादित्वाद्व्यवच्छिनत्ति। न नामाद्याशान्तवाद्यतिवादो, अपि तु सत्यप्राण-वाद्यतिवादीत्यर्थः। अत्र चागमाचार्य्योपदेशाभ्यां सत्यस्य श्रवणम्, अथागमाविरोधिन्यायनिवेशनं मननं, मत्वा च गुरुशिष्यसब्रह्मचारिभिरनसूयुभिः सह संवाद्य तत्त्वं श्रद्धत्ते। श्रद्धानन्तरं च विषयान्तरदर्शी विरक्तस्ततो व्यावृत्तः तत्त्वज्ञानाभ्यासं करोति, सेयमस्य कृतिः प्रयत्नः। अथ तत्त्वज्ञानाभ्यासनिष्ठा भवति, यदनन्तरमेव तत्वविज्ञानमनुभवः प्रादुर्भवति। तदेतद्बाह्या अप्याहुः—'भूतार्थभावनाप्रकर्षपर्य्यन्तजं योगिज्ञानम्' इति। भावनाप्रकर्षपर्य्यन्तो निष्ठा तस्माज्जायते तत्त्वानुभव इति। तस्य तस्मात्प्राण एव भूमेति प्राप्तेऽभिधीयते—एष तु वाऽतिवदति यः सत्येनातिवदतीत्युक्त्वा भूमोच्यते, तत्र सत्यशब्दः परमार्थे निरूढवृत्तिः श्रुत्या परमार्थमाह। परमार्थश्च परमात्मैव। अतोह्यन्यत्सर्व विकारजातमनृतं कयाचिदपेक्षया कथञ्चित्सत्यमुच्यते। तथा चैष तु वाऽतिवदति वः सत्येनातिवदतीति ब्रह्मणोऽतिवादित्वं श्रुत्याऽन्यनिरपेक्षया लिङ्गादिभ्यो बलीयस्याऽवगमितं कथमिव सन्निधानमात्रात् श्रुत्याद्यपेक्षादतिदुर्बलात्कथञ्चित्प्राणविषयस्वेन शक्यं व्याख्यातुम्? एवं च प्राणादूर्ध्वं ब्रह्मणि भूमावगम्यमानो न प्राणविषयो भवितुमर्हति, किन्तु सत्यस्य परमात्मन एव। एवं चानात्मविदं आत्मानं विविदिषोर्नारदस्य प्रश्ने परमात्मानमेवास्मै व्याख्यास्यामीत्यभिसन्धिमान् सनत्कुमारः सोपानारोहणन्यायेन स्थूलादारभ्य तत्तद्भूमव्युत्पादनक्रमेण भूमानमतिदुर्ज्ञानतया परमसूक्ष्मं व्युत्पादयामास। न च प्रश्नपूर्वताप्रवाहपतितेनोत्तरेण सर्वेण प्रश्नपूर्वेणैव भवितव्यमिति नियमोऽस्तीस्यादिसुगमेन भाष्येण व्युत्पादितम्। विज्ञानादिसाधनपरम्परा मननश्रद्धादिः, प्राणान्ते चानुशासने तावन्मात्रेणैव प्रकरणसमाप्तेनं प्राणस्यान्यायत्ततोच्येत। तदभिधाने

हि **सापेक्षत्वेन** न प्रकरणं समाप्येत। तस्मान्नेदं प्राणस्य प्रकरणमपि तु यदायत्तः प्राणस्तस्य, स चात्मेत्यात्मन एव प्रकरणम्।

शङ्कते *प्ररूरणान्ते इति*। प्राणस्य प्रकरणसमाप्तावित्यर्थः। निराकरोति *न, स भगवः इति*। सन्दंशन्यायेन हि भूम्न एतत्प्रकरण, स चेद भूमा प्राणः प्राणस्येतत्प्रकरणं भवेत्। तच्चायुक्तमित्युक्तम्॥८॥

न केवलं श्रुतेर्भूमात्मता परमात्मनः, लिङ्गादपीत्याह सूत्रकारः *धर्मोपपत्तेश्च*।

यदपि पूर्वपक्षिणा कथञ्चिन्नीतं तदनुभाष्य भाष्यकारो दूषयति *योऽप्यसौ सुषुप्तावस्थायाम् इति*। सुषुप्तावस्थायामिन्द्रियाद्यसङ्गयात्मैव। न प्राणः, *परमात्मप्रकरणात्*। "अन्यदार्त्तं" विनश्वरमित्यर्थः। अतिरोहितार्थमन्यत्॥९॥

इति भामति भूमाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

'स भगवः कस्मिन् प्रतिष्ठितः? स्वे महिम्नि' इति, 'आत्मैवेदं सर्वं' 'आत्मतः प्राण आत्मत आशा' इत्यादिना स्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वकारणत्वादयो धर्मा उपदिश्यन्ते। तेषां परमेश्वर एवोपपत्तिः, न प्राणशब्दोदिते जीवे। ततः परमेश्वर एव भूमा नापर इति सिद्धम्। ननु पूर्वत्राधिकरणे 'निरञ्जनः परमं साम्यमुपैति' इति मुक्तानां ब्रह्मसादृश्यमभिहितम्। ततो ब्रह्मणः सायुज्यमुपगता मुक्तात्मानः तत्पृथग्भूता वर्तन्ते इति सिद्धम्। 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इति भूमशब्दवाच्ये ब्रह्मणि दृष्टे तन्निष्ठभेदप्रतियोगिप्रपञ्चदर्शनादिनिषेधः क्रियते। कथमिह साङ्गत्यमिति चेत्– भूम्नि प्रत्यक्षे 'नान्यत् पश्यति' इत्यादेरयमभिप्रायः–निरतिशयसुखस्वभावे यस्मिन् साक्षात्कृते सुखान्तराभिलाषेण रूपादिविषयदर्शनादौ न प्रवर्तते यन्मग्नः पुरुषः स भूमा ब्रह्मेति। ब्रह्मानन्दलवपरमाणवो हि विषयसुखविशेषाः। तथा हि श्रुतिः–'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति। तस्मादिह ब्रह्मणि न द्वैतनिषेधप्रसक्तिः। प्रपञ्चे सत्येव कथं मुक्तात्मनामपुरुषार्थस्य तस्य दर्शनं परिह्रियत इति न विचार्यम्। न हि मुक्तात्मनां प्राकृतप्रपञ्चो दर्शनविषयः, किंतु निरतिशयानन्दस्वरूपं ब्रह्मैव प्रपञ्चाकारेण दर्शनगोचरो भवति। तथा हि श्रुतिः–'एतत्ततो भवति, आकाशशरीरं ब्रह्म, सत्यात्म प्राणारामं मनआनन्दम्' इति। तत्र 'आप्नोति स्वाराज्यम्, आप्नोति मनसस्पतिम्' इत्यादिना मुक्तात्मा प्रस्तुतः। तस्य 'वाक्पतिः' इत्यादिना स्वाधीनाप्राकृतविशुद्धवागिन्द्रियादिसंबन्ध उक्तः। तस्य पुनस्तादृशावस्थाप्राप्त्यनन्तरमेतत् दृश्यमानं प्राकृतप्रपञ्चजालमाकाशशरीरं चिदम्बरप्रकाशशरीरं ब्रह्मैव भवतीति तात्पर्यरहस्यार्थः। ततो मुक्तानां ब्रह्मणा सादृश्यं तत्समरसीभूतप्रपञ्चदर्शित्वमिति सर्वं समीचीनम्॥

इति भूमाधिकरणम्॥२॥

अथाक्षराधिकरणम्॥

॥सू॥ अक्षरमम्बरान्तधृतेः॥९॥

बृहदारण्यके श्रूयतेऽस्य विषयः 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति, अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायम्' इत्यादि।

अत्र अक्षरशब्दवाच्यस्त्रेधा संदिह्यते प्रणवो जीवः परमेश्वरो वा इति।

प्रणवजीवयोरन्यतर एवाक्षरशब्दवाच्यः। कुतः? अक्षरशब्दस्य वर्णपर्यायत्वात् प्रणववाचकत्वमुचितम्। 'पुरुषोऽक्षरमुच्यते' इति पुरुषस्यापि तदभिधेयत्वमुक्तम्। अतस्तावेवाक्षर-शब्दवाच्यौ। इति प्राप्ते ब्रूमः–अत्राक्षरशब्दवाच्यं परं ब्रह्मैव कुतः? अम्बरान्तधृतेः 'यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्याः यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं च' इति सर्वविकाराधारतया निर्दिष्ट आकाशः 'कस्मिन्नोतश्च प्रोतश्च' इति गार्ग्या पृष्टे एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' इत्यादिना 'एतस्मिन् खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इत्यन्तेन याज्ञवल्क्यवचनेन निर्दिष्टस्याक्षरस्याम्बरान्तप्रपञ्चधृतिरवगम्यते। कथमेतदन्यत्र परमेश्वरात् संभवति? ततः परमेश्वर एवाक्षरपदाभिधेयः॥

इति श्रीकण्ठभाष्य भूमाधिकरण समाप्तम्

शिवार्कमणिदीपिका

छन्दोगोपनिषदि श्रुतं भूमलक्षणं विषयत्वेनोदाहरन् मुक्तोपसृप्यत्वनिर्वहणोपयोगितया करिष्यमाणतदर्थविवरणोपयागितया च निरतिशयानन्दस्य तल्लक्षणमिति भूमशब्दो धर्मिपर इति च ज्ञापयितुमाह-**भूमैव सुखमित्युक्त्वेति।** भूमशब्दो हि बहुत्ववाची बहुशब्दादिमनिचि 'बहोर्लोप' इति (पा०-६-४-१५८) सूत्रेण प्रकृतिप्रत्ययविकारे च सति तन्निष्पत्तेः 'प्रशंसा भूमलिङ्गसमवायात्' 'अध्यात्मसम्बन्धभूमा ह्यस्मिन्' (ब्र० १-३-७-सू०) 'सम्भूयेव सुखानि चेतसि परं भूमानमातन्वते' इत्यादिप्रयोगाच्च। बहुत्वं चात्र वैपुल्यं न सङ्ख्याविशेषः। बहुशब्दस्य 'बहुषु बहुवचन' (पा०१-४-२१सू०) मित्यादौ सङ्ख्यायामिव 'अल्पं वा बहुवा यस्य श्रुतस्योपकरोति य' इत्यादौ वैपुल्येऽपि प्रयोगदर्शनादिह चा 'थ यदल्पं तन्मर्त्य' मिति बहुत्वसङ्ख्यायुक्तस्याप्यल्पस्य भूमप्रतियोगित्वेनोपादानात् पूर्वत्र नामादिभ्योऽधिकसङ्ख्याहीनेषु वागादिषु 'वाग्वाव नाम्नो भूयसी' 'आकाशो वाव तेजसो भूया' नित्यादौ बहुशब्दनिष्पन्नभूयश्शब्दप्रयोगदर्शनाच्च। वैपुल्यं चात्र गुणोत्कर्षरूपं न परिमाणविशेषरूपम्। पूर्वत्र वाङ्मनस्सङ्कल्पचित्तध्यानविज्ञानबलादिषूत्तरोत्तर-गुणोत्कर्षाभिप्रायेणैव भूयश्शब्दप्रयोगदर्शनात् सुखशब्दसामानाधिकरण्याच्च। उत्कर्षापकर्षरूपं हि सुखतारतम्यं प्रसिद्धं न परिमाणविशेषरूपम्। वैपुल्याश्रयधर्मिपर्यन्तश्चायं भूमशब्दः न वैपुल्यमात्रपरः। 'अथ यदल्पं तन्मर्त्य' मिति तत्प्रतियोगिनोऽल्पशब्देन निर्देशात् उत्तरोत्तरोत्कृष्टधर्मिपरभूयःशब्दप्रायपाठात् 'भूमैव सुखं यो वै भूमा तत्सुखं यो वै भूमा तदमृत' मिति धर्मिपरशब्दसामानाधिकरण्याच्च। यद्यपि भूमशब्दो भावप्रत्ययान्तत्वात् दर्शितप्रयोगाच्च धर्मवाचकस्तथापि 'स एषोऽणिमैतदात्म्यमिदं सर्वं' 'धातुः प्रसादान्महिमानमीश' मित्यादिषु अणिममहिमादिशब्दवद्धर्मवाचकेन तेन धर्मी लक्षयितुं युक्तः। एवं च सुखशब्दसामानाधिकरण्यान्निरतिशयानन्दो भूमशब्दार्थः फलितो भवति। एवं स्थिते स जीवः परो वेति संशयं दर्शयति-**तत्रेति।** जीवप्रकरणानुवृत्त्यननुवृत्तिभ्यां संशयोऽभिमतः। तत्रेयं शङ्का समुन्मिषति। प्राग्जीवस्यात्र प्रकरणमेव नास्ति कस्तदनुवृत्त्यननुवृत्तिविचारावकाशः। 'प्राणो वा आशाया भूया' नित्यारभ्य हि जीवप्रकरणमिहाभिमतम्। तत्परस्यैव प्रकरणम्। तदनन्तरमेव 'यथा वा

अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पित' मित्यरनाभिदृष्टान्तोपन्यासपूर्वकं सर्वाधारत्ववर्णनेन 'प्राण: प्राणेन याति, प्राण: प्राणं ददाति प्राणाय ददाती'ति गन्तृगतिसाधनदातृदेयसम्प्रदानादिसर्वात्मकत्ववर्णनेन 'प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राण: स्वसा प्राण आचार्य: प्राणो ब्राह्मण' इति पितृमात्रादिसर्वरूपत्ववर्णनेन च तत्र प्राणशब्देन पर एव प्रतिपाद्य इत्यवगमादिति। तन्निराकरणाय जीवो वेति पूर्वपक्षकोटावुपन्यसनीयायां तदन्यो वेत्युपन्यस्तम्। परमेश्वरादन्य एव तत्र प्राणशब्देनोक्त:। 'स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहु: पितृहा वै त्वमसि' इत्यादिना सप्राणेषु पित्रादिषु अधिक्षेप्यमाणेषु हिंसोपक्रोशवर्णनात्। 'अथ यद्यप्येनानुत्क्रान्तप्राणान् शूलेन समासं व्यतिषं दहेन्नैवैनं ब्रूयु: पितृहासीति न मातृहासीति' इत्यादिना तेषूत्क्रान्तप्राणेषु शूलेन सम्यक्प्रक्षेपपूर्वकं व्यत्यस्य समन्ताद्दह्यमानेष्वपि हिंसाव्यवहाराभाववर्णनाच्च। न हि परस्य हिंस्यत्वमस्ति। न व तस्योत्क्रान्तिरस्ति। यद्यप्युक्तरीत्या परमेश्वरादन्योऽप्ययं पञ्चवृत्ति: प्राण इति प्रतिभाति प्राणशब्दस्वारस्यात्। उत्क्रान्तिप्रतिपादनस्य प्राणस्थितितदस्थितिनिबन्धनहिंसोपक्रोशतद-भावात्मकव्यवहारानुवादस्य च तद्विषयत्वेनाप्युपपत्ते:। तथापि 'प्राणो ह पिते' त्यादिकं जीव एवोपपद्यते। पितृमातृभ्रातृस्वस्राचार्यब्राह्मणशब्दानां शरीरविशेषविशिष्टात्मवाचित्वात्। अत: 'प्राणो ह पिते' त्याद्युक्तिमन्वयव्यतिरेकाभ्यामुपपादयितुं प्रवृत्तं प्राणस्थितितदस्थित्योर्हिंसोप-क्रोशतदभाववर्णनमपि तद्विषयएव वक्तुं युक्तम्। पितृमात्रादिबहुशब्दानुरोधादेकस्य प्राणशब्दस्य प्राणसहचरिते जीवे लक्षणेत्यपि कल्पयितुं युक्तम्। एवं च जीव एव प्राण इति निश्चिते सर्वाधारत्ववर्णनं भोगोपकरणभोगस्थानरूपस्य सर्वस्य जीवादृष्टायत्तस्थितिकत्वाभिप्रायं 'प्राण: प्राणेन याती' त्यादिकं गन्तृदातृसम्प्रदानवद्गमनसाधनं देयं चाश्वादिकं जीवरूपमित्यभिप्रायं चोपपादनीयम्। न चोपक्रमगतसर्वाधारत्वाद्यनुरोधेनोक्रान्त्यादिकमेव परमेश्वरविषयमुपपाद्यतामिति वाच्यम्। तथा सत्युक्रान्त्याद्युक्त्यनन्तरं 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती'ति तद्दर्शिनोऽतिवादित्ववर्णनस्यासामञ्जस्यप्रसङ्गात्। स्वोपास्यस्य वस्तुनोऽतिशयितगुणकत्ववादित्वं ह्यतिवादित्वम्। न चोक्रान्त्यादिदोषरहितस्य कथञ्चित्तद्वत्तोत्प्रेक्षणं गुणातिशयप्रतिपादनं भवति। भवति तु स्वत उक्रान्तिमतो जीवस्य तत्स्थित्युक्रान्त्यो: पित्रादिहन्तृत्वतदहन्तृत्वप्रसिद्ध्यनुवादेन तस्यैव पित्रादिरूपतया पूजार्हत्वं न तु शरीरमात्रस्येत्युपपादनं तद्गुणातिशयप्रतिपादनम्। औपचारिकत्वेनापि सर्वाधारत्वप्रतिपादनमपि तथैव। न चोक्रान्त्यादिवत्तद्दर्शिनोऽतिवादित्वमप्यौपसंहारिकं गौणं नीयतामिति वाच्यम्। 'तं चेद्ब्रूयुरतिवाद्यसीति अतिवाद्यस्मीति ब्रूयान्नापह्नुवीते' ति तस्य मुख्यत्वव्यवस्थापनात्। 'एष तु वा अतिवदती'त्यादिना तस्याभ्यस्यमानत्वाच्चेत्याशय:। एवं च परमेश्वरस्तदन्यो वेत्यस्यायमर्थ:। य उक्रान्त्यादिभि: परमेश्वरादन्यत्वेनावगत: 'प्राणो वा आशाया

भूया' नित्यारभ्य प्रकृतो जीवस्तस्य प्रकरणमनुवर्तत इति स एव 'यो वै भूमा तत्सुख' मित्यादौ निरतिशयानन्दतया प्रतिपाद्य उत तस्य प्रकरण' मेष तु वे 'त्यादौ विच्छिन्नमिति तस्मादधिकः परमेश्वरः तथा प्रतिपाद्य इति। उक्तप्रकारेण सतो जीवप्रकरणस्यानुवृत्तिं विशेषणेन सूचयन्पूर्वपक्षयति-**परमेश्वरादन्यः प्राण एव भूमेति।** स्यादेतत्। यथा नामादिषु प्रकृतेष्वपि ततस्ततोऽधिकतया वागादिप्रतिपादनमेवं प्राणे प्रकृतेऽपि ततोऽधिकतया 'यो वै भूमा तत्सुख' मित्यादौ परमेश्वरप्रतिपादनं भविष्यतीत्याशङ्क्याह-**पूर्वेष्विति।** युक्तं नामादिषु प्रकृतेष्वपि वागादिषु तत्तत्प्रकरणविच्छेद इति। तत्रतत्रा' स्ति भगवो नाम्नो भूयः वाग्वाव नाम्नो भूयसी 'त्यादिरूपाया प्रश्नोत्तरपरम्पराया दर्शनात्। न चेह 'अस्ति भगवान् प्राणद्भूयः अदो वाव प्राणाद्भूय' इति प्रश्नोत्तरे दृश्येते। तथा च सति नारदसनत्कुमारसंवादेऽस्मिन् तत्तदवान्तरप्रकरणविच्छेदकतया दृष्टयोः प्रश्नोत्तरयोरिहादर्शनात् प्राणप्रकरणानुवृत्तिरवसीयत इति भावः। स्यादेतत्। भूमविद्योपक्रमे तावत् 'अधीहि भगव' इति सनत्कुमारमुपसन्नो नारदः सनत्कुमारेण 'यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामी 'त्युक्तस्स' न्नृग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेद 'मित्यादिना स्ववेदनं सर्वमुपन्यस्य 'सोऽहं मन्त्रविदेवास्म्यनात्मवि 'दिति चोक्त्वा 'श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोऽहं भगवः शोचामि तं मा भगवान् शोकस्य पार तारय 'त्विति शोकतारिणीमात्मविद्यां प्रार्थयामासेत्युपाख्यायते। परमात्मविद्ययैव शोकतरणं श्रुतिषुप्रसिद्धम्। तदुपसंहारे चा 'त्मैवेदं सर्वं' 'मित्युक्त्वा' 'स वा एवं पश्य' न्नित्यादिना' स स्वराड्भवति तस्य सर्वेषु लोकेषु कामचारो भवती 'ति तद्दर्शनेन मोक्षरूपं फलमुक्तम्। तदनन्तरं चा' त्मतः प्राण आत्मत आकाश' इत्यादिना प्राणादीनां प्रकृतादात्मन उत्पत्तिरभिहिता। तत्र प्राणशब्दः 'प्राणो वा आशाया भूया 'नित्यारभ्य वर्णितं जीवमेवाचष्टे। प्रागुत्तरोत्तरभूयस्त्वेन प्रदर्शितानां नामादिप्राणान्तानामेवात्र व्युक्रमेण सङ्कीर्तनात्। तदनन्तरं च 'तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार' इति तमःपारस्य परमेश्वरस्यैवोपदिष्टत्वं तर्णितम्। तदेवमुपक्रमोपसंहारानुरोधात् भूमा परमेश्वर एव स्यादित्याशङ्क्याह-**न परमेश्वरस्तत्र प्रसक्त इति।** यद्यप्यत्र परमेश्वरो महाप्रकरणी। तथापि स तत्र 'प्राणो वा आशाया भूया 'नित्यारभ्य प्रवृत्ते जीवावान्तरप्रकरणे नामवागाद्यवान्तरप्रकरण इव न प्रसक्तः। न च जीवप्रकरणं 'नापह्नुवीते' त्यत्र समाप्त' मेष तु वा अतिवदति यस्सत्येनातिवदती' त्यारभ्य परमात्मन एवोपक्रान्तस्य महाप्रकरणमिति शङ्कनीयम्। अतिवाद्यस्मीति ब्रूया 'दिति प्राणविद्व्रतत्वेनोक्तस्यातिवादित्वस्यानुकर्षणेन तत्रापि प्राणप्रकरणानुवृत्त्यवसायात्। 'एष तुवा अग्निहोत्री यस्सत्यं वदती 'त्युक्तौ प्रसिद्धाग्निहोत्रिण इव प्रकृतप्राणातिवादिनस्सत्यवदनमङ्गं 'मेष तु वे' त्यादौ विधीयत इति तत्र तत्प्रकरणानुवृत्तिसमर्थनोपपत्तेश्च। तथा सति 'सत्येने 'ति तृतीया न स्यादिति चेत्। न। द्वितीयार्थे तृतीयाप्रयोग इति वा सत्यवचनेन सह योऽति वदतीति विवक्षया

सहयुक्तेऽप्रधाने तृतीयाप्रयोग इति वा तदुपपत्तेः। 'यदा वै विजानात्यथ सत्यं वदती'ति पुनर्निर्देशे द्वितीयाप्रयोगदर्शनात्। जीवो भूमेति पक्षे 'स एवाधस्तात्स उपरिष्टा'दित्यादिनोच्यमानं व्यापित्वं न सङ्गच्छत इति चेन्न। निवृत्तावरणानां मुक्तयवस्थामधिकृत्य हि 'यत्र नान्यत्पश्यती' त्यादिना यस्मिन्निरतिशयानन्देऽनुभूयमाने किमप्यन्यन्नानुभूयत इत्युच्यत इत्युपपादनीयम्। संसारदशायां जीवस्य तदनुभवाभावात्। ततश्च मुक्त्यवस्थायां धर्मज्ञानविकासेन व्यापित्वमस्ति जीवस्य तदेव तस्य व्यापित्व'महमेवाधस्ता'दित्यादिना स्पष्टीक्रियते। अन्यथा प्राक् 'स एवाधस्ता'दित्यादौ तत्पदेन परोक्षतया निर्दिष्टो भूमा जीवो न भवतीति शङ्क्येतेति। प्रत्युत भूमा परमात्मेति पक्ष एवा'हमेवाधस्ता'दित्याद्यन्वयित्वेन' आत्मैवाधस्ता'दित्यादि पुनरुक्तत्वेन च तत्र न सङ्गच्छते। 'अहमेवेदं सर्वमित्येतत्पर्यन्तं जीवस्यावान्तरप्रकरणम् 'अथात आत्मादेश' इत्यारभ्य शोकतरणायोपदेष्टव्यस्य परमात्मनो निरूपणमिति स्वीकारे तु सर्वं सङ्गच्छते। मुक्तिहेतुदर्शनविषयत्वसर्वकारणत्वादेः परमात्मलिङ्गस्यात्मादेशाधिकारानन्तरमेव श्रवणात् भूमाधिकारे तदश्रवणात्। ननु तत्र 'स भगवः कस्मिन्प्रतिष्ठित' इति प्रश्ने 'स्वे महिम्नी'त्युत्तरं श्रूयत इति चेत्। सत्यं श्रूयते। न तु तत्परमात्मलिङ्गम्। किं तु जीवलिङ्गमेव। तदनन्तरं 'यदि वा न महिम्नी'ति भूम्नो वर्णितं स्वमहिमप्रतिष्ठितत्वं प्रतिषिध्य तत्र हेतुत्वेन 'गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानी'ति प्रकृतभूमविषये गवाश्वादीनामेव महिमत्वोक्तेः। भूम्नो जीवत्वे हि राजादिविभूतित्वेन प्रसिद्धानां तेषां तन्महिमत्वोक्तिस्सङ्गच्छते। तस्य परमात्मत्वे 'त्वस्य महिमानमिति वीतशोक' इत्यादौ तन्महिमत्वेन प्रसिद्धानि सत्यसंकल्पत्वादीनि तथोच्येरन् तस्माद्भूमावान्तरप्रकरणे परमेश्वरस्य कथञ्चिदपि न प्रसक्तिरिति भावः। एवं च भूमा जीव एवेति तस्मिन्निरतिशयानन्दरूपे अनुभूयमाने अन्याननुभवस्य श्रुत्योक्ततया परमेश्वरस्याप्यानन्दवल्ल्युक्त- प्रकारेण निरतिशयानन्दरूपत्वेऽपि तस्य मुक्तानुभाव्यत्वायोगान्न तस्य मुक्तगम्यतेति पूर्वाधिकरणाक्षेपेण प्रवृत्तं पूर्वपक्षमुपसंहरन् सिद्धान्तं प्रतिजानीते-**अत इति**। सौत्रं सम्प्रसादशब्दं व्याकुर्वन् प्राणो भूमेति पूर्वपक्षो जीवविषयो न प्राणवायुविषय इति पूर्वपक्षाभिप्रायं व्यक्तीकरोति-**सम्प्रसादइति।** संप्रसीदत्यस्यामवस्थायां जीव इति सम्प्रसादस्सुषुप्तिः तद्वत्त्वाद्वा मुक्तौ विशुद्धिभाक्त्वाद्वा सम्प्रसादो जीवः 'य एष सम्प्रसाद' इति श्रुतिप्रयोगावगतः। 'ऊर्ध्व'मित्यनेन सौत्रोऽधिशब्दोऽधिकपरतया व्याख्यातः। भूमविद्यायामेव हि 'ततस्त ऊर्ध्वं वक्ष्यामी' त्यूर्ध्वशब्दोऽधिके दृष्टः। ननु भूमा परमेश्वर इति साध्ये जीवादधिकत्वेनोपदिष्टत्वादिति हेतु'र्महतः परमव्यक्त'मिति श्रुतौ जीवादधिकत्वेन निर्दिष्टे शरीरे व्यभिचारीत्याशङ्क्य विशेषयति- **आत्मान्तरत्वेनेति।** आत्मत्वेनेत्येतावदेव विवक्षितम्। प्रतियोगिनो जीवस्याप्यात्मत्वादन्तरशब्दः प्रयुक्तः। तथा च जीवाधिकत्वेनोपदिष्टत्वं हेतुरिति न व्यभिचार इति भावः। निरतिशयसुखवर्णनपरस्य भूमोपदेशस्यात्मविषयत्वं स्पष्टमिति

हेतावपेक्षितमपि तद्विशेषणं सूत्रे न कृतम्। जीवादधिकत्वेन भूमा केन वाक्येनापदिश्यत इत्याकाङ्क्षायामाह-**एष इति।** 'एष तु वा अतिवदति यस्सत्येनातिवदती'त्यत्र तुशब्दसत्यशब्दाभ्यां प्राणातिवादिनोऽन्यस्सत्यातिवादी प्रतीयते। 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः'इत्यत्र पश्वन्तरेभ्यो गोअश्वानामिव प्रकृतप्राणातिवादिनः सत्यातिवादितः प्राशस्त्यं च प्रतीयते। ततश्च तत एतस्य प्राशस्त्यं तदतिवदननिमित्तात्प्राणादेतदतिवदननिमित्तस्य सत्यस्याप्याधिक्येनैव पर्यवस्यतीत्यनेन वाक्येनार्थाज्जीववाक्याधिकत्वेन भूमोपदिश्यते। नचात्र 'एष तु वा अग्निहोत्री'ति वाक्यन्यायावतारः। तत्र हि द्रव्यदेवतान्तराभावेनाग्निहोत्रान्तरा- प्रतीतेस्तुशब्दस्वारस्यभङ्गः। इह प्रकृतातिवदननिमित्तप्राणव्यतिरिक्तसत्रूशब्दोक्तमहाप्रकरणि- परमात्मरूपातिवादनिमित्तान्तरप्रतीतेः तत्स्वारस्यभङ्गो न युक्तः। तुशब्देन प्राणातिवादिना- ऽयमतिवाद्यन्य इत्यवसीयते। सत्यशब्देन च करणविभक्त्यन्तेन परमेश्वरस्तत्र निमित्तमिति प्रतीयते। छान्दोग्य एव 'तस्य ब्रह्मणो नाम सत्य'मिति ब्रह्मनामत्वोक्तेः सत्यशब्दः परमेश्वर एव स्वारसिकः। तृतीयाविभक्तिश्च कारणत्वे। अतस्तुशब्दसत्यनामकरणविभक्तिस्वारस्यभङ्गेन न प्रकृतप्राणातिवादिविषयत्वकल्पनावकाशः। न चाग्रे 'यदा वै विजानात्यथ सत्यं वदती'त्यादिदर्शनात् प्राणातिवादिव्रतत्वेन सत्यवचनविधिः प्रतीयत इति शङ्क्यम्। उपक्रमगततुशब्दादिस्वारस्याद्यनुरोधेन 'सत्यं वदती'त्यस्यापि परमात्मातिवदनविषयत्वौचित्यात् सत्यस्यातिवदने निमित्तत्वविवक्षया तृतीयावद्विषयत्वविवक्षया द्वितीयाया अप्युपपत्तेरिति भावः। **यस्सत्येनातिवदतीत्यादिनेति।** अत्रत्यादिशब्देन 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति यो वै भूमा तदमृतम् अथ यदल्पं तन्मर्त्य' मित्यादिभूमाल्पयोर्वैषम्यप्रदर्शकवाक्यमपि भूम्नो जीवाधिकत्वोपदेशवाक्यत्वेन विवक्षितम्। अत्र ह्यल्पशब्देन जीववर्ग एव विवक्षितः। जडे सुखस्याप्रसक्तेः। जीववर्गे सुखसद्भावेऽपि 'अपशवो वा अन्य'इत्यत्र गवाश्वव्यतिरिक्तेषु प्रशस्तपशुत्वनिषेधवत् प्रकृतोत्कृष्टसुखनिषेधोपपत्तेश्च। अत एवोत्तरत्राप्यल्पशब्दो जीवपरः। ननु भूमैव प्रकरणी परमात्मा न प्राण इति सिद्धान्ते भूम्नस्सर्वतो भूयस्त्वार्थमेव नामादिप्राणान्तानामुत्तरोत्तरभूयस्त्वेनानुक्रमणमिति चे'न्मैवम्। न तु तद्युज्यते। तथासति प्राणाद्भूमन्यपि भूयस्त्वविषययोः प्रश्नप्रतिवचनयोर्दर्शनापत्तिः। न हि यदर्थमन्यत्प्रक्रान्तं तदनुक्तिर्युक्तेति चेन्मैवम्। पूर्वपर्यायेष्वनुक्तस्यातिवादित्वस्य प्राणपर्याये प्रतिपादनेन प्राणस्य सर्वप्रतिष्ठात्वाद्युपन्यासेन च प्रक्रान्तात्मोपदेशः प्राण एव समाप्त इति मत्वा नारदे भूयः पृच्छति सनत्कुमारः प्राणविज्ञानमप्युपक्रान्तात्मविषयं न भवतीति न तेन सम्यगतिवादित्वं किं तु सत्येन परमात्मनेति सत्यविज्ञानं स्वयमेवोपचिक्षेप। ततः 'सोऽहं भगवः सत्येनातिवदानी'ति पृष्टवते तस्मै विज्ञानमतश्रद्धादिसाधनपरम्परया तमेव सत्यं परमात्मानं भूमानमुपदिदेशेति प्रश्नप्रतिवचनाभाव-स्यान्यथोपपत्तेः। 'अथात आत्मादेश' इत्यारभ्य प्रकरणिनः परमात्मन उपदेश इति पूर्वपक्षेऽपि

प्रश्नप्रतिवचनाभावस्याविशिष्टत्वाच्च। तस्मा 'देष तु वे' त्यारभ्य प्राणशब्दोदितजीवावान्तर-प्रकरणानुवृत्तिशङ्कानवकाशात् महाप्रकरणी परमेश्वर एव भूमेत्युपसंहरति–**तत इति**।।सू०।।

धर्मोपपत्तेश्च।।८।। भूम्नः परमेश्वरत्वे 'स्वे महिम्नी'त्यादिकं तत्रानुपपन्नमिति पूर्वपक्षप्रदर्शितशङ्कानिराकरणार्थमिदं सूत्रम्। अत एव भाष्ये स्वरसत एव परमेश्वरे सङ्घटमानं 'यो वै भूमा तदमृत'मित्यादिकं परित्यज्य 'स भगव' इत्यादिकमेव सूत्रविषयत्वेनोदाहृतम्। अत्रायमाशयः। 'स भगवः कस्मिन्प्रतिषित इति स्वे महिम्नीति यदि वा न महिम्नीति गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासाचार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाचान्यो ह्यन्यस्मिन्प्रतिष्ठित' इति श्रूयते। तत्र 'स भगवः कस्मिन्प्रतिष्ठित'इति प्रश्ने 'स्वे महिम्नी'त्यनेन 'आत्मीयायां विभूतावित्युत्तरमुक्त्वा' यदि वा न महिम्नी'त्यनेनात्मीयविभूतिप्रतिष्ठितत्वं पुनः प्रतिषिध्य तत्र हेतुत्वेन गवाश्वादिविभूतिषु तत्स्वामिनां चैत्रादीनामवस्थानादर्शनं नोच्यते किं तु स्वात्मन्यानन्दरूपे महिम्नि महति परिच्छेदशून्ये प्रतिष्ठित इत्युक्त्वा यथा लोके गवाश्वादिरूपायामात्मीयविभूतौ चैत्रः प्रतिष्ठित इत्युच्यते तथात्रोक्तमिति नारदस्य भ्रान्तिमपनेतुं तथार्थं गृह्णातिचेत् भूमा स्वमहिमप्रतिष्ठो न भवतीत्युक्त्वा तत्र हेतुत्वेन 'गवाश्वमिहे' त्यादिना भूम्नः परमेश्वरस्य निरतिशयस्वात्मानन्दनित्यतृप्तस्य क्षुद्रवैषयिकानन्दसतृष्णचैत्रादिवत् गवाश्वादि-प्रतिष्ठितत्वासम्भव उच्यते। अत एव तदनन्तरं 'नाहमेवं ब्रवीमि ब्रवीमीति होवाचे'ति वाक्येन चैत्रो गवाश्वादिप्रतिष्ठित इतिवदहं न ब्रवीमि किं तु यथा 'स्वयं दासास्तपस्विन' इति स्वस्यैव स्वात्मानं प्रति दासत्वमुपचारेण वदन्ति दासभावज्ञापनाय एवमपरिच्छिन्नानन्दरूपे स्वात्मनि प्रतिष्ठितत्व-मुपचारेण ब्रवीमि वस्तुतोऽस्य प्रतिष्ठारूपः आधारो नास्ति इति ज्ञापनायेत्यभिप्रायं सनत्कुमारस्य वचनं प्रदर्श्य मुख्य एवाधाराधेयभावोऽस्त्वित्याशङ्कानिराकरणार्थं स्वस्य स्वस्मिन्नेव मुख्य आधाराधेयभावो न सम्भवति तस्य भेदगर्भत्वादित्युच्यते–'अन्यो ह्यन्यस्मिन्प्रतिष्ठित'इति। तर्हि तदन्य एव कश्चिदाधारो मुख्योऽस्त्वित्याशङ्कावारणार्थं सर्वात्मनः सकलचिदचिद्विशिष्टाद्वितीयस्वरूपात्त-स्मादन्यदाधारत्वयोग्यं किमपि वस्तु नास्ति इति प्रत्यायचितुमुच्यते–'स एवाधस्ता' दित्यादि 'स एवेदं सर्व' मित्यन्तम्। 'अथातोऽहङ्कारादेश एवे'ति नायं जीवोपदेशः। अहङ्कारशब्दस्य जीववाचित्वा-भावात्। किं त्वहमिति करणीयस्य बुद्धिपूर्वकं ग्रहणीयस्य तस्यैव भूम्न आदेशः। तथाच। 'अहमेवाधस्ता'दित्यादौ भूम्नि वर्णितस्यैव सार्वात्म्यस्य शास्त्रदृष्ट्या परिपूर्णाहंभावशालिभि-र्विगलितदेवनुष्यादिशरीरपरिच्छिन्नाहंभावैर्विद्वद्भिर्गृह्यमाणेनाहंत्वेन रूपेण 'एतत्साम गायन्नास्त' इत्यादि श्रुताविवोपदेशः। 'अथात आत्मादेश एवे'त्यादि भूम्नि स्वरूपेण विद्वदहंभावेन वोपदिष्टस्यैव सर्वात्मत्वस्य विद्वदन्तर्यामित्वेन रूपेणोपदेशः। अत एवा 'त्मैवाधस्ता' दित्याद्युक्तयनन्तरं 'तस्य ह वा एतस्यैवं पश्यतः एवं मन्वानस्यैवं विजानत आत्मतः प्राण आत्मत आशा आत्मतः स्मर'इत्यादिना

प्रकृतादात्मनः प्राणाद्युत्पत्तिप्रतिपादने प्रकृतस्यात्मनो विद्वांसं प्रत्यात्मत्वं विशिष्योच्यते। एवं त्रेधा तस्य सार्वात्म्योपदेशः त्रिविधोपासनोपयोगी। अतो न कस्याप्यनुपपत्तिरिति सविशेषमुक्तं: प्रामाणिकत्वा' द्यत्र नान्यत्पश्यती 'त्याद्ययुक्तमित्याशङ्कते-**नन्विति।** यथा किञ्चिद्विषयसुखमनुभवन्नपि तदधिकविषयान्तरदर्शनाकर्णनध्यानेषु प्रवर्तते नैवं निरतिशयसुखरूपं ब्रह्मानुभवन्निति' यत्र नान्य 'दित्यादेरभिप्रायः। अत एव भूम्नो निरतिशयसुखत्वप्रतिपत्त्यर्थं 'यो वै भूमा तत्सुख 'मित्युक्त्वा 'नाल्पे सुखमस्ती 'त्यल्पे जीववर्गे कीटादिहिरण्यगर्भान्ते सुखं निषिध्यते। 'भूमैव सुख 'मित्येवकारेणापि तत्र तन्निषेध एव दृढीक्रियते। न च तत्र सुखमात्रनिषेधः संभवतीति निरतिशयसुखे तत्र निषेध्ये 'यो वै भूमा तत्सुख 'मित्यत्र तथाभूतमेव सुखं विधेयं लभ्यत इत्याशयेन परिहरति-**भूम्नि प्रत्यक्ष इत्यादिना।** ननु 'यत्र नान्य' दित्यादेः सर्वात्मना वस्त्वन्तरदर्शनादिनिषेध एवार्थः प्रतीयते। स कथमुपपद्यते। प्रपञ्चस्य सत्यतया मुक्तिदशायामपि विद्यमानत्वेनाविर्भूतसार्वज्ञ्यादिगुणस्य मुक्तस्य तद्दर्शनानिवारणादिति शङ्कते-**प्रपञ्चे सत्येवेति।** परिहरति-**इति न विचार्यमिति।** अयमाशयः। भूम्नो हीदं लक्षणमुच्यते। भूमशब्दोऽयं ब्रह्मशब्दतुल्यन्यायत्वात् तद्वदेव त्रिविधपरिच्छेदान्तर्भूतवस्तुपरिच्छेदराहित्यसिद्धये स्थूलसूक्ष्मसकलचेतनाचेतनप्रपञ्चविशिष्टस्य परमेश्वरस्य वाचकः वृक्षशब्द इव पत्रपुष्पादिविशिष्टस्य स्थावरस्य। तथा च यथा वृक्षं पश्यतः पत्रपुष्पाद्याकारेणापि वृक्ष एव दर्शनगोचरो भवति। अत एव वृक्षं पश्यन्नामूलमाशिखरं सर्वावयवसहितं तं वृक्ष इत्येव पश्यति। एवं ब्रह्मानुभवतः प्रपञ्चाकारेणापि ब्रह्मैवानुभवगोचरो भवति। अतो युक्तं 'यत्र नान्यत्पश्यती 'त्यादि। भूम्न्यनुभूयमाने भूमशब्दार्थानन्तर्गतस्य कस्यापि दर्शनाभावात्। उक्तेऽर्थे तैत्तिरीयश्रुतिं प्रमाणयति-**तथा हीति।** एतत्परिदृश्यमानं प्राकृतप्रपञ्चजातं ततो मुक्तयवस्थाप्राप्त्यनन्तरमाकाशशरीरत्वादिविशिष्टं ब्रह्मैव भवति। मुक्तं प्रत्युक्तरूपब्रह्मात्मना स्फुरतीत्यर्थः। उदाहृतश्रुतेर्मुक्तविषयत्वं दर्शयितुं पूर्ववाक्यान्युदाहरति **आप्नोतीति।** व्याहृतिविद्यायां ब्रह्मविदमधिकृत्येदमुच्यते 'आप्नोति स्वाराज्य 'मित्यादि। स्वः स्वर्गसुखरूपे पदे राजत इति स्वाराट् तस्य भावं स्वाराज्यमाप्नोति सुखैकरसं परब्रह्मणः शिवस्य पदमाप्नोतीति यावत्। मनसस्पतिं ज्ञानशक्त्यधिष्ठानभूतं शिवं चाप्नोति। अयं प्रस्तुतो मुक्तात्मा तदा किंविशिष्टो भवतीत्याकाङ्क्षायामुच्यते 'वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपति 'रिति। विज्ञानं मनः। एवं प्रस्तुतं मुक्तात्मानं प्र'त्येतत्ततो भवती 'त्यादिकमुच्यत इति युक्तम्। इहापि भूमविद्यायां मुक्तः सर्वप्रपञ्चं पश्यन्नपि तत्र किञ्चिदपि दुःखरूपतां न पश्यति किं तु निरस्तसमस्तदुःखसंसर्गब्रह्मरूपतामेव पश्यतीत्युक्तम्। 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्। सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश' इति। तस्मा 'द्यत्र नान्यत्पश्यती 'त्यादेर्विरोधाभावान्मुक्तानां ब्रह्मसादृश्यं तदपृथग्भूतप्रपञ्चदर्शित्वं चोपपद्यत इत्युपसंहरति-**तत इति।।** ।। **इति भूमाधिकरणम्।।**२।।

।।सू०।। **अक्षरमम्बरान्तधृतेः**।।९।। अक्षरब्राह्मणगतं विषयवाक्यमुदाहरति-**बृहदारण्यक इति**। अक्षरशब्दस्य बहुधाभ्यस्तस्य रूढ्या वर्णजीवैकान्त्यादम्बरान्तधृत्यादेः परमेश्वरैकान्त्याच्च ताभ्यां संशयमाह-**अत्रेति**। अक्षरशब्दरूढिमवलम्ब्य पूर्वपक्षयति-**अक्षरशब्दस्येति। पुरुषोऽक्षरमुच्यत इति**। अत्रो'च्यत' इत्यनेन जीवस्याक्षरशब्दवाच्यत्वमुक्तम्। तद्रूढ्यैव पर्यवस्यति। न क्षरत्यश्नुत इति वा योगस्य धर्मज्ञानसङ्कोचादिरूप क्षरणवत्यणौ च तस्मिन्नसम्भवादिति भावः। स्यादेतत्। अक्षरस्य 'यदूर्ध्वं गार्गि दिव' इत्यादावाकाशान्तसकलजगद्धारकत्व'मेतस्यैवाक्षरस्य प्रशासने गार्गी'त्यादौ प्रशासितृत्व''मदृष्टं द्रष्टि'त्यादावदृष्टत्वादिविशेषितद्रष्टृत्वादिकं च श्रूयते। तत्प्रणवजीवयोर्न सम्भवतीति परमेश्वर एवाक्षरमित्याशङ्क्याह-**अतस्तावेवेति**।

इति शिवार्कमणिदीपिका भूमाधिकरणम् समाप्तम्

अथ अक्षराधिकरणम्। ॥ सू० १०-१२॥

शाङ्करभाष्यम्

अक्षरमम्बरान्तधृतेः॥१०॥

"कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति। स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनणु" (बृ॰ ३/८/७/८) इत्यादि श्रूयते।

तत्र संशयः–किमक्षरशब्देन वर्ण उच्यते, किंवा परमेश्वर इति। तत्राक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वात् प्रसिद्ध्यतिक्रमस्य चायुक्तत्वात् "ॐकार एवेदं सर्वम्" (छा॰ २/२३/३) इत्यादौ च श्रुत्यन्तरे वर्णस्याप्युपास्यत्वेन सर्वात्मकत्वावधारणाद् वर्ण एवाक्षरशब्द इति॥

एवं प्राप्त उच्यते–पर एवात्माऽक्षरशब्दवाच्यः। कस्मात्? *अम्बरान्तधृतेः*–पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणात्। तत्र हि पृथिव्यादेः समस्तविकारजातस्य कालत्रयविभक्तस्य "आकाश एव तदोतं च प्रोतं च" इत्याकाशे प्रतिष्ठितत्वमुक्त्वा "कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च" इत्यनेन प्रश्नेनेदमक्षरमवतारितम्। तथा चोपसंहृतम्–"एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च" प्तोतश्च इति। न चेयमम्बरान्तधृतिर्ब्रह्मणोऽन्यत्र संभवति। यदपि "ॐकार एवेदं सर्वम्" इति, तदपि ब्रह्मप्रतिपत्तिसाधनत्वात् स्तुत्यर्थं द्रष्टव्यम्। तस्मान्न क्षरत्यश्नुते चेति नित्यत्वव्यापित्वाभ्यामक्षरं परमेव ब्रह्म॥१०॥

स्यादेतत्–कार्यस्य चेत्कारणाधीनत्वमम्बरान्तधृतिरभ्युपगम्यते, प्रधानकारणवादिनोऽपीयमुपपद्यते। कथमम्बरान्तधृतेर्ब्रह्मत्वप्रतिपत्ति? **अत उत्तरं पठति–**

***सा च प्रशासनात्*॥११॥**

सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्म। कस्मात्? *प्रशासनात्*॥ प्रशासनं हीह श्रूयते–"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" (बृ॰ ३/८/९) इत्यादि। प्रशासनं च

पारमेश्वरं कर्म। नाचेतनस्य प्रधानस्य प्रशासनं भवति। न ह्यचेतनाना घटादिकारणानां मृदादीनां घटादिविषयं प्रशासनमस्ति॥११॥

***अन्यभावव्यावृत्तेश्च*॥१२॥**

अन्यभावव्यावृत्तेश्च कारणाद् ब्रह्मैवाक्षरशब्दवाच्यम्। तस्यैवाम्बरान्तधृतिः कर्म, नान्यस्य कस्यचित्। किमिदमन्यभावव्यावृत्तेरिति? अन्यस्य भावोऽन्यभावःतस्माद् व्यवृत्तिरन्यभावव्यावृत्तिरिति। एतदुक्तं भवति—यदन्यद् ब्रह्मणोऽक्षरशब्दवाच्यमिहाशङ्क्यते, तद्भावादिदमम्बरान्तविधारणमक्षरं व्यावर्तयति श्रुतिः—"तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोतृमतं मन्तृविज्ञातं विज्ञातृ" (बृ॰ ३/८/११) इति। तत्रादृष्टत्वादिव्यपदेशः प्रधानस्यापि सम्भवति, दृष्टृत्वादिव्यपदेशस्तु न सम्भवति; अचेतनत्वात्। तथा "नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ" इत्यात्मभेदप्रतिषेधात् न शारीरस्याप्युपाधिमतोऽक्षरशब्दवाच्यत्वम्; "अचक्षुष्यकमश्रोत्रमवागमनः" (बृ॰ ३/८/८) इति चोपाधिमत्ताप्रतिषेधात्। न हि निरुपाधिकः शारीरो नाम भवति। तस्मात्परमेव ब्रह्माक्षरमिति निश्चयः॥१२॥ इति तृतीयमक्षराधिकरणम्॥

इति शाङ्करभाष्यम् अक्षराधिकरण समाप्तम्

वार्तिकम्

अक्षरमम्बरान्तधृतेः॥१०॥ यद्यात्मशब्दः प्रसिद्धिबलात् परमात्मवचनो विवर्तनीयः, न प्राणः, एवं तर्हि अक्षरशब्दोऽपि प्रसिद्धिबलात् तद्वदेवौङ्कारेऽनुवर्त्यताम्, न ब्रह्मणीति दृष्टान्तसङ्गतिरत्र द्रष्टव्या। बृहदारण्यके गार्गीब्राह्मणं श्रूयते–''कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति। स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमदीर्घमि'' त्यादि॥

तत्र सन्दिह्यते–किमखरशब्देन वर्णात्मक ओङ्कार उच्यते, किं वा परं ब्रह्म–इति॥ किं प्राप्तम्? वर्णात्मकमक्षरमिह गृह्यते। कुतः? तत्राक्षरशब्दस्य समुदायप्रसिद्ध्या वर्तनात्, ब्रह्मणि च भवन्नक्षरशब्दो न क्षरति अश्नुते वत्यक्षरमित्यवयवप्रसिद्ध्या भवेत्, अवयवप्रसिद्धेस्तु समुदायप्रसिद्धिर्बलवती। न च–अक्षरस्य वर्णात्मकत्वे पृथिव्याद्याकाशान्तस्य जगतस्तस्मिन्नोतत्वप्रोतत्वश्रुतेरर्थात् प्रतीयमाना तद्वृत्तिरनुपपन्नेति–वाच्यम्; ''ओङ्कार एवेदं सर्वम्'' इत्यादौ श्रुत्यन्तरे वर्णस्याप्युपास्यत्वेन सर्वात्मत्वावधारणात् तद्वृत्त्युपपत्तेः। अपि च शब्दे हि शब्दार्थः परिकल्पितः ; ''वाचारम्भणं विकारो नामधेयमि'' ति श्रुतेः। सर्वशब्दात्मकश्च प्रणवः; ''यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोङ्कारेण सर्वा वागि'' ति श्रुतेः। तस्मादोङ्कार एवाक्षर इति॥

एवं प्राप्त इदमाह– *अक्षरमम्बरान्तधृतेरिति*॥ अक्षरमिह परं ब्रह्मोच्यते, कस्मात्? अम्बरान्तधृतेः=पृथिव्यादेराकाशान्तस्य जगतो धारणादित्यर्थः। कारणेन हि सर्वं कार्यं ध्रियते। कारणं चाक्षरं तस्य परमेव ब्रह्मेति श्रुति-स्मृति-न्यायैरधिगतम्। एवं च समुदायप्रसिद्धेर्बाधादवयवप्रसिद्धिरेवात्राक्षरशब्दस्य निराबाधतया ध्रियते। न च–''ओङ्कार एवेदं सर्वमि'' त्यादिश्रुतौ वर्णस्याप्युपास्यत्वेन सर्वात्मत्वावधारणादम्बरान्तधृत्युपपत्तेरुक्तत्वाद् न समुदायप्रसिद्धिबाध इति–वाच्यम्, वर्णस्य ब्रह्मप्रतिपत्तिसाधनत्वेनाभिधेयसार्वात्म्यमुपवर्ण्य श्रुत्या स्तूयमानत्वात् तस्यास्तत्परत्वाभावात्। एतेन–यदुक्तम्–नामधेये रूपधेयं कल्पितम्; वाचारम्भणश्रुतेः; सर्वं च नामधेयं प्तणवात्मकम्–इति, तदपि–प्रत्युक्तम्; ब्रह्मण एव सर्वकारणत्वेन

सर्वकल्पनाधिष्टानत्वात्, वाचारम्भणश्रुतेः कारणसत्यत्वाभिप्रायत्वाद् न वाच्यार्थस्य काल्पनिकार्थता; ''विकारो नामधेयमि'' ति नामरूपयोरुभयोरपि वाचारम्भणत्वप्रतिपादनादिति।।१०।।

यद्यम्बरान्तधृतेर्नाक्षरं वर्णात्मकम्, अस्तु तर्हि प्रधारम्, अव्याकृतं वा; तत्रापि तस्याः संभवात्, अवयवप्रसिद्धिसंभवाच्चेति चेत्, नेत्याह– *सा च प्रशासनात्*।। चस्त्वर्थ उक्ताशङ्कां निवारयति। सा च परमेश्वरस्यैव, कुतः? तद्वतोऽक्षरस्य प्रशासनश्रुतेः–''एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्टत'' इति। प्रशासनं च पारमेश्वरं कर्म श्रुतिस्मृतिप्रसिद्धम्, नाचेतनस्य प्रधानादेः संभवति।।११।।

इतश्च न ब्रह्मातिरिक्तमक्षरमित्याह– *अन्यभावव्यावृत्तेश्च*।।१२।। अक्षरस्य ब्रह्मभिन्नतां व्यावर्तयति श्रुतिः–''तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रि'' त्यादिः। अस्तु तर्हि चेतनत्वात् शारीर एवाक्षरम्, नेत्याह भाष्यकारः– *तथा नान्यदतोऽस्ति द्रष्ट्रित्यादि*।।

इतश्च न शारीरस्याक्षरत्वमित्याह– *अचक्षुष्कमिति*।।१२।। इति तृतीयमक्षराधिकरणम्।।

इति वार्त्तिकम् अक्षराधिकरण समाप्तम्

प्रदीपः

अक्षरमम्बरान्तधृते:।।१०।। अक्षरम्, ब्रह्म, आकाशान्तविधारकत्वादिति सूत्रार्थः। ''अदृश्यत्वादिगुणको धर्माक्ते'' रित्यत्राक्षरशब्दस्याक्षरात् परतः पर इत्यादिवाक्यशेषे पुरुषस्यैवाक्षरात् परत्वस्य श्रवणाद् अव्यक्तपरत्वमेव संभाव्यते, न तु वर्णपरत्वमिति न रूढयर्थविवक्षा संभवतीति पक्षद्वयेऽपि यौगिकत्वम्, अत्र तु रूढयनुसारेण पूर्वपक्षः, योगेन सिद्धान्त इत्यधिकाशङ्का, इतीदमधिकरणं प्रवृत्तम्, अन्यत्तु सर्व ब्रह्मधर्मोक्तेरेव सिद्धान्तव्यवस्थापनात् शासितृत्वविशेषणेनैव प्रधानव्यावृत्तेर्विवक्षणाञ्च समानम्। पूर्वाधिकरणे शैल्यन्तरेण ब्रह्मोपदेशव्यवस्था, अत्र तु प्रक्रान्तशैल्यैव ब्रह्मोपदेश इति प्रसङ्गादस्याधिकरणस्य प्रवृत्तिः। ''आकाशस्तल्लिङ्गादि'' त्यादौ सर्वजगत्कारणत्वं ब्रह्मलिङ्गं रूढयन्यथानयने समर्थम्, अत्र तु सार्वात्म्यमोङ्कारस्यापि साधारणमिति न तस्य लिङ्गत्वमिति न रूढिपरित्यागे कारणमस्ति, इति श्रुतिप्राबल्येन प्रवृत्तत्वेऽप्यस्याधिकरणस्य प्रधानव्यावर्तनस्याप्यत्र द्वितीयसूत्रेण विवक्षणात् तत्र चाक्षरशब्दस्यारूढत्वाद् अस्पष्टब्रह्मलिङ्गकत्वम्; वर्णांशपूर्वपक्षदृष्टया तु आकाशदिवाक्यानामिव स्पष्टब्रह्मलिङ्गत्वमेव।।

अत्रानुसन्धेयानि विषयवाक्यानीमानि बृहदारण्यकतृतीयाध्यायाष्टमब्राह्मणगतान गार्गीयाज्ञवल्क्ययोः प्रश्नप्रतिवचनाभ्यां प्रवृत्तानि। तानि यथा–''अथ ह वाचक्नव्युवाच ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चिद् ब्रह्मोद्यं जेतेति पृच्छ गार्गीति।। सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवञ्च भविष्यञ्चेत्याचक्षते कस्मिँस्तदोतं च प्रोतं चेति।। स होवाच यदूर्ध्वं गार्गि दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवञ्च भविष्यञ्चेत्याचक्षत आकाशे तदोतं च प्रोतं च। सा होवाच यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्......आकाश ओतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति।। स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वंमदीर्धमलोहितमस्नेहमच्छायमतमोऽवाक्यनाकाशमसङ्गमरसमगन्धमच-क्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किञ्चन न तदश्नाति

कश्चन।। एतस्य वाऽक्षरस्य प्रशसने गार्गि सूर्याचन्द्रमसौ विधतौ तिष्ठत एतस्य वा अक्षरस्य गार्गि द्यावापृथिव्यौ विधृतौ तिष्ठतः.....तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति दृष्ट्र नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ तस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति।।

अत्रान्तिमवाक्येन–"अतद्धर्माभिलापादि" ति न्यायेन तदुपान्त्यवाक्येन धर्मोक्तेश्च प्रधानव्यावृत्तिः, यद्यक्षरशब्दस्य यौगिकत्वम्–न तदश्नाति किञ्चनेति वाक्यशेषादिति मन्यते। वर्णविषयत्वेनाधिकाशङ्कानिराकारणार्थं तु प्रथमं सूत्रम्। अत्र त्रीणि सूत्राणि। तत्र द्वितीयतृतीयसूत्रे–पूर्वोक्तन्यायद्वयानुवादपरे इति विवेकः। निगदमस्य भाष्यम्। ओङ्कारस्य सर्वात्मत्वं स्तुत्यर्थमेव, न तु विवक्षितम्; बाधात्, स्फोटवादस्याप्रामाणिकत्वात्, इत्याह–*यदपीति*।। अयमाशयः–अक्षरपदेन वर्णविवक्षेति किं स्फोटवादमभिप्रेत्य, अथवा पर्णवादमेव; आद्ये यद्यपि सर्वात्मत्वं तद्वादसिद्धम्। तथापि तदप्रामाणिकताया देवताधिकरणे वक्ष्यमाणत्वाद् नोपपन्नं तत्। द्वितीयेषु बाध एवेति स्तुत्यर्थत्वमेव। एतेन–उपरि निराकरिष्यमाणस्य स्फोटवादनिरासस्य प्रयोजनमपि–सूचितम्; अक्षरशब्देन ब्रह्मव्यवस्थापनार्थत्वात्। अत्र चाक्षरशब्दस्य स्फोटेऽपि न रूढिरिति शङ्कैवानुपपन्नेति मन्तव्यम्। तथा चोक्ताधिकरणसार्थक्यानुपपत्तिरेव स्फोटवादानङ्गीकारे बीजम्, न तु भाष्यकाराणामिच्छामात्रमित्यपि फलति। तस्माद् न क्षरति अश्नुते चेति योगार्थपरमिदम्।।१०।।११।।१२।। इति तृतीयमक्षराधिकरणम्।।

इति प्रदीपः अक्षराधिकरणम् समाप्तम्

भामती

अक्षरशब्दः समुदायप्रसिद्ध्या वर्णेषु रूढः, परमात्मनि चावयवप्रसिद्ध्या यौगिकः। अवयवप्रसिद्धेश्च समुदायप्रसिद्धिर्बलीयसीति वर्णा एवाक्षरम्। न च वर्णेष्वाकाशस्योतत्वप्रोतत्वे नोपपद्येते, सर्वस्यैव रूपधेयस्य नामधेयात्मकत्वात्। सर्वं हि रूपधेयं नामधेयसम्भिन्नमनुभूयते, गौरयं वृक्षोऽयमिति। न चोपायत्वात्तत्सम्भेदसम्भवः। नहि धूमोपाया वह्निधीर्धूमसम्भिन्नं वह्निमबगाहते, धूमोऽयं वह्निरिति, किन्तु वैयधिकरण्येन धूमाद् वह्निरिति। भवति तु नामदेयसम्भिन्नो रूपधेयप्रत्ययो डित्थोऽयमिति। अपि च शब्दानुपायेऽपि रूपधेयप्रत्यये लिङ्गेन्द्रियजन्मनि नामसम्भेदो दृष्टः। तस्मान्नामसम्भिन्नाः पृथिव्यादयोऽम्बरान्ता नाम्ना ग्रथिताश्च विद्धाश्च, नामानि चोङ्कारात्मकानि तद्व्याप्तत्वात्। तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि एवमोङ्कारेण सर्वा वागिति श्रुतेः। अत ॐकारात्मकाः पृथिव्यादयोऽम्बरान्ता इति वर्णा एवाक्षरं न परमात्मेति प्राप्तम्।

एवं प्राप्तेऽभिधीयते अक्षरं परमात्मैव, न तु वर्णाः। कुतः? अम्बरान्तघृतेः। न खल्वम्बरान्तानि पृथिध्यादीनि वर्णा धारयितुमर्हन्ति, किन्तु परमात्मैव। तेषां परमात्मविकारत्वात्। न च नामधेधात्मकं रूपधेयमिति युक्तम्। स्वरूपभेदादुपायभेदादर्थक्रियाभेदाच्च। तथाहि–शब्दत्वसामान्यात्मकानि श्रोत्रग्राह्याण्यभिधेयप्रत्ययार्थक्रियाणि नामधेयान्यनुभूयन्ते। रूपधेयानि तु घटपटादीनि घटत्वपटत्वादिसामान्यात्मकानि चक्षुरादीन्द्रियग्राह्याणि मधुधारणप्रावरणाद्यर्थक्रियाणि च भेदेनानुभूयन्ते इति कुतो नामसम्भेदः? न च डित्थोऽयमिति शब्दसामानाधिकरण्यप्रत्ययः। न खलु शब्दात्मकोऽयं पिण्ड इत्यनुभवः, किन्तु यो नानादेशकालसंप्लुतः पिण्डः सोऽयं सन्निहितदेशकाल इत्यर्थः। संज्ञा तु गृहीतसम्बन्धैरत्यन्ताभ्यासात् पिण्डाऽनिवेशिन्येव संस्कारोद्बाधसम्पातायाता स्मर्यते। यथाहुः–

'यत्सज्ञास्मरणं तत्र न तदप्यन्यहैतुकम्।
पिण्ड एव हि दृष्टः सन् सज्ञां स्मारयितुं क्षमः॥

संज्ञा हि स्मर्य्यमाणापि प्रत्यक्षत्वं न बाधते।
संज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा॥' इति।

न च वर्णातिरिक्ते स्फोटात्मनि अलौकिकेऽक्षरपरप्रसिद्धिरस्ति लोके। न चैष प्रामाणिक इत्युपरिष्टात् प्रवेदयिष्यते। निरूपितं चास्माभिस्तत्त्वविन्दौ। तस्माच्छ्रोत्रग्राह्याणां वर्णानामम्बरान्तधृतेरनुपपत्तेः समुदायप्रसिद्धिबाधनाद् अवयवप्रसिद्ध्या परमात्मैवाक्षरमिति सिद्धम्। ये तु प्रधानं पूर्वपक्षयित्वाऽनेन सूत्रेण परमात्मैवाक्षरमिति सिद्धान्तयन्ति, तैरम्बरान्तधृतेरित्यनेन कथं प्रधानं निराक्रियत इति वाच्यम्। अथ नाधिकरणत्वमात्रं धृतिः अपि तु प्रशासनाधिकरणता। तथा च श्रुतिः—एतस्य वाक्षरस्य प्रशासने गार्गि सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः' इति। तथाप्यम्बरान्तधृतेरित्यनर्थकम्, एतावद्वक्तव्यम—अक्षरं प्रशासनादिति। एतावतैव प्रधाननिराकरणसिद्धेः। तस्माद्वर्णाक्षरतानिराक्रियैवास्यार्थः। न च स्थूलादीनां वर्णेष्वप्राप्तेरस्थूलमित्यादिनिषेधानुपपत्तेर्वर्णेषु शङ्कैव नास्तीति वाच्यम्, नह्यवश्यं प्राप्तिपूर्वका एव प्रतिषेधा भवन्ति, अप्राप्तेष्वपि नित्यानुवादानां दर्शनात्। यथा नान्तरिक्षे न दिवीत्यग्निचयननिषेधानुवादः। तस्माद् यत्किञ्चिदेतत्॥१०॥

प्रशासनमाज्ञा चेतनधर्मो नाचेतने प्रधाने वाऽव्याकृते वा सम्भवति। न च मुख्यार्थसम्भवे कूलं पिपतिषतीतिवद्भाक्तत्वमुचितमिति भावः॥११॥

अम्बरान्तविधरणस्याक्षरस्येश्वराद्यदन्यद्वर्णा वा प्रधानं वाऽत्र्याकृतं वा तेषामन्येषां भावोऽन्यभावस्तमत्यन्तं व्यावर्त्तयति श्रुतिः—तद्वा एतदक्षरं गार्गीत्यादिका। अनेनैव सूत्रेण जीवस्याप्यक्षरता निपिद्धेत्यत आह *तथा इति*। नान्यदित्यादिकया हि श्रुत्याऽऽत्मभेदः प्रतिषिध्यते। तथा चोपाधिभेदभिन्ना जीवा निषिद्धा भवन्त्यभेदाभिधानादित्यर्थः। इतोऽपि न शारीरसक्षरशब्दतेत्याह *अचक्षुष्कम् इति*। अक्षरस्य चक्षुराद्युपाधिं वारयन्ती श्रुतिरौपाधिकस्य जीवस्याक्षरतां निषेधतीत्यर्थः। तस्माद्वर्णप्रधानात्र्याकृतजीवानामसम्भवात् सम्भवाच्च परमात्मनः परमात्मैवाक्षरमिति सिद्धम्॥१२॥

इति भामती अक्षराधिकरणम् समाप्तम्

श्री कण्ठभाष्य

॥सू॥ **सा च प्रशासनात्** ॥१०॥

सा च धृतिः 'तस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः।' इत्यादिना प्रकृष्टाज्ञाधीनाऽवगम्यते। तज्जगच्छासनं जीवस्य न संभवति; 'एक एव रुद्रो न द्वितीयाय तस्थुः' इति जगच्छासने द्वितीयाभावश्रवणात्। अतः परमेश्वर एवाक्षरशब्दवाच्यः॥

॥सू॥ **अन्यभावव्यावृत्तेश्च** ॥११॥

अन्यभावोऽर्थान्तरत्वम्। 'तद्वा एतदक्षरं गार्गि अदृष्टं द्रष्टृ अश्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ' इति वाक्यशेषः परमेश्वरादक्षरस्यान्यभावं व्यावर्तयति, प्रणवजीवपक्षजीवपक्षयोरदृष्टत्वादिविशेषितद्रष्टृत्वाद्यसम्भवात्।

अतः परमेश्वर एवाक्षरमिति निर्णयः॥

॥ **इत्यक्षराधिकरणम्** ॥३॥

अथेक्षतिकर्माधिकरणम्॥४॥

प्रत्यक्षादिप्रमाणातीतस्यापि परमेश्वरस्य परमकरुणावशादुपासकप्रत्यक्षत्वमुपपादयितुमेतदधिकरणमारभ्यते–

॥सू०॥ **ईक्षतिकर्मव्यपदेशात्सः**॥१२॥

अस्य विषयः प्रश्नोपनिषदि श्रूयते 'यः पुनरेतं त्रिमात्रेणामित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तस्स सामभिरुन्नीवते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरुषमीक्षत'इति। अत्रेक्षतिकर्मत्वेन श्रूयमाणः। परमेश्वरोऽन्यो वेति संशयः। नासौ परमेश्वरः हिरण्यगर्भ एव। 'स सामभिरुन्नीयते ब्रह्मलोक' मिति

तल्लोकप्राप्तिश्रवणात्। परशब्दस्य जीवोत्कृष्टे तस्मिन्सम्भवाच्च। अथवा नारायणः। तस्य पुरुषशब्दवाच्यत्वात् जीवघनात्पराद्धिरण्यगर्भात्परत्वोपपत्तेश्च। तस्मिन्नेव प्रणववाच्यत्वप्रसिद्धेश्च। 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय' इति तत्पदस्यैव विद्वदनुभवविषयत्वश्रवणात्। 'ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्त' इत्यग्रिमश्लोके तत्प्रत्यभिज्ञानाच्चेति प्राप्ते ब्रूमः। ईक्षतिविषयस्स परमेश्वरः। उत्तरत्र 'तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परंचे'ति तदसाधारणशान्तत्वादिधर्मव्यपदेशात्। न हि हिरण्यगर्भे तत्कार्ये शान्तत्वादिकमस्ति। 'ब्रह्मलोक'मिति परब्रह्मणः शिवस्य लोकः प्राप्यतयाऽवगम्यते। जीवघन इति जीवसमष्टिरूपो हिरण्यगर्भः तस्मात्परात् परं हि ध्येयं श्रूयते। ततो हिरण्यगर्भपक्षो न युक्तः। नारायण इति यदुक्तं तद्विचार्यम्। 'अमृतमभयं परं चे'ति नित्यमुक्तत्वमभयहेतुत्वं विश्वाधिकतया परत्वं च कथमस्मिन्नुपपद्यते। विश्वरूपो ह्यसौ। कथं चैतदुपपद्यते। यज्जीवघनाद्धिरण्यगर्भादपि परादुत्कृष्टात् नारायणात्परमुत्कृष्टं पुरि शयानमन्तर्यामितया अत एव पुरुषं परं ब्रह्म तदुपासकस्साक्षात्पश्यतीति वर्णितम्। 'नारायणपरं ब्रह्म' 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्। ऊर्ध्वरेतं विरूपाक्ष'मिति हि श्रूयते। तस्मात्पुरि दहरपुण्डरीके वर्तमानतया पुरुषशब्दवाच्यं 'तस्य प्रकृतिलीनस्य यः परः स महेश्वर'इति श्रुत्या प्रणवाभिधेयं 'नारायणपरं ब्रह्मे'ति श्रुत्या नारायणाद्विश्वरूपादधिकं वाङ्मनसविपर्यासरहिततया ऋतं सत्यं त्रिलोचनतया विरूपाक्षं परशक्तया प्रणववर्णव्यत्यासरूपोमाशब्दवाच्यया शबलाकारत्वेन कृष्णपिङ्गलं परं सर्वातिशायि ब्रह्म 'परात्परं पुरिशयं पुरुषमीक्षत'इति ईक्षतिकर्मत्वेन व्यपदिश्यत इति युक्तम्। यदुक्तं 'तद्विष्णोः परमं पद'मिति तत्र प्रपञ्चाकारत्वमन्तरेण यन्निरतिशयानन्दस्वभावं विष्णोः परमं पदं रूपं तदेव शिवाभिधं परं ब्रह्मेत्यविरोधः। यतो विष्णुशिवयोरुपादाननिमित्तयोरवस्थाभेदमन्तरेण स्वरूपभेदो नास्ति। इति ईक्षतिकर्माधिकरणम्॥४॥

इति श्रीकण्ठभाष्यम् अक्षराधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

प्रणवो जीवो वाऽक्षरं न तु परमेश्वर इत्यर्थः। अयमाशयः। 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे'ति गार्ग्याः प्रश्नस्योत्तरतः या ख'ल्वेतद्वै तदक्षर'मित्यक्षरनिरूपणं प्रवृत्तम्। तत्राकाशशब्दस्साक्षात्परमेश्वररूपपरब्रह्मपर एव। तथाहि अक्षरब्राह्मणात्पूर्वं गार्गिब्राह्मणे गार्गियाज्ञवल्क्ययोः प्रश्नोत्तरपरम्परा प्रवृत्ता 'यदिदं सर्वमप्स्वोतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेति अन्तरिक्षलोकेषु गार्गी'त्यारभ्य 'ब्रह्मलोकेषु गार्गी'त्यन्ते वाक्यसन्दर्भे। तत्र पृथिवीसलिलवाय्यवन्तरिक्षलोकगन्धर्वलोका-दित्यलोकचन्द्रलोकनक्षत्रलोकदेवलोकेन्द्रलोकप्रजापतिलोकब्रह्मलोकानां पूर्वपूर्वस्योत्तरोत्तरोत्तर-स्मिन्नोतप्रोतत्वर्णनानन्तरं 'कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चे'ति पुनः पृष्टेन याज्ञवल्क्येन ब्रह्मलोकशब्दोदितस्य चिदाकाशरूपस्य परमेश्वरपदस्योतप्रोतत्वं परमेश्वरे परब्रह्मण्येव वर्णनीयं स्यात्। तथा रहस्योद्धाटनं झटिति कर्तुमनुचितमिति मन्यमानेन 'गार्गि माति प्राक्षीर्मा ते मूर्धा व्यपप्तदनतिप्रश्नां वै देवतामतिपृच्छसि मातिप्राक्षी'रिति सक्रोधमुक्ते भीतागार्ग्युपरराम। एवं बहुषु ब्राह्मणेषु याज्ञवल्क्यविजिगीषया तेन सह जल्पकथायां पर्यायेण प्रवर्तमानेष्वनुप्रविष्टा गार्गी तदानीं भीत्योपरतापि स्वोपरमानन्तरमुद्दालके प्रसिद्धे ब्रह्मविदि सूत्रमन्तर्यामिणं च पृष्टवति याज्ञवल्क्येन जिते सर्वेषां ब्राह्मणानामेवमेव पराजयो जायते स माभूदिति मन्यमाना पुनरपि याज्ञवल्क्यं प्रक्ष्यामीति ब्राह्मणाननुज्ञाप्य' अहं वैत्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वा राजपुत्र उग्रं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ शरौ सपत्नातिव्याधिनौ हस्ते कृत्वा उपोत्तिष्ठेदेवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहि' इति द्वितीयप्रश्ननिवारणपरिजिहीर्षया प्रश्नद्वयानुज्ञां युगपदेव याज्ञवल्क्यं प्रति पृष्टवा 'पृच्छे' ति तदनुज्ञाता 'यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चे'ति पृष्टवा 'यदूर्ध्वं गार्गि दिव' इत्यादिना 'आकाशे तदोतं च प्रोतं चे'तयन्तेनोत्तरे दत्ते 'नमस्तेऽस्तु याज्ञवल्क्य यो म एतं व्यवोच इति तं प्रशस्य इतः परं द्वितीयप्रश्नस्योत्तरं न जानीयादित्यभिमानेन 'अपरस्मै धारयस्वे' त्युक्त्वा पृच्छेति तेनोक्ते

प्रथमप्रश्नोत्तरस्थिरीकरणार्थं पुनरपि 'यदूर्ध्वं याज्ञवल्क्य दिव' इत्यादिना प्राक्पृष्टमेव पृष्टवती। याज्ञवल्क्येन 'यदूर्ध्वं गार्गि दिव' इत्यादिना' काश एव तदोतंच प्रोतं चे'त्यन्तेन प्राचीनोत्तर एवावधारणेन दृढीकृते तदनन्तरं कृतस्य 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे'ति द्वितीयप्रश्नस्योत्तरतया 'एतद्वै तदक्षर'मित्या'द्येतस्मिन्खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे'त्यन्तं कृतस्त्रमक्षरब्राह्मणं प्रवृत्तम्। अत्र गार्गिब्राह्मणान्ते याज्ञवल्क्येन यः प्रश्नः सक्रोधं निवारितः स एव खलु गार्ग्या सर्वेषां ब्राह्मणानां पराजयो भविष्यतीति भीतया तस्य क्रोधमविगणय्य पुनरवतारितः। निवारितप्रश्नस्य परमेश्वरे पर्यवसानं गार्गिब्राह्मण एवा'नतिप्रश्नां वै देवतामतिपृच्छसी'ति याज्ञवल्क्यवचनेन स्फुटमिति तदनुसारेणाकाशशब्दस्य परमेश्वरपरत्वमेव युक्तम्। अत एव याज्ञवल्क्यः प्रथमप्रश्नस्योत्तरं वक्तु न जानातीति तदीयप्रश्ननिवारणभङ्ग्यावगम्य द्वितीयप्रश्नोत्तरं निधाय युगपत्प्रश्नद्वयानुज्ञामर्थितवती प्रथमप्रश्नोत्तरप्रशंसामिव कृत्वा सर्वाधारस्य परमेश्वरस्य केनचित्प्रकारेण कश्चिदाधारोऽस्तीति ज्ञात्वा वक्तमयं न प्रभवतीत्यभिप्रायेण 'अपरस्मै धारयस्वे'ति धृष्टमुक्तवतीति सङ्गच्छते। एवमत्राकाशः परमेश्वर इति निर्णीते स यत्रोतप्रोतत्वेन वर्ण्यते तस्य परमेश्वरत्वासम्भवात् तदक्षरशब्दरूढविषयः प्रणवो जीवो वेति युक्तम्। प्रणवस्य जीवस्य वा परमात्मोपासनास्थानतया तदधिकरणत्वेन व्यपदेशसम्भवात्। अस्ति हि हृदयादिषु प्रणवं जीवं वा विचिन्त्य तन्मध्यवर्तित्वेन परमात्मोपासनं श्रुत्यन्तरादिसिद्धम्। तथाप्याकाशान्तसकलजगद्धतिस्तयोर-नुपपन्नेति चेत् मैवोपपादि। न ह्यत्र सा श्रुता। किं तु 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च' 'एतस्मिन्खल्वक्षरे गार्ग्याकाश ओतश्चे'ति प्रश्नोत्तरयोराकाशमात्रधृतिः श्रुता। प्रशासनमदृष्टत्वादिविशिष्टद्रष्टृत्वादिकं च प्रणवे स्वतोऽसम्भवदपि परमेश्वराभेदोपचाराव्द्यपदेष्टुं शक्यम्। 'शिवो वा प्रणवो ह्येषः प्रणवो वा शिवः स्मृतः। वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचित्। तस्मादेकाक्षरं देवमाहुरागमपारगाः। वाच्यवाचकयोरैक्यं मन्यमाना मनस्विनः।' इत्यादिपुराणेषु वाच्यवाचकयोः शिवप्रणवयोरभेदोपचारस्य निरूढत्वात्। अथर्वशिरसि च 'य ॐङ्कारः स प्रणवो यः प्रणवः स सर्वव्यापी यः सर्वव्यापी सोऽनन्तो योऽनन्तास्तत्तारं यत्तारं तत्सूक्ष्मं यत्सूक्ष्मं तच्छुल्कं यच्छुल्कं तद्वैद्युतं यद्वैद्युतं तत्परं ब्रह्मेति स एकस्स एको रुद्रस्स ईशानस्स भगवान् स महेश्वरस्स महादेव' इति शिवप्रणवाभेदोपचाराश्रयणेन तदुभयनाम्नामेकनामत्वेन परिगणनपूर्वकमथ कस्मादुच्यतॐङ्कारः यस्मिन्नुच्चार्यमाण एव सर्वं शरीरमूर्ध्वमुन्नामयति तस्मादुच्यत ॐङ्कार' इत्यारभ्य 'अथ कस्मादुच्यते महादेवो यस्सर्वान्भावान्परित्यज्यात्मज्ञानयोगैश्वर्ये महति महीयते तस्मादुच्यते महादेव' इत्यन्तेन तत्तव्द्यवस्थितयोगेनैव निर्वचनात् उपनिषदन्तरेषु च 'ॐङ्कार एवेदं सर्वमोमितीदं सर्व'मित्यादिवाक्यैः प्रणवे शिवाभेदोपचारेण शिवगतसार्वात्म्यव्यपदेशदर्शनाच्च। जीवे तु पर्यायेण

देवमनुष्यादिजन्मवति द्यावापृथिव्यादिशासितृत्वं तत्तदधिकारोपयुक्तजन्मप्राप्त्या पर्यायेणोपपद्यते। अदृष्टत्वाश्रुतत्वश्रवणं चक्षुश्श्रोत्रागोचरे तस्मिन्परमेश्वर इवोपपद्यते। अमतत्वाविज्ञातत्वश्रवणमक्लेशेन परमेश्वरेऽपि नोपपद्यते। कथंचित्तु जीवेऽप्युपपद्यते। द्रष्टृत्वादिश्रवणं तु चाक्षुषादिज्ञानवति जीव एवोपपद्यते। 'यो वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति यजति तप्स्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मण'इत्येतत्सर्वं प्रणवे जीवे च सङ्गच्छते। अधीयानानां कर्माण्यातिष्ठतां ब्राह्मणादीनां प्रणवस्वरूपपरिज्ञानस्य देहातिरिक्तात्मविज्ञानस्य चावश्यकत्वादिति। सिद्धान्तं प्रतिज्ञाय सौत्रं हेतुमुपादायाक्षरे आकाशमात्रधृतिः श्रुता न त्वाकाशान्तसकलधृतिरिति सौत्रहेतोरसिद्धिशङ्कापरिहारोपयोगिपूर्ववाक्यप्रदर्शनपूर्वकं सौत्रं हेतुं व्याचष्टे-**यदूर्ध्वं गार्गीत्यादिना।** अक्षरे आकाशमात्रधृतिर्नोच्यते किं तु प्रागुपक्रान्तस्य भूगोलकादेराकाशान्तस्य सर्वस्य धृतिरुच्यते। न हि 'यदिदं किञ्चिदप्स्वोतं च प्रोतं चे'त्यादिवाक्यानां भूगोलकादिषु पूर्वपूर्वस्योत्तरोत्तरास्मन्नीतप्रोतत्ववर्णने तात्पर्यम्। अधस्स्थितानामन्तरिक्षलोकादीनामुपरितनेषु गन्धर्वलोकादिष्वोतप्रोतत्वस्य दुरुपपादत्वात् पर्वतानां क्षितिधारकत्वस्येव ध्रुवस्य ज्योतिश्चक्रधारकत्वस्येव च यथाकथञ्चित्तस्योपपादनसम्भवेऽप्यत्र प्रकरणे तन्निरूपणस्य निष्फलत्वात् अक्षरस्य भूगोलकाद्याकाशान्तसकलाधारतायां सर्वस्याप्यस्य वाक्यसन्दर्भस्य 'एकं वृणीते द्वौ वृणीते त्रीन्वृणीते न चतुरो वृणीते पञ्च वृणीते न पञ्चातिवृणीते' इति वाक्यसन्दर्भस्य त्र्यार्षेयवरणविधान इव एकत्रैव तात्पर्येणैकवाक्यत्वे सम्भवति वाक्यभेदकल्पनायोगाच्च। गार्गिब्राह्मणे भूगोलकादिब्रह्मलोकान्तानां प्रश्नोत्तरपरम्परया पूर्वपूर्वस्योत्तरोत्तरस्मिन्नोतप्रोतत्ववर्णनानन्तरं 'कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चे'त्यन्ति मप्रश्नस्य तदानीं निवारितस्याक्षरब्राह्मणे पुनः प्रवर्तनायां ब्रह्मलोकाधारमात्रविषयतारीतिं परित्यज्य भूगोलकादिसकलकार्यप्रपञ्चाधारविषयतयैव प्रवर्तनापूर्वकं 'यदूर्ध्वं गार्गि दिव' इत्यादितदुत्तरवाक्ये आकाशस्य सकलकार्यप्रपञ्चाधारत्वेन निर्दिष्टतया 'कस्मिन्नु खल्वाकाश' इत्यादितदनन्तरप्रश्नतदुत्तरवाक्ययोरपि तन्न्यायावतरणाच्चेति भावः। ननु पृथिव्याद्याधारप्रश्नोत्तरपरम्पराया वस्तुतोऽक्षरस्यैव सर्वाधारत्वप्रतिपादने विश्रान्तौ ब्रह्मलोकाधार विषयत्वेन प्राक्प्रवर्तितः प्रश्नः कथं पृथिव्यादिसकलकार्यप्रपञ्चाधारविषयतया पश्चात्प्रवर्तितः। न ह्यस्याः प्रश्नोत्तरपरम्पराया आकाशस्य ब्रह्मलोकान्तसकलकार्याधारत्वप्रतिपादने अक्षरस्याकाशान्त-सकलकार्याधारत्वप्रतिपादने च तात्पर्यं वक्तुं शक्यम्। वाक्यभेदापत्तेः। न चाक्षरं परमेश्वरं साधयतस्सिद्धान्तिनः तदाधेय आकाशे ततोऽन्यत्वेन समर्थनीये सकलकार्याधारत्वं सम्भवति परमेश्वरस्यैव तथात्वादिति चेदुच्यते। आकाशोऽत्र न भूताकाशः किं तु चिदम्बररूपा पारमेश्वरी

शक्तिः। तस्यास्सर्वोपादानभूतायाः सर्वाधारत्वमस्त्येव 'आकाशो ह्येवैभ्यो ज्यायानाकाशः परायण'मित्यादिश्रुत्यन्तरसिद्धम्। यद्यप्यत्र चरमनिर्देश्यस्याक्षरस्य सर्वाधारत्वप्रतिपादनैकपरतयेयं प्रश्नपरम्परा प्रवर्तिता तथापि तत्सर्वाधारत्वं ब्रह्मलोकाधारे समापितनिति याज्ञवल्क्यस्य भ्रान्त्युत्पादनेन तस्याप्याधारान्तरप्रश्ने निरुत्तरतया तस्याधारान्तरं नास्तीति वचनेन वा पराजितो भवत्वित्यभिसन्धाय तत्र प्राङ्निर्दिष्टपृथिव्यादिसर्वाधारत्वब्रह्मलोकाधारप्रश्ने पुनः क्रियमाणे गार्ग्याशयविद्याज्ञवल्क्यस्तु तस्या दुराशयमवगत्य द्वितीयप्रश्नोत्तरे वक्तव्यतया परमेश्वरं निर्दिश्य परमाकाशं तदाधारमवोचत्। ततः परमाकाशोऽपि स्वेन सह स्वाधेयसकलकार्यधारणसमर्थे परमशिवे परब्रह्मणि सत्येव सकलकार्याधारो भवति यथा वह्निः स्वेन सह स्वाधेयसकलहविर्धारणसमर्थे वेदिरूपे स्थले सत्येव स्वयं सकलहविराधारो भवतीति मत्वा यदाश्रयणबलेनायमाकाशः सकलकार्याधारो भवति तथाभूतस्तस्याधारः क इति गूढभावेन 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चे' ति गार्ग्या पृष्टे याज्ञवल्क्येनाक्षरमाकाशान्तसकलधारकमित्यभिप्रायेणै 'तद्वै तदक्षर' मित्याद्युक्तं न त्वाकाशमात्रधारकमित्यभिप्रायेण। आकाशस्य सकलकार्याधारत्ववचन-पूर्वकमक्षरस्याकाशाधारत्ववचनस्याक्षरस्याकाशान्तसकलधारकत्वप्रतिपादने 'जलपूर्णः कुम्भ' इत्युक्तिपूर्वकस्य 'तमयं वहती' ति वक्यस्य जलसहितकुम्भवोढत्वप्रतिपादन इव तात्पर्यावसायात्। न चैवं सति वाक्यभेददोषावकाशः। जलादिषु पृथिव्यादिधारकत्ववचनानामिवाकाशे सकलकार्य-धारकत्ववचनस्यापि अक्षरस्याकाशान्तसकलकार्यधारकत्वप्रतिपादनार्थतया तदेकवाक्यत्वेन तस्य स्वातन्त्र्याभावात्। ननु भवेदेवमेतत्सर्वं यद्यत्राकाशः परमेश्वरो न स्यात्। स तु परमेश्वर एवेत्यभ्युपगन्तव्यम्। 'अनतिप्रश्नां वै देवतामतिपृच्छसी'ति याज्ञवल्क्यवचनानुसारात्। अतः परमेश्वरादन्यदक्षरमिति तस्य परमेश्वरस्योतप्रोतत्वव्यपदेशस्तस्य परमेश्वरोपासनास्था-नत्वाभिप्रायेणौपचारिको नेतव्य इत्याशङ्क्याह-**कथमेतदिति**। इह श्रुतमाकाशधृतिमात्रमौप-चारिकतया नेतुं शक्यम्। आकाशधृतिश्रवणस्याकाशगतसकलकार्याधारत्वोक्तिपूर्वकत्वसामर्थ्यात् सिद्ध्यन्त्याकाशान्तसकलधृतिस्तु परमेश्वरादन्यत्र योजयितुं न शक्यते। सामर्थ्ये शब्द इवोपचारासम्भवात्। उदाहृतयाज्ञवल्क्यप्रतिवचनं तु ब्रह्मलोकाधारप्रश्नस्य परमेश्वराविषयत्वेऽपि ब्रह्मलोकाधार आकाश इति प्रतिवचने सति तदनन्तरमाकाशाधारविषयः प्रश्नस्तद्विषयो भविष्यतीति दूरदृष्टिमता याज्ञवल्क्येन पूर्वप्रश्नस्यैव निवारणं कृतमित्येतदभिप्रायं चिदम्बरशक्तेरतिरहस्य-देवतात्वाभिप्रायं चोपपद्यते। तस्मादक्षरं परमेश्वरस्तदाधारक आकाशश्चिदम्बरमित्येव युक्तमिति भावः॥ नन्वस्त्वाकाशश्चिदम्बरम्। अक्षरं तु जीव इत्यपि सम्भवति। यथा वा 'अरा नाभौ समर्पिता एवमस्मिन्प्राणे सर्वं समर्पित' मिति भूमविद्यागतवचनबलाज्जीवस्यापि देशकालवत्सर्वाधारत्वोप-

पत्तेरित्याशङ्कानिराकरणार्थं सूत्रम्। सू०।। **सा च प्रशासनात्**।।१०।। **साच धृतिरिति।** नन्वम्बरान्तधृतिः प्रशासनाधीना न श्रूयते किं तु सूर्यादिकतिपयधृतिरिति चेत्सत्यम्। तच्छ्रवणमेव स्थालीपुलाकन्यायेन सकलजगद्धृतेरपि तदधीनत्वं प्रत्याययिष्यति। यथा हि लोके स्थाल्यां तुल्यपाकानां पुलाकानामेकम्रदिम्नान्येषामपि सिद्धता ज्ञाप्यते तुल्यो हेतुरस्य चान्येषां च सिद्धत्वस्य ज्ञापक इति एवमिहापि सूर्यादिधृतेरक्षरप्रशासनाधीनत्वं प्रदर्श्यान्येषां धृतेरपि तथैव तदधीनत्वमिति श्रुत्या प्रत्याय्यते तुल्यः प्रकृष्टशासनरूपः सर्वत्राप्रतिहतो हेतुरिति। 'न द्वितीयाय तस्थ' इति तैत्तिरीयश्रुतिपाठः। तत्राविशेषणस्य परमेश्वरस्य द्वितीयाभावश्रवणेऽपि 'य इमाँल्लोकानीशत ईशिनीभि'रिति श्वेताश्वतरे 'य इमाँल्लोकानीशत ईशनीयु'रित्यथर्वशिरसि च तद्वाक्यशेषश्रवणात्तदनुसारेण जगच्छासनविषयमेव तद्द्वितीयाभाववचनम्। तथा च जगतो यथाकथञ्चिदनेकाधारत्वकल्पनसम्भवेऽप्यनेकशासितृत्वकल्पनं न सम्भवतीति भावः।। ननु द्रष्टृत्वादिकं जीव एव सम्भवति न परमेश्वर इत्याशङ्कानिराकरणार्थं सूत्रम्।। **अन्यभावव्यावृत्तेश्च**।।११।। **अदृष्टत्वादिविशेषितद्रष्टृत्वाद्यसम्भवादिति**।। अयमाशयः। 'अविज्ञातं विज्ञात्रि'त्येतदनन्तदं 'नान्यदतोऽस्ति दृष्टृ नान्यदतोऽस्ति श्रोतृ नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ' इति श्रूयते। तस्य सर्वथा द्रष्टन्तरनिषेधपरत्वं वक्तुमयुक्तम्। द्रष्टृबहुत्वस्यानेकप्रमाणसिद्धत्वात् किं तु पूर्वोक्तं द्रष्टृ यावद्गुणविशिष्टतया प्रकृतं तावद्गुणैस्तत्सदृशं द्रष्ट्रन्तरं नास्तीत्येवंपरं वाच्यम्। दृश्यते हि बहुविद्वद्युते ग्रामे चैत्रस्य बहुशास्त्रवेदितृत्वादिगुणानभिधायास्मिन्ग्रामे चैत्र एव विद्वानिति वचनस्य प्रागुक्तैर्गुणैश्चैत्रसमो विद्वान्नास्तीत्येवंपरत्वम्। तथा च 'नान्यदतोऽस्ति द्रष्टृ'त्यादेः प्रागुक्तैः सर्वाधारत्वसर्वप्रशासितृत्वादिगुणैः प्रकृतस्य द्रष्टुः सदृशं द्रष्टृ नास्तीत्येवमाद्यर्थपरत्वस्थितौ तस्य परमेश्वरविषयत्वमवश्यंभावीति तत्रत्याः द्रष्ट्रादिशब्दाः परमेश्वरे चाक्षुषश्रावणमन्तव्याध्यवसेय-विषयसाक्षात्कर्तृपरत्वेन सङ्गमयितव्याः। तथा च पूर्ववाक्यगतानामपि द्रष्ट्रादिशब्दानां स एवार्थस्सिद्ध्यतीति पूर्ववाक्यसन्दर्भस्यायमर्थः पर्यवस्यति। अदृष्टं जीववर्गस्य रूपदर्शनदशायां तदात्मवत्तं प्रत्यभासमानमेव सत् द्रष्टृ तद्दर्शनविषयरूपसाक्षात्कर्तृ अश्रुतं शब्दश्रवणदशायां तं प्रत्यभासमानमेव सत् श्रवणविषयशब्दसाक्षात्कर्तृ। अमतं तस्य स्थाणुपुरुषादिविचारदशायां तं प्रत्यभासमानमेव सत् तद्विचारविषयवस्तुसाक्षात्कर्तृ। अविज्ञातं तस्य स्थाण्वाद्यध्यवसायदशायां तं प्रत्यभासमानमेव सत् ब्रह्म विज्ञातृ तदध्यवसायविषयसाक्षात्कर्त्रिति। एवं जीववर्गव्यावर्तकार्थ-वर्णनायामेव प्रकृताक्षरसदृशद्रष्ट्रन्तरादिनिषेधपूर्वोत्तरवाक्यसन्दर्भानुगुण्यं लभ्यते। तस्माददृष्टत्वादि-विशेषितद्रष्टृत्वादिकं जीववर्गे न सम्भवतीत्यधिकरणार्थमुपसंहरति-**अत इति।** अत्र

सर्वप्रशासितृत्वादीनामस्पष्टानां ब्रह्मलिङ्गानां पूर्वपक्षदशायामक्षरधर्मत्वे बाधकोपन्यासात्तत्सान्निध्याम्नाताकाशधर्माणामेव सतामौपचारिकोऽक्षरान्वय इति स्पष्टास्पष्टब्रह्मलिङ्गता।।

।। इति अक्षराधिकरणम्।।

पूर्वाधिकरणेन सङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति-**प्रत्यक्षादीति**। पूर्वाधिकरणविषयवाक्ये, 'अदृष्टमश्रुत'मित्यादिना जीववर्गस्य चक्षुःश्रोत्रान्तःकरणव्यापारदशासु परमेश्वरस्यानवभासमानतोक्तया तस्य प्रत्यक्षादिप्रमाणातीतत्वं लब्धम्। तथाभूतस्य तस्य साक्षात्कारः कथं फलत्वेनोच्यत इत्याशङ्कानिराकरणार्थं बाह्यान्तरिन्द्रियजन्यप्रत्यक्षाविषयोऽपि परमेश्वरः कृपावशादुपासकानां स्वरूपावरणमपनीय स्वरूपज्ञानात्मकसाक्षात्कारविषयो भवतीति प्रदशयितुमुत्तराधिकरणमारभ्यत इत्यर्थः।।सू०।। **ईक्षतिकर्मव्यपदेशात्सः**।।१२।। प्रश्नोपनिषदि 'स यो हवैतद्भगवन्मनुष्येषु प्रायणान्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयती'ति पिप्पलादं प्रति सत्यकामप्रश्ने 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेती'ति तत्प्रतिवचनमुपक्रम्य 'स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवत्यथ यो द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकं स सोमलोके विभूतिमनुभूय पुनरावर्तत' इत्येकमात्रमोङ्कारमुपासीनस्य तत्प्रथममात्रात्मकऋक्प्रापणीयमनुष्यलोकप्राप्तिफलं द्विमात्रं तमुपासीनस्य तद्द्वितीयमात्रात्मकयजुः प्रापणीयान्तरिक्षलोकप्राप्तिफलं चाभिधायेदमाम्नायते। 'यः पुनरेत'मित्यादि। अत्र ध्यातव्यः परमपुरुष एव ईक्षणीयः फलफलिनोरीक्षणध्यानयोरेकविषयत्वनियमात्। 'परं पुरुष' मित्यत्र परत्वावधित्वेन विवक्षितस्यापि केभ्यश्चित्परत्वसम्भवेन 'परात्परं पुरिशयं पुरुष' मिति निर्देशस्य ततो भेदावहत्वाभावात् इति स्थिते यो ध्यातुरीक्षणविषयः पुरुषः तत्र त्रेधा संशयं दर्शयति-**अत्रेति**। 'अन्यो वे'त्यनेन हिरण्यगर्भो नारायणो वेति कोटिद्वयमपि सङ्गृहीतम्। अस्मिन्सन्देहवाक्ये 'अत्रे'त्यनेन परमेश्वर इति कोटेर्बीजं सूचितम्। यस्योपक्रमे 'एतद्वै सत्यकामे'त्यादिना परब्रह्मणः परमेश्वरस्योपासनाया विधित्सावगतात्रेत्यर्थः। 'ईक्षतिकर्मत्वेन श्रूयमाण' इत्यनेन 'तदन्यो वे'ति कोटेर्बीजं सूचितम्। पूर्वत्र 'ह्यदृष्टं द्रष्टृ'त्यादिना परमेश्वरस्य प्रत्यक्षाविषयत्वमुक्तम्। अत ईक्षतिकर्मत्वश्रवणं परमेश्वरादन्यत्रैव सम्भवतीति भावः। **नासौ परमेश्वरः इति**। ईक्षतिकर्मत्वश्रवणादेवेति भावः। कस्तर्हीत्याकाङ्क्षायां प्रथमपूर्वपक्षमाह- **हिरण्यगर्भ इति। तल्लोकप्राप्तिश्रवणादिति।** भूलोकान्तरिक्षलोकरूपप्राकृतलोकप्रायपाठादत्र ब्रह्मलोकशब्दः कार्यब्रह्मलोकपर इति भावः। ननु हिरण्यगर्भे जीवघनात्परात्परमित्येतदनुपपन्नम्। जीवसङ्घातवाची हि जीवघनशब्दः। 'घनाः कठिन-

सङ्घातमेघकाठिन्यमुद्गरा' इत्यभिधानकोशस्मृतेषु घनशब्दार्थेषु सङ्घातस्यैवात्रान्वययोग्यत्वात्। एवं चात्र यदि जीवघनः जीवसमष्टिरूपो हिरण्यगर्भः तदा तस्यैव तस्मात्परत्वमनुपपन्नम्। यदि व्यष्टिसमष्टिसाधारण्येन जीवसमूहः तथापि समूहान्तर्गतस्य तस्मात्परत्वमनुपपन्नम्। यदि व्यष्टिसमूह एव तथापि तस्माद्यः परः ततः परत्वं हिरण्यगर्भस्यानुपपन्नमित्याशङ्क्याह-**परशब्दस्येति।** जीवघनोऽत्र जीवसमूहः। स एतस्मादिति विशेष्यमाणः परिदृश्यमानो व्यष्टिसमूह एव भवति। पञ्चम्यौ समानाधिकरणे। तथा च प्रकृत्यादिभ्यः पराद्व्यष्टिजीववर्गात्परत्वं मुख्यजीवेऽपि हिरण्यगर्भे सम्भवतीति न किञ्चिदत्रानुपपन्नमित्याशयः। **पुरुषशब्दवाच्यत्वादिति।** 'यथा शङ्करशब्दोऽयं महादेवेऽवतिष्ठते। तथा पुरुषशब्दोऽपि वासुदेवेऽवतिष्ठत' इत्यादिषु पुरुषशब्दस्यासाधारण्येनापि नारायणे शक्तिस्मरणादिति भावः। **जीवघनात्पराद्धिरण्यगर्भादिति।** यदि जीवघनो व्यष्टिजीववर्गस्तदा व्यधिकरणे पञ्चम्यौ। यदि समष्टिजीवस्तदा समानाधिकरणे इत्युभयथापि हिरण्यगर्भात्परत्वं वाक्यार्थ इति स नारायणे समुपपद्यत इति भावः। प्रणववाच्यत्वप्रसिद्धेरिति। प्रपञ्चसारादिष्विति शेषः। **प्रत्यभिज्ञानाच्चेति।** अयमाशयः। 'यत्तत्कवयो वेदयन्त' इत्यत्र' तद्विष्णो 'रिति मत्रश्रुतविष्णुपदसाधारणविद्वदनुभवत्वविषयत्वप्रत्यभिज्ञानादिह ब्रह्मलोको विष्णुपदमेवेति तत्रेक्षणविषयः तदर्थं ध्यातव्यश्च पुरुषो विष्णुरेव। न चैवं सति परब्रह्मोपासनाविधित्सयोपक्रमस्य कश्चिद्विरोधः। अस्मिन्नेव श्लोके 'तमोङ्कारेणान्वेती' त्योङ्कारेण विष्णूपासनया तत्पदप्राप्तिमभिधाय 'यत्तच्छान्त' मित्यादिनोङ्कारेणैव शान्तत्वादिविशिष्टं शिवमपि प्राप्नोतीति वचनादोङ्कारेण शिवोपासनस्यापि विधिसिद्धेः। एवं च शान्तत्वादिब्रह्मलिङ्गैरुपसंहारस्यापि न विरोधः। प्रत्युत सिद्धान्तिन एवोपक्रमोपसंहारविरोधः। उपक्रमे परब्रह्मोपासनावदपरब्रह्मोपासनापि तल्लोकप्राप्तिफलोपक्षिप्ता। न च 'यः पुनरेत' मित्यादेः परब्रह्मोपासनाविषयत्वे ततोऽन्यत्र क्वचिदपरब्रह्मोपासनाविधानं कृतमिति प्रदर्शयितुं शक्यम्। न चौपसंहारिकश्लोकस्य प्रागुक्तोपासनाफलोपसंहारमात्रपरत्वे 'यत्तच्छान्तमजरममृतमभयं परं चे' ति प्राप्यान्तरसमुच्चयार्थश्चकारो युज्यते। तस्माच्छान्तत्वादिविशिष्ट एव परमेश्वरः। ईक्षतिविषयस्तु तदन्यश्चतुर्मुखो नारायणो वेति। सूत्रे 'स' इति निर्देशो यस्य परमेश्वरस्योपासन' मेतद्वै सत्यकाम परं चापरं चे' त्युपक्रमविधित्सितवयोक्तं स एव ध्यानेक्षणवाक्ययोः परशब्देन प्रतयभिज्ञाप्यत इति प्रत्यभिज्ञासूचनायेत्यभिप्रत्याह-**ईक्षतिविषयस्स परमेश्वर इति।** न चेक्षणवाक्ये 'परात्पर' मिति निर्देशान्नास्त्युपक्रमगतपरब्रह्मप्रत्यभिज्ञेति वांच्यम्। 'परं चापरं च ब्रह्म' त्युपक्रमे अपरब्रह्मणः सन्निहितनिर्दिष्टतया तस्यैव परभावाक्षेपितत्प्रतियोगितयान्वयात्। ईक्षणवाक्येऽपि तस्मादपरब्रह्मण एवेक्षतिकर्मणः परत्वप्रतिपादनात्। ननु परशब्दप्रत्यभिज्ञानुसरणे परब्रह्मोपासनया सह विधित्सित-तयोपक्रान्ता क्वचिदप्यपरब्रह्मोपासना न विहिता स्यादिति चेन्माभूत् । सर्वस्याप्यस्य प्रकरणस्य

त्रिमात्रोङ्कारपरब्रह्मोपासनाविध्यर्थत्वात्। ॐङ्कारस्येदृशो महिमा यदनेनापरब्रह्मोपासनापि तत्प्राप्तिफला मात्रावैगुण्येनापि मनुष्यलोकान्तरिक्षलोकप्राप्तिफला। तस्मादेवंभूतमहिमशालिनोङ्कारेण मात्रावैगुण्यरहितेन हेयमल्पफलमपरं ब्रह्म विहाय परमेव ब्रह्मोपासनीयमिति। एवमेकवाक्यत्वसम्भवे वाक्यभेदकल्पनायोगात्। तस्मादेकवाक्यतासाकाङ्क्षपरब्रह्मप्रकरणानुगृहीतपरश्रुतिप्रत्यभिज्ञा-बलादीक्षतिविषयः परमेश्वर एवेति भावः। व्यपदेशादिति सौत्रं हेतुं व्याचष्टे-**उत्तरत्रेति।** शान्तत्वादिकं प्रकृतध्यानेक्षणकर्मणोऽन्यत्रोपासनान्तरविषयेऽन्वेतीति वक्तुमयुक्तम्। वाक्यभेदप्रसङ्गेनात्रोपासनान्तरविध्यनङ्गीकारात्। 'अमृतमभयं परं चे'ति चकारस्येक्षतिकर्मण्येव शान्तत्वादिगुणसमुच्चयार्थत्वोपपत्तेरिति भावः। **न हि हिरण्यगर्भ इति।** शान्तत्वं निरस्तसकलसांसारिकदोषकलङ्कत्वममृतत्वमनादिमुक्तत्वमभयत्वमभयहेतुत्वम्। स्वयं भयराहित्यस्य शान्तत्वविशेषणेनैव सिद्धेः। अभयशब्दात्तत्करोतिण्यन्तात्पचाद्यचि अभयशब्दस्याभय-हेतुपरत्वोपपत्तेः। परत्वं सर्वोत्कृष्टत्वम्। एतत्सर्वं हिरण्यगर्भे न सम्भवतीत्यर्थः। प्राकृतलोकप्रायपाठात् ब्रह्मलोकशब्दः कार्यब्रह्मलोकपर इति पूर्वपक्षहेतुं विघटयति-**ब्रह्मलोकमिति।** परश्रुतिप्रत्यभिज्ञालिङ्गप्रकरणैः प्रायपाठस्य बाध इति भावः। इतश्च न हिरण्यगर्भ इत्याह-**जीवघन इति।** एतस्मादित्ययं सर्वनामशब्दः 'परं चापरं च ब्रह्मे'त्यत्र प्रकृतपरमेश्वरगतपरत्वावधित्वेन तत्रैव निर्ज्ञातं हिरण्यगर्भं परामृशतीति तत्सामानाधिकरण्यात् जीवघनशब्दोऽपि तद्विषय इति भावः। नारायणपक्षे शान्तत्वाजरत्वसम्भवेऽप्यमृताभयपरशब्दोक्तानि नित्यमुक्तत्वसंसारमोचकत्व-विश्वाधिकत्वानि नोपपद्यन्त इत्याह-**अमृतमभयमिति।** नित्यमुक्तत्वमिह न नित्यमेव सांसारिकसकलदोषनिर्मुक्तत्वम्। शान्तविशेषणेन तल्लाभात्। किं तु सर्वकालं निरतिशयानन्दभोक्तृत्वम्। तत्परमेश्वरधर्मस्य परमाकाशशब्दितस्य निरतिशयानन्दस्यावस्थाविशेषरूपे नारायणे न सम्भवतीति भावः। इतश्च नारायणो नेक्षतिविषय इत्याहकथञ्चैतदिति। 'जीवघनात्परा' दिति पञ्चम्योर्वैयधिकरण्यमेव युक्तम्। अधिकार्थलाभादिति भावः। ननु तयोर्वैयधिकरण्येऽपि हिरण्यगर्भात्पर ईक्षतिकर्मगतपरत्वावधिभूतो नारायण इति कुतोऽवसीयते येनेक्षतिकर्म नारायणो न स्यादित्याशङ्क्याह-**नारायणपरमिति।** तैत्तिरीये दहरविद्याया 'मणोरणीया' नित्यनुवाके 'यो देवाना' मिति मन्त्रेण शिवस्य हिरण्यगर्भादधिकत्वे सिद्धेऽपि तदनन्तरानुवाके 'नारायणपरं ब्रह्मे' ति नारायणाद्ब्रह्मणः परत्वमुक्तम्। तत्किं नारायणात्परं ब्रह्मेत्याकाङ्क्षायाम् 'ऋतं सत्य' मिति तदनन्तरानुवाके शिव एव नारायणात्परं ब्रह्मेति प्रदर्शितम्। तेन हिरण्यगर्भात्परो नारायणस्ततः परशिव इति सिद्धम् स्पष्टं चैतच्छिवसङ्कल्पोपनिषदि 'परात्परतरं ब्रह्मे' ति मन्त्रे। अतस्तदर्थप्रत्यभिज्ञानादिह हिरण्यगर्भात्परो नारायण एवेति भावः। तस्मादिहेक्षतिविषयो न हिरण्यगर्भो नापि नारायणः किं तु उदाहृतदहरविद्यायां यदनेकमङ्गलगुणविशिष्टं दिव्याद्भुतरूपं च ब्रह्म वर्णितं

तदेवेति तत्रत्युगुणरूपविवरणपूर्वकमुपसंहरति-**तस्मादिति।** 'पुरि दहरपुण्डरीक' इत्यादिकं शारीराधिकरणे विवृतम्। **प्रणववर्णव्यत्यासरूपेति।** अयमर्थो लिङ्गपुराणे शिवेनाम्बिकायै वर्णित:। 'त्वदीय: प्रणव: कश्चिन्मदीय: प्रणवस्तथा। त्वदीयो देवि मन्त्राणां शक्तिभूतो न संशय:। अकारोकारमकारा मदीये प्रणवे स्थिता:। उकारं च मकारं च अकारं च क्रमेण तु। त्वदीयं प्रणवं विद्धि त्रिमात्रं लुप्तमुत्तम'मिति। **व्यपदिश्यत इति युक्तमिति।** नन्विह दहरविद्योपवर्णितस्थानगुणरूपविशिष्टमेव ब्रह्मेक्षतिकर्मत्वेन व्यपदिश्यत इति कुतस्सिद्ध्यति। पुरिशयमिति विशेषणात्। ननु 'स सामभिरुन्नीयते ब्रह्मलोक'मिति 'स एतस्माज्जीवघना'दिति ब्रह्मलोकं प्राप्तस्य 'स' इति सर्वनाम्ना परामर्शात् पर्यङ्कविद्यादिवर्णितपरमाकाशरूपब्रह्मलोक-स्थानतदुचितरूपगुणविशिष्टं ब्रह्मेक्षणीयमिति कुतो न सिद्ध्यति। वाक्यवैयर्थ्यप्रसङ्गान्न सिद्ध्यति। तल्लोकं प्राप्तस्तं पश्यतीत्यर्थत: सिद्ध्यन्नर्थोहि 'स एतस्मा'दिति वाक्यं नापेक्षते। कथं तर्हि तदवैयर्थ्यम्। 'परं पुरुषमभिध्यायीते'त्येतदनन्तरं तद्योजनया। तथा सति ध्यानस्य परब्रह्मलोकप्रापकत्वे द्वारतया तत्साक्षात्कार: प्रदर्शितो भवति। ध्यानद्वारभूतस्तत्साक्षात्कारश्च 'आप्रायणात्तत्रापि हि दृष्ट'मि (ब्र० ४.१.१२. सू०) त्यधिकरणभाष्ये दर्शित:। हृदयपुण्डरीक एव भवतीति पुरिशयमिति विशेषणमपि युज्यते। तस्मात्पाठक्रमादर्थक्रमस्य बलीयस्त्वात् 'स एतस्मादिति वाक्यस्य प्रागेवान्वयमभिप्रेत्य दहरविद्योपवर्णितविशेषणानामीक्षतिकर्मणि संयोजनं युक्तमेव। अथ ब्रह्मलोकशब्दोक्ते शिवपदे तद्विष्णोरिति मन्त्रार्थप्रत्यभिज्ञाया अविरोधमुपपादयति-**यदुक्तमित्यादिना।** नन्वविरोधार्थं 'तद्विष्णो' रिति मन्त्रस्य शिवदविषयत्वमेव वक्तुं युक्तं न तु शिवविषयत्वम्। तस्य शिवविषयत्वोपपादनमपि दुष्करम्। न हि प्रपञ्चाकारेणावस्थितस्य विष्णो: शिवपदं स्वरूपं किं तु शिवशक्तिस्वरूप: परमानन्द:। तथैव भाष्ये प्रकृत्यधिकरणादिष्वपि प्रतिपादितम्। तस्य शिवपदत्वोपपादनं तु सुकरम्। तद्विष्णो: परमं रूपं य: परमानन्द: स एव परमाकाशरूप: शिवपदतयापि वर्तत इति। एवमेव 'सोऽध्वन: पारमाप्नोति तद्विष्णो: परमं पद' मिति कठवल्लीमन्त्रस्य शिवपदविषयत्वोपपादनं कृतं 'कार्यं बादरिरस्य गत्युपपत्ते' रित्य (ब्र० ४.३.६. सू०) धिकरण इति चेत्सत्यम्। इहापि स एवाभिप्राय:। 'तदेव शिवाभिधं ब्रह्मे' त्यादि तु शिवशक्तयोरभेदोपचारेण प्रवृत्तमिति न दोष:। दर्शितो हि प्रागा 'नन्दो ब्रह्मे त्यादि' तु शिवशक्तयोरभेदोपचारेण प्रवृत्तमिति न दोष:। दर्शितो हि प्रागा 'नन्दो ब्रह्मे त्यादि' श्रुतिषु 'आनन्दमयोऽभ्यासात्' (ब्र० १.१.१३. सू०) 'आकाशस्तलिङ्गा'दि (ब्र० १.१.२३. सू०) त्यादिसूत्रेषु च शिवशक्त्योरभेदोपचार:।। ।। **इतीक्षतिकर्माधिकरणम्**।।४।।

इति शिवार्कमणि अक्षराधिकरणम् समाप्तम्

अथ ईक्षतिकर्माधिकरणम्। ॥ सू० १३॥

शाङ्करभाष्यम्

***ईक्षतिकर्मव्यपदेशात्सः*॥१३॥**

"एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार स्तस्माद्विद्वावायत ने नैकतरमन्वेति" इति प्रकृत्य श्रूयते–"यः पुनरेतं त्रिमात्रेणौमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत" (प्र० ५/२/५) इति।

किमस्मिन्वाक्ये परं ब्रह्माभिध्यातव्यमुपदिश्यते, अहोस्विदपरमिति। एतेनैवायतनेन परमपरं चैकतरमन्वेतीति प्रकृतत्वात्संशयः॥

तत्रापरमिदं ब्रह्मेति प्राप्तम्। कस्मात्? "स तेजसि सूर्ये सम्पन्नः" "स सामभिरुन्नीयते ब्रह्मलोकम्" इति च तद्विदो देशपरिच्छिन्नस्य फलस्योच्यमानत्वात्। नहि परब्रह्मविद्देशपरिच्छिन्नं फलमश्नुवीतेति युक्तम्; सर्वगतत्वात्परस्य ब्रह्मणः। नन्वपरब्रह्मपरिग्रहे परं पुरुषमिति विशेषणं नोपपद्यते? नैष दोषः ; पिण्डापेक्षया प्राणस्य परत्वोपपत्तेः॥

इत्येवं प्राप्तेऽभिधीयते–परमेव ब्रह्मेहाभिध्यातव्यमुपदिश्यते। कस्मात्? *ईक्षतिकर्मव्यपदेशात्*॥ ईक्षतिर्दर्शनम्। दर्शनव्याप्यमीक्षतिकर्म। ईक्षतिकर्मत्वेनास्याभिध्यातव्यस्य पुरुषस्य वाक्यशेषे व्यपदेशो भवति–"स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते" इति। तत्राभिध्यायतेरतथाभूतमपि वस्तु कर्म भवति; मनोरथकल्पितस्याप्यभिध्यायतिकर्मत्वात्। ईक्षतेस्तु तथाभूतमेव वस्तु लोके कर्म दृष्टमित्यतः परमात्मैवायं सम्यग्दर्शनविषयभूत ईक्षतिकर्मत्वेन व्यपदिष्ट इति गम्यते। स एव चेह परपुरुषशब्दाभ्यामभिध्यातव्यः प्रत्यभिज्ञायते॥ नन्वभिध्याने परः पुरुष उक्तः, ईक्षणे तु परात्परः, कथमितर इतरत्र प्रत्यभिज्ञायते–इति? अत्रोच्यते–परपुरुषशब्दौ तावदुभयत्र साधारणौ। नचात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः पुरुषः परामृश्यते, येन तस्मात्परात्परतरोऽयमीक्षितव्यः पुरुषोऽन्यः स्यात्। कस्तर्हि जीवघन इति? उच्यते; घनो मूर्तिः। जीवलक्षणो घनो जीवघनः। सैन्धवखिल्यवद् परमात्मनो जीवरूपः खिल्यभाव उपाधिकृतः विषयेन्द्रियेस्यः परश्च सोऽत्र जीवघन इति॥

अपर आह–"स सामभिरुन्नीयते ब्रह्मलोकम्" इत्यतीतानन्तरवाक्यनिर्दिष्टो यो ब्रह्मलोकः, परश्च लोकान्तरेभ्यः, सोऽत्र जीवघन इत्युच्यते। जीवानां हि सर्वेषां करणपरिवृतानां सर्वकरणात्मनि हिरण्यगर्भे ब्रह्मलोकनिवासिनि सङ्घातोपपत्तेर्भवति ब्रह्मलोको जीवघनः। तस्मात्परो यः परमात्मेक्षणकर्मभूतः स एवाभिध्यानेऽपि कर्मभूत इति गम्यते। परं पुरुषमिति च विशेषणं परमात्मपरिग्रह एवावकल्पते। परो हि पुरुषः परमात्मैव भवति, यस्मात्परं किञ्चिदन्यन्नास्ति; "पुरुषान्न परं किंचित् काष्ठा सा परा गतिरि" ति च श्रुत्यन्तरात्। "परं चापरं च ब्रह्म यदोङ्कारं" इति विभज्य अनन्तरमोङ्कारेण परं पुरुषमभिध्यातव्यं ब्रुवन्परमेव ब्रह्म परं पुरुषं गमयति। "यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुच्यते" इति पाप्मविनिर्मोकफलवचनं परमात्मानमिहाभिध्यातव्यं सूचयति।। अथ यदुक्तम्–परमात्माभिध्यायिनो न देशपरिच्छिन्नफलं युज्यत–इति, अत्रोच्यते–त्रिमात्रेणोकारेणालम्बनेन परमात्मानमभिध्यायतः फलं ब्रह्मलोकप्राप्तिः, क्रमेण च सम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमेतद्भविष्यतीत्यदोषः।।१३।।

इति शाङ्करभाष्यम् ईक्षतिकर्माधिकरणम् समाप्तम्

वार्तिकम्

ईक्षतिकर्मव्यपदेशात्सः।।१३।। पूर्वाधिकरणे निरस्यतयोङ्कारस्योपात्तत्वात् प्रसङ्गात् तदालम्बनविषये चिन्ता प्रवर्तते। "एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वाने तेनैवायतनेनैकतरमन्वेती" त्युपक्रम्य श्रूयते–"यः पुनरेतं त्रिमात्रेणौमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीते" ति।।

किमस्मिन् वाक्ये ध्येयतया परं ब्रह्म निर्दिश्यते, किं वाऽपरं ब्रह्मेति भवति संशयः। तत्र 'परमि' ति पुरुषविशेषणात् कुतस्तस्यापरत्वसंशयः स्यात्? तत्र वदन्ति–एतेनैवायतनेन परमपरं चैकतरमन्वेतीति प्रकृतत्वात् संशयः–इति, नैतद् युक्तम्; साधारणस्याप्युपक्रमस्यैतद्विशेषणबलेनैव विशेषरत्वावधारणात्। "परं चापरं च ब्रह्म यदोङ्कारं" इति विभज्यानन्तरमोङ्कारेण परं पुरुषमभिध्यातव्यं वदत् परमेव ब्रह्म परं परुषं गमयति। तस्मादसदेतत्–यत्–एतेनैवायतनेन परमपरं चैकतरमन्वेतीत्युपक्रमबलात् संशयः– इति, अत्रोच्यते; भवेदेतदेवम्, यदि "परं पुरुषमभिध्यायीते" त्यत्र परशब्दोऽसन्दिग्धार्थः स्यात्। न चैतदस्ति; किमयं परशब्दः स्थूलदेहात् परत्वमभिधत्ते, किं वा स्थूलसूक्ष्मोभयदेहादिति संशयसंभवात्। यद्याद्यः, किमयं परशब्दः स्थूलदेहात् परत्वमभिधत्ते, किं वा स्थूलसूक्ष्मोभयदेहादिति संशयसंभवात्। यद्याद्यः, तदा सूक्ष्मशरीरात्मकस्यापरब्रह्मणोऽपि स्थूलदेहात् परत्वमस्तीति तस्यैव ध्यायतिकर्मत्वम्; अथ द्वितीयः, तदा परब्रह्मण इति। अयं च संशय उभयस्मिन् ब्रह्मण्युपक्रमाद् भवति, इति युक्तमुक्तम्– *परमपरं चैकतरमन्वेतीति प्रकृतत्वात् संशय इति*।। न तूपक्रमेऽपरत्वेनैव सगुणब्रह्मणो निर्देशात् परत्वेन निर्गुणस्य; परत्वेन निर्देशेऽप्युपसंहारे परात् परत्वेनोपसंहृतत्वात् "स एतस्मात् जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" इति। ननु–एवं तर्हि एतदेव वाक्यं संशयकारणमिति प्रदर्शनीयम्, नोपक्रमवाक्यमिति–चेत्, सत्यम्; तथाप्युपक्रमवाक्यानुसारेणैव तदर्थनिर्णयाद् उपक्रमवाक्यमेव संशयकारणत्वेनोदाहृतमिति न काचिदनुपपत्तिः–तदपि वाक्यमुपक्रमानुसारेण सगुणपरतया पूर्वपक्षिणा व्याख्यातव्यमिति। यथा चोपक्रमानुसारेण पूर्वपक्षावतारः, तथा पूर्वपक्षं व्युत्पादयन्तो दर्शयिष्यामः। तस्मादुपपन्नः संशय इति।।

किं प्राप्तम्? अपरं ब्रह्म ध्यायतिकर्मतयोपदिश्यत इति। कुतः? एतेनैवायतनेन परमपरं वैकतरमन्वेतीत्यपरस्य प्रकृतत्वात्। ननु–परमपि प्रकृतम्, सत्यम्; प्रकृतत्वेऽपि परब्रह्मणो ध्यायतिकर्मत्वानुपपत्तेरत्रानुपादानात्। तदेव हि ध्यातुं शक्यते, यद् बुद्धावारोहति। न च निष्प्रकारस्य ब्रह्मणो बुद्धावारोहः. संभवति। ननु–परब्रह्मणोऽध्येयत्वे तदुपक्रमणं व्यर्थं स्यात्, नैवम्; तस्याध्येयत्वेऽपि ज्ञेयतयोपक्रान्तत्वोपपत्तेः, "परात् परं पुरिशयं पुरुषमीक्षत" इति तस्य ज्ञानश्रवणात्, प्रणवस्य तत्प्रकाशकत्वेन तज्ज्ञानसाधनत्वात् तदायतनतया स्तुत्युपपत्तेः। ननु–य एव परपुरुषो ध्यानविषयतयोपन्यस्तः, स एवेक्षणकर्मतया वाक्यशेषे निर्दिश्यते; ध्यानज्ञानयोः साध्यसाधनभावात्, अन्यथा वाक्यभेदापत्तेरिति–चेत्, मैवम्; "स तेजसि सूर्ये संपन्नः स सामभिरुन्नीयते ब्रह्मलोकमि" तिश्रुतेः कार्यब्रह्मलोकप्ताप्तेरेव ध्यानफलत्वात्, परात्परपुरुषेक्षणस्योक्तध्यानफलत्वासिद्धेः, एकवाक्यत्वासंभवेन वाक्यभेदस्येष्टत्वात्। न च–परात्परपुरुषेक्षणस्यैव तत्फलश्रवणम्, न केवलध्यानस्य; ध्येयसाक्षात्कारपर्यन्तस्यैव ध्यानस्य सफलत्वादिति–वाच्यम्; ध्यानस्य तथात्वेऽपि परात्परपुरुषेक्षणस्य कार्यब्रह्मलोकफलत्वानुपपत्तेः। न हि निर्गुणब्रह्मविदो देशपरिच्छिन्नं फलमुपपद्यते; तस्य सर्वात्मकत्वात्, विहितध्यायतिभावनयैव स्वफलस्य ध्येयसाक्षात्कारस्याक्षिप्तत्वात्। यदि चैकवाक्यत्वानुरोधो भवताम्, यदि च ध्यायतिभावनाफलस्य साक्षात्कारस्य श्रौतत्वे संभवति नाक्षेपादरः, अस्तु तर्हि "स एतस्माद् जीवघनात् परात् परं पुरिशयं पुरुषमीक्षत" इत्यत्रापि सगुणब्रह्मण एवेक्षणकर्मतया ग्रहणम्। न च–तस्य परात् जीवघनात्परत्वानुपपत्तिः, सगुणस्यैव स्थूलकार्यपरत्वेन जीवसमूहरूपत्वेन च जीवघनशब्दाभिधेयत्वादिति–वाच्यम्; घनः=मूर्तिः, सैन्धवखिल्यवत् कठिनमिति यावत् जीवलक्षो घनो जीवघनः ; अस्मादादीनां जीव इति यावत्। स च स्थूलदेहात् परः, तस्माञ्च सगुणं ब्रह्म परमिति व्याख्यानादुक्तानुपपत्तेरभावात्। तस्मात् सगुणमेव ब्रह्म ध्यायतिकर्म, न परं ब्रह्म। एतेन–अपरब्रह्मपरिग्रहे परं पुरुषमिति विशेषणं नोपपद्यत इति–अपास्तम्; अस्मदादिजीवपेक्षया, पिण्डापेक्षया वा सूत्रात्मनः परत्वादिति॥

एवं प्राप्ते ब्रूमः– *ईक्षतिकर्मव्यपदेशात्सः*॥ स इति तदा परमात्मनः परामर्शः, तस्य समन्वयेऽनुवर्तमानत्वेन बुद्धिस्थत्वात्। ईक्षतिकर्मेति भावप्रधाननिर्देशः। परमात्मैवेह ध्यायतिकर्मतया व्यपदिश्यते। कुतः? तस्य तत्फलेक्षणकर्मतया वाक्यशेषे व्यपदेशात्–"स एतस्माद् जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते"–इति। कुत एतदध्यवसीयते? पूर्वोपात्तध्यायतिकर्म साक्षात्कारकर्मण एवेह निर्देशः, नान्यस्येति तेनास्यैकवाक्यत्वावगमादिति ब्रूमः। न चैकवाक्यतावगमोऽसिद्धः ; "यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स एतस्माद् जीवघनात् परात् परं पुरिशयं पुरुषमीक्षत" इति प्रत्यक्षेणैकवाक्यतावगमात्; यत्तदोर्नित्यसम्बन्धात्। न च

सादनसदनकरणवाक्ययोरिवात्रैकवाक्यताभङ्गे किञ्चिद् बलवत् प्रमाणमस्ति; तददर्शनात्। ईक्षणस्य कर्म परात् परः पुरुषः, ध्यानस्य तु परः पुरुषः, इत्यत्राप्यस्ति लिङ्गं तद्बाधकम्, तथाच तददर्शनासिद्धिरिति चेत्, मेवम्; परपुरुषस्य परात्परात्वाविरोधाद् लिङ्गस्य तद्बाधकत्वासिद्धेः। कथं तदविरोधः? अपेक्षाविशेषभेदादिति ब्रूमः। यथाच देवदत्तो यज्ञदत्तात् तत्पुत्रादधिकवयस्कतया कारणतया वा तस्मात् पर इति व्यपदिश्यते, स्वपुत्रापेक्षया यज्ञदत्तस्य परत्वव्यपदेशे पुनः स एव देवदत्तः परात्पर इति, एवं स्थूलसूक्ष्मप्रपञ्चद्वयापेक्षया तत्कारणत्वाद् ब्रह्म परमिति व्यपदिश्यते, स्थूलापेक्षया सूक्ष्मस्य परत्वव्यपदेशे तु परात् परमिति न कश्चिद् विरोधः। तस्मादीक्षतिकर्मण एवैकवाक्यत्वानुरोधाद् ध्यायतिकर्मत्वम्, ईक्षतिकर्म च परं ब्रह्म; तस्य परात्परत्वश्रुतेः–"परात् परं पुरिशंय पुरुषमीक्षत" इति। परात् परत्वं च परब्रह्मणः–"अक्षरात् परतः परः" "परात् परं पुरुषमुपैति दिव्यम्" "महतः परमव्यक्तमव्यक्तात् पुरुषः परः" "पुरुषाद् न परं किञ्चित्सा काष्ठा सा परा गतिः" इत्यादिश्रुत्यन्तरेषु प्रसिद्धम्॥

ननु–"मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः" इति महत आत्मनो हिरण्यगर्भस्यापि परात् परत्वं श्रुतम्, तत्कथं परब्रह्मण एव परात् परत्वं श्रुत्यन्तरेषु प्रसिद्धमित्यवधार्यते? न; तद्वाक्यंस्य ब्रह्मण एव सर्वपरत्वावधारणपरत्वात्, "सोऽध्वनः परमाप्नोति तद्विष्णोः परमं पदम्" इति हि पूर्वमन्त्रेण विष्णोः परमं पदं गन्तव्यत्वेनाभिधाय किं तद्विष्णोः परमं पदम्? इत्यपेक्षायामाह स्म श्रुतिः–"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मन" इत्यादिः ; अन्यस्यापि परत्वप्रतिपादनपरत्वे वाक्यभेदापत्तेः, अनपेक्षितत्वाञ्च। एतेन–अर्थात् तत्प्रतिपादनम्–अपास्तम्; अर्थादीनामपि तत्प्रतिपादनप्रसङ्गाञ्च। एतेन–यदुक्तम्–ईक्षतिकर्माप्यपरं ब्रह्मैवेति; तस्यापि स्थूलशरीरापेक्षया परादस्मदादिजीवात् परत्वोपपत्तेः–इति, तदपि निरस्तं भवति, तस्यास्मदादिसर्वजीवोपाध्यात्मकत्वेन ततः परत्वासिद्धेः। तस्माद् जीवघनशब्देन जीवो वा, तत्समूहरूपापरं ब्रह्म वा गृह्यताम्, उभयथापि तस्मात् परत्वं परब्रह्मण एव संभवेत्, नापरब्रह्मणः। तथाच परस्यैवेक्षतिकर्मत्वम्, नापरस्य; पराद् जीवघनात् परत्वाभावात्। तदुक्तम्–"तस्माद् बोधात्मकत्वेन प्राप्ता बुद्धेः प्रमाणता। अर्थान्यथात्वहेतूत्थदोषज्ञानैरपोद्यते॥" इति। न चात्र बाधकमुपलभ्यते, येन परात् परपुरुषेक्षणस्य भ्रान्तत्वं परिकल्प्येत। तस्माद् बाधाभावात् प्रमैव तदीक्षणमिति मन्तव्यम्। न च सगुणस्य ब्रह्मणः प्रमारूपसाक्षात्कारविषयत्वमुपपद्यते; काल्पनिकत्वात्। यथाच तदूपस्य काल्पनिकत्वम्, तथा तृतीये वक्ष्यते। वस्तुतस्तु–भ्रान्तविज्ञानं नेक्षणम्; प्रमाणवस्त्वतन्त्रत्वात्, तथात्वेऽपि वा न काल्पनिकं तत्कर्म; पुरोवर्तिशुक्तयादिलक्षणाधिष्ठानस्यैव सत्यस्य तत्कर्मत्वात्, तत्प्रकारकतयैव काल्पनिकस्य तत्र भानादित्युक्तत्वात्, प्रकारांश एव भ्रान्तेर्बाधाभ्युपगमाद् नेक्षतिकर्मणः कुत्राप्ययथार्थत्वमस्तीति। तदेतदभिप्रेत्य भाष्यकारः सौत्रं हेतुं व्याचष्टे–*ईक्षतिर्दशनम्, दर्शनव्याप्यमीक्षतिकर्मेत्यादिना*॥

ईक्षतिदर्शनमिति व्याकुर्वन् यजतिरित्यादिवत धातुनिर्देशं वारयति। वाक्यशेष इत्यनेन ध्यायतीक्षतिवाक्ययोरकवाक्यतां दर्शयन् हेतोः स्वरूपासिद्धिं वारयति। ननु—एवं तर्हि ध्यायतिकर्मत्वव्यपदेशाद् इत्येव हेतुः किमिति न क्रियते? तस्यापि पक्षवृत्तित्वेन स्वरूपासिद्धेरभावादिति—चेत्, न; तस्य स्वरूपासिद्धेरसत्त्वेऽपि व्यभिचारसत्त्वात्, उक्तहेतोस्तदभावादित्याह—*तत्र ध्यायतेरतथाभभूतमपि वस्तु कर्म भवतीति*।। तत्र=ईक्षतिध्यायत्योर्मध्य इत्यर्थः। ध्यानेक्षणयोर्भिन्नकर्मताश्रवणं चोदयित्वा परिहरति—*नन्वित्यादिना*।। परिहृतं चास्माभिरधस्तात्। कोऽत्र चोदयितुरभिप्रायः? किं ध्यायतिकर्मणि प्रयुज्यमानः परशब्दः परमात्मानं नाभिधातुं शक्नोति; तस्य परात्परत्वात्, अतस्तयोर्भिन्नकर्मत्वमिति, किं वेक्षतिवाक्ये श्रूयमाणजीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः पुरुष परामृश्यते इत्यतस्तयोर्भिन्नकर्मत्वमिति। तत्र नाद्य इत्याह—*परपुरुषशब्दौ तावदुभयत्र साधारणाबिति*।। पुरुषशब्दस्योपादानं दृष्टान्ततयेति द्रष्टव्यम्। यथा पुरुषशब्दः परापरब्रह्मणोः पुरिशयनात् साधारणः, तथा परशब्दोऽपि, परब्रह्मणः स्थूलसूक्ष्माभ्यां परत्वात्, अपरब्रह्मणश्च स्थूलात्, अतो न परशब्दप्रयोगबलाद् ध्यायतिकर्मेक्षतिकर्मणोर्भेद इत्यर्थः। अभ्युपेत्य चेदमुक्तम्। वस्तुस्तु परमात्मन एव मुख्यया वृत्त्या परत्वम्; ''पुरुषाद् न परं किञ्चिदि'' तिश्रुतेरित्युक्तमधस्तात्, अन्यस्य च—अमरा देवा इतिवदापेक्षिकपरत्वादिति। द्वितीयं प्रत्याह—*न चात्र जीवनघनशब्देनेति*।। यदि वा जीवघनशब्देनास्मदादिजीव उच्यते, यदि वाऽपरं ब्रह्म; उभयथापि न स ध्यायतेः कर्म परः पुरुषः। वाक्यभेदापत्तेरित्याशयः। परमिति विशेषणादपि परं ब्रह्मैव ध्यायतिकर्मेत्याह—*परं पुरुषमिति च विशेषणमिति*।। यदुक्तम्—अभ्युपेत्य परशब्दस्य साधारण्यमुक्तमिति, तदितः समुत्थितम्। परं नाम श्रौतप्रक्रियायां कारणमित्युच्यते, अपरं कार्यमिति, न वैशेषिकपरिकल्पितपरत्वापरत्वयोगिनी ते। तथाच ब्रह्मैव सर्वकारणत्वात् निरुपचरितं परम्, नान्यत्। अन्यत्र प्रयुज्यमानोऽपि परशब्दो ''मृत्तिकेत्येव सत्यमि'' तिवदापेक्षिकत्वादुपचरित एव। न चात्र परशब्दस्य मुख्यार्थत्वे संभवत्युपचरितार्थत्वं युक्तम्; श्रुतिलक्षणाविषये श्रुतेर्न्याय्यत्वात्। न च संभवति तत्कल्पनम्; उपक्रमविरोधादित्याह—*परं चापरं च ब्रह्म यदोङ्कार इति विभज्येति*।। अन्यथऽपरं पुरुषमभिध्यायीतेति ब्रूयादित्याभिप्रायः। फलवचनमप्यस्मत्पक्षमुपोद्बलयतीत्याह—*यथा पादोदर इति*।। सर्प इत्यर्थः। ननु—''स सामभिरुन्नीयते ब्रह्मलोकमि'' ति फलवचनं त्वत्पक्षेऽपि नोपपद्यते; सर्वात्मकब्रह्मात्मविदो देशपरिच्छिन्नफलानुपपत्तेरित्युक्तमनुभाष्यं परिहरति—*अथ यदुक्तमित्यादिना*।। एतेन—परमात्मनो ध्यानकर्मत्वासंभवः—परिहृतः ; स्वतस्तदसंभवेऽप्योङ्कारालम्बनत्वेन तस्य तत्संभवादिति।।१३।। इति तुरीयमीक्षतिकर्माधिकरणम्।।

इति वार्त्तिकम् ईक्षतिकर्माधिकरणम् समाप्तम्

प्रदीपः

ईक्षतिकर्मव्यपदेशात्सः।। पूर्वत्राक्षरस्योङ्कारस्याप्रतिपाद्यत्वमत्र तु तदालम्बनस्य प्रतिपाद्यत्वमिति प्रसङ्गसङ्गतिः। "परं पुरुषमभिध्यायीते" त्यत्र परपुरुषः, सः=परमात्मा, ईक्षतिकर्मपुरुषत्वात्, इति सूत्रार्थः। यत्र यत्र पुरुष ईक्षतिकर्मतया व्यपदिश्यते, तत्र तत्र परमात्मैव; यथा"ऽऽत्मा वा अरे द्रष्टव्य" इत्यादौ। प्रकृते चोत्तरत्र ध्यायतिकर्मणोऽस्यैव "परं पुरिशयं पुरुषमीक्षते" इति परपुरुषपदाभ्यां प्रत्यभिज्ञानाद् ईक्षतिकर्मत्वमप्याम्नायत इति परमात्मत्वमेवेति भावः। अत्र–सालम्बनध्यानविषयत्वेन लिङ्गेन परत्वस्य ब्रह्मलिङ्गस्याभिभवादस्पष्टब्रह्मलिङ्गत्वम्। परत्वं सापेक्षमनपेक्षं च। तत्रानपेक्षपरत्वे परब्रह्मत्वम्, सापेक्षपरत्वे तु कार्यब्रह्मत्वम्। कार्यब्रह्मण्यप्यत्रैव प्रकरणे परपदं प्रयुक्तमेव–यथा "स एतस्माद् जीववघनात् परात्परमि" ति वाक्ये जीवघनेऽपि हिरण्यगर्भे परशब्द आम्नायते तथाचेक्षतिकर्मत्वं परात्परस्यैव श्रूयते, न तु परस्य। परस्य ध्येयत्वमात्रमिति हेत्वसिद्धिमभिप्रेत्य पूर्वपक्षः।।

अत्रानुसन्धेयानि प्रश्नोपनिषदः पञ्चमप्रश्नगतानि विषयवाक्यानीमानि–"अथ हैनं शैब्यः सत्यकामः पप्रच्छ। स यो ह वै तद् भगवन् मनुष्येषु प्रायणन्तमोङ्कारमभिध्यायीत कतमं वाव स तेन लोकं जयतीति। तस्मै स होवाच–एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति। स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसंपद्यते। तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया संपन्नो महिमानमनुभवति। अथ यदि द्विमात्रेण मनसि संपद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते स सोमलोकं स सोमलोके विभूतिमनुभूय पुनरावर्तते।। यः पुनरेतत्त्रिमात्रेणोमित्येतेनाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षते।। तदेतौ श्लोकौ भवतः। तिस्तो मात्रा मृत्युमत्यः प्रयुक्ता अन्योन्यसक्ता अनुविप्रयुक्ताः। क्रियासु बाह्याभ्यन्तरमध्यमासु सम्यक् प्रयुक्तासु न कम्पते ज्ञः। ऋग्भिरेतं यजुर्भिरन्तरिक्षं स

सामभिर्यत्कवयो वेदयन्ते। तमोङ्कारेणैवायतनेनान्वेति विद्वान् यत्तत् शान्तमजरममृतमभयं परं चेति।।''–इति।।

अत्र–ओङ्काराभिध्यानस्य किं फलमित्युपकम्य– परापरैकतरप्राप्तिवर्णन-मुपक्षिप्यैकमात्राङ्काराद्यभिध्यानस्यैतदन्तरिक्षलोकप्राप्तिमुपक्षिप्यानन्तरं ''यः पुनरेतत्त्रि-मात्रेणोङ्कारेणाक्षरेण परं पुरुषमभिध्यायीते'' त्याम्नातम्। फलं चात्र सूर्यभाव सर्वपाप्मोदितत्व ब्रह्मलोकप्राप्ति परपुरुपेक्षणपर्यन्तमुपन्यस्तम्। तत्र ब्रह्मलोकप्राप्त्यादिफलस्य सगुणोपासनफलत्वाद् अभिध्यानमात्रस्य प्रस्तुतत्वेन तस्य परब्रह्मविषयत्वायोगाञ्चापरमेव ब्रह्मेति प्रतीयते। एवं च सति परप्राप्तिफलमत्रोपक्रान्तमसमाप्यैव पञ्चमप्रश्नोपसंहारापत्तिरिति फलति यदि सगुणाभिध्यानमिति पक्ष एव विवक्ष्यते। अतः परब्रह्मध्यानमप्यत्र विवक्षणीयं कस्मिश्चन वाक्य इति त्रिमात्रोङ्कारालम्बनं ध्येयमेव परं ब्रह्म, एकैकमात्राद्यालम्बनोपासनस्य तु विषयोऽपरं ब्रह्मेति स्वीकर्तव्यम्। तथाच सर्वपाप्मोदितत्वादिफलनिर्देशः, किं बहुनोपसंहारे तस्यामृतत्वाजरत्वाभयत्वादिनिर्देशश्चोपपद्यते, इति सिद्धान्तकोटिः। पूर्वपक्षाभिप्रायस्तु–''परं पुरुषमभिध्यायीते''-त्यत्र परशब्दोऽयं सापेक्षः, इति सगुणमेव ब्रह्म ध्येयम्, ईक्षतिकर्म तु परं ब्रह्म भवतु, अथवा–तत्रापि परात्परत्वेनापि सगुणब्रह्मण एवेक्षणीयत्वेनापि निर्देश इति नेक्षतिकर्मव्यपदेशोऽपि विरुद्ध इति। तदिदमाह– *तत्रापरमिदं ब्रह्मेति प्राप्तमिति*।। ब्रह्महोकप्राप्तिरूपपरिच्छिन्नफलनिर्देशस्तत्र लिङ्गमित्याह– *स तेजसीत्यादिना*।। ब्रह्मणो लोकं इति ब्रह्मलोकशब्दे षष्ठीसमास इति भावः। परत्वमुपपादयति– *पिण्डापेक्षयेति*।। जीवघनशब्देनापि पिण्डस्यप विवक्षायां तु ईक्षतिकर्मत्वमपि कार्यब्रह्मण एवेति हृदयम्। सिद्धान्तपक्षं संगृह्णाति– *परमेवेत्यादिना*।। अपरस्य ब्रह्मण ईक्षतिकर्मत्वं विरुद्धमित्याह– *तत्राभिध्यायतेरित्यादिना*।। ध्यायतीक्षतिकर्मणोर्भेदमाशङ्क्य निराकरोति– *नन्वित्यादिना*।। जीवघनशब्दस्यैव हिरण्यगर्भपरत्वात् परात् परोऽपि न स एव भवतीत्यगत्या परात्परः परमात्मैवेत्याह–अपर आहेत्यादिना। परमपरं च ब्रह्मोपक्रम्यापरब्रह्मणैव प्रकरणसमाप्त्ययोगादपि परपुरुषः परमात्मैवेत्याह– *परं चापरं चेति*।। ब्रह्मलोकप्राप्त्यादिफलनिर्देशस्य क्रममुक्त्यभिप्रायत्वाद् नापरब्रह्मविषयत्वे तल्लिङ्गमित्याह– *यथेत्यादिना*।। तथाचैकैक-मात्रौङ्कारोपासनस्य पुनरावृत्तियोग्यं फलम्, त्रिमात्रौङ्काराभिध्यानस्य तु क्रममुक्तिरिति भावः।।१३।। इति चतुर्थमीक्षतिकर्माधिकरणम्।।

इति प्रदीप ईक्षतिकर्माधिकरणम् समाप्तम्

भामती

कार्य्यब्रह्म जनप्राप्तिफलत्वादर्थभेदतः।
दर्शनध्यानयोर्ध्येयमपरं ब्रह्म गम्यते॥

ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेः सर्वगतपरब्रह्मवेदने तद्भावापत्तौ स सामभिरुन्नीयते ब्रह्मलोकमिति न देशविशेषप्राप्तिरुपपद्यते। तस्मादपरमेव ब्रह्मेह ध्येयत्वेन चोद्यते। न चेक्षणस्य लोके तत्त्वविषयत्वेन प्रसिद्धेः परस्यैव ब्रह्मणस्तथाभावाद् ध्यायतेश्च तेन समानविषयत्वात्परब्रह्मविषयमेव ध्यानमिति साम्प्रतम्, समानविषयत्वस्यैवाऽसिद्धेः परो हि पुरुषो ध्यानविषयः, परात्परस्तु दर्शनविषयः। न च तत्त्वविषयमेव सर्वत्र दर्शनम्, अमृतविषयस्यापि तस्य दर्शनात्। न च मननं दर्शनं, तच्च तत्त्वविषयमेवेति साम्प्रतम्, मननाद्भेदेन तत्र तत्र दर्शनस्य निर्देशात्। न च मननमपि तर्कापरनामावश्यं तत्त्वविषयम्, यथाहुः–'तर्कोऽप्रतिष्ठः' इति। तस्मादपरमेव ब्रह्मेह ध्येयम्। तस्य च परत्वं शरीरापेक्षयेति।

एवं प्राप्ते उच्यते।

ईक्षणध्यानयोरेकः कार्य्यकारणभूतयोः।
अर्थ औत्सर्गिकं तत्त्वविषयत्वं तयेक्षतेः॥

ध्यानस्य हि साक्षात्कारः फलम्। साक्षात्कारश्चोत्सर्गतस्तत्त्वबिषयः। क्वचित्तु वाधकोपनिपाते समारोपितगोचरो भवेत्। न चासत्यपवादे शक्य उत्सर्गस्त्यक्तुम्। तथा चास्य तत्त्वबिषयत्वात्तत्कारणस्य ध्यानस्यापि तत्त्वविषयत्वम्। अपि च वाक्यशेषेणैकवाक्यत्वसम्भवे न वाक्यभेदो युज्यते। सम्भवति च परपुरुषविषयत्वेनार्थप्रत्यभिज्ञानात् समभिव्याहाराच्चैकवाक्यता। तदनुरोधेन च परात् पर इत्यत परादिति जीवधनविषयं द्रष्टव्यम्। तस्मात् तु परः पुरुषो व्यातव्यश्च द्रष्टव्यश्च भवति। तदिदमुक्तम् *न चात्र जीवघनशब्देन प्रकृतोऽभिध्यातव्यः परः पुरुषः परामृश्यते*।

किन्तु जीवधनात् परात परो यो ध्यातव्यो द्रष्टव्यश्च तमेव कथयितुं जीवघनो जीवः खिल्यभावमुपाधिवशादापन्नः स उच्यते। स सामभिरुन्नीयते ब्रह्मलोकमित्यनन्तरवाक्यनिर्दिष्टो ब्रह्मलोको वा जीवघनः। स हि समस्तकरणात्मनः सूत्रात्मनो हिरण्यगर्भस्य भगवतो निवासभूमितया करणपरिवृतानां जीवानां तत्र सङ्घात इति भवति जीवघनः। तदेवं त्रिमात्रोङ्कारायतनं परमेव ब्रह्मोपास्यम्। अत एव चास्य देशविशेषाधिगतिः फलमुपाधिमत्त्वात्, क्रमेण च सम्यग्दर्शनोत्पत्तौ मुक्तिः। 'ब्रह्म वेद ब्रह्मैव भवति' इति तु निरुपाधिब्रह्मवेदनविषया श्रुतिः। अपरं तु ब्रह्मैकैकमात्रायतनमुपास्यमिति मन्तव्यम॥१३॥

इति भामती ईक्षतिकर्माधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ दहराधिकरणम्।।५।।

तदिह हरिविरिञ्चादिप्रपञ्चोत्तीर्णस्यापि साधकानुग्रहाय पुरिशयानतया पुरुषस्य परमशक्तिरूपोमाशबलितस्य विरूपाक्षस्य परब्रह्मणः साक्षात्कारः सकलसंसारनिवृत्तिपूर्वकं तत्प्राप्तये तदुपासकानां तद्वाचकप्रणवपराणां भवतीति निरूपितम्। तस्य पुरिशयनमुपासनं च प्रकटयितुमिदमधिकरणं प्रस्तुयते–

।।सू०।। **दहर उत्तरेभ्यः**।।१३।।

छान्दोग्ये श्रूयतेऽस्य विषयः 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्' इत्यादि।।

दहराकाशइह किं भूताकाश उच्यते, उत जीवः, परमेश्वरो वेति संशयः।। आकाशशब्दस्य वियति रूढतया भूताकाशो दहराकाशः। अथवा जीवो दहर इति अल्पप्ररिमाणत्वात्, तस्याणुभूतेऽस्मिन् संभवात्, न व्यापी परमेश्वरो दहरः।।

इति प्राप्ते ब्रूमः–परमेश्वर एव दहराकाशः। कुतः? उत्तरेभ्योऽपहतपाप्मत्वादिभ्यो धर्मेभ्यः 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः' इति वाक्यशेषसिद्धेभ्यः। त एते कथं संसारिणि जीवे संभवन्ति? तस्मादीश्वर एव दहराकाशोऽपहतपाप्मत्वादिगुणक इति।।

इति श्री कण्ठभाष्य ईक्षतिकर्माधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ दहराधिकरणम्।।५।।

पूर्वाधिकरणसङ्गतिप्रदशनपूर्वर्कमुत्तराधिकरणमवतारयति—**तदिहेति।** अध्वातीतपरमाकाशवर्त्त्यपि शिवः उपासकानां प्रत्यक्षविषयो भूत्वा 'तदोकोऽग्रज्वलन'मित्य (ब्र० ४. २. १६ सू०) धिकरणोक्तरीत्या तदनुग्रहीतुं तेषां हृदयपुण्डरीकेऽपि कृष्णपिङ्गलत्वादिविशिष्टेन सूक्ष्मेण रूपेणावस्थितः प्रणवेन स्वोपासकानां सकलसंसारनिवृत्तिपूर्वकस्वप्राप्तये तदीक्षणविषयो भवतीति खल्वीक्षतिकर्माधिकरणे निरूपितम्। तस्य यत्र स्थितस्य यथाभूतरूपगुणविशिष्टस्य प्रणवेनोपास्यत्वं तत्सर्वं प्रकटी कर्तुं दहरविद्याविचारार्थमधिकरणमारभ्यत इत्यर्थः। एषा प्रासङ्गिकी सङ्गतिः। प्रकृतसिध्द्यर्थयमुपोद्घातसङ्गतिरिति केचित्।।सू०।। **दहर उत्तरेभ्यः।।१३।।**

इति शिवार्कमणिदीपिका ईक्षतिकर्माधिकरणम् समाप्तम्

अथ दहराधिकरणम्। ॥ सू० १४-२१॥

शाङ्करभाष्यम्

*दहर उत्तरेभ्यः *॥१४॥

"अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" (छा० ८/१/१) इत्यादि वाक्यं समाम्नायते।।

तत्र योऽयं दहरे हृदयपुण्डरीके दहर आकाशः श्रुतः, स किं भूताकाशः, अथवा विज्ञानात्मा, अथवा परमात्मेति संशय्यते। कुतः संशयः? आकाशब्रह्मपुरशब्दाभ्याम्। आकाशशब्दो ह्ययं भूताकाशे परस्मिंश्च प्रयुज्यमानो दृश्यते। तत्र किं भूताकाश एव दहरः स्यात्, किंवा पर इति संशयः। तथा ब्रह्मपुरमिति किं जीवोऽत्र ब्रह्मनामा, तस्येदं पुरं शरीरं ब्रह्मपुरम्, अथवा परस्यैव ब्रह्मणः पुरं ब्रह्मपुरमति। तत्र जीवस्य परस्य वाऽन्यतरस्य पुरस्वामिनो दहराकाशत्वे संशयः।।

तत्राकाशशब्दस्य भूताकाशे रूढत्वाद्भूताकाश एव दहरशब्द इति प्राप्तम्। तस्य च दहरायतनापेक्षया दहरत्वम्। "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः" इति च बाह्याभ्यन्तरभावकृतभेदस्योपमानोपमेयभावः द्यावापृथिव्यादि च तस्मिन्नन्तः समाहितम्, अवकाशात्मनाकाशस्यैकत्वात्। अथवा जीवो दहर इति प्राप्तम्; ब्रह्मपुरशब्दात्। जीवस्य हीदं पुरं सच्छरीरं ब्रह्मपुरमित्युच्यते; तस्य स्वकर्मणोपार्जितत्वात्। भक्त्या च तस्य ब्रह्मशब्दवाच्यत्वम्। नहि परस्य ब्रह्मणः शरीरेण स्वस्वामिभावः सम्बन्धोऽस्ति। तत्र पुरस्वामिनः पुरैकदेशेऽवस्थानं दृष्टम्, यथा राज्ञः। मनउपाधिकश्च जीवः मनश्च प्रायेण हृदये प्रतिष्ठितमित्यतो जीवस्यैवेदं हृदयेऽन्तरवस्थानं स्यात्। दहरत्वमपि तस्यैव आराग्रोपमितत्वादवकल्पते। आकाशोपमितत्वादि च ब्रह्माभेदविवक्षया भविष्यति। न चात्र दहरस्याकाशस्यान्वेष्यत्वं विजिज्ञासितव्यत्वं च श्रूयते। "तस्मिन्यदन्तः" इति परविशेषणत्वेनोपादानादिति।।

अत उत्तरं ब्रूमः—परमेश्वर एवात्र दहराकाशो भवितुमर्हति, न भूताकाशो जीवो वा। कस्मात्? उत्तरेभ्यः=वाक्यशेषगतेभ्यो हेतुभ्यः। तथाहि—अन्वेष्टव्यतयाभिहितस्य दहरस्याकाशस्य "तं चेद्

ब्रूयुः'' इत्युपक्रम्य ''किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यम्'' इत्येवमाक्षेपपूर्वकं प्रतिसमाधानवचनं भवति–''स ब्रूयाद्यायावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते'' (छा० ८/१/३) इत्यादि। तत्र पुण्डरीकदहरत्वेन प्राप्तदहरत्वस्याकाशस्य प्रसिद्धाकाशौपम्येन दहरत्वं निवर्तयन्भूताकाशत्वं दहरस्याकाशस्य निवर्तयतीति गम्यते। यद्यप्याकाशशब्दो भूताकाशे रूढः ; तथापि तेनैव तस्योपमा नोपपद्यत, इति भूताकाशशङ्का निवर्तिता भवति। नन्वेकस्याप्याकाशस्य बाह्याभ्यन्तरत्वकल्पितेन भेदेनोपमानोपमेयभावः सम्भवतीत्युक्तम्? नैवं सम्भवति। अगतिका हीयं गतिः, यत्काल्पनिकभेदाश्रयणम्। अपि च कल्पयित्वापि भेदमुपमानोपमेयभावं वर्णयतः परिच्छिन्नत्वादभ्यन्तराकाशस्य न बाह्याकाशपरिमाणत्वमुपपद्येत।। ननु–परमेश्वरस्यापि ''ज्यायानाकाशात्'' (शत० १०/६/३/२)इति श्रुत्यन्तरान्नैवाकाशपरिमाणत्वमुपपद्यते? नैष दोषः ; पुण्डरीकवेष्टनप्राप्तदहरत्वनिवृत्तिपरत्वाद्वाक्यस्य, न तावत्त्वप्रतिपादनपरत्वम्। उभयप्रतिपादने हि वाक्यं भिद्येत। नच कल्पितभेदे पुण्डरीकवेष्टित आकाशैकदेशे द्यावापृथिव्यादीनामन्तः समाधानमुपपद्यते। ''एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प'' इति चात्मत्वापहतपाप्मत्वादयश्च गुणा न भूताकाशे सम्भवन्ति। यद्यप्यात्मशब्दो जीवे संभवति; तथापीतरेभ्यः कारणेभ्यो जीवाशङ्कापि निवर्तिता भवति। न ह्युपाधिपरिच्छिन्नस्याराग्रोपमितस्य जीवस्य पुण्डरीकवेष्टनकृतं दहरत्वं शक्यं निवर्तयितुम्। ब्रह्माभेदविवक्षया जीवस्य सर्वगतत्वादि विवक्ष्येतेति चेत्? यदात्मतया जीवस्य सर्वगतत्वादि विवक्ष्येत, तस्यैव ब्रह्मणः साक्षात्सर्वगतत्वादि विवक्ष्यतामिति युक्तम्।। यदप्युक्तम्–ब्रह्मपुरमिति जीवेन पुरस्योपलक्षितत्वाद्राज्ञ इव जीवस्यैवेदं पुरस्वामिनः पुरैकदेशवर्तित्वमस्त्विति अत्र ब्रूमः– परस्यैवेदं ब्रह्मणः पुरं सच्छरीरं ब्रह्मपुरमित्युच्यते; ब्रह्मशब्दस्य तस्मिन्मुख्यत्वात्। तस्याप्यस्ति पुरेणानेन सम्बन्धः ; उपलब्ध्यधिष्ठानत्वात्, ''स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते'' (प्र० ५/५) ''स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयः'' (बृ० २/५/१८) इत्यादिश्रुतिभ्यः।। अथवा–जीवपुर एवास्मिन् ब्रह्म संनिहितमुपलक्ष्यते, यथा शालग्रामे विष्णुः संनिहित इति, तद्वत्। ''तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते'' (छा० ८/१/६) इति च कर्मणामन्तवत्फलत्वमुक्त्वा ''अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती'' इति प्रकृतदहराकाशविज्ञानस्यानन्तफलत्वं वदन् परमात्मत्वमस्य सूचयति। यदप्येतदुक्तम्–न दहरस्याकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रुतम्; परविशेषणत्वेनोपादानादिति, अत्र

ब्रूम:-यद्याकाशो नान्वेष्टव्यत्वेनोक्तः स्यात्, ''यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः'' इत्याद्याकाशस्वरूपप्रदर्शनं नोपयुज्येत। नन्वेतदप्यन्तर्वर्तिवस्तुसद्भावप्रदर्शनायैव प्रदर्श्यते। ''तं चेद् ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यम्'' इत्याक्षिप्य परिहारावसर आकाशौपम्योपक्रमेण द्यावापृथिव्यादीनामन्तः समाहितत्वदर्शनात्। नैतदेवम्; एवं हि सति यदन्तः समाहितं द्यावापृथिव्यादि, तदन्वेष्टव्यं विजिज्ञासितव्यं चोक्तं स्यात्; तत्र वाक्यशेषो नोपपद्येत। ''अस्मिन्कामाः समाहिताः'' ''एष आत्माऽपहतपाप्मा'' इति हि प्रकृतं द्यावापृथिव्यादिसमाधानाधारमाकाशमाकृष्य ''अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान्'' इति समुच्चयार्थेन च शब्देनात्मानं कामाधारमाश्रितांश्च कामान्विज्ञेयान्वाक्यशेषो दर्शयति। तस्माद्वाक्योपक्रमेऽपि दहर एवाकाशो हृदयपुण्डरीकाधिष्ठानः सहान्तःस्थैः समाहितैः पृथिव्यादिभिः सत्यैश्च कामैर्विज्ञेय उक्त इति गम्यते। स चोक्तेभ्यो हेतुभ्यः परमेश्वर इति।।१४।।

***गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च*।।१५।।**

दहरः परमेश्वर उत्तरेभ्यो हेतुभ्य इत्युक्तम्। त एवोत्तरे हेतव इदानी प्रपञ्च्यन्ते। इतश्च परमेश्वर एव दहरः, यस्माद्रदहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादकौ गतिशब्दौ भवतः-''इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ती'' (छा॰ ८/३/२) इति। तत्र प्रकृतं दहरं ब्रह्मलोकशब्देनाभिधाय तद्विषया गतिः प्रजाशब्दवाच्यानां जीवानामभिधीयमाना दहरस्य ब्रह्मतां गमयति। तथा ह्यहरहर्जीवानां सुषुप्तावस्थायां ब्रह्मविषयं गमनं दृष्टं श्रुत्यन्तरे-''सता सोम्य तदा सम्पन्नो भवत्ति'' (छा॰ ६/८/१) इत्येवमादौ। लोकेऽपि किल गाढं सुषुप्तमाचक्षते-ब्रह्मीभूतोः ब्रह्मतां गतः-इति। तथा ब्रह्मलोकशब्दोऽपि प्रकृते दहरे प्रयुज्यमानो जीवभूताकाशशङ्कां निवर्तयन्ब्रह्मतामस्य गमयति।। ननु-कमलासनलोकमपि ब्रह्मलोकशब्दो गमयेत्। गमयेद्यदि ब्रह्मणो लोक इति षष्ठीसमासवृत्त्या व्युत्पाद्येत, समानाधिकरण्यवृत्त्या तु व्युत्पाद्यमानो ब्रह्मैव लोको ब्रह्मलोक इति परमेव ब्रह्म गमयिष्यति। एवदेव चाहरहर्ब्रह्मलोकगमनं दृष्टं ब्रह्मलोकशब्दस्य सामानाधिकरण्यवृत्तिपरिग्रहे लिङ्गम्। न ह्यहरहरिमाः प्रजाः कार्यब्रह्मलोकं सत्यलोकाख्यं गच्छन्तीति शक्यं कल्पयितुम्।।१५।।

***धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः*।।१६।।**

धृतेश्च हेतोः परमेश्वर एवायं दहरः। कथम्? ''दहरोऽस्मिन्नन्तराकाशः'' इति हि प्रकृत्याकाशौपम्यपूर्वकं तस्मिन्सर्वसमाधानमुक्त्वा तस्मिन्नेव चात्मशब्दं प्रयुज्यापहतपाप्म-

त्वादिगुणयोगं चोपदिश्य तमेवानतिवृत्तप्रकरणं निर्दिशति-"अथ य आत्मा स सेतुविधृतिरेषां लोकानामसंभेदाय" (छा० ८/४/१) इति। तत्र विधृतिरित्यात्मशब्दसामानाधिकरण्याद्विधारयितोच्यते; क्तिचः कर्तरि स्मरणात्। यथोदकसन्तानस्य विधारयिता लोके सेतुः क्षेत्रसम्पदामसंभेदाय, एवमयमात्मैषामध्यात्मादिभेदभिन्नानां लोकानां वर्णाश्रमादीनां च विधारयिता सेतुरसंभेदायसंकरायेति। एवमिह प्रकृते दहरे विधारणलक्षणं महिमानं दर्शयति। अयं च महिमा परमेश्वर एव श्रुत्यन्तरादुपलभ्यते; "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादेः। तथान्यत्रापि निश्चिते परमेश्वरवाक्ये श्रूयते-"एष सर्वेष्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंम्भेदाय" इति। एवं धृतेश्च हेतोः परमेश्वर एवायं दहरः॥१६॥

*प्रतिद्धेश्च *॥१७॥

इतश्च परमेश्वर एव दहरोऽस्मिन्नन्तराकाश इत्युच्यते। यत्कारणमाकाशशब्दः परमेश्वरे प्रसिद्धः। ; "आकाशो वै नाम नामरूपयोर्निर्वहिता" (छा० ८/१/४), "सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते" (छा० १/९/१) इत्यादिप्रयोगदर्शनात्। जीवे तु न क्वचिदाकाशशब्दः प्रयुज्यमानो दृश्यते। भूताकाशस्तु सत्यामप्याकाशशब्दप्रसिद्धावुपमानोपमेवभावाद्यसम्भवान्न ग्रहीतव्य इत्युक्तम्॥१७॥

*इतरपरामर्शात्स इति चेन्नासम्भवात् *॥१८॥

यदि वाक्यशेपबलेन दहर इति परमेश्वरः परिगृह्येत। परिग्रह्येता स्तीतरस्यापि जीवस्य वाक्यशेषे परामर्शः-"अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एव आत्मेति होवाच" (छा० ८/३/४) इति। अत्र हि संप्रसादशब्दः श्रुत्यन्तरे सुषुप्तावस्थायां दृष्टत्वात्तदवस्थावन्तं जीवं शक्नोत्युपस्थापयितुम् नार्थान्तरम्। तथा शरीरव्यपाश्रयस्यैव जीवस्य शरीरात्समुत्थानं सम्भवति। यथाकाशव्यपाश्रयाणां वाय्वादीनामाकाशात्समुत्थानम्, तद्वत्। यथा चादृष्टोऽपि लोके परमेश्वरविषय आकाशशब्दः परमेश्वरधर्मसमभिव्याहारात् "आकाशो वै नाम नामरूपयोर्निर्वहिता" इत्येवमादौ परमेश्वरविषयोऽभ्युपगतः, एवं जीवविषयोऽपि भविष्यति। तस्मादितरपरामर्शात् "दहरोऽस्मिन्नन्तराकाश" इत्यत्र स एव जीव उच्यत? इति-चेत्, नैतदेवं स्यात्। कस्मात्? असंभवात्। न हि जीवो बुद्धयाद्युपाधिपरिच्छेदाभिमानी सन्नाकाशेनोपमीयेत। नचोपाधिधर्मानभिमन्यमानस्यापहतपाप्मत्वादयो धर्माः सम्भवन्ति। प्रपञ्चितं चतत्प्रथमसूत्रे। अतिरेकाशङ्कापरिहारायात्र तु पुनरुपन्यस्तम्। पठिष्यति चोपरिष्टात् "अन्यार्थश्च परामर्शः" (ब्र० १/३/२०) इति॥१८॥

***उत्तराच्चेदाविर्भूतस्वरूपस्तु*॥१९॥**

इतरपरामर्शाद्या जीवाशङ्का जाता, साऽसंभवान्निराकृता। अथेदानीं मृतस्येवामृतसेकात्पुनः समुत्थानं जीवाशङ्कायाः क्रियत उत्तरस्मात्प्राजापत्याद्वाक्यात्।। तत्र हि "य आत्माऽपहतपाप्मा" इत्यपहतपाप्मत्वादिगुणकमात्मानमन्वेष्टव्यं विजिज्ञासितव्यं च प्रतिज्ञाय "य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मा" (छा॰ ८/७/४) इति ब्रुवन्नक्षिस्थं द्रष्टारं जीवमात्मानं निर्दिशति। "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" (छा॰ ८/९/१३) इति च तमेव पुनः पुनः परामृश्य "य एष स्वप्ने महीयमानश्चरत्येष आत्मा" इति तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मा, (८/१०/१) इति च जीवमेवावस्थान्तरगतं व्याचष्टे। तस्यैव चापहतपाप्मत्वादि दर्शयति–"एतदमृतमभयमेतद् ब्रह्म" इति। "नाह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि" (छा॰ ८/११/१/२)इति च सुषुप्तावस्थायां दोषमुपलभ्य "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात्" इति चोपक्रम्य शरीरसम्बन्धनिन्दापूर्वकं "एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणभिनिष्पद्यते स उत्तमः पुरुषः" इति जीवमेव शरीरात्समुत्थितमुत्तमपुरुषं दर्शयति। तस्मादस्ति सम्भवो जीवे पारमेश्वराणां धर्माणाम्। अतः "दहरोऽस्मिन्नन्तराकाशः" इति जीव एवोक्तः इति चेत्कश्चिद् ब्रूयात्। तं प्रति ब्रूयात्–"आविर्भूतस्वरूपस्तु" इति। तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः। नोत्तरस्मादपि वाक्यादिह जीवस्याशङ्का सम्भवतीत्यर्थः। कस्मात्? यतस्तत्राप्याविर्भूतस्वरूपो जीवो विवक्ष्यते। आविर्भूतं स्वरूपमस्येत्याविर्भूतस्वरूपः। भूतपूर्वगत्या जीववचनम्। एतदुक्तं भवति–"य एषोऽक्षिणी" इत्यक्षिलक्षितं द्रष्टारं निर्दिश्योदशरावब्राह्मणेनैनं शरीरात्मताया व्युत्थाप्य "एतं त्वेव ते" इति पुनः पुनः तमेव व्याख्येयत्वेनाकृष्य स्वप्नसुषुप्तोपन्यासक्रमेण "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति यदस्य पारमार्थिकं स्वरूपं परं ब्रह्म, तद्रूपतयैनं जीवं व्याचष्टे, न जैवेन रूपेण। यत्तत्परं ज्योतिरुपसंपत्तव्यं श्रुतम्, तत्परं ब्रह्म। तच्चापहतपाप्मत्वदिधर्मकम् तदेव च जीवस्य पारमार्थिकं स्वरूपम्; "तत्त्वमसि" इत्यादिशास्त्रेभ्यः, नेतरदुपाधिकल्पितम्। यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन्कूटस्थनित्यदृक्स्वरूपभात्मानमहं ब्रह्मास्मीति न प्रतिपद्यते, तावज्जीवस्य जीवत्वम्। यदा तु देहेन्द्रियमनोबुद्धिसङ्घाताद् व्युत्थाप्य श्रुत्या प्रतिबोध्यते, नासि त्वं देहेन्द्रियमनोबुद्धिसंघातः, नासि संसारी, किं तर्हि? तद्यत्सत्यं स आत्मा चैतन्यमात्रस्वरूपस्तत्त्वमसीति, तदा कूटस्थनित्यदृक्स्वरूपमात्मानं प्रतिबुद्ध्यास्माच्छरीराद्यभिमानात्-समुत्तिष्ठन्स एव कूटस्थत्यिदृक्स्वरूप आत्मा भवति; "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" (मुण्ड॰ ३/२/९) इत्यादिश्रुतिभ्यः। तदेव चास्य पारमार्थिकं स्वरूपम्, येन

शरीरात्समुत्थाय स्वेन रूपेणाभिनिष्पद्यते।। कथं पुनः स्वं च रूपं स्वेनैव च निष्पद्यत इति संभवति कूटस्थनित्यस्य? सुवर्णादीनां तु द्रव्यान्तरसंपर्कादभिभूतस्वरूपाणामनभिव्यक्तासाधारणविशेषाणां क्षारप्रक्षेपादिभिः शोध्यमानानां स्वरूपेणाभिनिष्पत्तिः स्यात्। तथा नक्षत्रादीनामहन्यभिभूत-प्रकाशानामभिभावकवियोगे रात्रौ स्वरूपेणाभिनिष्पत्तिः स्यात्। न तु तथात्मचैतन्यज्योतिषो नित्यस्य केनचिदभिभवः सम्भवत्यसंसर्गित्वाद् व्योम्न इव दृष्टविरोधाच्च। दृष्टिश्रुतिमतिविज्ञातयो हि जीवस्य स्वरूपम्। तच्च शरीरादसमुत्थितस्यापि जीवस्य सदा निष्पन्नमेव दृश्यते। सर्वो हि जीवः पश्यञ्श्रृण्वामन्वानो विजानन् व्यवहरति; अन्यथा व्यवहारानुपपत्तेः। तच्चेच्छरीरात्समुत्थितस्य निष्पद्येत, प्राक्समुत्थाना दृष्टो व्यवहारो विरुध्येत। अतः किमात्मकमिदं शरीरात्समुत्थानम्, किमात्मिका वा स्वरूपेणाभिनिष्पत्तिरिति?

अत्रोच्यते—प्राग्विवेकविज्ञानोत्पत्तेः शरीरेन्द्रियमनोबुद्धिविषयवेदनोपाधिभिरविविक्तमिव जीवस्य दृष्टयादिज्योतिः स्वरूपं भवति। यथा शुद्धस्य स्फटिकस्य स्वाच्छयं शौक्ल्यं च स्वरूपं प्राग्विवेकग्रहणाद्रक्तनीलाद्युपाधिभिरविविक्तमिव भवति। प्रमाणजनितविवेकग्रहणात्तु पराचीनः स्फटिकः स्वाच्छेयन शौक्ल्येन च स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते प्रागपि तथैव सन्। तथा देहाद्युपाध्यविविक्तस्यैव सतो जीवस्य श्रुतिकृतं विवेकविज्ञानं शरीरात्समुत्थानम्, विवेकविज्ञानफलं स्वरूपेणाभिनिष्पत्तिः केवलात्मस्वरूपावगतिः। तथा विवेकाविवेकमात्रेणैवात्मनोऽशरीरत्वं सशरीरत्वं च; मन्त्रवर्णात् ''अशरीरं शरीरेषु'' (का० १/२/२२) इति, ''शरीरस्थोऽपि कौन्तेय न लिप्यते'' (गी० १३/३१) इति च सशरीरत्वाशरीरत्वविशेषाभावस्मरणात्। तस्माद्विवेकविज्ञानाभावादनाविर्भूतस्वरूपः सन्विवेकविज्ञानादाविर्भूतस्वरूप इत्युच्यते, नत्वन्यादृशावाविर्भावादनाविर्भावौ स्वरूपस्य सम्भवतः ; स्वरूपत्वादेव। एवं मिथ्याज्ञानकृत एव जीवपरमेश्वरयोर्भेदः, न वस्तुकृतः ; व्योमवदसङ्गत्वाविशेषात्।। कुतश्चैतदेवं प्रतिपत्तव्यम्? यतो ''य एषोऽक्षिणि पुरुषो दृश्यते'' इत्युपदिश्य ''एतदमृतमभयमेतद् ब्रह्म'' इत्युपदिशति। योऽक्षिणि प्रसिद्धो द्रष्टा द्रष्टृत्वेन विभाव्यते, सोऽमृताभयलक्षणाद् ब्रह्मणोऽन्यश्चेत्स्यात्, ततोऽमृताभयब्रह्मसामानाधिकरण्यं न स्यात्। नापि प्रतिच्छायात्माऽयमक्षिलक्षितो निर्दिश्यते; प्रजापतेर्मृषवादित्वप्रसङ्गात्।। तथा द्वितीयेऽपि पर्याये ''य एष स्वप्ने महीयमानश्चरति'' इति न प्रथमपर्यायनिर्दिष्टादक्षिपुरुषाद् द्रष्टुरन्यो निर्दिष्टः ; ''एतं त्वेव ते भूयोऽनुव्याख्यास्यामी'' इत्युपक्रमात्। किंचाहमद्य स्वप्ने हस्तिनमद्राक्षम्, नेदानीं तं पश्यामीति दृष्टमेव प्रतिबुद्धः प्रत्याचष्टे, द्रष्टारं तु तमेव प्रत्यभिजानाति—य एवाहं स्वप्नमद्राक्षम्, स एवाहं जागरितं पश्यामि इति। तथा तृतीयेऽपि पर्याये ''नाह खल्वयमेवं सम्प्रत्यामानं जानात्ययमहमस्मीति नो एवेमानि भूतानि'' इति

सुषुप्तावस्थायां विशेषविज्ञानाभावमेव दर्शयति, न विज्ञातारं प्रतिषेधति। यत्तु तत्र "विनाशमेवापीतो भवती" इति, तदपि विशेषविज्ञानविनाशाभिप्रायमेव, न विज्ञातृविनाशाभिप्रायम्, "नहि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात्" (बृ० ४/३/३०) इति श्रुत्यन्तरात्। तथा चतुर्थेऽपि पर्याये "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मात्" इत्युपक्रम्य "मघव् मर्त्यं वा इदं शरीरम्" इत्यादिना प्रपञ्चेन शरीराद्युपाधिसम्बन्धप्रत्याख्यानेन सम्प्रसादशब्दोदितं जीवं "स्वेन रूपेणाभिनिष्पद्यते" इति ब्रह्मस्वरूपापन्नं दर्शयन्न परस्माद् ब्रह्मणोऽमृताभयस्वरूपादन्यं जीवं दर्शयति॥

केचित्तु परमात्मविवक्षायां "एतं त्वेव ते" इति जीवाकर्षणमन्याय्यं मन्यमाना एतमेव वाक्योपक्रमसूचितमपहतपाप्मत्वादिगुणकमात्मानं ते भूयोऽनुव्याख्यास्यामीति कल्पयन्ति। तेषामेतमिति संनिहितावलीम्बिनी सर्वनामश्रुतिर्विप्रकृष्येत। भूयःश्रुतिश्चोपरुध्येत; पर्यायान्तराभिहितस्य पर्यायान्तरेऽहभिधीयमानत्वात्। "एतं त्वेव ते" इति प्रतिज्ञाय प्राक्चतुर्थात्पर्यायादन्यमन्यं व्याचक्षाणस्य प्रजापतेः प्रतारकत्वं प्रसज्येत। तस्माद्यदविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृभोक्तृरागद्वेषादिदोषकलुषितमनेकार्थयोगि, तद्विलयनेन तद्विपरितमपहतपात्मत्वादिगुणकं परमेश्वरं स्वरूपं विद्यया प्रतिपाद्यते, सर्पादिविलयनेनव रज्ज्वादीन्॥ अपरे तु वादिनः पारमार्थिकमेव जैवं रूपमिति मन्यन्तेस्मदीयाश्च केचित्। तेषां सर्वेषामात्मैकत्वसम्यग्दर्शनप्रतिपक्षभूतानां प्रतिबोधा येदं शारीरकमारब्धम्-एक एव परमेश्वरः कूटस्थनित्यो विज्ञानधातुरविद्यया मायया मायाविवदनेकधा विभाव्यते, नान्यो विज्ञानधातुरस्तस्ति। यत्त्विदं परमेश्वरवाक्ये जीवममाशङ्क्य प्रतिषेधति सूत्रकारः-"नासंभवात्" (ब्र० १/३/१८) इत्यादिना। तत्रायमभिप्रायः-नित्यशुद्धबुद्धमुक्तस्वभावे कूटस्थनित्य एकस्मिन्नसङ्गे परमात्मनि तद्विपरीतं, जैवं रूपं व्योम्नीव तलमलादि परिकल्पितम् तदात्मैकत्वप्रतिपादनपरैर्वाक्यैर्न्यायोपेतैर्द्वैतवादप्रतिषेधैश्चापनेष्यामीति, परमात्मनो जीवादन्यत्वं द्रढयति। जीवस्य तु न परस्मादन्यत्वं प्तितिपिपादयषति किं त्वनुवदत्येवाविद्याकल्पितं लोकप्रसिद्धं जीवभेदम्। एवं हि स्वाभाविककर्तृत्वानुवादेन प्रवृत्ताः कर्मविधयो न विरुध्यन्त इति मन्यते। प्रतिपाद्यं तु शास्त्रार्थमात्मैकत्वमेव दर्शयति-"शास्त्रदृष्टया तूपदेशो वामदेववत्" (ब्र० १/१/३०) इत्यादिना। वर्णितश्चास्माभिर्विद्वदविद्वद्भेदेन कर्मविधिविरोधपरिहारः॥१९॥

***अन्यार्थश्च परामर्शः*॥२०॥**

अथ यो दहरवाक्यशेषे जीवपरामर्शो दर्शितः-"अथ य एष संप्रसादः" (छा० ८/३/४) इत्यादिः, स दहरे परमेश्वरे व्याख्यायमाने जीवोपासनोपेदेशो न प्रकृतविशेषोपदेश इत्यनर्थकत्वं

प्राप्नोतीति? अत आह–अन्यार्थोऽयं जीवपरामर्शो न जीवस्वरूपपर्यवसायी। किं तर्हि? परमेश्वरस्वरूपपर्यवसायी। कथम्? संप्रसादशब्दोदितो जीवो जगरितव्यवहारे देहेन्द्रियपञ्जराध्यक्षो भूत्वा तद्वासमानिर्मितांश्च स्वप्नान्नाडीचरोऽनुभूय श्रान्तः शरणं प्रेप्सुरुभयरूपादपि शरीराभिमानात्समुत्थाय सुषुप्तावस्थायां परं ज्योतिराकाशशब्दितं परं ब्रह्मोपसंपद्य विशेषविज्ञानत्वं च परित्यज्य स्वेन रूपेणानिप्पद्यते। यदस्योपसम्पत्तव्यं परं ज्योति, येन स्वेन रूपेणायमाभिनिष्पद्यते, स एष आत्माऽपहतपाप्मत्वादिगुण उपास्य इत्येवमर्थोऽयं जीवपरामर्शः परमेश्वर-वादिनोऽप्युपपद्यते॥२०॥

***अल्पश्रुतेरिति चेत्तदुक्तम्*॥२१॥**

यदप्युक्तम्– ''दहरोऽस्मिन्नन्तराकाशः'' इत्याकाशस्याल्पत्वं श्रूयमाणं परमेश्वरे नोपपद्यते, जीवस्य त्वाराग्रोपमितस्याल्पत्वमवकल्पतम इति तस्य परिहारो तक्तव्यः। उक्तो ह्यस्य परिहारः परमेश्वरस्यापेक्षिकमल्पत्वमवकल्पत इति ''अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च'' (ब्र० १/२/७) इत्यत्र। स एवेह परिहारोऽनुसंधातव्य इति सूचयति। श्रुत्यैव चेदमल्पत्वं प्रत्युक्तं प्रसिद्धेनाकाशेनोपमिमानया ''यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः'' इति॥२१॥ इति पञ्चमं दहराधिकरणम्॥

इति शाङ्करभाष्यम् दहराधिकरणम् समाप्तम्

वार्तिकम्

दहर उत्तरेभ्यः॥१४॥ यथा प्रजापतिवाक्येऽनुत्तमपुरुषरूपेऽपि जीवे-"स उत्तमः पुरुषः" इत्युत्तमपुरुषशब्दप्रयोगः, तद्वदपरस्मिन्नपि ब्रह्मणि परपुरुषशब्दप्रयोगोपपत्तिरिति चेत्, मैवम्; तस्यापि परब्रह्मत्वेनोत्तमपुरुषत्वोपपत्तेरित्याधिकरणसङ्गतिः॥

तत्र प्रथमं तत्पूर्ववर्ति दहरवाक्यमेव विषयीकृत्य चिन्त्यते तद्विचारप्रयुक्तये; तदैकार्थ्यात्। यद्वा-भवतु तावदत्र परब्रह्मणो ध्यायतिकर्मत्वम्, दहरवाक्ये तु न तथा भवितुमर्हति; जीवमुख्याकाशलिङ्गदर्शनादिति सङ्गतिः। एवं हि छान्दोग्ये श्रूयते-"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमि" त्यादि॥

तत्र सन्देहः-योऽयं दहरे=स्वल्पे हृदयपुण्डरीके, दहरः=स्वल्पतरपरिमाण आकाशः श्रुतः, स किं प्रसिद्ध आकाशः, किं वा जीवात्मा, आहोस्वित् परमात्मा-इति। तदर्थं चायं विषयः-किं दहराकाशस्यैवात्रान्वेष्टव्यत्वं विधीयते, किं वा तदन्यस्य-इति। यद्याद्यः पक्षः, तदा दहराकाशः परमात्मा; भूताकाशजीवयोरन्वेष्टव्यत्वानुपपत्तेः, अथ द्वितीयः, तदा भूताकाशो जीवो वेति। तदर्थमप्ययं विचारः-किं "तदस्मिन् यदन्तरि" त्यत्र तदा दहरपुण्डरीकं परामृश्यते, किं वा दहराकाशः-इति। यदा दहराकाशः, तदा तदन्यस्यैवान्वेष्टव्यत्वम्, यदा तु हृदयपुण्डरीकम्, दहराकाशस्येति। एतेन-"आकाशः तल्लिङ्गादि" त्यनेनास्य विचारस्यागतार्थत्वम्-दर्शितं भवति॥

केचित्तु-एवं संशयमादर्शयन्ति स्म-किं दहराकाशादन्यदेव किञ्चिदन्वेष्टव्यम्, विजिज्ञासितव्यं च, उत दहराकाशः-इति। यदापि दहराकाशोऽन्वेष्टव्यः, किं भूताकाशः, आहो शारीरात्मा, किं वा परामात्मा-इति॥

तन्न युक्तम्; दहराकाशस्यान्वेष्टव्यत्वपक्षे भूताकाशजीवयोर्लोकप्रसिद्धत्वेन तदसंभवादुक्तसंशयानुपपत्तेः। ननु-यत् जैवं रूपं लोकप्रसिद्धम्, तत् काल्पनिकम्; अतो न तदन्विष्यते, यत्तु तस्य पारमार्थिकं रूपम्, तदन्विष्यते। न च तल्लोकसिद्धम्, येनोक्तादोषात् संशयो

न स्यादिति चेत्, न; तत्परिमार्थिकस्वरूपस्य ब्रह्मत्वात् संशयाभावसिद्धेः। अत एव सूत्रकारः–शारीरकमीमांसायाम्–"अथातो ब्रह्मजिज्ञासा" इति सूत्रयामास, न–"अथातः शारीरकजिज्ञासा" इति। तत् कस्य हेतोः? जिज्ञास्यशारीरकस्वरूपस्य ब्रह्मत्वादिति। न चात्र दहराकाशस्यान्वेष्टव्यत्वं विजिज्ञासितव्यत्वं च श्रूयते; "तस्मिन् यदन्तः" इति परविशेषणत्वेनोपादानादिति पूर्वपक्षभाष्यानुपपत्तेरेव। जीवपक्षं हि गृहीत्वा तद् भाष्यं प्रवृत्तमिति। तस्मादस्मदुक्त एव संशयप्रकारः साधुरिति। संशयबीजं पृच्छति–*कुत इति*।। उत्तरमाह–*आकाशब्रह्मपुरशब्दभ्यामिति*।। अत्राकाशशब्दस्य संशयकारणतां दर्शयन् तत्कृतं संशयं पुनरभिनीय दर्शयति–*आकाशशब्दो ह्ययमित्यादिना*।। न च–अयं संशय "आकाशस्तल्लिङ्गात्" इत्यनेन परिहृतत्वाद् नात्र युक्त इति–वाच्यम्; "तस्मिन् यदन्तः" इति परविशेषणत्वेन दहराकाशस्य श्रुतत्वसंशयेन तत्र ब्रह्मलिङ्गानवधारणात्, पुनरत्र संशयोपपत्तेरित्युक्तमेवास्माभिरधस्तात्। ब्रह्मपुरशब्दस्य सन्दिग्धार्थत्वेन संशयकारणतां दर्शयति–*ब्रह्मपुरमिति*।। *किं जीवो ब्रह्मनामेति*।। सम्भवति हि जीवस्यापि देहादिबृंहणयोगाद् ब्रह्माभेदविवक्षया वोपचाराद् ब्रह्मनामतेति। यद्यपि सर्ववेदान्तेषु परब्रह्मण्येव ब्रह्मशब्दः प्रसिद्धः, देहादिवृंहणयोगात्, भक्त्या वा जीवे नाकस्माद् नेतुमुचितः ; तथापि स्थूलदेहस्य प्रकृते पुरत्वेनोपन्यासात् तस्य च जीवप्रधानत्वात् तदुपपादकतया प्रयुक्तो ब्रह्मशब्दो ब्रह्मणि वर्तितुं न समर्थः। अतो योगाद् भक्त्या वा देवदत्तादाविव सिंहशब्दः कथञ्चिद् जीवे वर्तिष्यते, इति मन्वानस्य भवति पुरशब्दात् संशय इति।।

पूर्वपक्षं गृह्णाति–*तत्राकाशशब्दस्य भूताकाशे रूढत्वादिति*।। तत्र=त्रिषु पक्षेषु मध्य इत्यर्थः।

भूताकाशोऽथवा जीवो दहरः परिगृह्यते।
प्रसिद्धेः पुरसम्बन्धाद् न ब्रह्म तदभावतः।।

भूताकाशोऽत्र दहराकाशो भवितुमर्हति। कुतः? तत्राकाशशब्दप्रसिद्धेः, बलवद्बाधकाभावे प्रसिद्ध्यतिक्रमस्यायुक्तत्वात्। न च–भूताकाशस्य जगन्मण्डलव्यापित्वेन दहरत्वानुपपत्तिः, स्वोपमितत्वानुपपत्तिश्चास्ति तद्बाधिका, उपमानोपमेयभावस्य भेदसापेक्षत्वादिति–वाच्यम्; जगन्मण्डलव्यापिनोऽपि तस्य दहरहृदयपुण्डरीकायतनावच्छिन्नस्य सूच्याकाशस्येव दहरत्वाविरोधात्, बाह्याभ्यन्तरभेदेनैकस्याप्युपमानोपमेयभावाविरोधाञ्च। न चैवं सति दहराकाशे द्यावापृथिव्योरन्तः समाधानानुपपत्तिः ; बाह्याभ्यन्तराकाशयोः परमार्थत एकत्वादवकाशदानेन तत्समाधानस्य तत्रोपपत्तेः। यदि कथञ्चिदपरितुष्य प्रसिद्धतिक्रमः क्रियते भवता, अस्तु तर्हि जीवो दहराकाशः ; तत्स्थत्वात्,

"मञ्चाः क्रोशन्ती" तिवत् स्थानेन स्थानिलक्षणोपपत्तेः। कुतः स्वार्थपरित्यागेन तत्स्थजीवपरिग्रह इति चेत्, पुरशब्दादिति ब्रूमः। "अस्मिन् ब्रह्मपुर" इति पुरत्वेन स्थलशरीरं निर्दिश्यते। तञ्च स्वकर्मोपार्जितत्वाद् जीस्य स्वामिनः पुरम्, यथा सूरसेनस्य राज्ञो रणस्तम्भः, यथा वा तस्यैव विश्वेश्वराराधानपरस्येदानीन्तनी काशीपुरी, तद्वत्। अत एव ब्रह्मपदमपि जीवे बृंहणयोगाद् भक्त्या वा वर्तिष्यत इत्युक्तमधस्तात्। भक्तिश्च चैतन्यमित्यन्यत्। अपिच परब्रह्मण्यपि बृहत्त्वयोगेनैव ब्रह्मपदं वर्तते, न रूढयेत्युक्तं प्रथमसूत्रे। तथाचोभयत्र यौगिकत्वसाम्याद् न जीवाभिधानपक्षे प्रसिद्धिबाधः। न च—परब्रह्मणो जीवस्येव शरीरेण न स्वस्वामिभावसम्बन्धोऽस्ति, येन तस्य तत् पुरं स्यादिति—वाच्यम्; न हि यत्कर्मणा यद् नारब्धम्, तत् तस्य स्व भवति। न च यत्र यस्य न स्वत्वम्, तत् तस्य पुरमिति व्यपदिश्यते। न हि विश्वेश्वरपूरे विद्यमानेनापि विन्दुमाधवेन तत्पुरमिति व्यपदेशो भवति। तत् कस्य हेतोः? तत्र तस्य स्वाभ्याभावात्। तस्माद् जीवस्यैव शरीरं पुरमुचितम्। ननु—एवमपि हि तस्य सर्वशरीरे वृत्तिलाभाद् न शरीरैकदेशे हृदयपुण्डरीकमात्रेऽवस्थनकीर्तनमुक्तं युक्तम्, वत्सराजपुरे विष्णुमित्रस्येवेति, नेत्याह—*तत्र पुरस्वामिन इति*।। तत्र=एवं सतीत्यर्थः। तथापि हृदयपुण्डरीक एवावस्थाने किं बीजम्? तत्राह—*मनउपाधिकश्च जीव इति*।। ननु—मनसोऽपि सर्वशरीरदेशे संचारोऽस्ति, तत्राह—*मनश्च प्रायेणेति*।। दहरत्वविशेषणं च जीवपक्ष उपपन्नतरमित्याह—*दहरत्वमपीति*।। ननु—दहरत्वोपपत्तावप्याकाशोपमितत्वं नोपपद्यते, विरोधादिति—चेत्, तत्राह—*आकाशोपमितत्वादि चेति*।। आदिशब्देन द्यावापृथिव्योरन्तः समाहितत्वादेर्ग्रहणम्। ननु—एवमपि न भूताकाशजीवयोरन्यतरस्याप्यन्वेष्यत्वं विजिज्ञास्यत्वं च श्रयमाणमुपपद्यते; तयोः सुप्रसिद्धत्वादित्याशङ्कायामाह—*न चात्रेति*।। "तस्मिन्" इत्यन्वेष्टव्याधारतया दहराकाशस्योपादानाद् हृदयपुण्डरीकस्य व्यवहृतत्वेन सर्वनाम्ना परामर्ष्टुमशक्यत्वाद् न तस्यान्वेष्टव्यत्वश्रवणमस्तीत्यर्थः। तस्मादाकाशशब्दस्य भूताकाशे प्रसिद्धत्वाद् भूताकाश एव दहराकाशः स्थूलदेहपुरसम्बन्धाद् जीव एव वाऽस्तु न ब्रह्म; तत्राकाशशब्दाप्रसिद्धेः, पुरसम्बन्धाभावाञ्चेति प्राप्तम्।।

एवं प्राप्ते ब्रूमः—दहराकाशः परमात्मैव भवितुमर्हति, न भूताकाशः, न वा जीवः। कस्मात्? उत्तरेभ्यः=वाक्यशेषगतेभ्यो हेतुभ्य इत्यर्थः। के त उत्तरे हेतवः? उच्यते; (१) अन्वेष्टव्यत्व विजिज्ञासितव्यत्वे, (२) आकाशोपमितत्वम्, (३) द्यावापृथिवीसमाधानम्, (४) आत्मत्वम्, (५) अपहतपाप्मत्वादिगुणाश्चेत्येवमादयः। दर्शयिष्यति चैतत् स्वयमेव सूत्रैः प्रपञ्चयन् सूत्रकारः। भाष्यकारस्तु तत आकृष्यात्रैवैतान् हेतून् प्रपञ्चय दर्शयति—*तथाहीत्यादिना*।। "तं चेद् ब्रूयुरि" त्युप क्रम्येत्यादिना प्रश्नप्रतिवचनयोः समानविषयत्वं दर्शयन् दहराकाशादन्यस्य विजिज्ञास्यत्वं

वारयति। एतेन—यदुक्तम्—दहराकाशस्य परविशेषणत्वेनोपादानाद् न विजिज्ञास्यत्वम्—इति, तदपि—प्रत्युक्तम्; परविशेषणतयोपादानस्यैवासिद्धेः। वक्ष्यति चेतद् मुखत एव भाष्यकारः—प्रसिद्धेरिति।। पूर्वपक्षहेतुं वाक्यशेषगतहेत्वन्तरविरोधेन परिहरति—*यद्यप्याकाशशब्द इति*।।

तद्विरोधपरिहारमुक्तमाशङ्कते—*नन्विति*।। उपमानोपमेययोः पारमार्थिके भेदे संभवति न काल्पनिकभेदमाश्रित्यापि तद्विरोधः परिहर्तुं शक्यत इत्याह—*अपिचेति*।। ब्रह्मपक्षेऽपि समानोऽयं विरोध इत्याशङ्कते—*नन्विति*।। नाकाशपरिमाणताप्रतिपादनपरमेतद्वाक्यम्, येन श्रुत्यन्तरविरोधाद् ब्रह्मपक्षेऽपि नोपपद्येत। किं तर्हि? हृदयपुण्डरीकदहरत्वेन प्राप्तदहरत्वशङ्कानिवृत्तिपरम्; प्रश्नानुगुण्यादुत्तरस्य, प्रश्ने शङ्कायाः समुत्थानात्। न चोभयपरत्वं वाक्यस्य कल्पयितुं शक्यते; वाक्यभेदप्रसङ्गादिति परिहरति—*नैष दोष इति*।। कल्पितभेदेनोपमानोपमेयभावे दोषान्तरमाह—*न च कल्पितभेद इति*।। इतश्च न प्रसिद्धया भूताकाशपरिग्रह इत्याह—*एष आत्मेति*।। अस्तु तर्हि जीव एव दहराकाशः; तस्यात्मत्वादिति, नेत्याह—*यद्यपीति*।। अभ्युपेत्यवादोऽयम्। वस्तुतस्तु जीवेऽपि नात्मशब्दो यथार्थ इत्युक्तम्—''द्युभ्वाद्यायतनं स्वशब्दादि''त्यत्र। इतरहेतूनां जीवेऽसंभवं दर्शयति—*न हीत्यादिना*।। उक्तं पूर्वपक्षबीजमनुभाष्य दूषयति—*यदप्युक्तमिति*।। ब्रह्मशब्दस्यैतस्मिन् मुख्यत्वादिति*।। ननु—उक्तं जीवेऽपि बृंहणार्थयोगाद् मुख्यवृत्त्या ब्रह्मशब्दः प्रवर्तिष्यते—इति, मैवम्; सत्यपि योगे तत्र ब्रह्मशब्दस्य लोके वेदे वा प्रयोगादर्शनात्, परमात्मनि च सर्वत्र तत्प्रयोगात्। न हि—''गच्छती'' ति गौरिति हि गोशब्दस्य योगार्थो मनुष्येऽस्ति, इति तव गोशब्दः केनचित् प्रयुज्यते, प्रयुज्यमानोऽपि वा तत्र स साधुरित्यध्यवसीयते। तत् कस्य हेतोः? अनादिवृद्धप्रयोगाभावात्। न च तदभावे मुख्या वृत्तिर्भवति। तस्माद् न जीवे मुख्यो ब्रह्मशब्दः। एतेन—उभयत्र यौगिकत्वाद् ब्रह्मशब्दस्य तुल्यत्वमिति—प्रत्युक्तम्। अपि च यद्यपि परमात्मनि ब्रह्मशब्दो यौगिकः; तथापि न रूढेर्व्यतिरिच्यते। कथम्? तत्र हि रूढेर्योगो व्यतिरिच्यते, यत्रावयवार्थात् समुदायार्थो भिन्नः, यथा पाचक इत्यादौ। यत्र त्ववयवार्थ एव समुदायार्थः, न स रूढ्यर्थाद् व्यतिरिक्तः। कुतः? अवयवस्य तत्र रूढ्या वर्तनात्। तद्यथा देवदत्त इत्यादौ प्रातिपादिक प्रथमाविभक्तिसमुदायार्थो नावयवार्थाद् व्यतिरिक्तः, इति रूढिरेव निगद्यते, प्रकृतेऽपि बृहतेरर्य एव समुदायार्थः, इति परमात्मनि योगत्वेऽपि रूढिरेव भवति। रूढिस्तु वृंहणकर्तृयोगमपहरति। तस्माद् रूढिविरोधात् सत्यपि योगे ब्रह्मशब्दो न जीवे वर्तितुमर्हतीति। तदेतत्सर्वमभिप्रेत्योक्तम्—*ब्रह्मशब्दस्य तस्मिन् मुख्यत्वादिति*।। ननु—उक्तं परमात्मना नास्ति स्थूलदेहस्य सम्बन्ध इति, नेत्याह—*तस्याप्यस्ति पुरेणानेन सम्बन्ध इति*।।

ननु–उक्तं लोकेऽसाधारणेनैव सम्बंन्धिना पुरनिर्देशो भवति, जीवश्चासाधारणः सम्बन्धी शरीरस्य, न ब्रह्म तदुपलब्धिस्थानत्वेऽपि तस्येति–चेत्, तत्राह–*अथवेति*।। यद्येवं भवतामाग्रहोऽसाधारणेनैव सम्बन्धिना पुरं विशेषणीयमिति, अस्तु नामैवं जीव एव ब्रह्म, तथापि तत्पुरे ब्रह्मणो नित्यसंनिहितत्वात् सालिग्रामे विष्णूपदेशवत् तदुपदेशो न विरुद्धयत इत्यर्थः। अभ्युपेत्यवादोऽयम्। वस्तुतस्तु ब्रह्मणोऽप्यस्ति शरीरेणासाधारणसम्बन्धः, ततोऽन्यत्र तदनुपलब्धेः। न च जीवो नाम कश्चिद् ब्रह्मणोऽत्यन्तभिन्नोऽस्ति। स एव हि देहद्वयसम्बन्धाद् जीव इति व्यपदिश्यते; "स इह प्रविष्टः" "तत्सृष्टवा तदेवानुप्राविशत्" "अनेन जीवेनात्मनाऽनुप्रविश्ये" त्यादिश्रुतिभ्यः, इत्यसकृदावेदितम्। तथाच जीवपुरमपि सत् शरीरं भवत्येव ब्रह्मपुरमित्यदोषः। ननु–जीवोऽपि ब्रह्मैव चेत्, किमर्थं तर्हि तन्निराकरणं क्रियते, नैष दोषः ; तस्य परमार्थतो ब्रह्मत्वेऽप्यविद्यावत्त्वादुक्तगुणविशिष्टतयोपास्यत्वानुपपत्तेरित्यसकृदावेदितत्वात्। दहराकाशस्य परमात्मत्वे हेत्वन्तरमाह–*तद्यथेह कर्मचित इति*।। मुख्यं पूर्वपक्षबीजमनुभाष्य निराकरोति–*यदप्येतदुक्तमिति*।। तत्प्रदर्शनोपयोगमाशङ्कते–*नन्विति*।। परिहरति–*नैतदेवमिति*।। अस्तु तर्हि तदन्तर्वर्तिद्यावापृथिव्यादेरेवान्वेष्टव्यत्वमिति चेत्, तत्राह–*तत्र वाक्यशेषो नोपपद्यत इति*।। वाक्यशेषमेवोदाहृत्य तदनुपपत्तिं दर्शयति–*अस्मिन् कामा इति*।। ननु–"अस्मिन् कामाः समाहिताः" "एष आत्माऽपहतपाप्मा" इत्यत्र सर्वनामभ्यां संनिहितस्याकाशाद्याधारद्यावापृथिव्यादेरेव परामर्शोऽस्तु, न तदाधाराकाशस्य; द्यावापृथिव्यभिधानव्यवधानादिति–चेत्, नेत्याह–*प्रकृतमिति*।। द्यावापृथिव्यभिधानव्यवधानेऽपि तदाधाराकाशस्य प्रकृतत्वेन प्राधान्यात् सर्वनाम्नाकर्षणं युक्तम्, नाव्यवहितद्यावापृथिव्योः ; तयोरप्रकृतत्वेनाप्राधान्यात्, पुंलिङ्गैकवचनान्तेन सर्वनाम्ना परामर्शासम्भवाञ्च, भिन्नलिङ्गवचनानापत्तेश्च। तस्मादसदेतत्–यद् द्यावापृथिव्यादेरेवात्र परामर्शोऽस्त्विति। न च कामाधारत्वात्मत्वादिकमपि तयोरुपपद्यते; आकाशशब्देनैव द्यावापृथिव्याद्याधारत्वेनाप्यत्रात्मनो विज्ञेयत्वोपदेशात् तदनुपपत्तेः। तदेतदभिप्रेत्योक्तम्–*सहान्तः समाहितैः पृथिव्यादिभिरिति*।। ननु–सत्यकामानस्यैव तत्फलम्; तदन्तरनिर्देशात्, न तु दहराकाशविज्ञानस्येत्यत आह–*समुञ्चयार्थेन चशब्देनेति*।। तथाच "तस्मिन् यदन्तरि" त्यत्र न परविशेषणतया दहराकाशः परमामृश्यते; तस्यैव प्राधान्यात्, अन्वेष्टव्यत्वेन परत्वात्। किं तर्हि? प्रासादे देवदत्तस्तस्मिन् यदन्तः सोऽन्वेष्टव्य इत्यत्र प्रासादस्येव पूर्ववाक्ये विशेषणीभूततया श्रुतस्यैव हृदयपुण्डरीकस्य तस्मिन्निति परविशेषणतया परामर्श इत्यभिप्रायः।।१४।।

गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गं च।।१५।। उत्तरहेतूनामयं प्रपञ्च आरभ्यते। इतश्च दहरः

परमेश्वरः। कुतः? गतेः, शब्दाञ्च। गतिस्तावत् सर्वजीवानामहरहः सुषुप्तौ दहराकाशे श्रूयमाणा तस्य ब्रह्मभावगमिका भवति। ब्रह्मलोकशब्दश्च। एवं हि दहराकाशं प्रकृत्य श्रूयते–''इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ती''ति। यथाच जीवानां सुषुप्ता ब्रह्मण्येव गतिः, नान्यत्र, तथा तृतीये–''तदभावो नाडीषु तच्छ्रुतेरात्मनि चे'' त्यत्र सुषुप्तिपरिक्षायां वक्ष्यामः। ब्रह्मलोकशब्दश्च परब्रह्मणोऽभिधायकः ; स्थपत्यधिकरणन्यायेन कर्मधारयाश्रयणात्, तत्पुरुषाश्रयणे च लक्षणाप्रसङ्गात्, श्रुतिलक्षणाविशये श्रुतेर्न्याय्यत्वात्। न च तत्पुरुषाश्रयणं संभवत्यपि। न हि भङ्गाश्रये कमलासनलोके सर्वजीवानां प्रतिदिनं गमनमुपपद्यते, न वा कुत्रचित् श्रुतम्। अत्रैव श्रुतमिति चेत्, न; ''सता सोम्य तदा सम्पन्नो भवती'' त्यादिश्रुत्यन्तरविरोधेनात्र तच्छ्रुत्यनुपपत्तेः, लक्षणाप्रसक्तेरुक्तत्वाञ्च, प्रसिद्धिबाधस्य चासम्भवेनैव कृतत्वात्। तथाच ब्रह्मलोकशब्द एव दहराकाशस्य ब्रह्मत्वे दृष्टम्=साक्षात् श्रुतिलक्षणं प्रामाणम्, गतिश्च लिङ्गलक्षणमित्यर्थः।।

''तथा हि दृष्टं लिङ्गं च'' इत्यस्य सूत्रावयवस्यापरा व्याख्या। हिः=हेतौ। न च–गतेर्ब्रह्माश्रयत्वमसिद्धम्; ''सता सोम्य तदा संपन्नो भवती'' ति श्रुत्यन्तरे तथा दृष्टत्वात, नापि ब्रह्मलोकशब्दस्य ब्रह्माभिधायकत्वमसिद्धम्, तस्य कार्यब्रह्मलोके प्रसिद्धत्वादिति–वाच्यम्; सुषुप्तौ जीवानामहरहस्तद्गमनश्रवणस्यैव तस्य तदभिधायकत्वे लिङ्गत्वादिति। तञ्च व्याख्यातं भाष्ये। तत्र ''तथाहि दृष्टमि'' ति सूत्रावयवं व्याचष्टे–*तथा हरहर्जीवानामिति*।। लौकिकाख्यानोदाहरणं तु श्रुत्यर्थावधारणानुकूलतया प्रदर्श्यते तन्मूलत्वादिति मन्तव्यम्। शब्दं व्याख्याय तदाशङ्कापूर्वकं लिङ्गं चेति पदं व्याचष्टे–*नन्वित्यादिना*।। 'लिङ्गं चेति सौत्रश्चकारः स्थपत्यधिकरणन्यायं समुच्चिनोति।।१५।।

धृतेश्च महिम्नोऽस्यास्मिन्नुपपत्तेः।।१६।। धृतेश्च महिम्न इति समानाधिकरणे पञ्चम्यौ। अस्य=महिम्नः, अस्मिन्=ब्रह्मणि, उपलब्धेः=श्रुत्यन्तर उपलब्धत्वादित्यर्थः। शेषं भाष्ये। अस्यास्मिन्नुपलब्धेरिति सूत्रावयवं व्याचष्टे– *अयं च महिमेति*।। शेषं सपष्टम्।।१६।।

प्रसिद्धेश्च।।१७।। जीवपक्षनिवारकमेतत् सूत्रम्। यथाचाकाशशब्दो ब्रह्मणि प्रसिद्धः, तथा प्रतिपादितमस्माभिः–''आकाशस्तल्लिङ्गात्'' इत्यत्र। निगदमस्य भाष्यम्।।१७।।

इतरपरामर्शात्स इति चेन्नासंभवात्।।१८।। यदि वाक्यशेषबलाद् दहरः परमेश्वरो निर्णीयते, तर्हि जीवस्यापि वाक्यशेषे परामर्शात् स एष दहरः किं न स्यात्? ''अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाच'' इति हि वाक्यशेषे संप्रसादशब्देन जीवः पारामृश्यते। कुतः? स्थानशब्देन स्थानिनो लक्षणासंभवाद्

मञ्चशब्देनेव पुरुषस्य, न ब्रह्मणः ; तदसम्बन्धात्, संप्रसादशब्दस्य सुषुप्तिस्थानवाचकत्वादिति–चेत्, न; उदाहृतब्रह्मगुणानां जीवेऽसम्भवात् तस्य दहरत्वकल्पनानुपपत्तेः। यथा चाकाशोपमितित्वापहतपाप्मत्वादयो ब्रह्मधर्मा जीवे न सम्भवन्ति, यथा "दहर उत्तरेभ्यः" इति प्रथमसूत्र एवैतत् प्रपञ्चितं सूत्रभाष्यकाराभ्यामस्माभिश्च। किमर्थं पुनरिहासंभवादिति तदुपन्यासः? इति–चेत्, अधिकाशङ्कावारणार्थम्। सा च सूत्रापात्तोक्ता। किमर्थं तर्हि जीवस्य वाक्यशेषे परामर्श इति चेत्, तस्य प्रयोजनं सूत्रकार एवोपरिष्टाद् वक्ष्यति–"अन्यार्थश्च परामर्श" इति॥१८॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु॥१९॥ यदुक्तम्–अपहतपाप्मवादिगुणानां जीवेऽसंभवाद् वाक्यशेषोऽन्यार्थस्तत्र दहराकाशस्य जीवत्वगमक इति, तन्न मन्यामहे। तद्धि तत्रासंभवाद्युच्यते, यत् तत्र कस्माच्चिद्दपि प्रमाणाद् न प्रतीयते; यथा शशे श्रृङ्गम्, बन्ध्यायां वा पुत्रः जीवे तु दहरवाक्यादुत्तरात्–"य आत्माऽपहतपाप्मे" त्यादिप्रजापतिवाक्यसरूपप्रमाणादपहतपाप्मत्वादिगुणः प्रतीयते। अतस्तत्र तदसंभवोऽसिद्धः। न च–प्रजापतिवाक्येऽपि परमात्मैव तद्गुणकः प्रतिपाद्यते, न जीवात्मेति–वाच्यम्; "य एषोऽक्षिणि पुरुषो दृश्यते" "य एष स्वप्ने महीयानश्चरति" "यत्र तत् सुप्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मे" ति च जागरादिस्थानत्रयसन्बन्धिनो जीवस्यैव तत्र प्रतिपादनात्। न हि ब्रह्मणो जागरादिस्थानत्रयसम्बन्धो घटते, अनिद्रास्वप्नाद्रष्टृरूपत्वात्, जीवस्यैवान्तःकरणयोगेनावस्थात्रयवत्त्वात्। तस्माद् दहरवाक्यशेषे जीवपरामर्शो नान्यार्थः। अपिच "यमात्मानमन्विष्य सर्वान् लोकानाप्नोति सर्वांश्च कामानि" त्यादिना दहराकाशमेवानुकृष्य तत्स्वरूपप्रतिपिपादयिषयोत्तरप्रजापतिवाक्यस्य प्रवर्तनात् तत्रावस्थात्रयसम्बन्धिजीवस्वरूपावधारणपरत्वोक्तेर्जीव एव दहराकाश उत्तरवाक्यादवधार्यत इति चेद् भवान् मन्यते, नैवं भवता मन्तव्यम्; यतः प्रजापतिवाक्येऽप्याविर्भूतस्वरूपो जीवो विवक्ष्यते, न संसारिरूपः। आविर्भूतम्=अभिव्यक्तं ब्रह्म यदविद्यातत्कार्यविनाशेन ब्रह्मस्वरूपात्मस्वरूपं यस्य स तथोक्तः। स च ब्रह्मैव। अतस्तस्यापहतपाप्मत्वादिगुणः संभवेत्; अन्यथा जरद्गवादिवाक्यवत् प्रत्यक्षविरोधेन तद्वाक्यं स्वार्थं जह्यात्। अत एव दहराकाशस्योक्तगुणकस्यानुकृष्य प्रजापतिवाक्ये प्रतिपादनमुपपन्नमित्यभिप्रायः। शेषं भाष्ये॥

ननु–एवं तर्हि जीवत्वस्याविद्यापरिकल्पितत्वाद् आविर्भतस्वरूपस्य च ब्रह्मत्वाद् ब्रह्मैव प्रजापतिवाक्ये प्रतिपाद्यत इति वक्तव्यम्, नाविर्भूतस्वरूपो जीवः प्रतिपाद्यत इति; आविर्भूतस्वरूपत्वजीवत्वयोर्विरोधादिति–चेत्, तत्राह– *भूतपूर्वगत्या जीववचनमिति*॥ सूत्रभाष्यकारयोरिति शेषः। तथाच न विप्रतिषिद्धाभिधानमित्यभिप्रायः। निष्पत्तिशब्दार्थं यथाश्रुतं मन्वानश्चोदयति– *कथं पुनरिति*॥ निष्पत्तिशब्दो ह्युत्पत्तिवचनो लोकप्रसिद्धः। तत्रास्माच्छरीरात्

समुत्थाय स्वेन रूपेणाभिनिष्पद्यत इत्यत्र निष्पत्तिकर्मतया किं जीवस्वरूपमभिप्रेतमिति वाच्यम्, किं वा पारमार्थिकं ब्रह्मरूपम्, किं वौपाधिकं प्रत्यक्षसिद्धं जैवं रूपमिति। तत्र नाद्य इत्याह– *कथं पुनः स्वं च रूपं तेनैव च निष्पद्यत इति संभवति कूटस्थनित्यस्येति*॥ स्वशब्दो ह्यात्माऽऽत्मीयवचनः। तत्रात्मवचनत्वविवक्षायां न तावदात्मन उत्पत्तिर्ब्रह्मणः संभवति; नित्यत्वात्, आत्मीयवचनत्वविवक्षायां तु न धर्मतः ; कूटस्थत्वादित्यर्थः। ननु–अभिव्यक्तावपि लोके निष्पत्तिशब्दो दृष्टः, तद्यथा कूपाकाशो निष्पन्नः 'पटे शौक्ल्यं निष्पन्नम्' इति। तथाच कूटस्थनित्यस्यापि ब्रह्मणोऽभिव्यक्तिरेव जीवस्य स्वेन रूपेण निष्पत्तिरिति न काचिदनुपपत्तिरिति–चेत्, मैवम्; ब्रह्मणो धर्मतः स्वरूपतो वा द्रव्यान्तरेणाविर्भावासंभवेन तदभिव्यक्तेरप्यसंभवादित्याह– *सुवर्णादीनां त्वित्यादिना*॥ ब्रह्मणो धर्मतोऽभिभवाभावे सुवर्णादीनामिति व्यतिरेकदृष्टान्तः, स्वरूपतोऽभिभवाभावे तु तथा नक्षत्रादीनामिति। अस्तु तर्हि जैवेन रूपेण शरीरात् समुत्थायाभिनिष्पद्यते; तस्य कार्यत्वादिति द्वितीयः पक्षः, नेत्याह– *दृष्टविरोधाच्चेति*॥ दृष्टविरोधमेव स्पष्टीकृत्य दर्शयति– *दृष्टिश्रुतिमतिविज्ञातयो हि जीवस्य स्वरूपमिति*॥ अपिरवधारणार्थः। शरीरादसमुत्थितस्यैवेत्यर्थः। तद्रूपस्य शरीराधीनत्वादित्यभिप्रायः। प्रत्यक्षदर्शनमपलपन्तं प्रत्याह– *अन्यथेति*॥ *अत इति*॥ शरीरात् समुत्थान-स्वरूपाभिनिष्पत्योरसंभवादित्यर्थः। जीवस्वरूपनिष्पत्तिविवक्षायां शरीरात् समुत्थानासंभवः, ब्रह्मरूपेण समुत्थानविवक्षायां तु निष्पत्तेरेवासंभव इति। सत्यं यद्यपि कूटस्थनित्यस्य सुवर्णादेरिवात्मसंसर्गः परमार्थतो न संभवति; तथाप्यनिर्वाच्यानाद्यविद्यापरि-कल्पितैरेव देहादिभिरसंसृष्टमपि संसृष्टमिव विविक्तमप्यविविक्तमिव दृष्टयादिरूपेण तत्स्वरूपं स्फटिकमणिरिव लोहितरूपेणात्माविवेकज्ञानात् प्रथत इत्युपपादितमध्यासभाष्ये। यदा तु विवेकज्ञानेन तदध्यासे नष्ट आध्यासिकं दृष्टयादिरूपं हित्वा सत्यानन्दानन्तादितीयचैतन्यात्मना स्वस्वरूपेण प्रथते, तदोच्यते–"अस्माच्छरीरात् समुत्थाय स्वेन रूपेणाभिनिष्पद्यते" इति; अध्यासनिवृत्तिविवेकज्ञानानन्तरपरमानन्दावाप्तेरेव शरीरसमुत्थानस्वरूपाभिनिष्पत्तिशब्दार्थत्वात्। तथाच श्रुत्यन्तरम्–"विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्तीति" "न हि दृष्टेर्द्रष्टुर्विपरिलोपो विद्यते" इति च। न च–उत्पत्तिवचनस्य निष्पत्तिशब्दस्य नित्यनिष्पन्नस्वरूपे प्रयोगोऽयुक्त इति–वाच्यम्; नित्यनिष्पन्नेऽपि भ्रान्त्याऽनिष्पन्नवत् स्थिते तन्नाशे तत्प्रयोगोपपत्तेः, रक्तया गृहीतस्फटिकादौ भ्रान्तिनाशादूर्ध्वं तथा प्रयोगदर्शनात्। एतेन–समुत्थानस्वरूपाभिनिष्पत्त्योः समानकालत्वाद् न क्त्वाप्रयोगो युक्त इति–अपास्तम्; 'मुखं व्यादाय स्वपिती' त्यादौ समानकालेऽपि पूर्वकालतां विवक्षित्वा तत्प्रयोगदर्शनात्। तसमादुपपन्नेयम्–"अस्माच्छरीरात् समुत्थाय स्वेन रूपेणाभिनिष्पद्यते" इति श्रुतिरिति

परिहरति-*अत्रोच्यत इत्यादिना*।। ननु-उक्तमवस्थात्रयसंबन्धपरामर्शात् संसारिजीवस्वरूपमेवात्र प्रजापतिवाक्ये प्रतिपाद्यते, न तस्याविर्भूतस्वरूपमित्याक्षिपति- *कुतश्चैतदेवं प्रतिपत्तव्यमिति*।। वाक्यस्वारस्यादिति परिहरति-*यतो य एषोऽक्षिणि पुरुषो दृश्यत इति*।। ननु-अक्षिणि दृश्यमानच्छायापुरुष एवात्र प्रजापतिवाक्येनामृताभयादिगुणसामानाधिकरण्यात् सिद्ध्येयत्, इत्याशङ्क्याह-*नापि प्रतिच्छायात्मायमिति*।। ननु-तर्हि छायापुरुष एव द्रष्टाऽस्तु, तस्माच्च द्वितीये पर्याये तस्यैव-"एतं त्वेव ते भूयोऽनुव्याख्यास्यामी" ति-चेत्, तत्राह-किञ्चेति*।। छायात्मनोऽस्यायित्वेनोक्तप्रत्यभिज्ञाविषयत्वासंभवाद् द्रष्टृत्वानुपपत्तेरित्याशयः। किञ्चेति पूर्वोक्तदूषणमपि समुच्चिनोति। यद्वा-न केवलमुपक्रमणं तयोरैक्यज्ञापकम्, लौकिकप्रत्यभिज्ञानमप्यस्ति तथेत्याह-*किञ्चेति।। नाह खल्वयमिति*।। अहेति प्रसिद्धार्थो निपातः। खलुशब्दो वाक्यालङ्कारे। अयमिति स्वप्नपुरुषनिर्देशः।।

एकदेशीयव्याख्यानमुपन्यस्य दूषयति-*केचित्त्वित्यादिना*।। ननु-असंनिहितस्यापि प्रकृतस्य प्राधान्यात् सर्वनाम्ना परामर्शो युक्त इति-चेत्, तत्राह-*भूयः श्रुतिश्चोपरुध्येतेति*।। अपरे तु वादिन इति।। कणाद-गौतमादिमतानुयायिनः। अध्वरमीमांसकाः, भर्तृप्रपञ्चमतानुयायिन इत्यर्थः। तिरोहितार्थमन्यत्।।१९।।

अन्यार्थश्च परामर्शः।।२०।। यदुक्तम्-दहराकाशस्येश्वरत्वे किमर्थं तर्हि तद्वाक्यशेषे-"य एष संप्रसादः" इति संप्रसादशब्देन जीवपरामर्श-इति? तत् परिह्रियते-जीवस्यापि संपन्नस्य दहरशब्दोदितोपास्यपरमात्मस्वरूपप्रदर्शनार्थोऽयं संप्रसादशब्देन परामर्शः, न जैवरूपप्रदर्शनार्थः। कुतः? सुषुप्तौ प्रतिदिनं दहराकाशशब्दोदितेन ब्रह्मणाऽनुपासकस्यापि जीवस्यैकीभावदर्शनाद् नोपासनाफले तद्भावे तस्य विप्रतिपत्तिरस्ति, इत्यतदर्थकथनेन तच्छ्रुतेस्तात्पर्यादित्यर्थः।।२०।।

अल्पश्रुतिरिति चेत्तदुक्तम्।।२१।। विशदमस्य भाष्यम्। तदुक्तमिति सूत्रावयवस्य व्याख्यान्तरमाह-*श्रुत्यैव चेदमल्पत्वं प्रत्युक्तमिति*।।२१।। इति पञ्चमं दहराधिकरणम्।।

इति वार्त्तिकम् दहराधिकरणम् समाप्तम्

प्रदीपः

दहर उत्तरेभ्यः।। दहराकाशः, परमात्मा, वाक्यशेषगतब्रह्मलिङ्गवत्त्वादिति सूत्रार्थः। ब्रह्मपुरान्तर्वर्तिहृदयपुण्डरीकान्तरदहराकाशोऽत्र पक्षः। अत्र पुरे ब्रह्मविशेषणाद् दहराकाशो ब्रह्मेति प्रतीयते, आकाशश्रुत्या च भूताकाश इति। तथाच हृदयपुण्डरीकाधिकरणत्वेन निर्दिष्टं ब्रह्मपुरं शरीरमेव भवतीति ब्रह्मशब्दोऽयं शरीरस्वामिनो जीवस्यैव बोधकमिति विवक्षायां तु जीवपक्षोऽपि पूर्वपक्षेऽवसरति।। "आकाशस्तल्लिङ्गादि" त्यत्र वाक्यशेषे ब्रह्मलिङ्गमेव वर्तते, न भूताकाशलिङ्गम्, अत्र तु "यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः" इति बाह्याभ्यन्तरकृतभेदेनोपमानोपमेयभावनिर्देशस्य भूताकाशसाधारण्याद् आकाशश्रुत्युपष्टम्भेन तस्यैव लिङ्गस्य प्रबलत्वाद् वाक्यशेषगतब्रह्मलिङ्गानामभिभवाद् लिङ्गेनैव ब्रह्मलिङ्गाभिभव इत्यधिकाशङ्कासत्त्वादस्पष्टब्रह्मलिङ्गत्वं भूताकाशपक्षेऽपि। ईक्षतिकर्माधिकरणे ध्यायतिकर्मण एवेक्षतिकर्मत्ववदत्रान्वेष्टव्यस्यैवेक्षतिकर्मत्वं न निर्दिष्टम्, किन्तु जिज्ञासितव्यत्वमेव। तच्च परस्माद् ब्रह्मणोऽन्यस्यापि युक्तमिति प्रत्युत्थानात् प्रत्युदाहरणसङ्गतिः।।

अत्रानुसन्धेयानि छान्दोग्याष्टमाध्यायगतानि वाक्यानीमान्येव—"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति। तं चेद् ब्रूयुर्यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यत इति यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति। स ब्रूयाद् यावान्वा अयमाकाशस्तावानेषोऽनतर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति। तं चेद् ब्रूयुरस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि व भूतानि सर्वे च कामा यदैतज्जरामाप्नोति प्रध्वंसते वा किं ततोऽतिशिष्यत इति। स ब्रूयाद् नास्य जरयैतज्जीर्यति न वर्धनास्य हन्यते एतत्सत्यं ब्रह्मपुरमस्मिन् कामाः समाहिता एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पो यथा ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति यं जनपंद यं क्षेत्रभागं तं

तमेवोपजीवन्ति। तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते तद्य इहात्मानमननुविद्य व्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेष्वकामचारो भवत्यथ य इहात्मानमनुविद्य व्रजत्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवति।। इति प्रथमः खण्डः। स यदि पितृलोककामो भवति ङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते। ...यं यमन्तमभिकामो भवति यं यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन सम्पन्नो भवति।। इति द्वितीयः खण्डः।। त इमे सत्याः कामा अनृतापिधानास्तेषां सत्यानां सतामनृतमपिधानं यो यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते।।१।। अथ ये चास्येह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दतेऽत्र ह्यस्यैते सत्याः कामा अनृतापिधानास्तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढाः।।२।।३।। अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति।। अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैनं सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः।।'' इति।। अत्र पूर्वतनप्रकरणं भूमप्रकरणम्, उपरितनं तु प्रकरणम्—अन्तराधिकरणविषयसमानार्थकम्—''य एषोऽक्षिणि पुरुषो दृश्यत'' इतीन्द्रविरोचनोपाख्यानविधया प्रवृत्तं प्रजापतिवाक्यादि चेति मन्तव्यम्।।

अत्र—आकाशश्रुतिः, बाह्याकाशोपमितत्वं दहरत्वं चाकाशपक्षबीजम्। हृदयान्तर्वर्तित्वम्, शरीरजरादिप्रयुक्तजरादिशून्यत्वम्, एष संप्रसाद इति परामर्शः, ''एष स्वप्ने महीयानश्चरती'' त्यादिना प्रजापतिवाक्येन स्वप्नादिपरामर्शश्च जीवपक्षबीजम्। द्यावापृथिव्यदिप्रतिष्ठात्वम्, अपहतपाप्मत्वाजरत्व विमृत्युत्वाशोकत्व विजिघत्सत्वापिपासत्व सत्यकामत्व सत्यसंकल्पत्व कामचारफलकत्वामरत्वादि ब्रह्मलोकपदनिर्देश्यत्व सेतुत्व विधारणत्वादिकं तु ब्रह्मकोटिबीजम्। बलाबलानिर्णयात्त संशयः। अत्रोत्तरेभ्य इति सिद्धान्ते बहुवचननिर्देशः, उत्तरादित्येकवचननिर्देशश्च विप्रतिषेधे भूयसामिति न्यायप्रवृत्त्यप्रवृत्तिभ्यां संशय इति सूचयति। जीवेऽपि संप्रसादशब्देन परामृष्टे ''स्वप्ने महीयानश्चरती'' ति निर्दिष्टे चापहतपाप्मत्वादिश्रवणात्तु नात्र भूयोऽनुग्रहन्यायावतार इति मत्वा त्वधिकरणान्तरम्। एतेन—अन्तर उपपत्तेरित्यनेन गतार्थत्वशङ्कापि—परास्ता।।

अत्र भामत्यभिमतः संशयाकारः—किं दहराकाशादन्यदेव किञ्चिदन्वेष्टव्यम्, विजिज्ञासितव्यं च, उत दहराकाश इति। यदा तु दहराकाशः, तदापि भूताकाश आहो शारीर आत्मा, उत परमात्मेति।।

अत्र वार्तिकम्–"तत्र युक्तम्; दहराकाशस्यान्वेष्टव्यत्वपक्षे भूताकाशजीवयोर्लोकप्रसिद्धत्वेनान्वेष्टव्यत्वासंभवेन संशयानुपपत्तेः, "तस्मिन् यदन्तरि" तिपरविशेषणत्वेन दहराकाशस्योपादानादिति पूर्वपक्षभाष्यानुपपत्तेश्च–इति। अतः किं दहराकाशस्यैवान्वेष्टव्यत्वम्, उत तदन्यस्य; आद्यः सिद्धान्तकोटिः, द्वितीयः–जीवो वा भूताकाशो वेति पूर्वपक्षकोटिरितयेव संशयाकारः प्रदर्शनीय इति।।

मम तु प्रतिभाति–दहराकाशमधिकृत्यापि भामतीमतरीत्या संशयप्रदर्शनं युक्तम्; दहराकाशस्य भूताकाशत्वे जीवत्वेऽपि वा नोपास्यत्वं तु विरुद्धम्; अन्यथा कथं वा वार्तिकमतेऽपि दहराकाशादन्यस्यापि भूताकाशस्य जीवस्यापि वाऽन्वेष्टव्यत्वोपपत्तिः? कथं वा तत्र भूताकाशपक्षस्योत्थितिरपि? तत्राकाशशब्दस्य भूताकाशे रूढत्वाद् भूताकाश एव दहरशब्द इति भाष्यविरोधस्तु वार्तिकमत एव। एतेन–यावान्वा अयमाकाश" इति बाह्याभ्यन्तरभावकृतभेदस्योपमानोपमेयभाव इति भाष्यमपि–व्याख्यातम्। "न चात्र दहरस्याकाशस्यान्वेष्टव्यत्वं च श्रूयत" इति तु भाष्यं दहराकाशादन्यस्य जिज्ञास्यत्वमिति कोटयन्तरनिरासकमेव, न दहराकाशपक्षकपूर्वपक्षकोटिद्वयनिरासकमिति न कोऽपि दोषः। यथा चास्याकाशाधिकरणेनागतार्थत्वं तथा पूर्वमेवोपवर्णितम्। तत्र योऽयमिति तु दहराकाशपक्षसंशयमात्रनिरूपणपरम्, नान्यपक्षकतन्निरूपणपरम्। अन्यस्य जिज्ञास्यत्वपक्षस्तु बल्बज इत्यभिप्रायो भाष्यकाराणाम्। अत एव पूर्वपक्षेपसंहारे–न चात्रेत्यादिना तदुपन्यासमात्रं कृतम्। तथाच स्वयपव्याक्रियैव पराक्रियेति न्यायेनैव तन्निराकरणं भाष्याभिमतमिति भावत्याशयः। इदं तूभयसम्मतं यत् परविशेषणत्वेन श्रुतोऽपि दहराकाश एवात्रान्वेष्टव्य इति। इदमेवात्रालोचनीयम्–यत् कथमन्तः पदार्थविशेषितो दहराकाश इति। यदि संनिधानात्, तर्हि अन्यद्वेति पक्षनिरासोऽर्थसिद्धः, इति न तत्र विशिष्टः प्रयत्नः सूत्रकाराणामित्येवोभाभ्यां वक्तव्यमिति निष्कर्षः। तथाच दहराकाशपक्षक एव भूताकाश जीव परमात्मकोटित्रयात्मकः संशय इति मन्तव्यम्। यथाच जैवरूपमपि न लोकप्रसिद्धम्; तद्विशेषे बहुशो विप्रतिपत्तेः, तथा जिज्ञासाधिकरणोपसंहारे भाष्य एव व्यक्तम्। तदिदमुक्तम्–*तत्र योऽयं दहरे हृदयपुण्डरीके दहर आकाशः श्रुतः, स किं भूताकाशः, अथवा विज्ञानात्मा, अथवा परमात्मेति*।। तथाचैतद्भाष्यविरोधोऽपि वार्तिकमते।।

संशयबीजं निर्दिशति–*आकाशब्रह्मपुरशब्दाभ्यामित्यादिना*।। तत्र भूताकाशविज्ञानात्मपक्षौ पूर्वपक्षौ संगृह्णाति–*तत्राकाशशब्दस्येत्यादिना*।। अनेन पूर्वोक्तं भूताकाशपक्षे हेतुद्वयम्, जीवपक्षानुग्राहकहृदयपुण्डरीकान्तस्थत्वदहरत्वादिकं च संगृहीतम्। संप्रसादशब्देन निर्देशादिस्तु–"इतरपरामशात्" "उत्तराच्चेदि" ति सूत्राभ्यां गहीष्यते। न चात्रेति वाक्यं तु

दहराकाशान्यपक्षनिरासार्थम्। तल्लिङ्गमाह- *''तस्मिन्यदन्तरितीति*।। सिद्धान्तं संगृह्णाति- *परमेश्वर इति*।। इदं चाधिकरणं सगुणविषयमेव, एवमपि नास्य पादस्य निर्गुणप्राधान्यविरोध इत्यनेन सूच्यते। उत्तरेभ्य इति व्याचष्टे- *वाक्यशेषेत्यादिना*।। उपमानोपमेयभावनिर्देशानुपपत्तिः, द्यावापृथिव्यादिप्रतिष्ठा च ब्रह्मलिङ्गे प्रधानहेतू। ननु-दहरत्वं भूताकाशस्य जीवात्मनो वा लिङ्गमुपक्रमगतं प्रबलमित्यत आह- *तत्र पुण्डरीकदहरत्वेनेत्यादिना*।। तथाच दहरत्वमत्र विवक्षितमिति न तल्लिङ्गमेवात्रेति भावः। दहरत्वनिवृत्तावेवोपमानोपमेयभावनिर्देशस्य तात्पर्यमित्याशङ्कान्तरनिरासपूर्वकमुपपादयति- *ननु परमेश्वरस्येति*।। कल्पितभेदेनोपमानोपमेयभावे तदुत्तरलिङ्गानामनुपपत्तिमाह- *न च कल्पितेति*।। भूताकाशपक्षे सर्वथानुपपन्नात्मत्वादिलिङ्गानि संगृह्णाति- *एष आत्मेति*।। उपमानोपमेयभावसूचितदहरत्वनिवृत्तिः, द्यावापृथिव्यादिप्रतिष्ठात्वं च जीवपक्षस्यापि विरुद्धमेव, आत्मत्वं तु न तसय विरुद्धमिति जीवपक्षमुज्जीवितमिव मत्वाह- *यद्यपीति*।। जीवपक्षासाधारणहेतुमनुभाष्य निराकरोति- *यदप्युक्तमित्यादिना*।।१४।।

उत्तरानपरान् कांश्चन खण्डान्तरगतानपि प्रकृतविषयत्वादुत्तरशब्दविवक्षितान् सूचयितुं सूत्रे- *गति शब्दाभ्यां तथाहि दृष्ट लिङ्गं च।।१५।। धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः।। इति*।।१६।। दहराकाशे गतिः ब्रह्मलोकशब्दश्च तस्य ब्रह्मतां गमयतः, ब्रह्मण्येव गतिः प्रत्यक्षसिद्धा। लिङ्गं च ब्रह्मलोकशब्दस्य कर्मधारयतायां वर्तत इति प्रथमसूत्रार्थः। धृतिरूपमहिमवत्त्वाद् दहराकाशो ब्रह्म, द्युभ्वाद्यधिकरणविषयवाक्ये ब्रह्मण्येव सेतुत्वविधारणत्वादीनां व्यवस्थापनादिति द्वितीयसूत्रार्थः। निगदमनयोर्भाष्यम्।।१५।।१६।।

आकाशश्रुतिविरोधपरिहारार्थं सूत्रम्- *प्रसिद्धेश्च*।।१७।। निगदमस्य भाष्यम्।।१७।।

संप्रसादपदनिर्देशस्य जीवलिङ्गत्वमाशङ्क्य निराकर्तुं सूत्रद्वयम्- *इतरपरामर्शादिति चेत् नासंभवात्*।।१८।। *उत्तराञ्चेदाविर्भूतस्वरूपस्तु*।।१९।। इति। ''यावान्वा अयमाकाश'' इत्युपमानोपमेयभावनिर्देशलब्धदहरत्वनिवृत्तेजीवेऽसंभावात्, आकाशोपमितत्वासंभवादिति प्रथमसूत्रार्थः। इत एवाकृष्य भाष्यकारैः सिद्धान्तपक्षो पक्षेपावसरे निर्दिष्टमिदमिति न पौनरुक्त्यशङ्का, न वा पूर्वतनस्योपन्यासस्य सूत्रानारूढत्वम्। द्वितीयसूत्रेण तु ब्रह्मपक्षस्य वायमुपवृंहकः, न जीवपक्षस्येति प्रतिपाद्यते।।१९।।

अथ जीवस्वरूपेण निर्देशे कारणमाह- *अन्यार्थश्च परामर्श इति*।।२०।। अन्यत् सर्वं वार्तिकादौ स्पष्टम्।।२०।।२१।। इति पञ्चमं दहराधिकरणम्।।

इति प्रदीप दहराधिकरणम् समाप्तम्

भामती

"अथ यदिदमस्मिन् ब्रह्मपुरे दहरं सूक्ष्मं गुहाप्रायं पुण्डरीकसन्निवेशं वेश्म दहरोऽस्मिन्नन्तराकाशशतस्मिन्यदन्तस्तदन्वेष्टव्यम्"। आगमाचार्य्य पदेशाभ्यां श्रवणं तदविरोधिना तर्केण मननं च, तदन्वेषणं तत्पूर्वकेण चादरनेरन्तर्य्यदीर्घकालासेवितेन ध्यानाभ्यासपरिपाकेण साक्षात्कारो विज्ञानम्। विशिष्टं हि तज्ज्ञांन पूर्वेभ्य:। तदिच्छा विजिज्ञासनम्।

अत्र संशयमाह *तत्र इति*। तत्र प्रथमं तावदेष संशय:—किं दहराकाशादन्यदेव किञ्चिदन्वेष्टव्यं विजिज्ञासितव्यं च उत दहराकाश इति। यदापि दहराकाशोऽन्वेष्टव्यस्तदापि किं भूताकाश आहो शारीर आत्मा, किं वा परमात्मेति। संशयहेतुं पृच्छति *कुत: इति*। तद्धेतुमाह *आकाशब्रह्मपुरशब्दाभ्याम् इति*। तत्र प्रथमं तावद् भूताकाश एव दहर इति पूर्वपक्षयति *तत्राकाशशब्दस्य भूताकाशे रूढत्वाद् इति*। एष तु बहुतरोत्तरसंदर्भविरोधात्तुच्छ: पूर्वपक्ष इत्यपरितोषेण पक्षान्तरमालम्बते पूर्वपक्षी *अथ वा जीवो दहर इति*। प्राप्तं युक्तमित्यर्थ:। तत्र—

आधेयत्वाद्विशेषाद्वा पुरं जीवस्य युज्यते।

देहो न ब्रह्मणो युक्तो हेतुद्वयवियोगत:॥

असाधारणेन हि व्यपदेशा भवन्ति। तद्यथा क्षितिजलपवनबीजादिसामग्री-समवधानजन्माऽप्यङ्कुर: शालिबीजेन व्यपदिश्यते शाल्यङ्कुर इति। न तु क्षित्यादिभि:, तेषां कार्य्यान्तरेष्वपि साधारण्यात्। तदिह शरीरं ब्रह्मविकारोऽपि न ब्रह्मणा व्यपवेष्टव्यम्। ब्रह्मण: सर्वविकारकारणत्वेनातिसाधारण्यात्। जीवभेदधर्माधर्मोपार्जित तदित्यसाधारणकारणत्वाज्जीदेन व्यपदिश्यत इति युक्तम्। अपि च ब्रह्मपुर इति सप्तम्यधिकरणे स्मर्यते, तेनाधेयेनानेन सम्बद्धव्यम्। न च ब्रह्मण: स्वे महिम्नि व्यवस्थितस्यानाधेयस्याधारसम्बन्ध: कल्पते। जीवस्त्वाराग्रमात्र इत्याधेयो भवति। तस्मात् ब्रह्मशब्दो रूढिं परित्यज्य देहादिवृहणतया जीवे यौगिको वा भाक्तो वा व्याख्येय:। चैतन्यं च भक्ति:। उपाधानानुपधाने तु विशेष:। *वाच्यत्वं* गम्यत्वम्। स्यादेतत्—जीवस्य पुरं भवतु

शरीरं, पुण्डरीकदहरगोचरता त्वन्यस्य भविष्यति, वत्सराजस्य पुर इवोज्जयिन्यां मैत्रस्य सद्मेत्यत आह *तत्र पुरस्वामिन इति*। अयमर्थ: वेश्म खल्वधिकरणमनिर्दिष्टाधेवमाधेयविशेषापेक्षायां पुरस्वामिनः प्रकृतत्वात्तेनैवाधेयेन सम्बद्धं सदनपेक्षं नाधेयान्तरेण सम्बन्ध कल्पयति। ननु तथापि शरीरमेवास्य भोगायतनमिति को हृदयपुण्डरीवेऽस्य विशेषो यत्तदेवास्य सद्मेत्यत आह *मन उपाधिकश्च जीव: इति*। ननु मनोऽपि चलतया सकलदेहवृत्ति पर्यायेणेत्यत आह *मनश्च प्रायेण इति*। आकाशशब्दश्चारूपत्वादिना सामान्येन जीवे भाक्तः। अस्तु वा भूताकाश एवायमाकाशशब्दो दहरोऽस्मिन्नन्तराकाश इति, तथाप्यदोष इत्याह *न चात्र दहरस्य आकाशस्य अन्वेष्यत्वम् इति*।

एवं प्राप्ते उच्यते–भूनाकाशस्य तावन्न दहरत्वं यावान्वाऽयमाकाशस्तावानेषोऽन्तर्हृदय आकाश इत्युपमानविरोधात्। तथाहि–

तेन तस्योपमेयत्वं रामरावणयुद्धबत्।
अगत्या भेदमारोप्य गतौ सत्यां न युज्यते॥

अस्ति तु दहराकाशस्य ब्रह्मत्वेन भूताकाशाद्भेदेनोपमानस्य गतिः। न चानवच्छिन्नपरिमाणमवच्छिन्नं भवति। तथा सत्यवच्छेदानुपपत्तेः। न भूताकाशमानत्वं ब्रह्मणोऽत्र बिधीयते, येन ज्यायानाकाशादिति श्रुतिविरोध: स्यात्, अपि तु भूताकाशोपमानेन पुण्डरीकोपाधिप्राप्तं दहरत्वं निवर्त्यते। अपि च सर्वं एवोत्तरे हेतवो दहराकाशस्य भूताकाशत्वं व्यासेधन्तीत्याह *न च कल्पितभेद इति*। नापि दहराकाशो जीव इत्याह *यद्यप्यात्मशब्द इति*।

उपलब्धेरधिष्ठानं ब्रह्मणो देह इष्यते।
तेनासाधारणत्वेन देहो ब्रह्मपरं भवेत्॥

देहे हि ब्रह्मोपलभ्यते इत्यसाधारणतया देहो ब्रह्मपुरमिति व्यपदिश्यते, न तु ब्रह्मविकारतया। तथा च ब्रह्मशब्दार्थो मुख्यो भवति। अस्तु वा ब्रह्मपुरं जीवपुरं, तथापि यथा वत्सराजस्य पुरे उज्जयिन्यां मैत्रस्य सद्म भवति, एवं जीवस्य पुरे हृत्पुण्डरीकं ब्रह्मसद्‌नं भविष्यति, उत्तरेभ्यो ब्रह्मलिङ्गेभ्यो ब्रह्मणोऽवधारणात्। ब्रह्मणो हि बाधके प्रमाणे बलीयसि जीवस्य च साधके प्रमाणे सति ब्रह्मलिङ्गानि कथञ्चिदभेदविवक्षया जीवे व्याख्यायन्ते। न चेह ब्रह्मणो बाधकं प्रमाणं साधकं वाऽस्ति जीवस्य। ब्रह्मपुरव्यपदेशश्चोपपादितो ब्रह्मोपलब्धिस्थानतया। अर्भकौकस्त्वं चोक्तम्। तस्मात् सति सम्भवे ब्रह्मणि तल्लिङ्गानां नाब्रह्मणि व्याख्यानमुचितमिति ब्रह्मैव दहराकाशो न जीवभूताकाशाविति। श्रवणमननमनुविद्य ब्रह्मानुभूय चरणं चारस्तेषां कामेषु चरणं भवतीत्यर्थः।

स्यादेतद् दहराकाशस्यान्वेष्यत्वे सिद्धे तत्र विचारो युज्यते, न तु तदन्वेष्टव्यम्, अपि तु तदाधारमन्यदेव किञ्चिदित्युक्तमित्यनुभाषते। *यदप्येतद् इति*। अनुभाषितं दूषयति *अत्र ब्रूमः इति*। यद्याकाशाधारमन्यदन्वेष्टव्यं भवेत्तदेवोपरि व्युत्पादनीयमाकाशव्युत्पादनं तु वत्रोपयुज्यते इत्यर्थः। चोदयति *न त्वेदपि इति*। आकाशकथनमपि तदन्तर्वर्त्तिवस्तुसद्भावप्रदर्शनायैव। अथाकाशपरमेव कस्मान्न भवतीत्यत आह *तं चेद् ब्रूयुः इति*। आचार्य्येण हि दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तन्दयेष्ठव्यं तद्वाव विजिज्ञासितव्यमित्युपदिष्टेऽन्तेवासिनाऽऽक्षिप्तं, किं तदत्र विद्यते यदन्वेष्टव्यम्? पुण्डरीकमेव तावत् सूक्ष्मतरं तदवरुद्धमाकाशं सूक्ष्मतमम्, तस्मिन् सूक्ष्मतमे किमपरमस्ति? नास्त्येवेत्यर्थः। तत् किमन्वेष्टव्यमिति। तदस्मिन्नाक्षेपे परिसमाप्ते समाधानावसर आचार्यस्याकाशोपमानोपक्रमं वचः, उभे अस्मिन्द्यावापृथिवी समाहिते इति। तस्मात् पुण्डरीकावरुद्धाकाशाश्रये द्यावापुथिव्यावेवान्वेष्टव्ये उपदिष्टे, नाकाश इत्यर्थः। परिहरति *नैतदेवम्*। *एवं हि इति*। स्वादेतद्—एवमेवैतन्नो खल्वभ्युपगमा एव दोषत्वेन चोद्यन्त इत्यत आह *तत्र वाक्यशेषे इति*। वाक्यशेषो हि दहराकाशात्मवेदनस्य फलवत्त्वं ब्रूते, यच्च फलवत् तत् कर्त्तव्यतया चोद्यते, यच्च कर्त्तव्यं तदिच्छतीति तदन्वेष्टव्यं तद्वाव विजिज्ञासित्वव्यमिति दहराकाशविषयमवतिष्ठते। स्यादेतद्—द्यावापृथिव्यावेवात्मानो भविष्यतः, ताभ्यामेदात्मा लक्षयिष्यते, आकाशशब्दवत्। ततश्चाकाशाधारौ तावेव परामृश्येते इत्यत आह *अस्मिन् कामाः समाहिताः* प्रतिष्ठिताः। *एष आत्मापहतपाप्मा इति*। *अनेन प्रकृतं द्यावापृथिवीसमााधनाधारमाकाशमाकृष्य*। द्यावापृथिव्याद्यभिधानव्यवहितमपीति शेषः। ननु सत्यकामज्ञानस्यैतत् फलं, तदनन्तरं निर्देशात्, न तु दहराकाशवेदनस्येत्यत आह *समुच्चयार्थेन चशब्देन इति*। अस्मिन् कामा इति च एष इति चैकवचनान्तं न द्वे द्यावापृथिव्यौ परामृष्टमर्हतीति दहराकाश एव परामृष्टव्य इति समुदायार्थः। तदनेन क्रमेण तस्मिन्यदन्तरित्यत्र तच्छब्दोऽनन्तरमप्याकाशमतिलङ्घ्य हृत्पुण्डरीकं परामृशतीत्युक्तं भवति। तस्मिन् हृत्पुण्डरीके यदन्तराकाशं तदन्वेष्टव्यमित्यर्थः।।१४।।

उत्तरेभ्य इत्यस्य प्रपञ्चः। एतमेव दहराकाशं प्रक्रम्य वताहो कष्टमिदं वर्त्तते जन्तूनां तत्त्वावबोधविकलानां यदेभिः स्वाधीनमपि ब्रह्म न प्राप्यते। तद्यथा चिरन्तननिरूढनिविडमलपिहितानां कलधौतशकलानां पथि पतितानामुपर्य्युपरि सञ्चरद्भिरपि पान्थैर्धनायद्भिर्ग्रावखण्डनिवहबिभ्रमेणैतानि नोपादीयन्तइत्यभिसन्धिमती साद्भुतमिव सखेदमिव श्रुतिः प्रवर्त्तते—'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' इति। स्वापकाले हि सर्वं एवायं विद्वानविद्वांश्च जीवलोको हृत्पुण्डरीकाश्रयं दहराकाशाख्यं ब्रह्मलोकं प्राप्तोऽप्यनाद्यविद्यातमःपटलपिहितदृष्टितया ब्रह्मभूयमापन्नोऽहमस्मीति न वेद सोऽयं ब्रह्मलोकशब्दस्तद्गतिश्च प्रत्यहं जीवलोकस्य

दहराकाशस्यैव ब्रह्मरूपलोकतामाहतु:। तदेतदाह भाष्यकार: *इतश्च परमेश्वर एव दहरो यस्माद्दहरवाक्यशेष: इति*। तदनेन गतिशब्दौ व्याख्यातौ 'तथाहि दृष्टम्' इति सूत्रावयवं व्याचष्टे *तथाह्यहरहर्जीवानाम् इति*। वेदे च लोके च *दृष्टम्*। यद्यपि सूषुप्तस्य ब्रह्मभावे लौकिकं न प्रमाणान्तरमस्ति, तथापि वैदिकीमेव प्रसिद्धिं स्थापयितुमुच्यते *इदृशी नामेयं वैदिकी प्रसिद्धिर्य्यल्लोकेऽपि गीयते इति* : यथा श्रुत्यन्तरे यथा च लोके तथेह ब्रह्मलोकशब्दोऽपीति योजना। 'लिङ्गं च' इति सूत्रावयवव्याख्यानं चोद्यमुखेनावतारयति *ननु कमलासनलोकमपि इति*। परिहरति *गमयेद्यदि ब्रह्मणो लोक: इति*। अत्र तावन्निषादस्थपतिन्यायेन षष्ठीसमासात् कर्मधारयो बलीयानिति स्थितमेव, तथापीह षष्ठीसमासनिराकरणेन कर्मधारयस्थापनाय लिङ्गमप्यधिकमस्तीति तदप्युक्तं सूत्रकारेण। तथाहि लोकवेदप्रसिद्धाहरहर्ब्रह्मलोकप्राप्त्यभिधानमेव लिङ्गं कमलासनलोक-प्राप्तैर्विपक्षादसम्भवाद्व्यावर्त्तमानं षष्ठीसमासाशङ्कां। व्यावर्त्तयद्दहराकाशप्राप्तावेवावतिष्ठते, न च दहराकाशो ब्रह्मणो लोक:, किन्तु तद्ब्रह्मेति। ब्रह्म च तल्लोकश्चेति कर्मधारय: सिद्धो भवति। लोक्यत इति लोक:। हृत्पुण्डरीकस्थ: खल्वयं लोक्यते। यत् खलु पुण्डरीकस्थमन्त: करणं तस्मिन्विशुद्धे प्रत्याहृतेतरकरणानां योगिनां निर्मल इवोदके चन्द्रमसो विम्बमतिस्वच्छं चतन्यं ज्योति: स्वरूपं ब्रह्मावलोक्यत इति।।१५।।

सौत्रो धृतिशब्दो भाववचन:। धृतेश्च परमेश्वर एव दहराकाश:। कुत:? अस्य धारणलक्षणस्य महिम्नोऽस्मिन्नेवेश्वर एव श्रुत्यन्तरेषूपलब्धे:। निगदव्याख्यानमस्य भाष्यम्।।१६।।

न चेयमाकाशशब्दस्य ब्रह्मणि लक्ष्यमाणविभुत्वादिगुणयोगाद् वृत्ति: साम्प्रतिकी। यथा रथाङ्गनामा चक्रवाक इति लक्षणा, किन्त्वत्यन्तनिरूढेति सूत्रार्थ:। ये त्वाकाशशब्दो ब्रह्मण्यपि मुख्य एव नभोवदित्याचक्षते, तैरन्यायश्चानेकार्थत्वमिति चानन्यलभ्य: शब्दार्थ इति च मीमांसकानां मुद्राभेद: कृत:। लभ्यते ह्याकाशशब्दाद्विभुत्वादिगुणयोगेनापि ब्रह्म। न च ब्रह्मण्वेव मुख्यो नभसि तु तेनैव गुणयोगेन वर्त्स्यतीति वाच्यम्। लोकाधीनावधारणत्वेन शब्दार्थसम्बन्धस्य वैदिकपदार्थप्रत्ययस्य तत्पूर्वकत्वात्। ननू 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश:' इति व्यतिरेकनिर्देशान्न लक्षणा युक्ता। न हि भवति गङ्गाया: कूले विवक्षिते गङ्गाया गङ्गेति प्रयोग:। तत्किमिदानीं पोर्णमास्यां पौर्णनास्या यजेतामावास्यायामवास्ययेत्यसाधुर्वैदिक: प्रयोग:? न च पौर्णमास्यमावास्या-शब्दावाग्नेयादिषु मुख्यौ। यच्चोक्तं यत्र शब्दादनधिगतार्थप्रतीतिस्तत्र लक्षणा, यत्र पुनरन्यतोऽर्थे निश्चिते शब्दप्रयोगस्तत्र वचकत्वमेवेति। तदयुक्तम्, उभयस्यापि व्यभिचारात्–सोमेन यजेतेति शब्दादर्थ: प्रतीयते, न चात्र कस्यचिल्लाक्षणिकत्वमृते वाक्यार्थात्। न च 'य एवं विद्वान् पौर्णमासी यजते य एवं विद्वानमावास्याम्' इत्यत्र पौर्णमास्यमावास्याशब्दौ न लाक्षणिकौ। तस्माद्यत्किंचिदेतदिति।।१०।।

सम्यक् प्रसीदत्यस्मिन् जीवो विषयेन्द्रियसंयोगजनितं कालुष्यं जहातीति सुषुप्ति। सम्प्रसादो जीवस्यावस्थाभेदः न ब्रह्मणः। तथा शरीरात्समुत्थानमपि शरीराश्रयस्य जीवस्य, न त्वनाश्रयस्य ब्रह्मणः। तस्माद्यथा पूर्वोक्तैर्वाक्यशैषगतैर्लिङ्गैर्ब्रह्मावगम्यते दहराकाशः, एवं वाक्यशेषगताभ्यामेव सम्प्रसादसमुत्थानाभ्यां दहराकाशो जीवः कस्मान्नावगम्यते? तस्मान्नास्ति विनिगमनेनि शङ्कार्यः। *नासम्भवात्*। सम्प्रसादसमुत्थानाभ्यां हि जीवपरामर्शो न जीवपरः, किन्तु तदीयतात्त्विकरूपब्रह्मभावपरः। तथा चैष परामर्शो ब्रह्मण एवेति न सम्प्रसादसमुत्थाने जीवलिङ्गम्, अपि तु ब्रह्मण एव तादर्थ्यादित्यग्रे दक्ष्यते। आकाशोपमानादयस्तु ब्रह्माव्यभिचारिणश्च **ब्रह्मपराश्चेत्यस्ति विनिगमनेत्यर्थः॥१८॥**

दहराकाशमेव प्रकृत्योपाख्यायते - यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् समात्मानं विविदिषन्तो सुरासुरराजाविन्द्रविरोचनौ समित्पाणी प्रजापतिं वरिवसितुमाजग्मतुः। आगत्य च द्वात्रिंशतं वर्षाणि तत्परिचरणपरौ ब्रह्मचर्य्यमूषतुः। अथैतौ प्रजापतिरुवाच–किं कामाविहस्थौ युवामिति। तावूचतुः–य आत्माऽपहतपाप्मा तमावां विविदिषाव इति। ततः प्रजापतिरुवाच–य एषोऽक्षणि पुरुषो दृश्यते एष आत्माऽपहतपाप्मत्वादिगुणः, यद्विज्ञानात्सर्वलोककामावाप्तिः। एतदमृतमभयमु। अथैतच्छ्त्वैतावप्रक्षीणकल्मषावरणतया छायापुरुषं जगृहतुः। प्रजापतिञ्च पप्रक्ष्छतुः–अथ योऽयं भगवोऽप्सु दृश्यते यथादर्शे यश्च खङ्गादौ कतम एतेष्षसावथ वैक एव सर्वेष्विति? तमेतयोः श्रुत्वा प्रश्नं प्रजापतिर्वताहो सुदूरमुद्भ्रानतावेतौ, अस्माभिरक्षिस्थान आत्मोपदिष्टः, एतौ च छायापुरुषं प्रतिपन्नौ, तद्यदि वयं भ्रान्तौ स्थ इति ब्रूमस्ततः स्वात्मनि समारोपितपाण्डित्यबहुमानौ विमानितौ सन्तौ दौर्मनस्येन यथावदुपदेशं न गृह्णीयाताम्, इत्यनयोराशयमनुरुध्य यथार्थं ग्राहयिष्याम इत्यभिसन्धिमान् प्रत्युवाच। उदशराव आत्मानमवेक्षेथामस्मिन्यत्पश्यथस्ततब्रूतमिति। तौ च दृष्ट्वा सन्तुष्टहृदयौ नाब्रूताम्। अथ प्रजापतिरेतौ विपरीतग्राहिणौ मा भूतामित्याशयवान्पप्रच्छ–किमत्रापश्यतमिति। तौ होचतुः। यथैवावामतिचिरब्रह्मचर्य्यचरणसमुपजातायतनखलोमादिमन्तावेवमावयोः प्रतिरूपकं नखलोमादि-मदुदशरावेऽपश्यावेति। पुनरेतयोश्छायात्मविभ्रममपनिनीषुर्यथैव हि छायापुरुष उपाजनापायधर्मा भेदेनावगम्यमान आत्मलक्षणबिरहान्नात्मैवेबमेवेदं शरीरं नात्मा, किन्तु ततो भिन्नमित्यन्वयव्यतिरेकाभ्यामेतौ जानीयातामित्याशयवान् प्रजापतिरुवाच। साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भृत्वा पुनरुदशरावे पश्यतमात्मानम्, यच्चात्र पश्यथस्तद् ब्रूतमिति। तौ च साध्वलङ्कृतौ सुवसनौ छिन्ननखलोमानौ भूत्वा तथैव चक्रतुः। पुनश्च प्रजापतिना पृष्टौ तामेव छायात्मन ऊचतुः। तदुपश्रुत्य प्रजापतिरहो बताद्यापि न प्रशान्त एनयोर्विभ्रमः, तद्यथाभिमतमेवात्मतत्त्वं कथयामि तावत्।

कालेन कल्मषे क्षीणेऽस्मद्वचनसन्दर्भपौर्वापर्य्यालोचनयाऽऽत्मतत्त्वं प्रतिपत्स्येते स्वयमेवेति मत्वोवाच–एष आत्मैतदमृतमभयमेतद् ब्रह्मेति। तयोर्विरोचनो देहानुपातित्वाच्छायाया देह एवात्मतत्त्वमिति मत्वा निजसदनमागत्य तथैवासुरानुपदिदेशच। देवेन्द्रस्त्वप्राप्तनिजसदनोऽध्वन्येव किञ्चिद्विरलकल्मषतया छायात्मनि शरीरगुणदोषानुविधायिनि तं तं दोषं परिभावयन् नाहमत्र छायात्मदर्शने भोग्यं पश्यामीति प्रजापतिसमीपं समित्पाणिः पुनरेवेयाय। आगतश्च प्रजापतिनाऽऽगमनकारणं पृष्टः पथि परिभावितं जगाद। प्रजापतिस्तु सुव्याख्यातमप्यात्मतत्त्वमक्षीण-कल्मषावरणतया नाग्रहीस्तत् पुनरपि तत्प्रक्षयाय चरापराणि द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमथ प्रक्षीणकत्मषाय ते अहमेतमेवात्मानं भूयोऽनुव्याख्यास्यामीत्यवोचत्। स च तथा चरितब्रह्मचर्यः सुरेन्द्रः प्रजापतिमुपससाद। उपसन्नाय चास्मै प्रजापतिव्यचिष्टे, य आत्माऽपहतपाप्मादिलक्षणोऽक्षिणि दर्शितः सोऽयं य एष स्वप्ने महीयमानो वनितादिभिरनेकधा स्वप्नोपभोगान् भुञ्जानो विहरतीति। अस्मिन्नपि देवेन्द्रो भयं ददर्श। यद्यप्ययं छायापुरुषवन्न शरीरधर्माननुपतति, तथापि शोकभयादिविविधबाधानुभवान्न तत्राप्यस्ति स्वस्तिप्राप्तिरित्युक्तवति मधवति पुनरपराणि चर द्वात्रिंशतं वर्षाणि स्वच्छं ब्रह्मचर्यमिदानीमप्यक्षीणकल्मषोऽसीत्यूचे प्रजापतिः। अथास्मिन्नेवङ्कारमुपसन्ने मघवति प्रजापतिरुवाच–य एष आत्माऽपहतपाप्मादिगुणो दर्शितोऽक्षिणि च स्वप्ने च स एष यो विषयेन्द्रियसंयोगविरहात्प्रसन्नः सुषुप्तावस्थायामिति। अत्रापि नेन्द्रो निर्ववार। यथा हि जाग्रद्वा स्वप्नगतो वाऽयमहमस्मीति इमानि भूतानि चेति विजानाति नैवं सुषुप्तः किञ्चिदपि वेदयेत तदा खल्वयमचेतयमानोऽभावं प्राप्त इव भवति। तदिह का निर्वृत्तिरिति। एवमुक्तवति मघवति वताद्यापि न ते कल्मषक्षयोऽभूत्। तत् पुनरपराणि चर पञ्च पर्षाणि ब्रह्मचर्यमित्यवोचत्प्रजापतिः। तदेवमस्य मघोनस्त्रिभिः पर्यायैर्व्यतीषुः षणवतिर्वर्षाणि। चतुर्थे च पर्याये पञ्च दर्षाणीत्येकोत्तरं शतं वर्षाणि ब्रह्मचर्यं चरतः सहस्त्रक्षस्य सम्पेदिरे। अथास्मै ब्रह्मचर्यसंपदुन्मृदितकल्मषाय मघवते य एषोऽक्षणि यश्च स्वप्ने यश्च सुषुप्तावनुस्यूत एष आत्माऽपहतपाप्मादिगुणो दर्शितः तमेव मघवन् मर्त्यं वै शरीरमित्यादिना विस्पष्टं व्याचष्टे प्रजापतिः।

अयमस्याभिसन्धिः–यावत् किञ्चित् सुखं दुःखमागमापायि तत् सर्वं शरीरेन्द्रियान्तःकरणसम्बन्धि, न त्वात्मनः। स पुनरेतानेव शरीरादीन् अनाद्यविद्यावासनावशादात्मत्वेनाभिप्रतीतस्तद्गतेन सुखदुःखेन तद्वन्तमात्मानमनुमन्यमानोऽनुतप्यते। तदा त्वयमपहतपाप्मादिलक्षणमुदासीनमात्मानं देहादिभ्यो विविक्तमनुभवति, अथास्य शरीरवतोऽपयशरीरस्य न देहादिधर्मसुखदुःखप्रसङ्गोऽस्तीति नानुतप्यते, केवलमयं निजे चैतन्यानन्दधने रूषे व्यवस्थितः समस्तलोककामान् प्राप्तो भवति। एतस्यैव हि परमानन्दस्य मात्राः

सर्वे कामा:, दु:खं त्वविद्यानिर्माणमिनि ग विद्वानाप्नोति। अशीलितोपनिषदां व्यामोह इ जायते, तेषामनुग्रहायेदमुपाख्यानमवर्तयम्।। एवं व्यवस्थित उत्तराद्वाक्यसन्दर्भात् प्राजापत्यादक्षिणि च स्वप्ने च सुषुप्ते च चतुर्थे च पर्यांये एष सम्प्रसादोऽस्माच्छरीरादुत्थायेति जीवात्मैवापहतपाप्मादिगुण: श्रुत्योच्यते। नो खलु परस्याक्षिस्थानां सम्भवति, नापि स्वप्नाद्यवस्थायोग:, नापि शरीरात् समुत्यानम्। तस्माद्यस्यैतत् सर्वं सोऽपहपाप्मादिगुण: श्रुत्योक्त:। जीवस्य चैतत् सर्वमिति स एवापहतपाप्मादिगुण: श्रुत्योक्त इति नापहपाप्मादिभि: परं ब्रह्म गम्यते। ननु जीवस्यापहतपाप्मत्वादयो न सम्भवन्तीत्युक्तम्। वचनाद्भविब्यन्ति। किमिव वचनं न कुर्यात्? नास्ति वचनस्यातिभार:। न च मानान्तरविरोध:। नहि जीव: पाप्मादिस्वभाव:, किन्तु वाग्बुद्धिशरीरारम्भसम्भवोऽस्य पाप्मादि: शरीराद्यभावे न भवति धूम इव धूमध्वजाभाव इति शङ्कार्थ:।

निराकरोति *तं प्रतिब्रूयात्, आविर्भूतस्वरूपस्तु*। अयमभिसन्धि:—पौर्वापर्यपर्यालोचनया तावदुपनिषदां शुद्धबुद्धमुक्तमेकमप्रपञ्चं ब्रह्म तदतिरिक्तं च सर्वं तद्विवर्त्तो रज्जोरिव भुजङ्ग इत्यत्र तात्पर्यमवगम्यते। तथा च जीवोऽप्यविद्याकल्पितदेहेन्द्रियाद्युपहितं रूपं ब्रह्मणो न तु स्वाभाविक:। एवं च नापहतपाप्मत्वादयस्तस्मिन्नविद्योपाधौ सम्भविन:। आविर्भूतब्रह्मरूपे तु निरुपाधौ सम्भवन्तो ब्रह्मण एव न जीवस्य। एवञ्च ब्रह्मैवापहतपाप्मादिगुणं श्रुत्युक्तमिति तदेव दहराकाशो न जीव इति। स्यादे तत्—स्वरूपाविर्भाव: चेत् ब्रह्मैव न जीव:, तर्हि विप्रतिषिद्धमिदमभिधीयते, जीव आविर्भूतस्वरूप इत्यत आह *भूतपूर्वगत्या इति*। *उदशरावब्राह्मणेन इति*। यथैव हि मघोन: प्रतिबिम्बान्युदशराव उपजनापायधर्मकाण्यात्मलक्षणविरहान्नात्मा, एवं देहैन्द्रिगाद्यप्युपजनापायधर्मकं नात्मेत्युदशराबदृष्टान्तेन शरीरात्मताया व्युत्थानं बाध इति। चोदयति *कथं पुन: स्वञ्च रूपम् इति*। द्रव्यान्तरसंसृष्टं हि तेनाभिभूतं तस्माद्विविच्यमानं व्यज्यटे हेमतारकादि, कूटस्थनित्यस्य पुभरन्धेना—संसृष्टस्य कुतो विवेचनादभिव्यक्ति:। न च संसारवस्थायां जीवोऽनभिव्यक्त:, दृष्टयादयी ह्यस्य स्वरूपं, ते च संसारावस्थायां भासन्त इति कथं जीवरूपं न भासत इत्यर्थ:। परिहरति *प्राग्विवेकज्ञानोत्पत्ते: इति*। अयमर्थ:। अद्यप्यस्य कूटस्थनित्यस्यान्धसंसर्गो न वस्तुतोऽस्ति। यद्यपि च संसारावस्थायामस्य दृष्टयादिरूपञ्चकोऽस्ति, तथाप्यनिर्वाच्यानाद्यविद्या-वशादविद्याकल्नितैरेव देहेन्द्रियादिभिरसंसृष्टमपि संसृष्टमिव विविक्तमप्यविविक्तमिव दृष्टयादिरूपमस्य प्रथते। तथा च देहेन्द्रियादिगतैस्तापादिभिस्तापादिमदिव भवतीति। उपपादितञ्चैतद्विस्तरेणाध्यासभाष्य इति नेहोपपाद्यते। यद्यपि स्फटिकादयो जपाकुसुमादिसन्निहिता:, सन्निधानञ्च संयुक्तसंयोगात्मकम्, तथा च संयुक्ता:, तथापि न साक्षाज्जपादिकुसुमसंयोगिन इत्येतावता दृष्टान्तता इति। *वेदना:* हर्षभयशोकादय:। दार्ष्टान्तिके योजयति *तथा देहादि इति*।

सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इत्येतद्विभजते *श्रुतिकृतं विवेकविज्ञानम् इति*। तदनेन श्रवणमननध्यानाभ्यासाद्विवेकज्ञानमुक्त्वा तस्य विवेकविज्ञानस्य फलं केवलात्मरूपसाक्षात्कारः, स्वरूपेणाभिनिष्पत्तिः। स य साक्षात्कारो वृत्तिरूपः प्रपञ्चमात्रं प्रविलापयन् स्वयमपि प्रपञ्चरूपत्वात् कतकफलवत् प्रलीयते। तथा च निर्मृष्टनिखिलप्रपञ्चजालमनुपसंसर्गमपराधीनप्रकाशमात्मज्योतिः सिद्धं भवति। तदिदमुक्तं *परं ज्योतिरुपसम्पद्य इति*। अत्र चोपसम्पत्ताबुत्तरकालायामपि क्त्वाप्रयोगो मुखं व्यादाय स्वपितीतिवन्मन्तव्यः। यदा च विवेकसाक्षात्कारः शरीरात् समुत्थानं, न तु शरीरापादानकं गमनम्, तदा तत्सशरीरस्यापि सम्भवति प्रारब्धकार्यकर्मक्षयस्य पुरस्तादित्याह *तथा विवेकाविवेकमात्रेण इति*। न केवलं 'स यो ह वे तत्परमं ब्रह्म वेद ब्रह्मैव भवति' इत्यादिश्रुतिभ्यो जीवस्यं परमात्मनोऽभेदः, प्राजापत्यवाक्यसन्दर्भपर्य्यालोचनयाप्येवमेव प्रतिपत्तव्यमित्याह *कुतश्चैतदेवं प्रतिपत्तव्यम् इति*। स्यादेतत्–प्रतिच्छायात्मवज्जीवं परमात्मनो वस्तुतो भिन्नमप्यमृताभयात्मत्वेन ग्राहयित्वा पश्चाद् परमात्मानममृताभयादिमन्तं प्रजापतिर्ग्राहयति, न त्वयं जीवस्य परमात्मभाव माचष्टे छायात्मन इवेत्यत आह *नापि प्रतिच्छायात्मायमक्षिलक्षितः इति*। अक्षिलक्षितोऽप्यात्मैवोपदिश्यते न छायात्मा। तस्मादसिद्धो दृष्टान्त इत्यर्थः। किञ्च द्वितीयादिष्वपि पर्यायेष्वैतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्युपक्रमात् प्रथमपर्यायनिर्दिष्टो न छायापुरुषोऽपि तु ततोऽन्यो द्रष्टात्मेति दर्शयत्यन्यथा प्रजापतेः प्रतारकत्वप्रसङ्गादित्यत आह *तथा द्वितीयेऽपि इति*। अथ छायापुरुष एव जीवः कस्मान्न भवति? तथा च छाथापुरुष एवैतमिति परामृश्यत इत्यत आह *किञ्चाहमद्य स्वप्ने हस्तिनम् इति*। *किञ्च इति*। समुच्चयाभिधानं पूर्वोपपत्तिसाहित्यं ब्रूते, तच्च शङ्कानिराकरणद्वारेण। छायापुरुषोऽस्थायी स्थायी चायमात्मा चकास्ति, प्रत्यभिज्ञानादित्यर्थः। *नाह खल्वयमेव इति*। अयं सुषुप्तः। *सम्प्रति* सुषुप्तावस्थायाम्। अहमात्मानमहंकारास्पदमात्मानम्। न जानाति। केन प्रकारेण न जानातीत्यत आह *अयमहमस्मीमानि भूतानि च इति*। *यथा जागृति स्वप्ने च इति*। न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, अविनाशित्वादित्यनेनाविनाशित्वं सिद्धवद्धेतुं कुर्वता सुप्तोत्थितस्यात्मप्रत्यभिज्ञानमुक्तम्। य एवाहं जागरित्वा सुप्तः स एवैतर्हि जागर्मीति। आचार्यदेशीयमतमाह *केचित् तु इति*। यदि ह्येतमित्यनेनानन्तरोक्तं चक्षुरधिष्ठानं पुरुषं परामृश्य तस्यात्मत्वमुच्येत ततो न भवेच्छायापुरुषः, न त्वेतदस्ति। वाक्योपक्रमसूचितस्य परमात्मनः परामर्शात्, न खलु जीवात्मनोऽपहतपाप्मत्वादिगुणसम्भव इत्यर्थः। तदेतद् दूषयति *तेषामेतम् इति*। सुबोधम्। मतान्तरमाह *अपरे तु वादिनः इति*। यदि न जीवः कर्त्ता भोक्ता च वस्तुतो भवेत्, ततस्तदाश्रयाः कर्मविधय उपरुध्येरन्। सूत्रकारवचनं च नासम्भवादिति कुप्येत। तत् खलु

ब्रह्मणो गुणानां जीवेऽसम्भवमाह। न चाभेदं ब्रह्मणो जीवानां ब्रह्मगुणानामसम्भवो जीवेष्विति तेषामभिप्रायः। तेषां वादिनां शारीरकेणैवोत्तरं दत्तम्, तथाहि–पौर्वापर्यपर्यालोचनया वेदान्तानामेकमद्वयमात्मतत्त्वं, जीवास्त्वविद्योपधानकल्पिता इत्यत्र तात्पर्यमवगम्यते। न च वस्तुसतो ब्रह्मणो गुणः समारोपितेषु जीवेयु सम्भवन्ति। नो खलु वस्तुसत्या रज्ज्वा धर्माः सेव्यत्वादयः समारोपिते भुजङ्गे सम्भविनः। न च समारोपितो भुजङ्गो रज्ज्वा भिन्नः। तस्मान्न सूत्रव्याकोपः। अविद्याकल्पितञ्च कर्त्तृत्वभोक्तृत्वं यथा लोकसिद्धमुपाश्रित्य कर्मविधयः प्रवृत्ताः श्येनादिविधय इव निषिद्धेऽपि 'न हिंस्यात्सर्वा भूतानि' इति साध्यांशेऽभिचारेऽतिक्रान्तनिषेधं पुरुषमाश्रित्याविद्यावत्पुरुषाश्रयत्वाच्छास्त्रस्येत्युक्तम्। तदिदमाह *तेषां सर्वेषाम् इति*।।१९।। ननु ब्रह्म चेदत्र वक्तव्यं कृतं जवपरामर्शेनेत्युक्तमित्यत आह–अन्यार्थश्च परामर्शः जीवस्योपाधिकल्पितस्य ब्रह्मभाव उपदेष्टव्यः, न चासौ जीवमपरामृश्य शक्य उपदेष्टुमिति तिसृष्ववस्थासु जीवः परामृष्टस्तद्भावप्रविलयनं तस्य परामार्थिकं ब्रह्मभावं दर्शयितुमित्यर्थः।।२०।। निगदव्याख्यातेन भाष्येण व्याख्यातम्।।२१।।

इति भामती दहराधिकरणम् समाप्तम्

श्री कण्ठभाष्य

॥सू०॥ **गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च** ॥१४॥

'तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः' इति वाक्यशेषे प्रजानामहरहरस्मिन् दहराकाशे या गतिः श्रूयते, यश्चात्र ब्रह्मलोकशब्दः ; ताभ्यामपि दहराकाशः परमेश्वरः। तथा हि श्रुत्यन्तरे परमेश्वर एव एवंरूपं गमनं दृष्ट'मेवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपत्स्यामहे' इति। ब्रह्मलोकशब्दश्च तस्मिन् दृष्टः 'एष ब्रह्मलोकः सम्राडिति होवाच' इति। किं च-मा भूद्गतिशब्दयोरन्यत्र दर्शनम्। अस्मिन् प्रकरणे सर्वासां प्रजानामहरहः श्रूयमाणं गमनं ब्रह्मलोकशब्दश्च परमेश्वरस्य दहराकाशत्वे पर्याप्तं गमकम्॥

॥सू०॥ **धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः** ॥१५॥

'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' इति जगद्विधृतिः परमेश्वरस्य महिमाऽस्मिन् दहराकाशे उपलभ्यते। धृतिश्च परमेश्वरमहिमा, 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' इति श्रुतेः। अतोऽपि दहराकाशः परमेश्वरः॥

॥सू०॥ **प्रसिद्धेश्च** ॥१६॥

'दह्रं विपाप्मं परमेश्मभूतं यत् पुण्डरीकं पुरमध्यसंस्थम्। तत्रापि दह्रं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्' इति महोपनिषिदि, 'हृत्पुण्डरीकं विरजम्' इत्यारभ्य-'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्। ध्यात्वा' इत्यादि कैवल्योपनिषदि च परमेश्वरस्योमासखस्य दहरपुण्डरीकमध्यवर्तित्वेनोपास्यत्वं प्रसिद्धम्। ततोऽपि परमेश्वरो दहराकाशः॥

ननु दहरपुण्डरीकमध्ये दहराकाशान्तर्वर्तित्वेनोपास्यत्वं 'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः' इत्याद्युपनिषदन्तरे प्रसिद्धं परमेश्वरस्य इह दहराकाशत्वेनेति विरोध इति

चेत्–तत्रापि दहराकाशमध्यवर्ती न परमेश्वर उपास्यः ; किं तु दहराकाशे परमेश्वरधर्माणामपहतपाप्मत्वादीनां संबन्धप्रतीतेः दहराकाशत्वमप्यस्य चिदम्बररूपतयेति न विरोधः।।

।।सू०।। **इतरपरामर्शात् स इति चेन्नासंभवात्** ।।१७।।

'अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाच' इति इतरो जीवः परामृश्यते। अतः प्रकृताकाशः स एव भवतीति चेत्–न, उक्तानामपहतपाप्मत्वादीनां तस्मिन् असम्भवात्। अतः परमेश्वर एव तदाश्रय इति युक्तम्।।

।।सू०।। **उत्तराच्चेदाविर्भूतस्वरूपस्तु** ।।१८।।

उत्तरत्र प्रजापतिवाक्ये 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाति' इति जीवस्यापहतपाप्मत्वादिकं श्रूयते। जीवलक्षणमवस्थात्रयवर्तित्वं च श्रूयते, 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच' 'य एष स्वप्ने महीयमानश्चरति एष आत्मेति होवाच' तद्यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वं न विजानात्येष आत्मेति होवाच' इति। ततः स एवायं भवितुमर्हतीति चेत्–न सारमेतत्; निजानादिकर्मकलङ्कसंबन्धघटितकलेबरतिरोहितापहतपाप्मत्वादिको जीवः परं ज्योतिरुपसंपद्य पश्चादाविर्भूतस्वरूप आविर्भूतापहतपाप्मत्वादिकोऽत्र प्रतिपाद्यते, न संसारी। दहराकाशस्तु स्वाभाविकातिरोहिततत्तत्कल्याणगुण इति न बद्धो मुक्तो वाऽत्र दहराकाशः।।

।।सू०।। **अन्यार्थश्च परामर्शः** ।।१९।।

'अस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति जीवस्य दहराकाशशब्दनिर्दिष्टेन परवस्तुना संपद्य स्वरूपाविर्भावोऽभिधीयते। तत्र तादृक्तन्माहात्म्यप्रतिपादनार्थो जीवपरामर्शः। अतो न विरोधः।।

।।सू०।। **अल्पश्रुतेरिति चेत्तदुक्तम्** ।।२०।।

अल्पस्थानाश्रयत्वात् अल्पस्वरूपप्रतीतेः न परोऽयमिति शङ्कायाः पूर्वमुक्तमेवोत्तरं 'व्योमवच्च' इति।।

।।सू०।। **अनुकृतेस्यस्य च** ।।२१।।

तस्य जीवस्य दहराकाशशब्दनिर्दिष्टपरज्योतिरनुकृतिरवगम्यते, 'नैनं सेतुमहोरात्रे तरतो न जरा न

मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोकः, तस्माद्वा एतं सेतुं तीर्त्वा अन्धः सन्ननन्धो भवति विद्धः सन्नविद्धो भवति उपतापी सन्ननुपतापी भवति, तस्माद्वा एतं सेतुं तीर्त्वा अपि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येष ब्रह्मलोकः' इति वाक्यशेषे। अत्र हि 'दहराकाशं प्राप्तस्य पाप्मकार्यान्धत्वाद्यभावे सततोदितप्रकाशत्वे च प्राप्यस्य दहराकाशस्यापहतपाप्मत्वं च हेतुत्वेनोच्यते। तस्य तद्धेतुत्वं 'निरञ्जनः परमं साम्यमुपैति' इति श्रुत्यन्तरप्रसिद्धम्। तेन दहराकाशं प्राप्तस्योक्तफलावाप्तिस्तत्साम्यापत्तिरूपा तदनुकृतिरिति लभ्यते। सा च ततो भेद एवोपपद्यते। अतश्चायं न जीव इति तात्पर्यम्।।

इति कण्ठभाष्य दहराधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

त्रेधा संशयं दर्शयन् संशयकोटीनां बीजानि सूचयति-**दहराकाश इहेति।** आकाशश्रुतिरभ्यस्यमाना भूताकाशकोटेर्बीजम्। दहरत्वलिङ्गमभ्यस्यमानं जीवकोटेरिति दहराकाश इत्यनेन सूचितम्। इहेत्यनेन सिद्धान्तकोटेर्बीजं सूचितम्। यत्र प्रकरणे अपहतपाप्मत्वादिकं परमेश्वरलिङ्गं श्रूयत इति भावः। **वियति रूढतयेति।** आकाशशब्दस्तावल्लोके वियति प्रसिद्धतरः। न च सा प्रसिद्धिरासमन्तात्काशत इति योगमूला। जडे तदसम्भवात्। अतस्तस्य तत्र रूढिरेव। परमेश्वरे तु योगो वा व्यापकत्वादिना भूताकाशसाम्येन गौणवृत्तिर्वा वक्तव्या। तदुभयं रूढितो दुर्बलम्। अतो रूढ्या भूताकाश एवायमिति भावः। **दहरेति।** तस्य स्वरूपतो व्यापकत्वेऽपि हृदयपुण्डरीकावच्छेदेनाल्पत्वं सम्भवतीति भावः। स्वरूपेणैवाल्पत्वमुपपादनीयं चेत् जीवोऽयमस्त्वित्याह–**अथवेति।** ननु पक्षद्वयेऽपि 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इति वाक्यशेषो न सङ्गच्छते। तथाहि भूताकाशे तावदभेदादुपमानोपमेयभावो न सङ्गच्छते। न च बाह्याभ्यन्तरकृतभेदेन तदुपपत्तिः। आन्तरस्य बाह्यवव्द्यापकत्वाभावात्। जीवे स्वत एवाणुत्वान्न सङ्गच्छते। परमेश्वरे तु हृदयावच्छेदेनाल्पत्वेऽपि स्वरूपेण व्यायापकत्वविवक्षयोपपद्यते।'एष त आत्मान्तर्हृदयेऽणीयान् ब्रीहेर्वा यवाद्वे'ति परमेश्वरस्य हृदयावच्छेदोपाधिकाणीयस्त्वे वर्णितेऽपि तदनन्तर 'मेष म आत्मान्तर्हृदये ज्यायान् दिवो ज्यायानन्तरिक्षा'दित्यादिना स्वाभाविकव्यापकस्यापि वर्णनदर्शनात्। एवं च वाक्यशेषानुसारेण स्वाभाविकव्याप्तिमान्परमेश्वर एव दहराकाश इति युक्तम्। एवं स'त्यथ यदिदमस्मिन्ब्रह्मपुर' इत्युपक्रमोऽपि सङ्गच्छते। देहस्य ब्रह्मपुरत्वोक्त्यापि देहान्तर्वर्तित्वेन ब्रह्मोपासनाविधित्सयेदं प्रकरणमारभ्यत इति अवगम्यते। ननु'चैत्रगृहे मैत्रस्तिष्ठती'त्यन्यगृहत्वेन निर्दिष्टेऽप्यन्यावस्थानमुच्यते। तत्र 'मैत्र' इति विशिष्याधेयो निर्दिष्टः इहाप्याकाशश्रुत्या विशिष्य भूताकाशो निर्दिष्ट इति तुल्यमिति चेन्न। इह चैत्रगृहवाक्यान्वयाङ्गीकारे ब्रह्मपुरत्वेन देहोक्तेर्वैयर्थ्यप्रसङ्गात्। न हि मैत्रान्वेषिणं प्रति 'चैत्रगृहे मैत्रस्तिष्ठती'ति वाक्ये चैत्रगृहत्वोक्तिर्देवदत्तगृहादिव्यावर्तनेनेवात्र ब्रह्मपुरत्वोक्तिर्देहान्तर्वर्तित्वेन ब्रह्मोपासनाविधित्साभावे प्रकारान्तरेण साफल्यमश्नुवीत। तस्माद्यथा'प्रजापतिर्वरुणायाश्वमनय' दित्याद्युपक्रमगतार्थ-

वादेनाश्वदातुः किञ्चिद्विधास्यत इत्यवगमात् तदनन्तरश्रुतं 'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्च तुष्कपालान्निर्वपे'दिति वाक्यमश्वप्रतिग्रहीतुरिष्टविधायकतयावभासमानमप्यश्वदातुस्तद्विधायकमिति योज्यते। एवमिहाप्युपक्रमे देहस्य ब्रह्मपुरत्वोक्त्या देहस्यान्तः किञ्चित्परमेश्वरस्योपासनं विधास्यत इत्यवगमात् तदनन्तरश्रुतं दहराकाशवाक्यं भूताकाशप्रतिपादकतयावभासमानमपि स्वरूपेण व्यापकस्य ब्रह्मशब्दोक्तस्य परमेश्वरस्य प्रतिपादकमिति योजनीयम्। तथा सत्येव 'यावान्वा अयमाकश'इति बाह्याकाशसाम्योक्त्यनन्तर 'मुभे अस्मिन्द्यावापृथिवी अन्तरेव समाहिते। उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ। विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहित' मिति द्यावापृथिव्यादिसमाधानाधारत्ववर्णनमपि सङ्गच्छते। तस्मात्स्वरूपेण व्यापकः परमेश्वर एव दहराकाश इत्याशङ्क्याह-**न व्यापी परमेश्वर इति।** अयमाशयः। 'यावान्वा' इत्यादिवाक्यं भूताकाशसाम्यप्रतिपादनेन दहराकाशस्य व्यापकत्वपरं न भवति किं तु दहराकाशेनैव दहराकाशस्य साम्यप्रतिपादनेनातिसौक्ष्म्यपरम्। अयमित्यस्य प्रकृतदहराकाशपरामर्शित्वे सम्भवत्यप्रकृतबाह्याकाश-परामर्शित्वकल्पनानौचित्यात्। तेनैव तस्योपमानोपमेयभावो नान्वेतीति चेत् सत्यम्। अनन्वय्यपि तन्निबध्यते अनुपमत्वद्योतनाय यथा 'स्वे महिम्नी' त्यत्रानन्वय्यपि स्वस्य स्वेनाधाराधेयभावोऽनाधारत्वज्ञापनाय निबध्यते। अत एव 'रामरावणयोर्युद्धं रामरावणयोरिवे' त्यादावनुपमत्वद्योतनायाभेदे निबध्यमाने उपमानोपमेयभावो नान्वेतीति अन्वर्थनामानन्वयालङ्कार इत्याहुरालङ्कारिकाः। एवं निरतिशयसौक्ष्म्यपरत्वेन भूताकाशे जीवे चायं वाक्यशेष उपपद्यते। प्रत्युत भूताकाशवव्द्यापको दहराकाश इत्येवं परमेश्वरपरत्वमेवास्य नोपपद्यते। कथं, तस्मिन्पक्षे खल्वाकाशशब्दस्य परमेश्वरे गौणी वृत्तिरेष्टव्या न यौगिकी वृत्तिः। प्रथपप्रतीतरूढ्यपरित्यागेन तत्पूर्वकगौणवृत्त्युपपत्तौ तत्परित्यागापेक्षस्य योगस्यानुन्मेषात्। तस्याश्चा'काशवत्सर्वगत' इति श्रुत्यन्तरप्रसिद्धम्, इहापि ब्रह्मपुर इति ब्रह्मशब्देन परमेश्वरस्योपासनात् बुद्धिस्थितं च व्यापकत्वमेव सादृश्यनिमित्ततयावतिष्ठते। तथा चोपमेयनिर्देशकेन आकाशशब्देनैव भूताकाशसादृश्ये प्रतिपादिते वाक्येन प्रतिपाद्यमानं तत्सादृश्यं कथमन्वेतु। न हि यो भूताकाशवव्द्यापकः स भूताकाशे तव्द्यापक इति वाक्यं समञ्जसं भवति। न च वाच्यं यथाग्नेयादीनां षण्णां यागादीनाममावास्यापौर्णमास्याकालयोस्तदुत्पत्तिवाक्यविहितयोरप्य 'मावास्यायाममावास्यया यजेत पौर्णमास्यां पौर्णमास्या यजेते' ति वाक्ययोर्गौणाभ्यां तृतीयान्ताभ्याममावास्यापौर्णमासी-पदाभ्यामनूद्यमानयोरपि सप्तम्यन्तामावास्यापौर्णमासीपदोपात्तयोः पुनर्विधानं तद्वदिहापि स्यादिति। तयोर्वाक्ययोष्षण्णां यागांनां प्रयोगैक्यस्यौत्सर्गिकतया पौर्णमास्यां प्राच्याङ्गानुष्ठानपूर्वकं पौर्णमासीत्रिकमनुष्ठायामावास्यायां प्राप्तायाममावास्यात्रिकमनुष्ठाय उदीच्याङ्गसमापनप्रसङ्गात्। ननु, यदि 'यावान्वा' इत्यादिकं दहराकाशस्य स्वरूपतो व्यापकत्वपरं न भवेत् किं त्वतिसूक्ष्मत्वपरमेव

भवेत् तदाग्रे वर्ण्यमानं द्यावापृथिव्यादिसमाधानाधारत्वं कथमुपपद्यत इति चेत् वचनबलादिति ब्रूमः। श्रूयते हि तैत्तिरीयेऽपि समानप्रकरणे हृदयं प्रक्रम्य'तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठित'मिति। ननूच्यमानमप्यसम्भावितं कथं श्रद्धेयमिति चेत् उच्यते 'उभे अस्मिन्नि'त्यादि ना दहरविद्योपासकस्य ब्रह्मलोकप्राप्त्यनन्तरमुपयोगि भोगस्थानभोगोपकरणभोग्य- जातमुच्यते। तत्र द्यावापृथिवीग्रहणं सकलभोगस्थानोपलक्षणम्। अग्निवायुचन्द्रसूर्यग्रहणं सकलभोगोपकरणोपलक्षणम्। 'यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन्समाहित' मिति भोग्यजातमुच्यते। यदस्योपासकस्येह लोके विद्यते यच्चेहलोके इदानीं न विद्यते नष्टं भविश्यद्वा चेतनाचेतनात्मकं भोग्यं तत्सर्वमस्मिन्दहराकाशे समाहितमिति हि तस्यार्थः। अग्रे 'यो ह्यस्येतः प्रैति न तमिह दर्शनाय लभते। अथ ये चास्य जीवा येच प्रेताः यच्चान्येदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दत' इति श्रुत्यैवाग्रे तथा विवृतत्वात्। तच्च ब्राह्मलौकिकं भोगस्थानभोगोपकरणजातं द्विविधम्। मुक्तस्य शरीरविरहावस्थायामीश्वरेणैव सृष्टं स्वाप्नपदार्थजाततुल्यमेकं तस्य शरीरवत्त्वदशायां तेनैव सृष्टं जाग्रत्पदार्थजाततुल्यमपरम्। तदुभयं सूत्रकार एव चतुर्थाध्याये 'तन्वभावे सन्ध्यववदुपपत्ते (ब्र० ४. ४. १३ सू०) र्भावे जाग्रद्वत् (ब्र० ४. ४. १४) इति सूत्राभ्यां विवेचयिष्यति। तत्राद्यं स्वाप्नपदार्थजातवदेव सूक्ष्मेऽपि मातुमर्हम्। स्वप्ने ह्यपरवरकेऽनुभूयमाने तदन्तर्गिरिनदीसमुद्रादिकमप्यनुभूयते। अत एव स्वाप्नपदार्थजातमाश्चर्यरूपमिति वक्ष्यति सूत्रकारः 'मायामात्रं तु कात्स्न्येनानभिव्यक्तस्वरूपत्वा' (ब्र०-३-२-३सू-) दिति। तदभिप्राय'मुभे अस्मि' न्नित्यादिकं भविष्यतीति किमसम्भावितम्। जागरानुभूयमानस्य स्थूलस्य द्यावापृथिव्यादेर्दहराकाशे समाधानं तु 'यावान्वा' इत्यादेर्भूताकाशवव्द्यापकत्वपरतया परमेश्वरविषयत्वाङ्गीकारेऽपि सम्भावयितुं न शक्यते। 'अन्तरेव समाहिते' इति देहस्यान्तर्हृदयावच्छिन्न एव दहराकाशे द्यावापृथिव्यादिसमाधानवर्णनात् तदुपश्रुत्यान्ततो देहमेव द्यावापृथिव्याद्याधारमुक्तं मत्वान्तेवासिभिराक्षिप्तमिति 'तं चेद्ब्रूयु' रित्याद्युत्तरसन्दर्भेण प्रदर्शनाच्च। नन्वेवं दहराकाशस्याब्रह्मत्वसमर्थन उपक्रमगतब्रह्मसङ्कीर्तनस्य को निर्वाहः? कश्चैष आत्मा अपहतपाप्मे'त्यादिवाक्यशेषसङ्कीर्तितानां ब्रह्मलिङ्गानां निर्वाहः?।उच्यते। दहराकाशसङ्कीर्तनानन्तरं 'तस्मिन्यदन्तः तदन्वेष्टव्य'मिति तदन्तरर्गतस्योपासना विधीयते। तद्ब्रह्मेति तद्विषयत्वेनोपक्रमगत-वाक्यशेषयोस्सङ्गतिर्भविष्यति। ननु'तस्मिन्यदन्त'रिति दहराकाशान्तर्गतस्यो- पासनाविधानानन्तरं किं तत्र विद्यत इति प्रश्नपूर्वकं 'यावान्वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इत्युक्त्वा 'उभे अस्मिन्द्यावापृथिवी' इत्यादिना द्यावापृथिव्यादिकं तदन्तर्गतमिति निरूपितम्। ततश्च तदेवोपास्यमिह समीहितं पर्यवस्यति। तत्र नोपक्रमवाक्यशेषयोः सङ्गतिरिति चेत् उच्यते। द्यावापृथिव्यादिसमाधानोपन्यासानन्तर 'मेतत्सत्यं ब्रह्म पुर' मिति प्रकृतद्यावापृथिव्यादि-परैतत्पदसमानाधिकरणेन 'सत्यं ब्रह्मपुर'मित्यनेन द्यावापृथिव्याद्यवच्छिन्नं ब्रह्म निर्दिश्यते। तेन

दहराकाशान्तरनुचिन्तनीयद्यावापृथिव्याद्यवच्छिन्नं ब्रह्मोपास्यं लभ्यते। अतस्तत्रोपक्रमवाक्य-शेषयोरुपपद्यत एव सङ्गतिः। न'न्वेतत्सत्यं ब्रह्मपुर'मित्यत्रैतत्पदं दहराकाशपरामर्शि। 'उभे अस्मिन्द्यावापृथिवी' इत्यादिप्राचीनवाक्येषु सर्वनाम्नस्तत्परामर्शित्वदर्शनात्। 'एत' दिति नपुंसकलिङ्गस्य सत्यब्रह्मपुरशब्दसामानाधिकरण्यानुरोधेन संगतत्वात्। तस्य द्यावापृथिव्यादिपरामर्शित्वे एकवचनानुपपत्तेश्च। तस्मा' त्सत्यं ब्रह्मपुर 'मित्यारभ्य श्रुतानां सर्वेषां ब्रह्मश्रुतिलिङ्गानां दहराकाश एव समन्वय इति चेन्मैवम्। 'उभे अस्मि 'न्नित्यादिवाक्येषु प्राधान्येन प्रथमाविभक्तिनिर्दिष्टस्य द्यावापृथिव्यादेरेव 'प्रजापतिर्वरुणायाश्वमनयत्स स्वां देवतामार्च्छदि'त्यत्र प्रजापतेरिव सर्वनाम्ना परामर्ष्टुं युक्तत्वात्। तत्र बहुवचनस्य 'सुपां सुलुगि'त्यादि (पा० ७. १. ३९) सूत्रतस्स्वादेशेन लुका वा एकवचनस्य 'व्यत्ययो बहुल' मिति (पा० ३० १० ८५) सूत्रतो वचनव्यत्ययेन 'सर्वं तदस्मिन्समाहित' मित्येकवचनान्तप्रकृतसर्वपरामर्शित्वेन वा एतदिति रूपोपपत्तेश्च। तस्माद्दहराकाशः परमेश्वरो न भवतीति–एवं प्राप्ते सिद्धान्तयति–**इति प्राप्ते ब्रूम इति।** 'उत्तरेभ्य' इति सौत्रहेतुं व्याचष्टे–**अपहतपाप्मत्वादिभ्य इति।** न च तेषां दहराकाशानन्वयः शङ्कनीयः। पूर्वसन्दर्भानुरोधेनापततस्तदन्वयस्यापरिहार्यत्वात्। तथा हि द्यावापृथिव्यादिसर्वसमाधानोक्त्यनन्तरं प्राग्ब्रह्मपुरशब्दोक्तदेह एव तस्य सर्वस्य समाधानमुक्तमापाद्य देहे जीर्णे नष्टे वा जीर्णे कुसूलादौ धारणाक्षमे तदन्तर्निहितं ब्रीह्यादिकमिव नष्टे घटे तदन्तर्निहितं दध्यादिकमिव च तत्किमपि नावतिष्ठेतेत्यन्तेवासिभिराक्षिप्तं 'तं चेद्ब्रूयुः अस्मिंश्चेदिदं ब्रह्मपुरे सर्वं समाहितं सर्वाणि च भूतानि सर्वे च कामा यदैनज्जरावाप्नोति प्रध्वंसते वा किं ततोऽवशिष्यत' इति। तत्रेदमाचार्यस्योत्तरमुक्तं 'नास्य जरयैतज्जीर्यते न वधेनास्य हन्यत एतत्सत्यं ब्रह्मपुरमस्मिन्कामास्समाहिता' इति दहराकाशे वर्णितं सर्वसमाधानं देह एव वर्णितमित्यापादनस्य हि द्वेधाभिप्रायस्सङ्गच्छते। यथा घटाद्यन्तराकाशे निहितस्य दध्यादेर्वस्तुतो घटादिरेवाधारः आकाशः परमवकाशात्मनोपकरोति एवमिहापीति वा दहराकाशस्य स्वतस्सर्वाधारत्वेऽपि तस्य देहजराप्रध्वंसानुपदभाविजराप्रध्वंसवत्त्वात् यावद्देहस्य भारधारणानुकूलं बलं तावत्पर्यन्तमेव दहराकाशस्य तद्धारकत्वमिति फलतो देह एव तस्य सर्वस्य धारकः पर्यवस्यतीति वा। तत्र द्वितीयाभिप्रायावलम्बनाक्षेपसमाधानार्थं 'नास्य जरये' त्यादि। प्रथमाभिप्रायाक्षेपसमाधानार्थ 'मेतत्सत्य' मित्यादि। तत्र कामग्रहणमाक्षेपे देहसमाहितत्वेना-पाद्यानूदितानां भोग्यभोगस्थानभोगोपकरणानां त्रयाणामप्युपलक्षणम्। तथाचा' स्मिन्कामास्समाहिता 'इत्यस्य 'उभे अस्मिन्नि' त्यादिना दहराकाशे समाहितत्वेन निर्दिष्टानि तदनन्तरं प्रश्नवाक्ये फलतो देह एव समाहितत्वेन विवक्षितानीति मत्वा' इदं सर्व 'मिति' सर्वाणि भूतानि 'इति 'सर्वे कामा 'इति च पृथक् निर्देश पूर्वकं देहसमाहितत्वेनानूदितानि भोगस्थानभोगोपकरणभोग्यजातानि दहराकाश एव समाहितानि न तु देह इत्यर्थः। ननु घटाकाशो दध्यादेरिव दहराकाशो द्यावापृथिव्यादेर्न धारक

इत्याशङ्क्य विशेषितं 'एतत्सत्यं ब्रह्मपुर' मिति। न हि घटाकाश इव दहराकाशः किं तु ब्रह्म। तत्पुरमिवोपासकापेक्षितविविधभोग्यजातादिपूर्णं तद्धारकमेव। यतस्तत्सत्यं सकलप्रपञ्चनियामक-मिति। सत्यपदं हि नित्यानित्यात्मकचेतनाचेतननियन्तृपरं ब्रह्मनामेत्यत्रैव वर्णितम्। 'तस्य हवा एतस्य ब्रह्मणो नाम सत्य'मिति'तानि वा एतानि त्रीण्यक्षराणि सत्ति यमिति तद्यत्सत्तदमृतमथ यत्ति तन्मर्त्यमथ यद्यं तेनोभे यच्छती'ति। नियन्तृत्वं धारकत्वव्याप्तम्। 'एष सेतुर्विधरण एषां लोकानामसम्भेदाये' ति श्रुत्यन्तरात् 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदायेत्यत्रैव प्रकरणे श्रवणाच्च। एवं कृताक्षेपसमाधानसिध्द्यानुगुण्येन समाधानवाक्यगतयोरेतदिति पदयोर्दहराकाशपरत्वं वक्तव्यमिति द्यावापृथिव्यादिपरत्ववर्णनं न युज्यते। न हि तदानीं कृतस्याक्षेपस्य समाधानं लभ्यते। माभूज्जरादिना द्यावापृथिव्यादेस्तदाश्रितस्य जरादि तथापि यथा कुसूलादेर्जरादौ सति तदनुविधायि जरादिरहितमपि ब्रीह्यादि तत्र नावतिष्ठते एवमिदमपि नावतिष्ठेतेत्याक्षेपस्य तादवस्थ्यात्। तस्माद्यथा 'विष्णुरुपांशु यष्टव्योऽजामित्वाय' इत्यादिषु विध्यङ्गीकारे तव्यप्रत्ययस्वारस्ये सत्यपि तेषु विधानेनोपक्रान्तजामितादोषपरिहारालाभात् तल्लाभाय वर्तमानापदेशयुक्तेऽष्यन्तरावाक्य एव विधिरङ्गीक्रियते। एवमिहाप्येतत्पदयोर्द्यावापृथिव्यादि-परत्वाङ्गीकारे विभक्त्यैकरूप्यस्वारस्यलाभे सत्यपि तत्परत्वे कृताक्षेपसमाधानालाभात् तल्लाभाय दहराकाशपरत्वमेवाङ्गीकर्तव्यम्। एवं सत्येवा 'स्मिन्कामास्समाहिता' इत्यत्र अस्मिन्नित्यस्य दहराकाशपरत्वलाभात्तस्मिन्कामसमाधानवर्णनमुपपद्यते। अन्यथास्मिन्नित्यस्य द्यावापृथिव्यादि-परामर्शित्वापत्त्या तत्रैव तत्समाधानवर्णनमनुपपन्नं स्यात्। अस्मिन्नित्येतत् ब्रह्मपुरमित्यव्यवहितनिर्दिष्टब्रह्मपरामर्शि स्यादिति चेत्तर्हि दहराकाशे समाहितत्वेन प्राग्वर्णिता इह कामशब्दनिर्दिष्टा द्यावापृथिव्यादयो ब्रह्मणि समाहितत्वेन वर्ण्यन्ते चेद्दहराकाश एव निर्दिष्टं ब्रह्म स्यादिति घट्टकुट्यां प्रभातं पर्यवस्यति। एवं चात्रास्मिन्निति पदस्य दहराकाशपरत्वे सन्दंशन्यायेनापि मध्यगतयोरेतत्पदयोस्तत्परत्वमपरिहार्यम्। एतदिति तु दहराकाशे 'व्यत्ययो बहुल'मिति (पा० ३. १. ८५ सू) द्यावापृथिव्यादिषु वचनव्यत्ययेनेव लिङ्गव्यत्ययेनोपपद्यते। नपुंसकलिङ्गं स्त्रीलिङ्गपुँल्लिङ्गानुगतं सामान्यं न तु विशेषान्तरमिति शाब्दिकमर्यादया लिङ्गान्तरनिर्दिष्टे नपुंसकलिङ्गं व्यत्ययवचनमनपेक्ष्याप्युपपद्यते। 'मुखनासिकावयनोऽनुनासिकः' (पा० १. १. ८. सू) द्विगुरेकवचन (पा० २. ४. १. सू) मित्यादौ स्त्रीलिङ्गपुँल्लिङ्गविशेषणयोर्नपुंसकलिङ्गमेव हि समर्थयन्ते। किं च 'सुपां सुलुगि'ति (पा० ७. १. ३९.) सूत्रेण सोर्लुकि पुल्लिङ्गेऽप्येतदिति रूपमुपपद्यते। तस्माद्द्वितीयाक्षेपसमाधाने श्रुत्यैव दहराकाशस्य ब्रह्मरूपतया विवृतत्वात् तदनन्तरस्यै'ष आत्मे' त्यादिसन्दर्भस्यान्यपरत्वशङ्कानवकाशात्। औपसंहारिकैरपि बहुभिः श्रुतिलिङ्गैरभ्यस्तस्याप्य-`कस्याकाशशब्दस्य दहरत्वलिङ्गस्य च बाध्यत्वादुत्तरेभ्यः श्रुतिलिङ्गेभ्यो दहराकाशः परमेश्वर एवेति

युक्तमित्यभिप्रायः। ननु भूताकाशे ब्रह्मात्मश्रुत्यपहतपाप्मत्वादिलिङ्गानामसम्भवेऽपि मुक्तजीवे तेषां सम्भवोऽस्ति। मुक्तौ धर्मज्ञानविकासेन ब्रह्मात्मशब्दप्रवृत्तिनिमित्तस्य व्यापकत्वस्यापहतपाप्मत्वाद्याविर्भावस्य च सत्त्वादित्याशङ्क्याह–**कथं संसारिणीति।** दहराकाशशब्दस्य जीवपरत्वे संसारिजीवपरत्वमङ्गीकरणीयम्। 'अथ यदिदमस्मिन्ब्रह्मपुर' इत्यादिना दहराकाशस्येदानींतनोपासकदेहावच्छिन्नतयोच्यमानत्वात्। न चैतेषां संसारिणि सम्भवोऽस्तीति भावः।।सू०।।

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च।।१४।। ननु 'ब्रह्मलोकं न विन्दती'त्यत्र ब्रह्मलोकशब्दस्य परमाकाशरूपशिवपदपरत्वं युक्तम्। 'अरश्च ह वैण्यश्चार्णवौ ब्रह्मलोके' 'तृतीयस्यामितो दिवि'इत्यत्रैव प्रकरणे तत्र तस्य प्रयोगदर्शनात्तत्र क्लृप्ते षष्ठीसमासे बुद्धिस्थे निषादस्थपतिन्यायानवतारात्। तस्माद्ब्रह्मलोकशब्दस्तावन्न सिद्धान्तसाधकः। एवं च अहरहस्तद्गतिश्रवणमसम्भवदर्थकत्वादर्थवादमात्रमिति गतिरपि न तत्साधिकेत्याशङ्कानिराकरणार्थं 'तद्यथे' 'त्यनृतेने'ति च पूर्वोत्तरवाक्ये अप्युपात्ते। 'न विन्दन्ती'त्युक्तस्य अहरहर्ब्रह्मलोकगत्यज्ञानस्या' नृतेन हि प्रत्यूढा' इति मलावृतत्वहेतुना 'तद्यथा हिरण्यनिधि'मिति भूतलान्तर्गतहिरण्यनिध्यज्ञानदृष्टान्तेन चोपपादनान्नेदमर्थवादमात्रमित्यहरहर्गतिस्तावदुपपादनीया। अहरहस्सुषुप्तिदशायां गतियोग्यं च हार्दं ब्रह्मैवेति ब्रह्मलोकशब्दोऽपि समानाधिकरणसमासेन ब्रह्मपर एव वक्तव्य इति भावः। ननु हार्दे ब्रह्मणि जीवस्याहरहरेवं गत्युपपादने हृदयावच्छिन्ने भूताकाशेऽपि सा निवारयितुं न शक्येति गतिस्तावद्भूताकाशेऽपि सम्भवति ब्रह्मलोकशब्दोऽपि तत्प्रकरणगतब्रह्मलोकशब्दान्तरे क्लृप्तेन षष्ठीसमासेन परमाकाश इव हार्दे भूताकाशेऽप्युपपद्यत इत्याशङ्कानिराकरणार्थं तथा हि दृष्टमिति सूत्रशेषं व्याचष्टे **तथाहि श्रुत्यन्तर इति।** गतिशब्दयो 'रेवमेव खलु सोम्ये'त्यादिश्रुत्यन्तरे ब्रह्मण्येव दर्शनमस्ति न भूताकाशे। अतस्तदुभयमिह ब्रह्मगतमेव ग्राह्यम। श्रुत्यन्तरप्रसिद्धत्वात्। न भूताकाशगतम्। तत्सामर्थ्यस्य कल्पनीयत्वेन विलम्बितोपस्थितिकत्वादिति भावः। सूत्रे दृष्टशब्दः 'तथा चेतोऽर्पणनिगदात्तथाहि दर्शन'-मिति सूत्रे दर्शनशब्द इव भावप्रत्ययान्तः न तु कर्मणि निष्ठान्तः। तथा च दृष्टशब्दस्य गमिशब्दौ प्रति विशेषणया पुल्लिङ्गेन द्विवचनेन च भाव्यमिति शङ्काया नावकाशः। भाष्ये गमनं दृष्टं ब्रह्मलोकशब्दश्च तस्मिन् दृष्ट इति दृष्टशब्दस्य गतिशब्दविशेषणत्वेन निवेशनं फलितार्थप्रदर्शनपरं न सौत्रदृष्टपदयोजनापरम्। अस्तु वा तथापि न विरोधः। विशेष्यस्य पुल्लिङ्गद्विवचनान्तत्वेन निर्दिष्टत्वेऽपि पाणिनीये 'द्विगुरेकवचन'मिति सूत्रे लिङ्गसामान्यविवक्षया पुल्लिङ्गविशेषणे नपुंसकलिङ्गव' 'त्कर्मणो रोमन्थतपोभ्यां वर्तिचरो'रिति (पा० ३. १. १५.) सूत्रे द्विवचनान्ते विशेषणे विशेष्यद्वयगतप्रातिस्विकैकत्वविवक्षयैकवचनवच्चात्र नपुंसकस्यैकवचनस्य चोपपत्तेः। लिङ्गं चेति सूत्रशेषं व्याचष्टे–**किं च माभूदिति।** अवेदनस्य मलावृतत्वहेतुनोपपादनं पुरुषार्थरूपहिरण्यनिधिदृष्टान्तोपपादनं च गतिशब्दयोः परमेश्वरविषयत्व एव

सम्भवति न भूताकाशविषयत्व इति भावः।।सू०।। **धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः**।।१५।। नन्वस्तु नाम धृतिः पारमेश्वरो महिमा तथापि दहराकाशे स न श्रूयते। 'अथ य आत्मे'त्यथशब्देन दहराकाशप्रकरणविच्छेदादित्याशङ्कानिराकरणार्थं मस्यास्मिन्नुपलब्धेरिति सूत्रशेषमस्य महिम्नोऽस्मिन्दहराकाश एवोपलब्धेरित्यर्थपरतया व्याचष्टे–**अस्मिन्दहराकाश इति।** 'अथ य आत्मे'ति प्रकृतपरामर्शिनो यत्पदस्यात्मशब्दस्य च प्राग्दहराकाशे प्रयुक्तस्य विद्यमानतया सेतुत्वादिवर्णनस्य तदन्यविषयत्वं न सम्भवति। तस्मादथशब्दः पूर्वप्रकृतापेक्षार्थो वर्णनीयः। तस्य च प्राङ्निर्दिष्टा अनन्तरं निर्देक्ष्यमाणाश्च गुणाः परस्परापेक्षया समुच्चित्योपासनीया इति सूचनं फलम्। अन्यथा 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवती' ति दहरविद्याफलविधिवाक्ये दहराकाशगतवस्तुजातमध्ये विशिष्य सत्यकामपुनर्ग्रहणस्यास्मिन्प्रकरणे प्रागुक्तानामपहतपाप्मत्वादीनां वक्ष्यमाणानां सेतुत्वादीनां च दहराकाशगुणानां परिसङ्ख्यार्थतवशङ्कया सर्वेषामुक्तवक्ष्यमाणगुणानामुपास्यत्वं न सिद्ध्येत्। तत्र 'सत्यान्कामानि'ति शब्दो हि तदनन्तरं 'स यदि पितृलोककामो भवती'त्यारभ्यानुक्रान्तानां पितृमातृभ्रातृस्वसृसखिगन्धमाल्यान्नपानगीतवादित्रस्त्रीप्रभृतीनामुपासकभोग्यानां वाचकः। पित्राद्यनुक्रमणानन्तरं 'त इमे सत्याः कामा अनृतापिधाना' इति श्रुत्यैव तथा विवृतत्वात्। स च सत्यकामशब्दः पितृमात्रादिरूपचेतनात्मकसकलभोग्यरूपत्वार्थाभिधानद्वाराभावात् सदृशस्य निरतिशयप्रेमास्पदस्य पितृमात्रादिरूपचेतनात्मकसकलभोग्यरूपत्वार्थाभिधानद्वाराभावात् सदृशस्य निरतिशयप्रेमास्पदस्य दहराकाशगतस्य निरतिशयानन्दस्य लक्षक इति वक्ष्यते। तस्माद्धृत्यादिमहिमवर्णनं दहराकाशविषयमेवेति भावः। नन्वस्त्विदं दहराकाशविषयं तावता तस्य न परमेश्वरत्वसिद्धिः। अवकाशरूप आकाशेऽपि सर्वविधारकत्वोपपत्तेः। न च वाच्यं विधारकत्वमात्रोपपत्तावपि 'लोकानामसम्भेदाय सेतु'रिति विशेषणं भूताकाशे नोपपद्यते इति। तेन हि विशेषणेन यथा जलमध्ये निबद्धस्सेतुर्जलराशिद्वयस्यासङ्कराय भवति एवमयमपि लोकबृन्दस्येत्येतावत्प्रतिपाद्यते। इदं भूताकाशसाधारणमेव। यदि हि लोकानामन्तरावकाशात्मकः भूताकाशो न स्यात् तेषां सङ्करस्स्यादेवेति शङ्कापाकरणार्थत्वेनाप्यस्या'स्मिन्नुपलब्धे'रिति सूत्रशेषं योजयति–**धृतिश्चेति।** नात्र **धृतिमात्रं** प्रतिपाद्यते किं तु स्थावरजङ्गमात्मकसर्वलोकव्यवस्थिततत्तत्स्वरूपस्वभावाकृत्याद्यसङ्करापादनसर्वनियमनशक्तिमत्त्वरूपपरमेश्वराधीनविधारकत्वरूपः कश्चन महिमा प्रतिपाद्यते। अस्यैवंभूतस्य महिम्नोऽस्मिन्परमेश्वरे 'एष सर्वेश्वर' इत्यादिश्रुतावुपलब्धेः 'लोकानामसम्भेदाये'त्यत्रापि तत्प्रत्यभिज्ञानाच्चेति भावः। ननु 'यद्येष सर्वेश्वर' इत्यादिबृहदारण्यकश्रुत्यनुसारेण 'सेतुर्विधृति'रित्यत्र ऐश्वर्याधीनं विधारकत्वं प्रतिपाद्यं स्यात् तर्हि दहराकाशः परमेश्वरो न स्यात्। किं तु तदन्तर्वर्त्त्येव परमेश्वरः स्यात्। बृहदारण्यके 'य एषोऽन्तर्हृदय आकाशः तस्मिन् शेते सर्वस्य वशी

सर्वस्येशानस्सर्वस्याधिपति'रित्युपक्रम्य 'एष सर्वेश्वर' इत्याद्याम्नानादित्याशङ्कानिराकरणार्थं सूत्रम्।।सू०।। **प्रसिद्धेश्च**।।१६।। छान्दोग्यश्रुतौ तावदपहतपाप्मत्वादिगुणान्वयस्वारस्यात् दहराकाशः परमेश्वरः प्रतीयते। 'दह्रं विपाप्म' मित्यादितैत्तिरीयश्रुतावपि 'गगनं विशोक' इत्यपहतपाप्मत्वाद्यनन्तरं तद्विशोकत्वान्वयप्रत्यभिज्ञानात् गगनशब्दोक्तो दहराकाशः परमेश्वरो विवक्षित इति प्रतीयते। कैवल्योपनिषदि तु हृत्पुण्डरीकान्तर्वर्तित्वेनैव परमेश्वरस्योपासना विधीयत इति न तत्र तदन्तर्वर्त्याकाशान्तर्गतत्वेन तदुपासनाविधानमिति शङ्कावकाशोऽस्ति। तस्माद्दहरपुण्डरीकवर्ती परमेश्वर इत्यत्रापि श्रुत्यन्तरानुरोधसत्त्वादिहापहतपाप्मत्वाद्यन्वयस्वारस्यानुरोधेन दहराकाशः परमेश्वर इत्यत्र नानुपपत्तिरिति भावः। पूर्वपक्षबीजमुद्घाटयति—**नन्विति**। 'इत्याद्युपनिषदन्तर' इत्यादिशब्देन 'दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठितः। तस्यान्ते सुषिरं सूक्ष्मं तस्मिन्सर्वं प्रतिष्ठितम्।। तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः। तस्याश्शिखाया मध्ये परमात्मा व्यवस्थितः।।' इति वाक्यान्तरं संगृह्यते। **विरोध इति**। क्वचिद्दहराकाशः परमेश्वरः प्रतीयते क्वचित्तदन्तर्वर्तीति विरोधादनिर्णयः प्राप्त इतिभावः। असिद्धो विरोधः। अत्रापि 'दहरोऽस्मिन्नन्तराकाशः तस्मिन्यदन्तस्तदन्वेष्टव्य'मिति दहराकाशमध्यवर्तिनः परमेश्वरस्योपास्यत्वप्रतिषेधादिति समाधत्ते—**तत्रापीति**। तर्हि अपहतपात्मवादिधर्मान्वयात् दहराकाशः परमेश्वर इति पूर्वोक्तं सर्वं विरुद्ध्येतेत्याशङ्क्य परिहरति—**किं त्वित्यादिना**। अत्रेदं चिन्त्यते। कथं दहराकाशस्तदन्तर्वर्ती च परमेश्वर इति सङ्गच्छते। स्वस्यैव स्वान्तर्वर्तित्वस्य विरुद्धत्वात् 'अन्यो ह्यन्यस्मिन्प्रतिष्ठित' इति श्रुतेः। तयोः शक्तिशिवत्वस्य शक्तिशक्तिमद्रूपत्वस्य वाभ्युपगमे विरोधो नास्तीति चेत्सत्यम्। तथापि दहराकाश एव शिवरूपतया शक्तिरूपतया वा परमेश्वर इति युक्तम्। न तु तदन्तर्वर्त्यपि परमेश्वर इति 'तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्येतदनन्तदं 'तंचेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तत्र विद्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्यन्तेवासिनां प्रश्नमुद्भाव्य 'स ब्रूयाद्यावान्वा अयमाकाश' 'इत्याचार्यस्योत्तरमुपक्रम्य' 'उभे अस्मि'न्नित्यादिना द्यावापृथिव्यादिकस्यैव दहराकाशान्तर्वर्तित्वप्रतिपादनादिति। अत्रायं भाष्याभिप्रायः। इदं प्रकरणं ब्रह्मोपासनाविधिपरमिति तावदभ्युपगन्तव्यम्। 'अथ यदिदमस्मिन्ब्रह्मपुर' इत्युपक्रम एव तद्विधित्सावगमात्। मध्ये 'तेषां सर्वेषु लोकेषु कामचारो भवती'ति मुक्तेः फलत्वश्रवणात्। उपसंहारे च 'तयोर्ध्वमायन्नमृतत्वमेती'ति मुक्तिफलवर्णनाद्दहराकाशः परमेश्वर इत्यभ्युपगन्तव्यम्। ब्रह्मात्मश्रुत्यपहतपाप्मत्वाद्यन्वयानुरोधात् दहराकाशान्तर्वर्त्यपि परमेश्वर इत्यभ्युपगन्तव्यम्। तदन्तर्वर्तिविषयत्वादुपासनविधानस्य। एवमवश्याभ्युपगन्तव्यार्थतया अविरोधेनैव सन्दर्भो योजनीयः। तद्योजनाप्रकारस्तु, दहराकाशान्तर्वर्त्युपासनाविधानानन्तरं दहराकाशे किं वर्तत इति प्रश्नः कृतः। अत्र पुण्डरीकदहरत्वेनैतदन्तर्गताकाशस्य सूक्ष्मत्वसिद्धावपि अतिसूक्ष्मत्वसिद्ध्यर्थमेव खल्वाकाशेऽपि

दहरत्वविशेषणं कृतम्। तत्र किं वर्तितुमर्हतीति शङ्कां मनसि निधायोक्तसर्वानुवादः तदुत्तरे दहराकाशान्तर्वर्त्युपास्यमतिसूक्ष्मेऽपि वर्तितुमर्हतीत्युपपादयितुमेव 'यावान्वा' इत्यादिना पूर्वपक्षदर्शितया रीत्या तस्य हृदयसुषिरविशेषावच्छेदोपाधिकमतिसौक्ष्म्यं दृढीकृतम्। तेनातिसूक्ष्मे किं वर्तितुमर्हतीति चोद्यं निरवकाशीकृतम्। तत्र किं वर्तत इति प्रश्नस्योत्तरमुच्यते' उभे अस्मि 'न्नित्यादिना। तत्रोपासकस्य भोगस्थानभोगोपकरणभोग्यजातं दहराकाशे समाहितमिति नोच्यते। दहराकाशस्य स्वरूपेण व्यापकत्वसम्भवेऽपि अन्तरेवेत्युक्त्या तदनन्तरप्रश्नभङ्ग्या च देहावच्छिन्न एव दहराकाशे प्रतिपिपादयिषितत्वेनावगतस्य समाधानस्य तत्रानन्वयात्। मुक्तौ विदेहावस्थायां परमेश्वरेण स्त्रक्ष्यमाणे तस्मिन्द्यावापृथिव्यादिशब्दानां सङ्कोचकल्पनायोगात् तस्येदानींतनोपासकशरीरावच्छिन्ने दहराकाशे समाधानायोगाच्च सर्वविषयविरक्तस्य ब्रह्मानन्दैकप्रेप्सोरूपासकस्यास्मिन्सन्दर्भे दहराकाशे सर्वविषयसमाधानवर्णनेन 'यो ह्यस्येतः प्रैती' त्यादिसन्दर्भे दहरोपासनया तल्लाभवर्णनेन च प्रयोजनाभावाच्च। किं तु सर्वविधमपि भोगस्थानभोगोपकरणभोग्यजातमविरक्तावस्थायामुपासकेन युगपल्लब्धं चेत् यावत्प्रेमास्पदं भवेत्तावत्प्रेमास्पदत्वयोग्यं 'तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मा' दिति श्रुत्यन्तरे तथैव प्रसिद्धम्। निरतिशयानन्दरूपं ब्रह्म गौण्या वृत्त्या द्यावापृथिव्यादिसर्वशब्दानन्दसकलशब्दसन्दर्भे प्रतिपाद्यमिति तदेव दहराकाशे समाहितमित्युच्यते। 'तस्मिन्सर्वं प्रतिष्ठित' मिति श्रुत्यन्तरेऽपि तदेवोच्यते। तत्र सर्वभोग्यजातसदृशतया सर्वशब्दोक्तं ब्रह्मैव' तस्याशिशखाया मध्ये परमात्मा व्यवस्थित' इत्युत्तरत्र स्पष्टीक्रियते। इह तु विनैवं च तथा स्पष्टीकरणं यदि सर्वविषयसमुदायसदृशं निरतिशयप्रेमास्पदं किञ्चिद्वस्तु देहान्तराकाशे समाहितं तदा वस्त्रभस्त्रिकान्तराकाशे समाहितं मृगमदकर्पूरादि वस्त्रभस्त्रिकायामिव देह एव समाहितं स्यादिति मत्वा प्रश्नः। दहराकाशस्य परब्रह्मरूपत्वेन भूताकाशवैलक्षण्याद्दहराकाश एव तत्समाहितं न तु तदवच्छेदके देह इत्युत्तरमिति। ननु दहराकाशतदन्तर्वर्तिनोर्मध्ये कः शिवः का च शिवा उभ थाप्युपपद्यते। दहराकाशः परमाकाशरूपा चिच्छक्तिस्तदन्तर्वर्ती शिव इति तावदुपपद्यते। 'यो वेद निहितं गुहायां परमे व्योमन्' 'कारणं तु ध्येयस्सर्वैश्वर्यसम्पन्नस्सर्वेश्वरश्शम्भुराकाशमध्य' इत्यादिश्रुतिषु हृदि शिवध्याने तदन्तर्गतशिवस्थानत्वेन मन्त्रशास्त्रेषु शिवासनत्वेनच तस्याः प्रसिद्ध त्वात्। दहराकाशः शिवस्तदन्तर्वर्ति वस्तु परमानन्दरूपा शक्तिरित्यप्युपपद्यते। 'स एको ब्रह्मण आनन्दः' 'आनन्दं ब्रह्मणो विद्वानि' त्यादिश्रुतिषु तद्धर्मत्वेन तस्याः प्रसिद्धत्वात्। अत्रान्यतरपक्षनिर्णयेनोपासनाप्रकारस्त्वानन्दमयब्रह्मोपासनाप्रकार इव सम्प्रदाय विदुपदेशादवगन्तव्यः। ननुदहराकाशतदन्तर्वर्तिनोःशक्तिशिवरूपत्वे शिवशक्तिरूपत्वेवा तयोरुभयोरप्युपासनं विधातव्यं कथं तदन्तर्वर्तिन एवोपासनं विधीयते। न च वाच्यं 'तस्मिन्यदन्तस्तदन्वेष्टव्य 'मित्युपासनाविधिवाक्ये पुण्डरीकान्तर्वर्ती दहराकाशस्तदन्तर्वर्ति यत्पदोक्तं चेत्युभयं तत्पदपरामृष्टमन्वेष्टव्यमिति विधीयते।

तत्पदस्य दहराकाशतदन्तर्वर्त्त्युभयपरत्वेऽपि 'नपुंसकमनपुंसकैनकैवच्चास्यान्यतरस्या' (पा० १. २-६९-सू) मिति नपुंसकैकशेषस्यैकवचनस्य चोपपत्तेरिति। त्यदादिष्वेकशेषस्य'त्यदादीनि सर्वैर्नित्यमिति(पा०. १. २-७२) परसूत्रेणैव कर्तव्यत्वात् तत्र चैकवद्भावानुवृत्त्यभावात्। 'एकवच्चास्यान्यतरस्या'मित्यत्रास्येत्यस्य नपुंसकसूत्रकृतैकशेषस्यैवायमेकवद्भाव इत्येतदर्थत्वात्। न च वाच्यं त्यदादिषु नपुंसकानपुंसकयोर्नपुंसकशेषसिद्ध्यर्थं नपुंसकसूत्रस्यापिभाव्यमिति। त्यदादिषु स च सा च ताविति स्त्रीपुंसयोः पुमेकशेषसिद्ध्यर्थं स च तच्च ते साच तच्च ते इति नपुंसकानपुसकयोर्नपुंसकशेषसिद्ध्यर्थं च'त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानी'ति वार्तिककृता यत्नान्तरस्य कृतत्वात्। तथैकवद्भावसिद्ध्यर्थभाष्यवार्तिकादिषु यत्नान्तरदर्शनात्। कथं तर्हि तन्त्ररत्ने'दधि मधु घृतं धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्य'मिति चित्रेष्टिविधिवाक्ये दध्यादिप्रत्येकद्रव्यको यागगणः न तु संसृष्टैकद्रव्यको याग इति सिद्धान्तसिद्धये तत्पदं संसृष्टशब्दोक्तैकद्रव्यपरं न भवति किंतु दध्याद्यनेकद्रब्यपरमित्युक्त्वा दध्यादिषु तदिति पदं नपुंसकैकशेषैकवद्भावाभ्यां निर्व्यूढम्। अथ वा'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या'मिति (पा०. १. १. ६९) स्मरणान्नपुंसकानपुंसकानेकाभिप्रायमपि युक्तमेव तदिति नपुंसकैकवचनम्। एवं प्रजापत्यमपि द्रष्टव्यमिति अभ्युच्चयत्वेन तथोक्तम्। सर्वनाम्नां प्रक्रान्तपरत्व एव स्वारस्येन प्रक्रम्यमाणपरामर्शित्वस्यानन्यगतिकत्वात् द्रव्यविशेषस्यैवाकाङ्क्षापूरकत्वेन संसृष्टमात्रस्य प्रजापतिसम्बन्धानर्हत्वाच्च। न्यायतस्तत्पदस्य दध्याद्यनेकपरत्वावश्यंभावे सति तदित्येकवचनोपात्तमेकत्वं 'गुणे त्वन्याय्यकल्पने'ति न्यायेन पाशबहुत्ववदविवक्षितमिति मुख्यहेतूक्त्यनन्तरमथ वेत्यारम्भादिति चेत्। उच्यते। अन्वेष्टव्यमित्यत्र 'नपुंसकमनपुसकेने'त्येकशेषे सति तत्रैकस्मिन्नर्थ इवैकवचनरूपं कार्यं भवत्तद्विशेषणे नपुंकसूत्र कृतैकशेषशब्दोक्तार्थवर्तिनि तदिति सर्वनाम्न्यपि भवति। यथा''असमदो द्वयोश्चे'ति सूत्रेणास्मदर्थस्यैकत्वे द्वित्वे च बहुष्वर्थेष्विव बहुवचनं भवत् अस्मदर्थवर्तिनि क्रियापदेऽपि भवति'वयं ब्रूम' इति। 'शुक्लश्च शुक्ला च शुक्लं च वर्तत' इति क्रियापदेऽप्येकवचनं दृश्यत एव। तद्वत्सर्वनाम्न्यपि भवितुमर्हति। अत एव महाभाष्ये 'शुक्लश्च कम्बलः शुक्ला च बृहतिका शुक्लं च वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानी'ति द्विविधे नपुंसकसूत्रोदाहरणे कृतैकवद्भावमेव तदिति पदं प्रथमोदाहरणविशेषणं कृतम्। एवं चित्रेष्टिवाक्येऽपिप्राजापत्यशब्दे नपुंसकसूत्रप्रवृत्तौ तदर्थवर्तिनि तदिति पदेऽपि नपुंसकैकवचनं भवतीति तन्त्ररत्नाभिप्रायो वर्णयितव्य इत्यभ्युच्चयत्वेन तद्वाक्यं योजनीयम्। यद्वा। 'तदन्वेष्टव्य'मित्यत्र सामान्याभिप्रायेण तदिति नपुंसकैकवचनं भविष्यति। यथा शुक्लेन वस्त्रेण शुक्लेन च कम्बलेन तेन शुक्लेनेति प्रयोगे तृतीयान्तैकतृतीयशुक्लपदे नपुंसकानपुंसकलक्षणविशेषाभावान्नपुंसकसूत्राप्रवृत्तेः शुक्लेनेति सामान्याभिप्रायं नपुंसकैकवचनम्। एवमेव ह्ययं शुक्लेनेति प्रयोगः

पदमञ्जर्यां समर्थितः। तथैव 'शक्यमञ्जलिभिः पातुं वाताः केतकगन्धयः' इत्यादयः प्रयोगा उपलभ्यन्ते। यद्वा। 'तदन्वेष्टव्य'मिति दहराकाशानतर्वर्तिन एवोपासनाविधिरस्तु। दहराकाशोपासनाविधिस्तु तदाक्षिप्तो लभ्यते 'विश्वजित्सर्वपृष्ठोऽतिरात्रो भवती'त्यत्र पृष्ठगतसर्वताविध्याक्षिप्त इव पृष्ठविधिः। न हि दहराकाशमनुपासीनस्तदन्तर्वर्तित्वेनान्यदुपासितुं शन्कोति। अथ वा। अस्मिन्दहरविद्याप्रकरणे 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् तेषां सर्वेषु लोकेषु कामचारो भवती'ति वाक्यं फलविशेषविशिष्टोपासनाविधायकम्। तत्रा'त्मान'मिति दहराकाशस्य 'सत्यान्कामा'निति तदन्तर्वर्तिनः परभप्रेमास्पदतया सकलभोग्यसमानस्य परमानन्दस्य चोपास्यत्वेन निर्देशोऽस्त्विति न काचिन्न्यूनता। 'तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्य'मिति नोपासनविधिः। एकत्र विधिद्वयवैयर्थ्यात्। किं तूपासनाविध्यर्थाक्षिप्ते तद्विचाररूपे तदन्वेषणे वोपासनाफलरूपे तत्साक्षात्कारे च विधिसरूपमथैवादवाक्यम्। न चार्थवादे यावदुपास्यगतं तस्य सर्वस्यापि ग्रहणनियमः। द्रव्यदेवताविशिष्टयागविध्यर्थवादानां केवलद्रव्यविषयाणां 'स आत्मनो वपामुदक्खिदत्तामग्नौ प्रागृह्णात्ततोऽजस्तूपरस्समभव'दित्यादीनां केवलदेवताविषयाणा'मग्निं वा एतस्य शरीरं गच्छति सोमं रस' इत्यादिनां बहुलमुपलम्भेन तद्वदस्याप्यर्थवादस्य अन्यतरोपास्यविषयत्वोपपत्तेः। तस्माद्दहराकाशस्तदन्तर्वर्ती चोपास्यः परमेश्वरइति युक्तमेव। एवं भूतजीवसाधारणः पूर्वपक्षो निराकृतः। अतः परं जीवपक्षोपपादकहेत्वन्तरोद्भावनपूर्वकं तन्निराकरणार्थानि सूत्राणि।।सू०।। **इतरपरामर्शात्स इति चेन्नासम्भवात्**।।१७।। **इतरो जीवः परामृश्यत इति।** सुषुप्त्यवस्थावाचकस्सम्प्रसादशब्दः तद्वति जीवे वर्तितुं शन्कोति न ब्रह्मणि। शरीरात्समुत्थानं च तदाश्रयस्य जीवस्यैवोपपद्यते। ब्रह्मप्राप्त्या स्वरूपाविर्भावश्च तस्यैवोपपद्यत इति भावः। नन्वस्तु य एष सम्प्रसाद' इत्यादौ जीवपरामर्शः 'एष आत्मे'त्यत्र तु तत्प्राप्यस्य ज्योतिष एतच्छब्दपरामृष्टस्य आत्मशब्दनिर्दिष्टदहराकाशत्वविधानमित्याशङ्क्याह–**अत इति।** 'य एष' इत्यादौ निर्दिष्टस्यैव अग्रे 'एष' इत्यमेन प्रतिनिर्देशो युक्त इति भावः। **तस्मिन्नसम्भवादिति।** यद्यप्यपहतपाप्मत्वाद्यसम्भवो जीवे स्पष्ट एव तथापि तत्सम्भवशङ्कां काञ्चिदुद्भाट्य निराकर्तुं शङ्कावकाशप्रदमिदं सूत्रम् ।।सू।। **उत्तराच्चेदाविर्भूतस्वरूपस्तु** ।।१८।। ननु प्रजापतिविद्यायामपि परमेश्वरस्यैवापहतपाप्मत्वादिकं श्रूयते न जीवस्येत्याशङ्क्याह–**जीवत्वलक्षणमिति।** 'य एषोऽक्षिणी'त्यादिवाक्यान्यपि ब्रह्मपराण्येव। वाक्यत्रयेऽ 'प्येतदमृतमेतदभयमेतद्ब्रह्मे' ति श्रवणात्। अक्षिवाक्ये उपकोसलविद्योपास्यप्रत्यभिज्ञानात्। 'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीती' ति श्रुयन्तरे ब्रह्मणोऽपि स्वप्नसम्बन्धप्रसिद्धेरिह महीयमानत्वलिङ्गात्स्वप्नवाक्यस्यापि ब्रह्मपरत्वोपपत्तेः सुषुप्तिवाक्यस्य यत्र यस्मिन्नाधारे समस्तोऽपि जन्तुस्सुषुप्तो भवतीति सुषुप्त्याधारपरत्वोपपत्तेरित्याशङ्कानिराकरणार्थं जीवत्वलक्षणमेतद्वाक्यत्रयप्रतिपाद्यमिदंतया निर्दिशति–

अवस्थात्रयवर्तित्वं चेति। अयमाशय:। स्वप्नवाक्ये स्वप्नप्रयोजकत्वेन सुषुप्तिवाक्ये सुषुप्त्याधारत्वेन च ब्रह्मणि सम्भवि स्वप्नसुषुप्त्यवस्थावत्त्वमुपपद्यते। स्वप्नसम्बन्ध्यात्मोपदेशानन्तरं 'घ्नन्ति त्वेवैनं विच्छादयन्ति वाप्रियवेत्तेव भवत्यपि रोदितीवे' तीन्द्रेण तस्य हन्यमानत्वविच्छाद्यमानत्वबन्धुजनमरणाद्यप्रियद्रष्टृत्वरोदितृत्वादिप्रतिभासवतो दुष्टत्वस्य सुषुप्तिसम्बन्ध्यात्मोपदेशानन्तरं 'नाह खल्वेवं सम्प्रत्ययमात्मानं जानात्यहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामी'ति तस्य विशेषविज्ञानरहिततया विनष्टप्रायत्वतो दुष्टत्वस्य चोक्तत्वात्। 'एतदभय' मित्यादि तु मुक्तावस्थाभाविरूपापेक्षयोपपद्यते। एवं द्वितीयतृतीयपर्याययोः स्वप्नसुषुप्त्यवस्थावत्त्वप्रतिपादकत्वव्यवस्थितौ प्रथमपर्यायस्य जागरावस्थावत्त्वप्रतिपादकत्वमौचित्यात्सिद्ध्यति। प्रथमपर्यायानन्तर'मेतं त्वेव ते भूयोऽनुव्याख्यास्यामी'ति प्रतिज्ञापूर्वकमेव द्वितीयतृतीयपर्याययो: प्रवृत्तत्वेन प्रथमपर्यायस्य स्वप्नसुषुप्तिमज्जीवान्यविषयत्वकल्पनायोगात 'अक्षिणि दृश्यत' इत्यस्य दर्शनादक्षिणि सन्निहितोऽनुमीयत इत्यर्थकत्वेन जागरावस्थाविषयत्वोपपत्तेश्चेति प्रजापतिवाक्ये जीव: संसारिदशायां तिरोहितापहतपाप्मत्वादिक: सन् मुक्त्यवस्थायां साधनाधीनतदाविर्भाव: प्रतिपाद्यते न संसारदशायामप्याविर्भूतापहतपाप्मत्वादिक:। दहराकाशे श्रूयमाणं त्वपहतपाप्मत्वादिकं नित्याविर्भूतमेव ग्राह्यम्। तद्ग्रहसम्भवे तिरोहितत्वेनासत्प्रायस्य साधनाधीनाविर्भावस्य च ग्रहणायोगादित्यभिप्रायमाविर्भूतस्वरूपस्त्विति परिहारसूत्रांशं व्याचष्टे–**निजानादीति।** ननु दहरवाक्येऽपि संसारदशायां तिराहितं मुक्तिदशायामाविर्भवदेवापहतपाप्मत्वादिकमुच्यते। तथा हि 'त इमे सत्या: कामा अनृतापिधाना' इति सत्यकामत्वस्य तावत्तिरोहितत्वमुक्तम्। येषामेव तिरोहितत्वमुक्तं तद्वत्त्वमेव खल्वपहतपाप्मत्वाद्यन्तर्गतं सत्यकामत्वम्। तदन्यकल्पनायां प्रमाणाभावात्। तत्तिरोधानोक्तिश्चापहतपाप्मत्वादीनामपि तिरोधानस्योपलक्षणम्। अत एव दहरवाक्ये मध्येमध्येऽपि प्रजापतिवाक्यमध्य इव 'य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाये'त्यादिनाऽपहतपाप्मत्वादिस्वरूपाविर्भाव उच्यत इत्याशङ्क्याह–**दहराकाशस्त्विति।** दहराकाशगतस्य सत्यकामत्वस्य मलावृतानस्मान्प्रति तिरोहितत्वमुच्यते न तु साश्रयं प्रति। 'सर्वं तदत्र गत्वा विन्दत' इत्यग्रे निवृत्तमलावरणस्य दहराकाशदर्शिनस्तत्त्वदर्शित्वोक्ते:। जीवस्वरूपाविर्भावस्त्वन्यार्थं दहरवाक्यशेषे परामृश्यत इत्युत्तरसूत्रे वक्ष्यते। तस्मादाविर्भावसाधनापेक्षकल्पनागौरवपरिहाराय नित्याविर्भूतसकलकल्याणगुण एव दहराकाश: प्रतिपाद्य इत्यभ्युपगन्तव्यमिति भाव:। यदि दहराकाशो न जीव: किमर्थस्तर्हि 'य एष सम्प्रसाद' इत्यादौ जीवपरामर्श: तत्राह–।।सू०।। **अन्यार्थश्च परामर्श:**।।१९।। 'अहरहर्वा एवंवित्स्वर्गं लोकमेती'ति प्रकृतो विद्वान् 'य एष सम्प्रसाद' इति परामृश्यते। स विद्वान् कदा स्वर्गं लोकमेति तस्य स्वर्गलोकप्राप्तौ किं भवतीत्याकाङ्क्षितार्थप्रतिपादकतया अनन्तरग्रन्थावतरणौचित्यात्। 'परं ज्योति' रिति दहराकाश उच्यते।

विदुषोपासितव्यदहराकाशस्यैव तत्क्रतुन्यायेन तत्प्राप्तव्यतौचित्यात्। अतः 'परं ज्योतिरि'ति निर्दिष्टो दहराकाशो मुक्तप्राप्यत्वलिङ्गाद्ब्रह्मेत्ये'ष आत्मेति होवाचैतदमृतमेतदभयमेतद्ब्रह्मे'ति वाक्यस्य यच्छब्दनिर्दिष्टमपि जीवं विहाय ज्योतिश्शब्दनिर्दिष्टदहराकाशपरत्वमेव वक्तुं युक्तम्। अथ वा मुक्तावभिनिष्पत्तव्यजीवरूपवर्णनपरतया तज्जीवपरमेवास्तु। अस्मिन्पक्षे 'एष आत्माऽपहतपाप्मा' 'तद्य इहात्मानमनुविद्य व्रजन्ति' 'अथ य आत्मा स सेतुर्विधृति'रित्येतत्प्रकरणगतात्मशब्दानां ब्रह्मपरत्वेऽप्येतद्वाक्यगतात्मशब्दस्य जीवपरत्वमिति वैरूप्यं भवति। स तु न दोषः। 'स्याच्चैकस्य ब्रह्मशब्दव' दिति न्यायात्। एवं स्थिते 'य एष सम्प्रसाद' इत्यादिवाक्यं जीवपरामर्शकमपि ज्योतिश्शब्दोक्तस्य दहराकाशस्य परब्रह्मणो.... त्वतत्स्वरूपाविर्भावयितृत्वरूपमहिमविशेषप्रति-पादनार्थमिति न ब्रह्मप्रकरणे जीवपरामर्शस्य वैयर्थ्यमिति भावः।।सू०।। **अल्पश्रुतेरिति चेत्तदुक्तम्**।।२०।। शारीराधिकरणे केवलमल्पौकस्त्वेन घटकरकाद्यवच्छेदेन व्योम्न इव व्यापकत्वं न हीयत इत्युक्तम्। इह तु पुण्डरीकदहरत्वोक्त्या तदवच्छेदकृतदहरत्वस्वार्थसिद्धत्वेऽप्याहत्य दहरत्वोक्तया 'यावान्वा अयमाकाश' इत्यतिसौक्ष्म्यदृढीकरणेन चाल्पत्वं स्वाभाविकमवधृतम्। यद्यपि शारीराधिकरणविषयवाक्येऽपि 'अणोरणीयानि'त्याहत्याणीयस्त्वमुक्तं तथापि 'महतो महीयानि'ति तत्र महत्त्वमपि वर्णितम्। अतोऽत्र स्वाभाविकाल्पत्ववचनेन व्यापकत्वं हीयत एवेति दहराकाशस्य जीवत्वमेव युक्तम्। न तु परमेश्वरत्वं तच्छक्तित्वं चेत्यधिकशङ्कापरिहारार्थं सूत्रम्। आहत्य महत्त्वानुक्तावपि ब्रह्मश्रुत्यपहतपाप्मत्वादिबहुप्रमाणानुरोधात् अल्पत्वं स्थानोपाधिकम्। आहत्य वचनं सूक्ष्मत्वदृढीकरणं च 'तस्यान्ते सुषिरं सूक्ष्मं तस्मित्सर्वं प्रतिष्ठित' मिति शाखान्तरश्रुतं हृदयावच्छेदोपाधिकत्वं विभावयितुम्। अन्यथा कृत्स्नहृदयाकाशावच्छेदे समनन्तराधिकरणे वक्ष्यमाणरीत्या अङ्गुष्ठपरिमाणत्वं स्यादित्येतदभिप्रायमुपपादनीयम्। तथा च व्योमवत्स्वाभाविकं व्यापकत्वमिहापि न हीयत इति परिहाराभिप्रायः।। जीवपूर्वपक्षनिराकरणे हेत्वन्तरमाह।।सू०।। **अनुकृतेस्तस्य च**।।२१।।

इति शिवार्कमणिदीपिका दहराधिकरणम् समाप्तम्

अथ अनुकृत्यधिकरणम्। ॥ सू० २२-२३॥

शाङ्करभाष्यम्

*अनुकृतेस्तस्य च॥२२॥

"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" (मु० २/२/१०) इति समामनन्ति। यत्र यं भान्तमनुभाति सर्वम्, यस्य च भासा सर्वमिदं विभाति, स किं तेजोधातुः कश्दुत, प्राज्ञ आत्मेति, इति विचिकित्सायां तेजोधातुरिति तावत्प्राप्तम्।। कुतः? तेजोधातूनामेव सूर्यादीनां भानप्रतिषेधात्। तेजः स्वभावकं हि चन्द्रतारकादि तेजः स्वभावक एव सूर्ये भासमानेऽहनि न भासत इति प्रसिद्धम्। तथा सह सूर्येण सर्वमिदं चन्द्रतारकादि यस्मिन्न भासते, सोऽपि तेजः स्वभाव एव कश्चिदित्यवगम्यते। अनुभानमपि तेजःस्वभावक एवोपपद्यते; समानस्वभावकेष्वनुकारदर्शनात्, गच्छन्तमनुगच्छतीतिवत्। तस्मातेजोधातुः कश्चित्।।

इत्येव प्राप्ते ब्रूमः—प्राज्ञ एवात्मा भवितुमर्हति। कस्मात्? अनुकृतेः। अनुकरणमनुकृतिः। यदेतत् "तमेव भान्तमनुभाति सर्वम्" इत्यनुभानम्, तत्प्राज्ञपरिग्रहेऽवकल्पते। "भारूपः सत्यसंकल्पः" (छा० ३/१४/२) इति हि प्राज्ञमात्मानमामनन्ति। न तु तेजोधातुं कञ्चित्सूर्यादयोऽनुभान्तीति प्रसिद्धम्। समत्वाञ्च तेजोधातूनां सूर्यादीनां न तेजोधातुमन्यं प्रत्यपेक्षाऽस्ति, यं भान्तमनुभायुः। नहि प्रदीपः प्रदीपान्तरमनुभाति।

यदप्युक्तम्—समानस्वभावकेष्वनुकारो दृश्यत—इति। नायमेकान्तो नियमः; भिन्नस्वभावकेष्वपि ह्यनुकारो द्रश्यते। यथा सुतप्तोऽयः पिण्डोऽग्न्यनुकृतिरग्निं दहन्तमनुदहति, भौमं वा रजो वायु वहन्तमनुवहतीति। अनुकृतेः इत्यनुभानमसूसुचत्। तस्य च इति चतुर्थं पादमस्य श्लोकस्य सूचयति—"तस्य भासा सर्वमिदं विभाति" इति, तद्धेतुकं भानं सूर्यादेरुच्यमानं प्राज्ञमात्मानं गमयति। "तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्" (बृ० ४/४/१६)इति हि प्राज्ञमात्मानमामनन्ति, तेजोऽन्तरेण सूर्यादितेजो विभातीत्यप्रसिद्धम्, विरुद्धं च; तेजोऽन्तरेण तेजोऽन्तरस्य प्रतिघातात्। अथवा—न सूर्यादीनामेव श्लोकपरिपठितानामिदं तद्धेतुकं विभानमुच्यते किं तर्हि? "सर्वमिदम्" इत्यविशेषश्रुतेः सर्वस्यैवास्य

नामरूपक्रियाकारकफलजातस्य याऽभिव्यक्तिः, सा ब्रह्मज्योतिःसत्तानिमित्ता। यथा सूर्यादिज्योतिःसत्तानिमित्ता सर्वस्य रूपजातस्याभिव्यक्तिस्तद्वत्। ''न तत्र सूर्यो भाति'' इति च 'तत्र' शब्दमाहरन्-प्रकृतग्रहणं दर्शयति। प्रकृतं च ब्रह्म-''यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतम्'' (मु॰ २/२/५) इत्यादिना। अनन्तरं च ''हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः'' इति। कथं तज्ज्योतिषां ज्योतिरित्यत इदमुत्थितम्-''न तत्र सूर्यो भाति'' इति।। यदप्युक्तम् सूर्यादीनां तेजसां भानप्रतिषेधास्तेजोधातावेवान्यस्मिन्नवकल्पते सूर्य इवेतरेषामिति तत्र तु स एव तेजोधातुरन्यो न संभवतीत्युपपादितम्। ब्रह्मण्यपि चैषां भानप्रतिषेधोऽवकल्पते। यतः यदुपलभ्यते, तत्सर्वं ब्रह्मणैव ज्योतिषोपलभ्यते, ब्रह्म तु नान्येन ज्योतिषोपलभ्यते; स्वयंज्योतिः- स्वरूपत्वात्, येन सूर्यादयस्तस्मिन्भायुः। ब्रह्म ह्यन्यद्व्यनक्ति, नतु ब्रह्मान्येन व्यज्यते; ''आत्मनैवायं ज्योतिषाऽऽस्ते'' (बृ॰ ४/३/६) ''अगृह्यो न हि गृह्यते'' (बृ॰ ४/२/४) इत्यादिश्रुतिभ्यः।।२२।।

***अपिच स्मर्यते*।।२३।।**

अपि चेदृग्रूपत्वं प्राज्ञस्यैवात्मनः स्मर्यते भगवद्गीतासु-''न तद्भासयते सूर्यो न शशाङ्को न पावकः। यद्गत्वा न निवर्तन्ते तद्धाम परमं मम''(गी॰ १५/६) इति, ''यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्'' (गी॰ १५/१२) इति च।। इति षष्ठमनुकृत्यधिकरणम्।।

इति शाङ्करभाष्यम् अनुकृत्यधिकरणम् समाप्तम्

वार्तिकम्

अनुकृतेस्तस्य च॥२२॥ यथा-"एवं त्वेव भूयोऽनुव्याख्यात्त्यामी" त्यत्र सर्वनाम्नः प्रकृतसंनिहितपरामर्शित्वम्, न तथेह सर्वनाम्नोऽस्तीति प्रत्युदाहरणसङ्गतिः, प्रसङ्गसङ्गतिर्वा; सर्वनामत्वसादृश्येन स्मृतस्योपक्षेपात्। "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती" ति मन्त्रवर्णे 'तत्र' 'तम्' 'तस्ये' ति सर्वनामपदान्येकवाक्यत्वावगमादेकार्थविषयाणि प्रतीयन्ते॥

तेषु सन्देहः-किं तानि संनिहितपूर्वप्रकृतार्थपरामर्शीनि, किं वा "तेन रक्तं रागात्" "तस्यापत्यम्" इत्यत्रेव प्रदर्शनीयापूर्वार्थानि-इति; उभयोर्बुद्धिस्थत्वाविशेषेण सर्वनामपदैः परामर्शसंभवात्। तदर्थं चायमन्यो विचारः-"हिरण्मये परे कोशे विरजं ब्रह्म निष्फलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः॥" इत्यनेन संनिहितपूर्वोपात्तमन्त्रेणास्य मन्त्रस्य किमेकवाक्यत्वमस्ति-'इन्द्राग्नी' इति पदेनेव "अवीवृधेतां महो ज्योयोऽक्राताम्" इत्यादिपदानाम्, उत पूषानुमन्त्रणदर्शपूर्णमासवाक्ययोरिव न-इति। एतदर्थमप्ययमपरो विचारः-किं "न तत्र सूर्यो भाती" त्यत्र तत्रेति विषयसप्तमी, किं वा सतिसप्तमी-इति। यदा सतिसप्तमी, तदा वक्ष्यमाणरीत्यैकवाक्यत्वासंभवाद् अपूर्वमेव ज्योतिरन्तरमुपासनार्थं सर्वनाम्ना परामृश्यत इति पूर्वपक्षसिद्धिः। अथ विषयसप्तमी, कथम् तद् ज्योतिषां ज्योतिरिति पूर्वाकाङ्क्षयाऽस्योत्थानादेकवाक्यत्वोपपत्तेर्ब्रह्मैव पूर्वप्रकृतं ज्योतिषां ज्योतिष्ट्वेन प्रतिपाद्यतया सर्वनामपदैः परामृश्यत इति सिद्धान्तपक्षसिद्धिः। पक्षोक्तमेवास्याधिकरणस्य प्रयोजनम्। तदेतत् सर्वमभिप्रेत्य भाष्यकारः संशयमाह-*स किं तेजोधातुः कश्चित्, उत प्राज्ञ आत्मेति*॥

तत्र पूर्वपक्षं गृह्णाति-*इति विचिकित्सायां तेजोधातुरिति प्राप्तमित्यादिना*॥ अयमभिप्रायः-

अध्याहारप्रसङ्गेन कल्पनागौरवेण च।
अप्रसक्तनिषेधेन न स्याद् विषयसप्तमी॥

सत्यत्र सप्तमी ग्राह्या पूर्वदोपाप्रसक्तितः।
सजात्येऽनुकृतिर्दृष्टा तस्मात्तेज इहेष्यताम्॥

"न तत्र सूर्यो भाती" त्यत्र न विषयसप्तमी ग्रहीतुं शक्यते; भातेरकर्मकत्वात्, णिजध्याहारप्रसक्तेः, तत्कल्पनागौरवाञ्च; अपि तु सतिसप्तमी। तत्पक्षे ह्यप्रसक्तप्रतिषेधोऽपि भवेत्। न हि ब्रह्मविषये सूर्यादिभासकत्वं प्रसक्तम्, येन तत् प्रतिषिध्येत; "अरूपमव्ययमि" त्यादिश्रुतेर्ब्रह्मणोऽरूपद्रव्यत्वेन तदप्रसक्तेः। तस्मात् सत्येवात्र सप्तमी ग्राह्या। तस्मिन् सति सूर्यादयस्तेजांसि न भान्तीत्यर्थः। अस्मिन् पक्षे हि गृह्यमाणे न पूर्वपक्षोक्ता दोषाः प्रसज्येरन्। न च ब्रह्मणि सति सूर्यादीनामभानम्; तथा सति सर्वदैव तेषामभानापत्तेः, ब्रह्मणः सर्वदा सर्वदेशे सत्त्वात्, नित्यत्वात्, सर्वकारणत्वाञ्च। तस्माद् यज्जातीये सति सूर्यादीनामभानं लोके दृष्टम्, तज्जातीयं सर्वत्र स्थलेऽपि कल्पनीयम्। केवलवत्? सजातीयान्तरे सति तेषामभानम्। यथा सौरे तेजसि सति नक्षत्रादितेजसामभानम्। यद्यपि विजातीयेषु घटकुञ्जवृक्षादिषु सत्सु तदधस्तनभागे सूर्यादितेजसामभानं दृष्टम्; तथापि सर्वात्मना न तेषामभानमस्ति; तत्प्रकाशकत्वात्। सजातीये च बलवति सति सर्वात्मना दृष्टमभानम्, इति सूर्यादिसजातीयमेव तेजोऽन्तरं तद्भाननिषेधकं कल्प्यते; दृष्टनुसारात्। अपि च सजातीयेष्वेव लोकेऽनुकारो दृष्टः ; तद्यथा 'गावो वराहमनुधावन्ती' ति वराहसमानशीलैकजातिष्वेव गोपशुष्वनुकरणं दृश्यते, न पुनः 'कृष्णविहङ्गाननुधावन्ती' ति। प्रकृते च श्रूयते–'तमेव भान्तमनुभाति सर्वम्'' इति सूर्यादितेजसां तद्भानानुकारः ; सर्वशब्दस्य पूर्वोपात्तसूर्यादितेजः परामर्शित्वात्–'सर्वे भोजयितव्याः' इतिवत्। ननु–एवं सति विरुद्धाभिधानमेतत् स्यात्–तस्मिन् सति सूर्यादितेजो न भाति, अथ च "तमेव भान्तमनुभाति सर्वम्=सूर्यादितेजः" इति। न हि यस्मिन् सति सूर्यादितेजो न भाति, तस्य तदनुभानमुपपद्यते; विरोधादिति–चेत्, नः ; दृष्टत्वादविरोधोपपत्तेः। विरोधो हि नाम क्व संप्रत्ययः? यत्र प्रमाणानधिगमः, विरोधिप्रमाणाधिगमो वा। न चैतदुभयमपि प्रकृतेऽस्ति; प्रत्यक्षेण तदर्थस्य तेजसि दृष्टत्वात्। सति सूर्ये चन्द्रो न भातीति दृष्टम्, अथ च सूर्यालोकं भान्तमनु चन्द्रो भाति, यतस्तद्भासैव चन्द्रमण्डलस्य भानम्; अस्यार्थस्य शास्त्रसिद्धत्वात्। तस्मादस्मत्कल्पनस्य लोकदृष्टानुसारित्वेनाविरुद्धत्वाद् यस्मिन् सति सूर्यादितेजो न भाति, अथ च तमेव भान्तमनुभाति, यद्भासैव च विभाति, तदलौकिकमपूर्वं तेजोऽन्तरमिहोक्तगुणविशिष्टमनेन मन्त्रेणोपासनार्थं प्रतिपाद्यते; पूषानुमन्त्रणानुवाकवद् लिङ्गेन प्रकरणबाधात्। ननु–तादृशगुणविशिष्टापूर्वतेजोऽस्तित्वे नास्ति प्रमाणमित्युक्तम्– "ज्योतिश्चरणाभिधानादि" त्यत्र, मैवम्; अस्यैव मन्त्रस्योक्तप्रकारेण तत्साधकत्वात्प्रमाणाभावासिद्धेः, तदुक्तन्यायस्याप्याक्षेपात्॥

एवं प्राप्ते ब्रूमः–*अनुकृतेस्तस्य च*।। साध्यनिर्देशं सूत्रं व्याचष्टे–*प्राज्ञ एवात्मा भवितुमर्हतीत्यादिना*।।

यं भान्तमनुभायात्तु यस्य भासा विभासि च।
विश्वम्, ब्रह्मैव तद्रूपं ततो नान्यदसंभवात्॥

संभवत्येकवाक्यत्वे वाक्यभेदस्तु नेष्यते।
प्रक्रियानुग्रहो ह्येवं तस्माद्विषयसप्तमी॥

अत्र हि "तमेव भान्तमनुभाति सर्वम्" इति विश्वस्याविशेषेण तद्भानानुकरणं श्रूयते; निरुपपदस्य सर्वशब्दस्य विशेषेण विश्वाभिधायकत्वात्, तदनुपपत्तेरभावेन तत्सङ्कोचकल्पनानुपपत्तेः। तथाहि–"तस्य भासा सर्वमिदं विभाती" ति तत्प्रकाशेन सर्वभानमुच्यते। एतञ्च श्रयमाणं रूपद्वयं ब्रह्मण्येवावकल्पते; तस्य सर्वाधिष्ठानत्वात्, सर्वसाक्षित्वाञ्च, "भारूपः सत्यकामः" इति श्रुत्यन्तरे तस्य भारूपत्वश्रुतेश्च। न ततोऽन्यस्मिन् कस्मिँश्चित् तेजोधातावेव तदवकल्पते; असंभवात्। न हि अविशेषेण सर्वं कञ्चित् तेजोधातुं भान्तमनुभाति, तद्भासा च विभासि न लोके प्रसिद्धमस्ति, संभवति वा, यद्बलादत्रापि स एव कल्पनीयः स्यात्। यदि सर्वशब्देन प्रकृताः सूर्यादय एवोच्यन्ते, न सर्वमित्याग्रहो भवताम्, अस्तु नाम; तत्रापि नास्ति प्रसिद्धिरित्याह भाष्यकारः–*न तु तेजोधातुं कञ्चिदिति*।। अथ–एवं मन्यसे माऽऽस्तां तावद् लोके तत्प्रसिद्धिः, एतन्मूलबलेनैवोक्तरीत्या तत्कल्पनीयमिति–चेत्, न; असंभवादित्याह–*समत्वाञ्चेति*।। ननु–सूर्यादीनां स्वप्रतिभाने चाक्षुषतेजसोऽपेक्षां न वारयामः, किं तर्हि? अनुभानम्। न हि चक्षुषि भाति सौवादितेजोऽनुभाति, न वा सौरादितेजसी भाति चक्षुरिति, तदिदमाह–*न हि प्रदीपः प्रदीपान्तरमनुभातीति*।। पूर्वपक्षोक्तनिषममनुप्राष्य व्यभिचारेण दूषयति–*पदप्युक्तमिति*।। तस्य चेति सूत्रावयवं ब्रह्मलिङ्गान्तरपरत्वेन व्याकुर्वन् न तेजोऽन्तरभासा तेजोऽन्तरभानमुपपद्यते; असंभवात्, इति दर्शयति–*तस्य चेति चतुर्थं पादमिति*।। अभ्युपेत्यवादेनापि परमतं दूषयित्वा परमार्थमाह–*अथवेति*।। अपि च "संभवत्येकवाक्यत्वे वाक्यभेदो हि नेष्यत" इति न्यायवित्समयः। प्रकृते च संभवत्येकवाक्यत्वम्; तत्रेति प्रकृतसंनिहितपरामर्शसंभवात्। प्रकृतं व ब्रह्म तस्मिन्–"यस्मिन् द्यौरि" त्यादिना। संनिहितं च "हिरण्मये परे कोशे विरजं ब्रह्म निष्फलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः" इति मन्त्रवर्णेन। तत्र कथं तद् ज्योतिषां ज्योतिरित्याकाङ्क्षासत्त्वात् "न तत्र सूर्यो भाती" त्यस्य तदाकाङ्क्षापूरणसमर्थत्वाद् भवति तेनास्यैकवाक्यत्वम्। एवं च सति प्रकरणाबाधोऽपि भवति; अन्यथा तद्बाधापत्तेः,

पूषानुमन्त्रणानुवाकस्य तु प्रकृतदर्शपूर्णमासाभ्यामेकवाक्यत्वासंभवाद् लिङ्गेनोत्कर्षो युक्तः। प्रकृते चैकवाक्यत्वं लिङ्गं च ब्रह्मण्येवोपपन्नतरमिति प्रदर्शितम्। तस्माद् लिङ्गवाक्यप्रकरणानुग्रहाद् विषयसप्तम्येवात्र गृह्यते, न सतिसप्तमी; अध्याहारतत्कल्पनगौरवयोस्तु प्रामाणिकत्वाद् अदोषत्वम्; अन्यथा विश्वजिदादिष्वपि तदभावप्रसङ्गात्, सर्वत्र विषयसप्तमीपरिग्रहलोपप्रसङ्गाच्च। तथाच तदनुशासनविरोधः। तदेतत्सर्वमाह– *न तत्र सूर्यो भातीति च तत्रशब्दमाहरन्नित्यादिना*।। ब्रह्मण्यपि चैतषामिति विषयसप्तम्यभिप्रायम्।।२२।।

अपिच स्मर्यते।।२३।। तत्रेति विषयसप्तमीतीममर्थं स्मृत्या द्रढयति। निगदमस्य भाष्यम्। इति षष्ठमनुकृत्याधिकरणम्।।२३।।

इति वार्त्तिकम् अनुकृत्यधिकरणम् समाप्तम्

प्रदीपः

अनुकृतेस्तस्य च।।२२।। ''न तत्रेति वाक्ये तत्रपदं पूर्वप्रकृतब्रह्मपरम्; ''तमेव भान्तमनुभाति सर्वमि'' ति ''तस्य भासा सर्वमिदं विभाती'' ति च वाक्यशेषगततस्यपदार्थत्वात्। सर्वभानप्रयोजकभानाश्रयत्वं हि न ज्योतिषां ज्योतिषो ब्रह्मणोऽन्यत्र संभवति। अत्र तत्रेति सतिसप्तमीपक्षेण पूर्वपक्षः, विषयसप्तमीपक्षेण सिद्धान्त इति तदनिर्णयात् संशयः। ''न तत्र सूर्यो भाती'' त्यत्र विषयसप्तमीपक्षे भासयतीति लक्षणाप्रसङ्गात् सतिसप्तमीपक्षे च तदप्रसङ्गात् ज्योतिषां ज्योतिषोऽत्राननुकर्षात् ''तमेव भान्तमि'' त्यनुकरणस्य सूर्यादिसजातीयतेजोऽन्तरविवक्षायामेव स्वारस्याञ्च ''तस्य भासा सर्वमिदं विभाती'' ति वाक्यशेषावगतब्रह्मलिङ्गा-भिभवादस्पष्टब्रह्मलिङ्गकत्वम्। पूर्वाधिकरणे–प्रजापतिवाक्यगततच्छब्दस्येवात्र प्रक्रान्तपरामर्शित्वं नास्ति; तत्रेवात्र भूय उपदेशाश्रवणात्, इति ''एतस्यैव रेवतीषु वारवन्तीयमि'' त्यत्रेव प्रक्रियमाणार्थपरत्वमेवं तत्रेति तच्छब्दस्येति कृत्वा पूर्वपक्षोत्थानात् तत्रेवात्रापि प्रकृतपरामर्शित्वस्यैव व्यवस्थापनाञ्चाक्षेपसङ्गतिरनन्तरा।।

अत्रानुसन्धेयानि विषयवाक्यानि ''हिरण्मये परे कोशे विरजं ब्रह्म निष्फलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः।। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्यतो भानित कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति। ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्।।'' इति प्रथममुण्डकगतानि त्रीणि।।

अत्र पूर्वपक्षरीत्या–यस्मिन् तेजोधातौ सति सूर्यादि न भाति सूर्ये सतीव चन्द्रादिकम्, तमेव भान्तं सर्वं पूर्वोक्तं सूर्यादिकं भाति, तद् उपास्यमिति शेषः। ब्रह्मैवेदमिति ब्रह्मप्रकरणमपरं हिरण्मयवाक्यवदिति व्याख्या। सिद्धान्तरीत्या तु तत्र तत् सूर्यचन्द्रादिकं न भासयति, तेनैव जगतो भानम्, इदममृतं ब्रह्मैव पुरस्तादधस्तात् पश्चादुदक् च वर्तते, यदुद्दिश्य परविद्या सर्वाऽपि ''हिरण्मये परे कोशे विरजं ब्रह्म निष्फलम्। तच्छुभ्रं ज्योतिषां ज्योति'' रिति वाक्यान्ता प्रवृत्तेति व्याख्या। अत्र

भामत्याः पूर्वपक्षकारिक्रा–

अभानं तेजसो दृष्टं सति तेजोऽन्तरे यतः।
तेजोधात्वन्तरं तस्मादनुकाराच्च गम्यते॥

इति। यस्या मूलं भाष्यम्– *तेजोधातूनामित्यादि–तेजोधातुः कश्चिदित्यन्तम्*॥ सिद्धान्तकारिका तु–

ब्रह्मण्येव हि तल्लिङ्गं न तु तेजस्यलौकिके।
तस्मान्न तदुपास्यत्वम्, ब्रह्म ज्ञेयं तु गम्यते॥

इति। अस्य मूलं तु भाष्यम्– *प्राज्ञ एवात्मेत्यादि*॥२२॥

तन्नेत्यादौ विषयसप्तम्यां स्पष्टं स्मृतिवाक्यं प्रमाणयति– *अपिच स्मर्यते*॥ इति॥२३॥ *न तद्भासयते सूर्य इति*॥ चकारात् ''तस्य भासा सर्वमिदं विभाती'' त्येतत्समानार्थकं वाक्यमपि समुश्चीयते। यदाह– *यदादित्यगतमिति*॥ एतेन–सर्वशब्दस्य प्रकृतसर्वपरामर्शित्वात् ''तस्य भासा सर्वमिदं विभाती'' त्यत्र प्रकृतसूर्यादेरेव ग्रहणम्, न तु जगत इति शङ्कापि–परास्ता। स्पष्टमन्यत्॥२३॥ इति षष्टमनुकृत्यधिकरणम्॥

इति प्रदीप अनुकृत्यधिकरणम् समाप्तम्

भामती

अभानं तेजसो दृष्टं सति तेजोऽन्तरे यतः।
तेजो धात्वन्तरं तस्मादनुकाराच्च गम्यते॥

वलीयसा हि सौर्येण तेजसा मन्दं तेजश्चन्द्रतारकाद्यभिभूयमानं दृष्टं, न तु तेजसोऽन्येन। येऽपि पिधायकाः प्रदीपस्य गृहघटादयो न ते स्वभासा प्रदीपं भासयितुमीशते। श्रूयते च 'तस्य भासा सर्वमिदं विभाति' इति। सर्वशब्दः प्रकृतसूर्य्याद्यपेक्षः। न चातुल्यरूपेऽनुभानमित्यनुकारः सम्भवति। नहि गावो वहराहनुधावन्तीति कृष्णविहङ्गानुधावनमुपपद्यते गवाम्, अपि तु तादृशसूकरानुधावनम्। तस्माद्यद्यपि 'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतम्' इति ब्रह्म प्रकृतं, तथाप्यभिभवानुकारसामर्थ्यलक्षणेन लिङ्गेन प्रकरणबाधया तेजो धातुरवगम्यते, न तु ब्रह्म, लिङ्गानुपपत्तेः। तत्र तं तस्येति च सर्वनामपदानि प्रदर्शनीयमेवावप्रक्ष्यन्ति। न च तच्छब्दः पूर्वोक्तपरामर्शीति नियमः समस्ति। न हि 'तेन रक्तं रागात्' 'तस्यापत्यम्' इत्यादौ पूर्वोक्तं किञ्चिदस्ति। तस्मात्प्रमाणान्तराप्रतीतमपि तेजोऽन्तरमलौकिकं शब्दादुपास्यत्वेन गम्यत।

इति प्राप्ते। उच्यते

ब्रह्मण्येव हि तल्लिङ्गं न तु तेजस्यलौकिके।
तस्माच्च तदुपास्यत्वं ब्रह्म ज्ञेयं तु गम्यते॥

तमेव भान्तमित्यत्र किमलौकिकं तेजः कल्पयित्वा सूर्यादीनामनुभानमुपपाद्यताम्, किंवा भारूपः सत्यसङ्कल्प इति श्रुत्यन्तरसिद्धेन ब्रह्मणो भानेन सूर्यादीनां भानमुपपाद्यतामिति विशये न श्रुतसम्भवेऽश्रुतस्य कल्पना युज्यत इत्यप्रसिद्धं नालौकिकमुपास्यं तेजो युज्यते, अपि तु श्रुतिप्रसिद्धं ब्रह्मैव ज्ञेयमिति, तदेतदाह *प्राज्ञ एवात्मा भवितुमर्हति*। विरोधमाह *समत्वाच्च इति*। ननु स्वप्रतिभाने सूर्यादयश्चाक्षुषं तेजोऽपेक्षन्ते, नह्यनधेनैते दृश्यन्ते। तथा तदेव चाक्षुषं तेजो वाह्यसौर्यादितेजआप्यायितं रूपादि प्रकाशयति नानाप्यायितम्, अन्धकारेऽपि रूपदर्शनप्रसङ्गादित्यत

आह *यं भान्तमनुभायुर इति*। न हि तेजोऽन्तरस्य तेजोऽन्तरापेक्षां व्यासेधामः, किनतु तद्भानमनुभानम्। न च लोचनभानमनुभान्ति सूर्यादयस्तदिदमुक्तम् *नहि प्रदीप इति*। पूर्वपक्षमनुभाष्य व्यभिचारमाह *यदप्युक्तम् इति*। एतदुक्तं भवति–यदि स्वरूपसाम्याभावमभिप्रेत्यानुकारो निराक्रियते, तदा व्यभिचारः। अथ क्रियासाम्याभावं, सोऽसिद्धः। अस्ति हि वायुरजसोः स्वरूपविसदृशयोरपि नियतदिग्देशवहनक्रियासाम्यम्। वह्न्ययः पिण्डयोस्तु यद्यपि दहनक्रिया न भिद्यते तथापि द्रव्यभेदेन क्रियाभेदं कल्पयित्वा क्रियासादृश्यं व्याख्येयम्। तदेवमनुकृतेरिति विभज्य तस्य चेति सूत्रावयव विभजते *तस्य च इति*। *चतुर्थम् इति*। *ज्योतिषाम्* सूर्यादीनाम्। *ब्रह्म ज्योतिः* प्रकाशमित्यर्थः। तेजोऽन्तरेणानिन्द्रियभवमापन्नेन सूर्यादितेजो विभातीत्यप्रसिद्धम्। सर्वशब्दस्य हि स्वरसतो निःशेषाभिधानं वृत्तिः। सा तेजोधातावलौकिके रूपमात्रप्रकाशके सङ्कुचेत्। ब्रह्मणि तु निःशेषजगदवभासके न सर्वशब्दस्य वृत्तिः सङ्कुचतीति। *तत्र शब्दमाहरन् इति*। सर्वत्र खल्वयं तच्छब्दः पूर्वोक्तपरामर्शी। 'तेन रक्तं रागाद्' इत्यादावपि प्रकृते परस्मिन् प्रत्ययेऽर्थभेदेऽन्वाख्यायमाने प्रातिपदिकप्रकृत्यर्थस्य पूर्ववृत्तत्वमस्तीति। तेनेति तत्परामर्शान व्यभिचारः। तथा च सर्वनामश्रुतिरेव ब्रह्मोपस्थापयति। तेन भवतु नाम प्रकरणाल्लिङ्गं वलीयः, श्रुतिस्तु लिङ्गाद् बलीयसीति। श्रौतमिह ब्रह्मैव गम्यत इति। अपि चापेक्षितानपेक्षिताभिधानयोरपैक्षिताभिधानं युक्तं, दृष्टार्थत्वादित्याह *अनन्तरं च हिरण्मये परे कोशे इति*। अस्मिन् वाक्ये ज्योतिषां जयोतिरित्युक्तं, तत्र कथं तज्ज्योतिषां ज्योतिरित्यपेक्षायामिदमुपतिष्ठते *न तत्र सूर्य्य इति*। स्वातन्त्र्येण तूच्यमानेऽनपेक्षितं स्याददृष्टार्थमिति* ब्रह्मण्यपि चैषां भानप्रतिषेधोऽवकल्पत इति*। अयभिप्रायः– न तत्र सूर्यो भातीति नेयं सतिसप्तमी, यतः सूर्य्यादीनां तस्मिन् सत्यभिभवः प्रतीयेत। अपि तु विषयसप्तमी। तेन न तत्र ब्रह्मणि प्रकाशयितव्ये सूर्य्यादयः प्रकाशकतया भान्ति, किन्तु ब्रह्मैव सूर्य्यादिषु प्रकाशयितव्येषु प्रकाशक्तवेन भाति, तच्च स्वयम्प्रकाशम् *अगृह्यो नहि गृह्यत इत्यादिथुतिभ्यः इति*।।२२।।

न तद्भासयते इति। ब्रह्मणोऽग्राह्यत्वमुक्तं, *यदादित्यगतम्* इत्यनेन तस्यैव ग्राहक्तवमुक्तमिति।।२३।।

इति भामती अनुकृत्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

पुनरस्मिन् प्रमाणान्तरमाह–

।।सू।। **अपि च स्मर्यते**।।२२।।

दहरपुण्डरीकान्तर्वर्तित्वमुपास्यत्वं च ब्रह्मण: स्मर्यते–

'अथवा परमात्मानं परमानन्दविग्रहम्। गुरूपदेशाद्विज्ञेयं पुरुषं कृष्णपिङ्गलम्।। ब्रह्म ब्रह्मपुरे गार्गि दहराब्जखमध्यमे। अभ्यासात् संप्रपश्यन्ति सन्तस्त्वं च तथा कुरु'।।इत्यादि। तत: परज्योतिस्स्वरूपं मुक्तप्राप्यं परशक्त्युमासनाथं परं ब्रह्म दहरपुण्डरीकाकाशमध्यवर्ति स्वाभाविकापहतपाप्मत्वादि-गुणकमुपासनीयमिति सिद्धम्।। **इति दहराधिकरणम्**।।५।।

अथ प्रमिताधिकरणम्।।६।।

अत: परमेश्वरस्योपास्यरूपान्तरमुच्यते–

।।सू।। **शब्दादेव प्रमित:** ।।२३।।

कठवल्ल्यामस्य विषय: श्रूयते–

'अङ्गुष्ठमात्र: पुरुषो मध्य आत्मनि तिष्ठति। ईशानो भूतभव्यस्य न ततो विजुगुप्सते।।'

इत्यादि। इहाङ्गुष्ठमात्रतया श्रूयमाण: पुरुष: परमेश्वरो जीवो वेति सन्देह:।।

जीव इति वक्तुं युक्तम्–

'स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिप: संचरति स्वकर्मभि:। अङ्गुष्ठमात्रो रवितुल्यरूप: संकल्पाहंकारसमन्वितो य:।।'

इति तस्याङ्गुष्ठमात्रत्वप्रसिद्धेः, 'मध्य आत्मनि तिष्ठति' इति देहान्तर्वर्तित्वावगमाच्च। न तु परमेश्वरो व्यापकः।।'

इति प्राप्ते–वदामः। परमेश्वर एवाङ्गुष्ठमात्र इति युक्तम्; 'ईशानोभूतभव्यस्य' इत्यादिपरमेश्वरलिङ्गशब्दात् 'सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये' इति तस्यैव सर्वेश्वरत्वश्रवणात्।।

इति श्री कण्ठभाष्य अनुकृत्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

'इतरपरामर्शादिति सूत्रप्रकृतो जीवस्तस्येत्यनेन परामृश्यते। 'दहर उत्तरेभ्य' इति सूत्राद्दहरशब्दोऽनुवृत्तः षष्ठ्यन्ततया विपरिणम्यते। सा कर्मणिषष्ठी। तस्येति कर्तरिष्ठी। न 'चोभयप्राप्तौ कर्मणी'ति कर्तृकर्मोभयप्राप्तिमत्कृद्योगकर्मण्येव षष्ठीति नियमनात् कर्तरि तृतीयया भाव्यमिति शङ्कनीयम्। वार्तिककृता 'शेषे विभाषे'त्यकाकारव्यतिरिक्तस्त्रीप्रत्यये तस्य नियमस्य विकल्पितत्वात्। ततश्च तेन सूत्रेणात्र षष्ठी नियम्यते इति 'कर्तृकर्मणोः कृती'ति सूत्रेऽत एव कर्तरि कर्मणि च षष्ठी। अनुकृतिरनुकारः। इतरपरामर्शसूत्रान्नेत्यनुवर्तते। तथा च तस्य जीवस्य दहराकाशानुकृतेश्च हेतोर्दहराकाशो न जीवः। अनुकर्त्रनुकार्यभावस्य भेदगर्भत्वादिति सूत्रार्थः। अस्मिन्नर्थे सूत्रं योजयति–**तस्य जीवस्येत्यादिना। परज्योतिरनुकृतिरिति।** न चात्र 'कर्मणिचे'ति सूत्रेण षष्ठ्यास्समासनिषेधश्शङ्कनीयः। तस्यो'भयप्राप्तौ कर्मणी'ति सूत्रेण कर्मणीति शब्दमुच्चार्य या षष्ठी नियमिता 'आश्चर्यो गवां दोहोऽशिक्षितेन अगोपालकेने'त्यादौतद्विषयत्वात्। 'कर्तृकर्मणोः कृती'ति सूत्रत एवोभायत्रापि षष्ठीत्युक्तत्वात्। **दहराकाशं प्राप्तस्येति।** अनेनै'तं सेतुं तीर्त्वे'त्यस्य 'अथ य आत्मा स सेतुर्विधृतिः सेतुवदसङ्करापादकत्वेन प्राग्वर्णितमेतं दहराकाशं प्राप्तस्येत्यर्थ इति दर्शितम्। अन्धत्वादेरित्यादिशब्देन श्रुतौ विद्धोपतापिशब्दाभ्यामुक्तावायुधाधिवेधव्याधी सङ्गृहीतौ। सततोदितप्रकाशत्वापहतपाप्मत्वशब्दाभ्यां सप्तम्यन्तप्रथमान्ताभ्याम'पि नक्तमहरेवाभिनिष्पद्यते' 'सकृद्विभातो ह्येष ब्रह्मलोक' इति वाक्ययोरर्थो गृहीतः। एवं दहराकाशस्य परमेश्वरत्वमुपपादितम्। तदन्तर्वर्तिनोऽपि परमेश्वरत्वमुपबृंहणेन व्यक्तीकर्तुं सूत्रम्।।सू०।। **अपि च स्मर्यते**।।२२।। योगयाज्ञवल्क्यश्रुतौ ध्यानाध्याये कैश्चित्प्रकारैः परमेश्वरध्यानोपदेशानन्तरं प्रकारान्तरेण तद्ध्यानमुपदिश्यते–**अथ वेति। परमात्मानमिति** 'तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित' इति मन्त्रार्थस्योपसंहारः। **परमानन्दविग्रहमिति** 'यच्चास्येहास्ती'ति वाक्यार्थस्य। **गुरूपदेशाद्विज्ञेयमिति** 'तं चेद्ब्रूयु' रित्यादिशिष्याचार्यनिबन्धनज्ञापितस्य गुरूपदेशावश्यकत्वस्य। पुरूषं कृष्णपिङ्गलमिति 'ऋतं सत्य'मिति मन्त्रार्थस्य। **ब्रह्म ब्रह्मपुर इति** 'अथ यदिदमस्मिन्ब्रह्मपुर' इत्युपक्रमार्थस्य।

दहराब्जखमध्यम इति 'तस्मिन्यदन्त'रित्युक्तार्धस्य। **अभ्यासात् सम्प्रपश्यन्ति इति** 'अन्वेष्टव्यं विजिज्ञासितव्य'मित्यस्य। **स्वाभाविकेति।** यद्यप्यपहतपाप्मत्वादिकं दहराकाशत्वेनेति प्रागुक्तं तथापि तदभेददृष्टया तन्मध्यवर्तिन्यपि तत्कीर्तनमुपपद्यते। तत्रापहतपाप्मत्वादीनां ब्रह्मलिङ्गानां स्पष्टानामपि पूर्वपक्षे दहराकाशादन्यत्र तदन्तर्वर्तिन्येवान्वयात् स्पष्टास्पष्टब्रह्मलिङ्गता।।

उत्तराधिकरणस्य प्रासङ्गिकीं सङ्गतिमाह—**अतः परमेति।** पूर्वाधिकरणे परमेश्वरस्य हृदये कृष्णपिङ्गलत्वादिविशिष्टं रूपमुपासनार्थमुक्तम्। तत्प्रसङ्गात्तत्र तस्य रूपान्तरमुच्यत इत्यर्थः ।।सू०।।

शब्दादेव प्रमितः।।२३।।

इति शिवार्कमणिदीपिका अनुकृत्यधिकरणम् समाप्तम्

अथ प्रमिताधिकरणम्। ॥२४-२५॥

शाङ्करभाष्यम्

शब्दादेव प्रमितः॥२४॥

"अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठती" इति श्रूयते। तथा "अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवाद्य स उश्व एतद्वै तत्" (का० २/४/१३) इति च। तत्र योऽयमङ्गुष्ठमात्रः पुरुषः श्रूयते, स किं विज्ञानात्मा, किंवा परमात्मेति संशयः। तत्र परिमाणोपदेशात्तावद्विज्ञानात्मेति प्राप्तम्। न ह्यनन्तायामविस्तारस्य परमात्मनोऽङ्गुष्ठ-परिमाणमुपपद्यते। विज्ञानात्मनस्तूपाधिमत्त्वात्सम्भवति कयाचित्कल्पनयाऽङ्गुष्ठमात्रत्वम्। स्मृतेश्च–"अथ सत्यवतः कायात्पाशबद्धं वशं गतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्" (म० भा० ३/२९७/१७) इति। नहि परमेश्वरो बलाद्यमेन निष्कष्टुं शक्यः। तेन तत्र संसार्यङ्गुष्ठमात्रो निश्चितः, स एवेहापीत्येवं प्राप्ते ब्रूमः–परमात्मैवायमङ्गुष्ठमात्रपरिमितः पुरुषो भवितुमर्हति। कस्मात्? शब्दात्–"ईशानो भूतभव्यस्ये" ति। नह्यन्यः परमेश्वराद् भूतभव्यस्य निरङ्कुशमीशिता। "एतद्वे तत्" इति च प्रकृतं पृष्टमिहानुसन्दधाति। एतद्वे यत्पृष्टं ब्रह्मेत्यर्थः। पृष्टं चेह ब्रह्म "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्- कृताकृतात्। अन्यत्र भूताञ्च भव्याञ्च यत्तत्पश्यसि तद्वद" (का० १/२/१४) इति। *शब्दादेवेति* अभिधानश्रुतेरेवशान इति परमेश्वरोऽयं गम्यत इत्यर्थः॥२४॥

कथं पुनः सर्वगतस्य परमात्मनः परिमाणोपदेश इत्यत्र ब्रूमः– *हृद्यपेक्षया तु मनुष्याधिकारत्वात्*॥२५॥

सर्वगतस्यापि परमात्मनो हृदयेऽवस्थानमपेक्ष्याङ्गुष्ठमात्रत्वमिदमुच्यते। आकाशस्येव वंशपर्वापेक्षमरत्निमात्रत्वम्। नह्यञ्जसाऽतिमात्रस्य परमात्मनोऽङ्गुष्ठमात्रत्वमुपपद्यते। न चान्यः परमात्मन इह ग्रहणमर्हतीशानशब्दादिभ्य इत्युक्तम्। ननु–प्रतिप्राणिभेदं हृदयानामनवस्तितत्वात्तद-पेक्षमप्यङ्गुष्ठमात्रत्वं नोपपद्यत इत्यत उत्तरमुच्यते– *मनुष्याधिकारत्वादिति*॥ शास्त्रं ह्यविशेष-प्रवृत्तमपि मनुष्यानेवाधिकरोति; शक्त्वादर्थित्वादपर्युदस्तत्वादुपनयादिशाशासाच्चेति वर्णितमेत-दधिकरलक्षणे (जै० ६/१)। मनुष्याणां च नियतपरिमाणः कायः। औचित्येन नियतपरिमाणमेव

चैषामङ्गुष्ठमात्रं हृदयम्। अतो मनुष्याधिकारत्वाच्छास्त्रस्य मनुष्यहृदयावस्थानापेक्षमङ्गुष्ठमात्रत्वमुपपन्नं परमात्मनः। यदप्युक्तम् परिमाणोपदेशात्स्मृतेश्च संसार्येवायमङ्गुष्ठमात्रः प्रत्येतव्य इति, तत्प्रत्युच्यते–''स आत्मा तत्त्वमसि''इत्यादिवत्संसारिण एव सतोऽङ्गुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यत इति। द्विरूपं हि वेदान्तवाक्यानां प्रवृत्तिः–क्वचित्परमात्मस्वरूपनिरूपणपरा, क्वचिद्विज्ञानात्मनः परमात्मैकत्वोपदेशपरा। तदत्र विज्ञानात्मनः परमात्मनैकत्वमुपदिश्यते, नाङ्गुष्ठमात्रत्वं कस्यचित्। एतमेवार्थं परेण स्फुटीकरिष्यति–''अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः। तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषिकां धैर्येण। तं विद्याच्छुक्रममृतम्'' (का० २/६/१७) इति।।२५।। इति सप्तमं प्रमिताधिकरणम्।।

इति शाङ्करभाष्यम् प्रमिताधिकरणम् समाप्तम्

वार्तिकम्

शब्दादेव प्रमितः।।२४।। यदि ''न तद् भासयते सूर्यः'' इत्यादिस्मृतिबलाद् विषयसप्तम्यबधारणेन ''न तत्र सूर्यो भाती'' ति मन्त्रस्य ब्रह्मप्रतिपादनपरत्वमवसीयते; तयोर्मूलमूलिभावात्, एवं तर्हि तद्वदेव–''अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादि'' ति स्मृत्यनुसारेण जीवपरत्वम् ''अङ्गुष्ठमात्रः पुरुष'' इत्यादिमन्त्रयोरवधार्यतामिति दृष्टान्तसङ्गतिरत्र वेदितव्या।।

तत्राङ्गुष्ठमात्र भूतभव्येशानपदाभ्यां भवति संशयः–किं जीवात्मैवैतन्मन्त्राभिधेयः, किंवा परमात्मा–इति। जीवात्मनि ह्यङ्गुष्ठमात्रशब्दः कथञ्चिदं वर्तितुं शक्नोति; तस्याङ्गुष्ठपरिमित-हृदयपुण्डरीकावस्थिताकाशोपाधिकत्वात्, न परमात्मनि; तस्यानन्तायामविस्तारस्य निरुपाधिकस्य तत्परिमाणानुपपत्तेः। यत्रापि प्रादेशमात्रादिपरिमाणोपदेशः परमात्मनि श्रूयते, तत्रापि मूर्धादिचुबुकान्तादिप्रदेशश्रवणात् तदुपाधिक एव तदुपदेश उपासनार्थो भवति। न चात्र कश्चिदुपाधिः श्रूयते। न चाश्रूयमाणोऽपि स कल्पनीयः ; परमात्मनोऽत्रानुपास्यत्वेनोपदेशाद् वस्तुप्रतिपादनप्रकरणे तत्कल्पनानुपपत्तेः। न च–''मध्य आत्मनि तिष्ठती'' त्यादो तदुपाधिः श्रूयत इति–वाच्यम्; यद्यात्मशब्दः परमात्मपरो व्याख्यायते, तदा स्वे महिम्न्येवावस्थानम्, इति चेत्, तर्हि तदुपाधिको जीव एव भवेत्, न परमात्मा। तस्माद् जीवपरिमाणवचनोऽयमङ्गुष्ठमात्रशब्दः।।

''ईशानो भूतभव्यस्ये'' तिशब्दस्तु परमात्मानमेवाभिवदितुं शक्नोति; अन्यस्य निरङ्कुशैश्वर्यानुपपत्तेः। तत्रैकस्मिन् वाक्य उभयप्रतिपादनासंभवाद् अन्यतरे हातव्ये किं हातंव्यम्, किमुपादेयमिति भवति संशयः।।

ननु–''अन्यत्र धर्मादि'' त्यादिना परमात्मविषयः प्रश्नोऽस्ति, तदेवात्रानुकृष्यत इति–चेत्, न; ''गौतमे'' त्युपक्रम्य ''योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्'' इत्यनेन तदुत्तरस्य दीयमानत्वात्।।२४।।

ननु–उक्तमनन्तायामविस्तारस्य सर्वगतस्य परमात्मनोऽपि नाङ्गुष्ठमात्रपरिमाणमुपपद्यत इति, तत्र सूत्रम्*–हृद्यपेक्षया तु मनुष्याधिकारत्वात्*॥२५॥ तुशब्द उक्ताशङ्कानिवृत्त्यर्थः। शेषं व्याख्यांत भाष्ये। हृद्यपेक्षयेतिसूत्रावयवं व्याचष्टे–*सर्वगतस्यापीति*॥ ननु–एवं तर्हि जीव एव स भवेदित्युक्तम्। न ह जीवो नाम परमात्मनोऽन्यो भविकः कश्चिदस्ति, अपि तु परमात्मैव बुद्ध्याद्युपाध्यवच्छिन्नो जीव इत्युच्यत इत्यसकृदावेदितम्, तत्राह–*न चान्यः परमात्मन इति*। जैवं रूपमेवानूद्य तस्योपाधितो निष्कृष्य परमात्मस्वरूपताविधानपरत्वादस्य वाक्यस्येत्याशयः। ''मनुष्याधिकारत्वादि'' ति सूत्रावयवं व्याख्यातुं तद्व्यावर्त्यशङ्कामाह–*नन्विति॥ मनुष्यानेवेति*॥ अर्थी समर्थो विद्वान् शस्त्रेणापर्युदस्त इति विशेषणचतुष्टयविशिष्टस्यैव तत्र तत्राधिकारस्थापनात्, त्रैवर्णिकानामेवाविकलाङ्गानां तथात्वादित्यभिप्रायः। भवत्वेवम्, तथापि प्रकृते किमायातमिति? अत आह–*मनुष्याणां चेति*॥

आशयतो निराकृतमपि पूर्वपक्षबीजं मुख्तो निराकर्तुमनुभाषते–*यदप्युक्तमिति*॥ एकतरश्रुतेरन्यथाकरणे चरमपठितेशानश्रुतेरेवान्यथा करणमुचितमिति चोदयितुराशयः। नास्माभिरेकतरश्रुतेरन्यथानयनं क्रियते, येन विनियुज्येमहि; जीवेशानाभेदबोधकवाक्येऽस्मिन् परिमाणश्रुतेरुद्देश्यजीवपदार्थोपस्थापकत्वाभ्युपगमादिति परिहरति–*तत्प्रत्युच्यत इत्यादिना*॥ *नाङ्गुष्ठमात्रत्वं कस्यचिदिति*॥ ग्रहवदुद्देश्यगतत्वेन तत्समर्पकत्वेऽप्यविधेयत्वात् परिमाणस्येत्याशयः॥२५॥ इति सप्तमं प्रमिताधिकरणम्॥

इति वार्त्तिकम् प्रमिताधिकरणम् समाप्तम्

प्रदीपः

शब्दादेव प्रमितः।।२४।। प्रमितः=अङ्गुष्ठमात्रादिपदबोध्यः, परमात्मा, शब्दात्=ईशानत्वादिवाक्यशेषाद् इति सूत्रार्थः। अत्राङ्गुष्ठमात्रत्वलिङ्गेनेशानशब्दस्यान्यथा नयनेन पूर्वपक्षेण जीवलिङ्गाद् ब्रह्मलिङ्गान्यथानयनेऽपि ब्रह्मलिङ्गस्याभिभवाद् जीवलिङ्गाभिभूतब्रह्मलिङ्ग-कत्वेनास्पष्टब्रह्मलिङ्गकत्वम्। तत्र पूर्वाधिकरणे-''न तत्र सूर्यो भाती'' त्यत्र स्मृतिबलेन विषयसप्तमीसाधनवदत्रापि स्मृतिबलेनैवाङ्गुष्ठमात्रस्य जीवत्वमित्याक्षेपात् प्रत्युदाहरणसङ्गतिः।।

तत्र पूर्वपक्षं सगृह्णाति-*तत्र परिमाणेति*।। तथाच प्रमितपदमेव पूर्वपक्षकोटिबीजम्। अत्र परिमित इति वक्तव्ये प्रमितपदं परिमितत्वस्यैव मुख्यत्वम्, अन्यस्य तु काल्पनिकत्वमिति सूचनार्थम्। तेन काल्पनिकं परिमितत्वमादाय परमात्मपक्षो न तिष्ठतीति फलितम्। तदेतदाह-*न ह्यनन्तायामेति*।। ननु जीवस्यापि काल्पनिकमेवाङ्गुष्ठमात्रत्वमतित्यविशेष इति चेत्, नेत्याह-*विज्ञानात्मनस्त्विति*।। औपाधिकमेव जीवस्वरूपमिति तस्याङ्गुष्ठमात्रत्वं जीवसमसत्ताकं प्रमितम्, ब्रह्मणस्तु तत्समसत्ताकमङ्गुष्ठमात्रत्वं न प्रमितम्। ''देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पित'' इति न्यायादिति भावः। तदेतदाह-*कयाचित्कल्पनयेति*।। धर्मिसमसत्ताकत्व-कल्पनाविशेषेणेत्यर्थः। पूर्वाधिकरणसिद्धान्त एवात्र पूर्वपक्षबीजमित्याह-*स्मृतेश्चेति*।।२४।।

सिद्धान्तं संगृह्णाति-*परमात्मैवेति*।। कठबल्ल्या निर्गलितान्तः करणाद्युपाधिचैतन्य एव तात्पर्याद् नाप्रकृतजीवपरत्वं युक्तमिति भावः। प्रकरणाद् लिङ्गस्य बलवत्त्वाद् नैतदुपपद्यत इति शङ्कायामाह-*शब्दादिति*।। तथाच श्रुत्युपोद्बलितत्वेन प्रकरणस्यैवात्र प्राबल्यमिति भावः। तदिदमुक्तम्-*एतद्वै तदिति प्रकृतमित्यादिना*।। आकाशाधिकरणादावौपसंहारिकलिङ्गेन श्रुतेरन्यथा नयनम्, अत्र त्वौपक्रमिकलिङ्गेन श्रुतेरन्यथानयनशङ्केति विशेषाद् न तेन गतार्थत्वम्। परमोपक्रममादाय तु सिद्धान्तपक्षः। तथाचोपक्रमोऽपि श्रुत्यनुगुण एव, न तु लिङ्गानुगुण इति सूचयन्नाह-*पृष्टं चेहेत्यादिना*।। *अभिधानश्रुतेरिति*।। विशेष्यवाचकशब्दादित्यर्थः।

उत्तरमीमांसायां विशेष्यशब्दस्यैव श्रुतित्वेन व्यपदेशः, न तु तृतीयादिविभक्तेः। अङ्गुष्ठमात्रपदं तु विशेषणत्वाद् न श्रुतिरित्यभिप्रायः॥२४॥

परमात्मन्यङ्गुष्ठमात्रत्वं सूत्रयति– *हृद्यपेक्षया तु मनुष्याधिकारत्वादिति*॥२५॥ यद्यपि जीवो नाङ्गुष्ठमात्र एव; निरङ्गुष्ठानां प्राणिनामपि विद्यमानत्वेन तदनियमात्, तथापीदं वाक्यं तत्त्वमसीति महवावाक्यस्थानीयमिति जीवमुद्दिश्य ब्रह्मभावप्रतिपादनमपरम्। तत्रोपदेश उद्देश्यत्वं शास्त्राधिकारिणां मनुष्याणामेव भवितुमर्हति, नान्येषाम्; तेषां तु विज्ञानात्माऽङ्गुष्ठमात्र इति मनुष्यहृदयापेक्षमङ्गुष्ठमात्रत्वमिति भावः। मनुष्याणामपि साधनचतुष्ठयसंपन्नानामिह जन्मनि जन्मान्तरे वा ब्रह्मविद्यायामधिकारात् चण्डालान्तस्य यथासंभवं वेदपुराणेतिहासभाषाप्रबन्धदिद्वारा जीवस्य ब्रह्मभावबोधनं न विरुद्धमिति भावः। यथाचेह जन्मनि मनुष्यस्यापि जन्मान्तरे देवभावं कर्मविशेषादापन्नस्य ब्रह्मविद्यायामधिकारः, एव चण्डालभावपापन्नस्यापि तदधिकारो जन्मान्तरीयसाधनकर्मादिना साधनसंपत्तौ न विरुद्धः। अनेन चेह जन्मनि कर्मानुष्ठानेन चित्तशुद्ध्यादिकं न संपादनीयम्, किन्तु जन्मान्तरीयेणापि तेन निर्वाह इति सूच्यते, इति धर्मजिज्ञासायाः प्रागपि ब्रह्ममीमांसोपपत्तिः सूच्यते। तदिदं सर्वमभिप्रेत्याह– *नन्विति*॥ *मनुष्याधिकारत्वादिति च*॥ मनुष्याणामेव धर्माधर्माद्यधिकाराद् न विना मनुष्यजन्म ब्रह्मज्ञानादेः संभावनामात्रमपीति भावः॥२५॥ इति सप्तमं प्रमिताधिकरणम्॥

इति प्रदीप प्रमिताधिकरणम् समाप्तम्

भामती

नाञ्जसा मानभेदोऽस्ति परस्मिन् मानवर्जिते।

भूतभव्येशिता जीवे नाञ्जसी तेन संशयः॥

किमङ्गुष्ठमात्रश्रुत्यनुग्रहाय जीवोपासनापरमेतद्वाक्यमस्तु, तदनुरोधेन चेशानश्रुतिः कथञ्चिद्व्याख्यायताम, आहोस्विदीशानश्रुत्यनुग्रहाय ब्रह्मपरमेतदस्तु, तदनुरोधेनाङ्गुष्ठमात्रश्रुतिः कथञ्चिन्नीयताम्, तत्रान्यतरस्यान्यतरानुरोधविषये प्रथमानुरोधो न्याय्य इत्यङ्गुष्ठश्रुत्यनुरोधेने-शानश्रुतिर्नेतव्या। अपि च युक्तं हृत्पुण्डरीकदहरस्थानत्वं परमात्मनः, स्थानभेदनिर्देशात्। तद्धि तस्योपलब्धिस्थानं शालग्राम इव कमलनाभस्य भगवतः। न च तथेहाङ्गुष्ठमात्रश्रुत्या स्थानभेदो निर्दिष्टः, परिमाणमात्रनिर्देशात्। न च मध्य आत्मनीत्यत्र स्थानभेदोऽवगम्यते। आत्मशब्दो ह्ययं स्वभाववचनो वा जीववचनो वा ब्रह्मवचनो वा स्यात्। तत्र स्वभावस्य स्वभवितृधीननिरूपणतया स्वस्य च भवितुरनिर्देशान्न ज्ञायते कस्य मध्य इति। न च जीवपरयोरस्ति मध्यमञ्जसेति नैष स्थाननिर्देशो विस्पष्टः, स्पष्टस्तु परिमाणनिर्देशः। परिमाणभेदश्च परस्मिन्न सम्भवतीति जीवात्मैवाङ्गुष्ठमात्रः, स खल्वन्तःकरणाद्युपाधिकल्पितो भागः परमात्मनः अन्तःकरणश्च प्रायेण हृत्कमलकोशस्थानं, हृत्कमलकोशश्च मनुष्याणामङ्गुष्ठमात्र इति तदवच्छिन्नो जीवात्मऽप्याङ्गुष्ठमात्रो नभ इव वशंपर्वावच्छिन्नमरत्निमात्रम्। अपि च जीवात्मनः स्पष्टमङ्गुष्ठमात्रत्वं स्मर्य्यते–'अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्।' इति। नहि सर्वेशस्य ब्रह्मणो यमेन बलान्निष्कर्षः कल्पते। यमो हि जगौ–'हरिगुरुवशगोऽस्मि न स्वतन्त्रः प्रभवति संयमने ममापि विष्णुः' इति। तेनाङ्गुष्ठमात्रत्वस्य जीवे निश्चयाद् आपेक्षिकं किञ्चिद् भूतभव्यं प्रति जीवस्येशानत्वं व्याख्येयम्। एतद्वै तदिति च प्रत्यक्षजीवरूपं परामृशतीति। तस्माज्जीवात्मैवात्रोपास्य इति प्राप्तेऽभिधीयते–

प्रश्नोत्तरत्वादीशानश्रवणस्याविशेषतः।

जीवस्य ब्रह्मरूपत्वप्रत्यायनपरं वचः॥

इह हि भूतभव्यमात्रं प्रति निरङ्कुशमीशानत्वं प्रतीयते। प्राक् पुष्टं चात्र ब्रह्म, अन्यत्र धर्मादन्यत्राधर्मादित्यादिना। तदनन्तरस्य सन्दर्भस्य तत्प्रतिवचनतोचितेति एतद्वै तदिति ब्रह्माभिधानं युक्तम्। तथा चाङ्गुष्ठमात्रतया यद्यपि जीवोऽवगम्यते, तथापि न तत्परमेतद्वाक्यं, किन्त्वङ्गुष्ठमात्रस्य जीवस्य ब्रह्मरूपताप्रतिपादनपरम्। एवं निरङ्कुशमीशानत्वं न सङ्कोचयितव्यम्। न च ब्रह्मप्रश्नोत्तरता हातव्या, तेन यथा तत्त्वमसीति विज्ञानात्मनस्त्वम्पदार्थस्य तदिति परमात्मनैकत्वं प्रतिपाद्यते, तथेहाप्यङ्गुष्ठपरिमितस्य विज्ञानात्मन ईशानश्रुत्या ब्रह्मभावः प्रतिपाद्यत इति युक्तम्॥२४॥

सर्वगतस्यापि परब्रह्मणो हृदयेऽवस्थानमपेक्ष्य इति। जीवाभिप्रायम्। न चान्यः परमात्मन इह ग्रहणमर्हतीति न जीवपरमेतद्वाक्यमित्यर्थः। *मनुष्यानेव इति*। त्रैवर्णिकानेवेति। *अर्थित्वाद् इति* अन्तः संज्ञानां मोक्षमाणानां च काम्येषु कर्मस्वधिकारं निषेधति। *शक्तत्वाद् इति* तिर्य्यग्देवर्षीणामशक्तानामधिकारं निवर्त्तयति *उपनयनादिशास्त्राच्च इति* शूद्राणामनधिकारितां दर्शयति *यदप्युक्तं परिताणोपदेशात् स्मृतेश्च इति*। यद्येतत्परमात्मपरं किमिति तर्हि जीव इहोच्यते। ननु परमात्मैवोच्यताम्, उच्यते च जीवः, तस्माज्जीवपरमेवेति भावः। परिहरति *तत्प्रत्युच्यते इति*। जीवस्य हि तत्त्वं परमात्मभावः, तद्वक्तव्यम्, न च तज्जीवमनभिधाय शक्यं वक्तुमिति जीव उच्यत इत्यर्थः॥२५॥

इति भामती प्रमिताधिकरणम् समाप्तम्

श्री कण्ठभाष्य

कथं परमेश्वरे परिच्छिन्नत्वमभ्यस्यमानमुपपद्यत इत्यत आह–

।।सू।। हृद्यपेक्षया तु मनुष्याधिकारत्वात्।।२४।।

अपरिच्छिन्नस्यापि परमेश्वरस्याङ्गुष्ठमात्रत्वमुपासकहृदयापेक्षया, मनुष्याधिकारत्वादुपासना-शास्त्रविधेः। मनुष्याणां हृदयं यावत्प्रमाणं तदवच्छिन्नं रूपं परमेश्वरः परमकारुणिकः परिगृह्णाति तदुपासनासिद्धये। ततः परमेश्वरो ज्योतिर्मयो लिङ्गरूपतयोपासकानां हृदयमध्ये तिष्ठतीति निर्णयः।।

।।इति प्रमिताधिकरणम्।।६।।

अथ देवताधिकरणम्।।७।।

'मनुष्याधिकारत्वात्' इत्यस्मिन्नधिकरणे मनुष्याणामेव परमेश्वरोपासनेऽधिकारस्सूचितः। कथं देवानामपि परमेश्वरविषयमुपासनं श्रूयतेऽथर्वशिरसि, 'ततो देवा रुद्रं नापश्यंस्ते देवा रुद्रं ध्यायन्ति' इत्यत्रेत्याशङ्कायां तदुपपादनायाधिकरणमिदमारम्यते–

।।सू।। तदुपर्यपि बादरायणः संभवात्।।२५।।

अस्याथर्वशिरसि श्रूयते 'ते देवा रुद्रं ध्यायन्ति' इति विषयः।।

इह परमेश्वरोपासने देवानामधिकारः संभवति न वेति संशयः।।

न संभवतीति पूर्वः पक्षः। अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तो हि वैदिके कर्मण्यधिकारी। न च तेषां सामर्थ्यमस्ति, विग्रहाभावात्। विग्रहवन्तो हि स्तुतिध्यानादिषु कर्मसु समर्थाः। 'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्यादीनां प्रामाण्यात् तेषां विग्रहवत्त्वमिति चेत्–न, विध्येकवाक्यतापन्नानामन्यत्र तात्पर्याश्रावात्। सद्भावेऽपि तेषामर्थित्वं नास्ति परमेश्वरं प्रति, तेषां परमेश्वरस्य च पदस्यैकत्वात्। 'देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति' इति

श्रुत्या स्वर्ग एव लोको रुद्रस्य परब्रह्मणः पदवगम्यते, स एव देवानाम्। मुक्तस्यापि स्वाराज्यमेव प्राप्यतया अवगम्यते 'आप्नोति स्वाराज्यम्' इत्यादिषु। तथा वैदुष्यमपि तेषां नास्ति, उपनयनसंस्कारपूर्वकस्य वेदाध्ययनस्याभावेन तेषां वेदान्तविचारासंभवाद्ब्रह्मबोधानुपपत्तेः। अत एव तेषां शास्त्रपर्युदासश्च। तस्माद्देवानां नास्ति ब्रह्मोपासनेऽधिकार इति।।

सिद्धान्तस्तु-ब्रह्मोपासने देवानामप्यधिकारोऽस्ति। कुतः?तेषामर्थित्वसंभवात्। न च परमेश्वरस्य देवानां च पदं समानं, यतः सामान्येन सुखवाचकोऽपि स्वर्गशब्दः प्रकरणादिना विशेषमभिधत्ते; यथेश्वरशब्दः स्वामिमात्रवाचकः प्रकरणवशात् 'उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये' इत्यादिषु जनपदाधिपतिमात्रवाची राजविषयः, ब्रह्मणः प्रकरणे पुनरयं निरतिशयैश्वरर्यवाची तद्विषयो भवति, तथा सुखमात्रवाचकः स्वर्गशब्दः प्रकरणेन प्रमाणान्तरोपपत्त्या च देवानां पदं क्षयिष्णुत्वसातिशयत्वादिदोषकलुषितं स्वल्पसुखमभिधत्ते। परब्रह्मणः शिवस्य पदं तु निरतिशयसुखस्वरूपमनावृत्तिलक्षणमेव ब्रूते। अतः सातिशयत्वादिदोषदुष्टसुखपदवर्तिनां निरतिशयसुखं ब्रह्मपदं प्रत्यर्थित्वं संभवत्येव। शक्त्यतिशयतः स्वयंभातवेदार्थत्वात् पूर्वाधीतवेदविस्मरणाभावाद्वा तेषां वैदुष्यं च संभवति। शास्त्रस्य साधारण्येनोपासनाविधायकत्वादधिकारस्यदुर्निवारत्वेनदूरतस्तत्पर्युदासः। तेषामर्थवादप्रामाण्यात् विग्रहवत्त्वेन सामर्थ्यं चास्ति; 'आदित्योयूपः' 'अग्निर्हिमस्यभेषजम्'इत्यादीनां गुणवादानुवादानां स्वार्थे तात्पर्याभावेऽपि'इन्द्रो वृत्राय वज्रमुदयच्छत्' इत्याद्यर्थवादानां विरोधस्य मानान्तरप्राप्तेश्चाभावेन स्वार्थे तात्पर्यसंश्रवात्। तस्माद्ब्रह्मविद्यायामधिकारिणो देवाः।।

इति श्री कण्ठभाष्ये प्रमिताधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

'ईशानो भूतभव्यस्ये'त्यत्र विदित्वेत्यध्याहारः। अङ्गुष्ठमात्रः पुरुष उक्तः। तं भूतभव्यस्येशानं विदित्वा ततस्तदनन्तरं न विजुगुप्सते आत्मानं गोपायितुं नेच्छति अभयप्राप्तत्वादित्यर्थः। 'अङ्गुष्ठमात्रतया श्रूयमाण' इति संशयधर्मिणः पुरुषस्य विशेषणेन जीव इति पूर्वपक्षकोटेर्बीजं सूचितम्। परमेश्वर इति संबंध्युपन्यासेनैव भूतभव्येशितृत्वलिङ्गं सिद्धान्तकोटेर्बीजं सूचितम्। **स विश्वरूप इति।** विश्वरूपः पर्यायेण देवतिर्यङ्मनुष्यादिसकलरूपभाक्। त्रिगुणः सत्वादिगुणत्रयवश्यः। त्रिवर्त्मा जागरस्वप्नसुषुप्तिलक्षणसांसारिकमार्गत्रयसञ्चारी। प्राणाधिपः सकलप्राणेन्द्रियप्रवर्तकः। स प्रत्यगात्मा स्वकर्मभिरेव त्रिषु वर्त्मसु सञ्चरति। इदं पूर्वमन्त्रस्योत्तरार्धम् 'अङ्गुष्ठमात्र' इत्युत्तरमन्त्रस्य जीवविषयत्वस्फुटीकरणाय लिखितम्। रवितुल्यरूपः यथा रविस्त्रैलोक्यप्रकाशक एवमयं स्थूलसूक्ष्मदेहद्वयप्रकाशकः। सङ्कल्पाहङ्कारसमन्वितः ममेदं फलं भूयात्तदर्थमिदं साधनमनुष्ठेयमित्याद्यात्मा सङ्कल्पः, अहमेतेषां कर्मणां कर्ता तत्फलानां भोक्तेत्यात्माहङ्कारस्ताभ्यां समन्वित इति। नन्वङ्गुष्ठमात्रत्वं परमेश्वरेऽपि श्रूयते। 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः' इति मन्त्रो हि 'अनवस्थितेरसम्भवाञ्च नेतर' (ब्र० १-२-१८) इत्यधिकरणे परमेश्वरपरो निर्णीतः। सत्यम्। सोऽपि मन्त्रोऽङ्गुष्ठमात्रत्वश्रवणादेव जीवपर इत्याक्षिप्यते। अङ्गुष्ठमात्रत्वश्रवणं जीवासाधारणमिति। एतत् 'अथ सत्यवतः कायात्पाशबन्धवशंगतम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादि'ति भाष्यप्रयोगादपि हि निश्चीयते। तस्मान्मन्त्रान्तरेऽप्यङ्गुष्ठमात्रत्वश्रवणं दृश्यमानं जीवविषयमेवेति पूर्वपक्षिणोऽभिमानः। ननु 'मध्य आत्मानी'ति जीवात्मनोऽङ्गुष्ठमात्रपुरुषस्य भेदनिर्देशात्परमेश्वरः स्यादित्याशङ्क्याह—**मध्य आत्मनीति।** न ह्यत्रात्मशब्देन जीवोऽभिधीयते। तस्य मध्याभावात्। किं तु देह एव। 'आत्मा जीवे धृतौ देहे स्वभावे परमात्मनी'त्यभिधानकोशदर्शनात् 'आत्मैवेह महय्य आत्मा परिचर्य' इति प्रजापतिविद्यायामात्मशब्दस्य देहे प्रयोगदर्शनाञ्च। 'इहाप्यूर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्याति। मध्ये वामनमासीनं विश्वेदेवा उपासत' इत्यग्रिममन्त्रे प्राणापानमध्यवर्तित्वोक्त्या

देहमध्यवर्तित्वस्यैव लाभेन तदनुरोधा'न्मध्य आत्मनी'त्यस्यापि देहमध्यपरत्वस्यैवाङ्गीकर्तुमुचितत्वाच्चेति भावः। न'न्वीशानो भूतभव्यस्ये'ति श्रूयते अतः परमेश्वर एवाङ्गुष्ठमात्रस्स्यादित्याशङ्क्याह—**न त्विति।** नात्रेशानशब्दो ब्रह्मणोऽभिधानश्रुतिः। 'भूतभव्यस्ये' त्यैश्वर्यप्रतिसम्बन्ध्युपादानेन तस्य भूतभव्येशितृत्वरूपकेवलयौगिकार्थपरत्वात् योगरूढिमतां शब्दानां यौगिकार्थप्रतिसम्बन्ध्युपादाने रूढ्यनुन्मेषात्। अत एव 'पद्मानि यस्याग्रसरोरुहाणि प्रबोधयत्यूर्ध्वमुखैर्मयूखै'रिति सरःप्रतिसम्बन्ध्यग्रोपादानवति सरोरुहशब्दे स्थितेऽपि पद्मशब्दप्रयोगः। तस्मा'दीशानो भूतभव्यस्ये'ति पदद्वयसमभिव्याहारबोध्यं लिङ्गमात्रमस्ति। तत्तूपक्रमगतादङ्गुष्ठमात्रश्रवणाहुर्बलम्। उपक्रमगतमप्यङ्गुष्ठमात्रश्रवणं जीवस्य न श्रुतिः। तत्र तस्य शब्दस्य रूढ्यभावात्। नाप्यङ्गुष्ठमात्रत्वं तल्लिङ्गम्। अतिसूक्ष्मत्वात्तस्मिन्नङ्गुष्ठपरिमाणाभावात्। किं तु शाखान्तरे जीवे प्रयुक्तस्याङ्गुष्ठमात्रशब्दस्यात्र प्रत्यभिज्ञानमात्रं प्रमाणत्वेन वक्तव्यम्। तत्तु शाखाद्वयपरामर्शापेक्षम्। तेन अतिविलम्बितमित्युपसंहारगतमपि भूतभव्येशितृत्वलिङ्गं ततो बलवदिति चेत् मैवम्। अङ्गुष्ठमात्रत्वं जीवलिङ्गमेव। अङ्गुष्ठमात्रशब्देन हि अङ्गुष्ठाधिकपरिमाणव्यवच्छेदः क्रियते। न त्वङ्गुष्ठपरिमाणमपि विधीयते। एकस्य शब्दस्योभयत्र तात्पर्यायोगात्। अत एवाग्नीषोमीयपशावध्रिगुप्रैषे छागस्य पशोः पार्श्वद्वयगतानामस्थ्नां वङ्क्रिशब्दवाच्यानामियत्ताप्रकाशकस्य 'षड्विंशतिरस्य वङ्क्रय' इति मन्त्रस्य अश्वमेधपशावश्वे चोदकप्राप्तस्य तत्प्रकरणाम्नातेन 'चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिस्समेती' ति मन्त्रेणापवादप्रसक्तौ तदपवादार्थेन 'षड्विंशतिरित्येव ब्रूया'दिति वाक्येनैव निराकृष्टशक्तितया षड्विंशतिमन्त्रादन्यस्य चतुस्त्रिशन्मन्त्रस्य व्यवच्छेद एव क्रियते। न तु षड्विंशतिरिति ब्रूयादित्यपि विधीयते। षड्विंशतिमन्त्रस्तु तत्र चोदकापवादे निरस्ते चोदनादेव प्राप्यते। अतष्षड्विंशतिपदयुक्त एव स मन्त्रोऽश्वमेधे वक्तव्य इत्यत्र प्रमाणाभावादश्वस्य चतुस्त्रिंशतो वङ्क्रीणां तेन सहानुष्ठेयतूपरगोमृगयोर्वङ्क्रीणां च समस्य वचनरूपस्यास्य न बाध इति निरूपितं पूर्वतन्त्रे नवमाध्याये। नन्वङ्गुष्ठमात्र इत्यत्र मात्रशब्दः 'प्रमाणे द्वयसज्दघ्नञ्मात्रच' इति (पा० ५-२-३७) सूत्रेणानुशिष्टः प्रमाणवाची प्रत्ययः। न तु 'शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादिताद्धि' रित्यत्रेवोत्तरपदत्वनियतं प्रातिपदिकम्। तथा सत्यङ्गुष्ठमात्रपरिमाण इत्यर्थलाभायाङ्गुष्ठशब्दस्याङ्गुष्ठपरिमाण इत्यर्थलक्षणापत्तेरिति चेन्मैवम्। अङ्गुष्ठपरिमाणत्वस्य जीवेश्वरयोरुभयोरपि बाधितत्वेन पक्षद्वयेऽपि तथार्थग्रहणस्य विरुद्धत्वात् उदाहृतश्वेताश्वतरमन्त्रोत्तरसन्दर्भविरोधापत्तेश्च। तस्यैव हि मन्त्रस्य चतुर्थपादे 'आराग्रमात्रो ह्यवरोऽपि दृष्टः' इति जीवस्याराग्रमात्रत्वमुक्तम्। 'वालाग्रशतभागस्ये' ति तदनन्तदमन्त्रे वालाग्रयुतांशैकदेशप्रमाणत्वं

जीवस्योक्तम्। कथं तथा सूक्ष्मपरिमाणः स्यात् कथं चाराग्रपरिमाणोऽङ्गुष्ठपरिमाणः स्यात्। तस्मादङ्गुष्ठमात्र इत्यङ्गुष्ठाधिकपरिमाणव्यवच्छेदः। ततोऽङ्गुष्ठपरिमाणवत्त्वप्रसक्तावाराग्रमात्र इत्याराग्राधिकपरिमाणव्यवच्छेदः पुनराराग्रसमपरिमाणवत्त्वप्रसक्तौ 'वालाग्रशतभगस्ये'त्यनेनात्यन्त-सूक्ष्मत्वप्रतिपादनमिति युक्तम्। तस्मादिहोपक्रमगतस्याङ्गुष्ठाधिकपरिमाणभाववत्त्वरूपस्य जीव एव सम्भवात् चरमश्रुतं भूतभव्येशितृत्वं भूतभविष्यदनेकशरीरनियन्तृत्वपरतया जीव एव योजनीयमिति पूर्वपक्षाभिप्रायः। **परमेश्वरलिङ्गशब्दादिति।** भूतभव्यशब्दयोः प्रकरणोपपदादिसङ्कोचकाभावेन असङ्कुचितभूतभविष्यद्वस्तुजातपरत्वात्तन्नियन्तृत्वं परमेश्वरलिङ्गम्। ईशानशब्दश्चाभिधान-श्रुतिरूपस्तस्य शब्द इति। तस्मादुभयस्मात्प्रमाणात् अङ्गुष्ठपरिमितः परमेश्वरः सिध्यतीत्युक्तिभङ्ग्या शब्दव्यतिरेकेणान्यदपि तत्रार्थे प्रमाणमस्तीति सूचितम्। तदाविष्कृतं भाष्ये लिङ्गशब्देन। न च यौगिकार्थप्रतिसम्बन्ध्युपादानादीशानशब्दस्य श्रुतित्वभङ्गश्शङ्कनीयः। तदुपादानेऽपि रूढशब्दश्रवण-प्रयुक्तस्य रूढ्यर्थोन्मेषस्यानिवार्यत्वात्। काव्येषु तु व्यङ्ग्यार्थप्रधानेषु यस्य शब्दस्य यौगिकार्थो व्यञ्जनव्यापारानुकूलः तं शब्दं यौगिकार्थ एवोपक्षीणं कृत्वा तदीयरूढ्यर्थसमर्थनार्थं क्वचित्क्वचित्पदान्तरमुपाददते। तत्र पदान्तरोपादानं यौगिकार्थप्रतिसम्बन्ध्युपादानस्य रूढ्यर्थोन्मेष-विरोधित्वप्रयुक्तम्। तदनुपादानेऽपि 'तव प्रसादात्कुसुमायुधोऽपि सहायमेकं मधुमेव लब्ध्वा। कुर्यां हरस्यापि पिनाकपाणेर्धैर्यच्युतिं के मम धन्विनोऽन्य' इत्यत्र तद्दर्शनात्। अत्र हि कैमुतिकन्यायोपयोगिसारतरायुधत्वव्यञ्जनानुकूले यौगिकार्थ एव पिनाकपाणिशब्दमुपक्षीणं कृत्वा तद्रूढिविषयशिवसमर्पणाय पदान्तरं प्रयुक्तम्। एवमिहापि हिमवदौन्नत्यव्यञ्जनानुकूल-यौगिकार्थसमर्पणव्यग्रं सरोरुहपदमिति तद्रूढ्यर्थबोधनाय पद्मपदं प्रयुक्तमित्युक्तमित्युपपद्यते। किं च यस्य योगरूढ्योपास्य तदलभ्यं कस्यचिदवयवार्थस्य विशेषकरूमुपपाद्यते यथा 'पद्मानि यस्याग्रसरोरुहाणी'ति यथा वा 'लपनं पद्ममेवास्था लावण्यसरसीरुह'मिति तत्पदं तद्विशेषितयौगिकार्थवशीकृतमिति तेनापि हेतुना तत्र रूढ्युन्मेषो न भवतीति वक्तुं शक्यम्। इह तु सङ्कोचकाभावादीशानपदयौगिकार्थतया तल्लब्ध एवार्थो 'भूतभव्यस्ये'त्यनेनानूद्यत इति नात्र तदनुन्मेषशङ्कावकाशः। पूर्वपक्षबीजमुद्भाव्य तत्परिहारपरत्वेनोत्तरसूत्रमवतारयति–**कथमिति। अभ्यस्यमानमिति।** 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः। ईशानो भूतभव्यस्य स एवा द्य स उ श्व' इत्यग्रिममन्त्रे 'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषिकां धैर्येण तं विधात् शुक्रममृत' मित्यग्रिमखण्डान्तमन्त्रे च श्रूयमाणमङ्गुष्ठमात्रशब्दोक्तं परिच्छिन्नत्वमभ्यस्यमानत्वात् नान्यथा नेतव्यमिति भावः। 'अभ्यस्यमान'मित्यनेना'ङ्गुष्ठमात्रः पुरुषोऽन्तरात्मे'ति मन्त्रस्यापि स्मरणात्। तत्र तं

स्वाच्छरीरात्प्रवृहे'दित्येतच्छरीराद्विविक्ततया ज्ञातव्यत्वपरमिति जीवलिङ्गान्तरमपि ध्वनितम्।।सू०।। **हृद्यपेक्षया तु मनुष्याधिकारत्वात्**।।२४।। 'अङ्गुष्ठमात्र' इत्यनेनाङ्गुष्ठपरिमाणत्वमुच्यते। न तु तदधिकपरिमाणाभावः। अङ्गुष्ठशब्दस्य प्रागुक्तरीत्या लक्षणापत्तेः। सम्भवति च व्यापकस्यापि परमेश्वरस्योपासकहृदयापेक्षयाङ्गुष्ठपरिमाणत्वम्। दहरशाण्डिल्यविद्ययोरतिसौक्ष्म्यवचनं हृदयोर्ध्व-सुषिरापेक्षया इदं तु हृदयमध्यावकाशापेक्षयेति न विरोध इत्यभिप्रेत्याह–**अपरिच्छिन्नस्यापीति। हृदयापेक्षयेति।** सूत्रे 'हृदी'ति विषयसप्तमीति भावः। ननु हृदयापेक्षयाप्यङ्गुष्ठमात्रत्वमनुपपन्नम्। हस्तिमशकादीनां हृदयपरिमाणभेदात्। न च तत्तदङ्गुष्ठपरिमाणं ग्राह्यम्। खरतुरगादीनामङ्गुष्ठाभावा-दित्याशङ्कापरिहारांर्थ साध्याहारं सूत्रशेषमुपादाय तस्य तात्पर्यमाह-**मनुष्याधिकारत्वादित्यादिना। लिङ्गरूपेति।** अङ्गुष्ठसमानाकारत्वं लिङ्गभाव एव सम्भवति। प्रसिद्धं च पुराणागमेषु शिवस्य लिङ्गरूपेण हृदि सन्निधानम्। अतो लिङ्गरूप एवात्र विवक्षित इति भावः। न'न्वत्ता चराचरग्रहणा' (ब्र० १-२-१०) दित्यधिकरणे 'प्रकरणा'दिति (ब्र० १-२-१२) सूत्रेण कठवल्लीषु प्रकरणं ब्रह्मपरमित्युक्तम्। कथं तदन्तर्गतस्याङ्गुष्ठमन्त्रस्य जीवपरत्वमिति पूर्वपक्षावकाशः। उच्यते। आनुमानिकाधिकरणे 'त्रयाणामेव चैव'मिति (ब्र० १-४-६) सूत्रेण त्रयाणामुपासकोपासनीयतदुपासनानां कठवल्लीषु प्रश्नप्रतिवचनाभ्यां निरूपणमिति वक्ष्यते। तथा च 'महान्तं विभुमात्मानं मत्वा धीरो न शोचती'त्यादिप्राकरणिकपूर्वापरमन्त्रगत-ब्रह्मश्रुतिलिङ्गानामुपासनीयब्रह्मण्यन्वयः। अयं तु मन्त्रो 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिन' इत्यादिकठवल्लयन्तर्गतमन्त्रवदुपासकप्रश्नोत्तरतया जीवपरस्स्यादिति पूर्वपक्षोत्थानम्। अत्र प्राकरणिकब्रह्मलिङ्गानां स्पष्टत्वेऽपि पूर्वपक्षे तेषामन्यत्रान्वय इति स्पष्टास्पष्टब्रह्मलिङ्गता। ननु 'योनिमन्ये प्रपद्यन्त' इति मन्त्रान्तरवदस्यापि मन्त्रस्योपासकपरत्वेऽपि प्रकरणस्योपास्यतया प्रधाने ब्रह्मणि पर्यवसानं न हीयत इति नास्त्यधिकरणस्य प्रयोजनम्। उच्यते। पूर्वपक्षे सर्वेषामङ्गुष्ठवाक्यानां जीवपरत्वात् हृदि ज्योतिर्लिङ्गरूपः परमेश्वर उपासनीयो न सिध्यति। सिद्धान्ते त्व'ङ्गुष्ठमात्रो रवितुल्यरूप' इत्यादिषु जीवपरत्वेन सम्प्रतिपन्नेषु मन्त्रेष्वङ्गुष्ठमात्रशब्दस्य जीवपरत्वेऽपि ब्रह्मश्रुतिलिङ्गवत्सु मन्त्रेषु श्रुतस्य तस्य ब्रह्मपरत्वात्सा सिद्ध्यतीत्यस्ति प्रयोजनम्। ननु जीवपरमन्त्रेष्वङ्गुष्ठमात्रशब्दस्याङ्गुष्ठपरिमाणत्वं नार्थः बाधात् किंतु अङ्गुष्ठाधिकपरिमाणाभाव इति ब्रह्मपरत्वाभिमतेष्वपि मन्त्रेषु तथैकरूप्याय स एवार्थः स्यात्। नेति ब्रूमः। एकस्यापि विशेषणशब्दस्य विशेष्यभेदेन तत्तदुचितार्थग्रहणोपपत्तेः'स्थूलो विद्वान्देवदत्त' इत्यत्र देवदत्तात्मनि तदपृथग्भूतविशेषस्य शरीरस्थौल्यस्य सद्वारकान्वयवज्जीवापृथग्भूतहृदयावच्छेदकृतसङ्कोच-शालिधर्ममज्ञानगताङ्गुष्ठपरिमाणस्य जीवे सद्वारकान्वयस्योपपत्त्या जीवपरवाक्येऽप्यङ्गुष्ठमात्र

इत्यस्याङ्गुष्ठमात्र इत्यर्थग्रहणोपपत्तेश्च। एतेना'राग्रमात्र' इत्येतदपि व्याख्यातम्। नाड्यवच्छेदप्रयुक्तसङ्कोचधर्मज्ञानपरिमाणस्य सद्वारकान्वयो विवक्षित इति तत्रापि वक्तुं शक्यत्वात्॥

॥ इति प्रमिताधिकरणम्॥६॥

अथ देवताधिकरणम्॥७॥

उत्तराधिकरणस्य प्रासङ्गिकीं सङ्गतिमाह–**मनुष्याधिकारत्वादिति।** पूर्वाधिकरणसूत्रे मनुष्यग्रहणेन तदितरेषामधिकारो नास्तीति ज्ञापितत्वात् देवाः परमेश्वरोपासनायामधिकारिणो न भवन्तीति सिद्धम्। 'ततस्ते देवा रुद्रं ध्यायन्ती' त्यर्थवादः केवलमसदर्थावलम्बनस्तुतिपर इति प्राप्तौ तेषामधिकारोपपादनार्थमुत्तराधिकरणमारभ्यत इत्यर्थः। एषा प्रासङ्गिकी सङ्गतिः। बुद्धिस्थस्योपेक्षानर्हत्वं प्रसङ्गः॥सू०॥ **तदुपर्यपि बादरायणः सम्भवात्॥२५॥**

इति शिवार्कमणिदीपिका प्रमिताधिकरणम् समाप्तम्

अथ देवताधिकरणम्। ॥ २६-३३॥

शाङ्करभाष्यम्

तदुपर्यपि बादरायणः सम्भवात्॥२६॥

अङ्गुष्ठमात्रश्रुतिर्मनुष्यहृदयापेक्षा; मनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तम्, तत्प्रसङ्गेनेदमुच्यते। वाढं मनुष्यानधिकरोति शास्त्रम्, नतु मनुष्यानेवेतीह ब्रह्मज्ञाने नियमोऽस्ति। तेषां मनुष्याणामुपरिष्टाधे ये देवादयस्ततानप्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते। कस्मात्? *संभवात्*॥ सम्भवति हि तेषामप्यर्थित्वाद्यधिकारकारणम्। तत्रार्थित्वं तावन्मोक्षविषयं देवादीनामपि सम्भवति विकारविषयविभूत्यनित्यत्वालोचनादिनिमित्तम्। तथा सामर्थ्यमपि तेषां सम्भवति; मन्त्रार्थवादेतिहासपुराणलोकेभ्यो विग्रहवत्त्वाद्यवगमात्। न च तेषां कश्चित्प्रतिषेधोऽस्ति। नचोपनयनशास्त्रेणैषामधिकारो निवर्त्येत; उपनयनस्य वेदाध्ययनार्थत्वात्। तेषां च स्वयंप्रतिभातवेदत्वात्। अपि चैषां विद्याग्रहणार्थं ब्रह्मचर्यादि दर्शयति–''एकशतं ह वै वर्षाणि मघवान्प्रजापतौ ब्रह्मचर्यमुवास'' (छा० ८/११/३) ''भृगुर्वै वारुणिः। वरूणं पितरमुपससार। अधीहि भगवो ब्रह्म'' (तै० ३/१) इत्यादि॥ यदपि कर्मस्वनधिकारकारणमुक्तम्–''न देवानां देवान्तराभावात्'' इति, ''न ऋषीणामार्षेयान्तराभावात्'' (जै० ६/१/७) इति। न तद्विद्यास्वस्ति। न हीन्द्रादीनां विद्यास्वधिक्रियमाणानामिन्द्राद्युद्देशेन किञ्चित्कृत्यमस्ति। न च भृग्वादीनां भृग्वादिसगोत्रतया। तस्माद्देवादीनामपि विद्यास्वधिकारः केन वार्यते? देवाद्यधिकारेऽप्यङ्गुष्ठमात्रश्रुतिः स्वाङ्गुष्ठापेक्षया न विरुध्यते॥२६॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥२७॥

स्यादेतद्र–यदि विग्रहवत्त्वाद्यभ्युपगमेन देवादीनां विद्यास्वधिकारो वर्ण्येत। विग्रहवत्त्वादृत्विगादिवदिन्द्रादीनामपि स्वरूपसंनिधानेन कर्माङ्गभावोऽभ्युपगम्येत। तदा च विरोधः कर्मणि स्यात्। नहीन्द्रादीनां स्वरूपसंनिधानेन यागेऽङ्गभावो दृश्यते। नच सम्भवति बहुषु यागेषु युगपदेकस्येन्द्रस्य स्वरूपसंनिधानतानुपपत्तेरिति चेत्, नायमस्ति विरोधः, कस्मात्? *अनेकप्रतिपत्तेः*॥ एकस्यापि देवतात्मनो युगपदनेकस्वरूपप्रतिपत्तिः सम्भवति। कथमेतदवगम्यते? *दर्शनात्*॥ तथा हि–''कति

देवा:'' इत्युपक्रम्य ''त्रयश्च त्री च शता त्रयश्च त्री च सहस्रा'' इति निरुच्य ''कतमे ते'' इत्यस्यां पृच्छायाम् ''महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा:'' (बृ० ३/९/१/२) इति निर्ब्रुवतं। श्रुतिरेकैकस्य देवतात्मनो युगपदनेकरूपतां दर्शयति। तथा त्रयस्त्रिंशतोऽपि षडान्तर्भावक्रमेण ''कतम एको देव इति प्राण:'' इति प्राणैकरूपतां देवानां दर्शयन्ती तस्यैवैकस्य प्राणस्य युगपदनेकरूपतां दर्शयति। तथा स्मृतिरपि- ''आत्मनो वै शरीराणि बहूनि भरतर्षभ। योगी कुर्याद्बलं प्राप्य तैश्च सर्वैर्महीं चरेत्॥ प्राप्नुयाद्विषयान्कैश्चित्कैश्चिदुग्रं तपश्चरेत्। संक्षिपेञ्च पुनस्तानि सूर्यो रश्मिगणानिव ॥'' इत्येवंजातीयका प्राप्ताणिमाद्यैश्वर्याणां योगिनामपि युगपदनेकशरीरयोगं दर्शयति, किमु वक्तव्यमाजानसिद्धानां देवानाम? अनेकरूपप्रतिपत्तिसम्भवाञ्चैकैका देवता बहुभी रूपैरात्मानं प्रविभज्य बहुषु यागेषु युगपदङ्गभावं गच्छतीति। परैश्च न दृश्यतेऽन्तर्धानादिक्रियायोगादित्युपपद्यते॥ अनेकप्रतिपत्तेर्दर्शनादित्यस्यापरा व्याख्याविग्रहवतामपि कर्माङ्गभावचोदनास्वनेका प्रतिपत्तिर्दृश्यते। क्वचिदेकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं न गच्छति, यथा बहुभिर्भोजयद्भिर्नैको ब्राह्मणो युगपद् भोज्यते। क्वचिञ्चैकोऽपि विग्रहवाननेकत्र युगपदङ्गभावं गच्छति, यथा बहुभिर्नमस्कुर्वाणैरेको ब्राह्मणो युगपन्नमस्क्रियते। तद्वदिहोद्देशपरित्यागात्मकत्वाद्यागस्य विग्रहवतीमप्येकां देवतामुद्दिश्य बहव: स्वं स्वं द्रव्यं युगपत्परित्यक्ष्यन्तीति, इति विग्रहवत्त्वेऽपि देवतानां न किञ्चित्कर्मणि विरुध्यते॥२७॥

***शब्द इति चेन्नात: प्रभवात्प्रत्यक्षानुमानाभ्याम्*॥२८॥**

मा नाम विग्रहवत्त्वे देवादीनामभ्युपगम्यमाने कर्मणि कश्चिद्विरोध: प्रसञ्जि। शब्दे तु विरोध: प्रसज्येत। कथम्? औत्पत्तिकं हि शब्दस्यार्थेन सम्बन्धमाश्रित्य ''अनपेक्षत्वात्'' इति वेदस्य प्रामाण्यं स्थापितम्। इदानीं तु विग्रहवती देवताऽभ्युगम्यमाना यद्यप्यैश्वर्ययोगाद्युगपदनेक- कर्मसम्बन्धीनि हवींषि भुञ्जीत; तथापि विग्रहयोगादस्मदादिवज्जननमरणवती सेति नित्यस्य शब्दस्य नित्येनार्थेन नित्ये सम्बन्धे प्रतीयमाने यद्वैदिकं शब्दे प्रामाण्यं स्थितम्, तस्य विरोध: स्यादिति चेत्, नायमप्यस्ति विरोध:। कस्मात्? *अत: प्रभवात्*॥ अत एव हि वैदिकाच्छब्दाद्देवादिकं जगत्प्रभवति॥ ननु-''जन्माद्यस्य यत'' (ब्र० १/१/२) इत्यत्र ब्रह्मप्रभवत्वं जगतोऽवधारितम्, कथमिह शब्दप्रभवत्वमुच्यते? अपि च यदि नाम वैदिकाच्छब्दादस्य प्रभवोऽभ्युपगत:, कथमेतावता विरोध: शब्दे परिहृत:? यावता वसवो रुद्रा आदित्या विश्वेदेवा मरुत इत्येतेऽर्था अनित्या एवोत्पत्तिमत्त्वात्। तदनित्यत्वे च तद्वाचिनां वैदिकानां वस्वादिशब्दानामनित्यत्वं केन निवार्यते? प्रसिद्धं हि लाके देवदत्तस्य पुत्र उत्पन्ने यज्ञदत्त इति तस्य नाम क्रियत इति। तस्माद्विरोध एव शब्द इति चेत्, न;

गवादिशब्दार्थसम्बन्धनित्यत्वदर्शनात्। न हि गवादिव्यक्तिनामुत्पत्तिमत्त्वे तदाकृतीनामप्युत्पत्तिमत्त्वं स्यात्। द्रव्यगुणकर्मणां हि व्यक्तय एवोत्पद्यन्ते, नाकृतयः। आकृतिभिश्च शब्दानां सम्बन्धः, न व्यक्तिभिः ; व्यक्तिनामानन्त्यात्सम्बन्धग्रहणानुपपत्तेः। व्यक्तिषूत्पद्यामानाखप्याकृतीनां नित्यत्वान्न गवादिशब्देषु कश्चिद्विरोधो दृश्यते। तथा देवादिव्यक्तिप्रभवाभ्युपगमेऽप्याकृतिनित्यत्वान्न कश्चिद्वस्वादिशब्देषु विरोध इति द्रष्टव्यम्। आकृतिविशेषस्तु देवादीनां मन्त्रार्थवादादिभ्यो विग्रहवत्त्वाद्यवगमादवगन्तव्यः। स्थानविशेषसम्बन्धनिमित्ताश्चेन्द्रादिशब्दाः सेनापत्यादिशब्दवत्। ततश्च यो यस्तत्तत्स्थानमधिरोहति, स स इन्द्रादिशब्दैरभिधीयत, इति न दोषो भवति।। न चेदं शब्दप्रभवत्वं ब्रह्मप्रभवत्ववदुपादानकारणाभिप्रायेणोच्यत। कथं तर्हि? स्थिते वाचकात्मना नित्ये शब्दे नित्यार्थसम्बन्धिनि शब्दव्यवहारयोग्यार्थव्यक्तिनिष्पत्तिः। अतः प्रभव इत्युच्यते, कथं पुनरवगम्यते शब्दात्प्रभवति जगदिति? *प्रत्यक्षानुमानाभ्याम्*।। प्रत्यक्षं श्रुतिः ; प्रामाण्यं प्रत्यनपेक्षत्वात्। अनुमानं स्मृतिः ; प्रामाण्यं प्रति सापेक्षत्वात्। ते हि शब्दपूर्वां सृष्टिं दर्शयतः। ''एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितृं स्तिरः-पवित्रमिति ग्रहानाशव इति स्तोंत्र पिश्वानिति शस्त्रमभिसौभगेत्यन्याः प्रजा'' इति श्रुतिः। तथाऽन्यत्रापि ''स मनसा वाचं मिथुनं समभवत्'' (बृ॰ १/२/४) इत्यादिना तत्र तत्र शब्द पूर्विका सृष्टिः श्राव्यते। स्मृतिरपि-''अनादिनिधना नित्यावगुत्सृष्टा स्वयंभुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः।।'' इति। उत्सर्गोऽप्ययं वाचः सम्प्रदायप्रवर्तनात्मको द्रष्टव्यः ; अनादिनिधनाया अन्यादृशस्योत्सर्गस्यासम्भवात्। तथा ''नाम रूपं च भूतानां कर्मणां च प्रवर्तनम्। वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः।।'' (मनु॰ १/२१) इति। ''सर्वेषां तु स नामानि कर्माणि च पृथक्पृथक् वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे।'' इति च। अपिच चिकीर्षितमर्थमनुतिष्ठंस्तस्य वाचकं शब्दं पूर्वं स्मृत्वा पश्चात्तमर्थमनुतिष्ठतीति सर्वेषां नः प्रत्यक्षमेतत्। तथा प्रजापतेरपि सृष्टुः सृष्टेः पूर्वं वैदिकाः शब्दा मनसि प्रादुर्बभूवुः, पश्चात्तदनुगतानर्थान्ससर्जेति गम्यते। तथा च श्रुतिः-''स भूरिति व्याहरस्त भूमिमसृजत'' (तै॰ ब्रा॰ २/२/४/२) इत्येवमादिका भूरादिशब्देभ्य एव मनसि प्रादुर्भूतेभ्यो भूरादिलोकान्सृष्टान्दर्शयति।। किमात्मकं पुनः शब्दमभिप्रेत्येदं शब्दप्रभवत्वमुच्यते? स्फोटमित्याह। वर्णपक्षे हि तेषामुत्पन्नप्रध्वंसित्वान्नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यनुपपन्नं स्यात्। उत्पन्नंध्वंसिनश्च वर्णाः ; प्रत्युञ्चारणमन्यथा चान्यथा च प्रतीयमानत्वात्। तथा हि- अदृश्यमानोऽपि पुरुषविशेषोऽध्ययनध्वनिश्रवणादेव विशेषतो निर्धार्यते-देवदत्तोऽयमधीयते यज्ञदतोऽयमधीते इति। न चायं वर्णविषयोऽन्यथात्वप्रत्ययो मिथ्याज्ञानम्; बाधकप्रत्ययाभावात्। नच वर्णेभ्योऽर्थावगतिर्युक्ता। न

ह्येकैको वर्णोऽर्थं प्रत्याययेत्; व्यभिचारात्। नच वर्णसमुदायप्रत्ययोऽस्ति; क्रमवत्त्वाद्वर्णानाम्। पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितोऽन्त्यो वर्णोऽर्थं प्रत्याययिष्यतीति यद्युच्येत। तन्न। सम्बन्धग्रहणापेक्षो हि शब्दः स्वयं प्रतीयमानोऽर्थं प्रत्याययेत धूमादिवत्। नच पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितस्यान्त्यवर्णस्य प्रतीतिरस्ति; अप्रत्यक्षतवात्संस्काराणाम्।। कार्यप्रत्यायितैः संस्कारैः सहितोऽन्तयो वर्णोऽर्थं प्रत्यायष्तितीति चेत्, न; संस्कारकार्यस्यापि स्मरणस्य क्रमवर्तित्वात्। तस्मात्फोट एव शब्दः। स चैकैकवर्णप्रत्ययाहितसंकस्कारवीजेऽन्त्यवर्ण-प्रत्ययजनितपरिपाके प्रत्ययिन्येकप्रत्ययविषतया झटिति प्रत्यवभासते। न चायमेकत्वप्रत्ययो वर्णविषया स्मृतिः ; वर्णानामनेकत्वादेकप्रत्ययविषयत्वानुपपत्तेः। तस्य च प्रत्युञ्चारणं प्रत्यभिज्ञायमानत्वानित्यत्वम्; भेदप्रत्ययस्य वर्णविषयत्वात्। तस्मान्नित्याच्छब्दात्स्फोट-रूपादभिधायकात्क्रियाकारकफलक्षणं जगदभिंधेयभूतं प्रभवतीति।।

वर्णा एव तु शब्दः इति भगवानुपवर्षः।। ननूत्पन्नप्रध्वंसित्वं वर्णानामुक्तम्, तन्न; त एवेति प्रत्यभिज्ञानात्। सादृश्यात्प्रत्यभिज्ञानं केशादिषिववेति चेत्, न; प्रत्यभिज्ञानस्य प्रमाणान्तरेण बाधानुपपत्तेः। प्रत्यभिज्ञानमाकृतिनिमित्तमिति चेत्, न; व्यक्तिप्रत्यभिज्ञान्य। यदि हि प्रत्युञ्चारणं गवादिव्यक्तिवदन्या अन्या वर्णव्यक्तयः प्रतीयेरं, स्तत आकृतिनिमित्तं प्रत्यभिज्ञानं स्यात्, न त्वेदस्ति, वर्णव्यक्तय एव हि प्रत्युञ्चारणं प्रत्यभिज्ञायन्ते। द्विर्गोशब्द उच्चारित इति हि प्रतिपत्ति र्न, न तु दौ गोशब्दाविति।। ननु—वर्णा अप्युञ्चारणभेदेन भिन्नाः प्रतीयन्ते; देवदत्तयज्ञदत्तयोरध्ययन-ध्वनिश्रवणादेव भेदप्रतीतेरित्युक्तम्। अत्राभिधीयते; सति वर्णविषये निश्चिते प्रत्यभिज्ञाने, संयोगविभागाभिव्यङ्ग्यत्वाद्वर्णानामभिव्यञ्जकवैचित्र्यनिमित्तोऽयं वर्णविषयो विचित्रः प्रत्ययो न स्वरूपनिमित्तः। अपि च वर्णव्यक्तिभेदवादिनाऽपि प्रत्यभिज्ञानसिद्धये वर्णाकृतयः कल्पयितव्याः। तासु च परोपाधिको भेदप्रत्यय इत्यभ्युपगन्तव्यम्। तद्वरं वर्णव्यक्तिष्वेव परोपाधिको भेदप्रत्ययः, स्वरूपनिमित्तं च प्रत्यभिज्ञानमिति कल्पनालाघवात्। एष एव च वर्णविषयस्य भेदप्रत्ययस्य बाधकः प्रत्यय यत्प्रत्यभिज्ञानम्।। कथं ह्येकस्मिन्काले बहूनामुञ्चारयतामेक एव सन्गकारो युगपदनेकरूपः स्यात्? उदात्तश्चनुदात्तश्च, स्वरितश्च, सानुनासिकश्च, निरनुनासिकश्चेति। अथवा—ध्वनिकृतोऽयं प्रत्ययभेदः, न वर्णकृत इत्यदोषः।। कः पुनरयं ध्वनिर्नाम? यो दूरादाकर्णयतो वर्णविवेकमप्रतिपद्यमानस्य कर्णपथमवतरति। प्रत्यासीदतश्च पटुमृदुत्वादिभेदं वर्णेषवासञ्जयति। तन्निबन्धनाश्चोदात्तादयो विशेषा न वर्णस्वरूपनिबन्धनाः ; वर्णानां प्रत्युच्चारणं प्रत्यभिज्ञायमानत्वात्। एवं च सति सालम्बना उदात्तादिप्रत्यया भविष्यन्ति। इतरथा हि वर्णानां प्रत्यभिज्ञायमानानां

निर्भेदत्वात्संयोगविभागकृता उदात्तादिविशेषाः कल्प्येरन्, संयोगविभागानां चाप्रत्यक्षत्वान्न तदाश्रया विशेषा वर्णेष्वध्यवसातुं शक्यन्त। इत्यतो निरालम्बना एवैत उदात्तादिप्रत्ययाः स्युः। अपि च नैवैतदभिनिवेष्टव्यमुदात्तादिभेदेन वर्णानां प्रत्यभिज्ञायमानानां भेदो भवेदिति। न ह्यन्यस्य भेदेनान्यस्या भिद्यमानस्य भेदो भवितुमर्हत। नहि व्यक्तिभेदेन जाति र्भिन्ना मन्यते। वर्णेभ्यश्चार्थप्रतीतेः सम्भवात्स्फोटकल्पनाऽनर्थिका। न कल्पयाम्यहं स्फोटम्, प्रत्यक्षमेवं त्वेनमवगच्छामि, एकैकवर्णग्रहणाहितसंस्कारायां बुद्धौ झटिति प्रत्यवभासनादिति चेत्, न; अस्या अपि बुद्धेर्वर्णविषयत्वात्। एकैकवर्णग्रहणोत्तरकाला हीयमेका बुद्धिर्गौरिति समस्तवर्णविषया, नार्थान्तरविषया।। कथमेतदवगम्यते? यतोऽस्यामपि बुद्धौ गकारादयो वर्णा अनुवर्तन्ते, न तु दकारादयः। यदि ह्यस्या बुद्धेर्गकारादिभ्योऽर्थान्तरं स्फोटो विषयः स्यात्ततो दकारादय इव गकारादयोऽप्यस्या बुद्धेर्व्यावर्तेरन्, नतु तथाऽस्ति। तस्मादियमेकबुद्धिर्वर्णविषयैव स्मृतिः। नन्नेकत्वाद्वर्णानां नैकबुद्धिविषयतोपपद्यत इत्युक्तम्, तत्प्रतिब्रूमः—सम्भवत्यनेकस्याप्येक-बुद्धिविषयत्वम्; सेना, पंक्तिर्वनं शतम्, सहस्रमित्यादिदर्शनात्। या तु गौरित्येकोऽयं शब्द इति बुद्धिः, सा बहुष्वेव वर्णेष्वेकार्थावच्छेदनिबन्धनौपचारिकी वनसेनादिबुद्धिवदेव। अत्राह—यदि वर्णा एव सामस्त्येनैकबुद्धिविषयतामापद्यमानाः पदं स्युस्ततो जारा राजा, कपिः, पिक इत्यादिषु पदविशेषप्रतिपत्तिर्न स्यात्। त एव हि वर्णा इतरत्र चेतरत्र च प्रत्यवभासन्त—इति, अत्र वदामः—सत्यपि समस्तवर्णप्रत्यवमर्शे यथा क्रमानुरोधिन्य एव पिपीलिकाः पक्तिबुद्धिमारोहन्ति, एवं क्रमानुरोधिन एव वर्णाः पदबुद्धिमारोक्ष्यन्ति। तत्र वर्णानामविशेषेऽपि क्रमविशेषकृता पदविशेषप्रतिपत्तिर्न विरुध्यते। वृद्धव्यवहारे चेमे वर्णाः क्रमाद्यनुगृहीता गृहीतार्थविशेषसम्बन्धाः सन्तः स्वव्यवहारेऽप्येकैकवर्णग्रहणानन्तरं समस्तप्रत्यवमर्शिन्यां बुद्धौ तादृशा एव प्रत्यवभासमानास्तं तमर्थमव्यभिचारेण प्रत्याययिष्यन्तीति वर्णवादिनो लघीयसी कल्पना, स्फोटवादिनस्तु दृष्टहानि-अदृष्टकल्पना च वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति, स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्।। अथापि नाम प्रत्युच्चारणमन्येऽन्ये वर्णाः स्युः, तथापि प्रत्यभिज्ञालम्बनभावेन वर्णसामान्यानामवश्याभ्युपगन्तव्यत्वाद्या वर्णेष्वर्थप्रतिपादनप्रक्रिया रचिता, सा सामान्येषु सञ्चारयितव्या। ततश्च नित्येभ्यः शब्देभ्यो देवादिव्यक्तीनां प्रभव इत्यविरुद्धम्।।२८।।

अत एव च नित्यत्वम्।।२९।।

स्वतन्त्रस्य कर्तुरस्मरणादिभिः स्थिते वेदस्य नित्यत्वे देवादिव्यक्तिप्रभवाभ्युपगमेन तस्य

विरोधमाशङ्क्य ''अत: प्रभवाद्र'' इति परिहृत्येदानीं तदेव वेदनित्यत्वं स्थितं द्रढयति-*अत एव च नित्यत्वमिति*।। अत एव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वाद्वेदशब्दे नित्यत्वमपि प्रत्येतव्यम्। तथा च मन्त्रवर्ण:-''यज्ञेन वाच: षदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम्'' (ऋ० सं० १०/७१/३) इति स्थितामेव वाचमनुविन्नां दर्शयति। वेदव्यासश्चैवमेव स्मरति-''युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षय:। लेभिरे तपसा पूर्वमनुज्ञाता: स्वयम्भुवा'' इति।।२९।।

***समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च*।।३०।।**

अथापि स्यात्-यदि पश्वादिव्यक्तिवद्देवादिव्यक्तयोऽपि सन्तत्यैवोत्पद्येरन्निरुध्येरंश्च, ततोऽभिधानाभिधेयाभिधातृ- व्यवहाराविच्छेदात्सम्बन्धनित्यत्वेन विरोध: शब्दे परिह्रियेत। यदा तु खलु सकलं त्रैलोक्यं परित्यक्तनामरूपं निर्लेपं प्रलीयते, प्रभवति चाभिनवमिति श्रुतिस्मृतिवादा वदन्ति, तदा कथमविरोध इति? तत्रेदमभिधीयते-*समाननामरूपत्वादिति*।। तदापि संसारस्यानादित्वं तावदभ्युपगन्तव्यम्। प्रतिपादयिष्यति चाचार्य: संसारस्यानादित्वम्-''उपपद्यते चाप्युपलभ्यते च'' (ब्र० २/१/३६) इति। अनादौ च संसारे यथा स्वापप्रबोधयो: प्रलयप्रभवश्रवणेऽपि पूर्वप्रबोधवदुत्तरप्रबोधेऽपि व्यवहारान्न कश्चिद्विरोध:, एवं कल्पान्तरप्रभवप्रलययोरपीति द्रष्टव्यम्। स्वापप्रबोधयोश्च प्रलयप्रभवौ श्रूयेते-''यदा सुप्त: स्वप्नं न कञ्चन पश्यत्यथास्मिन्प्राण एवैकधा भवति तदैनं वाक्सर्वैर्नामभि: सहाप्येति चक्षु: सर्वै रूपै: सहाप्येति श्रोत्रं सर्वै: शब्दै: सहाप्येति मन: सर्वैर्ध्यानै: सहाप्येति स यदा प्रतिबुध्यते यथाऽग्नेर्ज्वलत: सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मन: सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका:'' (कौ० ३/३) इति। स्यादेतत्-स्वपे पुरुषान्तरव्यवहारविच्छेदात्स्वयं च सुप्तप्रबुद्धस्य पूर्वप्रबोधव्यवहारानुसन्धान सम्भवादविरुद्धम्। महाप्रलये तु सर्वव्यवहारोच्छेदाज्जन्मान्तरव्यवहारवच्च कल्पान्तरव्यवहारस्यानुसन्धातुमशक्य- त्वाद्वैषम्यमिति। नैष दोष: ; सत्यपि सर्वव्यवहारोच्छेदिनि महाप्रलये परमेश्वरानुग्रहादीश्वराणां हिरण्यगर्भादीनां कल्पान्तरव्यवहारानुसन्धानोपपत्ते:। यद्यपि प्राकृता: प्राणिनो न जन्मात्तरव्यवहारमनुसन्दधाना दृश्यन्त इति; तथापि न प्राकृतवदीश्वराणां भवितव्यम्। यथा हि प्राणित्वाविशेषेऽपि मनुष्यादिस्तम्बपर्यन्तेषु ज्ञानैश्वर्यादिप्रतिबन्ध: परेण परेण भूयान्भवन्दृश्यते, तथा मनुष्यादिष्वेव हिरण्यगर्भपर्यन्तेषु ज्ञानैश्वर्याद्यभिव्यक्तिरपि परेण परेण भूयसी भवतीत्येतच्छतिस्मृतिवादेष्वसकृदनुश्रूयमाणं न शक्यं नास्तीति वदितुम्। ततश्चातीतकल्पानुष्ठित- प्रकृष्टज्ञानकर्मणामीश्वराणां हिरण्यगर्भादीनां वर्तमानकल्पादौ प्रादुर्भवतां परमेश्वरानुगृहीतानां सुप्तप्रतिबुद्धवत्कल्पनान्तरव्यवहारानुसन्धानोपपत्ति:। तथा च श्रुति:-''यो

ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये'' (श्वे० ६/१८) इति। स्मरन्ति च शौनकादयः ''मधुच्छन्दः प्रभृतिभिार्ऋषिर्भिदाशतय्यो दृष्टाः'' इति। प्रतिवेदं चैवमेव काण्डर्ष्यादयः स्मर्यन्ते। श्रुतिरप्यृषिज्ञानपूर्वकमेव मन्त्रेणानुष्ठानं दर्शयति–''यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा प्रतिपद्यते (सर्वानु० परि०) इत्युपक्रम्य ''तस्मादेतानि मन्त्रे मन्त्रे विद्याद्र'' इति। प्राणिनां च सुखप्राप्तये धर्मो विधीयते। दुःखपरिहाराय चाधर्मः प्रतिषिध्यते। दृष्टानुश्रविकसुखदुःखविषयौ च रागद्वेषौ भवतः, न विलक्षणविषयावित्यतो धर्माधर्मफलभूतोत्तरा सृष्टिर्निष्पद्यमाना पूर्वसृष्टिसदृश्येव निष्पद्यते। स्मृतिश्च भवति–''तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे। तानयेव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः।। हिंस्त्राहिंस्त्रे मृदुक्रूरे धर्माधर्मावृतानृते। तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते।।'' इति।

तेषां ये यानि कर्माणि प्राकसृष्टयां प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः।।
हिंसाहिस्त्रे मृदुक्रूरे धर्माधर्मावृतानृते।
तद्रभाविताः प्रपद्यन्ते तस्मात्ततस्य रोचते।।' इति।

प्रलीयमानमपि चेदं जगच्छक्त्यवशेषमेव प्रलीयते, शक्तिमूलमेव च प्रभवति; इतरथाऽऽकस्मिकत्वप्रसङ्गात्। न चानेकाकाराः शक्तयः शक्यः कल्पयितुम्। ततश्च विच्छिद्य विच्छिद्याप्युद्भवतां भूरादिलोकप्रवाहाणाम्, देवतिर्यङ्मनुष्यलक्षणानां च प्राणिनिकायप्रवाहाणाम्, वर्णाश्रमधर्मफलव्यवस्थानां चानादौ संसारे नियतत्वमिन्द्रियविषयसम्बन्धनियतत्ववत्त्वप्रत्येतव्यम्। न हीन्द्रियविषयसम्बन्धादेर्व्यवहारस्य प्रतिसर्गमन्यथात्वं षष्ठेन्द्रियविषयकल्पं शक्यमुत्प्रेक्षितुम्। अतश्च सर्वकल्पानां तुल्यव्यवहारत्वात्कल्पान्तरव्यवहारानुसन्धानक्षमत्वाञ्चेश्वराणां समाननामरूपा एव प्रतिसर्गं विशेषाः प्रादुर्भवन्ति। समाननामरूपत्वाञ्चावृत्तावपि महासर्गमहाप्रलयलक्षणायां जगतोऽभ्युपगम्यमानायां न कश्चिच्छब्दप्रमाण्यादिविरोधः। समाननामरूपतां च श्रुतिस्मृती दर्शयतः–''सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः'' (ऋ० सं० १०/१९०/३) इति। यथा पूर्वस्मिन्कल्पे सूर्यचन्द्रमः-प्रभृति जगत्क्लृप्तम्, तथाऽस्मिन्नपि कल्पे परमेश्वरोऽकल्पयदित्यर्थः। तथा ''अग्निर्वा अकामयत। अन्नादो देवानां स्यामिति। स एतमग्नये

कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निरवपत्'' (तै॰ ब्रा॰ ३/१/४/१) इति नक्षत्रेष्टिविधौ योऽग्निर्निरवपत्स्मै वाऽग्नय निरवपत्तयोः समाननामरूपतां दर्शयतीत्येवंजातीयका श्रुतिरिहोदाहर्तव्या। स्मृतिरपि–''**ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः। शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः॥ यथार्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये। दृश्यन्ते तानि तान्येव तथा भावा युगादिषु॥ यथाभिमानिनोऽतीतास्तुल्यास्ते साम्प्रतैरिहः। देवा देवैरतीतैर्हि रूपैर्नामभिरेव च॥'' इत्येवंजातीयका द्रष्टव्या॥३०॥**

***मध्वादिष्वसम्भवादनधिकारं जैमिनिः*॥३१॥**

इह देवादीनामपि ब्रह्मविद्यायामस्त्यधिकार इति यत्प्रतिज्ञातम्, तत्पर्यावर्त्यते। देवादीनामनधिकारं जैमिनिराचार्यो मन्यते। कस्मात्? मध्यादिष्वसम्भवात्। ब्रह्मविद्यायामधिकाराभ्युपगमे हि विद्यात्वाविशेषान्मध्वादिविद्यास्वप्यधिकारोऽभ्युपगम्येत। न चैवं सम्भवति। कथम्? ''असौ वा आदित्यो देवमधु'' (छा॰ ३/१/१) इत्यत्र मनुष्या आदित्यं मध्वध्यासेनोपासीरन्। देवादिषु ह्यपासकेष्वभ्युपगम्यमानेष्वादित्यः कमन्यमादित्यमुपासीत? पुनश्चादित्यव्यपाश्रयाणि पञ्च रोहितादीन्यमृतान्युपक्रम्य वसवो रुद्रा आदित्या मरुतः साध्याश्च पञ्च देवगणाः क्रमेण तत्तदमृतमुपजीवन्तीत्युपदिश्य ''स य एतदेवमंमृत वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति'' इत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजानतां वस्वादिमहिमप्राप्तिं दर्शयति। वस्वादयस्तु कानन्यान्वस्वादीनमृतोपजीविनो विजानीयुः? कं वाऽन्यं वस्वादिमहिमानं प्रेप्सेयुः? तथा ''अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः'' (छा॰ ३/१८/२) ''वायुर्वाव संवर्गः'' (छा॰ ४/३/१) ''आदित्यो ब्रह्मेत्यादेशः'' (छा॰ ३/११/१) इत्यादिषु देवतात्मोपासनेषु न तेषामेव देवतात्मनामधिकारः सम्भवति। तथा इमावेव गोतमभरद्वाजौचयमेव गोतमोऽयं भरद्वाजः'' (बृ॰ २/२/४) इत्यादिष्ववृषिसम्बन्धेषूपासनेषु न तेषामेवर्षीणामधिकारः सम्भवति॥३१॥ कुतश्च देवादीनामनधिकारः?

***ज्योतिषि भावाञ्च*॥३२॥**

यदिदं ज्योतिर्मण्डलं द्युस्थानमहोरात्राभ्यां बम्भ्रमज्जगदवभासयति, तस्मिन्नादित्यादयो देवतावचनाः शब्दाः प्रयुज्यन्ते। लोकप्रसिद्धे, वाक्यशेषप्रसिद्धेश्च। न च ज्योतिर्मण्डलस्य हृदयादिना विग्रहेण चेतनतयाऽर्थित्वादिना वा योगोऽवगन्तुं शक्यते; मृदादिवदचेतनत्वावगमात्। एतेनाग्न्यादयो व्याख्याताः। स्यादेतत्–मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्त्वाद्यवगमादयमदोष इति, नेत्युच्यते, नहि तावल्लोको नाम किञ्चित्स्वतन्त्रं प्रमाणमस्ति। प्रत्यक्षादिभ्य एव

ह्यविचारितविशेषेभ्यः प्रमाणेभ्यः प्रसिद्ध्यन्नर्थो लोकात्प्रसिध्यतीत्युच्यते। न चात्र प्रत्यक्षादीना-मन्यतमं प्रमाणमस्ति। इतिहासपुराणमपि पौरुषेयत्वात्प्रमाणान्तरं मूलमाकाङ्क्षति। अर्थवादा अपि विधिनैकवाक्यत्वात्स्तुत्यर्थाः सन्तो न पार्थगर्थ्येन देवादीनां विग्रहादिसद्भावे कारणभावं प्रतिपद्यन्ते। मन्त्रा अपि श्रुत्यादिविनियुक्ताः प्रयोगसमवायिनोऽभिधानार्था न कस्यचिदर्थस्य प्रमाणमित्याचक्षते। तस्मादभावो देवानामधिकारस्य॥३२॥

भावं तु बादरायणोऽस्ति हि॥३३॥

तुशब्दः पूर्वपक्षं व्यावर्तयति। बादरायणस्त्वाचार्यो भावमधिकारस्य देवादीनामपि मन्यते। यद्यपि मध्वादिविद्यासु देवतादिव्यामिश्रास्वसम्भवोऽधिकारस्य; तथाप्यस्ति हि शुद्धायां ब्रह्मविद्यायां सम्भवः अर्थित्वसामर्थ्याप्रतिषेधाद्यपेक्षत्वादधिकारस्य। न च क्वचिदसम्भव इत्येतावता यत्र सम्भवस्तत्राप्यधिकारोऽपोद्येत। मनुष्याणामपि न सर्वेषां ब्राह्मणादीनां सर्वेषु राजसूयादिष्वधिकारः सम्भवति। तत्र यो न्यायः, सोऽत्रापि भविष्यति। ब्रह्मविद्यां च प्रकृत्य भवति दर्शनं श्रौतं देवाद्यधिकारस्य सूचकम्—"तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणाम्" (बृ० १/४/१०) इति। "ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मनमन्विष्य सर्वांश्च कामान्" इति। "इन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणाम्" (८/७/२) इत्यादि च। स्मार्तमपि गन्धर्वयाज्ञवल्क्यसंवादादि। यदप्युक्तम्—"ज्योतिषि भावाच्चेति, अत्र ब्रूमः—ज्योतिरादिविषया अपि आदित्यादयो देवतावचनाः शब्दाश्चेतनावन्तमैश्वर्याद्युपेतं तं तं देवतात्मानं समर्पयन्ति; मन्त्रार्थवादादिषु तथाव्यवहारात्। अस्ति ह्यैश्वर्ययोगाद्देवतानां ज्योतिराद्यात्मभिश्चावस्थातुम्, यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यम्। तथा हि श्रूयते सुब्रह्मण्यार्थवादे—"मेधातिथेर्मेषे ति। "मेधातिर्थिं ह काण्वायनमिन्द्रो मेषो भूत्वा जहार" (षड्विंशब्रा० १/१) इति। स्मर्यते च—"आदित्यः पुरुषो भूत्वा कुन्तीमुपजगाम ह" इति। मृदादिष्वपि चेतना अधिष्ठातारोऽभ्युपगम्यन्ते "मृदब्रवीदापोऽब्रुवन्" इत्यादिदर्शनात्। ज्योतिरादेस्तु भूतधातोरादित्यादिष्वचेतनत्वमभ्युपगम्यते। चेतनास्त्वधिष्ठातारो देवतात्मानो मन्त्रार्थवादादिव्यवहारादित्युक्तम्। यदप्युक्तम्—मन्त्रार्थवादयोरन्यार्थत्वान्न देवता-विग्रहादिप्रकाशनसामर्थ्यमिति। अत्र ब्रूमः— प्रत्ययाप्रत्ययौ हि सद्भावासद्भावयोः कारणम्, नान्यार्थत्वमनन्यार्थत्वं वा। तथाह्यन्यार्थमपि प्रस्थितः पथि पतितं तृणपर्णाद्यस्तीत्येव प्रतिपद्यते॥

अत्राह—विषम उपन्यासः। तत्र हि तृणपर्णादिविषयं प्रत्यक्षं प्रवृत्तमस्ति, येन तदस्तित्वं

प्रतिपद्यते। अत्र पुनर्विध्युद्देशैकवाक्येभावेन स्तुत्यर्थेऽर्थवादे न पार्थगर्थ्येन वृत्तान्तविषया प्रवृत्तिः शक्याऽध्यवसातुम्। न हि महावाक्येऽर्थप्रत्यायकेऽवान्तरवाक्यस्य पृथक्प्रत्यायकत्वमस्ति यथा ''न सुरां पिबेत्'' इति नञ्वति वाक्ये पदत्रयसम्बन्धात्सुरापानप्रतिषेध एवैकोऽर्थोऽवगम्यते, न पुनः 'सुरां पिबेदि' ति पदद्वयसम्बन्धात्सुरापानविधिरपीति। अत्रोच्यते–विषम उपन्यासः। युक्तं यत्सुरापानप्रतिषेधे पदान्वयस्यैकत्वादवान्तर- वाक्यार्थस्याग्रहणम्। विध्युद्देशार्थवादयोस्त्वर्थवादस्थानि पदानि पृथगन्वयं वृत्तान्तविषयं प्रतिपद्यानन्तरं कैमर्थ्यवशेन कामं विधेः स्तावकत्वं प्रतिपद्यन्ते। यथा हि ''वायव्यं श्वेतमालभेत भूतिकामः'' इत्यत्र विध्युद्देशवर्तिनां बायव्यादिपदानां विधिना सम्बन्धः, नैवम् ''वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयनोपधावति स एवैनं भूतिं गमयति'' इत्येषामर्थवादगतानां पदानाम्। न हि भवति वायुर्वा आलभेतेति, क्षेपिष्ठा देवता वा आलभेतेत्यादि। वायुस्वभावसंकीर्तनेन त्ववान्तरमन्वयं प्रतिपद्यैवं विशिष्टदैवत्यमिदं कर्मेति विधिं स्तुवन्ति। तद्यत्त सोऽवानतरवाक्यार्थः प्रमाणान्तरगोचरो भवति, तत्र तदनुवादेनार्थवादः प्रवर्तते। यत्र प्रमाणान्तरविरुद्ध, तत्र गुणवादेन। यत्र तु तदुभयं नास्ति, तत्र किं प्रमाणान्तराभावाद् गुणवादः स्यात्, आहोस्वित्प्रमाणान्तराविरोधाद्विद्यमानवाद इति। प्रतीतिशरणैर्विद्यमानवाद आश्रयणीयो न गुणवादः। एतेन मन्त्रो व्याख्यातः। अपिच विधिभिरेवेन्द्रादिदैवत्यानि हवींषि चोदयद्भिरपेक्षितमिन्द्रादीनां स्वरूपम्। न हि स्वरूपरहिता इन्द्रादयश्चतस्यारोपयिंतु शक्यन्ते। नच चेतस्यनारूढायै तस्यै तस्मै देवतायै हविः प्रदातुं शक्यते। श्रावयति च–''यस्य देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्'' (ऐ० ब्रा० ३/८/१) इति। नच शब्दमात्रमर्थस्वरूपं सम्भवति; शब्दार्थयोर्भेदात्। तत्र यादृशं मन्त्रार्थवादयोरिन्द्रादीनां स्वरूपमवगतम्, न तत्तादृशं शब्दप्रमाणकेन प्रत्याख्यातुं युक्तम्। इतिहासपुराणमपि व्याख्यातेन मार्गेण सम्भवन्मन्त्रार्थवादमूलत्वात् प्रभवति देवताविग्रहादि साधयितुम्, प्रत्यक्षादिमूलमपि सम्भवति। भवति ह्यस्माकमप्रत्यक्षमपि चिरन्तनानां प्रत्यक्षम्। तथा च व्यासादयो देवादिभिः प्रत्यक्षं व्यवहरन्तीति स्मर्यते। यस्तु ब्रूयादिदानीतनानामिव पूर्वेषामपि नास्ति देवादिभिर्व्यवहर्तुं सामर्थ्यम्मिति, स जगद्वैचित्र्यं प्रतिषेधेत्। इदानीमिव च नान्यदापि सार्वमौनः क्षत्रियोऽस्तीति ब्रूयात् ततश्च राजसूयादियोदनोपरून्ध्यात् इदानीमिवय कालान्तरेऽप्यव्यवस्थितप्रायान्वर्णाश्रमधर्मान्प्रतिजानीते, ततश्च व्यवस्थाविधायि शास्त्रमनर्थकं स्यात्। तस्माद्धर्मोत्कर्षवशाच्चिरन्तना देवादिभिः प्रत्यक्षं व्यवजह्रुरिति श्लिष्यते। अपि च स्मरन्ति–''स्वाध्यायादिष्टदेवतासंप्रयोगः'' (यो० सू० २/४४) इत्यादि।

योगोऽप्यणिमाद्यैश्वर्यप्राप्तिफलः स्मर्यमाणो न शक्यते साहसमात्रेण प्रत्याख्यातुम्। श्रुतिश्च योगमाहात्म्यं प्रख्यापयति–''पृथव्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्'' (श्वे॰ २/१२) इति। ऋषीणामपि मन्त्रब्राह्मणदर्शिनां सामर्थ्यं नास्मदीयेन सामर्थ्येनोपमातुं युक्तम्। तस्मात्समूलमितिहासपुराणम्। लोकप्रसिद्धिरपि न सति सम्भवे निरालम्बनाऽध्यवसातु युक्ता। तस्मादुपपन्नो मन्त्रादिभ्यो देवादीनां विग्रहवत्त्वाद्यवगमः। ततश्चार्थित्वादिसम्भवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः। क्रममुक्तिदर्शनान्यप्येवमेवोपपद्यन्ते।।३३।।

इति शाङ्करभाष्यम् देवताधिकरणम् समाप्तम्

वार्तिकम्

तदुपर्यपि बादरायणः संभवात्।।२६।। प्रसङ्गादिदमधिकरणं प्रवर्तते। ननु–स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग इत्युक्तम्। उपेक्षानर्हता तु तस्यैव, यत् प्रकृतोपयोगि, नान्यत्; अतिप्रसङ्गात्। न च देवादीनामधिकारचिन्ता प्रकृतोपयोगिनी,; तत्प्रवृत्ति विनापि मनुष्यानादाय श्रवणारम्भसार्थकत्वोपपत्तेरिति–चेत्, सत्यम्; न देवादिप्रवृत्त्यर्थेयम्; अस्या अनुपयोगात्, देवादीनामधिकारानिश्चये क्रममुक्तिफलिकायामुपासनायां मुमुक्षूणां त्रैवर्णिकानां प्रवृत्त्यनुपपत्तेः। तेषां हि नास्मिन् भवे ज्ञानम्; देवभावप्राप्तिविरोधात्। अतो देवशरीरे तद्वाच्यम्। तञ्चाधिकराधीनम्, इति समन्वयलक्षणे भाष्यकारो दर्शयति स्म।। *अङ्गुष्ठमात्रश्रुतिरिति*।।

तत्र सिद्धान्तेनोपक्रमं दर्शयन् सूत्रं व्याकरोति– *बाढमित्यादिना*।। ननु–अर्थित्वलक्षणमधिकारकारणं देवादीनामसिद्धम्; तेषां विविधयिचित्रविषयसुखभागित्वेन संसारवैराग्याभावात्–इति, नेत्याह– *तत्रार्थित्वं तावदिति*।। तत्र=अर्थित्वाद्यधिकारेष्वित्यर्थः। अस्मदाद्यपेक्षयाऽप्येतेषामतिपुण्यकर्मत्वेनातिशुद्धसत्त्वत्वात् तदालोचनोपपत्तेरित्याशयः। भवेदेतदेवम्, यदि तेषां विग्रहवत्त्वं करणवत्वं च स्यात्, न चैतदस्ति; नावमिकदेवताधिकरणन्यायेन तेषां मन्त्ररूपतयाऽचेतनत्वेन तदभावावगमात्। अत एव कर्मसु काणकुण्ठादेरिव तेषां विद्याग्रहणे न सामर्थ्यमस्तीति, नेत्याह– *तथा सामर्थ्यमपीति*।। लोकपदेन तेषामिष्टदेवतासंप्रयोगलक्षणं प्रत्यक्षं गृह्यते। ननु–एवमपि शास्त्रेण शूद्रस्य वेदग्रहणनिषेधवद् देवादीनां ब्रह्मविद्याग्रहणप्रतिषेधाद् न तस्यामधिकारः–इति, नेत्याह– *न च तेषामिति*।। नाप्युपनयनाभावात् तेषामनधिकार इत्याह– *न चोपनयनशास्त्रेणैषामिति*।। श्रुतिलिङ्गमपि तेषां विद्यायामधिकारं दर्शयतीत्याह– *अपि चैषामिति*।। ननु–किमिति तर्हि देवादीनामाधिकाराभावः कर्मसु पूर्वतनेन महता प्रबन्धेन समर्थितः? उक्तन्यायेन तेष्वपि तेषामधिकारस्य वक्तुं शक्यत्वादिति–चेत्, न; वैषम्यादित्याह– *यदपीति*।।

प्राचीनभृग्वादीनादाय भृग्वादीनां तत्सगोत्रता न विरुद्धयत इति चेत्, न; तेषां क्षीणाधिकारत्वेनर्पित्वाभावात्। एतेन इन्द्रादीनामपि प्राचीनेन्द्रादीनादाय यजनम्–प्रत्युक्तम्।।२६।।

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्।। यदि देवानां ब्रह्मविद्यायामधिकारसिद्धयर्थं विग्रहवत्त्वमङ्गीकृतं मन्त्रार्थवादेतिहासपुराणलोकेभ्यः, हन्त तर्हि कर्मणि विरोधः स्यात्। को विरोधः? उच्यते–देवा हि यागस्य संप्तदानकारकतया संप्रदेयद्रव्यवत् कर्तृवञ्च स्वरूपनिर्वर्तकमङ्गं भवन्तः स्वस्वरूपसंनिधानेन भवन्ति। न चर्त्विक्पुरोडाशादिविग्रहसंनिधानवद् इन्द्रादीनां भवदभिमतविग्रहसंनिधानं दृश्यते। न च तदसंनिधानेऽङ्गवैकल्यात् कर्म सिद्धिमुपैतीत्यं विरोधः मन्त्रविग्रहत्वे च तेषां संनिधानसत्वाद् अङ्गवैकल्पाभावात् कर्मसिद्धेर्नास्त्येव तद्विरोधः ; अनेकदिग्देशवर्तिभिस्त्रैवर्णिकैर्युगपदनेकेषु कर्मसु क्रियामाणेषु तेषां हविर्भोक्तृत्वानुपपत्तेः। यदि ब्रूयात् तेषां स्वरूपसंनिधानेऽप्यन्तर्धानयोगादस्माभिर्न ते दृश्यन्ते, व्यपकत्वाञ्च सर्वत्र संनिधानमिति, एवमपि कर्मणि विरोधो न परिहृतो भवेत्; ऐरावतादिवाहनस्येन्द्रादेः सदोमण्डपमध्येऽवस्थानासंभवेन तद्भङ्गादिप्रसङ्गात्। देवानां विग्रहाभ्युपगमे कर्मणि विरोध इति चेद् भवान् मन्यते, तन्न मन्तव्यं भवता। कुतः? अनेकप्रतिपत्तेः=अनेकानां विग्रहाणां भावानां वा प्रतिपत्तिः=ग्रहणम्, प्राप्तिर्वाऽनेकप्रतिपत्तिः, अनेका वा प्रतिपत्तिरनेकप्रतिपत्तिः, तस्मादित्यर्थः। देवानामनेकविग्रहग्रहणेन नानादिग्देशवर्तिक्रतुषु युगपद् हविर्भोक्कृत्वाविरोधात्, तथा तेषामणिमाद्यैश्वर्ययोगादणुत्वाददृश्यत्वाद् न सदोमण्डपभङ्गादिप्रसङ्गः। यद्वा–स्वस्थाने स्थित्यैव तेषां सर्वज्ञानामनेकपूजास्वीकारसंभवादाचार्यस्येवानेकशिष्यनमस्कारस्येति न कश्चिद् विरोधः। कुत एतदध्यवसीयते। दर्शनात्=श्रुतिस्मृत्योर्लोके चैवमर्थस्य दर्शनादित्यर्थः। श्रुतिस्मृती च भाष्य उदाहृते। अनेकप्रतिपत्तेरिति वा षष्ठी। तथाचानेकप्रतिपत्तेर्दर्शनादित्येक एव हेतुः। व्याख्यानं तु पूर्ववदेव।।२७।।

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्। मा नाम देवानां विग्रहवत्व उक्तप्रकारेण कर्मणि शब्दार्थविरोधो भूत्, शब्दे तु औत्पत्तिकसूत्रे शब्दार्थसम्बन्धनित्यत्वेन स्थापितानपेक्षत्वलक्षणप्रामाण्यहान्या विरोधः स्यादेव। कथम्? इन्द्रादिशब्दो ह्याकाशादिशब्दवद् व्यक्तिवचन एव, नाकृतिवचनः ; इन्द्राद्यनेकत्वत्तयनभ्युपगमात्, तदनेकत्वे प्रमाणाभावाञ्च। तत्र यदीन्द्रादिव्यक्तिर्विग्रहवती, तदाऽस्मदादिवत् तस्या अनित्यत्वापत्तेर्न तयेन्द्रादिशब्दस्य नित्यः सम्बन्धो भवेत्; नाम्युत्तरभावित्वाद् नामसम्बन्धस्य, लोकेऽस्मदादिषु तथा दर्शनात्। तस्तादस्ति शब्दे विरोध इति चेद् भवान् मन्यते, नैवं मन्तव्यम्–विग्रहवत्त्वेन देवताऽनित्यत्वे शब्दस्यार्थेन सम्बन्ध औत्पत्तिकसूत्रे प्रतिपादितो विरूद्धयत इति। कुतः? अतः प्रभवात्=अतो वैदिकशब्दनिमित्तात् तदर्थस्य देवतादेर्जायमानत्वात् तयोर्नित्यसम्बन्धोपपत्तेः। यद्धि यस्मात् निमितात् जायमानं दृष्टम्,

तयोरनादिसम्बन्धोऽपि दृष्टः, यथा दण्डघटयोः, ब्रह्मजगतोः। न हि तयोः सम्बन्धस्य सादित्वे कार्यकारणभावग्रह उपपद्यते; कदाचित् तद्व्यभिचारेण तद्भावानुपपत्तेः। न चैतावता घटव्यक्तेर्जगद्व्यक्तेर्वाऽनादित्वामापतति; प्रवाहरूपेणानादित्वेऽपि तत्तद्व्यक्तिशः सादित्वात्। अस्ति च वैदिकशब्दतदर्थयोरपि निमित्तनैमित्तिकभावः। अतस्तदर्थदेवतादिव्यक्तेर्घटादिव्यक्तिवत्सादित्वेऽपि प्रवाहरूपेण तदनादित्वादुपपद्यते तयोरपि तनत्यसम्बन्धः, इति न कश्चिदस्ति शब्दे विराधः। न च ब्रह्मणोऽपि शब्दार्थत्वाद् नैमित्तिकत्वप्रसङ्गः ; "एतदप्रमयं ध्रुवम्" "यत्तदद्रेश्यम्" "यतो वाचो निवर्तन्त" इत्यादिश्रुतिशतेभ्यस्तस्य साक्षात् शब्दार्थत्वस्यासकृत् प्रतिषिद्धत्वात्, उत्पत्तिमत्तदर्थस्यैव नैमित्तिकत्वाभिधानाञ्चेत्ययमदोषः। कुतः पुनरेतदध्यवसीयते वेदशब्दनिमित्ताद् जगत् प्रभवतीति? उच्यते; प्रत्यक्षानुमानाभ्याम्=श्रुतिस्मृतिभ्यामित्यर्थः। श्रुतिस्तावत्—"एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानिन्दव इति पितृन् तिरः पवित्रमिति ग्रहान् आशव इति स्तोत्रं विश्वानिति शस्त्रमभिसौभगेत्यन्याः प्रजा" इत्यादिः। स्मृतिरपि—अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः। नामरूपं च भूतानां कर्मणां च प्रवर्तनम्। वेदशब्देभ्य एवादौ निर्ममे स महेश्वरः। सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे।" इति। भाष्ये। "अतः प्रभवादि" ति शब्दार्थोपादानत्वमभिप्रेतमिति मन्वानश्चोदयति— *ननु जन्माद्यस्य यत इत्यत्रेति*।। पूर्वाभिधानविरोधेन स्वरूपासिद्धोऽयं हेतुरित्यभिप्रायः। अभ्युपेत्यापि हेतुस्वरूपं व्याप्यत्वासिद्धिं दूषणान्तरमाह— *अपिचेति*।। शब्दार्थयोरनादिसम्बन्धप्रदर्शनार्थं निमित्तनैमित्तिकभावमभिप्रेत्य—"अतः प्रभवादि" त्युक्तम्, नोपादानोपादेयभावमभिप्रेत्य; अतो नोक्तदूषणद्वयं हेतोरापततीत्यभिप्रेत्य तदुभयमभिधानव्युत्क्रमेण परिहरति— *न; गवादिशब्दार्थसम्बन्धनित्यत्वदर्शनादिति*।। यथाच व्यक्तेरनित्यत्वेऽपि तत्प्रवाहमाकृतिं चादाय कार्यकारणभावात् शब्दार्थयोरनादिसम्बन्धः, तथोपपादितमस्माभिः सूत्रव्याख्यानावसरे, नात्र पुनरुच्यते। *आकृतिविशेषस्त्विति*।। सहस्राक्षत्वादिरूप इत्यर्थः। निमित्तान्तरमाह— *स्थानविशेषसम्बन्धनिमित्ताश्चेति*।। तत्र किमुत्सर्गशब्देन निर्माणमुच्यते, तथाच वेदस्य पौरुषेयत्वप्रसङ्ग इति, नेत्याह— *उत्सर्गोऽयं वाच इति*।। *अपिच चिकीर्षितमर्थमिति*।। एतञ्च सम्भवमात्रं लोके प्रदर्श्यते, न व्याप्तिप्रदर्शनम्। व्युत्पत्तिविधुरस्यागृहीतसङ्गतिकस्यापि कुलालादेर्घटादिनिर्माणदर्शनात्। दार्ष्टान्तिके चायमर्थः श्रुतिसिद्ध एवेत्याह— *तथाच श्रुतिरिति*।।

पृच्छति— *किमात्मकमिति*।। अर्थप्रत्यायकस्यैव शब्दत्वाभ्युपगमात्, वर्णानां प्रत्येक-समुदायाभ्यामर्थप्रत्यायकत्वानुपपत्तेः, प्रत्येके सत्यप्यर्थप्रत्ययादर्शनात्, वर्णान्तरोञ्चारण-वैयर्थ्यप्रसङ्गात्, प्रत्युञ्चारणमुत्पन्नानामाशुतरविनाशिनां क्रमवतां च तेषां सहभावाभावेन

समुदायानुपपत्तेः, अर्थेन सह तेषां सम्बन्धानुपपत्तेश्च, संयोगसमवायानभ्युपगमात्, शब्दार्थयोः सर्वत्र तदैकरूपत्वाभावात्, तादात्म्याभ्युपगमे च खड्गवह्न्यादिशब्दोच्चारणे जिह्वादिच्छेदप्रसङ्गात्, स्वरूपसम्बन्धस्यातिप्रसक्तत्वात्, सम्बन्धानतरानिरूपणात्, वर्णानां शब्दत्वानुपपत्तेः, शब्दान्तरस्यानुपलभ्यमानत्वात् संवृत्यैव देहात्मव्यवहरवत् शब्दार्थव्यवहारो न भाविकः। तथाच शब्दप्रभवत्वमर्थानां नाभ्युपगन्तुमुचितमिति प्रष्टुराशयः। भवेदयं दोषः, यदि वर्णात्मकः शब्दो भवेत्। न चैतदस्ति; तदभिव्यङ्ग्यस्य 'एकं पदम्' 'एकं वाक्यमि' त्यादिप्रत्ययविषयतयोपस्थितस्य 'तदेवेदम्' इति प्रत्यभिज्ञायमानतया स्थिरस्योत्पत्तिविनाशकारणानुपलब्धेनित्यस्य स्फोटस्यैव शब्दत्वाभ्युपगमात् तस्य च नित्यत्वेन जगतस्तत्प्रभवत्वोपपत्तेः। न च गौरिति गकारौकारविसर्जनीयेषु क्रमभाविषूच्चारितेषु 'एकं पदमि' ति बुद्धिर्वर्णविषया भवितुमर्हति, येन स्फोटसिद्धिर्न स्यात्; तेषामनेकत्वेन तत्प्रत्ययालम्बनत्वानुपपत्तेः। न च–'एकं वनम्' 'एका सेना' इतिवत् तत्समुदायविषयिणी सा प्रतीतिरिति–वाच्यम्; तेषां क्रमभाविनां समुदायानुपपत्तेरुक्तत्वात् प्रत्येकसमुदायाभ्यामर्थप्रत्यायकत्वानुपपत्तेश्चेत्युक्तत्वात्। तस्मादुक्तविधस्य स्फोटस्य सर्वलोकप्रत्यक्षसिद्धत्वात्, अर्थेन च तस्य वाच्यवाचकभावसम्बन्धस्यानादेः सत्त्वाद् न काचिदनुपपत्तिरस्तीति पतञ्जलिमतानुसारी समाधत्ते–स्फोटमित्याहेति*।। आहेति परोक्तिकथनार्थम्, नास्माभिरुच्यत इत्यभिप्रायः। *न च पूर्वपूर्ववर्णानुभवजनितसंस्कारसहित-स्यान्त्यवर्णस्य प्रतीतिरस्तीति*।। किमन्त्यवर्णप्रत्यक्षविषयत्वेन पूर्ववर्णानुभवजनितसंस्काराणां तत्सहप्रतीतिः, किं वा भिन्नप्रत्ययविषयत्वेन। तत्र नाद्य इत्याह–*अप्रत्यक्षत्वात् संस्काराणामिति*।। द्वितीयमाशङ्क्य परिहरति–*कार्यप्रत्यायितैरित्यादिना*।। यगुपदनेकज्ञानानुपपत्तेरित्याशयः। ननु–स्फोटोऽपि वर्णैरेवाभिव्यज्यत इति भवदभ्युपगमः ; अन्यथा तदुच्चारणवैयर्थ्यापत्तेः, सर्वदा स्फोटप्रत्ययापत्तेश्च, वर्णरूपितशब्दप्रत्ययानुपपत्तेश्च। तथाच येनैव रूपेण वर्णैः स्फोटोऽभिव्यज्यते, तेनैव रूपेण तैरर्थ एवाभिव्यज्यताम्, किमन्तर्गडुना स्फोटकल्पनेनेति–चेत्, न; वैषम्यादित्याह–*स चेति*।। स च=स्फोट इत्यर्थः।। प्रत्ययिनि=अन्तः करण इत्यर्थः। एकैकवर्णैराहिताः संस्कारा एव बीजम्=झटिति तत्त्वावभासे कारणं यत्र, तस्मिन्नित्यर्थः। प्रत्यक्षे हि कर्तव्ये व्यञ्जकप्रत्ययसंस्कारसाहित्यमपेक्ष्यते, न परोक्षज्ञाने। तद्यथा–ब्राह्मणत्वचन्दनत्वाध्यक्षे विशुद्धमातापितृकत्व सौरभविशेषोपदेशादिसंस्कारापेक्षा। स्फोटश्च–'एकं पदम्' 'एकं वाक्यमि' त्याद्यध्यक्षगोचर इत्युक्तम्। अतस्तदध्यक्षेऽस्ति व्यञ्जकवर्णप्रत्ययजनितसंस्कारापेक्षा, नैवं शब्दार्थः ; स्मर्यमाणत्वेनाप्रत्यक्षत्वात्, तत्स्मरणेन स्वानुभवापेक्षसंस्कारापेक्षणेऽपि व्यञ्जकसंस्कारानपेक्षणात्। अतो वैषम्यमित्याशयः। ननु–एकं पदमित्याकारप्रत्ययो वर्णविषयस्मृतिरेव, न तत्स्फोटविषयाध्यक्षानुभव इति, नेत्याह–*न चायमेकत्वप्रत्यय इति*।। ननु–भवत्वेवम्, तथापि

वर्णवत् स्फोटस्यापि प्रत्युच्चारणं विनाशित्वेनानित्यत्वाद् न तत्प्रभवत्वं जगतः सिद्ध्येत्–इति, नेत्याह–तस्य चेति*।। 'मया द्विर्गोशब्द उच्चारितः' 'यस्त्वया गोशब्द उच्चारितस्स मयाऽपी' त्याद्यबाधितप्रत्यभिज्ञागोचरत्वेन स्फोटस्य प्रत्युच्चारणविनाशाभावात्, एकानुवाकविषयकदेवदत्त-यज्ञदत्ताध्ययनभेदप्रतीतेस्तु वर्णविषयत्वादित्युक्तत्वात् तन्नित्यत्वसिद्धेरुपपन्नं स्फोटस्य शब्दत्वम्, जगतश्च शब्दप्रभवत्वमित्यर्थः।।

अत्र वृत्तिकारमतमादायोत्तरमाह–*वर्णा एव तु शब्द इति भगवानुपवर्ष इति*।। तुशब्देन यदुक्तम्–वर्णानामशब्दत्वम्–इति, तद्व्यावर्तयति। विशेष्यसङ्गतेन चैवकारेण तद्भिन्नस्य परोक्षज्ञानविषयस्य स्फोटस्याशब्दत्वमिति। भगवानिति विशेषणेनाचार्यं महीकुर्वन् तत्पक्षस्य वरीयस्त्वं सूचयति। एतच्च यथानुपूर्व्यं भाष्ये स्पष्टीभविष्यति। तत्र प्रथमं वर्णानामशब्दत्वे यत् कारणमुक्तम्, तदनुभाष्य दूषयति–*नन्वित्यादिना*।। प्रत्यभिज्ञानस्य भ्रान्तत्वताशङ्कते–*सादृश्यादिति*।। लूनकेशादिषु प्रत्यभिज्ञानस्य बाधाद् युक्तं तस्य सादृश्यमूलत्वकल्पनम्, प्रकृते च बाधाभावाद् न तन्मूलत्वकल्पनमुचितम्; अतिप्रसङ्गात्, इति दृष्टान्तवैषम्येण परिहरति–*नेति*।। व्यक्तिविषयत्वमेव तस्योपपादयति–*यदि हीत्यादिना*।। उक्तविधप्रत्ययस्यासिद्धिं प्रत्ययान्तरविरोधं चाशङ्कते–*नन्विति*।। अनन्यथासिद्धप्रत्यभिज्ञाविरोधेन भेदप्रत्यय-स्यान्यथासिद्ध्या परिहरति–*तत्राभिधीयत इति*।। ननु–वर्णप्रत्यभिज्ञानस्याकृतिविषय-त्वोक्तेस्तदनन्थासिद्धत्वस्याद्याप्यसिद्धेः कुतस्तद्विरोधेन भेदप्रत्ययस्यान्यथासिद्धिकल्पनम्; वैपरीत्यस्यापि सुवचत्वात्, इत्याशङ्क्य, मैवम्; पदकल्पनायां गौरवमस्त्यधिकं दूषणमित्याह–*अपि चेति*।। *तासु च परोपाधिर्भेदप्रत्यय इत्यभ्युपगन्तव्यमिति*।। अन्यथा गोत्वव्याप्याखण्डमुण्डत्वादिवत् गत्वादिव्याप्यानेकसामान्यकल्पनापत्तेरतिगौरवत्वं स्यादित्याशयः। तदुक्तं वृद्धैः–''तेन यत्प्रार्थ्यते जातेस्तद्वर्णादेव लभ्यते। व्यक्तिलभ्यस्तु नादेभ्य इति गत्वादिधीर्वृथा।।'' इति। तथाचोपपन्नम्–प्रत्यभिज्ञानस्यानन्यथासिद्धत्वात् भेदप्रत्ययवाधकत्व-मित्याह–*एष एव चेति*।। गूढसभिसन्धिनोक्ता भेदप्रत्ययस्यान्यथासिद्धि पुनराक्षिपति–*कथं ह्येकस्मिन् काले बहूनामुच्चारयतामिति*।।

अयमभिप्रायः–वर्णा हि गकारादाय एकस्मिन् काले बहुभिरुच्चार्यमाणोदात्तत्वानुदात्तत्वादि-विरुद्धानेकधर्माक्रान्ता युगपद् भासन्त इति सर्वानुभवसिद्धम्। न चैकस्मिन् युगपदनेकविरुद्धधर्माणां समावेशः संभवति; तेषां द्विशफत्वैकशफत्वयोरिव परस्पराश्रयभेदव्याप्तत्वात्। न च–तेषां भाविकानामेकस्मिन् युगपत्समावेशासंभवेऽपि द्विशफत्वैकशफत्वयोरिव, मुक्तोपाधिकानां तत्संभवोऽस्त्येवैकस्मिन् मुख इव मणिकृपाणाद्यौपाधिकह्रस्वत्वदीर्घत्वादिधर्माणामिति–वाच्यम्;

तद्व्यञ्जकत्वेनाभिमतस्य कण्ठताल्वादिस्थानसंयोगादेस्तदभिघातजन्यवायोश्चातीन्द्रियत्वे: तद्धर्माणामुदात्तत्वादीनां श्रोत्रग्राह्यत्वानुपपत्ते:, तेषामनेकोपाधिकत्वेन वर्णेषु भाविकत्वात्। तस्माद्वर्णाभेदप्रत्ययस्यानन्यथासिद्धत्वात् तद्विरोधेन वर्णप्रत्यभिज्ञानस्यैवाकृतिविषयतयाऽन्यथासिद्धत्वं वर्णयितुमुचितम्। न चैवं सत्युक्तकल्पनागौरवम्; तस्य प्रत्यक्षप्रमाणसिद्धत्वेनादोषत्वादिति। यद्यपि नायं नियमोऽस्ति; आश्रयग्रहमन्तरेण तद्धर्माणां नेन्द्रियैर्ग्रह इति; परै: श्रोत्रादीन्द्रियैराकाशाद्यग्रहेऽपि तद्धर्माणां शब्दादीनां ग्रहाभ्युपगमाञ्च, तद्वदस्मन्मतेऽपि वर्णव्यञ्जकानां ताल्वादिसंयोगविभागत उत्पन्नवायूनामग्रहेऽपि तद्धर्माणामुदात्तत्वादीनां वर्णगततया श्रोत्रेन्द्रियेण ग्रहो नानुपपन्न:। तथाचास्त्येव भेदप्रत्ययस्योक्तप्रकारेणान्यथासिद्धिरिति; तथापि 'तुष्यतु दुर्जन:' इति न्यायेन तन्नियममङ्गीकृत्यापि तदन्यथासिद्धिं दर्शयन् परिहरति— *अथवा ध्वनिकृतोऽयमिति*।।

ध्वनिर्नाम वर्णात्मक: शब्दविशेष: मृदङ्गादौ तत्प्रसिद्धे:। स च मृदङ्गाद्यभिघातादिव कण्ठताल्वादिस्थानानां परस्पराभिघातादप्युत्पद्यमान: श्रोत्रग्राह्य: सन् नित्यान् वर्णानभिव्यञ्जयन् स्वरूपिततया स्वधर्मरूपिततया च तानभिव्यञ्जयति। एवं सति ध्वने: प्रत्युञ्चारणमुदात्तादिभेदभिन्नतयोत्पद्यमानत्वात् श्रोत्रग्राह्यत्वाञ्च तत्कृतोऽयं भेदप्रत्यय एकस्यामपि ग-व्यक्तावुदात्तोऽनुदात्त: स्वरितोऽनुनासिको निरनुनासिकश्चेत्युपपद्यते; यथैकस्मिन्नपि मुखे दर्पण मणि कृपाणाद्युपाधिभेदेन 'ह्रस्वमिदं मुखम्' वर्तुलमेतत्' 'दीर्घमिदं मित्यादिभेदप्रत्यय:, तद्वत्; अतो न काचिदनुपपत्तिरस्तीत्यभिप्राय:। यथा मृदङ्गाद्यभिघाताद् ध्वनिरुत्पद्यमान: प्रत्यक्षेण दृश्यते, नैवं कण्ठताल्वाद्यभिघातात् तदुत्पत्तो किञ्चिद् बाधकमस्ति; वर्णस्वरूपातिरेकेण तदनुपलम्भात्। तथाच तत्कृतोऽयं वर्णेषु भेदप्रत्यय:, इति मृषाध्यवसानमात्रमित्यभिप्रेत्य पृच्छति— *क: पुनरयं ध्वनिर्नामेति*।। अयम्=वर्णाभिव्यञ्जकत्वेन सिद्ध:, अभिमत इत्यर्थ:। मृदङ्गादिषु ध्वने: प्रत्यक्षसिद्धत्वेन तत्सामान्यविषयकप्रश्नानुपपत्ते:। प्रत्यक्षेण वर्णाद्विविच्य ध्वनिस्वरूपप्रदर्शनेन प्रष्टराशयमपाकुर्वन् उत्तरमाह— *यो दूरादाकर्णयत इति*।। न च—अयमनिर्धारितविशेष-वर्णत्वसामान्यमात्रानुभव:, न वर्णातिरिक्तदभिव्यञ्जकध्वनिप्रत्यय इति—वाच्यम्; तस्यानुनासिकत्वादिभेदभिन्नस्य गादिव्यक्तिवत् प्रत्यभिज्ञानाभावात्, अप्रत्यभिज्ञाने चैकत्वाभावेन सामान्यभावानुपपत्ते:। तस्मादस्ति वर्णातिरिक्तो ध्वन्यात्मक: शब्द:, य: प्रत्यक्षसिद्धो वर्णाभिव्यञ्जक: कण्ठताल्वाद्यभिघातजन्य इत्यभिप्राय:। एतेन—ध्वनेर्न वर्णाभिव्यञ्जकत्वम्; मृदङ्गादिदेशेऽपि तदभिव्यक्तिप्रसङ्गादिति अपास्तम्; कण्ठताल्वाद्यभिघातजन्यध्वनिविशेषस्यैव तदभिव्यञ्जकत्वात्। एवं च सति यत् परेण दूषणमभिहितम्—कथं कण्ठताल्वादिसंयोग विभागानामप्रत्यक्षत्वात् तद्धर्माणामुदात्तत्वादीनां प्रत्यक्षत्वम्? इति, तद् यद्यपि परेषामेवेतच्छब्दाद्यध्यक्षे

व्यभिचारि; तथाप्यभ्युपगम्यत एवास्माभिरित्याह–*एवं च सति सालम्बना इति*।। न चास्मन्मतेऽस्ति तन्नियमस्य व्यभिचारः ; साश्रयाणामेव शब्दादीनां प्रत्यक्षगोचरत्वाभ्युपगमात्, गुणगुणिनोस्तादात्म्यादित्याशयः। ननु–एवं तर्हि व्यञ्जकध्वनिभेदेन गादिवर्णभेदोऽस्तु, व्यञ्जकभेदेनापि व्यङ्ग्यभेदस्य दृष्टत्वात्, यथा सास्नादिमत्त्व-केसरादिमत्त्वयोर्व्यञ्जकयोर्भेदेन तद्वयङ्ग्ययोर्गोत्वाश्वत्वयोर्भेद इति–चेत्, तत्राह–*अपिचेति*।। प्रत्यभिज्ञायमानानामिति हेतुगर्भविशेषणम्। तथाच गोत्वाश्वत्यवयोः स्वत एव भेदोपलम्भाद् एकत्वेनाप्रत्यभिज्ञानाञ्च न व्यञ्जकभेदस्य तद्भेदप्रयोजकत्वम्; अन्यथा व्यक्तेरपि जातिव्यञ्जकत्वात् तद्भेदेन जातिभेदप्रसङ्गः। तदिदमुक्तम्–*न हि व्यक्तिभेदेन जातिर्भिन्नामन्यत इति*।। तदनेन प्रबन्धेन यदुक्तम्–वर्णानां क्षणिकत्वेनानित्यत्वाद् न तत्प्रभवतयाऽर्थेनास्यौत्पत्तिकः सम्बन्धः –इति, तत् परिहृतम्। यञ्जोक्तम्–प्रत्येकसमुदायाभ्यां वर्णेभ्योऽर्थप्रत्ययानुपपत्तेस्तदशब्दत्वात् स्फोट एव शब्दः–इति, तत्राह–*वर्णेभ्यश्चार्थप्रतीतेः संभवात् स्फोटकल्पनाऽनर्थिकेति*।। स्फोटस्य प्रत्यक्षसिद्धत्वोक्तेर्न कल्पनास्पदत्वमित्याशङ्कते–*न कल्पयाम्यहं स्फोटमिति*।। एकमिति बुद्धेर्वर्णसमुदायविषयक-स्मृतित्वेन स्फोटविषयकप्रत्यक्षत्वासिद्धेर्न तद्बलेन स्फोटसिद्धिरिति परिहरति–*न; अस्या अपि बुद्धेरिति*।। खले कपोतन्यायेन युगपद् बुद्धेः संस्कारैस्सर्ववर्णविषयसमूहालम्बनलक्षणैकस्मृत्युपपत्तेः। युगपञ्च तत्रानेकार्थसंनिकर्षः समूहालम्बनप्रत्यखवदित्याशयः। ननु–उक्मनेकेषु वर्णेष्वेकबुद्धि-र्नोपपद्यते–इति, अतस्तद्बुद्धिविषयस्फोटाभिव्यञ्जकतयैव गकारादीनां नियमेन तद्बुद्धावनु-वर्तनमित्याशङ्कते–*नग्विति*।। किमनेकेषामेकमिति बुद्धिविषयत्वं कुत्रचिन्न दृष्टमिति कृत्वा प्रकृते तदसम्भव उच्यते, किं वा निमित्तान्तरेण। तत्र नाद्य इत्याह–*तत्प्रतिब्रूम इति*।। ननु–बहुषु वनमित्याद्येकबुद्धिरेकदेशावस्थितत्वादिनिबन्धनौपचारिकी। न च तद्वदत्राप्येकार्थप्रत्यायकत्वनिबन्धना बहुष्वेकबुद्धिरौपचारिक्येव भविष्यतीति–वाच्यम्; मुख्यार्थत्वे संभवत्यौपचारिकत्वकल्पनाया अयुक्तत्वादिति–चेत्, नेत्याह–*या तु गौरित्येकोऽयं शब्द इति बुद्धिरिति*।।

अयमभिप्रायः–अस्ति हि धवखदिरपलाशाद्यात्मके वने नानत्वबुद्धिवद् अनेकवर्णरूषिते गवादिपदेऽपि नानात्वबुद्धिः, तद्वदेकत्वबुद्धिरपि। तत्र किमेकत्वबुद्धयनुसारेणैकस्मिन् गवादिपदे नानात्वबुद्धिर्जायमानौपचारिकी व्याख्यायताम्, किं वैकत्वबुद्धिरेव नानात्वबुद्धयनुसारेणौपचारिकीति? वयं तु पश्यामः–यथा वनादौ नानात्वस्य प्रत्यक्षसिद्धत्वाद् अबाधाञ्च तद्बहुत्वबुद्धिर्मुख्या, तद्विरोधेन वनमित्याद्येकत्वबुद्धिर्बहुष्वौपचारिकी, तद्वत् प्रकृतेऽप्येकत्वबुद्धिरेवौपचारिकी; पदे नानावर्णात्मक-त्वस्य प्रत्यक्षसिद्धत्वेन तद्विराधस्यात्रापि तुल्यत्वात्, अन्यथाऽलौकिकशब्दान्तरकल्पनापत्तेः, वनादावपि पदार्थानतरकल्पनापत्तेश्च–इति। नैकत्वबुद्धिमात्रे तत्कल्पनं ब्रूमः, येन वनादिष्विव

वर्णेष्वपि तदुपपत्तेर्न स्फोटसिद्धिः स्यात्। किं तर्हि? वर्णानां पदत्वे पदव्यवस्थानुपपत्तिर्भविष्यति, इति निमित्तानतरमिति द्वितीयपक्षमाशङ्कते- *अत्राह यदि वर्णा एवेति*।। क्रमविशेषविशिष्टानामेव वर्णानां पदबुद्धिविषयत्वाभ्युपगमादुपपन्ना तत्कृता पदव्यस्थेति।। *अत्र वदाम इति*।। अपि चास्तु वा वर्णानां प्रत्युच्चारणमन्यत्वम्; तथापि तदाकृतीनां नित्यत्वात् तदाकृतिलक्षणेभ्य एव शब्देभ्यो देवाद्युत्पत्तिसिद्धेर्न स्फोटकल्पनं युक्तमित्यभ्युपेत्यवादेनाप्याह- *अथापि नामेति*।।२८।।

ननु-यथाऽनित्येभ्यो मृदादिभ्योऽनित्यानां घटादीनामुत्पत्तिः, एवमनित्येभ्य एव शब्देभ्यो देवादीनामुत्पत्तिर्भविष्यति, को दोषः इति? अत आह-अत एव च नित्यत्वम्*।।२९।। चस्त्वर्थः। अत एव जगत्कारणत्वादेव हेतोर्वेदस्य ब्रह्मवद् नित्यत्वम्=अनादिसिद्धत्वम्। न हि सादेर्जगदुत्पत्तिमर्हति; तस्याप्युत्पत्तिमत्त्वेन सापेक्षत्वादित्यर्थः। ननु-प्राच्यां मीमांसायां वेदस्य नित्यत्वं साधितम्, तत् किमर्थं पुनरत्र साध्यत इति? तत्राह-*स्वतन्त्रस्येति*।।२९।।

स्यादेतत्-यदि ब्रह्मवद्र अतः प्रभवात् जगतो वर्णात्मकस्य वेदस्य नित्यत्वम्=अविनाशित्वमास्थिषत, हन्त तर्ह्यद्वैतवादहानात् सर्ववेदान्तव्याकोपः। अथ नित्यत्वमिति नाविनाशित्वमभिमतम्, किं तर्हि? प्रतिसर्गं प्रवाहरूपेणनादिभवपरम्परया सिद्धत्वमाकाशादिवत्; परमेश्वरस्याविद्यकज्ञानशक्तेरेव मनोमयकोशात्मिकाया वेदत्वस्योपवर्णितत्वात् "शास्त्रयोनित्वादि" त्यत्र, अतो नायं दोषः, एवमपि जगतः सर्गप्रलयाभ्युपगमात् शब्दार्थयोरौत्पत्तिकः सम्बन्धोऽभ्युपगतो विरुद्ध्येतैव। अभिधानाभिधेयाविच्छेदे हि तत्सम्बन्धस्यानादित्वं भवेत्, निरन्वयस्य तु जगतः प्रविलयेऽत्यन्तासतश्चापूर्वस्योत्पादेऽभिधानाभिधेयावत्यन्तमुच्छिन्नौ, इति किमाश्रयः सम्बन्धः स्यात्? एतेन-वेदस्यानादित्वमपि-प्रत्याख्यातम्। तस्मादस्त्येव तव मते शब्दे विरोध इति शङ्कापदानि। एभ्य उत्तरमिदं सूत्रम्-*समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च*।।३०।। तत्र दर्शितानि शङ्कापदानि संक्षेपेण भाष्यकारो दर्शयति-*अथापि स्यादित्यादिना*।। तदुत्तरत्वेन सूत्रमवतारयति-*तत्रेदमभिधीयत इति*।। "समाननामरूपत्वाच्चे" ति चकारोऽवधारणार्थः, अनुक्तहेत्वन्तरसमुच्चयार्थो वा। सर्गप्रलययोः पुनः पुनरावृत्तावपि शब्दार्थयोस्तत्सम्बन्धस्य चानादित्वं न विरुद्धयते। यदि प्रलयो भावानां निरन्वयनाशः स्यात्, सर्गादौ वाऽपूर्वस्योत्पत्तिः, तदा स्यादयं विरोधः। न चैवमस्ति; सत्कार्यवादस्याविरोधे वक्ष्यमाणत्वात्। अतो यद्यपि महाप्रलयसमये नान्तःकरणादयो भावाः समुदाचरद्वृत्तयः सन्ति; तथापि स्वकारणेऽनिर्वाच्यायामविद्यायाम-व्याकृताख्यायां लीनाः सूक्ष्मेहाशक्तिरूपेण कर्मविक्षेपिकाविद्यावासनाभिः सहावतिष्ठन्त एव। तथा च स्मृतिः-"आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः"।। इति। ते च पुनरवधिं प्राप्य परमेश्वरेच्छाप्रचोदिताः सन्तः कूर्मदेहलीनान्यङ्गानीव ततो निःसरन्ति,

नापूर्वतयोत्पद्यन्ते। भवति चेदमपूर्वानुत्पादे लिङ्गम्-यत् समाननामरूपत्वम्। यस्य हि प्राचीनभवे यद् नाम-इन्द्रः, वरुणः, मनुष्यः, देवः, पशुरिति वा, यच्च रूपम्-सहस्ताक्षत्वादिलक्षणम्, तेनैव नाम्ना तेनैव रूपेण परस्मिन् भवेऽपि स पदार्थो दृश्यते। न चैतत् प्रतिसर्गमप्यत्यन्तभिन्नत्वमुपपद्यते। तस्माद् यथा प्रतिदिनं स्वापप्रबोधयोर्भूतानामुत्पत्तिप्रलययोः सतोरपि समाननामरूपत्वात् तान्येव ''तानी'' ति प्रत्यभिज्ञायन्ते; निरन्वयनाशेऽपूर्वोपजने च तदनुपपत्तेः, तद्वत् प्रकृतेऽपि मन्तव्यम्। स्वाप्रबोधयोस्तु सर्गप्रलयौ श्रूयेते-''यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति तदैनं वाक् सर्वैर्नाम भिस्सहाप्येति चक्षुः सर्वै रूपैः सहाप्येती'' त्यादि प्रलयश्रवणं स्वापे, ''यथाग्नेर्ज्वलत सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन् एवंमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका'' इति च सर्गश्रवणं जागरे। ननु-प्रतिसर्गं समाननामरूपत्वं भूतानां कुतोऽध्यवसीयते? उच्यते; *दर्शनात्, स्मृतेश्च*।। श्रुतिस्मृतिभ्यामित्यर्थः। श्रुतिस्तावत्-''सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'' इत्यादिः। स्मृतिश्च-

''तेषां ये यानि कर्माणि प्राक् सृष्टेः प्रतिपेदिरे।
तान्येव ते प्रपद्यन्ते सृज्यमानाः पुनः पुनः।।
हिंसाहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृतौ।
तद्भाविताः प्रपद्यन्ते तस्मात्तत्तस्य रोचते।।

ऋषीणां नामधेयानि ताश्च वेदेषु दृष्टयः।
शर्वर्यन्ते प्रसूतानां तान्यैवैभ्यो ददात्यजः।।

यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये।
दृश्यन्ते तानि तान्येव तथा भान्ति युगादिषु।।
यथाभिमानिनो जीवास्तुल्यास्ते साम्प्रतैरिह।
देवा देवैरतीतैर्हि रूपैः कर्मभिरेव च।।''

इत्यादिः। तस्मात् प्रतिसर्गं प्रतिप्रलयं चोत्पद्यमानत्वे निरूध्यमानत्वे च सत्यपि भावानामनादित्वाद् न शब्दार्थसम्बन्धानादित्वाभ्युपगमः सर्गप्रलयाभ्युपगमेन विरुद्धयत इति। भाष्ये- *तदापीति*।। सर्गप्रलयावृत्त्यभ्युपगमपक्षेऽपीत्यर्थः। अनेन सौत्रम्-''आवृत्तौ'' ''अपी'' ति पदद्वयं व्याख्यातम्। सिद्धयतां संसारस्यानादिता, तावताऽपि किं तव सिद्धमिति चेत्, चोदितशब्दविरोधः परिहृतो भवतीत्याह- *अनादौ च संसार इति*।। अनेन

सम्प्रदायाविच्छेदकारणमुक्तम्। यदि ब्रूयात् सुप्तपुरुषदृष्टया पुरुषान्तरव्यवहारासिद्धेरुदाहृत-श्रुतिव्याकोपाञ्च नैतदविरोधकारणमिति, तथापि तदविच्छेदकारणान्तरमस्तीत्याह–स्वयं चेति।। एवं तर्हि प्राचीनव्यवहारानुसन्धानक्षणे तदविच्छेदकारणसंभवादवैषम्यमिति परहरति–*नैष दोष इति*।। अस्मदादिवत् तेषामपि न तदनुसन्धानमिति चेत्, तत्राह–*यद्यपीति*।। तथाचास्मदादिषु तददर्शनमप्रयोजकमिति भावः। ननु–अस्तु नाम कल्पान्तरव्यवहारानुसन्धानं महाधियां हिरण्यगर्भप्रभृतीनाम्, तथाप्यस्यां सृष्टावन्य एव वेदाः, अन्य एव चैषामर्थाः, अन्ये च वर्णाश्रमाः, धर्माञ्चानर्थः, अधर्माञ्चार्थः, अनर्थश्चेप्सितः, अर्थश्चानीप्सितः, इत्यपूर्व एव सर्गः किं न भवेत्? तथाच स्थित एव चोदितविरोध इत्याशङ्क्य "समाननामरूपत्वादि" ति सूत्रोक्तं समाननामरूपत्वलक्षणं हेतुमुपपादयन्नाह–*प्राणिनां च सुखप्राप्तय इति*।। ननु–प्रतिसर्गमनेकरूपा एव कारणानां कार्यशक्तयः किं न कल्प्यन्ते? तथाच न समाननामरूपत्वमिति? नेत्याह–*न चानेकाकाराः शक्तय इति*।। तत्कल्पने प्रमाणाभावात्, श्रुति-स्मृतिविरोधाञ्चेत्यभिप्राः। *योऽग्निर्निरवपदिति*।। भाविनीं वृत्तिमाश्रित्य यजमानेऽग्निशब्दोऽत्र प्रयुज्यत इत्यभिप्रायः।।३०।।

मध्वादिष्वसंभवादनधिकारं जैमिनिः।।३१।। इदानीं सूत्राभ्यां पूर्वपक्षः प्रदर्श्यते। ब्रह्मविद्यायां देवादीनामनधिकारं जैमिनिराचार्यो मन्यते स्म। कुतः? मधु संवर्ग इत्यादिविद्यासु तेषां तदसंभवात्। तासु हि विद्यासु वसव आदित्यादयोऽधिकारिणो देवा उपास्यत्वेन प्रविष्टाः, फलत्वेन च। न च तेषां तद्विद्योपास्यानां तदुपासकत्वं संभवति; उपास्योपासकभावस्य भिन्नाधिष्ठानत्वात्, नापि तत्फलावाप्तिः ततः संभवतिः पूर्वमेवादित्यादिभावापत्तेस्तत्फलस्य प्राप्तत्वात्। न हि सुमन्दोऽपि प्राप्तं कामयते, नापि तदर्थं साधनमनुतिष्ठति; असिद्धविषयत्वादिच्छासाधनानुष्ठानयोः।।

ननु–एवं तर्हि माऽस्तु मध्वादिविद्यासु तेषामधिकारः, ब्रह्मविद्यायां तु भविष्यति, को विरोधः? न ह्यन्यत्रानधिकारोऽन्यत्राप्यात्मानमासञ्जयति; अतिप्रसङ्गात्, मा भूद् राजसूयानधिकारिणो ब्राह्मणस्य बृहस्पतिसवेऽप्यनधिकारः–इति, मैवम्; विद्यात्वेन सामान्येन तत्राधिकाराभावस्य विवक्षितत्वात्। तथाहि प्रयोगः–विवादाध्यासिता ब्रह्मविद्या, नादित्यादिकर्तृका, विद्यात्वात्; मध्वादिविद्यावदिति। न चात्र कश्चिद्विरोधः। यदि "ब्राह्मणो बृहस्पतिसवेन यजेते" तिवद् विद्यायां देवकर्तृकत्वं कुत्रचित् श्रूयेत, तदा स्यादपि तद्विरोधः, न चैतदस्ति। एतेन–अतिप्रसङ्गोऽपि–परिहृतः। "यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवद्यर्थर्षीणां तथा मनुष्याणामि" त्याद्यस्ति देवादीनां ब्रह्मविद्यायां कर्तृत्वश्रवणमिति चेत्, न; तस्यार्थवादत्वेन तच्छ्रवणत्वासिद्धेः। अन्यार्थदर्शनमपि भवत्यर्थलिङ्गमिति चेत्, सत्यं भवेत्, यदि न प्रमाणान्तरेण विरोधः स्यात्। अस्ति चोक्तानुमानेन विरोधः। अतो न तत् स्वार्थसाधकमिति।

तस्मादुक्तानुमानविरोधाद् नास्ति देवादीनां ब्रह्मविद्यायामधिकार इति। तदेतदभिप्रेत्याह भाष्यकार:-ब्रह्मविद्यायामधिकाराभ्युपगमे हि विद्यात्वाविशेषाद् मध्वादिविद्यास्वप्यधिकारोऽभ्युपगम्येतेति*।।

केचितु-एवमभिप्रायमबुद्ध्वा देवादीनां स्वमिश्रमध्वादिविद्यास्वनधिकारेऽपि ब्रह्मविद्याधिकारसंभवादाक्षेपायोगमाशङ्क्य, किं सर्वासु विद्यास्वविशेषेण सर्वेषां देवादीनामधिकार उच्यते, किं वा कासुचिदेव केषाञ्चिदिति विकल्पपूर्वकं तन्निरासित्वेन पूर्वपक्षसूत्रद्वयं क्रमेणावतारितवन्त:, तन्न साधु; साध्यासङ्गते:। भाष्यकारेण ह्यस्मिन् सूत्रे ब्रह्मविद्यायामिव विद्यात्वाविशेषेण मध्वादिविद्यासु देवादीनामधिकारप्रसङ्गमापाद्य ब्रह्मविद्यायामेवाधिकाराभाव: प्रतिपाद्यते, न सर्वविद्यासु। तथा सति साध्यकोटौ मध्वादिविद्याधिकारस्य परमते प्रवेशादिष्टप्रसञ्जनमेव स्यात्। तस्मादस्ति भाष्यासङ्गति:। सूत्रासङ्गतिश्च। ''ज्योतिषि भावाञ्चे'' ति द्वितीयसूत्रेणैव देवानामचेतनत्वप्रदर्शकेनोभयविकल्पनिरासादेतस्य सूत्रस्य वैयर्थ्यावश्यकत्वादित्यास्ताम्। तस्मादस्मद्व्याख्यानमेव युक्तमिति।।३१।।

ज्योतिषि भावाञ्च।।३२।। अचेतनत्वादपि न देवादीनां ब्रह्मविद्याधिकारोऽस्ति। कुतस्तेषामचेतनत्वमध्यवसीयते? यस्मात्=चेतन एव प्रत्यक्षसिद्धे सूर्यचन्द्रग्रहनक्षत्रादिरूपे ज्योतिषि आदित्यचन्द्रेन्द्रवरुणभृगुवसिष्ठादिशब्दप्रयोगात्। एवं प्रत्यक्षसिद्धाचेतनभावे ज्वलनादौ ज्योतिष्येवाग्न्यादिशब्दप्रयोगभावो दर्शयितव्य:। न च तदतिरिक्तविग्रहवत्यादित्यादिदेवताशब्दभावे किञ्चित् प्रमाणमस्ति; नानार्थत्वकल्पनस्यान्याय्यत्वाञ्च। तस्मादपि नास्ति देवादीनामधिकार इति।।

एवं वा सूत्रद्वयं योजनीयम्-*मध्वादिष्वसंभवादनधिकारं जैमिनि:*।। यदुक्तं देवादीनां विग्रहवत्त्वाद् ब्रह्मविद्यायामधिकार इति, नयज्ञो जैमिनिराचार्यस्तेषां विग्रहाभावाद् अनधिकारं ब्रह्मविद्यायां मन्यते। कुतस्तेषां विग्रहाभावोऽवगम्यत इति चेत्, उच्यते; मध्वादिष्वसंभवात्=मधुसंवर्गादिरूपेण संपादितेष्वादित्यवाय्वादिषु विग्रहासंभवात्। न हि ''असौ वाव आदित्यो देवमधु'' ''वायुर्वाव संवर्ग:'' ''अग्नि: सार्यमे'' ति मध्वादिकल्पनास्पदत्वमादित्यादीनां विग्रहवत्व उपपद्यते; विग्रहवत्सु मध्वादिसादृश्याभावेन तत्सम्पादनासंभवात्, सम्पदुपासनायाश्च सादृश्याधीनत्वात्। तस्माद् मध्वादिभावेष्वादित्यादिषु तद्वैसादृश्येन विग्रहासंभवादचेतनानामेव ज्योतिरादीनामादित्यादित्वम्। ज्योतिरादिषु च विग्रहरहितेषु मध्वादिसादृश्यमस्ति। अतस्तेषु तत्कल्पना श्रुत्युक्तप्रकारोपपद्यते। तदिदमुक्तम्-''ज्योतिषि भावाच्चे'' ति। ज्योतिरादिषु मध्वादिसादृश्यभावादित्यर्थ:। चकारो विग्रहवतां तत्सादृश्याभावं समुञ्चिनोति। ननु-उक्तं मन्त्रार्थवादेतिहासपुराणलोकेभ्यो देवादीनां विग्रहवत्त्वं सिद्धमिति, तत् कथमुच्यते-मध्वादिष्वसंभवात्

ज्योतिषि भावाञ्च? न तेषां देवतासंप्रयोगः, मैवम्; नहि लोको नाम किमपि प्रमाणम्। तस्याप्यैतिह्यमात्रत्वेनाप्रमाणत्वादित्याशयः। लोकप्रसिद्धेः प्रत्यक्षाद्यमूलत्वेऽपीतिहासपुराण मूलत्वं भविष्यतीति, नेत्याह– *इतिहासपुराणमपीति*।। तथाच तस्य लोकप्रसिद्ध्युपजीव्यत्वे स्यादन्योन्याश्रय इत्याशयः। इतिहासपुराणयोर्मन्त्रार्थवादमूलत्वाद् नान्योन्याश्रय इति चेत्, न; तयोरपि तत्परत्वासंभवादित्याह– *अर्थवादा अपीति*।। न कस्यचिदर्थस्य प्रमाणमिति*।। व्रीह्यादिवत् प्रयोगसमवायित्वेन प्रमेयभावापन्नत्वादित्याशयः।।३२।।

भावं तु बादरायणोऽस्ति हि।।३३।। तुशब्दो जैमिनिपक्षं वारयति। बादरायण आचार्यो देवादीनां ब्रह्मविद्यायामधिकारस्य भावं मन्यते स्म। कुत एतत्? यतो मन्त्रार्थवादेतिहासपुराणलोकेभ्यस्तेषां विग्रहसंभवोऽस्ति। ननु–मध्वादिरूपेण सम्पादितेष्वादित्यादिषु विग्रहासम्भव उक्तः, सत्यम्; अस्तु नाम मध्वादिरूपसम्पादनात् अस्ति ह्यादित्यादीनां रूपद्वयम्–मण्डलादिरूपम्, तदधिष्ठातृरूपं च। तत्र मध्वाद्युपासनालम्बने मण्डलादिरूपे विग्रहासम्भवेऽपि तदधिष्ठातृरूपे विग्रहसम्भवो न दण्डवारितः ; ऐश्वर्यवतां तेषां भूतवशिनामनेकरूपकरणसम्भवात्। तदेतदाह स्म भाष्यकारः– *अस्ति ह्यैश्वर्ययोगाद् देवतानां ज्योतिराद्यात्मभिश्चावस्थातुम्, यथेष्टं च तं तं विग्रहं ग्रहीतुं सामर्थ्यमिति*।। एतेन –आदित्यादिशब्दस्यानेकार्थताऽपि–वारिता भवति; एकस्यैवोभयरूपत्वात्। ननु–नास्त्येतस्मिन्नर्थे प्रमाणमिति, तत्राह– *तथाहि श्रूयत इति*।। मन्त्रार्थवादादिव्यवहारादित्युक्तमिति*।। आदिशब्देन तन्मूलेतिहासपुराणधर्मशास्त्राणि गृह्यन्ते। तेषां व्यवहारो देवतादिविषयिणी प्रवृत्तिः ; तद्दर्शनादित्यर्थः। यत् पूर्वपक्षिणा मन्त्रार्थवादयोरन्यार्थत्वेन स्वार्थेऽप्रामाण्यमुक्तम्, तदनुभाष्य दूषयति– *यदप्युक्तमित्यादिना*।। किम्–अन्यदुद्दिश्य प्रवृत्तस्य न तदनपेक्षकार्यान्तरमुपपद्यत इत्युच्यते, किं वा प्रतीतोऽप्यर्थो न संभवेत्, किं वा सकृदुञ्चरितः शब्दः सकृदर्थं बोधयतीति न्यायाद् नार्थद्वयपरत्वमेकस्य वाक्यस्येति। तत्राद्यपक्षं व्यभिचारेण दूषयति– *अन्यार्थमपि प्रस्थित इति*।। द्वितीयपक्षं दूषयितुमनुभाषते– *अत्राहेति*।। यत्र हि पदैकवाक्यता–यथा 'रक्तः पटो भवती'ति, तत्रार्थैकत्वादेकं वाक्यमिति न्यायेन प्रधानवाक्यार्थप्रतिपादनानुसारेणैव तदनुगुणतया प्रतिपादनम्; ''वर्णास्तथापि नैकस्मिन् पर्यवस्यन्ति निष्फले। वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्। पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्।'' इति। न च ''न सुरां पिबेत्'' इत्यादिनञ्वति वाक्ये सुरादिविधानं वाक्यार्थः, येन तत्र पदानां पर्यवसानं स्यात्, सर्वत्र निषेधवाक्ये विकल्पाध्यवसानप्रसङ्गात्। तस्माद् युक्तं तदभावाद् नञ्वाक्यस्यार्थप्रत्यायकत्वम्। यत्र तु वाक्यैकवाक्यता–यथा समिदादिदर्शपूर्णमासवाक्ययोः, तत्र पदानि स्वीयावान्तरवाक्यार्थं प्रतिपाद्यैव

तदाकाङ्क्षावशेन पुनर्वाक्यैकवाक्यतां भजन्ते, नान्यथा; अतो वैषम्याद् युक्तमर्थवादवाक्यानां विध्युद्देशेनैकवाक्यतां गतानामपि स्वातन्त्र्येण स्वार्थप्रत्यायनमिति परिहरति–*अत्रोच्यते विषम उपन्यास इति*।। यथाचार्यवादादीनां प्रमाणन्तरविरोधे सत्यवान्तरतार्प्येण स्वार्थेऽपि प्रमाण्यम्, तथोपपादितमधस्तात्, इति नात्र विस्तीर्यते पोनरुक्तयभिया। पूर्वं देवतादिरूपस्य विध्यनपेक्षितत्वमङ्गीकृत्य मन्त्रार्थवादयोरवान्तरतात्पर्यात् स्वातन्त्र्येणापि तद्रूपसिद्धिरित्युक्तम्, इदानीं तद्रूपस्य कर्मविध्यपेक्षिततत्वात् त्वयाऽपि तयोस्तत्र तात्पर्यमभ्युपेतव्यमित्याह–*अपि च विधिभिरेवेति*।। ननु–उक्तं देवतायाः शब्द एव स्वरूपम्, तथाच स एव ध्यानस्य विषयो भविष्यतीति, नेत्याह –*न च शब्दमात्रमिति*।। सिद्धे च मन्त्रार्थवादयोर्देवतादिविग्रहे प्रामाण्ये तन्मूलकतयेतिहासादेरपि सिद्धं तत्र प्रामाण्यमित्याह–*इतिहासपुराणमपीति*।। *प्रत्यक्षादिमूलमपि संभवतीति*।। अपिर्भिन्नक्रमः। इष्टदेवतासंप्रयोगादिलक्षणप्रत्यक्षाद्यपि देवताविग्रहे मूलम्=प्रमाणं संभवतीत्यर्थः। तेन लोकाख्यमपि प्रमाणं तत्र स्वतन्त्रं भवतीति द्रष्टव्यम्। इतिहासपुराणविशेषणत्वे तु यथाश्रुतमेव व्याख्येयम्।।

ग्रन्थयोजना त्वेवम्–ननु–इतिहासपुराणयोर्मन्त्रार्थवादमूलत्वे ततो न पृथक् प्रामणत्वेन देवतादिविग्रहे ते प्रदर्शनीये; ताभ्यां तदर्थस्यैव प्रपञ्चनादिति–चेत्, तत्राह–*प्रत्यक्षादिमूलपपीति*।। यद्वा–यस्तु हठी सर्वम्मन्यो मन्त्रार्थवादयोः स्वार्थे प्रामाण्यं नाङ्गीकरोति, स चेद् ब्रूयात्–मन्त्रार्थवादयोरप्तामाण्यात् तन्मूलेतिहासयोरप्यप्रामाण्यमेव–इति, तं प्रत्याह–*प्रत्यक्षादिमूलमपीति*।। ननु–''न हि कदाचिदनीदृशं जगदि'' ति न्यायाद् अस्मदादिदृष्टान्तेन तत्कालीनानामपि व्यासादीनां मनुष्यत्वाविशेषाद् देवतादिभिर्व्यवहारासामर्थ्यमनुमास्यामह इति, नेत्याह–*यस्तु ब्रूयादिति*।। श्लिष्यते=युज्यत इत्यर्थः।। हिना प्रयोजनं सूचयति–*क्रममुक्तिदर्शनान्यप्येवमेवोपपद्यन्त इति*।। क्रममुक्तये दर्शनानि क्रममुक्तिदर्शनानि; क्रममुक्तिफलकान्युपासनानीत्यर्थः।।३३। इत्यष्टमं देवताधिकरणम्।।

इति वार्त्तिकम् देवताधिकरणम् समाप्तम्

प्रदीपः

तदुपर्यपि बादरायणः संभवात्।।२६।। पूर्वाधिकरणे मनुष्याणां देवभावमापन्नानाम्, किं बहुना चण्डालान्तभावमामन्नानां ब्रह्मविद्याधिकार इत्युक्तम्। तदिदं न युक्तम्; देवानामजीवत्वात्, चण्डालादीनां वेदाध्ययनादावनधिकाराच्चेत्याशङ्कायामुभयेषामपि ब्रह्मविद्यायामधिकार-चिन्तार्थमुपरितनमधिकरणद्वयमिति प्रसङ्गसङ्गत्येदमधिकरणं प्रवृत्तमित्यधिकरणसङ्गतिः। प्रसङ्गेन प्रवृत्तविचारत्वाद् न पादसङ्गत्यादिकम्, अथवा अस्पष्टनिर्गुणवाक्यप्राधान्यस्यैव पादार्थत्वाद् अस्पष्टब्रह्मलिङ्गकविषयवाक्यघटितपादघटकत्वेन छन्निन्यायात् सङ्गतिरत्रोह्या।।

सूचीकटाहन्यायेन सिद्धान्तेनैवोपक्रमते–"तदुपर्यपि बादरायणः संभवात्।।" इति। तदुपरि=मनुष्योपरि देवादिषु अधिकारोऽस्ति; संभवादिति बादरायणो मन्यत इति सूत्रार्थः। अत्र देवादिषु इति प्रयोक्तव्ये तदुपरिति निर्देशो मनुष्याणामेव केषांचिद देवताभावोंऽपि स्वीयकर्माधीनो भवतीति देवभावोऽपि मनुष्याणामवस्थाविशेष इति सूचयति। तथाचाजानजदेवा इव कर्मदेवा अपि ब्रह्मविद्याधिकारिण इति भावः। इदमेवास्याधिकरणस्यास्मदृष्टया प्रयोजनम्–यत् देवभावप्राप्त्यनन्तर-मप्यस्माकं ब्रह्मविद्याधिकारसूचनम्, अथवा देवादीनामपि हिरण्यगर्भान्तानामाज्ञत्वात् तद्भावो न मुक्तिः, इति ब्रह्मलोकान्तवैराग्यसंभवसूचनम्। तथाच–पूर्वतनसूत्रेणाथशब्दार्थसूचनम्, अनेनाधिकरणेनातः शब्दार्थस्य सूचनमिति फलति।।

तत्र सिद्धान्तपक्षं संगह्णाति– *बाढमित्यादिना मन्यत इत्यन्तेन*।। ननु–आजानजानां देवामामिव कर्मदेवादीनां ब्रह्मविद्याधिकारोऽनेनाधिकरणे साध्यत इत्युक्तम्, न चेदं युक्तम्; आजानजानां देवानामेवासंभवात्, संभवेऽपि तेषां कदापि कर्मानुष्ठानाद्यसंभवेन तसाधनसंपत्तेरयोगात्, तद्योगेऽपि वेदान्ताध्ययनानधिकारेणाधीतवेदान्तत्वाभावात्, आप्तकामत्वेन मुमुक्षायोगाच्च। एतेन–कर्मदेवा अपि व्याख्याताः ; तेषां जन्मान्तरीयकर्मसाध्यसाधनसंपत्त्यादावपि देवावस्थायामधीतवेदान्तत्वाभावाद् इत्याशयेन पृच्छति– *कस्मादिति*।। समाधत्ते– *संभवादिति*।। तत्र प्रथमं देवभावस्यामुख्यफलत्वाद्

निरतिशयफलाकाङ्क्षाऽकामहतश्रोत्रियपूर्णमानुपानन्दचक्रवर्त्यादेरिव देवानामप्यविशिष्टेत्याह- *संभवति हि तेषामप्यर्थित्वाद्यधिकारकारणमिति*।। आदिशब्दगृहीतं विग्रहादिप्रयुक्तचेतनत्वादि-सामर्थ्यं समर्थयति- *सामर्थ्यमपीति*।। *विग्रहवत्त्वाद्यवगमादिति*।।

इदमुपरितनस्य "विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनादि" त्यादिपूर्वपक्षस्योत्तरम्। वेदान्ताध्ययनानधिकारेणाधीतवेदान्तत्वाभावान्नाधिकार इति शङ्कामनुभाष्य दूषयति- *न चोपनयनेति*।। उपनीताधिकारिकत्वादध्ययनस्य उपनयनस्य च त्रैवर्णिकविषयत्वाद् देवादीनामत्रैवर्णिकानां न वेदान्ताध्ययनसंभव इति भावः। अध्ययनस्य ह्यक्षरग्रहणमेव फलम्, न त्वदृष्टं स्वर्गादीति हि मीमांसकमर्यादा। व्यक्तं चैतद् ऋग्वेदादिसायणभाष्योपक्रमणिकादौ। तथाच स्वयंप्रतिभातवेदत्वं विनाऽप्यध्ययनं प्राप्तवेदान्तत्वं वा तेषां विद्यत इति, अनुपनीतानामपि तेषामधिकारो न विरुद्ध इत्याह- *उपनयनस्येत्यादिना*।। *स्वयंप्रतिभातवेदत्वादिति*।। वस्तुतस्तु वेदान्तसावाध्ययनप्रयोजकमुपनयनम्, सर्ववेदाध्ययनप्रयोजकमुपनयनं च द्विविधमुपनयनं वर्तते; आद्ये न त्रैवर्णिकत्वनियमः, द्वितीय एव तु तन्नियम इति देवानामपि वेदान्तमात्रध्ययनेन ब्रह्मविद्याधिकारो न विरूद्ध इत्याह- *अपि चेति*।। "भृगुर्वै वारुणिरि" त्याद्युपाख्यानमिदं देवादीनेवाधिकृत्य प्रवृत्तम्, न तु कर्माधिकारिणो मनुष्यानपीति देवादीनामेव विषयेऽत्रैवर्णिकानामपि नोपनयनकल्पनं विरूद्धमिति भावः। पूर्वतन्त्रगतदेवताधिकरणविरोधमनुभाष्य दूषयति- *यदपीत्यादिना*।। कथं तर्ह्यङ्गुष्ठमात्रश्रुतिरिति शङ्कां वारयति- *देवाद्यधिकारेऽपीति-स्वाङ्गुष्ठेति*।। देवाद्यङ्गुष्ठेत्यर्थः।। तथाच मनुष्याधिकारित्वादित्यधि-कारिसामान्योपलक्षणमिति भावः।।

अत्राष्टौ सूत्राणि वर्तन्ते। तत्र प्रथमसूत्रम्, "भावं तु बादरायणोऽस्ति हि" इत्यष्टमं सूत्रं च सिद्धान्तप्रतिपादनपरम्। तत्र प्रथमं सामान्यतः, द्वितीयं तु विग्रहसाधनेन विशिष्येति विवेकः। "मध्वादिष्वसंभवादनधिकारं जैमिनिः। ज्योतिषि भावाच्चे" ति सूत्रद्वयं पूर्वपक्षपरम्। "शब्द इति चेन्नातः प्रत्यक्षानुमानाभ्याम्" "अत एव च नित्यत्वम्" "समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्चे" ति सूत्रत्रयं प्रासङ्गिकवेदनित्यत्वव्यवस्थापनपरम् "विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्" इति तु पूर्वपक्षिणामाशङ्काविशेषनिरासपूर्वकं सिद्धान्तसमर्थनपरमिति विभागः।।२६।।

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्।।२७।। देवतानां विग्रहवत्त्वे यजमानादिवत् कर्माङ्गभावो यज्ञे संनिधानेन नोपपद्यते। ऐरावतादिभिस्सह यज्ञमण्डपे समागमे हि कर्मभङ्ग एव

स्यादिति चेत्, न; यथैकस्यैव ब्रह्मणोऽनेकप्रतिपत्त्याऽनेकदेवादिभावः, एवं तन्महिमविशेषाणां देवादीनामपि तत्तेजोंशसंभवानां महिमतोऽनेकानि रूपाणि भवितुमर्हन्तीति न कर्मभङ्गादिप्रसक्तिरिति सूत्रार्थः। तदिदमाशङ्कासमाधानाभ्यामुपपादयति- *स्यादेतदित्यादिना-अनेकप्रतिपत्तिः संभवतीत्यन्तेन*।। अनेकभावग्रहणं श्रुतिसिद्धमित्याह- *दर्शनादिति*।। श्रुतिवाक्यमेव संगृह्णाति- *कवि देवा इत्यादिना*।। बृहदारण्यकतृतीयनवमे हि ''कति देवा'' इत्युपक्रम्यैकैव देवतेति प्रतिपाद्यतस्या एव महिमानो देवतान्तराणि तेषामपि महिमान्तराण्यवान्तरदेवतान्तराणीति प्रतिपादनाद् अनेकप्रतिपत्तिः श्रुतिसंमतेति भावः। अनेन च देवानामपि न मनुष्येभ्यो विशेषो बन्धादौ, ऐश्वर्यतारतम्यमात्रमेव तेषां विशेष इति सूचनाद् देवताभावो न मुक्तिरिति सूच्यते।। अन्यत् स्पष्टम्।।२७।।

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्।।२८।। विरोध इत्यनुषज्यते। शब्दे विरोधोऽनित्यत्वाख्यो भवेत, यदि विग्रहवती देवतेति चेन्न; अतः प्रभवात्=शब्दादेवार्थानां प्रभवात्, निमित्तनैमित्तिकभावात् शब्दार्थयोरिति यावत्। शब्दार्थतत्सम्बन्धानामनादित्वेन मानित्यत्वादिदीप इति सूत्रार्थः। अतः प्रभवादित्यनेन शब्दस्योपादानत्वमभिप्रेतमिति वैयाकरणानां मतं नात्र विवक्षितम्, इत्याह- *न चेदं शब्दप्रभवत्वमिति*।। शब्दार्थयोर्निमित्तनैमित्तिकभावे श्रुतिस्मृती सोपपादन-मुदाहरति- *एत इति वा इत्यादिना-भूरादिलोकान् सृष्टान् दर्शयतीत्यन्तेन*।।

शब्दस्वरूपोपादानकारणत्वासम्भवं पूर्वोक्तमुपपादयितुम् तदुपादानकारणतावादिनामभिमतं शब्दस्वरूपं स्फोटात्मकमुपन्यस्य निरस्यति- *कि पात्मकमित्यादिना*।। *स्फोटमित्याहेति*।। वैयाकरण इति शेषः। यथाच स्फोटवादोऽयं न बादरायणाभिमतः, तथाऽक्षराधिकरणे विवेचितमिति प्रकृत आहपदेन पूर्वपक्ष्येव विवक्ष्यते, न सिद्धान्तीति भावः। वर्णपदत्ववाददूषणं वैयाकरणाभिमतं प्रदर्शयति- *वर्णपक्षे हीत्यादिना*।। वर्णानां प्रत्युच्चारं भेदं प्रमाणयति- *तथाहीत्यादिना*।। ननु-वर्णानित्यत्वस्य स्फोटवादस्य च कः सम्बन्ध इति-चेत्, वर्णानां प्रत्येकं समुदितानां वा बोधकत्वाभावात् ''गौत्येकं पदमि'' त्यनुभवस्यार्थाभिधायकत्वप्रयुक्तौपचारिकत्वेनैकार्थकारित्वेन वनसेनादिस्थल इवानुपपन्नत्वात् स्फोटप्रमाणत्वे पर्यवसानोपयोगित्वमेवेत्यभिप्रेत्य वर्णानामर्थप्रत्यायकत्वं निरस्यति- *न च वर्णेभ्य इत्यादिना*।। प्रत्येकमिति शेषः। तदेवोपपादय-न*हीति*।। समुदितानां बोधकत्वं निरस्यति- *न चेति*।। प्रतिक्षणविनाशिनां वर्णानां वर्णान्तरकालेऽनव स्थानेन क्रमासंभवादित्यर्थः। संस्कारद्वारा साहित्यमाशङ्क्य निरस्यति- *पूर्वपूर्ववर्णेति*।। संस्कारसहितवर्णानां संबन्धाग्रहाद् न बोधकत्वमिति स्फोटवाद एव

युक्त इति भावः। तदिदमाह—*तस्मादिति*।। ननु संस्कारवत् स्फोटस्याप्यप्रत्यक्षत्वात् सम्बन्धाग्रहणसाम्यमिति चेत्, नेत्याह—*स चैकैकेति*।। प्रत्ययिनि=अन्तः करणे। तथाच मानसप्रत्यक्षविषयत्वमेव स्फोटस्येति तत्तत्पुरुषावसेयस्य स्फोटस्य सम्बन्धग्रहणं न विरुद्धम्, इति संस्कारसहितचक्षुरादीनामिव तादृशान्तः करणस्यापि प्रत्यभिज्ञानजनकत्वेन—इदमेकं पदमिति ज्ञानोपपत्तिरिति भावः। इदमेकं परमित्यादीनां वर्णविषयकत्वासंभवं पूर्वं सूचितमिदानीमुपपादयति—*न चेति*।। *अभिधायकादिति*।। अभिधायकत्वस्य पूर्वोक्तविधया वर्णेष्वसंभवादिति भावः।। अयं हि स्फोटवादो वैयाकरणैर्नैयायिकाभिमतशब्दानित्यत्ववाद एव समर्थयितुं शक्यते, न तु वर्णनित्यत्ववादिनां मीमांसकानामुपवर्षादिवृत्तिकाराणां वा मते स्वीक्रियमाणे, तन्यते तु संस्कारद्वारा वर्णानां साहित्येनार्थाभिधायकत्वेनैकार्थकारित्वेनैक-प्रत्ययविषयत्वं न विरुद्धम्। इयान् विशेषः—वैयाकरणैस्संस्कारसहितान्त्यवर्णस्य स्फोटाभिव्यञ्जकतवम्, अभिव्यक्तस्य तस्याभिधायकत्वं च मन्यते, मीमांसकैस्तु संस्कारसहितवर्णानामेवाभिधायकत्वमिति; उच्चरितप्रध्वंसानुभवस्तु ध्वनिगोचरः, नवर्णगोचर इति न विरोधः। अत्र च शब्दनित्यत्वाधिकरणमात्रमनुसन्धेयमिति वस्तुस्थितिं मनसि निधायाह—*वर्णा एवेति*।। वर्णानां नित्यत्वे प्रत्यभिज्ञानं प्रमाणम्; तस्यान्याविषयकत्वात्, पुरुषभेदेन वर्णभेदप्रत्ययस्य तदभिव्यञ्जकध्वनिविषयकत्वात्, इत्याह—*त एवेति प्रत्यभिज्ञानादित्यादिना*।। प्रत्यभिज्ञानस्य सादृश्यनिबन्धनत्वम्, आकृतिनिबन्धनत्वं च निरस्यति—*सादृश्यादित्यादिना।। केशादिष्विति*।। लूनादिकेशेषु त एवेम इति प्रत्यभिज्ञानं सादृश्यनिबन्धनमिति भावः। भेदप्रत्ययस्य ध्वनिकृतत्वमाह—*अथवेति*।। अथवेति शङ्कावारणाभिप्रायेण, न तु पक्षान्तराभिप्रायेण। वर्णानां प्रत्युच्चारणमभेदेऽपि प्रत्यभिज्ञाननिर्वाहः, एवं कथञ्चन तेषां भेदेऽपि प्रत्यभिज्ञाननिर्वाह इति स्थितेऽन्यतरपक्षोऽवश्यं त्यक्तव्यः, अन्यतर एव ग्राह्य इति हि वस्तुस्थितौ च किं युक्तमित्यत आह—*वर्णेभ्यश्चार्थप्रतीतेः संभवात् स्फोटकल्पनाऽनर्थिकेति*।।

अयमाशयः—वर्णपक्षे पूर्वपूर्ववर्णसंस्कारसहितान्त्यवर्णस्याभिधायकत्वम्, स्फोटपक्षे पूर्वपूर्ववर्णसंस्कार सहितान्त्यवर्णाभिव्यक्तस्फोटस्याभिधायकत्वम्; तत्र प्रथममतेऽप्रत्यक्षसंस्कार-कत्पनामात्रम्, स्फोटपक्षे तु अप्रत्यक्षसंस्कारस्फोटोभयकल्पनमिति गौरवाद् निरर्थिका स्फोटकल्पनेति भावः। कल्पना=अनुमानमित्यर्थः। अथ स्फोटोऽपि प्रत्यक्ष एव, मानसप्रत्ययविषयत्वात्, इदमेकं पदमित्यनुभवस्य वर्णविषयकत्वासम्भवात्, अतो न स्फोटस्य कल्पनमित्याशङ्क्य समाधत्ते—*न कल्पयामीत्यादिना गरीयसी कल्पना स्यादित्यन्तेन*।। अयमत्र निष्कर्षः—वैयाकरणमते—ध्वनिरेव

वर्णः, नैयायिक-मीमांसकयोस्तु संयोगविभागास्ताल्वादिव्यापाराः तज्जन्यावर्णात्मकशब्दो वा ध्वनिः, वर्णस्तु तदतिरिक्तः। इयान् विशेषः–वैयाकरणमते शब्दो नित्यः, न नैयायिकमत इव सोऽनित्यः, मीमांसकमतेऽपि वैयाकरणमत इव शब्दो नित्य एव। अयं तु विशेषः–स्फोटो वैयाकरणानाम्, मीमांसकानां तु वर्णा एव शब्द इति।।२८।।

अथ प्रसङ्गेन वेदनित्यत्वद्रढीकरणार्थम्, अर्थानादित्वं व्यवस्थापयितुं च सूत्रद्वयम्– *अत एव च नित्यत्वम्*।।२९।। *समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्चेति*।।३०।। निगदमस्य भाष्यम्।।३०।।

मध्वादिष्वसंभवादनधिकारं जैमिनिः।।३१।। *ज्योतिषि भावाच्च*।।३२।। अत्र भामतीकाराः–किं सर्वासु ब्रह्मविद्यास्वविशेषेण सर्वेषां देवादीनामधिकारः, कासुचिदेव केषाञ्चित्। यद्यविशेषेण, तर्हि तन्निरासार्थं प्रथमं सूत्रम्, यदि यथासंभवम्, तर्हि तन्निरासार्थं द्वितीयं सूत्रमिति–विवेचयन्ति। तथाच सर्वा ब्रह्मविद्याः, देवा द्यनधिकारिकाः, विद्यात्वात्; मधुविद्यावद् इति प्रथमसूत्राभिमतोऽनुमानप्रयोगः। द्वितीयसूत्राभिमतस्तु–आदित्यादयः, न मध्वादिविद्याधिकारिणः, अचेतनत्वात्, इति दृष्टान्तसमर्थनार्थोऽनुमानप्रयोगः इति निष्कर्षः।

अत्र वार्तिकम्–तन्न साधु; साध्यासङ्गतेः। भाष्यकारेण हि प्रथमे सूत्रे ब्रह्मविद्यायामिव विद्यात्वाविशेषेण मध्वादिविद्यासु देवादीनामधिकारप्रसङ्गमापाद्य ब्रह्मविद्यायामेवानधिकारः साध्यते, न सर्वविद्यासु। तथा सति साध्यकोटौ मध्वादिविद्याधिकारस्य प्रवेशादिष्टप्रसञ्जनमेव स्यात्। तस्मादस्ति भाष्यासङ्गतिः, सूत्रासङ्गतिश्च; ''ज्योतिषि भावाच्चे''ति द्वितीयसूत्रेणैव देवानामचेतनत्वप्रदर्शकेनोभयविकल्पनिरासादेतस्य सूत्रस्य वैयर्थ्यावश्यकत्वात्–इति।।

इदमत्र भाष्यम्–''ब्रह्मविद्यायामधिकाराभ्युपगमे हि विद्यात्वाविशेषाद् मध्वादिविद्यास्वप्यधिकारोऽभ्युपगम्येत। न चैवं संभवती'' ति। अनेन हि भाष्येण–सर्वा विद्याः, देवाद्यनधिकाररिकाः, विद्यात्वाद् मध्वादिविद्यावद् इत्यनुमानेऽप्रयोजकत्वशङ्कायां दृष्टान्ते बाधकरूपतर्क एव प्रतिपाद्यते। न चेष्टापत्तिः संभवति; दृष्टान्ते साध्यनिर्णयात्। अन्यथा वार्तिकमतेऽपि कथं ब्रह्मविद्यायामनधिकारसाधनं संभवति। पक्षतावच्छेदकावच्छेदेन साध्यानुमितावंशतः सिद्धसाधनं न दोषायेति ह्यभिप्रेत्य ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यनर्हत्वे सति चिद्भिन्नम्, मिथ्या, दृश्यत्वादित्यनुमाने पक्षैकदेशोऽपि शुक्तिरूप्यं दृष्टान्ततया मन्यते मधुसूदनसरस्वत्यादिभिः। तथाच पक्षैकदेशे सिद्धसाधनस्यादूषणत्वपक्षमादाय ''ज्योतिषि

भावाञ्चे'' ति सूत्रसार्थक्यं भामतीमंत एव, न वार्तिकमते। अत्र भामत्यां सर्वासु ब्रह्मविद्यास्वविशेषेणेत्येव पाठो दृश्यते, न तु सर्वासु विद्यास्विति वस्तुस्थितौ तु वार्तिकदूषणमनुक्तोपालम्भनमेव।।

तत्र ब्रह्मपदं तत्तदुपास्यदेवताव्यतिरिक्तार्थबोधकमेव। ''वाचं धेनुमुपासीत'' इत्यादि-प्रतीकोपासनादौ हि देवादीनामप्यधिकारः केन वारयितुं शक्यते? तत्र यद्यधिकार एव मन्यते देवादीनाम्, तर्हि तत्रैव व्यभिचार उक्तस्यानुमानस्य स्यादिति मन्तव्यम्। द्वितीयसूत्रेणैव सिद्धौ प्रथमसूत्रवैयर्थ्यशङ्का तुवार्तिकपक्षेऽपि समाना।। कथमित्याद्यासमाप्ति दृष्टान्तसमर्थनपरमेव। अन्यत् सर्वं स्पष्टम्।।३१।।

ज्योतिषि भावाञ्चेति।।३२।। ननु–अचेतन इव चेतनेऽपि मन्त्रार्थवादेतिहासपुराणादावादित्यादिप्रयोगे सति कथं ज्योतिर्मात्रपरत्व एवाग्रह इति–चेत्, मन्त्रार्थवादादीनामन्यपराणां तद्विग्रहादावपि तात्पर्याभावादित्याक्षेपसमाधानाभ्यामुपपादयति– *स्यादेतदित्यादिना*।।३२।।

भावं तु बादरायणोऽस्ति हि।।३३।। ''तदुपर्यपि बादरायणः संभवादि'' ति सूत्रार्थ एव जैमिनिमतस्यैव बहुतरसूत्रोपपादितस्य सिद्धान्तत्वभ्रमनिवारणार्थं पुनः सूत्र्यते। तथाच बहुतरसूत्रोपपादितत्वे मतान्तरमपि बादरायणपदघटितसूत्रान्तराभावे सिद्धान्तपरं प्रथमोपात्तमपि भवद् नानुपपन्नम्। अत एव–''कार्यं बादरिरस्य गत्युपपत्तेरि'' त्यधिकरणे बहुतरसूत्रोपपादितबादरिमतस्यैव सिद्धान्तत्वं मन्यते। अधिकं तत्रैव विशदीभविष्यति। अनेन–देवताविग्रहः, ब्रह्मविद्यायामधिकारश्च समर्थ्यते। यस्माद् देवादीनामपीन्द्रविरोचनादीनां ब्रह्मविद्यायामधिकारः श्रूयते, तस्माद् मध्वादिविद्यादृष्टान्तेन ब्रह्मविद्यानधिकारः साधयितुं न शक्यत इति सूत्रार्थः। अनेन च मध्वादिविद्यायामादित्यादीनामनधिकारे विद्यात्वं न प्रयोजकम्, किन्तु स्वोपास्यकत्वमेव; अन्यासु तु स्वानुपास्यकासु देवाद्यधिकारो न विरुद्ध इति ज्ञाप्यते। तथाच ''मध्वादिष्वसंभवादनधिकारं जैमिनिरि'' ति सूत्राभिमतो न्यायोऽप्रयोजकशङ्काकलङ्कितः। ''ज्योतिषि भावादि'' ति सूत्रोपपादितादित्यद्यचेतनत्वमप्यनेनैव सूत्रेण निरस्यते–यस्माद् देवादीनां विग्रहादिकं मन्त्रार्थवादादिप्रामाण्येन संभवति, तस्मात् तेषामधिकारः संभवतीति। तदिदमाह– *यद्यपीति*।। *शुद्धायामिति*।। उपास्यकोटौ देवाद्यमिश्रायाम्, स्वानुपास्यकविद्यायामितयर्थः। मध्वादिसूत्रानुमानेऽप्रयोजकत्वमाह– *न चेति*।। विद्यात्वस्याप्रयोजकत्वादिति भावः। देवताधिकारे

श्रुतिं दर्शयति– *तद्यो य इत्यादिना*।। अस्य सूत्रस्य ''मध्वादिषु'' इति सूत्रन्यायनिरासकतापरतया व्याख्यानानन्तरम्–''ज्योतिषि भावाच्चे'' ति सूत्रोक्तन्यायनिरासपरतया व्याख्यानमारचयति– *यदप्युक्तमित्यादिना*।। मन्त्रार्थवादादिप्रामाण्यमुपपादयति– *यदप्युक्तमित्यादिना*।। प्रमाणान्तराविरोधेऽन्यार्थस्यापि स्वार्थपरत्वमुपपादयति– *तथाहीत्यादिना*।। पदैकवाक्यतायां न प्रतीयमानसर्वार्थविवक्षा, किन्तु तात्पर्यविषयार्थस्यैव विवक्षा, वाक्यैकवाक्यतास्थले तु प्रमाणान्तराविरोधे प्रतीयमानार्थविवक्षाऽपीत्याह– *अन्नेत्यादिना*।।

लोकप्रमाणेनापि देवताविग्रहादिकं साधयति– *अपि च स्मरन्तीत्यादिना*।। अत्र जैमिनिमते देवताविग्रहाभावं सिद्धवत्कृत्यैव पूर्वपक्षप्रवर्तनात् पूर्वकाण्डदेवताधिकरणाद्विलक्षणमेवेदं देवताधिकरणम्, अतो जैमिनीयकर्मविचारेण नास्या ब्रह्ममीमांसाया एकत्वमिति गम्यते। एतेन–''कर्मकाण्डदेवताधिकरणमपि कर्मप्राशस्त्यमात्रपरम्, किमलौकिकदेवताविग्रहादिसमर्थनप्रयासेन; यथाश्रुतकर्मण एव फलपदत्वशक्तिरित्येतावतैवोक्तेन परप्रतिषेधात्, अश्रुतवेदान्तानां प्ररोचनासिद्धेश्च, सहसा च गुह्यार्थानामवचनीयत्वात्। एवं सति ब्रह्मकाण्डदेवताधिकरणैकरस्यसिद्धेरिति शतदूषण्यास्तृतीयदूषणरूपैकशास्त्र्यसमर्थनवाद उक्तम्–अपास्तम्; ऐकशास्त्र्यवादे कर्मप्राशस्त्यस्य न्यायेन व्यवस्थापनवैयर्थ्यात् तदैकरस्यासिद्धेः। अस्मन्मते तु–जैमिदिनदृष्टया नोत्तरमीमांसैव वर्तत इति नाधिकरणद्वयवैयर्थ्यम्।।

''पुराणन्यायमीमांसे'' त्यत्र मीमांसापदेनैकेन ग्रहणं तु मीमांसात्वेनैक्यगोचरमपि न मीमांसैक्यपरम्; अन्यथा शिवविष्ण्वादिपुराणानामप्येकग्रन्थतापत्तेः। अत्र पुराणमितीहासस्याप्युपलक्षणम्। तथाचेतिहासपुराणैक्यापत्तिरपि शतदूषणीमते समापतति। ततश्च–''इतिहासपुराणाभ्यां वेदं समुपबृंहयेदि'' ति सर्वसम्मततद्भेदोऽपि बाधितः स्यात्। यत्तु–तत्रैव शतदूषण्यां भाष्यवार्तिकयोरिवैकग्रन्थत्वं परस्परविरोधेऽपीत्युक्तम्; तदिदं भाष्यवार्तिकयोरिव व्याख्यानव्याख्येयभावस्यात्र जैमिनिबादरायणमतयोरभावान्नोपपद्यते। तथाच ब्रह्मविचारस्य कर्मापेक्षत्वेऽपि न कर्मविचारापेक्षत्वमिति नोक्तमीमांसाद्वयैक्यसम्भवः।।

ब्रह्मविचारस्य कर्मापेक्षायां प्रमाणं तु ''तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'' ति श्रुतिरेव। अत्र विविदिषायां वित्तौ वा कर्मणां साधनत्वं विवक्ष्यताम्। उभयथाऽपि विचारजन्यनिश्चयात्मकज्ञानस्यैव विदिधात्वर्थत्वाद् उपासनस्य तदर्थत्वाभावाद् विद्याप्रतिबन्धकमलनिबर्हणद्वारा कर्मणामुपयोगः। तत्प्रतिबन्धनिवर्तकस्यापि तदिच्छासाधनत्वेन

श्रवणं भेषजादौ बुभुक्षापिपासादिसाधनत्वेन श्रवणान्नानुपपन्नम्। एतेन–''अन्यतः करणशुद्ध्यर्थं कर्मणां विनियोग इति चेन्न्, तर्हि विविदिषासाधनत्वश्रुतिः परित्यक्ता स्यादिति शतदूषण्या विविदिषासाधनत्वभङ्गवादे षष्ठे यदुक्तम्, तदपि–निरस्तम्; भेषजस्य बुभुक्षादिसाधनताश्रवणवदुपपत्तेः।।

''अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्'' इति सूत्रमप्यत एव व्याख्यातम्। साक्षात् कर्मणां ज्ञानसाधनत्वाभावमभिप्रेत्यैव विविदिषासाधनत्वस्वीकारोऽद्वैतिनामिति नाद्वैतमते दूषणलेशोऽपि। तथाच कर्मकाण्डब्रह्मकाण्डयोर्भिन्नविषयत्वात् तद्विचारयोरपि नितरां भेद एवेत्येव देवताधिकरणद्वयनिर्देशेनावगम्यत इति निष्कर्ष इत्यलमतिविस्तरेण।।३३।। इत्यष्टमं देवताधिकरणम्।।

इति प्रदीपः देवताधिकरणम् समाप्तम्

भामती

देवर्षीणो ब्रह्मविज्ञानाधिकारचिन्ता समन्वयलक्षणेऽसङ्गतेत्यस्याः प्रासङ्गिकीं सङ्गतिं दर्शयितुं प्रसङ्गमाह *अङ्गुष्ठमात्रश्रुतिः इति*। स्यादेतद्–देवादीनां विविधविचित्रानन्दभोगभागिनां वैराग्याभावान्नार्थित्वं ब्रह्मविद्यायामित्यत आह *तत्रार्थित्वं तावन्मोक्षविषयम् इति*। क्षयातिशययोगस्य स्वर्गाद्युपभोगेऽपि भावादस्ति वैराग्यमित्यर्थः। ननु देवादीनां विग्रहाद्यभावेनेन्द्रियार्थसन्निकर्षजायाः प्रमाणादिवृत्तेरनुपपत्तेरविद्वत्तया सामर्थ्याभावेन नाधिकार इत्यत आह *तथा सामर्थ्यमपि तेषाम् इति*। यथा च मन्त्रादिभ्यस्तदवगमस्तथोपरिष्टादुपपादयिष्यते। ननु शूद्रवदुपनयनासम्भवेनाध्ययनाभावात्तेषामनधिकार इत्यत आह *न चोपनयनशास्त्रेण इति*। न खलु विधिवद् गुरुमुखाद्गृह्यमाणो वेदः फलवत्कर्मब्रह्मावबोधहेतुः, अपि त्वध्ययनोत्तरकालं निगमनिरुक्त व्याकरणादिविदितपदतदर्थसङ्गतेरधिगतशाब्दन्यायतत्त्वस्य पुंसः स्मर्य्यमाणः स च मनुष्याणामिह जन्मनीव देवादीनां प्राचि भवे विधिवदधीतीनाम् आम्नाय इह जन्मनि स्मर्य्यमाणोऽत एव स्वयं प्रतिभातो वेदः सम्भवतीत्यर्थः। न च कर्मानधिकारे ब्रह्मविद्यानधिकारो भवतीत्याह *तदपि कर्मस्वनधिकारकारणमुक्तम् इति*। वस्वादीनां हि न वस्वाद्यन्तरमस्ति, नापि भृग्वादीनां भृग्वाद्यन्तरमस्ति। प्राचां वसुभृगुप्रभृतीनां क्षीणाधिकारत्वेनेदानीं देवर्षित्वाभावादित्यर्थः।।२६।।

मन्त्रादिपदसमन्वयात्प्रतीयमानोऽर्थः प्रमाणान्तराविरोधे सत्युपेयः, न तु विरोधे। प्रमाणान्तरविरुद्धं चेदं विग्रहवत्त्वादिदेवतायाः, तस्माद्यतमानः प्रस्तर इत्यादिवदुपचरितार्थो मन्त्रादिर्व्याख्येयः। तथा च विग्रहाद्यभावाच्छब्दोपहितार्थोऽर्थोपहितो वा शब्दो देवतेत्यचेतनत्वान्नैवास्याः क्वचिदप्यधिकार इति शङ्कार्थः।

निराकरोति *न, कस्माद्? अनेकरूपप्रतिपत्तेः*। सैव कुत इत्यत आह *दर्शनात्*। श्रुतिषु स्मृतिषु च। तथा ह्येकस्यानेककायनिर्माणमदर्शनाद्वा न युज्यते बाधदर्शनाद्वा? तत्रादर्शनमसिद्धं, श्रुतिस्मृतिभ्यां दर्शनात्। न हि लौकिकेन प्रमाणेनादृष्टत्वादागमेन दृष्टमदृष्टं भवति। मा भूद्यागादीनामपि स्वर्गादिसाधनत्वमदृष्टमिति। मनुष्यशरीरस्य मातापितृसंयोगजत्व नियमात् असति

पित्रोः संयोगे कुतः संभवः? सम्भवे वाऽनग्नितोऽपि धूमः स्यादिति बाधदर्शनमिति चेत्, हन्त किं शरीरत्वेन हेतुना देवादिशरीरमपि मातापितृसंयोगजं सिषाधयिषसि। तथा चानैकान्तो हेत्वाभासः। स्वेदजोद्भिज्जानां शरीराणामतद्धेतुत्वात्। इच्छामात्रनिर्माणत्वं देहादीनामदृष्टचरमिति चेत्, न, भूतोपादानत्वेनेच्छामात्रनिर्माणत्वासिद्धेः। भूतवशिनां हि देवादीनां नानाकायचिकीर्षावशाद्भूत-क्रियोत्पत्तौ भूतानां परस्परसंयोगेन नानाकायसमुत्पादात्। दृष्टा च वशिन इच्छावशाद्वश्ये क्रिया, यथा विषविद्याविद इच्छामात्रेण विषशकलप्रेरणम्। न च विषविद्याविदो दर्शनेनाधिष्ठानदर्शनाद्व्यवहितविप्रकृष्टभूतादर्शनाद्देवादीनां कथमधिष्ठानमिति वाच्यम्। काचाभ्रपटलपिहितस्य विप्रकृष्टस्य च भौमशनैश्चरादेर्दर्शनेन व्यभिचारात्। असक्ताश्च दृष्टयो देवादीनां काचाभ्रपटलादिवन्महीमहीधरादिभिर्न व्यवधीयन्ते। न चास्मदादिवत्तेषां शरीरित्वेन व्यवहितविप्रकृष्टादिदर्शनासम्भवोऽनुमीयत इति वाच्यम्। आगमविरोधिनोऽनुमानस्योत्पादायोगात्। अन्तर्धानं चाञ्जनादिना मनुजादीनामिव तेषां प्रभवतामुपपद्यते, तेन सन्निहितानामपि न क्रतुदेशे दर्शनं भविष्यति। तस्मात् सूक्तमनेकप्रतिपत्तेरिति। *तथाहि कति देवा इत्युपक्रम्य इति*। वैश्वदेवशस्त्रस्य हि निबिदि कति देवा इत्युपक्रम्य निविदैवोत्तरं दत्तं शाकल्याय *त्रयश्च त्री च शता त्रयश्च त्री स सहस्र इति*। निविन्नाम शस्यमानदेवतासंख्यावाचकानि मन्त्रपदानि। एतदुक्तं भवति–वैश्वदेवस्य निबिदि कति देवाः शस्यमानाः प्रसंख्याता इति शाकल्येन पृष्टे याज्ञवल्क्यस्योत्तरं त्रयश्च त्री च शतेत्यादि। यावत्संख्याका वैश्वदेवनिविदि संख्याता देवास्त एतावन्त इति। पुनश्च शाकल्येन क्तमे त इति संख्येषु पृष्टेषु याज्ञवल्क्यस्योत्तरं महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति। अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रश्च प्रजापतिश्चेति त्रयस्त्रिंशद्देवाः। तत्राग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चेति वसवः। एते हि प्राणिनां कर्मफलाश्रयेण कार्यकारणसङ्घातरूपेण परिणमन्तो जगदिदं सर्वं वासयन्ति, तस्माद्वसवः। क्तमे रुद्रा इति दशमे पुरुषे प्राणाः। बुद्धिकर्मेन्द्रियाणि दश, एकादशं च मन इति। तदेतानि प्राणाः, तद्वृत्तित्वात्। ते हि प्रायणकाल उत्क्रामन्तः पुरुषं रोदयन्तीति रुद्राः। क्तम आदित्या इति द्वादशमासाः संवत्सरस्यावयवाः पुनः पुनः परिवर्तमानाः प्राणभृतामायूंषि च कर्मफलोपभोगं चादाय यन्तीत्यादित्याः। अशनिरिन्द्रः स हि बलं सा हीन्द्रस्य परमा ईशता तया हि सर्वान् प्राणिनः प्रमापयति तेन स्तनयित्नुरशनिरिन्द्रः। यज्ञः प्रजापतिरिति, यज्ञसाधनं च यज्ञरूपं च पशवः प्रजापतिः। एत एव त्रयस्त्रिंशद्देवाः षण्णामग्निपृथिवीवाय्वन्तरिक्षादित्यदिवां महिमानो न ततो भिद्यन्ते। षडेव तु देवाः। ते तु षडग्निं पृथिवीं चैकीकृत्यान्तरिक्षं वायुं चैकीकृत्य दिवं चादित्यं चैकीकृत्य त्रयो लोकास्त्रय एव देवा भवन्ति। एत एव च त्रयोऽन्नप्राणयोरन्तर्भवन्तोऽन्नप्राणौ द्वौ देवौ भवतः।

तावप्यध्यर्द्धो देव एकः। क्तमोऽध्यर्द्धः। योऽयं वायुः पवते। कथमयमेक एताध्यर्द्धः, यदस्मिन् सति सर्वमिदमध्यर्द्धाद्रवृद्धिं प्राप्नोतीति। तेनाध्यर्द्ध इति। क्तम एक इति, स एवाध्यर्द्धः प्राण एको ब्रह्म। सर्वदेवात्मत्वेन बृहत्त्वाद्ब्रह्म तदेव त्यदित्याचक्षते परोक्षाभिधायकेन शब्देन, तस्मादेकस्यैव देवस्य महिमवशाद्युगपदनेकदेवरूपतामाह श्रुतिः। स्मृतिश्च निगदव्याख्याता। अपि च पृथग्जनानामप्युपायानुष्ठानवशात्प्राप्ताणिमाद्यैश्वर्याणां युगपन्नानाकायनिर्माणं श्रूयते, तत्र कैव कथा देवानां स्वभावसिद्धानामित्याह *प्राप्ताणिमाद्यैश्वर्याणां योगिनाम् इति*। अणिमा लघिमा महिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं यत्रकामावसायितेत्यैश्वर्याणि। *अपरा व्याख्या इति*। अनेकत्र कर्मणि युगपदङ्गभावप्रतिपत्तिरङ्गभावगमनं, तस्य दर्शनात्। तदेव परिस्फुटं दर्शयितुं व्यतिरेकं तावदाह *क्वचिदेकः इति*। न खलु बहुषु श्राद्धेष्वेको ब्रह्मणो युगपदङ्गभावं गन्तुमर्हति। एकस्यानेकत्र युगपदङ्गभावमाह *क्वचिच्चैक इति*। यथैकं ब्राह्मणमुद्दिश्य युगपन्नमस्कारः क्रियते बहुभिस्तथा स्वस्थानस्थितामेकां देवतामुद्दिश्य बहुभिर्यजमानैर्नानादेशावस्थितैर्युगपद्धविस्त्यज्यते, तस्याश्च तत्रासन्निहिताया अप्यङ्गभावो भवति। अस्ति हि तस्या युगपद्विप्रकृष्टानेकार्थोपलम्भसामर्थ्यमित्युपपादितम्।।२७।।

गोत्वादिवत्पूर्वामर्शाभावादुपाधेरप्येकस्याप्रतीतेः पाचकादिवद् आकाशादिशब्दवद् व्यक्तिवचना एव वस्वादिशब्दाः तस्याश्च नित्यत्वात्तया सह सम्बन्धो नित्यो भवेत्। विग्रहादियोगे तु सावयवत्वेन वस्वादीनामनित्यत्वात्ततः पूर्वं वस्वादिशब्दो न स्वार्थेन सम्बद्ध आसीत् क्वार्थस्यैवाभावात्। ततश्चोत्पन्ने वस्वादौ वस्वादिशब्दसम्बन्धः प्रादुर्भवन् देवदत्तादिशब्दसम्बन्धवत्पुरुषबुद्धिप्रभव इति तत्पूर्वको वाक्यार्थप्रत्ययोऽपि पुरुषबुद्ध्याधीनः स्यात्। पुरुषबुद्धिश्च मानान्तराधीनजन्मेति मानान्तरापेक्षया प्रामाण्यं वेदस्य व्याहन्येतेति शङ्कार्थः। उत्तरम्-'न', "अतः प्रभवात्" वसुत्वादिजातिवाचकाच्छब्दात्तज्जातीयां व्यक्तिं चिकीर्षितां बुद्धावालिख्य तस्याः प्रभवनम्। तदिदं तत्प्रभवत्वम्। एतदुक्तं भवति–यद्यपि न शब्द उपादनकारणं वस्वादीनां ब्रह्मोपादानत्वात्, तथापि निमित्तकारणमुक्तेन क्रमेण। न चैतावता शब्दार्थसम्बन्धस्यानित्यत्वं वसुत्वादिजातेर्वा तदुपाधेर्वा यया कयाचिदाकृत्याऽच्छिन्नस्य नित्यत्वादिति। इममेवार्थमाक्षेपसमाधानाभ्यां विभजते *ननु जन्माद्यस्य यतः इति*। ते निगदव्याख्याते।

किमिदानीं स्वयम्भुवा वाङ् निर्मिता कालिदासादिभिरिव कुमारसम्भवादि, तथा च तदेव प्रमाणान्तरापेक्षवाक्यत्वादप्रामाण्यमापतितमित्यत आह *उत्सर्गोऽप्ययं वाचः सम्प्रदायप्रवर्त्तनात्मक इति*। सम्प्रदायो गुरुशिष्यपरम्परयाऽध्ययनम्। एतदुक्तं भवति–स्वयम्भुवो वेदर्कृत्वेऽपि न

कालिदासादिवत् स्वतन्त्रत्वमपि तु पूर्वसृष्ट्यनुसारेण। एतच्चास्माभिरुपपादितम्, उपपादयिष्यति चाग्रे भाष्यकार:। अपि चाद्यत्वेऽप्येतद् दृश्यते तद्दर्शनात् प्राचामपि र्क्तृणां तथाभावोऽनुमीयत इत्याह *अपि च चिकीर्षितमिति*।

आक्षिपति *किमात्मकं पुनः इति*। अयमभिसन्धिः—वाचकशब्दप्रभवत्वं हि देवानामभ्युपेतव्यम्, अवाचकेन तेषां बुद्धावनालेखनात्। तत्र न तावद् वस्वादीनां वकारादयो वर्णा वाचकास्तेषां प्रत्युच्चारणमन्यत्वेनाशक्यसङ्गतिग्रहत्वात्, अगृहीतसङ्गतेश्च वाचकत्वेऽतिप्रसङ्गात्।

अपि चैते प्रत्येकं वा वाक्यार्थमभिदधीरन् मिलिता वा? न तावत् प्रत्येकम्, एकवर्णोच्चारणानन्तरमर्थप्रत्ययादर्शनात्, वर्णान्तरोच्चारणानर्थक्यप्रसङ्गाच्च। नापि मिलिताः, तेषामेकवक्तृप्रयुज्यमानानां रूपतो व्यक्तितो वा प्रतिक्षणमपवर्गवतां मिथः साहित्यसम्भवाभावात्। न च प्रत्येकसमुदायाभ्यामन्यः प्रकारः सम्भवति। न च स्वरूपसाहित्याभावेऽपि वर्णानामाग्नेयादीनामिव संस्कारद्वारकमस्ति साहित्यमिति साम्प्रतं, विकल्पासहत्वात्। को नु खल्वयं संस्कारोऽभिमतः किमपूर्व नामाग्नेयादिजन्यमिव, किंवा भावनापरनामा स्मृतिप्रभवबीजम्। न तावत् प्रथमः कल्पः, नहि शब्दः स्वरूपतोऽङ्गतो वाऽविदितोऽविदितसङ्गतिरर्थधीहेतुरिन्द्रियवत्। उच्चरितस्य बधिरेणागृहीतस्य गृहीतस्य वाऽगृहीतसङ्गतेरप्रत्यायकत्वात्। तस्माद्विदितो विदितसङ्गतिर्विदितसमस्तज्ञापनाङ्गश्च शब्दो धूमादिवत् प्रत्यायकोऽभ्युपेयः। तथा चापूर्वाभिधानोऽस्य संस्कारः प्रत्यायनाङ्गमित्यर्थप्रत्ययात्प्रागवगन्तव्यः। न च तदा तस्यावगमोपायोऽस्ति। अर्थप्रत्ययात्तु तदवगमं समर्थयमानो दुरुत्तरमितरेतराश्रयमाविशति—संस्कारावसायादर्थप्रत्ययः, ततश्च तदवसाय इति। भावनाभिधानस्तु संस्कारः स्मृतिप्रसवसामर्थ्यमात्मनो, न च तदेवार्थप्रत्ययप्रसवसामर्थ्यमपि भवितुमर्हति। नापि तस्यैव सामर्थ्यस्य सामर्थ्यान्तरम्। न हि यैव वह्नेर्दहनशक्तिः सैव तस्य प्रकाशनशक्तिः। नापि दहनशक्तेः प्रकाशनशक्तिः। अपि च व्युत्क्रमेणोच्चरितेभ्यो वर्णेभ्यः सैवास्ति स्मृतिबीजं वासनेत्यर्थप्रत्ययः प्रसज्येत, न चास्ति। तस्मान्न कथञ्चिदपि वर्णा अर्थद्यीहेतषः, नापि तदतिरिक्तः स्फोटात्मा, तस्यानुभवानारोहात्। अर्थधियस्तु कार्य्यात्तदवगमे परस्पराश्रयप्रसङ्ग इत्युक्तप्रायम्। सत्तामात्रेण तु तस्य नित्यस्यार्थधीहेतुभावे सर्वदाऽर्थप्रत्ययोत्पादप्रसङ्गो निरपेक्षस्य हेतोः सदातनत्वात्। तस्माद्वाचकाच्छब्दाद्वाच्योत्पाद इत्यनुपपन्नमिति।

अत्राचार्य्यदेशीयमतमाह *स्फोटमित्याह इति*। मृष्यामहे न वर्णाः प्रत्यायका इति, न स्फोट इति तु न मृष्यामः। तदनुभवानन्तरं विदितसङ्गतेरर्थधीसमुत्पादात्। न च वर्णातिरिक्तस्य तस्यानुभवो

नास्ति। गौरित्येकं पदं गामानय शुक्लामित्येकं वाक्यमिति नानावर्णपदातिरिक्तैकपदवाक्यावगतेः सर्वजनीनत्वात्। न चायमसति बाधके एकपदवाक्यानुभवः शक्यो मिथ्येति वक्तुम। नाप्यौपाधिकः। उपाधिः खल्वेकधीग्राह्यता वा स्यात्, एकार्थधीहेतुता वा? न तावदेकधीगोचराणां धवखदिरपलाशानामेकनिर्भासः प्रत्ययः समस्ति। तथा सति धवखदिरपलाशा इति न जातु स्यात्। नाप्येकार्थधीहेतुता, तद्धेतुत्वस्य वर्णेषु व्यासेधात्। तद्धेतुत्वेन तु साहित्यकल्पनेऽन्योन्याश्रयप्रसङ्गः– साहित्यात्तद्धेतुत्वं तद्धेतुत्वाच्च साहित्यमिति। तस्मादयमवाधितोऽनुपाधिश्च पदवाक्यगोचर एकनिर्भासो वर्णातिरिक्तं वाकमेकमवलम्बते स स्फोट इति, तं च ध्वनयः प्रत्येकं व्यञ्जयन्तोऽपि न द्रागित्येव विशदयन्ति, येन द्रागर्थधीः स्यात्। अपि तु रत्नतत्त्वज्ञानवद् यथास्वं द्वित्रिचतुष्पञ्चषड्दर्शनजनितसंस्कारपरिपाकसचिवचेतोलब्धजन्मनि चरमे चेतसि चकास्ति विशदं पदवाक्यतत्त्वमिति प्रागुत्पन्नायास्तदनन्तरमर्थधिय उदय इति नोत्तरेषामानर्थक्यं ध्वनीनाम्। नापि प्राचां, तदभावे तज्जनितसंस्कारतत्परिपाकाभावेनानुग्रहाभावात्। अन्त्यस्य चेतसः केवलस्याजनकत्वात्। न च पदप्रत्ययवत् प्रत्येकमव्यक्तामर्थधियमाधास्यन्ति प्राञ्चो वर्णाः, चरमस्तु तत्सचिवः स्फुटतरामिति युक्तम्। व्यक्ताव्यक्तावभासिताया: प्रत्यक्षज्ञाननियमात्। स्फोटज्ञानस्य च प्रत्यक्षत्वात्। अर्थधियस्त्वप्रत्यक्षाया मानान्तरजन्मनो व्यक्त एवोपजनो न वा स्यान्न पुनरस्फुट इति न समः समाधिः। तस्मान्नित्यः स्फोट एव वाचको न वर्णा इति।

तदेतदाचार्य्यदेशीयमतं स्वमतमुपपादयन्नपाकरोति *वर्णा एव तु शब्दः इति*। एवं हि वर्णातिरिक्तः स्फोटोऽभ्युपेयेत, यदि वर्णानां वाचकत्वं न सम्भवेत्, स चानुभवपद्धतिमध्यसीत। द्विधा चावाचकत्वं वर्णानां, क्षणिकत्वेनाशक्यसङ्गतिग्रहत्वाद्वा, व्यस्तसमस्तप्रकारद्वया-भावाद्वाऽऽस्थीयते। न तावत्प्रथमः कल्पः, वर्णानो क्षणिकत्वे मानाभावात्। ननु वर्णानां प्रत्युच्चारणमन्यत्वं सर्वजनप्रसिद्धम्। न, प्रत्यभिज्ञानानुभवविरोधात्। न चासत्यप्येकत्वे ज्वालादिवत्सादृश्यनिबन्धनमेतत् प्रत्यभिज्ञानमिति साम्प्रतम्। सादृश्यनिबन्धनत्वमस्य बलवद्बाधकोपनिपाताद्वाऽऽस्थीयेत, क्वचिज्ज्वालादौ व्यभिचारदर्शनाद्वा? तत्र क्वचिद्व्यभिचारदर्शनेन तदुत्प्रेक्षायामुच्यते वृद्धैः स्वतः प्रामाण्यवादिभिः–

उत्प्रेक्षेत हि यो मोहादज्ञातमपि बाधनम्।

स सर्वव्यवहारेषु संशयात्मा क्षयं व्रजेत॥ इति।

प्रपञ्चितं चैतदस्माभिर्न्यायकणिकायाम्। न चेदं प्रत्यभिज्ञानं गत्वादिजातिविषयं, न गादिव्यक्तिविषयं, तासां प्रतिनरं भेदोपलम्भात्। अत एव शब्दंभेदोपलम्भाद्वक्तृभेद

उन्नीयते–सोमशर्माऽधीते न विष्णुशर्मेति युक्तम्। यतो बहुषु गकारमुच्चारयत्सु निपुणमनुभवः परीक्ष्यताम्। यथा कालाक्षीं च स्वस्तिमतीं चेक्षमाणस्य व्यक्तिभेदप्रथायां सत्यामेव तदनुगतमेकं सामान्यं प्रथते, तथा किं गकारादिषु भेदेन प्रथमानेष्वेव गत्वमेकं तदनुगतं चकास्ति, किं वा यथा गोत्वमाजानत एकं भिन्नदेशपरिमाणसस्थानव्यक्त्युपधानभेदाद्भिन्नदेशमिवाल्पमिव महदिव दीर्घमिव वामनमिव तथा गव्यक्तिराजानत एकाऽपि व्यञ्जकभेदात्तद्धर्मानुपातिनीव प्रथत इति भवन्त एव विदाङ्कुर्वन्तु। तत्र गग्यक्तिभेदमङ्गीकृत्यापि यो गत्वस्यैकस्य परोपधानभेदकल्पनाप्रयासः स वरं गव्यक्तावेवास्तु किमन्तर्गडुना गत्वेनाभ्युपेतेन। यथाहुः–

तेन यत्प्रार्थ्यते जातेस्तद्वर्णादेव लप्स्यते।
व्यक्तिलभ्यं तु नादेभ्य इति गत्वादिधीर्वृथा॥

न च स्वस्तिमत्यादिवद् गव्यक्तिभेदप्रत्ययः स्फुटः प्रत्युच्चारणमस्ति। तथा सति दश गकारानुदचारयच्चैत्र इति प्रत्ययः स्यात्, न स्याद् दशकृत्व उदचारयद् गकारमिति। न चैष जात्यभिप्रायोऽभ्यासो यथा शतकृत्वस्तित्तिरीनुपायुङ्क्त देवदत्त इति। अत्र हि सोरस्ताडं क्रन्दतोऽपि गकारादिव्यक्तौ लोकस्योच्चारणाभ्यासप्रत्ययस्याविनिवृत्तेः। चोदकः प्रत्यभिज्ञानबाधकमुत्थापयति *कथं ह्येकस्मिन् काले बहूनामुच्चारण्यताम् इति*। यद्युगपद्विरुद्धधर्मसंसर्गवत् तन्नाना। यथा गवाश्वादिद्विंशफैकशफकेशरगलकम्बलादिमान्। युगपदुदात्तादिविरुद्धधर्मसंसर्गवांश्चायं वर्णः, तस्मान्नाना भवितुमर्हति। न चोदात्तादयो व्यञ्जकधर्माः, न वर्णधर्मा इति साम्प्रतम्। व्यञ्जका ह्यस्य वायवः। तेषामश्रावणत्वे कथं तद्धर्माः श्रावणाः स्युः। इदं तावदत्र वक्तव्यं, न हि गुणगोचरमिन्द्रियं गुणिनमपि गोचरयति, मा भूवन् घ्राणसनश्रोत्राणां गन्धरसशब्दगोचराणां तद्वन्तः पृथिव्युदकाकाशा गोचराः। एवं च मा नाम भूद्वायुगोचरं श्रोत्रम्। तद्गुणांस्तूदात्तादीन् गोचरयिष्यति। ते च शब्दासंसर्गाग्रहात् शब्दधर्मत्वेनाध्यवसीयन्ते। न च शब्दस्य प्रत्यभिज्ञानावधृतैक्त्वस्य स्वरूपत उदात्तादयो धर्माः परस्परविरोधिनोऽपर्यायेण सम्भवन्ति। तस्माद्यथा मुखस्यैकस्य मणिकृपाणदर्पणाद्युपधानवशान्नानादेशपरिमाणसंस्थानभेदविभ्रमः, एवमेकस्यापि वर्णस्य व्यञ्जकध्वनिनिबन्धनोऽयं विरुद्धनानाधर्मसंसर्गविभ्रमः, न तु स्वाभाविको नानाधर्मसंसर्गः, इति स्थितेऽभ्युपेत्य परिहारमाह भाष्यकारः *अथवा ध्वनिकृतः इति*। अथवेति पूर्वपक्षं व्यावर्त्तयति। भवेतां नाम गुणगुणिनावेकेन्द्रियग्राह्यौ, तथाप्यदोषः। ध्वनीनामपि शब्दवच्छावणत्वात्। ध्वनिस्वरूपं प्रश्नपूर्वकं वर्णेभ्यो निष्कर्षयति *कः पुनरयम् इति*। न चायमनिर्द्धारितविशेष-वर्णत्वसामान्यमात्रप्रत्ययो न तु वर्णातिरिक्ततदभिव्यञ्जकध्वनिप्रत्यय इति साम्प्रतम्। तस्यानुनासिक्तवादिभेदभिन्नस्य गादिव्यक्तिवत्प्रत्यभिज्ञानाभावादप्रत्यभिज्ञायमानस्य चैक्तवाभावेन

सामान्यभावानुपपत्तेः। तस्मादवर्णात्मको वैष शब्दः शब्दातिरिक्तो वा ध्वनिः शब्दव्यञ्जकः श्रावणोऽभ्युपेयः। उभयथापि चाक्षु व्यञ्जनेषु च तत्तद्ध्वनिभेदोपधानेनानुनासिक्तवादयोऽवगम्यमानास्तद्धर्मा एव शब्दे प्रतीयन्ते न तु स्वतः शबदस्य धर्माः। तथा च येषामनुनासिक्तवादयो धर्माः परस्परविरुद्धा भासन्ते भवतु तेषां ध्वनीनामनित्यता। नहि तेषु प्रत्यभिज्ञानमस्ति। येषु ते वर्णेषु प्रत्यभिज्ञानं न तेषामनुनासिक्तवादयो धर्मा इति नानित्याः। *एवं च सति सालम्बना इति*। यद्येष परस्याग्रहो धर्मिण्यगृह्यमाणे तद्धर्मा न शक्या ग्रहीतुमिति। एवं नामास्तु तथा तुष्यतु परस्तथाप्यदोष इत्यर्थः। तदनेन प्रबन्धेन क्षणिक्तवेन वर्णानामशक्यसङ्गतिग्रहतया यदवाचक्तवमापादितं वर्णानां तदपाकृतम्। व्यस्तसमस्तप्रकारद्वयासम्भवेन तु यदासञ्जितं तन्निराचिकीर्षुराह *वर्णेभ्यश्चार्थप्रतीतेः इति*। कल्पनाममृष्यमाण एकदेश्याह *न कल्पयामि इति*। निराकरोति *न, अस्या अपि बुद्धेः इति*। निरूपयतु तावद् गौरित्येकं पदमिति धियमायुष्मान्। किमियं पूर्वानुभूतान्, गकारादीनेव सामस्त्वेनावगाहते, किं वा गकाराद्यतिरिक्तं गवयमिव वराहादिभ्यो विलक्षणम्? यदि गकारादिविलक्षणमवभासयेत्, गकारादिरूषितः प्रत्ययो न स्यात्। न हि वराहधीर्महिषरूषितं वराहमवगाहते। पदतत्त्वमेकं प्रत्येकमभिव्यञ्जयन्तो ध्वनयः प्रयत्नभेदभिन्नाः तुल्यस्थानकरणनिष्पाद्यतयाऽन्योन्यविसदृशतत्तत्पदव्यञ्जकध्वनिसादृश्येन स्वव्यञ्जनीयस्यैकस्य पदतत्त्वस्य मिथो विसदृशानेकपदसादृश्यान्यापादयन्तः सादृश्योपधानभेदादेकमप्यभागमपि नानेव भागवदिव भासयन्ति मुखमिवैकं नियतवर्णपरिमाणस्थानसंस्थानभेदमपि मणिकृपाणदर्पणादयोऽनेकमनेकवर्णपरिमाणस्थानसंस्थान भेदम्। एवञ्च कल्पिता एवास्य भागा वर्णा इति चेत्, तत्किमिदानीं वर्णभेदानसत्यपि बाधके मिथ्येति वक्तुमध्यवसितोऽसि? एकधीरेव नानात्वस्य वाधिकेति चेत्, हन्तास्यां नाना वर्णाः प्रथन्त इति नानात्वावभास एवैक्तवं कस्मान्न वाधते। अथवा वनसेनादिबुद्धिवदेक्तवनानात्वे न विरुद्धे। नो खलु सेनावनबुद्धी गजपदातितुरगादीनां चम्पकाशोककिंशुकादीनाञ्च भेदमपबाधमाने उदीयेते, अपि तु भिन्नानामेव सतां केनचिदेकेनोपाधिनाऽवच्छिन्नानामेक्तवमापादयतः। न चौपाधिकेनैक्तवेन स्वाभाविकं नानात्वं विरुध्यते, नह्यौपचारिकमग्नित्वं माणवकस्य स्वाभाविकनरत्वविरोधि। तस्मात्प्रत्येकवर्णानुभव- जनितभावनानिचयलब्धजन्मनि निखिलवर्णावगाहिनि स्मृतिज्ञान एकस्मिन् भासमानानां वर्णानां तदेकविज्ञानविषयतया वैकार्थधीहेतुतया वैक्त्वमौपचारिकमवगन्तव्यम्। न चैकार्थधीहेतुत्वेनैक्त्वमेक्तवेन चैकार्थधीहेतुभाव इति परस्पराश्रयम्। नह्यर्थप्रत्ययात् पूर्वमेतावन्तो वर्णा एकस्मृतिसमारोहिणो न प्रथन्ते। न च तत्प्रथानन्तरं वृद्धस्यार्थधीर्नोन्नीयते, तदुन्नयनाच्च तेषामेकार्थधियं प्रति कारकत्वमेकमवगम्यैकपदत्वाध्यवसानमिति नान्योन्याश्रयम्। न चैकस्मृतिसमारोहिणां

क्रमाक्रमविपरीतक्रमप्रयुक्तानामभेदो वर्णानामिति यथाकथञ्चित् प्रयुक्तेभ्य एतेभ्योऽर्थप्रत्ययप्रसङ्ग इति वाच्यम्, उक्तं हि–

यावन्तो यादृशा ये च पदार्थप्रतिपादने।
वर्णाः प्रज्ञातसामर्थ्यास्ते तथैवावबोधकाः॥ इति।

ननु पङ्क्तिबुद्धावेकस्यामक्रमायामपि वास्तवी शालादीनामस्ति पङ्क्तिरिति तथैव प्रथा युक्ता, न च तथेह वर्णानां नित्यानां विभूनां चास्ति वास्तवः क्रमः, प्रत्ययोपाधिस्तु भवेत्, स चैक इति कुतस्त्यः क्रम एषामिति चेत्, न; एकस्यामपि स्मृतौ वर्णरूपवत्क्रमवत्पूर्वानुभूततापरामर्शात्। तथाहि–जाराराजेति पदयोः प्रथयन्त्योः स्मृतिधियोस्तत्त्वेऽपि वर्णानां क्रमभेदात्पदभेदः स्फुटतरं चकास्ति। तथा च नाक्रमविपरीतक्रमप्रयुक्तानामविशेषः स्मृतिबुद्धावेकस्यां वर्णानां क्रमप्रयुक्तानाम्। यथाहुः–

पदावधारणोपायान् बहूनिच्छन्ति सूरयः।
क्रमन्यनातिरिक्तत्वस्वरवाक्यश्रुतिस्मृतीः॥ इति।

शेषमतिरोहितार्थम्। दिङ्मावमत्र सूचितं, विस्तरस्तु तत्त्वबिन्दावvavगन्तव्य इति। अलं वा नैयायिकैर्विवादेन, सन्त्वनित्या एव वर्णास्तथापि गत्वाद्यवच्छेदेनैव सङ्गतिग्रहोऽनादिश्च व्यवहारः सेस्यतीत्याह *अथापि नाम इति*॥२८॥

ननु प्राच्यामेव मीमांसायां वेदस्य नित्यत्वं सिद्धं तत् किं पुनः साध्यत इत्यत आह *स्वतन्त्रस्य कर्तुरस्मरणादेव हि स्थिते वेदस्य नित्यत्वे इति*। नह्यनित्याज्जगदुत्पत्तुमर्हति तस्याप्युत्पत्तिमत्त्वेन सापेक्षत्वात्। तस्मान्नित्यो वेदो जगदुत्पत्तिहेतुत्वाद्, ईश्वरवदिति सिद्धमेव नित्यत्वमनेन दृढीकृतम्। शेषमतिरोहितार्थम्॥२९॥

शङ्कापदोत्तरत्वात् सूत्रस्व शङ्कापदानि पठति *अथापि स्याद् इति*। अभिधानाभिधेयाविच्छेदे हि सम्बन्धनित्यत्वं भवेत्। एवमध्यापकाध्येतृपरम्पराविच्छेदे वेदस्य नित्यत्वं स्यात्। निरन्वयस्य तु तु जगतः प्रविलयेऽत्यन्तासतश्चापूर्वस्योत्पादेऽभिधानाभिधेयावत्यन्तमुच्छिन्नाविति किमाश्रयः सम्बन्धः स्यात्? अध्यापकाध्येतृसन्तानविच्छेदे च किमाश्रयो वेदः स्यात्? न च जीवास्तद्वासनावासिताः सन्तीति वाच्यम्, अन्तःकरणाद्युपाधिकल्पिता हि ते तद्विच्छेदे न स्थातुमर्हन्ति। न च ब्रह्मणस्तद्वासना, तस्य विद्यात्मनः शुद्धस्वभावस्य तदयोगात्। ब्रह्मणश्च सृष्ट्यादावन्तःकरणादयस्तदवच्छिन्नाश्च जीवाः प्रादुर्भवन्तो न पूर्वकर्माविद्यावववासनावन्तो

भवितुमर्हन्ति, अपूर्वत्वात्। तस्माद्विरूद्धमिदं शब्दार्थसम्वन्धवेदनित्यत्वं सृष्टिप्रलयाभ्युपगमेनेति। अभिधातृग्रहणेनाध्यापकाध्येतारावुक्तौ। शङ्कां निराकर्त्तुं सूत्रमवतारयति *तत्रेदमभिधीयते समाननामरूपत्वाद् इति*, यद्यपि महाप्रलयसमये नान्तः करणादयः समुदाचरदृवृत्तयः सन्ति, तथापि स्वकारणेऽनिर्वाच्यायामविद्यायां लीनाः सूक्ष्मेण शक्तिरूपेण कर्मविक्षेपकाविद्यावांसनाभिः सहावतिष्ठन्त एव। तथा च स्मृतिः–

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्।
अप्रतर्क्यमविज्ञेयं प्रसुपतर्मिव सर्वतः॥ इति।

ते चावधिं प्राप्य परमेश्वरेच्छाप्रचोदिताः, यथा कूर्मदेहनिलीनान्यङ्गानि ततो निःसरन्ति, यथा वा वर्षापाये प्राप्तमृद्भावानि मण्डूकशरीराणि तद्वासनावासिततया घनघनाघनासारावसेकसुहितानि पुनर्मण्डूकदेहभावमनुभवन्ति। तथा· पूर्ववासनावशात्पूर्वसमाननामरूपाण्युत्पद्यन्ते। एतदुक्तं भवति–यद्यपीश्वरात्प्रभवः संसारमण्डलस्य, तथापीश्वरः प्राणभृत्कर्माविद्यासहकारी तदनुरूपमेव सृजति। न च सर्गप्रलयप्रवाहस्यानादितामन्तरेणैतदुपपद्यते इति सर्गप्रलयाभ्युपगमेऽपि संसारानादिता न विरुध्यत इति। तदिदमुक्तम् *उपपद्यते, चाप्युपलभ्यते च आगमत इति*। स्यादेतद्–भवत्वनादिता संसारस्य, तथापि महाप्रलयान्तरिते कुतः स्मरणं वेदानामित्यत आह *अनादौ च संसारे यथा स्वापप्रबोधयोः इति*। यद्यपि प्राणमात्रावशेषताततन्निःशेषते सुषुप्तप्रलयावस्थयोर्विशेषः, तथापि कर्मविक्षेपसंस्कारसहितलयलक्षणाविद्यावशेषतासाम्येन स्वापप्रलयावस्थयोरभेद इति द्रष्टव्यम्। ननु नापर्य्यायेण सर्वैषां सुषुप्तावस्था, केषाञ्चित्तदा प्रबोधात्, तेभ्यश्च सुप्तोत्थितानां ग्रहणसम्भवात् प्रायणकालविप्रकर्षयोश्च वासनोच्छेदकारणयोरभावेन सत्यां वासनायां स्मरणोपपत्तेः शब्दार्थसम्बन्धवेदव्यवहारानुच्छेदो युज्यते। महाप्रलयस्त्वपर्य्यायेण प्राणभृन्मात्रवर्ती प्रायणकालविप्रक्रर्षौ च तत्र संस्कारमात्रोच्छेदहेतू स्तः, इति कुतः सुषुप्तवत्पूर्वप्रबोधव्यवहारवदुत्तरप्रबोधव्यवहार इति चोदयति *स्यादेतत् स्वापः इति*। परिहरति *नैष दोषः। सत्यपि व्यवहारोच्छेदिनि इति*। अयमभिसन्धिः–न तावत्प्रायण-कालविप्रकर्षौ सर्वसंस्कारोच्छेदकौ, पूर्वाभ्यस्तस्मृत्यनुसन्धानाज्जातस्य हर्षभयशोकसम्प्रतिपत्तेः। मनुष्यजन्मवासनानां चानेकजात्यन्तरसहस्रव्यवहितानां पुनर्मनुष्यजातिसंवर्तकेन कर्मणाऽभिव्यक्तय-भावप्रसङ्गात्। तस्मान्निकृष्टधियामपि यत्र सत्यपि प्रायणकालविप्रकर्षादौ पूर्ववासनानुवृत्तिः, तत्र कैव कथा परमेश्वरानुग्रहेणं धर्मज्ञानवैराग्यैश्वर्य्यातिशयसम्पन्नानां हिरण्यगर्भप्रभृतीनां महाधियाम्। यथा वा आ च मनुष्येभ्य आ च कृमिभ्यो ज्ञानादीनामनुभूयते निकर्षः। एवमा मनुष्येभ्य एवा च भगवतो हिरण्यगर्भाज्ज्ञानादीनां प्रकर्षोऽपि सम्भाव्यते। तथा च तदभिवदन्तो वेदस्मृतिवादाः

प्रामाण्यमप्रत्यूहमश्नुवते। एवं चात्र भवतां हिरण्यगर्भादीनां परमेश्वरानुगृहीतानामुपपद्यते कल्पान्तरसम्बन्धिनिखिलव्यवहारानुसन्धानमिति। सुगममन्यत्।

स्यादेतत्–अस्तु कल्पान्तरव्यवहारानुसन्धानं तेषामस्यां तु सृष्टावन्य एव वेदाः, अन्य एव चैषामर्थाः, अन्य एव वर्णाश्रमाः। धर्माच्चानर्थोऽर्थश्चाधर्मात्। अनर्थश्चेप्सितोऽर्थश्चानीप्सितोऽपूर्वत्वात् सर्गस्य। तस्मात्कृतमत्र कल्पान्तरव्यवहारानुसन्धानेन, अकिञ्चित्करत्वात्। तथा च पूर्वव्यवहारोच्छेदाच्छब्दार्थसम्बन्धश्च वेदश्चानित्यौ प्रसज्येयातामित्यत आह *प्राणिनां च सुखप्राप्तये इति*। यथावस्तुस्वभावसामर्थ्यं हि सर्गः प्रवर्तते, न तु स्वभावसामर्थ्यमन्यथयितुमर्हति। न हि जातु सुखं तत्त्वेन जिहास्यते, दुःखं चोपादित्स्यते। न च जातु धर्माधर्मयोः सामर्थ्यविपर्य्ययो भवति, न हि मृत्पिण्डात् पटः, घटश्च तन्तुभ्यो जायते। तथा सति वस्तुसामर्थ्यनियमाभावात् सर्व सर्वस्माद्भवेदिति पिपासुरपि दहनमाहृत्य पिपासामुपशमवेत्, शीतार्तो वा तोयमाहृत्य शीतार्तिमिति। तेन सृष्टयन्तरेऽपि ब्रह्महत्यादिरनर्थहेतुरेवार्थहेतुश्च यागादिरित्यानुपूर्व्यं सिद्धम्।

एवं च य एव वेदा अस्मिन् कल्पे त एव कल्पान्तरे त एव चैषामर्थास्त एव च वर्णाश्रमाः। दृष्टसाधर्म्यसम्भवे तद्वैधर्म्यकल्पनमनुमानागमविरुद्धम्।

आगमाश्चेह भूयांसो भाष्यकारेण दर्शिताः।
श्रुतिस्मृतिपुराणाख्यास्तद्व्याकोपोऽन्यथा भवेत्॥

तस्मात् सुष्ठूक्तं *समाननामरूपत्वाच्चावृत्तावपि अविरोध इति*। 'अग्निर्वा अकामयत' इति भाविनीं वृत्तिमाश्रित्य यजमान एवाग्निरुच्यते। नह्यग्नेर्देवतान्तरमग्निरस्ति।।३०।।

ब्रह्मविद्यास्वधिकारं देवर्षीणां ब्रुवाणः प्रष्टव्यो जायते–किं सर्वासु ब्रह्मविद्यास्वविशेषेण सर्वेषां किंवा कासुचिदेव केषाञ्चित्? यद्यविशेषेण सर्वासु, ततो मध्वादिविद्यास्वसम्भवः। *कथम्? असौ वाऽऽदित्योदेवमध्वित्यत्र हि मनुष्या आदित्यं मध्वध्यासेनोपासीरन्*। उपास्योपसकभावो हि भेदाधिष्ठानो न स्वात्मन्यादित्यस्य देवतायाः सम्भवति। न चादित्यान्तरमस्ति। प्राचामादित्यानामस्मिन् कल्पे क्षीणाधिकारत्वात्। *पुनश्चादित्यव्यपाश्रयाणि पञ्च रोहितादीन्युपक्रम्य इति*। अयमर्थः–असौ वा आदित्यो देवमध्विति देवानां मोदनान्मध्विव मधु। भ्रामरमधुसारूप्यमाहास्य श्रुतिः। 'तस्य मधुनो द्यौरेव तिरश्चीनवंशः। अन्तरिक्षं मध्वपूपः'। आदित्यस्य हि मधुनोऽपूपः पटलमन्तरिक्षमाकांश तत्रावस्थानात्। यानि च सोमाज्यपयः प्रभृतीन्यग्नौ हूयन्ते तान्यादित्यरश्मिभिरग्निसंवलितैरुत्पन्नपाकान्यमृतीभावमापन्नान्यादित्यमण्डलमृङ्मन्त्रमधुपैर्नीयन्ते। यथा हि भ्रमराः पुष्पेभ्य आहृत्य मकरन्दं

स्वस्थानमानयन्त्येवमृङ्मन्त्रभ्रमराः प्रयोगसमवेतार्थस्मारणादिभिर्ऋग्वेदबिहितेभ्यः कर्मकुसुमेभ्य आहृत्य तन्निष्पन्नमकरन्दमादित्यमण्डलं लोहिताभिरस्य प्राचीनरश्मिनाडीभिरानयन्ति, तदमृतं वसव उपजीवन्ति। अथास्यादित्यमधुनो दक्षिणाभिः रश्मिनाडीभिः शुक्लाभिर्यजुर्वेदविहितकर्मकुसुमेभ्य आहृत्याग्नौ हुतं सोमादि पूर्ववदमृतभावमापन्नं यजुर्वेदमन्त्रभ्रमरा आदित्यमण्डलमानयन्ति, तदेतदमृतं रुद्रा उपजीवन्ति। तथास्यादित्यमधुनः प्रतीचीभी रश्मिनाडीभिः कृष्णाभिः सामवेदविहित-कर्मकुसुमेभ्य आहृत्याग्नौ हुतं सोमादिपूर्ववदमृतभावमापन्नं साममन्त्रस्तोत्रभ्रमरा आदित्यमण्डल-मानयन्ति, तदमृतमादित्या उपजीवन्ति। अथास्यादित्यमधुन उदीचीभिरतिकृष्णाभिः रश्मिनाडी-भिरथर्ववेदविहितेभ्यः कर्मकुसुमेभ्य आहृत्याग्नौ हुतं सोमादिपूर्ववदमृतभावमापन्नमथर्वाङ्गिरस-मन्त्रभ्रमरा, तथाश्वमेधवाचः स्तोमकर्मकृसुमाकदितिहासपुराणमन्त्रभ्रमरा आदित्यमण्डलमानयन्ति। अश्वमेधे वाचःस्तोमे च पारिप्लवं शंसन्तीति श्रवणादितिहासपुराणमन्त्राणामप्यस्ति प्रयोगः। तदमृतं मरुत उपजीवन्ति। अथास्य या आदित्यमधुन ऊर्ध्वा रश्मिनाड्यो गोप्यास्ताभिरुपासनभ्रमराः प्रणवसुमादाहृत्यादित्यमण्डलमानयन्ति, तदमृतमुपजीवन्ति साध्याः। ता एता आदित्यव्यपाश्रयाः पञ्च रोहितादयो रश्मिनाडय ऋगादिसम्बद्धाः क्रमेणोपदिश्येति योजना। एतदेवामृतं दृष्ट्वोपलभ्य यथास्वं समस्तैः करणैर्यशस्तेजइन्द्रियसाकल्यवीर्यान्नाद्यान्यमृतं तदुपलभ्यादित्ये तृप्यन्ति। तेन खल्वमृतेन देवानां वस्वादीनां मोदनं विदधदादित्यो मधुः। एतदुक्तं भवति—न केवलमुपास्योपासकभाव एकस्मिन् विरुध्यते, अपितु ज्ञातृज्ञेयभावश्च प्राप्यप्रापकभावश्चेति। *तथाग्निः पादः इति*। अधिदैवतं खल्वाकाशे ब्रह्मदृष्टिविधानार्थ मुक्तम्। आकाशस्य हि सर्वगतत्वं रूपादिहीनत्वं च ब्रह्मणा सारूप्यं, तस्य चैतस्याकाशस्य ब्रह्मणश्चत्वारः पादा अग्न्यादयोऽग्निः पाद इत्यादिना दर्शिताः। यथा हि गोः पादा न गवा वियुज्यन्ते, एवमग्न्यादयोऽपि नाकाशेन सर्वगतेनेत्याकाशस्य पादास्तदेवमाकाशस्य चतुष्पदो ब्रह्मदृष्टिं विधाय स्वरूपेण वायुं संवर्गगुणकमुपास्यं विधातुं महीकरोति। *वायुर्वाव संवर्गः* तथा स्वरूपेणवादित्यं ब्रह्मदृष्टयोपास्य विधातुं महीकरीति *आदित्यो ब्रह्मेत्यादेशः* उपदेशः। अतिरोहितार्थमन्यत्॥३१॥

यद्युच्येत नाविशेषेण सर्वेषां देवर्षीणां सर्वासु ब्रह्मविद्यास्वधिकारः किन्तु यथासम्भवमिति। तत्रेदमुपतिष्ठते ज्योतिषि भावाच्च लौकिकौ ह्यादित्यादिशब्दप्रयोगप्रत्ययौ ज्योतिर्मण्डलादिषु दृष्टौ न चैतेषामस्ति चैतन्यं, नह्येतेषु देवदत्तादिवत्तदनुरूपा दृश्यन्ते चेष्टाः। *स्यादेतन्मन्त्रार्थवादेतिहास-पुराणलोकेभ्य इति*। तत्र जगृभ्माते दक्षिणमिन्द्रहस्तमिति च, काशिरिन्द्र इदिति च। काशिर्मुष्टिः। तथा 'तुविग्रीवो वपोदरः सुबाहुरन्धसो मदे। इन्द्रो वृत्राणि जिघ्नते' इति विग्रहवत्त्वं देवताया

मन्त्रार्थवादा अभिवदन्ति। तथा हविर्भोजनं देवताया दर्शयन्ति। अद्धीन्द्र पिब च प्रस्थितस्येत्यादयः। तथेशनाम्–'इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत्पर्वतानाम्। इन्द्रो वृधाम् इन्द्र इन्मेधिराणामिन्द्रः क्षेमें योगे हव्य इन्द्रः' इति। तथा 'ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुष' इति। तथा वरिवसितारं प्रति देवतायाः प्रसादं प्रसन्नायाश्च फलदानं दर्शयति आहुतिभिरेव देवान् हुतादः प्रीणाति तस्मै प्रीता इषमूर्ज च यच्छन्ति' इति। 'तृप्त एवैनमिंन्द्रः प्रजया पशुांभस्तर्पयति' इति च। धर्मशास्त्रकारा अप्याहुः–

ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः। इति।

पुराणवचांसि च भूयांसि देवताविग्रहादिपञ्चकप्रपञ्चमाचक्षते। लौकिका अपि देवताविग्रहादिपञ्चकं स्मरन्ति चोपचरन्ति च। तथाहि–यमं दण्डहस्तमालिखन्ति, वरुणं पाशहस्तम्, इन्द्रं वज्रहस्तम्। कथयन्ति च देवता हविर्भुज इति। तथेशनामिमामाहुः–देवग्रामो देवक्षेत्रमिति। तथास्याः प्रसादं च प्रसन्नायाश्च फलदानमाहुः–प्रसन्नोऽस्य पशुपतिः पुत्रोऽस्य जातः। प्रसन्नोऽस्य धनदो धनमनेन लब्धमिति। तदेतत् पूर्वपक्षी दूषयति *नेत्युच्यते। न हि तावल्लोको नाम इति*। न खलु प्रत्यक्षादिव्यतिरिक्तो लोको नाम प्रमाणान्तरमस्ति, किन्तु प्रत्यक्षादिमूला लोकप्रसिद्धिः सत्यतामश्नुते, तदभावे त्वन्धपरम्परावन्मूलाभावाद्विप्लवते। न चात्र विग्रहादौ प्रत्यक्षादीना-मन्यतममस्ति प्रमाणम्। न चेतिहासादिमूलं भवितुमर्हति तस्यापि पौरुषेयत्वेन प्रत्यक्षाद्यपेक्षणात्। प्रत्यक्षादीनां चात्राभावादित्याह *इतिहासपुराणमपि इति*। ननूक्तं मन्त्रार्थवादेभ्यो विग्रहादिपञ्चक-प्रसिद्धिरित्यत आह *अर्थवादा अपि इति*। विध्युद्देशेनैकवाक्यतामापद्यमाना अर्थवादा विधिविषयप्राशस्त्यलक्षणापरा न स्वार्थे प्रमाणं भवितुमर्हन्ति। 'यत्परः शब्दः स शब्दार्थ' इति हि शाब्दन्यायविदः, प्रमाणान्तरेण तु यत्र स्वार्थोऽपि समर्प्यते यथा वायोः क्षेपिष्ठत्वम्। तत्र प्रमाणान्तरवशात्सोऽभ्युपेयते न तु शब्दसामर्थ्यात्। यत्र तु न प्रमाणान्तरमस्ति यथा विग्रहादिपञ्चके सोऽर्थः शब्दादेवावगन्तव्यः। अतत्परश्च शब्दो न तद्वगमयितुमलमिति तदवगमायास्य तत्रापि तात्पर्यमभ्युपेतव्यम्। न चैकं वाक्यमुभयपरं भवतीति, वाक्यं भिद्येत। न च सम्भवत्येकवाक्यत्वे वाक्यभेदो युज्यते। तस्मात्प्रमाणान्तरानधिगताविग्रहादिमत्ताऽन्यपराच्छब्दादवगन्तव्येति मनोरथमात्र-मित्यर्थः। मन्त्राश्च व्रीह्यादिवच्छ्रुत्यादिभिस्तत्र तत्र विनियुज्यमानाः प्रमाणभावाननुप्रवेशिनः कथमुपयुज्यन्तां तेषु तेषु कर्मस्वित्यपेक्षायां दृष्टे प्रकारे सम्भवति नादृष्टकल्पनोचिता। दृष्टश्च प्रकारः प्रयोगसमवेतार्थस्मरणं, स्मृतवा चानुतिष्ठन्ति खल्वनुष्ठातारः पदार्थान्। औत्सर्गिकी चार्थपरता पदानामित्यपेक्षितप्रयोगसमवेतार्थस्मरणतात्पर्य्याणां मन्त्राणां नानधिगते विग्रहादावपि तात्पर्य्य युज्यत

इति न तेभ्योऽपि तत्सिद्धिः। तस्माद् देवताविग्रहवत्तादिभावग्राहकप्रमाणाभावात् प्राप्ता षष्ठप्रमाणगोचरतास्येति प्राप्तम्॥३२॥

एवं प्राप्तेऽभिधीयते—भावन्तु वादरायणोऽस्ति हि—

तुशब्दः पूर्वपक्षं व्यावर्त्तयति इत्यादि, *भूतधातोरादित्यादिध्वचेतनत्वमभ्युपगम्यते* इत्यन्तमतिरोहितार्थम्। *मन्त्रार्थवादादिव्यवहाराद् इति*। आदिग्रहणेनेतिहासपुराणधर्मशास्त्राणि गृह्यन्ते। मन्त्रादीनां व्यवहारः प्रवृत्तिस्तस्य दर्शनादिति। पूर्वपक्षमनुभाषते। *यदप्युक्तम् इति*। एकदेशिमतेन तावत्परिहरति *अत्र ब्रूमः इति*। तदेतत् पूर्वपक्षिणमुत्थाप्य दूषयति *अत्राह* पूर्वपक्षी। शाब्दी खल्वियं गतिः। यत्तात्पर्य्याधीनवृत्तित्वं नाम नह्यन्यपरः शब्दोऽन्यत्र प्रमाणं भवितुमर्हति। नहि शिवत्रिनिर्णेजनपरं श्वेतो धावतीति वाक्यम्, इतः सारमेयवेगवद्गमनं गमयितुमर्हति। न च नञ्वति महावाक्येऽवान्तरावाक्यार्थो विधिरूपः शक्योऽवगन्तुम्। न च प्रत्ययमात्रात्सोऽप्यर्थोऽस्य भवति, तत्प्रत्ययस्य भ्रान्तत्वात। न पुनः प्रत्यक्षादीनामियं गतिः। नह्युदकारणार्थिना घटदर्शनापोन्मीलितं चक्षुर्घटपटौ वा पटं वा केवलं नोपलभते। तदेवमेकदेशिनि पूर्वपक्षिणा दूषिते परमसिद्धान्तवाद्याह *अत्रोच्यते। विषम उपन्यासः इति*। अयमभिसन्धिः—लोके विशिष्टार्थप्रत्यायनाय पदानि प्रयुक्तानि तदन्तरेण न स्वार्थमात्रस्मरणे पर्यवस्यन्ति। नहि स्वार्थस्मरणमात्राय लोके पदानां प्रयोगो दृष्टपूर्वः। वाक्यार्थे तु दृश्यते। न चैतान्यस्मारितस्वार्थानि साक्षाद्वाक्यार्थ प्रत्याययितुमीशते इति स्वार्थस्मारणं वाक्यार्थमितयेऽवान्तरव्यापारः कल्पितः पादानाम्। न च यदर्थं यत् तत् तेन विना पर्यवस्यतीति न स्वार्थमात्राभिधानेन पर्यवसानं पदानाम्। न च नञ्वति वाक्ये विधानपर्यवसानम्। तथा सति नञ्पदमनर्थकं स्यात्। यथाहुः—

साक्षाद्यद्यपि कुर्वन्ति पदार्थप्रतिपादनम्।
वर्णास्तथापि नैतस्मिन् पर्यवस्यन्ति निष्फले॥

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम्।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम्॥ इति।

सेयमेकस्मिन्वाक्ये गतिः। यत्र तु वाक्यस्यैकस्य वाक्यान्तरेण सम्बन्धस्तत्र लोकानुसारतो भूतार्थव्युत्पत्तौ च सिद्धायामेकैकस्य वाक्यस्य तत्तद्विशिष्टार्थप्रत्यायनेन पर्यवसितवृत्तिनः पश्चात् कुतश्चिद्धेतोः प्रयोजनान्तरापेक्षायामन्वयः कल्प्यते। यथा 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयति वायव्यं श्वेतमालभेत' इत्यत्र। इह हि यदि न

स्वाध्यायाध्ययनविधिः स्वाध्यायशब्दवाच्यं वेदराशिं पुरुषार्थतामनेष्यत्ततो भूतार्थमात्रपर्यवसितार्थवादा विध्युद्देशेन नैकवाक्यतामगमिष्यन्। तस्मात् स्वाध्यायविधिवशात् कैमर्थ्याकाङ्क्षायां वृत्तान्तादिगोचराः सन्तस्तत्प्रत्यायनद्वारेण विधेयप्राशस्त्यं लक्षयन्ति, न पुनरविवक्षितस्वार्था एव तल्लक्षणे प्रभवन्तिः, तथा सति लक्षणैव न भवेत्। अभिधेयाविनाभावस्य तद्बीजस्याभावात्। अत एव गङ्गायां घोष इत्यत्र गङ्गाशब्दः स्वार्थसम्बद्धमेव तीरं लक्षयति न तु समुद्रतीरं, तत्कस्य हेतोः स्वार्थप्रत्यासत्त्यभावात्। न चैतत्सर्व स्वार्थाविवक्षायां कल्पते। अत एव यत्र प्रमाणान्तरविरुद्धार्था अर्थवादा दृश्यन्ते, यथादित्यो वै यूपो यजमानः प्रस्तर इत्येवमादयः। तत्र यथा प्रमाणान्तराविरोधः यथा च स्तुत्यर्थता तदुभयसिद्ध्यर्थ गुणवादस्त्विति च तत्सिद्धिरिति चासूत्रयज्जैमिनिः। तस्माद्यत्र सोऽर्थोऽर्थवादानां प्रमाणान्तरविरुद्धस्तत्र गुणवादेन प्राशस्त्यलक्षणेति लक्षित लक्षणा। यत्र तु प्रमाणान्तरसंवादस्तत्र प्रमाणान्तरादिवार्थवादादपि सोऽर्थः प्रसिध्यति। द्वयोः परस्परानपेक्षयोः प्रत्यक्षानुमानयोरिवैकत्रार्थे प्रवृत्तेः। प्रमात्रपेक्षया त्वनुवादत्वं, प्रमाता ह्यव्युत्पन्नः प्रथमं यथा प्रत्यक्षादिभ्योऽर्थमवगच्छति न तत्राम्नायतस्तत्र व्युत्पत्त्याद्यपेक्षत्वात्, न तु प्रमाणापेक्षया द्वयोः स्वार्थेऽनपेक्षत्वादित्युक्तम्। नन्वेवं मानान्तरविरोधेऽपि कस्माद् गुणवादो भवति यावता शब्दविरोधे मनान्तरमेव कस्मान्न बाध्यते। वेदान्तैरिवाद्वैतविषयैः प्रत्यक्षादयः प्रपञ्चगोचराः कस्माद्वार्थवादवद्वेदान्ता अपि गुणवादेन न नीयन्ते। अत्रोच्यते—लोकानुसारतो द्विविधो हि विषयः शब्दानाम्, द्वारतश्च तात्पर्यतश्च। यथैकस्मिन् वाक्ये पदानां पदार्था द्वारतो वाक्यार्थश्च तात्पर्यतो विषयः। एवं वाक्यद्वयैकवाक्यतायामपि यथेयं देवदत्तीया गौः क्रेतव्येत्येकं वाक्यमेषा बहुक्षीरेत्यपरं, तदस्य बहुक्षीरत्प्रतिपादनं द्वारम्। तात्पर्य्य तु क्रेतव्येति वाक्यान्तरार्थे। तत्र यद् द्वारतस्तत्प्रमाणान्तरविरोधेऽन्यथा नीयते। यथा विषं भक्षयेति वाक्यं माऽस्य गृहे भुङ्क्ष्वेति वाक्यान्तरार्थपरं सत्। यत्र तु तात्पर्य्य तत्र मानान्तरविरोधे पौरुषेयमप्रमाणमेव भवति। वेदान्तास्तु पौर्वापर्य्यपर्य्यालोचनया निरस्तसमस्तभेदप्रपञ्चब्रह्मप्रतिपादनपरा अपौरुषेयतया स्वतः सिद्धतात्त्विकप्रमाणभावाः सन्तस्तात्त्विकप्रमाणभावात् प्रत्यक्षादीनि प्रच्याव्य सांव्यावहारिके तस्मिन् व्यवस्थापयन्ति। न चादित्यो वै यूप इति वाक्यमादित्यस्य यूपत्वप्रतिपादनपरमपि तु यूपस्तुतिपरम्। तस्मात्प्रमाणान्तरविरोधे द्वारभूतो विषयो गृणवादेन नीयते, यत्र तु प्रमाणान्तरं विरोधकं नास्ति यथा देवताविग्रहादौ तत्र द्वारतोऽपि विषयः प्रतीयमानो न शक्यस्त्यक्तुम्। न च गुणवादेन नेतुं, को हि मुख्ये सम्भवति गौणमाश्रयेदतिप्रसङ्गात्। तथा सत्यनधिगतं विग्रहमपि प्रतिपादयद् वाक्यं भिद्येतेति चेत्। अद्धा भिन्नमेवैतद्वाक्यं, तथा सति तात्पर्य्यभेदोऽपीति चेत्, न, द्वारतोऽपि तदवगतौ तात्पर्यान्तरकल्पनाया अयोगात्। न च यत्र यस्य न तात्पर्य्य तस्य तत्राप्रामाण्यं तथा सति विशिष्टपरं वाक्यं विशेषणेष्वप्रमाणमिति विशिष्टपरमपि न स्यात्, विशेषणाविषयत्वात्। विशिष्टविषयत्वेन तु

तदाक्षेपेपरस्पराश्रयत्वम्। आक्षेपाद्विशेषणप्रतिपत्तौ सत्यां विशिष्टविषयत्वं विशिष्टविषयत्वाच्च तदाक्षेपः। तस्माद्विशिष्टप्रत्ययपरेभ्योऽपि पदेभ्यो विशेषणानि प्रतीयमानानि तस्यैव वाक्यस्य विषयत्वेनानिच्छताप्यभ्युपेयानि यथा, तथान्यपरेभ्योऽप्यर्थवादवाक्येभ्यो देवताविग्रहादयः प्रतीयमाना असति प्रमाणान्तरविरोधे न युक्तास्त्युक्तुं, न हि मुख्यार्थसम्भवे गुणवादो युज्यते। न च भूतार्थमप्यपौरुषेयं वचो मानान्तरापेक्षं स्वार्थे येन मानान्तरासम्भवे भवेदप्रमाणमित्युक्तम्।

स्यादेतत्–तात्पर्य्यैक्येऽपि यदि वाक्यभेदः कथं तर्ह्यर्थैक्तवादेकं वाक्यम्। न, तत्र तत्र यथास्वं तत्तत्पदार्थविशिष्टैकपदार्थप्रतीतिपर्य्यवसानसम्भवत्। स तु पदार्थान्तरविशिष्टः पदार्थ एकः क्वचिद् द्वारभूतः क्वविद् द्वारभूतः क्वचिद् द्वारीत्येतावान् विशेषः।

नन्वेवं सत्योदनं भुकत्वा ग्रामं गच्छतीत्यत्रापि वाक्यभेदप्रसङ्गः। अन्यो हि संसर्ग ओदनं भुक्तवेति, अन्यस्तु ग्रामं गच्छतीति। न एकत्र प्रतीतेरपर्य्यवसानाद्, भुक्तवेति हि समानकर्तृक्ता पूर्वकालता च प्रतीयते। न चेयं प्रतीतिरपरकालक्रियान्तरप्रत्ययमन्तरेण पर्य्यवस्यति। तस्माद्यावति पदसमूहे पदाहिताः पदार्थस्मृतयः पर्य्यवस्यन्ति तावदेकं वाक्यम्। अर्थवादवाक्ये चैताः पर्य्यवस्यन्ति, विनैव विधिवाक्यं विशिष्टार्थप्रतीतेः। न च द्वाभ्यां द्वाभ्यां पदाभ्यां विशिष्टार्थप्रत्ययपर्य्यवसानात् पञ्चषट्पदवति वाक्ये एकस्मिन्नानात्वप्रसङ्गः। नानात्वेऽपि विशेषणानां विशेष्यस्यैकत्वात्, तस्य च सकृच्छ्रुतस्य प्रधानभूतस्य गुणभूतविशेषणानुरोधेनावर्त्तनायोगात्। प्रधानभेदे तु वाक्यभेद एव। तस्माद्विधिवाक्यादर्थवादावाक्यमन्यदिति वाक्ययोरेव स्वस्ववाक्यार्थप्रत्ययावसितव्यापारयोः पश्चात् कुतश्चिदपेक्षायां परस्परान्वयं इति सिद्धम्।

अपि च विधिभिरेवेन्द्रादिदैवत्यानि इति। देवतामुद्दिश्य हविरवमृश्य च तद्विषयस्वत्वत्याग इति यागशरीरम्। न च चेतस्यनालिखिता देवतोद्देष्टुं शक्या, न च रूपरहिता चेतसि शक्यते आलेखितुमिति यागविधिनैव तद्रूपापेक्षिणा यादृशमन्यपरेभ्योऽपि मन्त्रार्थवादेभ्यस्तद्रूपमवगतं तदभ्युपेयते। रूपान्तरकल्पनायां मानाभावात्। मन्त्रार्थवादयोरत्यन्तपरोक्षवृत्तिप्रसङ्गाच्च। यथा हि 'व्रात्यो व्रात्यस्तोमेन यजेत' इति व्रात्यस्वरूपापेक्षायां 'यस्य पिता पितामहो वा सोमं न पिबेत् स व्रात्य' इति सिद्धवद् व्रात्यस्वरूपमबगतं व्रात्यस्तोमविध्यपेक्षितं सद्विधिप्रमाणकं भवति, यथा वा स्वर्गस्वरूपमलौकिकं स्वर्गकामो यजेतेति विधिनापेक्षितं सदर्थवादतोऽवगम्यमानं विधिप्रमाणकम्, तथा देवतारूपमपि। ननूद्देशो रूपज्ञानमपेक्षते न पुनः रूपसत्तामपि, देवतायाः समारोपेणापि च रूपज्ञानमुपपद्यते इति समारोपितमेव रूपं देवतायाः मन्त्रार्थवादैरुच्यते। सत्यं, रूपज्ञानमपेक्षते। तच्चान्यतोऽसम्भवान्मन्त्रार्थवादेभ्य एव, तस्य तु रूपस्यासति बाधकेऽनुभवारूढं तथाभावं परित्यज्यान्यथात्वमननुभूयमानमसाम्प्रतं कल्पयितुम्। तस्माद्विध्यपेक्षितमन्त्रार्थवादैरन्यपरैरपि देवतारूपं

बुद्धावुपनिधीयमानं विधिप्रमाणकमेवेति युक्तम्। स्यादेतत्—विध्यपेक्षायामन्यपरादपि वाक्यादवगतोऽर्थः स्वीक्रियते, तदपेक्षैव तु नास्ति, शब्दरूपस्य देवताभावात्, तस्य च मानान्तरवेद्यत्वादित्यत आह *न च शब्दमात्रम् इति*। न केवलं मन्त्रार्थवादतो विग्रहादिसिद्धिरपि त्वितिहासपुराणलोकस्मरणेभ्यो मन्त्रार्थवादमूलेभ्यो वा प्रत्यक्षादिमूलेभ्यो वेत्याह *इतिहास इति*। *शिलष्यते* युज्यते। निगदव्याख्यातमन्यत्। तदेवं मन्त्रार्ववादादिसिद्धे देवताविग्रहादौ गुर्वादिपूजाबद् देवतापूजात्मको यागो देवताप्रसादाविद्वारेण सफलोऽवकल्पते अचेतनस्य तु पूजामप्रतिपाद्यमानस्य तदनुपपत्तिः। न चैवं यज्ञकर्मणो देवतां प्रति गुणभावाद् देवतातः फलोत्पादे यागभावनायाः श्रुतं फलवत्त्वं यागस्य च तां प्रति तत्फलांशं वा प्रति श्रुतं करणत्वं हातव्यम्। यागभावनायां एव हि फलवत्या यागलक्षणस्वकरणावान्तरव्यापारत्वाद् देवताभोजनप्रसादादीनां कृषिकर्मण इव तत्तदवान्तरव्यापारस्य सस्याधिगमसाधनत्वम्। आग्नेयादीनामिवोत्पत्तिपरमापूर्वावान्तरव्यापाराणां भवन्मते स्वर्गसाधनत्वम्। तस्मात् कर्मणोऽपूर्वावान्तरव्यापारस्य वा देवताप्रसादावान्तरव्यापरास्य वा फलवत्त्वात् प्रधानत्वमुभयस्मिन्नपि पक्षे समानम्, न तु देवाताया दिग्रहादिमत्याः प्राधान्यमिति न धर्ममीमांसायाः सूत्रमपि वा शब्दपूर्वत्वाद्यज्ञकर्म प्रधानं गुणत्वे देवताश्रुतिरिति विरुध्यते। तस्मात्सिद्धो देवतानां प्रायेण ब्रह्मविद्यास्वधिकारः।।३३।।

इति भामती देवताधिकरणम् समाप्तम्

श्री कण्ठभाष्य

देवानां विग्रहादिमत्त्वे विरोधमाशङ्क्य परिहरति–

।।सू।। विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्।।२६।।

नानादेशप्रवृत्तेषु यज्ञेषु तत्रतत्राहूतानां देवानां विग्रहादिमत्त्वे सर्वत्र युगपत् सान्निध्यं वाच्यम्। तन्न युज्यते। ततः कर्मणि विरोध इति चेत्–न शङ्क्यमेतत्। विग्रहवत्त्वेऽपि सौभरिप्रभृतिषु युगपदनेकदेहप्रतिपत्तिर्दृष्टा। ततो न कश्चिद्विरोधः।।

मा भूत्कर्मणि विरोधः, वैदिकशब्दे भवतीत्यत आह–

।।सू।। शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्।।२७।।

कर्मणि विरोधाभावेऽपि वैदिकशब्दे विरोधः प्रसज्यते। कथम्। देवानां सावयवत्वादनित्यत्वं सहजमेव।

तत इन्द्रादिदेवानामपि उत्पत्तिरनिवार्या। तथात्वे तदुत्पत्तेः प्राक् तद्विनाशात् परतश्च वैदिकेन्द्रादिशब्दानामर्थशून्यत्वमनित्यत्वं वा स्यात्। अनित्यत्वेऽपि पौरुषयेत्वने विधिनिषेधवाक्यानामप्रामाण्यम्। अतस्तत्प्रयुक्तकर्मणां चासिद्धिरित्यनेकानर्थापत्तिः। ततो वैदिकशब्दविरोधस्य परिहाराय विग्रहवत्त्वं देवानामनङ्गीकार्यमिति चेत्–न, अतो वैदिकादेव इन्द्रादिशब्दात् इन्द्राद्यर्थसृष्टेः। यदीन्द्रादिशब्दा व्यक्तिवाचकाः स्युः तदा खल्विन्द्रादिशब्दार्थनाशे तेषामर्थशून्यत्वमनित्यत्वं वा स्यात्। गवादिशब्दवत् आकृतिवाचकत्वमेवेन्द्रादिशब्दानामुच्यते। तथा च-यथा कुलालो घटादिशब्दात् मनसि विपरिवर्तमानं तत्तदाकारं स्मृत्वा घटादिकं सृजति, तथा पूर्वस्मिन्निन्द्रादौ विनष्टे वैदिकादिन्द्रादिशब्दात् ब्रह्मा पूर्वेन्द्राद्याकृतिविशेषं स्मृत्वा तदाकारमपरमिन्द्रादिकं सृजति। तत इन्द्रादिव्यक्तिविनाशेऽपि तत्तदाकृतेरविनाशेन शब्दानां नित्यत्वादविरोधः। किं प्रमाणमिति चेत्–श्रुतिः स्मृतिश्च। तथाहि 'वेदेन रूपे व्यकरोत्। सतासती प्रजापतिः।' 'स भूरिति व्याहरत्। स भूमिमसृजत' इत्यादिः श्रुतिः।। 'सर्वेषां च स नामानि कर्माणि च पृथक्पृथक्। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे'।। इत्यादिः स्मृतिः।।

।सू॥ अत एव च नित्यत्वम् ॥२८॥

अत एव 'मन्त्रकृतो वृणीते' 'विश्वामित्रस्य सूक्तं भवति' इति विश्वामित्रादीनां मन्त्रकृत्त्वेऽपि विश्वामित्रादिशब्दानामाकृतिनिमित्तत्वेन मन्त्राब्राह्मणमयस्य वेदस्य नित्यत्वमुपपद्यते। यतो ब्रह्मा वैदिकात् शब्दात् अंर्थ स्मृत्वा सृजति। अनधीतमन्त्रादिदर्शनशक्तत्वात्। तथा च पूर्वविश्वामित्रादीनामाकृतिविशेषांस्तत्तद्वैदिकशब्दैः स्मृत्वा तदाकारानेवापरान् तत्तच्छक्तिविशेषयुक्तान् ब्रह्मा नैमित्तिके प्रलये गते सृजति। ते चानधीत्यैव तान् मन्त्रानखिलान् पठन्ति। अतस्तेषां मन्त्रादिकर्तृत्वं वेदनित्यत्वं च॥

भवत्वेवं नैमित्तिकप्रलये, प्राकृतप्रलये ब्रह्मादौ वेदाख्यशब्दे च विनष्टे कथं वेदनित्यत्वमित्यत आह–

।सू०॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च॥२९॥

सृज्यानां समाननामरूपत्वादेव प्राकृतप्रलयावृत्तावप्यविरोधः। तथा हि सर्वज्ञः सर्वशक्तिः विश्वाधिकः परमेश्वर आदिकर्ता पूर्वप्रपञ्चसंस्थानं स्मृत्वा तदाकारमेव पुनः प्रपञ्चं सृजति। वेदानपि पूर्वानुपूर्वीविशिष्टान् अनुस्मृत्य पुत्रश्रूताय ब्रह्मणे प्रयच्छति। कथमवगम्यते? श्रुत्या स्मृत्या च। 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो सुवः॥' 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै'॥ इत्यादिः श्रुतिः। स्मृतिरपि 'अप एव ससर्जादौ तासु वीर्यमवासृजत्। तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्॥ तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः। ब्रह्माणं विदधे पूर्वं वेदानस्मै प्रयच्छति॥' इत्यादिः। ततः प्राकृतप्रलयावृत्तावपि वेदानां नित्यत्वमेव॥ मतान्तरमाह–

।सू०॥ मध्वादिष्वसंभवादनधिकारं जैमिनिः॥३०॥

मधुविद्यादिषु वस्वादिदेवानामेवोपास्यत्वात् (वसुत्वादीनामेव) प्राप्यत्वाच्च वस्वादीनां कर्तृकर्मभावविरोधेनोपास्यत्वासंभवात् वस्वादीनां सतां वस्वादित्वं प्राप्तमिति प्राप्यत्वासंभवाच्च तत्र वस्वादीनामनधिकारं जैमिनिर्मन्यते॥

।सू॥ ज्योतिषि भावाच्च॥३१॥

'तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्' इति ज्योतिषि परब्रह्मणि देवानां साधारण्येन प्राप्तत्वेऽपि अधिकारभाववचनादन्यत्र मध्वाद्युपासनेऽनधिकारो न्यायसिद्धोऽवगम्यते॥ स्वमतमाह–

।सू॥ भावं तु बादरायणोऽस्ति हि॥३२॥

मधुविद्यादिष्वपि वस्वादीनामधिकारभावं बादरायणो मन्यते। अस्ति हि वस्वादीनां सतां वस्ववस्थब्रह्मण उपास्यत्वसंभवः, कल्पान्तरे वसुत्वादेः प्राप्यत्वसंभवश्च। कार्यकारणोभयावस्थं

ब्रह्मात्र समुपास्यम्। तत्र 'असौ वा आदित्यो देवमधु'इत्यारभ्य आदित्यवस्वादिनामरूपकृत्ययुक्तकार्यविशेषावस्थं ब्रह्मोपास्यमुपदिश्यते। 'अथ तत ऊर्ध्व उदेत्यनेनैवोदेतां नास्तमेता' इत्यादिना नामरूपकृत्यरहितसूक्ष्मादित्यान्तरात्मतयाऽवस्थितं कारणावस्थं ब्रह्मोपास्यमुपदिश्यते। तदुभयावस्थब्रह्मोपासनफलं कल्पान्तरे वस्वादित्वम्, उभयाधिकारावसाने ब्रह्मप्राप्तिश्च तत्र 'स य एतदेवममृतं वेद वसूनामेवैको श्रूत्वा अग्निनैव मुखेनैतदेवामृतं दृष्टवा तृप्यति' इत्यादिना वस्वादित्वरूपं फलमुपदिश्यते, 'न ह वा अस्मा उदेति न निम्नोचति सकृद्धि वा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद' इति ब्रह्मप्राप्तिरूपं फलमुपदिश्यते। ततो मध्वादिष्वपि देवानामधिकारोऽस्तीति। तस्मात् सर्वथा देवा ब्रह्मविद्याधिकारिण इति।। इति देवाधिकरणम्।।७।।

अथ अपशूद्राधिकरणम्।।८।।

अथ 'मनुष्याधिकारत्वात्' इति सामान्येन मनुष्याणामधिकारे प्राप्ते विशेषमाह-

।।सू।। शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि।।३३।।

छान्दोग्ये श्रूयतेऽस्य विषयः 'आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथ' इति।। अत्राचार्यः शिष्यं शूद्रेत्यामन्त्रयत। अतः शूद्राणामपि ब्रह्मविद्यायामधिकारोऽस्ति न वेति संदेहः।। तेषामधिकारोऽस्ति, अर्थित्वादिसंभवात्। न च त्रैवर्णिकानामेवेति नियमः ; अत्रैवर्णिकानामपि देवानां तद्दर्शनात्। देवानामुपनयनाध्ययनाभावेऽपि स्वयंभातवेदार्थतया युज्यते विद्वत्ता, कथमेषामिति न शङ्क्यम्। एषामपि पुराणश्रवणादिना बोधोपपत्तेः, निषादस्थपरितन्यायेन महावाक्यग्रहणेऽधिकारसंभवाञ्च। तस्मादमीषामधिकारो ब्रह्मविद्यायामुचितः।। इति प्राप्ते ब्रूमः—नास्ति शूद्राणां ब्रह्मविद्यायामधिकारः, तेषामध्ययनाश्रावेन तदुपायशूतोपास्यतद्गुणादिज्ञानासंभवात्। इतिहासपुराणानि वेदोपबृंहणं कुर्वन्त्येवोपायभावमनुभवन्ति, न स्वातन्त्र्येण। शूद्राणामितिहासपुराणश्रवणानुज्ञानं तु पापक्षयफलम्। विदुरधर्मव्याधादीनां जन्मान्तरसिद्धज्ञानाप्रमोषात् ब्रह्मनिष्ठता। कथं ब्रह्मविद्योपादेशे शूद्रेत्यामन्त्रणमिति चेत् नात्र जातियोगेन शूद्रेत्यामन्त्रणम्, किंतु ब्रह्मज्ञानाप्राप्त्या शुगस्य संजातेति दर्शनात्। शुगस्य संजातेति च तदनादरश्रवणात् ब्रह्मविद्यावैकल्येन स्वात्मानं प्रति हंसोक्तानादरवाक्यश्रवणात् तदैवाचार्य प्रत्याद्रवणाञ्च सूच्यते। हिशब्दो हेतौ। यतः शूद्रेत्यामन्त्रणं न जातियोगेन ततः शूद्रस्य ब्रह्मोपासनं नास्तीति।।

इति श्री कण्ठभाष्य देवताधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

देवानामर्थित्वसामर्थ्यादिसम्भवासम्भवो संशयकोट्योर्बीजमित्यभिप्रेत्य संशयं दर्शयति–**इहेति। विग्रहाभावादिति।** न तावद्देवतानां विग्रहे प्रत्यक्षादि प्रमाणमस्ति। न च देवतावाचिशब्दानां लौकिकवैदिकप्रयोगेषु स्त्रीप्रत्ययतद्धितप्रकृतितया प्रातिपदिकत्वेनार्थवत्त्वावश्यंभावात्तत्सिद्धिः। तेष्वादित्यादिग्रहवाचिनामश्विन्यादिनक्षत्रवाचिनामन्येषां च केषाञ्चिदचेतैर्नगगनपरिदृश्यमानज्योतिर्मण्डलरूपैरर्थैरर्थवत्त्वसम्प्रतिपत्तेः। नक्षत्रेष्टियाज्यानुवाक्यासु क्वापिक्वचिदि'न्द्रो ज्येष्ठामनुनक्षत्रमेति' इत्यादौ ज्येष्ठादिनक्षत्राणामिन्द्रादिदेवताभेदनिर्देशस्य नक्षत्रपदवाच्यलौकिकतेजोविशेषत्वदेवतापदवाच्यालौकिकहविरुद्देश्यत्वात्मकरूपभेदेनोपपत्तेः। सोऽयं गकार इति प्रत्यभिज्ञालम्बितसर्वविधगकाराभेदानुसारेण द्वावेतौ गकारौ तारेण मन्दोऽभिभूतः तारान्मन्दोऽन्य इत्यादिभेदप्रत्ययानामौपाधिकरूपभेदविषयत्वसयाङ्गीकृतत्वेन तद्वदिहापि सम्भवात्। अन्येषां च लोकवेदप्रसिद्धदेवतावाचिपदानां नक्षत्रयुक्तज्योतिर्मण्डलगत्वे क्वचित्क्वचिन्नक्षत्रे इन्द्रादिपदवर्तनसम्भवात्। इन्द्राण्यादिशब्दानां नक्षत्रविशेषवाचितया पुंविशेषयुक्तस्त्रीवाचित्वाभावेऽपि हिमानीयवानीशब्दवत् स्त्रीप्रत्ययान्तत्वसम्भवात् 'पृथिव्यापोग्निर्वायुरन्तरिक्षं विद्युदोषधयो वनस्पतयः पुष्पाणि फलान्यहोरात्रौ प्राची प्रतीची मनश्चित्त' मित्यादिकर्मविशेषविनियुक्तदेवतावाचिपदानां लोकवेदप्रसिद्ध्यनुसारेण प्रसिद्धेषु मृदादिष्विव वृत्तेश्च। तस्मादादित्यादिपदसामर्थ्यान्न विग्रहादिमद्देवतासिद्धिः। नापि यागविधीनां 'यज देवपूजाया'मिति स्मरणेन देवताराधनरूपत्वात् देवताराधनानां च राजाराधनवत् आराधनप्रसन्नाराधनीयदेयसकलार्थत्वनियमात् तत्सिद्धिः। तन्नियमाभावात्। राज्ञश्शिशवस्तत्पादुकादयश्च राजभृत्यैरुपचितोपचारेण पूज्यन्ते। ज्योतिष्टोमे सोमलता पयोऽन्ननिवेदनेन पूज्यते। शिवपूजायां पूजोपकरणादयो गन्धपुष्पादिभिः पूज्यन्ते। न हि तेषां फलदातृत्वमस्ति। यद्युच्यते राजकुमारादीनामुपचारो राजादीनामेव पूजा तेषां च फलदातृत्वमस्तीति नास्ति नियमविरोध इति तदा ऋतुषु देवानामिज्या तत्तद्वर्णाश्रमाचारादिरूपाज्ञाप्रवर्तकस्य परमेश्वरस्यैव पूजा तस्य च फलदातृत्वमस्तीति नास्माकमपि नियमविरोधः। अवश्यं च

पितृमातृगुरुभर्त्रतिथिवित्तजातिवयः कर्मविद्यावृद्धादिपूजासु दर्शपूर्णमासेष्टया: दर्शपूर्णमासशब्दितागन्यादिदैवत्येकयागविकारेषु सौर्यादिषु अनतिदेश्यत्वेन च स्वीकृतयोः पार्वणहोमयोरश्वमेधे मेध्यस्याश्वगुणक्रियाङ्गान्युद्दिश्य 'कृष्णाय स्वाहा श्वेताय स्वाहा यच्छकृत्करोति तस्मै स्वाहा दभ्द्यः स्वाहा दनूभ्यां स्वाहे'त्यादिमन्त्रैः क्रियमाणेषु होमेषु सामगानामुद्वाहकर्मण्युदुह्यमानां कन्यामुद्दिश्य रेखासन्धिषु 'पक्ष्म'स्वित्यादिमन्त्रैः क्रियमाणेषु होमेषु तिर्यग्जन्मगतानपि मृतानुद्दिश्य क्रियमाणेषु श्राद्धेषु कल्पावसानानुद्दिष्टभाविकल्पभोग्यफलयोगादिषु च एषैव गतिराश्रयणीया नान्या गतिरस्ति। तस्मान्न यागविधिसामर्थ्याद्विग्रहवद्देवतासिद्धिः। नापि 'यदाग्नेयोऽष्टाकपाल' इत्यादिष्वग्न्यादीनां भोज्येन पुरोडाशादिना सम्बन्धो योग्यतया भोक्तृत्वमेव भोक्तृत्वे च तदुपपादको विग्रहः स्वीकर्तव्य इत्येवं द्रव्यदेवतादिसम्बन्धसामर्थ्यात्तत्सिद्धिः। भोज्यभोक्तृभावरूपसम्बन्धस्य पुरुषेणानुष्ठातुमशक्यस्य विध्यगोचरत्वात्। यथाविधि तत्तद्देवतावाचिशब्दोच्चारणपूर्वकत्यागविषयत्वरूपस्य तयोः परम्परासम्बन्धस्यैव विधेयत्वात् शब्दोच्चारणेनैव पुरुषेणानुष्ठातुं शक्यस्य विध्यर्हत्वात्। यत एवं द्रव्यत्यागसमयेषु तत्तद्विधिश्रुतदेवतावाचिशब्दोच्चरण एव विधिपर्यवसानं न देवतायां द्रव्यस्य तत्सम्बन्धे वा। अतएवाग्न्यादियागकालेष्वग्न्यादिशब्दपर्याया नोच्चार्यन्ते। अन्यथोद्देश्यदेवतास्मृतिमात्रार्थत्वे कदाचिदिच्छया पर्याया अपि प्रयुज्येरन्। यद्युच्येत विध्युपात्तदेवतावाचिशब्दस्य बुद्धिसन्निहितस्य त्यागे कारणाभावात् स एव यागकाले प्रयुज्यत इति तथाप्य'ग्न्ये पावकाय पुरोडाश'मित्यादिविधिविहितयागानुष्टाने द्वयोरग्निवाचकपदयोः प्रयोगो न स्यात्। एकेनाप्यर्थस्मृतिसिद्धेः। अतो विधिवाक्यश्रुतयावद्देवतावाचिशब्दोच्चारणविधिबलादेव स नियमो निर्वाह्यः। तस्मान्न द्रव्यदैवतसम्बन्धविधिसामर्थ्याद्विग्रहवद्देवतासिद्धिः। नापि प्रगीताप्रगीतमन्त्रसाध्यगुणवचनरूपस्तोत्रशस्त्रविधिसामर्थ्यात्तत्सिद्धिः। न हि गुणवचनं देवतानां राज्ञामिवाराधनरूपम्। येनाराध्यमानानां देवतानां राज्ञामिव फलदातृत्वं कल्पनीयमिति तदर्थं विग्रहवत्त्वमपि कल्पनीयं स्यात्। अचेतनत्वेऽपि हि सोमलताया बहिष्पवमानस्तोत्रे तदभिषवसाधनानां ग्राव्णां ग्रावस्तुतिरुपलभ्यते। किं च द्वादशाहे 'प्रजापतिं परिवदन्ती'ति विधाना'दकुशलो वा अयं प्रजापतिर्यो दंशमशकान्ससृजे यः स्तेना'नित्यादीन्प्रजापतिपरिवादानधीयते। तत्र तत्प्रीत्यर्थं किं त्वदृष्टार्थमित्येवोपपादनीयम्। एवमपि स्तुतशस्त्रादिगानस्यादृष्टार्थत्वोपपत्तौ कः प्रीत्यर्थतायामाग्रहः। नापि हविःप्रदानसमये हविरुद्देश्यभूतंदेवताह्वानतद्ध्यानयोर्दृष्ट प्रयोजनभूतहविःस्वीकरणार्थत्वस्य कल्पनीयत्वेन तदाह्वानध्यानविधिसामर्थ्यात् विग्रहवद्देवतासिद्धिः। विहितस्थलेष्वाहवीनायादिषु प्रक्षिप्तानां हविषां तत्रैव भस्मीभावादिदर्शनेन पितृनुद्दिश्य त्यक्तानां हविषां निमन्त्रितब्राह्मणभुज्यमानत्वदर्शनेन

पर्यग्निकरणान्तोत्सृष्टपात्नीवतादिपशूनां यथापूर्वमविकलावस्थादर्शनेन च हवींषि देवता: स्वीकुर्वन्तीति कल्पनायोगात्। एवम् 'ऐन्द्रमेकादशकपालं निर्वपेन्मारुतं सप्तकपाल' मिति विहितायामिष्टौ 'ऐन्द्रस्यावद्यन्ब्रूयादिन्द्रायानुब्रूहीत्याश्राव्य ब्रूयान्मरुतो यजेति मारुतस्यावद्यन्ब्रूयान्मरुभ्द्योऽनुब्रूहीत्याश्राव्य ब्रूयादिन्द्रं यजे'त्याहूतदेवतायै द्रव्याप्रदानस्यानाहूतदेवतायै तत्प्रदानस्य च कर्तव्यतया श्रूयमाणत्वात् हवि:प्रक्षेपणसमयदेवताह्वानतद्ध्यानतदुद्देशानां बृहत्स्तोत्रादिषु समुद्रनिधनादिवददृष्टार्थत्वस्यैवाभ्युपगन्तव्यत्वात्। अत: प्रमाणाभावेन देवानां विग्रहाभावात् पटुदेहेन्द्रियादिमत्त्वरूपमुपासनासामर्थ्यं नास्तीति भाव:। नन्वादित्यादिपदानामर्थवत्त्वावश्यंभावात्तदर्थानामेव कर्मसु देवतात्वावश्यंभावाञ्च सन्ति तावद्देवा इति निर्विवादम्। ते चेतना वेत्यत्रैव विवादस्सोऽपि निरवकाश:। 'इन्द्रो वृत्राये'त्याद्यर्थवादै'र्वज्रहस्त: पुरन्दर' इत्यादिमन्त्रैश्च तेषां चेतनत्वस्य सविग्रहत्वस्य च सिद्धेरित्याशङ्क्ते—**इन्द्रोवृत्रायेति।** विधेयस्तावकतयार्थवादानां प्रयोगान्तरानुष्ठेयार्थस्मारकतया मन्त्राणां च विध्येकवाक्यतापन्नानां देवताविग्रहादौ तात्पर्याभावेन न तैस्तत्सिद्धिरिति परिहरति—**विध्येकवाक्यतेति।** स्यादेतत्। तेषां विध्येकवाक्यत्वेऽप्यवान्तरसंसर्गप्रतीतिस्तावदस्त्येव। अत एव जैमिनिनापि 'अविशिष्टस्तु वाक्यार्थ:' 'अर्थैकत्वादेकं वाक्य'मित्यादिसूत्रैर्मन्त्राणां वाक्यार्थवत्त्वं दर्शितम्। तद्विरोधिनश्च शास्त्रादयो मन्त्राधिकरणे परिहृता:। अपरिपूर्णेषु मन्त्रवाक्येषु तदर्थप्रतीत्युपपादकौ चानुषङ्गाध्याहारा'वनुषङ्गो वाक्यसमाप्ति:' 'व्यवायान्नानुषज्यत' इति सूत्राभ्यां दर्शितौ। अर्थवादवाक्यानामर्थवत्त्वविरोधिनश्च तदर्थशास्त्रदृष्टविरोधादयोऽर्थवादाधिकरणे परिहृता:। तदर्थप्रतीत्युपपादकाश्च तत्कार्यकरत्वादिलक्षणास्तत्सिद्धिपेटिकायां दर्शिता:। मन्त्रवाक्यार्थप्रतीतिमुपजीव्यैव तृतीये इन्द्रपीताधिकरणपात्नीवताधिकरणत्रिंशदधिकरणप्रभृति'ष्विन्द्रपीतस्ये'ति भक्षमन्त्रगतस्य विशेषणस्योहानूहचिन्ता नवमे 'दर्भैस्तृणीत हरितैरिन्द्रागच्छ हरिव आगच्छे'त्यादिषु द्रव्यदेवताविशेषणानामूहानूहचिन्ता च प्रवर्तिता। अर्थवादवाक्यार्थप्रतीतिमुपजीव्यैव रात्रिसत्रे सत्रस्य प्रतिष्ठाफलत्वं ज्योतिष्टोमशब्दस्य सोमयागमात्रविषयत्वं द्वादशाहविकारेषु तदीयमध्यमदशरात्रस्य प्रवृत्ति: गवामयने त्र्यणीकायां स्वस्थानवृद्धिरित्याद्यर्थजातं निर्णीतम्। तथा च तस्या: मन्त्रार्थवादवाक्यार्थभूतावान्तरसंसर्गप्रतीतेरसति बाध प्रमात्वावश्यंभावात्तत्र तत्रार्थेषु प्रामाण्यं तात्पर्याभावेऽप्यनिवार्यमिति चेत्। मैवम्। शब्दस्य तात्पर्यविषय एव प्रामाण्यव्यवहाराभावात्। अन्यथा शिवत्रिरजककर्तृकवस्त्रशोधनतात्पर्येण प्रयुक्ताद्वाक्याद्वक्तृतात्पर्ययुक्तार्थ एव प्रतीत्युत्पत्तावपि कस्यचित्समीपतो गच्छति शुनके पदव्युत्पत्तिमात्रेण तस्य तत्रापि प्रामाण्यप्रसङ्गात्। न चेष्टापत्ति:। तस्य ह्यनुमिते: पर्वत इव

प्रामाण्यव्यवहाराभावात् लोकव्यवहारमनादृत्य स्वकल्पितमर्यादामवलम्ब्य प्रामाण्याभ्युपगमे 'जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नारण्यानथो खल्वाहुरनाहुतिर्वै जर्तिलाश्च गवीधुकाश्चे'ति 'पयसाग्निहोत्रं जुहुया'दित्यग्निहोत्रद्रव्यविधायके महावाक्ये जर्तिलगवीधुकवाक्ययोर्ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्तयोरपि जर्तिलगवीधुक-योर्यदपेक्षयानाहुतित्वं तत्पयः प्रशस्ततरमिति पयोविध्येकवाक्यतया तत्रैव तात्पर्येऽपि.... स्तवनबलाच्च जर्तिलगवीधुकयवाग्वोर्विकल्पेनाग्निंहोत्रहोमे द्रव्यत्वविधिप्रतीतेरपि सम्भवंत्याः प्रमात्वस्यानिवार्यत्वेन तयोस्तत्रापि प्रामाण्यप्रसङ्गात्। न 'न्वेतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमस्तोत्रविशिष्टक्रतुविधायकवाक्ये 'रेवतीषु वारवन्तीय' मित्यंशस्य 'रेवतीर्णस्सधमाद' इत्यादिऋगाधारवारवन्तीयसामरूपेऽग्निष्टोमस्तोत्रविशेषणे तात्पर्याभावेऽपि प्रामाण्यं दृष्टम्। न हि तद्विशेषणं 'सोमेन यजेते'त्यादि विशिष्टविधाविव तात्पर्यवत् वक्तुं शक्यम्। अनुपपत्तिप्रसङ्गात्। न चाक्षेपाद्विशेषणलाभः। आक्षेपाद्विशेषणप्रसिद्धौ सत्यां विधिर्विशिष्टविधिनैव च विशेषणस्याक्षेप इति परस्पराश्रयापत्तेः। तस्माद्विशिष्टविधेर्विशेषणस्वरूपे तात्पर्याभावेऽपि तस्मिन्नप्रसिद्धे 'रेवतीषु वारवन्तीय'मिति पदद्वयसमभिव्याहारस्यैव प्रामाण्यमगत्याभ्युपगन्तव्यमिति चेत् मैवम्। तत्र विशिष्टविधिगतपदद्वयसमभिव्याहारलभ्यरेवत्याधारवारवन्तीयप्रतीतिमुपजीव्य प्रवृत्तेन विशिष्टविधिना रेवतीषु वारवन्तीयं कुर्यादिति विशेषणस्यैव तत्र प्रामाण्याद्विशिष्टविधेः पूर्वं तत्प्रतीत्यभावे त्वयापि तत्र प्रामाण्यमङ्गीकर्तुमशक्यत्वेन तत्प्रतीतेरवश्याभ्युपगन्तव्यत्वात्। इयांस्तु विशेषः। सोमलताविशेषणं मानान्तरसिद्धं पदात्प्रतीयते इदं तु मानान्तरासिद्धमेव पदसमभिव्याहारात्प्रतीयत इति प्रतीयमानोऽपि विशेषणविधिर्विशिष्टविधेः प्रामाण्याभाव उमयत्राप्यविशिष्टः। अयं चापरो विशेषः। सोमलतादिद्रव्यस्य लोकसिद्धत्वात् तत्र यागसम्बन्धित्वेनैव विधिः कल्पनीयः। इह तु विशेषणस्वरूपस्यापि मानान्तरासिद्धत्वात् प्रतीयमानेऽपि तस्मिन् विशिष्टविधेः प्रामाण्याभावात् विशेषणस्वरूपेण स्तोत्रविशेषसम्बन्धित्वेन च विधिद्वयं कल्प्यमिति। तस्मान्मन्त्रार्थवादानां स्वार्थे तात्पर्याभावान्न तेभ्यो देवताविग्रहसिद्धिरिति भावः। अस्तु तर्हि मन्त्रार्थवादानां विध्येकवाक्यतापन्नानां स्वस्वार्थेऽप्यवानतरतात्पर्यम्। प्रधानविध्येकवाक्यतापन्नानां प्रयाजादिविधीनां स्वस्वार्थेऽवान्तरतात्पर्यस्यापि दर्शनात्। प्रयाजादीनामितिकर्तव्यतारूपेण प्रधानविध्याकाङ्क्षितत्वात्तेष्ववान्तरतात्पर्यं स्यात्। न देवताविग्रहादौ' अनपेक्षितत्वादिति चेन्न। क्लृप्ताकारसाकाङ्क्षाः प्रथमं प्रकृतैस्सह सम्बध्यन्ते समीपविकाराः प्रे....................क्तन्यायेन क्लृप्तोपकारप्रकृताङ्गकलापप्राथमिकान्वयनिराकाङ्क्षीकृतप्रधानविध्यनपेक्षिताङ्गसमर्पका...................

होमादिविधिषु स्वस्वार्थेष्ववान्तरतात्पर्याभ्युपगमात् मन्त्रार्थवादप्रतिपाद्यानामाकाङ्क्षितत्वमपि प्रसिद्धे अर्थवादा.................यागादिषु परीक्षकप्रतियोगिस्तुतिद्वारकत्वेनापेक्षितत्वात्। यद्यपि काव्येषु पुरुषवर्णनादिरूपसहृदयहृदयोल्लासप्रयोजनकेषु राजादिहृदयावर्जनप्रयोजना बालानामौषधादिप्रवृत्तिप्रयोजना च स्तुतिरसदर्थावलम्बनापि दृश्यते। तथापि परीक्षकाणां बहुवित्तव्ययायाससाध्ययागादिप्रवृत्तिप्रयोजना स्तुतिरसदर्थावलम्बना न सम्भवत्येव। एव'मपां फेने नमुचेः शिर उदवर्तय' दित्यादिमन्त्रार्थानामपि स्तुतिद्वारत्वात्तेषामसदर्थावलम्बनता न सम्भवतीति। न चैवं मन्त्रार्थवादानामावान्तरतात्पर्याभ्युपगमे'न सुरां पिबे'दित्यत्र'सुरां पिबे'दित्येतावतोऽवान्तरतात्पर्यप्रसङ्गः। तत्र पदैकवाक्यत्वेन पदद्वयसंसर्गतोऽर्थप्रतीतेरेवाभावान्मन्त्रार्थवादानां देवताविग्रहे तात्पंर्य सम्भवतीत्याशङ्क्याह **तत्सद्भावेऽपीति**। अपिशब्देनेदं द्योत्यते। वस्तुतो मन्त्रार्थवादानां देवताविग्रहे तात्पंर्य न सम्भवतीत्येव अन्यपराणां वाक्यानां मानान्तराविरोधे हि स्वार्थेऽप्यवान्तरतात्पर्यमभ्युपगम्यते न तु तद्विरोधेऽपि। 'यजमानः प्रस्तर'इत्यादीनामपि प्रतीयमानार्थे तात्पर्यापत्तेः। इह तु देवताविग्रहपरमन्त्रार्थवादानां स्वार्थपरत्वे ज्योतिरादिष्वचेतनेष्वादित्यादिशब्दानां शक्तिग्राहकैस्तदनुसारिभिर्लौकिकवैदिकप्रयोगैश्च विरोधः। 'इन्द्रो वृत्राय वज्रमुदयच्छ'दित्यादीनां प्रतीयमानार्थपरत्वे वेदस्यानित्यसंयोगरूपप्रसङ्गो विरोधः। 'न किरिन्द्र त्वदुत्तर' इत्यादिमन्त्राणां प्रतीयमानार्थपरत्वे परमेश्वरस्यैव सर्वोत्तरत्वं प्रतिपादयद्भिरौपनिषदवचनैर्विरोधः। तस्मादुदाहृतवाक्येष्वसदर्थावलम्बना स्तुतिरित्येव युक्तम्। दृश्यते ह्यचेतनेषु चेतनधर्मानारोप्य स्तुतिरन्यत्रापि 'तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः।' 'अग्निष्टेतनुवं मातिधागग्ने हव्यंꣳरक्षस्व' 'शृणोत ग्रावाणो विदुषो नु यज्ञ'मित्यादिषु कथमसदर्थावलम्बन श्रुत्या परीक्षकाः प्रोचिताः प्रवर्तेरन्। इत्थमारोग्यादिफले कटुतिक्ताद्यौषधसेवन बहुनियमपरिकरे प्रवर्तकस्य पित्रादेः प्रवर्तनीयेष्टतमानि सत्यानीति फलोक्तीनामिव बहुवित्तव्ययायाससाध्ये कर्मणि प्रवर्तकस्य वेदस्य स्तावकवाक्यानामसदर्थविषयत्वमवगच्छन्तोऽपि प्रवर्तनीयाः परीक्षका यदस्य वास्तवं फलं तल्लम्भनार्थमेव इदमनुष्ठापनीयमिति हितैषित्वेन प्रवृत्तिप्रतिबन्धकद्वेषालस्यादिभंगप्रोचनार्थं पित्रादिवदसत्यान्यन्यान्यपि फलान्युपन्यस्य कृत्युद्देशार्हमिदं कर्मेति स्तुवन्तीति स्तावकवाक्यानामसदर्थावलम्बनस्वार्थबाधितायां कर्मस्तुतौ तात्पर्यं निश्चित्य प्रवर्तकस्य वेदस्य हितैषित्वेन स्तुतिद्वारभूतार्थासत्यत्वमदोषं मन्यमानाः प्रवर्तेरन्नेव। तस्माद्देवताविग्रहादौ अवान्तरतात्पर्यस्याप्यसम्भवात् ततस्तत्सिद्धिर्नास्त्येव। अथापि तत्सिद्धिमभ्युपेत्य ततस्सामर्थ्यसद्भावेऽप्यर्थित्वाद्यभावादधिकाराभावस्समर्थित इति। **अत एव तेषामिति**। उपनयनाध्ययनरहितानां व्रात्यादीनां वैदिकेषु

कर्मस्वनधिकारस्मरणादिति भावः। नन्वीश्वरशब्दः स्वतो निरतिशयैश्वर्यशालिनः प्रतिपादने स्वारसिकोऽ'प्युपेयादीश्वरं चैवे' त्यत्राप्राक्तनभूम्यादिप्राप्तिरूपस्य योगस्य प्राक्तनतत्परिपालनरूपस्य क्षेमस्य च प्रसिद्धये तत्तज्जनपदाधिपतेरुपसर्पणविधेः स्नातकगृहस्थधर्मप्रकरणतोऽवगमात् तत्र सङ्कुचितवृत्तिरस्तु। इह स्वर्गशब्दो देवपदविषये क्षयिष्णुसातिशयसुखवचन इत्यत्र प्रमाणाभावात् 'यन्न दुःखेन सम्भिन्न'मिति स्वर्गशब्दार्थवर्णनस्य सर्वविषयत्वात् परमशिवपद इवेन्द्रादिपदेऽपि निरतिशयसुखपर एव स्यादित्याशङ्क्याह-**प्रकरणेन प्रमाणान्तरोपपत्त्या चेति।** 'ज्योतिष्टोमेन स्वर्गकामो यजेत' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इति स्वर्गफलत्वेनोच्यमानानां सोमेष्टिदर्वीहोमानां तत्तत्प्रकरणपर्यालोचनया तत्तद्यागानां फलस्य कर्मनिष्पत्तेः 'तेषां लोकवत्परिमाणतः फलविशेषः स्या'दित्यर्थवादाधिकरणसूत्रोक्तन्यायेन फलतारतम्यमावश्यकमिति कर्मभिः प्राप्यस्येन्द्रादिपदरूपस्य स्वर्गस्य सातिशयत्वं तावद्दुर्वारम्। 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत' इत्यौपनिषदवाक्यरूपप्रमाणान्तरदर्शितयोपपत्त्या क्षयिष्णुत्वमपि दर्वारम्। आदिशब्देन अर्थवादादिसिद्धमसुरभयवत्त्वादिकं सङ्गृह्यते। अतो 'यन्न दुःखेन सम्भिन्न'मित्यादिश्लोकस्तत्कृत-निर्वचनस्वर्गशब्दश्च मुख्यवृत्त्या परमेश्वरपद एव स्वारसिकः कथञ्चिदिन्द्रादिपदेष्वपि वर्तते जनपदाधिपेष्विवेश्वरशब्द इति भावः। **शक्त्यतिशयेति।** सर्वज्ञशक्तयतिशयवत्त्वादनधीतोऽपि वेदस्तदर्थश्च देवानां भातीति वा पूर्वाधीतस्यैव वेदस्य सुप्तप्रबुद्धन्यायेन स्मृतिर्भवतीति वा तेषां वैदुष्यमपि सम्भवतीत्यर्थः। **शास्त्रस्येति।** तदुपासनाविधेः साधारण्यात्। तस्मा'च्छूद्रो यज्ञेऽनवक्लृप्त' इतिवन्निषेधाभावात् देवानामधिकारस्यावश्यंभावात्तत्पर्युदासशङ्का कथञ्चिदपि नावकाशं लभत इत्यर्थः। ननु सम्भवेदेवमर्थित्वादिकं यदि तेषां विग्रहवत्त्वं स्यात्तदभावात् सामर्थ्यमर्थित्वादिकमपि न सम्भवतीत्याशङ्क्याह-**तेषामिति।** 'इन्द्रो वृत्राये'त्यादीनां देवताविग्रहप्रापकाणां स्वार्थेऽवान्तरतात्पर्यं तदा न स्यात् यद्या'दित्यो यूप' इत्यादीनामिव मानान्तरविरोधेन गुणवादत्वम् 'अग्निर्हिमस्य भेषज'मित्यादीनामिव मानान्तरतः प्राप्त्यानुवादकत्वं स्वीकर्तव्यं स्यात्। न चैतदुभयमस्ति। न त्वादित्यादिपदशक्तिग्रहतत्प्रयोगविरोधोऽस्तीति दर्शितम्। सत्यम्। स विरोधसूत्रे 'तदुपरी'त्यंशेन निराकृतः। तथा हि—तदिति पदं मनुष्याधिकारत्वादिति प्रकृतमनुष्यपरामर्शि तेषामित्यर्थे 'सुपां सुलुगि' त्यादिसूत्रेण लुप्तषष्ठीकं भिन्नपदं न तु तदुपपादकम्। 'पूरणगुणसुहितार्थसदव्ययतव्य-समानाधिकरणेने'ति सूत्रेणाव्ययेन सह समासस्य प्रतिषिद्धत्वात्। तथा च तेषां मनुष्याणां न केवलं

मनुष्यत्वदशायामेव परमेश्वरोपासनायामधिकारः। किं तु तदुपरि ऊर्ध्वदशायाम्। एवमेव 'अयमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यं नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वे'ति श्रुतिप्रसिद्धायां मनुष्यशरीरत्यागानन्तरभावितदुत्कृष्टशरीराधिष्ठानरूपायां देवत्वादिदशायामपि तदधिकारोऽस्ति। अधिकारविशेषणानामर्थित्वादिनां सम्भवादिति सूत्रार्थः। स्पष्टार्थं देवादीनामिति सूत्रणीये तदुपरीति सूत्रणं प्राङ्मनुष्याणामेव तदीयसत्कर्मोपार्जिता उपरितन्यो दशा बह्व्य इति प्रदर्शनेन मनुष्याणां यानि देवत्वप्रापकाणि कर्माणि तद्विध्यन्यथानुपपत्तिर्देवतासद्भावे प्रमाणमिति सूचनार्थम्। ज्योतिष्टोमादिविध्यन्यथानुपपत्त्या हि देशान्तरदेहान्तरभोग्यैहिकसुख-विलक्षणस्वर्गशब्दोक्तसुखरूपतत्फलभोक्तृत्वेन कर्मदेवाः सिद्ध्यन्ति। तथैवाजानदेवा अपि सिद्ध्यन्ति। तत्तत्कल्पादिप्रभवेन्द्राद्याजानदेवपदस्यापि पूर्वकल्पनानुष्ठितकर्मविशेषफलत्वात्। तथा सामगानां पञ्चविंशब्राह्मणेऽ'प्यतिरात्रः पृष्ठ्यः षडहो महाव्रतं पृष्ठ्यः षडहस्त्रायस्त्रिंशारम्भणोऽतिरात्रः य एताभिर्वैदेवताभि...........स्थं देवत्वं गच्छन्ति य एतामुपयन्ती'ति। अत्र देवत्वप्रापत्यर्थव्रत-विध्यन्यथानुपपत्त्या देवानां चेतनत्वविग्रहवत्त्वसिद्धिः। सामविधिब्राह्मणे...........''मयि वर्च' इत्यन्तेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जानस्त्रयाणां लोकानामाधिपत्यं गच्छती'ति श्रूयते। त्रैलोक्याधिपत्यमिन्द्रत्वमेव। तस्यैव त्रैलोक्याधिपतित्वेन प्रसिद्धेः। तथा तत्रैव ब्राह्मणे देवतावशीकरणफलकास्सामविशेषप्रयोगाः श्रूयन्ते। 'यः कामयेत....यमित्येकरात्रं क्षुरसंयुक्तस्तिष्ठेत्सुतासो मधुमत्तमा इति वर्गाः। एतेषामेकमनेकं वा सर्वाणि वा प्रयुञ्जानः एकरात्रेण कुटुम्बिनमासादयति द्विरात्रेण राजोपजीविनं, त्रिरात्रेण राजानं, चतूरात्रेण ग्रामं, पञ्चरात्रेण नगरं षड्रात्रेण जनपदं, सप्तरात्रेणासुरानष्टरात्रेण पितृपिशाचान्नवरात्रेण यक्षान्दशरात्रेण गन्धर्वाप्सरसोऽर्धमासेन वैश्रवणं मासेनेन्द्रं चतुर्भिः प्रजापतिं संवत्सरेण............त्रिजगत्सर्वं हास्य गुणि भवती'ति। अत्र देवताद्यभावे वशीकरणस्य फलत्वानुपपत्तेर्देवतानां सिद्धिः। तथा तैत्तिरीयाणां.........…धे विश्वसृजामयनकर्तृत्वेन काश्चिद्देवता अनुक्रम्य तत्फलविधिः श्रूयते। 'ब्रह्मणः सायुज्यं सलोकतां यन्ति। एतासामेव देवतानांसायुज्यम्। सार्ष्टिताꣳसमानलोकतां यन्ति। यएतदुपयन्तीति' सालोक्यं तत्तल्लोकावाप्तिः सार्ष्टितत्तद्देवतानां यावन्ति भोग्यवस्तूनि तावतां प्राप्तिस्सायुज्यं तत्तद्देवतानां गीतनृत्तादिषु भोग्यस्तुतिषु सङ्गीतशास्त्रादिप्रावीण्येन यावान्भोगस्तावत्प्राप्तिरिति भेदः। अत्र देवतासायुज्यादिफलान्यथानुपपत्त्या देवतासिद्धिः। तथा छन्दोगोपनिषदि मधुविद्यायां श्रूयते 'एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्टवा तृप्यती'त्यादि। अत्र देवमधुरूपादित्यमण्डलगतलोहितादिरूपात्मकामृतपञ्चकोपासकानां वसुरुद्रादित्यमरुत्साध्यगणा-

न्तर्भावप्राप्तिः फलत्वेन श्रूयते' तद्वस्वादिदेवतासद्भावं विनानुपपन्नमिति तदन्यथानुपपत्त्यैव वस्वादिदेवतासिद्धिः। एवं विध्यन्यथानुपपत्त्यैव सामान्यतो देवानां विशिष्येन्द्रादीनां च सिद्धौ तेषां सङ्ख्याविशेषरूपायुष्यभोगभूबलादिविशेषाकाङ्क्षायां तत्तदर्थवादाः प्रवर्तन्ते। तथा च यथा स्रक्चन्दनवनिताहिमोष्णादिषु सुखजनकत्वदशायां स्वर्गशब्दप्रयोगस्य तदजनकत्वदशायां तत्प्रयोगाभावस्य च दर्शनेनान्वयव्यतिरेकाभ्यां सुखवाचकत्वेनावधारितस्य स्वर्गशब्दस्य अग्निष्टोमादिवाक्येषु फलनिर्देशकतया श्रवणे सति ज्योतिष्टोमादिजन्यं सुखं कीदृशमित्याकाङ्क्षायां 'यन्न दुःखेन सम्भिन्न' मित्यादिवाक्यशेषात् यत्र लौकिकसुखे स्वर्गशब्दस्य शक्तिग्रहःतद्विलक्षणसुखे शक्तिग्राहकात्ज्योतिष्टोमादिवाक्यगतस्यस्वर्गशब्दस्य तथाभूतसुखविशेष एवार्थ इति निर्णीते सति प्राचीनलौकिकसुखवाचकत्वनिर्णयो बाध्यते ऐहिकसुखेषु प्रयोगो लाक्षणिक इत्येवं निश्चीयते। एवमिहापि देवतावाचिनां शब्दानां ज्योतिर्मण्डलादिषु शक्तिग्रहे प्रयोगे च सत्यपि यागविधीनामन्यथानुपपत्त्या विध्याकाङ्क्षिततत्तद्देवतारूपविशेषादिसमर्पकमन्त्रार्थवादादिसहितया विग्रहवद्देवतापरत्वनिर्णये सति प्राचीनस्तेषां ज्योतिरा। दिषु शक्तिग्रहश्च बाध्यते। तेषु प्रयोगो लाक्षणिक इत्येव कल्प्यते। दृष्टं च नयनगोलकादिषु प्रयुज्यमानानां 'नेत्रनयनलोचनादिशब्दानां श्रुत्याद्यनुरोधेन तदन्तर्वर्त्यतीन्द्रियनयनादिवाचकत्वसिद्धौ गोलका ।।सू०।। **शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्**।।२७।। **शब्दे विरोध इति।** अनेन सूत्रे शब्द इति सप्तम्यन्तं पदम्। विरोध इत्यस्य पूर्वसूत्रादपकृष्टस्य तत्रान्वयः। वैदिकानामिन्द्रादिशब्दानां विग्रहविशिष्ट-वाचित्वेऽभ्युपगम्यमाने विग्रहनाशे तेषामर्थशून्यत्वलक्षणो विरोधः प्रसज्येतेत्यर्थः। ननु नायं दोषः। इन्द्रादिविग्रहाणां शिवविग्रहवन्नित्यत्वोपपत्तेः। अनित्यत्वेऽपि कदाचिदर्थसत्तयैव पाण्डवादिशब्दाना-मिवार्थवत्त्वोपपत्तेः। सार्वकालिकार्थापेक्षायामपि गवादिशब्दवज्जातिशबदत्वोपपत्तेरित्यभिप्रायेण पृच्छति–**कथमिति।** तन्नित्यत्वपक्षस्तावन्न सङ्गच्छते। प्राकृतानां सावयवानामनित्यत्वनियमात् तन्नियममनादृत्य इन्द्रादिविग्रहाणां नित्यत्वाभ्युपगमे सांसारिकशरीरनाशपूर्विकाया मुक्तेरसम्भवेन इन्द्रादीनां मुक्तयर्थित्वाभावेन उपासनानधिकारापत्तेरित्याशयेनाह–**देवानामिति।** अनित्यत्वपक्षे यद्विग्रहविशिष्टवाचित्वमिन्द्रादिशब्दानामिष्यते तदुत्पत्तेः प्राक्पश्चात्कालयोरपि कश्चि त्कश्चित्स्वपित्रादिकृतेन्द्रनामवान्देवस्सम्भवति। डित्थादिशब्दानां व्यक्तिविशेषेषु साङ्केतिकत्वेऽपि लोके तन्नामकव्यक्तिप्रवाहाविच्छेददर्शनात्। तथा च तथाभूता एव देवा 'इन्द्रागच्छ' 'अग्न आयाहि वीतय' इत्यादिशब्दानामपि[1] तत्तत्काले विषया भविष्यन्तीत्याशङ्क्याह–**अनित्यत्वं वा स्यादिति।** तथा सति वैदिकानामिन्द्रादिशब्दनां नित्य एकोऽर्थो व्यवस्थितो न स्यात्। एकस्य शब्दस्य

कालभेदेनानेकार्थत्वं तु क्वापि न दृष्टमिति भावः। ननु व्यवस्थितैकार्थराहित्यरूपमनित्यत्वं मन्त्राणां न दोषः। 'कदा चन स्तरीरसि'इत्यादिमन्त्राणा ' मैन्द्या गार्हपत्यगुपतिष्ठते' इत्यादिभिरग्न्युपस्थानादिषु स्तोत्रशस्त्रप्रकरणपाठाादिभिरिन्द्रस्तुत्यादिषु च विनियुक्तानां तत्तत्प्रयोगभेदेनानेकार्थपरत्वदर्शना-दित्याशङ्क्य 'कदा चन स्तरीरसी'त्यादिमन्त्रगतानामिन्द्रादिपदानां प्रयोगविशेषेषु अग्न्यादिपरत्व 'मैन्द्या गार्हपत्यमुपतिष्ठते' त्यादिविध्यधीनम्। नैवमिह पूर्वकल्पे व्यक्तयन्तरपराणां वैदिकानामिन्द्रादिशब्दानां कल्पान्तरे व्यत्तयन्तरपरत्वं विध्यधीनमिति वक्तुं शक्यते। किं तु तत्तत्कालवर्तीन्द्रादि-शब्दसङ्केतयितृपुरुषबुद्ध्यधीनमिति वक्तव्यम्। तथा चेन्द्रादिदेवतापदघटितानां विधिनिषेधाख्यानानां तत्तत्कालवर्तीन्द्रादिपदसङ्केतयितृस्वतन्त्रपुरुषबुद्ध्यधीनार्थप्रतिपादकत्वे तत्सापेक्षत्वलक्षणमप्रामाण्यं तच्चोदितकर्मणामननुष्ठानं च स्यादित्यर्थः। तस्मादप्रामाण्यादिदोषपरिहारायेन्द्रादिशब्दानां गवादिशब्द-वज्जातिशब्दत्वमभ्युपेतव्यम्। तच्चाचेतनज्योतिरादिवाच्यत्व एव सम्भवति न विग्रहवच्चेतनवाचित्वे। डित्थादिशब्दविषयाणामिवेन्द्रादिशब्दविषयाणां विग्रहाणामेकजात्यवच्छेदासम्भवात् शब्दविरोध-परिहाराय देवतानां विग्रहवत्त्वं त्यक्तव्यमित्युपसंहरति-**तत इति।** सौत्र'मत' इति पदं व्याचष्टे-**वैदिकादेवेति।** ननु वैदिकादिन्द्रादिशब्दानां जातिवाचित्वं तत्र हेतुत्वेन विवक्षितमिति दर्शयति-**यदीन्द्रादिशब्दाइति।** ननु जातिशब्दत्वं शब्दविरोधपरिहारे हेतुरिति युक्तमेव। जातिशब्दत्वे कथमिन्द्रादीनामिन्द्रादिशब्दप्रभत्वं हेतुरित्याशङ्क्य तस्य तत्र हेतुत्वं दृष्टान्तमुखेनोपपादयति-**यथा कुलाल इति।** शब्देनार्थस्मृतिसापेक्षा सृष्टिः स्रष्टव्याथस्य स्मर्यमाणार्थसमानाकृतित्व एव लोके दृष्टा। तथा च ब्रह्मा वैदिकादिन्द्राद्याकृतिविशेषप्रतिपादकाच्छब्दात्पूर्वेन्द्राद्याकृतिविशेषमनुसन्धाय कल्पादाविन्द्रादीन्सृजतीति तेषां पूर्वेन्द्रादिसमानाकृतित्वसिद्धौ तदभिव्यङ्ग्या जातिस्सिद्ध्यतीति जातिशब्दत्वे भवति शब्दप्रभवत्वं हेतुरिति भावः। नन्वसम्प्रतिपन्नः कुलालदृष्टान्तः। घटादिसृष्ट्यर्थमपेक्षितस्य घटाद्याकृत्यनुसन्धानस्य प्राक्तनतदनुभवादेव सम्भवे घटादिशब्दानपेक्षणात्। अत एव कैश्चिदुपकरणैः कञ्चिंदर्थं निर्मिमाणं दृष्टवा तद्वाचकशब्दानभिज्ञा अपि नानाशिल्पनिपुणास्तैरुपकरणैस्तथाभूतमेव व्यक्तयन्तरं निर्मिमाणा दृश्यन्ते। जीवकर्तृकसृष्टेः कथञ्चिच्छब्दापेक्षासम्भवेऽपि परमेश्वरकर्तृकाया जगत्सृष्टेर्न सा सम्भवति। तस्य स्वत एव सर्वज्ञत्वात् आगन्तुकसार्वज्ञ्यश्चतुर्मुखः देवादीनां स्रष्टा न साक्षात्परमेश्वर इति चेन्न। देवादीनां नामरूपस्रष्टा परमेश्वर एवेति 'संज्ञामूर्तिक्लृप्त्य'धिकरणे व्यवस्थापयिष्यमाणत्वात्। चतुर्मुखस्यापि सार्वज्ञ्यस्य 'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः। ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टय'मिति स्वाभाविकत्वस्मरणादिति चेत्। उच्यते। शिल्पशास्त्रेभ्यो देवादीनां नामरूपाणि विज्ञाय प्रतिमादिकं

निर्मातीति दृष्यते सोऽत्र दृष्टान्त:। कुलालदृष्टान्तस्तथाभूतस्योपलक्षणम्। यद्यपि देवादीनां नामरूपसृष्टो परमेश्वर: शास्त्रतस्सृष्टव्यनामरूपालोचनोपेत:। तथापि चतुर्मुखस्याप्यस्येव सोऽपि देवदिनामरूपसृष्टौ हेतुरिति तत्सृष्टिसामर्थ्यसिद्धये पुराणादिषु तस्य तपश्चरणवर्णनादिभिरवसीयते। ईश्वरकर्तृकं घटे कुलालस्यापि कर्तृत्ववत् तत्र चतुर्मुखस्यापि कर्तृत्वं नानुपपन्नम्। तस्य सार्वज्ञ्यं परमेश्वरानुग्रहलब्धवेदतदर्थस्फुरणाधीनम्। अत एत श्रूयते–'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये'इति। तस्य किलायमाशय:। यथा शिल्पी शिल्पशास्त्रात् देवादीनां नामरूपाणि विज्ञाय प्रतिमादिकं निर्माति तथाऽयं वेदेभ्य: तानि विज्ञाय सृजत्विति मत्वा परमेश्वरश्चतुर्मुखसृष्ट्यनन्तरमेव तस्मै वेदांस्तदर्थांश्च दत्तवानिति जातमात्रेण लब्धत्वात्तत्सार्वज्ञ्यं सहजमिति स्मर्यते। तस्मात्सर्वमेतदुपपन्नम्। ननु भवेदेतत्सर्वमुपपन्नं यदि वेदशब्देभ्यस्तदर्थानुसन्धानपूर्वकं चतुर्मुखस्ससर्जेत्यत्र किञ्चित्प्रमाणं स्यात् तत्रैव प्रमाणं वक्तव्यमित्याशङ्कते-**किं प्रमाणमिति।** 'प्रत्यक्षानुमानाभ्या' मिति सूत्रमर्थतो व्याचक्षाण: परिहरति-**श्रुतिस्स्मृतिश्चेति। वेदेनेति।** सतासती सदसती चेतनाचेतनरूपे व्याकरोत् देवमनुष्यादिरूपेण भूभूधरसरित्समुद्रादिरूपेण विविधान्यकरोदित्यर्थ:। **इत्यादि: श्रुतिरिति।** आदिशब्देन 'स भुव इति व्याहरत् सोऽन्तरिक्षमसृजते त्याद्या: श्रुतयो गृह्यन्ते 'भूर्भुवस्सुवशे' मिति शब्दा: पृथिवन्यरि क्षस्वर्गलोकवाचका:। तथा च तत्तल्लोकनामभिस्तत्तन्नामप्रवृत्तिनिमित्त-भूतानसाधारणानाकृतिविशेषाननुसन्धाय भूलोकादीनसृजदित्यर्थ:। **सर्वेषां चेति।** नामानीन्द्रादीनि। कर्माणि इन्द्राद्यसाधारणत्रैलोक्याद्याधिपत्यादीनि। पृथक्संस्था: पृथक्संसथानानि सहस्राक्षत्वादिविशिष्टानसाधारणाकृतिविशेषान्। **इत्यादि: स्मृतिरिति।** आदिशब्देन 'नाम रूपं च भूतानां कृत्यांना च प्रपञ्चनम्। वेदशब्देभ्य एवादौ देवादीनां चकार स:।।' इत्यादिस्मृतिर्गृह्यते। माभूदर्थद्वारको वैदिकशब्दे विरोध: शब्दद्वारकस्तु स्यात्। मन्त्रार्थवादानां हि प्रतीयमानेऽर्थे प्राम्ह्मण्यमुपपादितम्। तथा च 'मन्त्रकृतो वृणीते'संहिताकारपदकारसूत्रकारब्राह्मणकाराणं 'विश्वामित्रस्य सूक्तंभवति' इत्यादिप्रामाण्याद्वेदस्यपौरुषेयत्वमनिवार्यमित्याशङ्कानिराकरणार्थं सूत्रम्।।सू०।। **अत एव च नित्यत्वम्**।।२८।। ननु विश्वामित्रादिशब्दानामाकृतिनिमित्तत्वहेतुना कथमुद्भावितवेदानित्यत्वशङ्कापरिहारलाभ:' कथं च तस्य हेतोस्सिद्धिरित्याशाङ्कानिराकरणार्थमत एवेति निर्दिष्टं सौत्रं हेतुं विवृणोति-**यत इति।** परमेश्वरानुग्रहादनधीतसकलवेदार्थदर्शन-शक्तश्चतुर्मुखो वैदिकाच्छब्दादृषिमनुष्यादीनामसाधारणनामरूपकृत्यविशेषाननुसन्धाय तथैव सृजतीति अत: प्रभवादिति पूर्वसूत्रांशसिद्धोऽर्थ: सौत्रेणात एवेति शब्देन परामृश्यत इति विवृतं भवति। ततश्च

विश्वामित्रादीनामपि वेदशब्देभ्यः पूर्वकल्पस्थितविश्वामित्रादिनामरूपकृत्यविशेषाननुसन्धाय तथैव सृष्टत्वलाभे सति अतीतवर्तमानकल्पगतास्सर्वेऽपि विश्वमित्रादयः विश्वामित्रादिपदप्रापकपूर्वकल्पानुष्ठितपुण्यवशाद्विश्वामित्रसूक्तादीननधीत्यैव पश्यन्तीति तत्तत्सूक्तादिद्रष्टृत्वमेव तत्तत्कर्तृत्वं न तत्वपूर्वानुपूर्वीकाभिनवसूक्तादिकर्तृत्वमिति पर्यवस्यति। वेदानामनेकऋषिकर्तृकत्वेवेदशब्देभ्यस्तत्कृत्य विशेषाननुसन्धाय तेषामृषीणां स्रष्टृत्वानुपपत्तेरित्यत एवेति हेतुलब्धमर्थमाह–**तथा चेत्यादिना**॥ उत्तरसूत्रमवतारयति- **श्रवत्त्वेवमिति**। चतुर्मुखस्य स्वमानेन परार्धद्वयरूपशतवर्षजीविनः चतुर्युगसहस्ररूपैकैकदिवसात्मकावान्तरकल्पस्यावसाने तावत्कालप्रमाणा रात्रिर्नैमित्तिकप्रलयः। यत्र भूर्भुवस्सुवरिति त्रैलोक्यं नश्यति। महर्लोकादय स्तिष्ठन्ति। तदीयशतवर्षावसाने तावत्प्रमाणः कालः प्राकृतः प्रलयः। यत्र ब्रह्माण्डादिकं सर्वं नश्यति प्रकृतिमात्रमवशिष्यते। तत्रवै नैमित्तिकप्रलये भवतु वेदस्यावस्थानम्। प्राकृतप्रलये तु तन्न सम्भाव्यते। न च प्राकृतप्रलयानन्तरजगत्सृष्टेरपि प्रागुदाहृतश्रुतिस्मृतिभ्यां वेदशब्दप्रभवत्वावगमात् प्राकृतनैमित्तिकप्रलयेऽपि तदवस्थानमुपपादनीयमिति वाच्यम्। प्रकृतिमात्रावशेषे काले कथमपि तदुपपादनासम्भवात् उदाहृतश्रुतिस्मृत्योर्नैमित्तिकप्रलयानन्तरभाव्यवान्तरसृष्टिविषयत्वोपपत्तेः। 'ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः। शर्वर्यन्ते प्रसूतानां तान्यवैभ्यो ददात्यजः।' इति स्मृतौ शर्वर्यन्त इति विशेषणेनावान्तरकल्पविषयत्वस्पष्टीकरणाच्च। तस्मात्पूर्वसूत्रोपवर्णितं वेदनित्यत्वमनुपपन्नमिति शङ्काभिप्रायः।।सू०।। **समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च॥२९॥** प्राकृतप्रलये वेदानामभावेन स्वरूपतो वेदनित्यत्वानुपपत्तिराशङ्क्यते चेदिष्टापत्तिः। 'अस्य महतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदस्सामवेदः' 'छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत' इत्यादिश्रुतिषु महदहङ्कारादिवत्तेषामपि सृष्टिश्रवणात्। एकरूपवर्णपदवाक्यतदानुपूर्वीकत्वलक्षणे तु नित्यत्वे न विरोधः। अवान्तरकल्पेष्विव महाकल्पावृत्तावपि सृज्यानां समाननामरूपत्वस्य श्रुतिस्मृतिभ्यामवगमात् इत्यभिप्रेत्य सूत्रं व्याचष्टे–**सृज्यानामिति**। ननूदाहृतश्रुतिस्मृत्योरवान्तरकल्पविषयत्वोपपत्तेरुक्तहेतुरसिद्ध इत्याशङ्क्य तमुपपादयति-**तथा हीति**। 'यो ब्रह्माण' मिति श्रुतिरवान्तरकल्पविषयत्वेन योजयितुं न शक्यते. तत्र ब्रह्मसृष्टेरभावात्। ततश्च तस्या माहकल्पविषयत्वेन तत्र वर्ण्यमानं ब्रह्मणे वेदतदर्थप्रदानं शिल्पिन्यायेन पूर्वकल्पगतेन्द्रादिनामरूपवैभवानि वैदिकेभ्यो मन्त्रार्थवादेभ्योऽवगत्येन्द्रादीनयं सृजत्वित्यंतदभिप्रायेणेति समाननामरूपत्वसिद्धिस्ततो वेदनित्यत्वसिद्धिश्चेत्याशयः। ननु, महाकल्पादौ तत्कालसृष्ट्युपयोग्यभिनवदेवादिनामरूपप्रतिपादकमन्त्रार्थवादयुक्तपूर्वकल्पविलक्षणवर्णपदवाक्यतदानुपूर्वीयुक्तान्वेदान्निर्माय ब्रह्मणे प्रायच्छदिति

मन्त्रार्थवर्णनेऽपि ब्रह्मणे वेदप्रदानस्य तत्कालसृष्ट्यर्थत्वमुपपद्यत इति कुतस्तेषां समाननामरूपत्वस्य वेदनित्यत्वस्य वा सिद्धिः। उच्यते। देवऋषिमनुष्यतिर्यक्स्थावरादिभावस्तावत्कर्मानुष्ठानफलमिति 'तदुपर्यपि बादरायण' इति सूत्रे वर्णितम्। फलवैचित्र्यान्यथानुपपत्त्या च तथैवाभ्युपगन्तव्यम्। ततश्च यैर्महेन्द्रवरुणकुबेरादिभावस्य वसिष्ठविश्वामित्राद्यृषिभावस्य ब्राह्मणक्षत्रियादिमनुष्यभावस्य वा प्रापकत्वेन वेदविहितानियज्ञाध्ययनदानतपांस्युपासनानिवायथाविधि तत्तद्भावप्राप्तिसङ्कल्पपूर्वक-मनुष्ठितानि त एव महाप्रलयानन्तरभाविन्यामपि सृष्ट्यावृत्ताविन्द्रादिभावं प्रतिपद्यन्ते। यैर्गवाश्वगजधनधान्यगृहक्षेत्रारामादिप्रापकत्वेन वेदविहितानि तान्यनुष्ठितानि तद्योग्यत्या तिर्यञ्चः स्थावराश्च जन्म प्रतिपद्यन्ते। ते चानुष्ठातारस्तस्मिन्कल्पे प्रचरद्भिर्वेदवाक्यैस्तत्कालवर्तिनामिन्द्रादीनां दिव्यविग्रहैश्वर्यमहाभोगादिकं वसिष्ठादीनां दिव्यज्ञानमाहात्म्यादिकं च यादृग्वर्णितं प्रत्यक्षादिभिश्च ब्राह्मणक्षत्रियादीनां विशिष्टदेशजातिकुलरूपायुः श्रुतवित्तसुखतेजसां मुक्तिपर्यन्तसकल-पुरुषार्थसम्पादनाधिकरवतां वैशिष्ट्यं गवाश्वादीनां दोहनवाहनादिकृत्यतदुपयोगिसंस्थानविशेषादिकं च यादृशमवगतं तादृशमेव प्राप्तव्यतया सङ्कल्पयन्ते नान्यथा। यथावगतेष्टसाधनविषय-त्वादिच्छायास्तस्मिन्कल्पे प्रचरद्भिर्वेदवाक्यैस्तत्कालवर्तिदेवऋषिमनुष्यादिवाचकपदवद्भिस्तत्स-जातीयदेवभावादिप्राप्तिसाधनत्वेनैव यज्ञादीनामुपासनानां च विधानाञ्च। तथा च तथा सङ्कल्पपूर्वकमनुष्ठितानां कर्मणां फलतया भवन्ती देवादिसृष्टिः पूर्वकल्पस्थितदेवादिसमाननाम-रूपस्वभावप्रभावैश्च भवन्ति। ततो वेदानामुक्तरूपं नित्यत्वं च सिध्यति। पूर्वस्मिन्कल्पे यैर्वेदवाक्यैरिन्द्रादिनामरूपप्रभावानगत्य तद्भावप्राप्तये कर्माण्यनुष्ठितानि ते तत्समानवर्णपदवाक्य-तदानुपूर्वीकैरेव वेदैः पूर्वकल्पस्थितेन्द्रादीनां नामरूपे स्मृत्वा चतुर्मुखेन महाप्रलयव्यवहितायां पुनस्सृष्ट्यावृत्तौ तत्समाननामरूपादिशालीन्द्रादिभावेन ते सृष्टा इत्यङ्गीकर्तव्यत्वादन्यादृशवेदैस्तन्नाम-रूपानुसन्धानासम्भवात् 'मन्त्रकृतो वृणीते पितृणां पितामहानां मातृणां मातामहानामाचार्याणां प्राचार्याणां संहिताकारपदकारसूत्रकारब्राह्मणकाराणा'मित्यादि श्रुतिप्रसिद्धा ये कल्पादावनधीतवेद-मन्त्रब्राह्मणादिद्रष्टणां: तैः पूर्वस्मिन्कल्पे येषां तत्कालवर्तिनां वसिष्ठविश्वामित्रादीनां यद्यन्मन्त्र-ब्राह्मणादिद्रष्ट्ट्णां तत्तन्मन्त्रब्राह्मणादिद्रष्ट्टत्वप्रयुक्तवैभवविशेषवतां पदमपेक्ष्य कमाण्यनुष्ठितानि ते पुनस्सृष्ट्यावृत्तौ तत्तन्मन्त्रब्राह्मणादिद्रष्ट्टसमाननामरूपत्वेन तद्दृष्टमन्त्रब्राह्मणादिसमान-वर्णपदतदानुपूर्वीकब्रह्मब्राह्मणादिद्रष्ट्टत्वेन च सृष्टा इत्यङ्गीकर्तव्यत्वाञ्चेत्याशयः। यद्य'प्यप एव ससर्जादा' विति मनुस्मृतौ ब्रह्मसृष्टिमात्रमुक्तं न तु ब्रह्मणे वेदप्रदानं, तथापि प्राक्पश्चाल्लिखितश्रुतिसमृत्यनुसारेण तत्रापि सृष्ट्युपयोगिप्रदानमपि सिद्धयतीत्याशयः। एवं देवानां

ब्रह्मविद्यास्वधिकारः समर्थितः। तत्र मधुविद्यादीनां ब्रह्मविद्यात्वात्तेषु देवानां नाधिकार इति जैमिनेर्मतमनूद्य तेष्वपि ब्रह्मविद्यात्वसमर्थनेन तन्मतनिरसनार्थं 'मध्वादिष्वसम्भवा' दित्यादि सूत्रत्रयम्। तदपि देवताविषयविद्याधिकारनिरूपणार्थत्वाद्देवताधिकरणैकदेशमभिप्रेत्यावतारयति- **मतान्तरमिति**।।सू०।। **मध्वादिष्वसम्भवादनधिकारं जैमिनिः**।।३०।। छन्दोगानामुपनिष'द्यसौ वा आदित्यो देवमधु' इत्यारभ्य निरूपिता मधुविद्या। तस्यां वस्वादय उपास्याः प्राप्याश्च श्रूयन्ते। तत्र ह्यादित्यव्यपाश्रयाणि रोहितादिपञ्चरूपात्मकानि पञ्चामृतानि वसुरुद्रादित्यमरुत्साध्य- गणभोग्यत्वेनोपास्यानि। तदुपासनानां च वस्वादिप्राप्तिः फलमिति वर्णितं 'तद्यत्प्रथमममृतं तद्वसव उपजीवन्ति अग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्यन्ति स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यती' त्यादिना। ततश्च वस्वादीनां स्वस्वोपास्यत्वासम्भवात्स्वस्वपदप्राप्तेः फलत्वासम्भवाञ्च वस्वादीनां मधुविद्यायां नाधिकारः। एवं 'वायुर्वाव संवर्ग' इत्यादिश्रुतिविहितासु संवर्गविद्यादिष्वपि वाय्वादीनां नाधिकारः इत्यस्मिन्नर्थे सूत्रं योजयति- **मधुविद्यादिष्विति**। ननु, मधुविद्यायां मध्वाश्रितानमृतविशेषानुपजीवतां वस्वादीना- मन्तर्यामिणः उपासनानि विधीयन्ते न तु वस्वादीनामेव। 'य एतामेवं ब्रह्मोपनिषदं वेदे'ति ब्रह्मविद्यात्वेनोपसंहारदर्शनात्। ब्रह्मविद्यायां च न स्वात्मनोऽपि ब्रह्मभावो दोषः। सर्वास्वपि ब्रह्मविद्यासु 'अहं ब्रह्मास्मी' त्यनुसन्धानसम्प्रतिपत्तेः। नापि वस्वादीनां सतां वस्वादिप्राप्तव्यफलत्वाभावो दोषः। इह जन्मनि पुत्रादिमतां जन्मान्तरेऽपि पुत्रादयस्सन्त्वित्याशंसनवदिह कल्पे वस्वादीनामेव सतां कल्पान्तरेऽपि वसुत्वादिकमस्त्वित्याशंसनोपपत्तेः। वस्वादीनामेवोपास्यत्वेऽपि न दोषः। भूमविद्यामध्यगतायां प्राणविद्यायां स्वस्य स्वोपास्यत्वसम्प्रतिपत्त्या तद्वदेव वस्वादीनामेव भाविवसुत्वादिप्रेत्सया वस्वाद्युपासनोपपत्तेरिति चेदुच्यते। एवे पूर्वपक्षी मन्यते। 'वसूनामेवैको भूत्वे' त्यादिषु मधुविद्योपासकानां न वस्वादिभावः फलमुच्यते किं तु वस्वादिस्थानप्राप्तिपूर्वकं तत्तद्भोगसाम्यं यथास्मभ्द्रातृणां मध्ये त्वमेक इति लौकिकोक्तौ भ्रातृभिर्भोगसाम्यम्। अन्यथा मधुविद्योपासकानां प्रायणानन्तरं वस्वादिभावप्राप्तौ 'अष्टौ वसव एकादश रुद्रा' इत्यादिश्रुतिसिद्धवस्वादिसङ्ख्यातिरेकप्रसङ्गात्। दृष्टं च 'वैष्णवं वामनमालभेत स्पर्धमान' इति विधिशेषस्य 'विष्णुरेव भूत्वेमाँल्लोकानभिजयती'त्यर्थवादस्य विष्णुवज्जेतृत्वमात्रपरत्वम्। एवं च 'यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवती'ति तत्क्रतुन्यायेन 'एतदेवामृतं दृष्ट्वा तृप्यती'त्युक्ताया वस्वादिभोगसाम्यप्राप्तेरुक्तरूपामृतभोक्तृवस्वाद्युपासनाफलत्वस्यैव वक्तव्यत्वाद्व- स्वादय एवात्रोपास्याः। 'ब्रह्मोपनिषद'मिति तु वेदोपनिषदमिति व्याख्येयम्। न चैवमपि

प्राणविद्योक्तन्यायेन वस्वादीनां तदुपासनायामधिकारस्स्यादिति वाच्यम्। तदुपासनया तद्भोगसाम्यप्राप्तेस्तत्प्रीतिद्वारत्वस्यौत्सर्गिकत्वेन वस्वादिषु प्रीणयितृत्वप्रीणनीयत्वलक्षणकर्तृकर्मभावविरोधापत्तेः। न हि स्वयमेव स्वात्मानं प्रीणयित्वा प्रीतात्स्वस्मात्फलं लभत इत्यस्ति सम्भवः। प्राणविद्यया तु परमेश्वरप्रीतिद्वारयैव फललाभः। न हि तत्रोपास्यसमभोगप्राप्तिफलश्रवणमस्ति। येन तत्रोपास्यप्रीतिर्द्वारं कल्प्येतेति। भाष्ये 'वस्वादित्वं प्राप्त'मित्यस्य वस्वादीनां यो भोगस्तद्वत्त्वं प्राप्तमित्यर्थः। अत एव प्रा'ग्वस्वादिदेवतानामेवोपास्यत्वात् प्राप्यत्वाच्चे'त्यत्र वस्वादीनामेव प्राप्यत्वमुक्तं न तु वसुत्वादीनाम्। कर्तृकर्मभावविरोधोऽत्र प्रीणयितृप्रीणनीयभावो विवक्षितः।।सू०।। **ज्योतिषि भावाच्च**।।३१।। **साधारण्येन प्राप्तत्वेऽपीति।** मुक्तयर्थित्वाद्यधिकारिविशेषणसाधारण्येन ब्रह्मोपासनेषु मनुष्याणामिव देवानामधिकारित्वेन प्राप्तत्वेऽपीत्यर्थः। अनेन 'तद्देवा ज्योतिषां ज्योति'रित्यस्यार्थवत्त्वाय परिसङ्ख्यापरत्वमभ्युपगन्तव्यं चेद्देवा एव तद्ब्रह्मोपासत इति परिसङ्ख्यापरत्वमस्त्विति शङ्का निरस्ता। अर्थित्वादिसाधारण्येन 'तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्तथा ऋषीणां तथा मनुष्याणा'मिति ब्रह्मविद्याधिकारितया तत्परिसङ्ख्यानस्याशक्यत्वाद्देवास्तद्ब्रह्मैवोपासत इत्येव परिसङ्ख्याभ्युपेतव्येति भावः।।सू०।। **भावं तु बादरायणोऽस्ति हि**।।३२।। **कल्पान्तर इति।** अयमाशयः। वसुत्वादिकमेवात्र प्राप्यं फलम्। 'वसूनामेवैको भूत्वे'त्यादिस्वारस्यात्। न वस्वादिभोगसाम्यमात्रम्। 'विष्णुरेव भूत्वे'त्यत्र तु कस्यचित्पशुयागस्यानुष्ठानमात्रेण विष्णुभावप्राप्तिरत्यन्तमसम्भावितेति बाधकात्तत्साम्यं फलमाश्रीयते। न चात्रापि वस्वादिसङ्ख्यातिरेकप्रसङ्गो बाधकोऽस्तीति वाच्यम्। वर्तमानवस्वाद्यधिकारसमाप्त्यनन्तरं कल्पान्तरे भाविवस्वादिसृष्टिसमये तदन्यतमभावप्राप्तेः फलत्वसम्भवात्। तथासतीदानीं मधुविद्योपासकानां प्रायणानन्तरं फलप्राप्तिर्न स्यादिति चेत्, माभूत्। फलस्वभावपर्यालोचनया स्वर्गस्य वृष्टयान्नाद्यपशुपुत्रादिवदैहिकत्वासम्भवेनेव वस्वादिभावस्येदानीन्तनप्रायणानन्तरभावित्वासम्भवेन विलम्बस्य सह्यत्वात्। न च कल्पान्तरभाविवस्वादिसृष्टिसमये फलाप्राप्त्यभ्युपगमेऽप्यष्टाधिकसङ्ख्येषूपासकेषूपस्थितेषु सर्वेषां वस्वादिभावप्राप्तेर्वक्तव्यतया तत्सङ्ख्यातिरेकप्रसङ्गो बाधकस्स्यादिति वाच्यम्। वस्वादिसङ्ख्याश्रुतिबलेन तत्तदुपासनकर्मणां विपाकक्रमकल्पनोपपत्तेः। प्रलयश्रुतिबलेन भिन्नकालजातानामपि सर्वप्राणिगतदेहादिवियोजककर्मणां विपाकयौगपद्यकल्पनवत्। अन्यथा पूर्वपक्षिणोऽपि वस्तुतो यद्वसुत्वादिप्रापकं कर्माभिमतं तदनुष्ठितवतामष्टाधिकानां युगपदुपस्थितौ सङ्ख्यातिरेकस्यानिवार्यत्वात्। एवं च फलपर्यालोचनयावस्वादीनामेवोपास्यत्वमभ्युपगन्तव्यमित्यस्य सङ्गे सति उपसंहारस्वारस्याद्वस्वाद्यन्तर्यामिपरमेश्वर उपास्य इति युक्तम्। अतो न

पूर्वोक्तदोषप्रसक्तिरिति। उपसंहारस्वारस्यसिद्धमर्थमुपसंहारस्वारस्यं च विविच्य दर्शयितुमुपक्रमते- **कार्यकारणेत्यादिना।** तत्र कार्यावस्थब्रह्मोपासनोपदेशं दर्शयति- **तत्रेति।** आदित्यादिनामादित्यवस्वादीनि नामानि, आदित्यस्य वस्वादिदेवभोग्यमधुत्वेन रूपितं ज्योतिर्मण्डलं रूपं, वस्वादीनां तत्तदमृतभोगाक्षिप्तानि रूपाणि, आदित्यस्य 'पुरस्तादुदेता पश्चादस्तमेते'त्यादिना निर्दिष्टं कृत्यं, वस्वादीनां 'तद्वसव उपजीवन्ती'त्यादिना निर्दिष्टं कृत्यम्। एवंभूतनामादियुक्ततया कार्यभूतेष्वादित्यादिजीवेष्वन्तर्यामितयावस्थितं ब्रह्म तदवस्थमुच्यते। कारणावस्थब्रह्मोपासनोपदेशं दर्शयति- **अथ तत इति।** ब्रह्मदिवसरूपस्य कल्पस्य समाप्त्यनन्तरमुदयास्तमयाभ्यां प्राण्यनुग्रहादूर्ध्वमुदयास्तमयकृत्यरहित इत्यर्थः। कृत्याभावादेव तदुपयोगिरूपराहित्यं तत्प्रवृत्तिनिमित्तनामराहित्यं च फलितम्। **नह वा अस्मा इति।** अस्मै कार्यकारणावस्थब्रह्मविदे नामरूपकृत्ययुक्तदशायामप्यादित्यो नोदेति तत्प्रयुक्तप्रकाशानपेक्षणात्। नास्तमेति तत्प्रयुक्तज्ञानप्रतिबन्धाप्रसङ्गात् किं त्वस्मै ब्रह्मविदे सकृद्दिवैव भवति सदैवाहर्भवति सन्ततमनावृतसर्वविषयज्ञानप्रकाशोऽस्य भवतीत्यर्थः। अस्मा इत्युक्तं कस्मा इत्याकाङ्क्षायामुच्यते- य **एतामिति।** ब्रह्मोपनिषदं ब्रह्मविद्यां वेद ब्रह्मोपासनं करोतीत्यर्थः। अथवोपनिषच्छब्दोऽत्र ब्रह्मगतोपासनाविषयप्रागुपदिष्टरहस्यधर्मजातवाची। एवमुपसंहारे ब्रह्मप्राप्तिफलश्रवणात् ब्रह्मविद्यात्वश्रवणाच्च वस्वादिशब्दा वस्वाद्यन्तर्यामिपरा इति तदुपासनायां वस्वादीनामधिकारस्सम्भवतीति अवान्तरचिन्तोपसंहारपूर्वकमधिकरणार्थमुपसंहरति- **तत इति।** मध्वादिष्वित्यादिशब्देन संवर्गविद्यादिसंग्रहः। संवर्गविद्यायाः परब्रह्मविद्यात्वमनन्तराधिकरणे जानश्रुत्युपाख्याने स्पष्टीभविष्यति। वस्वादीनामधिकारोऽस्तीति विशिष्य चिन्तितार्थस्योपसंहारे कर्तव्ये सामान्येन देवानामधिकारोऽस्तीत्युक्तिराशङ्कान्तरनिराकरणार्था। अत्रेत्थमाशङ्कान्तरं समुन्मिषति। मधुविद्यायां वस्वादीनामधिकारसम्भवेऽपि ये वस्वादिपदादुत्कृष्टे पदे स्थिता इन्द्रादयः तेषां तस्यामधिकारो न स्यात्। उत्कृष्टपदे स्थितानामपकृष्टपदप्राप्तिपूर्वकमुक्त्यर्थित्वासम्भवात् इन्द्राद्युत्कृष्टपदप्राप्तिपूर्वकमुक्तिफलानां ब्रह्मविष्ण्वादिप्रतीकपरमेश्वरोपासनानां किञ्चित्प्राप्तिव्यवधानरहितमुक्तिफलानामप्रतीकपरमेश्वरोपासनानां च सत्त्वादिति। तत्रेदमुत्तरमभिमतम्। हैरण्यगर्भान्तसकलभोगविरक्तस्य ब्रह्मानन्दैकप्रेप्सोर्मोक्ष्यमाणस्य उत्कृष्टपदप्राप्तिपूर्वकमुक्तिफलास्वपि विद्यासु नोत्कृष्टपदार्थित्वेन प्रवृत्तिरुपपादयितुं शक्येत्यानुषङ्गिकतया भवत्सु फलान्तरेषु अनर्थिनामेव मुक्तिमात्रार्थितया प्रवृत्तिरुपपादनीया। सेन्द्रादीनामपि मधुविद्यादिषूपपादयितुं शक्येति। मैवम्। उपकोसलविद्यायामपि देवानामधिकार उपपादनीयः। तस्यामपि ह्येवं शङ्का स्यात्। तस्यामग्निविद्यास्तावदङ्गानि तासामवान्तरफलमुक्तमग्निलोकप्राप्तिः तत्राग्निभिः परिपाल्यत्वं च।

सर्वमिदं' मन्तरउपपत्ते 'रित्यधिकरण एव दर्शितम्। तथाभूतावान्तरफलार्थित्वमग्नेस्तदुत्कृष्टदेवानां च न सम्भवतीत्यङ्गानुष्ठानरहितानां देवतानां प्रधाने नाधिकार इत्युक्तरीत्यैव तस्यामप्यधिकारस्सिद्ध्यति। नन्वेवमपि देवतानां ब्रह्मविद्याधिकारो न सम्भवति तदङ्गभूतार्चिरादिगत्यनुस्मरणासम्भवात् 'तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारोविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीत-श्शताधिकये'ति (४-२-१६) सूत्रेहि सूत्रकारएव गत्यनुस्मरणस्य विद्याङ्गत्वं वक्ष्यति। 'योगिनः प्रति स्मर्यते स्मार्ते चैते' इति (४-२-२०) सूत्रे च 'अग्निर्ज्योतिरहश्शुक्लषण्मासा उत्तरायणम्। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः।' इति श्लोकस्य योगिनां विद्याङ्गतयानुदिनस्मर्तव्यायामर्चिरादिगतौ तात्पर्यं वक्ष्यति। न चाग्न्याद्यातिवाहिकदेवतागण-युक्तगत्यनुस्मरणमग्न्यादित उपरि स्थितानामादित्यादीनां सम्भवति। चाग्न्यादीनामातिवाहिका अन्येऽग्न्यादयस्सन्ति 'यावदधिकारमवस्थितिराधिकारिकाणा' मित्यधिकरणोक्तन्यायेन कल्पावसाने मुच्यमानेषु तेषु भाविकाले स्रक्ष्यमाणानामन्येषाग्न्यादीनामभावात्। तथा च यथा देवतानामुद्देश्यदेवतान्तराभावेन यागनिवृत्त्यसम्भवात् कल्पादौ सृष्टानामृषीनां वरणीयऋष्यन्तराभावेन आर्षेयवरणरूपाङ्गान्तरासम्भवाच्च न यागेष्वधिकारः। एवं देवतानामातिवाहिकदेवतान्तराभावेन गत्यनुस्मरणरूपाङ्गासम्भवात् विद्यासु नाधिकार इत्येव युक्तमित्याशङ्क्याह-**सर्वथेति।** यद्यातिवाहिकगणसहितार्चिरादिगतिस्मरणमदृष्टार्थं तदाग्न्यादयोऽपि स्वस्वान्तर्भावेनान्येषां मुच्यमानानामातिवाहिकेन गणेन सहितानां स्मरिष्यन्ति। यदि त्वेवंभूतेन मार्गेण निरतिशयानन्दशालिपदमथानया विद्यया प्राप्यमिति स्मरणमहरहःकर्तव्यायामुपासनायामृत्विग्भिरेव हविश्शेषस्य भक्षणं तेषां करिष्यमाणकर्मसन्तताविवोत्साहजननार्थं तदाग्न्यादयस्स्वस्वानपेक्षितगत्यंशं विहायापेक्षितं स्वस्वपदानामुपरिस्थितं गत्यंशं स्मरिष्यन्ति, यथा ऋत्विजोऽश्वमेधादिष्वनेकपशु-प्रभवहविश्शेषमध्येऽनपेक्षितांशं विहायापेक्षितांशं भक्षयन्ति मृतयजमानकेष्टिकर्मणि सूक्तवाके यजमानस्यायुराशासनाद्यभावादनपेक्षितमायुराशास्त इत्यादिकमंशं विहायापेक्षितांशं पठन्ति। सर्वथा गत्यनुस्मरणस्यादृष्टार्थत्वे च देवानामपि तत्संभवतीति तेषां विद्याधिकारो युज्यत इति भावः। ननु, देवानां ब्रह्मविद्याधिकारचिन्ता नास्मदादीनां प्रवृत्तावुपयुक्ता नापि देवानाम्। तेषां स्वकीये विग्रहवत्त्वे तत्प्रयुक्तसामर्थ्यादिमत्त्वे च सिद्धान्तन्यायनिरपेक्षमेवावगतिसद्भावात्। न च, देवास्स्वपदानि नित्यान्यनपायीनीति मुक्त्यसम्भवशङ्कया तत्र न प्रवर्तन्ते। सा च शङ्का तेषामित्थं सम्भाविता। स्वपदानामनित्यत्वे वैदिकेन्द्रादिशब्दविरोधः प्रसज्येतेति नित्यान्येव स्वपदानि प्रलयेषु तत्तत्स्थानिनो विग्रहाणां च नाशे सति परमेश्वरेण तानि सृष्ट्वा यथापूर्वं स्वेभ्य एव दीयन्ते प्रलयव्यवहितत्वात्स्वकीयपूर्वकल्पवृत्तान्तास्मृतिरिति। अतस्तेषामुपासनासु प्रवृत्तावुपयुक्तेयं चिन्तेति

वाच्यम्। तेषां पूर्वकल्पाधीतवेदतदर्थस्मृतिमतां सदा पारिजाततरुनिक टवर्तिनां च जातिस्मरत्वेन प्राचीनब्राह्मणजन्माद्यनुष्ठितसत्कर्मायत्तं स्वपदं न नित्यमिति स्वत एवावगतिसत्त्वात्। न चास्मदादीनामेव देवोपास्यत्वेन ब्रह्मोपासनसिद्धावुपयुक्ता। उपासनाप्रकरणेषु देवोपास्यत्वविशेषसत्त्वे द्युमूर्धत्वादिवदारोपितेनापि तेन रूपेणोपासनोपपत्तेरिति चेदुच्यते। देवता न सन्तीति व्यवस्थितौ मधुविद्यादीनां तत्तद्देवतापदप्राप्तिः फलं न भवेत्। वरुणग्रहनिर्मोकादिवत् बाधितस्य श्रुतत्वेऽपि विधेयक्रियाफलत्वायोगात्। किं तु अन्यदेव फलं कल्प्यं स्यात्। अन्तरादित्यविद्यादिष्वादित्यदेवताद्यन्तर्वर्तित्वेन ब्रह्मोपासनं न सिध्येत्। ज्योतिर्मण्डलाद्यन्तर्वर्तित्वेनैव तदुपासनं सिद्ध्येत्। गत्यनुस्मृतावचेतनानि अर्चिरादीन्येव मार्गपर्वत्वेन स्युः। आतिवाहिकदेवतादेवताश्चिन्तनीया न स्युः। 'भाक्तं वानात्मवित्त्वादि'ति (३-१-७) सूत्रोक्तन्यायेन ज्योतिष्टोमादिकर्मफलं भुञ्जानानां निरन्तराजानदेवकर्मकरभावावगत्या वैराग्यं न सिद्ध्येत्। न तादृशस्याभिमतस्य सिद्धिः प्रयोजनं, देवतान्तरसद्भावप्रसाधनस्य मन्त्रार्थवादाः प्राप्तिविरोधयोरसतोः प्रतीयमानेऽर्थे प्रामाण्यं न जहतीति ह्येतासां विग्रहप्रसाधनोपयोगिन्यायप्रतिपादनस्यापि 'पल्वा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरांमृत्युं ते पुनरेवापियन्ति। जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न सम्पूर्यते तस्साज्जुगुप्सेते' त्यादिमन्त्रार्थवादैः विवेकवैराग्यादिकं सिद्ध्यतीति प्रदर्शनमपि प्रयोजनमित्याद्यूह्यम्। ।। इति देवताधिकारणम्।।७।।

अथ अपशूद्राधिकरणम्।।८।।

उत्तराधिकरणस्याङ्गुष्ठाधिकरणेन सङ्गतिमाह—**अथेति।** यदि 'हृद्यपेक्षये'ति सूत्रे मनुष्यग्रहणं मनुष्याणामेव ब्रह्मविद्याधिकार इत्येतदर्थं न भवति तत्र देवानामप्यधिकारसद्भावात्, तर्हि मनुष्याणां सर्वेषां तत्राधिकारोऽस्तीत्येतदर्थं तद्भवेत्। अन्यथा तद्वैफल्यप्रसङ्गात्। ततश्च शूद्रसाधारण्येन मनुष्याणां तत्राधिकार इति प्राप्नोति। तत्र शूद्रापवादेन विशेषप्रदर्शनार्थमुत्तराधिकरणामारभ्यत इत्यर्थः। इयमपि प्रासङ्गिकी सङ्गतिः।।सू०।। **शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि।।३३।।**

इति शिवार्कमणिदीपिका देवताधिकरणम् समाप्तम्

अथ अपशूद्राधिकरणम्। ॥सू० ३४-३८॥

शाङ्करभाष्यम्

***शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि*॥३४॥**

यथा मनुष्याधिकारनियममपोह्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतामाशङ्कां निवर्तयितुमिदमधिकरण-मारभ्यते। तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तम्; अर्थित्वसामर्थ्ययोः सम्भवात्, ''तस्माच्छूद्रो यज्ञेऽनवक्लृप्त'' (तै० सं० ७/१/१६) इतिवत् ''शूद्रो विद्यायामनवक्लृप्तः'' इति च निषेधाश्रवणात्। यच्च कर्मस्वनधिकारकारणम्–शूद्रस्यानग्नित्वम्, न तद्विद्यास्वधिकारस्यापवादकं लिङ्गम्। न ह्याहवनीयादिरहिते न विद्या वेदितुं न शक्यते। भवति च लिङ्गं शूद्रस्याधिकारस्योपोद्बलकम्। संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति–''अह हारेत्वा शूद्र तवैव सह गोभिरस्तु'' (छा० ४/२/३) इति। विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसम्पन्नाः स्मर्यन्ते। तस्मादधिक्रियते शूद्रो विद्यास्विति॥ एवं प्राप्ते ब्रूमः–न शूद्रस्याधिकारः ; वेदाध्ययनाभावात्। अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते। न च शूद्रस्य वेदाध्ययनमस्ति; उपनयनपूर्वकत्वाद्वेदाध्ययनस्य। उपनयनस्य च वर्णत्रयविषयत्वात्। यत्त्वर्थित्वम्, न तदसति सामर्थ्येऽधिकारकारणं भवति। सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति; शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षिततत्वात्, शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात्। यच्चेदम्–''शूद्रो यज्ञेऽनवक्लृप्तः'' इति, तन्न्यायपूर्वकत्वाद्विद्यायामप्यनवक्लृप्तत्वं द्योतयति; न्यायस्य साधारणत्वात्। यत्पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिङ्गं मन्यसे, न तल्लिङ्गम्; न्यायाभावात्। न्यायोक्ते हिं लिङ्गदर्शनं द्योतकं भवति। न चात्र न्यायोऽस्ति। कामं चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्यात्; तद्विषयत्वात् न सर्वासु विद्यासु। अर्थवादस्थत्वात्तु न क्वचिदप्ययं शूद्रमधिकर्तुमुत्सहते। शक्यते चायं शूद्रशब्दोऽधिकृतविषयो योजयितुम्।

कथमित्युच्यते-''कंवर एनमेतत्सन्तं सयुग्वानमिव रैकमात्थ'' (छा॰ ४/१/३) इत्यस्माद्धंसवाक्यादात्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे, तामृषी रैक्कः शूद्रशब्देनानेन सूचयाम्बभूवात्मनः परोक्षज्ञताख्यापनायेति गम्यते; जातिशूद्रस्यानधिकारात्। कथं पुनः शूद्रशब्देन शुगुत्पन्ना सूच्यत इति? उच्यते-तदाद्रवणात्। शुचमभिदुद्राव, शुचा वाऽभिदुद्रुवे, शुचा वा रैक्कमभिदुद्रावेति शूद्रः ; अवयवार्थसम्भवात्रूढयर्थस्य चासम्भवात्। दृश्यते चायमर्थो-ऽस्यामाख्यायिकायाम्।।३४।।

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्।।३५।।

इतश्च न जातिशूद्रो जानश्रुतिः। यतकारणं प्रकरणनिरूपणेन क्षत्रियत्वमस्योत्तरत्र चैत्ररथेनाभिप्रतारिणा क्षत्रियेण समभिव्याहाराल्लिङ्गाद् गम्यते। उत्तरत्र हि संवर्गविद्यावाक्यशेषे चैत्ररथिरभिप्रतारी क्षत्रियः संकीर्त्यते-''अथ ह शौनकं च कापेयमभिप्रतारिणं काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी विभिक्षे'' (छा॰ ४/३/५) इति। चैत्ररथित्वं चाभिप्रतारिणः कापेययोगादवगन्तव्यम्। कापेययोगो हि चित्ररथस्यावगतः ''एतेन वै चित्ररथं कापेया अयाजयन्'' (ताण्डयब्रा॰ २०/१२/५) इति। समानान्वयानां च प्रायेण समानान्वया याजका भवन्ति। ''तस्माच्चैत्ररथिनामैकः क्षत्रपतिरजायते'' इति च क्षत्रपतित्वावगमात्क्षत्रियत्वमस्यावगन्तव्यम्। तेन क्षत्रियेणाभिप्रतारिणा सह समानायां विद्यायां सङ्कीर्तनं जानश्रुतेरपि क्षत्रियत्वं सूचयति। समानानामेव हि प्रायेण समभिव्याहारा भवन्ति। क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वावगतिः। अतो न शूद्रस्याधिकारः।।३५।।

संस्कारपरामर्शात्तदभावाभिलापाच्च।।३६।।

इतश्च न शूद्रस्याधिकारः, यद्विद्याप्रदेशेषूपनयनादयः संस्काराः परामृश्यन्ते-''तं होपनिन्ये'' (श॰ ब्रा॰ ११/५/३/१३)। ''अधीहि भगवः'' ''इति होपससाद'' (छा॰ ७/१/१) ''ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः'' (प्र॰ १/१) इति च। ''तान्हानुपनीयैव'' (छा॰ ५/११/७) इत्यपि प्रदर्शितैवोपनयनप्राप्तिर्भवति। शूद्रस्य संस्काराभावोऽभिलप्यते; ''शूद्रश्चतुर्थो वर्ण एकजातिः'' (मनु॰ १०/४) इत्येकजातित्वस्मरणात्। ''न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हती'' (मनु॰ १०/१२/६) इत्यादिभिश्च।।३६।।

***तदभावनिर्धारणे च प्रवृत्तेः*।।३७।।**

इतश्च न शूद्रस्याधिकारः। यत्सत्यवचनेन शूद्रत्वाभावे निर्धारिते जाबालं गौतम उपनेतुमनुशासितुं च प्रववृते–''नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोपत्वा नेष्ये न सत्यादगाः'' (छा॰ ४/४/५) इति श्रुतिलिङ्गात्।।३७।।

***श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च*।।३८।।**

इतश्च न शूद्रस्याधिकारः। यदस्य स्मृतेः श्रवणाध्ययनार्थप्रतिषेधो भवति। वेदश्रवणप्रतिपेधो वेदाध्ययनप्रतिषेधस्तदर्थज्ञानानुष्ठानयोश्च प्रतिषधः शूद्रस्य स्मर्यते। श्रवणप्रतिषेधस्तावत् ''अथास्त वेदमुपश्रृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्'' इति। ''पद्यु ह वा एतच्छमशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतब्यम्'' इति च। अत एवाध्ययनप्रतिषेधः। यस्य हि समीपेऽपि नाध्येतव्यं भवति, स कथमश्रुतमधीयीत? भवति च वेदोच्चारणे जिह्वाच्छेदो, धारणे शरीरभेद इति। अत एव चार्थादर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति–''न शूद्राय मतिं दद्यात्'' इति, ''द्विजातीनामध्ययनमिज्या दानम्'' इति च। येषां पुनः पूर्वकृतसंस्कारवशद्विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिस्तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुम्; ज्ञानस्यैकान्तिकफलत्वात्। ''श्रावयेच्चतुरो वर्णान्'' इति चेतिहास-पुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात्। वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितम्।।३८।। इति नवममपशूद्राधिकरणम्।।

इति शाङ्करभाष्यम् अपशूद्राधिकरणम् समाप्तम्

वार्तिकम्

युज्यत इत्यर्थः।। हिना प्रयोजनं सूचयति– *क्रममुक्तिदर्शनानयप्येवमेवोपपद्यन्त इति*।। क्रममुक्तये दर्शनानि क्रममुक्तिदर्शनानि; क्रममुक्तिफलकान्युपासनानीत्यर्थः।।३३।। इत्यष्टमं देवताधिकरणम्।।

शुगस्य तदनादरश्रणात्दाद्रवणात् सूच्यते हि।।३४।। अत्र वेदान्तेभ्यः श्रवणादिपुरस्सरमुपसद्यमानायां ब्रह्मविद्यायामत्रैवर्णिकदेवादीनामिवात्रैवर्णिकशूद्रस्याप्यधिकारोऽस्ति, न वा, इति चिन्त्यते। न; ब्रह्मविद्यामात्रे तदर्थित्वादेः शूद्रस्यापि विद्यमानत्वात्, वेदान्तश्रवणानधिकारेऽपि पुराणादिश्रवणे तदधिकारसत्त्वात् "श्रवयेञ्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः"।। इति भारतवचनात् तद्द्वारा जायमानाया ब्रह्मविद्यायास्तस्यापोदितुमशक्यत्वात्, विदुरधर्मव्याधादेर्ब्रह्मज्ञानित्वसमरणाञ्च। ननु–भवत्वेवम्, नेयं चिन्ता सङ्गच्छ्रते; शूद्रस्यानुपनीतत्वेनाध्ययनाद्यभावनिश्चयात्, तत्प्रतिषेधकश्रुतिसमृतिभ्यां च तज्जनितब्रह्मविद्यायास्तत्र संभावयितुमशक्यत्वात् संशयानुपपत्तेः, देवादीनां चानुपनीततयाऽध्ययनाभावेऽपि स्वयम्प्रतिभातवेदत्वात् तद्द्वारा तदधिकारोपपत्तेरुक्तत्वात्। अत उक्तशङ्काया अनवतराद् अनारम्भणीयमेतदधिकरणमिति।।

अत्र केचित्–अध्ययनस्य प्रधानकर्मत्व-संस्कारकर्मत्वसंशयेन संशयमुपपादयन्ति–यद्यध्ययनस्य प्रधानकर्मत्वम्, तदा तत्र शूद्रस्याधिकाराभावेऽप्युपायान्तरेण गृहीताद्वेदाद्र ब्रह्मविद्योत्पादनमविरुद्धम्। अथ संस्कारकर्मत्वम्, तदोपायान्तरेण तद्ग्रहानुपपत्तेर्न तस्य तद्वारा विद्योत्पादनम्–इति, तन्न युक्तम्; महता प्रबन्धेन पूर्वतन्त्रेऽध्ययनसंस्कारकर्मत्वस्य स्थापितत्वात् तत्संशयानुपपत्तेः, अन्यथा पौनरुक्त्यापत्तेः, अविशेषेण कर्मण्यपि पुनः शूद्रस्याधिकारसंशयानापत्तेश्च।।

तत्रोच्यते–अधिकायाः शङ्कायाः सत्त्वात् संशयोपपत्तेः। यद्यन्यार्थदर्शनबलेन

मनुष्यमात्राधिकारमपोह्य देवाद्यधिकारो ब्रह्मविद्यायां समर्थितः, हन्त तर्हि मनुष्येषु त्रैवर्णिकमात्राधिकारमपोह्य शूद्राधिकारोऽपि समर्थ्यताम्। अस्ति च प्रकृते शूद्राधिकारप्रतिपादकमन्यार्थदर्शनम्–"अह हारे त्वा" इति शूद्रत्वेन परामृशन् अविशेषेण सर्वविद्यासु जातिशूद्रमधिकारिणमनुजानाति; शूद्रशब्दस्य जातिशूद्रे रूढत्वात्। न चाध्ययनादिप्रतिषेधात् तस्यानधिकारः, तत्प्रतिषेधशास्त्रस्य यज्ञभागाध्ययननिषेधाभिप्रायेणाप्युपपत्तेस्तेन विद्यानधिकाराबोधनात्, "तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः" इतिवद् 'विद्यायामनवक्लृप्त' इत्यश्रवणाद् उक्तलिङ्गविरोधाच्च तत्संकोचोपपत्तेः। स्मर्यन्ते च विदुरधर्मव्याधप्रभृतयो जातिशूद्रा विशिष्टज्ञानसंपन्नाः। न तु एतेषां पुराणादिद्वारैव ज्ञानम्, न वेदद्वारेति किञ्चिद् नियामककारणमस्ति; "तं त्वौपनिषदम्" "नावेदविन्मनुते तं महान्तम्" इत्यादिश्रुतिव्याकोपापत्तेश्च। तस्मादप्यस्ति शूद्रस्य ब्रह्मविद्यायामधिकारः–इत्यधिकाशङ्का। अनेन पूर्वपक्षभाष्यमपि व्याख्यातं भवतीति द्रष्टव्यम्। तामिमामाशङ्कामर्थवादलिङ्गस्यान्यथोपपत्तिं दर्शयन् निराकरोति भगवान् *सूत्रकारः–शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते इति*॥

अयमभिप्रायः–न जातिशूद्रस्य वेदान्तजन्यब्रह्मविद्यायामधिकारो वक्तुं शक्यते; तस्योपनयनाभावेन वेदाध्ययनाभावात्, अधीतोपनिषत्कस्य विदितपदतदर्थस्यैव ब्रह्मजिज्ञासायामधिकार इत्युक्तं प्रथमसूत्रे। न च–उपनयनाभावेऽपि स्थपत्यधिकरणन्यायेन विद्योपयोगियावद्वेदभागाध्ययने शूद्रस्य विद्यार्थिभावो भविष्यतीति–वाच्यम्; तस्य तदध्ययनश्रवणधारणादिप्रतिषेधस्य पृथक्सत्त्वेन तन्यायाप्रसरात्। न च–"तस्मात् शूद्रो यज्ञेऽनवक्लृप्तः" इतिवद् 'विद्यायां नावक्लृप्तः' इत्यश्रवणाद् अर्थवादलिङ्गाच्च शूद्रस्य वेदाध्ययनादिप्रतिषेधश्रुतेर्यज्ञभागाध्ययनादिप्रतिषेधाभिप्रायत्वमिति–वाच्यम्; "तस्माच्छूद्रो यज्ञेऽनवक्लृप्त" इति सिद्धवदभिधानस्य न्यायपूर्वकत्वेनोक्तप्रतिषेधोपजीवनात् तत्संकोचकत्वानुपपत्तेः। इयं हि निगमनसरूपा श्रुतिः सिद्धवत् यज्ञेऽसामर्थ्यमनुवदन्ती स्वमूलन्यायमपेक्षते। स च न्यायः शूद्रस्याध्ययनादिसंस्काराभावलक्षणः प्रतिषेधशास्त्रोपात्तो यज्ञ इव विद्यायामपि साधारणः। अतो यज्ञपदस्य हविरुभयत्ववदविशेषकत्वेनोपलक्षणत्वाद् न तेन प्रतिषेधश्रुतेः सङ्कोचः संभवति; उपजीव्यविरोधात्। तदिदमुक्तम्–*यच्चेदं शूद्रो यज्ञेऽनवक्लृप्त इति, तद् न्यायपूर्वकत्वाद् विद्यायामनवक्लृप्तत्वं द्योतयति; न्यायस्य साधारणत्वादिति*॥ एतेन–अर्थवादलिङ्गस्य तत्संकोचकत्वम्–प्रत्याख्यातम्; श्रुतिविरोधेन तस्यैवानुदयात्, अन्यार्थदर्शनरूपलिङ्गस्य बाधकाभावलक्षन्यायसाम्येन सापेक्षत्वाच्च, प्रकृते च तदभावाद् देवाद्यधिकारोपपत्तेरिति। तदिदमुक्तम्–*न तल्लिङ्गम्; न्यायाभावादिति*॥ अपि चास्तु वैतल्लिङ्गम्; तथापि संवर्गविद्याधिकारिणि प्रयुज्यमानः शूद्रशब्दस्तत्रैव तस्याधिकारं साधयेत्। न च–विद्यात्वाविशेषेण सर्वासु तत्प्राप्तिरिति–वाच्यम्; कर्मविद्यायां व्यभिचारात्, स्थपत्यधिकरणन्यायविरोधाच्च,

निषादस्याप्येतन्यायेन सर्वकर्माधिकारप्रसङ्गात्। अभ्युपेत्येदमुक्तम्। वस्तुतस्तु स्थपत्यधिकरण-न्यायोऽप्यत्र न संभवति; वैषम्यात्। तत्र हि ''एतया निषादस्थपतिं याजयेत्'' इत्यधिकारवाक्ये श्रुतो निषादस्थपतिशब्दस्तमधिकुर्यात्, ''ब्राह्मणो बृहस्पतिसवेन यजेत'' इत्यत्र ब्राह्मणशब्द इव ब्राह्मणम्, अत्र त्वर्थवादवाक्यगतः शूद्रशब्दः, अतो न संवर्गविद्यायामपि शूद्रमधिकर्तुमुत्सहते। न ह्यर्थवादगतो नामशब्दः स्वार्थस्याधिकारहेतुर्भवति; तथा सति प्रस्तरस्यापि यजमानत्वप्रसङ्गात्। ननु-अर्थवादगतस्यापि नामपदस्य किञ्चिदालम्बनं वाच्यम्; निरालम्बनत्वे स्तुत्यनुपपत्तेः, सत्यम्; अस्ति च प्रकृतं तदालम्बनम्; रूढ्यर्थस्यासंभवेऽपि प्रकृतविद्याधिकारिणि जातिक्षत्रिये शूद्रशब्दस्य योगेन प्रवर्तनात्। कथम्? उच्यते; अस्य=जातिक्षत्रियस्य जानश्रुतेः ''कंवर एनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थे'' ति हंसानां स्वविषयकनिन्दावचनश्रवणात् शुक् उत्पन्ना। तथाच शुचा रैक्वस्य गुरोरभिद्रवणात् शूद्र इति योगं पुरस्कृत्य रैक्वर्षिर्जानश्रुतेः शोकं शूद्रशब्देन सूचयामास स्वस्य परोक्षज्ञतासूचनाय। तत्सूचनेन तु विद्या स्तुता भवति--महाभागधेया संवर्गविद्या, यद्बलात् सर्वज्ञता संपन्ना-इति॥३४॥

क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात्॥३५॥ इतश्च जानश्रुतिर्न जातिशूद्रः। कुतः? क्षत्रियत्वगतेः=वाक्यशेषे श्रूयमाणेन चैत्ररथिनाभिप्रतारिणा जातिक्षत्रियेण समभिव्याहारो दृष्टः। अतो निश्चितक्षत्रियभावेनाभिप्रतारिणा समभिव्याहारात् सन्दिग्धक्षत्रियभावस्य जानश्रुतेः क्षत्रियत्वमध्य-वसीयते; ''विशये प्रायदर्शनात्'' इति न्यायात्। अभिप्रतारिणोऽशूद्रत्वं च ब्रह्मचारिभिक्षायोगात्, चैत्ररथित्वाच्च। चैत्ररथित्वं च कापेययोगात्, ''एतेन वै चित्ररथं कापेया अयाजयन्नि'' ति श्रुतेः, समानान्वयिनोरेव प्रायेण यजमानपुरोहितभावदर्शनात्, ''तस्मात् चैत्ररथिर्नामैकः क्षत्रपतिरजायते'' ति श्रुतेश्चैत्ररथस्य क्षत्रियत्वावगमादिति। स्वयं भाष्यकारो जानश्रुतेः क्षत्रियत्वे लिङ्गान्तरमाह-क्षत्तृप्रेषणाद्यैश्वर्ययोगाच्चेति*॥ आदिशब्देन बहुदेयत्वबहुवाक्यत्वादेर्ग्रहणम्॥३५॥

संस्कारपरामर्शात्तदभावाभिलापाच्च॥३६॥ यदुक्तम्-विद्योपयोगिनं वेदभागमनुपनीत एव शूद्रो निषाद इव विहितेष्ट्युपयोगिनं वेदभागमध्येष्यति-इति, तदनेन सूत्रेण परिह्रियते। सूत्राक्षर व्याख्यानं तु भाष्ये। ननु-''तान् हानुपनीयैवे'' त्यत्रानुपनीतानामपि ब्रह्मविद्याधिकारश्रवणमस्ति, तत्राह- *तान् हानुपनीयेत्यपीति*॥३६॥

तदभावनिर्धारणे च प्रवृत्तेः॥३७॥ *श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च*॥३८॥ इति सूत्रद्वयं तु निगदव्याख्यातेन भाष्येण व्याख्यातम्॥३७॥३८॥ इति नवममपशूद्राधिकरणम्॥

इति वार्त्तिकम् अपशूद्राधिकरणम् समाप्तम्

प्रदीपः

शूगस्य तदनादरश्रवणात् तदाद्रवणात्सूच्यते हि।।३४।। अथ यथावसरं शूद्राणां वेदान्तद्वारा ब्रह्मविद्यानधिकारं व्यवस्थापयितुमिदमधिकरणमपशूद्राधिकरणं नाम। तत्र देवादीनाममुपनीतानामप्युपनिषदध्ययनमात्रोपसरणादिवत् शूद्रादीनामप्यर्थित्वसामर्थ्यादि-सत्त्वादुपनयनेन वेदान्ताध्ययनसंभवाद् ब्रह्मविद्याधिकारमाशङ्क्य निरासात् प्रत्युदाहरणसङ्गतिः।।

अत्र भामतीकाराः–अध्ययनप्रधानकर्मत्व संस्कार्यकर्मत्वसंशयेन संशयमुपपादयन्ति–यद्यध्ययनस्य प्रधानकर्मत्वम्, तदा तत्र शूद्रस्याधिकाराभावेऽपि प्रकारान्तरेण गृहीतवेदाद्ब्रह्मविद्योत्पादनमविरुद्धम्, अथ संस्कार्यकर्मत्वम्, तदोपायान्तरेण तद्ग्रहानुपपत्तेर्न तस्य तद्द्वारा विद्योत्पादनम्–इति।।

इदमत्र वार्तिकम्–तन्न युक्तम्; महाप्रबन्धेन पूर्वतन्त्रेऽध्ययनसंस्कारकर्मत्वस्य स्थापितत्वात् तत्संशयानुपपत्तेः, अन्यथा पोनरुक्त्यापत्तेः, अविशेषेण कर्मण्यपि पुनः शूद्रस्यधिकारसंशयापत्तेश्च–इति।

इदमेवात्रालोचनीयम्–यदि संस्कारकर्मत्वं पूर्वतन्त्र एव व्यवस्थापितम्, तर्हि तावता किं मन्यते? यदि वेदाध्ययनासंभवेनानधिकारः पूर्वतन्त्रेणैव सिद्ध इति, तर्हि ''न शूद्रस्याधिकारः ; वेदाध्ययनाभावादि'' ति भाष्यं किमर्थम्? यदि पूर्वतन्त्रार्थानुवादपरम्, तर्हि भामतीकाराणामपि तदनुवादो विवरणप्रसङ्गेन कथमनुचितः? वस्तुतस्तु–पूर्वोत्तरमीमांसयोर्भिन्नशास्त्रत्वात् स्वतन्त्रमेव भाष्यकारेण तदपि–''श्रवणाध्ययनार्थप्रतिषेधाच्चे''ति वक्ष्यमाणसूत्रार्थ एवात्र सिद्धान्तोपयोगितया मन्यत इत्यवश्यमूरीकर्तव्यम्; अन्यथा ''श्रवणाध्ययनार्थप्रतिषेधाच्चे'' ति सूत्रवैयर्थ्यापत्तेरिति नात्र पौनरुक्त्यशङ्कापि। एतेन–कर्मण्यपि पुनः शूद्रस्याधिकारसंशयापत्तिरपि–नावसरति; पूर्वतन्त्रैणैव तस्य निरासात्, अत्रापि श्रवणार्थेतिवेदमात्राध्ययनाद्यनधिकारानुवादाच्चेति न कोऽपि दोषः। यद्यपि संशयनिरूपणावसरे भाष्य इदमपि संशयबीजं न संगृहीतम्; तथापि पूर्वपक्षसिद्धान्तयोरस्यापि

हेतोरुपन्यासात् तस्योपलक्षणत्वं स्वीकर्तव्यम, असाधारणं तु पूर्वपक्षबीजं शूद्रेत्यामन्त्रणमेवेति मत्वा भाष्ये ''भवति च लिङ्गमि'' त्यादिवाक्यं प्रवृत्तम्। अत्र भवति चेति चकारादुक्तलिङ्गनिबन्धनाधिकाशङ्कापि सूच्यते। अनेन हि लिङ्गेन ब्रह्मविद्येतरविषयत्वमध्ययनश्रवणादिनिषेधस्याभिप्रेयते, इति बीजान्तरमप्युपबृंह्यते।।

वस्तुतस्तु–संवर्गविद्यामात्राधिकार एवेदं लिङ्गम्, न ब्रह्मविद्यामात्राधिकार इति भामत्यभिमतः प्रकार एवात्र ज्यायान्। एतेन–अत्र संवर्गविद्याधिकारिणं जानश्रुतिं शूद्रत्वेन परामृशन् अविशेषं सर्वविद्यासु जातिशूद्रमधिकारिणमनुजानातीति शङ्कोद्भावनमपि–व्याख्यातम्। अनेन यदि ब्रह्मविद्या, जातिशूद्राधिकारिका, विद्यात्वात्, संवर्गविद्यावदिति मन्यते, तर्हि दृष्टान्तासिद्धिः ; मध्वादिष्वसंभवादिति न्यायाप्रसरात्। संवर्गविद्यामात्राधिकारसमर्थने च सर्वविद्यास्वधिकारसाधकत्वं नास्य लिङ्गस्य युक्तमिति मन्तव्यम्। अस्तु वा कथञ्चन मध्वादिष्वसंभवादिति न्यायेनैवात्र शूद्राधिकारसमर्थनम्, एवमप्यधीतवेदान्तत्वं तस्य कथं वा भविष्यत्यध्ययनविधेः संस्कारकर्मपरत्वे? न हि विनापि वेदान्ताध्ययनं ब्रह्मविद्याधिकारसाधनमत्र विवक्षितम्; पुराणादिद्वारा विदुरादीनामिव ब्रह्मविद्याधिकारस्य सिद्धान्तेऽपि स्वीकारेण प्रयोजनभेदाभावेनाधिकरणवैयर्थ्यात्। तथाच सर्वस्यापि भाष्यसन्दर्भस्य भामत्यभिमतमपि गृहीत्वैव संशयप्रदर्शनपरत्वं स्वीकर्तव्यम्। अत्र मधुविद्यामादाय देवतानधिकाराविचारः, तत्रादिपदगृहीतसंवर्गविद्यामादाय शूद्राधिकारविचारः, इति विषयवाक्ययोरपि प्रसङ्गसङ्गतिर्वर्तते। ''कंवर एनमेतत् सन्तं सयुग्वानमिव रैक्कमात्थे'' ति हंसवाक्यश्रवणेन शुग् जानश्रुतेः सञ्जातेति सूच्यते, यतः शुचा सविधं स आद्रवति स्मेति शुचाऽऽद्रवणात् शूद्रेति जानश्रुते रैक्वेण शूद्रेत्यामन्त्रणम्। तथाच यौगिकमेवेदं शूद्रपदं न रूढमिति नैतच्छद्राधिकारप्रयोजकं लिङ्गमिति सूत्राशयः। एतेन निषादस्थपत्यधिकरणन्यायेन तावन्मात्रोपयुक्तवेदभागाध्ययनादिकल्पनेन शूद्राणामपि संवर्गविद्याधिकारसमर्थनमपि–प्रत्युक्तम्; अत्र रूढयर्थस्यास्वीकारात्, प्रोक्षणादिशब्देष्विव रूढेर्योगबलीयस्त्वन्यायस्यैवात्र स्वीकारात्। अत्र रूढिबाधे कारणं तु जानश्रुतेः क्षत्रियत्वावगतिरेवेत्यनन्तरसूत्रं ज्ञापयिष्यति।।३४।।

जातिशूद्रपरत्वमस्य नास्तीति तत्प्रकरणतो जानश्रुतेः क्षत्रियत्वावगमेनापि ज्ञायत इति सूत्रयति– *क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गादिति*।।३५।। चैत्ररथिना समभिव्याहारात् चकारात् क्षत्तृप्रेषणाश्वर्ययोगाच्च जानश्रुतेः क्षत्रियत्वमवगम्यत इति सूत्रार्थः। निगदमस्य भाष्यम्।।३५।।

ननु–''उपनिषदमावर्तयेदि'' ति स्वतन्त्रविध्यपेक्षितमुपनयनं देवादीनामिव शूद्राणामपि कथ न संभवतीति? अत आह सूत्रकार–*संस्कारपरामर्शात् तदभावाभिलापाच्चेति*।।३६।।–इति।

स्वतन्त्रोपनयनसंस्कारः सत्यमाम्नायते; तथापि न शूद्राणामपि तत्कल्पनं संभवति। कुतः? तदभावाभिलापात्=संस्काराभावाभिलापात्, ''चतुर्थ एकजातिस्त्वि'' ति वचनादिति भावः। एकजातित्वं हि उपनयनप्रयुक्तद्विजत्वराहित्यम्। तञ्चोपनयनसामान्याभावपरम्, नाष्टवर्षाद्यधिकाररिकसर्ववेदाध्ययनोपयोग्युपनयनविशेषाभावमात्रपरमिति भावः।।३६।।

कुत इति? अतः सूत्रयति- *तदभावनिर्धारणे च प्रवृत्तेः*।।३७।।-इति। जातिशूद्रत्वाभावनिर्धारणान्तरमेव गौतमेन जाबालस्योपनयनेन विद्योपदेशे प्रवृत्तत्वाद् जातिशूद्रस्योपनयनसामान्यनिषेध इति भावः।।३७।।

एतावता वेदान्तमात्राध्ययनविधेः स्वतन्त्रत्वमूरीकृत्य शूद्राधिकारो वारितः, अथ स्वाध्यायाध्ययनविधिरेव वेदान्ताध्ययनस्यापि विधिरिति पक्षेण शूद्रानधिकारं व्यवस्थापयति सूत्रकारः- *श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च*।।३८।। इति। निगदमस्य भाष्यम्। शूद्राणां वेदपूर्वकब्रह्मविद्यायामेवानधिकारोऽत्र प्रतिपाद्यते; न पुराणादिमूलकब्रह्मविद्यायामपि स इति निगमयति- *येषां पुनरित्यादिना*।।

एतेन-परमतेऽपशूद्राधिकरणमविरोध इति शतदूपण्यां द्विपष्टितमं दूषणमपि-परास्तम्, शूद्राणामपि पुराणादिद्वारेण निर्विशेषब्रह्मज्ञानोत्पत्तावपि वेदान्तपूर्वकतदधिकारनिषेध एव तात्पर्यस्य स्वीकाराद् अनुपनीतानामश्रुतवेदान्तवाक्यानां च तेषां ''न शूद्राय मतिं दद्यादि'' ति वचनेन वेदपूर्वकाधिकारस्य निषेधाञ्च तद्विरोधस्याप्रसरात्। ''दग्धाखिलाधिकारत्वाद् ब्रह्मज्ञानाग्निना मुनिः। वर्तमानः श्रुतेर्मूर्ध्नि नैव स्याद्वेदकिङ्करः।।'' इति वंचनं तु ब्रह्मीभूतविषयम्, न त्वहमर्थजीविषयम्; तस्य विधिनिषेधादिपरतन्त्रताया एव स्वीकारेण जीवसामान्यविषत्वायोगात्। तथाच ''दग्धाधिकारतया वेदशिरसि वर्तमानैर्भवद्भिर्वेदान्तानां तदर्थस्य च तेभ्योऽपि यथावदुपदेशसम्भव इत्यपेशलमिदं दूषणम्; वेदान्तवाक्यानां तदधिकारिविषयनियमापूर्वसापेक्षाणमेव निर्विशेषब्रह्मज्ञानसाधनत्वं स्वीक्रियते, इति तदनधिकाराधिकाराभ्यां शूद्रत्रैवर्णिकयोर्विशेषस्य सत्त्वाद् न विरोधलेशोऽपि। यथाच ब्रह्मणि शास्त्राणां नानुवादत्वम्, तथा समन्वयाधिकरणे ''न च परिनिष्ठितवस्तुस्वरूपत्वेऽपि प्रत्यक्षादिविषयत्वं ब्रह्मण'' इत्यत्र भाष्य एव व्यक्तम्। एतेन-सन्मात्रस्य ब्रह्मणः प्रमाणान्तरगोचरत्वे तद्विषयस्यागमस्यानुवादत्वमिति तदुक्तिरपि-परास्ता। अधिकमन्यत्र व्यक्तम्।।३८।। इति नवममपशूद्राधिकरणम्।।

इति प्रदीपः अपशूद्राधिकरणम् समाप्तम्

भामती

अवान्तरसङ्गतिं कुर्वन्नधिकरणतात्पर्यमाह *यथा मनुष्याधिकार इति*। शङ्काबीजमाह *तत्र इति*। निर्मृष्टनिखिलदु:खानुषङ्गे शाश्वतिक आनन्दे कस्य नाम चेतनस्यार्थिता नास्ति, येनार्थितया अभावाच्छुद्रो नाधिक्रियेत। नाप्यस्य ब्रह्मशाने सामर्थ्याभाय:। द्विविधं हिं सामर्थ्य निजं चागन्तुकं च। तत्र द्विजातीनामिव शूद्राणां श्रवणादिसामर्थ्यं निजमप्रतिहतम्। अध्ययनाधानाभावादागन्तुक-सामर्थ्याभावे सत्यनधिकार इति चेत्, हन्ताधानाभावे सत्यग्न्यभावादग्निसाध्ये कर्मणि मा भूदधिकार:, न च ब्रह्मविद्यायामग्नि: साधनमिति किमित्यनाहिताग्नयो नाधिक्रियन्ते? न चाध्ययनाभावात्तत्साधनायामनधिकारो ब्रह्मविद्यायामिति साम्प्रतम्, यतो युक्तं यदाहवनीये जुहोत्याहवनीयस्य होमाधिकरणतया विधानात्तद्रूपस्यालौकिकतयानारभ्याधीतवाक्यविहिता-दाधानदन्यतोऽनधिगमादाधानस्य च द्विजातिसम्बन्धितया विधानात्। तत्साध्योऽग्निरलौकिको न शूद्रस्यास्तीति नाहवनीयादिसाध्ये कर्मणि शूद्रस्याधिकार इति। न च तथा ब्रह्मविद्यायामलौकिकमस्ति साधनं यच्छुद्रस्य न स्यात्। अध्ययननियम इति चेत्। न विकल्पासहत्वात्–तदध्ययनं पुरुषार्थे वा नियम्येत, यथा धनार्जने प्रतिग्रहादि। क्रत्वर्थे वा, यथा व्रीहीनवहन्तीत्यवघात:। न तावत् क्रत्वर्थे, नहि स्वाध्यायोऽध्येतव्य इति कञ्चित् क्रतुं प्रकृत्य पठयते, यथा दर्शपूर्णमासं प्रकृत्य व्रीहीनवहन्तीति। न चानारभ्याधीतमप्यव्यभिचरितं क्रतुसम्बन्धितया क्रतुमुपस्थापयति, येन वाक्येनैव क्रतुना सम्बध्येताध्ययनं, न हि यथा जुह्वाद्यव्यभिचरितक्रतुसम्बद्धमेवं स्वाध्याय इति। तस्मान्नैष क्रत्वेर्थे नियमो नापि पुरुषार्थे। पुरुषेच्छाधीनप्रवृत्तिर्हि पुरुषार्थो भवति, यथा फलं तदुपायो वा। तदपायेऽपि हि विधित: प्राक् सामान्यरूपा प्रवृत्ति: पुरुषेच्छानिबन्धनैव। इतिकर्त्तव्यतासु तु सामान्यतो विशेषतश्च प्रवृत्तिर्विधिपराधीनैव। नह्यनधिगतकरणभेद इतिकर्त्तव्यतासु घटते। तस्माद्विध्यधीनप्रवृत्तितयाऽङ्गानां क्रत्वर्यता:। क्रतुरिति हि विधिविषयेण विधिं परामृशति विषयिणम्। तेनार्थ्यते विषयीक्रियत इति क्रत्वर्थ:। न चाध्ययनं वा स्वाध्यायो दा तदर्थज्ञानं वा प्राग् विधे: पुरुषेच्छाधीनप्रवृत्तिर्येन पुरुषार्थ:

स्यात्। यदि चाध्ययनेनैवार्थावबोधरूपं नियम्येत ततो मानान्तरविरोधः। तद्रूपस्य विनाप्यध्ययनं पुस्तकादिपाठेनाप्यधिगमात्। तस्मात्सुवर्णं भार्यमितिवदध्ययनादेध फलं कल्पनीयम्। तथा चाध्ययनविधेरनियामकत्वाच्छूद्रस्याध्ययनेन वा पुस्तकादिपाठेन वा सामर्थ्यमस्तीति सोऽपि ब्रह्मविद्यायामधिकृतः। मा भूद्वाऽध्ययनाभावात्सर्वत्र ब्रह्मविद्यायामधिकारः, संवर्गविद्यायां तु भविष्यति। अह हारेत्वा शूद्र इति शूद्रं सम्बोध्य तस्याः प्रवृत्तेः। न चैष शूद्रशब्दः कदाचिदवयवव्युत्पत्त्याऽशूद्रे वर्णनीयः। अवयवप्रसिद्धितः समुदायप्रसिद्धेरनपेक्षतया बलीयस्त्वात्। तस्माद्यथाऽनधीयानस्येष्टौ निषादस्थपतेरधिकारो वचनसामर्थ्यादेवं संवर्गविद्यायां शूद्रस्याधिकारो भविष्यतीति प्राप्तम्।

एवं प्राप्ते ब्रूमः—न शूद्रस्याधिकारो वेदाध्ययनाभावादिति। अयमभिसन्धिः—यद्यपि स्वाध्यायोऽध्येतव्य इत्यध्ययनविधिनं किञ्चित्फलवत्कर्मारभ्याम्नातः, नाप्यव्यभिचरितक्रतुसम्बन्ध-पदार्थगतः, न हि जुह्वादिवत्स्वाध्यायोऽव्यभिचरितक्रतुसम्बन्धस्तथापि स्वाध्यायस्याध्ययन-संस्कारविधिरध्ययनस्यापेक्षितोपायतामवगमयन् किं पिण्डपितृयज्ञवत् स्वर्गं वा सुवर्णं भार्यमितिवदार्थवादिकं वा फलं कल्पयित्वा विनियोगभङ्गेन स्वाध्यायेनाधीयीतेत्येवमर्थः कल्पतां? किंवा परम्परयाऽप्यन्यतोऽपेक्षितमधिगम्य निर्वृणोत्विति विषये, न दृष्टद्वारेण परम्परयाऽप्यन्यतोऽपेक्षितप्रतिलम्भे च यथाश्रुतिविनियोगोपपत्तौ च सम्भवन्त्यां श्रुतविनियोगभङ्गेनाध्ययनादेवाश्रुतादृष्टफलकल्पनोचिता। दृष्टश्च स्वाध्यायाध्ययनसंस्कारस्तेन हि पुरुषेण सम्प्राप्यते प्राप्तश्च फलवत्कर्मब्रह्मावबोधमभ्युदयनिः श्रेयसप्रयोजनमुपजनयति, न तु सुवर्णधारणादौ दृष्टद्वारेण परम्परयाप्यस्त्यपेक्षितं पुरुषस्य, तस्माद्विपरिवृत्त्य साक्षाद्धारणादेव विनियोगभङ्गेन फलं कल्पते। यदा चाध्ययनसंस्कृतेन स्वाध्यायेन फलवत्कर्मब्रह्मावबोधो भाव्यमानोऽभ्युदयनिः श्रेयसप्रयोजन इति स्थापितं तदा यस्याध्ययनं तस्यैव कर्मब्रह्मावबोधोऽभ्युदयनिःश्रेयसप्रयोजनो नान्यस्य, यस्य चोपनयनसंस्कारस्तस्यैवाध्ययनं, स च द्विजातीनामेवेत्युपनयनाभावेनाध्ययनसंस्काराभावात् पुस्तकादिपठितस्वाध्यायजन्योऽर्थावबोधः शूद्राणां न फलाय कल्पत इति शास्त्रीयसामर्थ्याभावान्न शूद्रो ब्रह्मविद्यायामधिकृत इति सिद्धम्।

यज्ञेऽनवक्लृप्तः इति यज्ञग्रहणमुपलक्षणार्थम्। विद्यायामनवक्लृप्त इत्यपि द्रष्टव्यम्। सिद्धवदभिधानस्य न्यायपूर्वकत्वात् न्यायस्य चोभयत्र साम्यात्। द्वितीयं पूर्वपक्षमनुभाषते *यत् पुनः संवर्गविद्यायाम् इति*। दूषयति *न तल्लिङ्गम्*। कुतः? *न्यायाभावात्*। न तावच्छूद्रः संवर्गविद्यायां साक्षाच्चोद्यते: यथैतया निषादस्थपतिं याजयेदिति निषादस्थपतिः किन्त्वर्थवादगतोऽयं शूद्रशब्दः स चान्यतः सिद्धमर्थमवद्योतयति न तु प्रापयतीत्यध्वरमीमांसकाः। अस्माकं त्वन्यपरादपि

वाक्यादसति बाधके प्रमाणान्तरेणार्थोऽवगम्यमानो विधिना चापेक्षितः स्वीक्रियत एव। न्यायश्चास्मिन्नर्थे उक्तो बाथकः। न च विध्यपेक्षाऽस्ति, द्विजात्यधिकारप्रतिलम्भेन विधेः पर्यवसानात्। विध्युद्देशगत्वे त्वयं न्यायोऽपोद्यते वचनबलान्निषादस्थपतिवन्न त्वेष विध्युद्देशगत इत्युक्तम्। तस्मान्नार्थवादमात्राच्छूद्राधिकारसिद्धिरिति भावः। अपि च किमर्थवादबलाद्विद्यामात्रेऽधिकारः शूद्रस्य कल्प्यतां संबर्गविद्यायां वा? न तवाद्विद्यामात्र इत्याह *कामं चायम् इति*। न हि संवर्गविद्यायामर्थवादः श्रुतो विद्यामात्रेऽधिकारिणमुपनयति, अतिप्रसङ्गात्। अस्तु तर्हि संवर्गविद्यायामेव शूद्रस्याधिकार इत्यत आह *अर्थवादस्थत्वाद् इति*। तत्किमेतच्छूद्रपदं प्रमत्तगीतं, न चैतद् युक्तं तुल्यं हि साम्प्रदायिकमित्यत आह। *शक्यते चायं शूद्रशब्द इति*। एवं किलात्रोपाख्यायते–जानश्रुतिः पौत्रायणो बहुदायी श्रद्धादेयो बहुपाक्यः प्रियातिथिर्बभूव। स च तेयु तेषु ग्रामनगरश्रृङ्गाटकेषु विविधानामन्नपानानां पूर्णानतिथिभ्य आवसथान् कारयामास। सर्वत एत्येतेष्वावसथेषु ममान्नपानमर्थिन उपयोक्ष्यन्त इति। अथाम्य राज्ञो दानशौण्डस्य गुणगरिमसन्तोषिताः सन्तो देवर्षयो हंसरूपमास्थाय तदनुग्रहाय तस्य निदाघसमये दोषा हर्म्यतलस्थस्योपरि मालामाबध्याजग्मुस्तेषामग्रेसरं हंसं सम्बोध्य पृष्ठतो व्रजन्नेक्तमो हंसः साद्भुतमभ्युवाच। भल्लाक्ष! भल्लाक्ष! जानश्रुतेरस्य पौत्रायणस्य द्युलोक आयतं ज्योतिस्तन्मा प्रसाङ्क्षीर्मैतत्त्वा श्राक्षीदिति। तमेवमुक्तवन्तमग्रगामी हंसः प्रत्युवाच–कं वर! एनमेतत्सन्तं सयुग्वानमिव रैक्वमात्थ। श्चयमर्थः–वर इति सोपहासमवरमाह। अथवा वरो वराकोऽयं जानश्रुतिः। कमित्याक्षेपे, यस्मादयं वराकस्तस्मात्कमेनं किम्भूतमेतत्सन्तं ग्राणिमात्रं रैक्वमिव सयुग्वानमात्थ। युग्वा गन्त्री शकटी तया सह वर्तत इति सयुग्वा रैक्वस्तमिव कमेनं प्राणिमात्रं जानश्रुतिमात्थ। रैक्वस्य हि ज्योतिरसह्यं न त्वेतस्य प्राणिमात्रस्य। तस्य हि भगवतः पुण्याज्ञानसम्पन्नस्य रैक्वस्य ब्रह्मविदो धर्मे त्रैलोक्योदरवर्तिप्राणभृन्मात्रधर्मोऽन्तर्भवति न पुना रैक्वधर्मकक्षां कस्यचिद्धर्मोऽवगाहत इति। अथैप हंसवचनादात्मनोऽत्यन्तनिकर्पमुत्कर्षकाष्ठां च रैक्वस्योपश्रुत्य विषण्णमानसो जानश्रुतिः कितव इवाक्षपराजितः पौनः पुन्येन निःश्वसन्नुद्वेलं कथमपि निशीथमतिवाहयाम्बभूव। ततो निशान्तपिशुनमनिभृतवन्दारुवृन्दप्रारब्धस्तुतिसहस्रसंवलितं मङ्गलतूर्य्यनिर्घोषमाकर्ण्य तल्पतलस्थ एव राजैकपदे यन्तारमाह्वयादिदेश-वयस्य रैक्वाह्वयं ब्रह्मविदमेकरतिं सयुग्वानमतिविविक्तेषु तेषु येषु विपिनगनिकुञ्जनदीपुलिनादिप्रदेशेष्वन्विष्य प्रयत्नतोऽस्मभयमाचक्ष्वेति। स च तत्रान्विष्यन् क्वचिदतिविविक्ते देशे शकटस्याधस्तात् पामानं कण्डूयमानं ब्राह्मणायनमद्राक्षीत्। दृण्ट्वा च रैक्वोऽयं भवितेति प्रतिभावानुपविश्य सविनयमप्राक्षीत् त्वमसि हे भगवन् सबुग्वा रैक्व इति। तस्य च रैक्वभावानुमर्मि च तैस्तैरिङ्गितैर्गार्हैस्थ्येच्छां धनायां चोन्नीय यन्ता राज्ञे निवेदयामास। राजा तु तं निशम्य गवां पट्शतानि निष्कं च हारं चाश्वतरीरथं चादय सत्वरं रैक्वं प्रतिचक्रमे। गत्वा चाभ्युवाद

हे रैक्व गवां षट्शतानीमानि निष्कश्च हारश्चायमश्वतरीरथ एतदादत्स्व, अनुशाधि मां भगवन्निति। अर्थवमुक्तवन्तं प्रति साटोपं च सस्पृहं चोवाच रैक्व:–अह हारेत्वा शूद्र तवैव सह गौभिरस्त्विति। अहेति निपात: साटोपमामन्त्रणे। हारेण युक्ता इत्वा गन्त्री रथो हारेत्वा गोभि: सह तवैवास्तु किमेतन्मात्रेण मम धनेनाकल्पवर्त्तिनो गार्हस्थ्यस्य निर्वाहानुपयोगिनेति भाव:। अहर त्वेति तु पाठोऽनर्थक्तया च गोभि: सहेत्यत्र प्रतिसम्बन्ध्यनुपादानेन चाचार्य्यैर्दूषित:। तदस्यामाख्यायिकायां शक्य: शूद्रशब्देन जानश्रुती राजन्योऽप्यवयवव्युत्पत्त्या वक्तुं, स हि रैक्व: परोक्षज्ञतां चिख्यापयिषुरात्मनो जानश्रुते। शूद्रेति शुर्च सूचयामास। *कथं पुन: शूद्रशब्देन शुगुत्पन्ना सूच्यत इति*। उच्यते? *तदाद्रवणात्*। तद्व्याचष्टे *शुचमभिदुद्राव* जानश्रुति:। शुचं प्राप्तवानित्यर्थ:। *शुचा वा* जानश्रुति:। *द्रुद्रवे* शुचा प्राप्त इत्यर्थ:। अथवा शुचा रैक्वं जानश्रुतिर्दुद्राव, गतवान्। तस्मात्तदाद्रवणादिति तच्छब्देन शुग्वा जानश्रुतिर्वा रैक्वो वा परामृश्यत इत्युक्तम्।।३४।।

इतश्च न जातिशूद्रो जानश्रुति: यत्कारणं प्रकरणनिरूपणे क्रियमाणे क्षत्रियत्वमस्य जानश्रुतेरवगम्यते। चैत्ररथेन लिङ्गादिति ध्याचक्षाण: प्रकरणं निरूपयति *उत्तरत्र* संवर्गविद्यावाक्यशेषे। चैत्ररथेनाभिप्रतारिणा निश्चितक्षत्रियत्वेन समानायां संवर्गविद्यायां समभिव्याहाराल्लिङ्गात् सन्दिग्धक्षत्रियभावो जानश्रुति: क्षत्रियो निश्चीयते। अथ ह शौनकञ्च कापेयमभिप्रतारिणञ्च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी विभिक्ष इति प्रसिद्धयाजकत्वेन कापेयेनाभिप्रतारिणो योग: प्रतीयते। ब्रह्मचारिभिक्षया चास्याशूद्रत्वमवगम्यते। नहि जातु ब्रह्मचारी कूद्रान्नं भिक्षते। याजकेन च कापेयेन योगाद्याज्योऽभिप्रतारी। क्षत्रियत्वं चास्य चैत्ररथित्वात्। तस्माच्चैत्ररथिनामैक: क्षत्रपतिरजायतेति वचनात्। चैत्ररथित्धं चास्य कापेयेन याजकेन योगात्। *एतेन वै चित्ररथं कापेया अयाजयन्निति* छन्दोगानां द्विरात्रे श्रूयते। तेन चित्ररथस्य याजका: कापेया:। एष चाभिप्रतारी चित्ररथादन्य: सन्नेव कापेयानां याज्यो भवति यदि चैत्ररथि: स्यात्, समानान्वयानां हि प्रायेण समानान्वया याजका भवन्ति। तस्तमाच्चैत्ररथित्वादभिग्रतारी काक्षसेनि: क्षत्रिय:। तत्समभिव्याहाराच्च जानश्रुति: क्षत्रिय: सम्भाव्यते। इतश्च क्षत्रियो जानश्रुतिरित्याह *क्षत्तृप्रेषणाद्यैश्वर्य्ययोगाच्च*। क्षत्तृप्रेषणे चार्थसम्भारे च तादृशि तस्य वदान्यप्रष्ठस्यैश्वर्य्य प्रायेण क्षत्रियस्य दृष्टं युधिष्ठिरादिवदिति।।३५।।

न केवलमुपनीताध्ययनविधिपरामर्शेन न शूद्रस्याधिकार: किन्तु तेषु तेषु विद्योपदेशप्रदेशेषूपनयनसंस्कारपरामर्शात् शूद्रस्य तदभावाभिधानाद् ब्रह्मविद्यायामनधिकार इति। नन्वनुपनीतस्यापि ब्रह्मोपदेश: श्रूयते तान् हानुपनीयैवेति। तथा शूद्रयानुपनीतस्यैवाधिकारो भविष्थतीत्यत आह *तान् हानुपनीयैवेत्यपि प्रदर्शितैवोपनयनप्राप्ति:*। प्राप्तिपूर्वक्तवात् प्रतिषेधस्य

येषामृपनयनं प्राप्तं तेषामेव तन्निषिध्यते। तच्च द्विजातीनामिति द्विजातय एव निषिद्धोपनयना अधिक्रियन्ते न शूद्र इति।।३६।।

सत्यकामो ह वे जाबालः प्रमीतपितृकः स्वां मातरं जवालामपृच्छत्। अहमाचार्य्यकुले ब्रह्मवर्य्यचरिष्यामि, तद् ब्रवीतु भवति किङ्गोत्रोऽहमिति। साऽब्रवीत्–त्वज्जनकपरिचरणपरतया नाहमज्ञासिषं यद्न गोत्रं तवेति। स त्वाचार्य्यं गौतममुपससाद। उपसद्योवाच–हे भगवान् ब्रह्मचर्य्यमुपेयां त्वयीति। स होवाच, नाविज्ञातगोत्र उपनीयत इति किङ्गोत्रोऽसीति। अथोवाच सत्यकामो नाह वेद स्वं गोत्रं, स्वां मातरं जबालामपृच्छं, सापि न वेदेति। तदुपश्रुत्याभ्यधाद् गौतमः–नाद्विजन्मन आर्जवं युक्तमीदृशं वचस्तेनास्मिन्न शूद्रत्वसम्भावनास्तीति त्वां द्विजातिजन्मानमुपनेष्य इत्युपनेतुमनुशासितुं च जाबालं गौतमः प्रवृत्तः। तेनापि शूद्रस्य नाधिकार इति विज्ञायते *न सत्यादगाः इति*। न सत्यमतिक्रान्तवानसीति।।३७।।

निगदव्याख्यातेन भाष्येण व्याख्यातम्। अतिरोहितार्थमन्यत्।।३८।।

इति भामती अपशूद्राधिकरणम् समाप्तम्

श्री कण्ठभाष्य

इतश्च शूद्रेत्यामन्त्रणं न जातियोगेनेत्याह–

॥सू॥ क्षत्रियत्वगतेश्च॥३४॥

शुश्रूषोर्जानश्रुतेः क्षत्रियत्वावगतेश्च न जातियोगेन शूद्रेत्यामन्त्रणम्। उपाख्यानोपक्रमे हि 'जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस, स ह सर्वत आवसथान् मापयांचक्रे सर्वत एव मेऽन्नमत्स्यन्ति' इति जानश्रुतेर्धनिपतित्वं बहुतरपक्वान्नदायित्वं चोक्तम्। मध्ये च 'स ह संजिहान एव क्षत्तारमुवाच' इति क्षत्तृप्रेषणमुक्तम्। अन्ते च 'इयं जाया अयं ग्रामो यस्मिन्नास्से' इति 'ते हैते रैक्वपर्णा नाम महावृषेषु यत्रास्मा उवास' इति बहुग्रामप्रदायित्वमुक्तम्। एतैर्लिङ्गैर्जानश्रुतेः क्षत्रियत्वमवगम्यते॥

॥सू०॥ उत्तरत्र चैत्ररथेन लिङ्गात्॥३५॥

उपरिष्टाच्चास्यां संवर्गविद्यायां ब्रह्मक्षत्रिययोरेवान्वयो दृश्यते 'अथ शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे' इत्यादौ। अत्रा भिप्रतारी चैत्ररथः क्षत्रिय इत्यवगम्यते, कापेययाज्यस्य कापेयाख्ययाजकयोगात्। कापेययाजकयोगो हि चैत्ररथस्य श्रुतः 'एतेन चैत्ररथं कापेया अयाजयन्, तमेकाकिनमन्नस्याध्यक्षमकुर्वन्' इति। तेनाभिप्रतारिणः संज्ञाभेदात् चित्ररथत्वासिद्धावपि तद्वंश्यत्वं सिध्यति। समानान्वयानां हि समानान्वयाः प्रायेण याजका भवन्ति। चित्ररथवंश्यत्वे सति क्षत्रियत्वं 'तस्माच्चैत्ररथिर्नामैकः क्षत्रपतिर्जायते' इति तद्वाक्यशेषेण सिद्ध्यति। एव चोत्तरत्र ब्राह्मणेन कापेयेन युक्तोऽभिप्रतारी क्षत्रिय इति निश्चिते तद्वत् ब्राह्मणेन रैक्वेण युक्तो जानश्रुतिरपि क्षत्रिय इति गम्यते। अतः क्षत्रिय एव शूद्रेत्यामन्त्रितः॥

यदुक्तं निषादस्थपतिन्यायेन शूद्रस्य महावाक्यश्रवणमात्रेऽधिकार इति तत्राह–

॥सू०॥ संस्कारपरामर्शात् तदभावाभिलापाच्च॥३६॥

ब्रह्मविद्योपक्रमे 'उप त्वा नेष्ये' 'तं होपनिन्ये' इत्यादिप्रदेशेषूपनयनसंस्कार परामर्शात्, शूद्रस्य च 'न शूद्रे पातकं किं चिन्न च संस्कारमर्हति' 'शूद्रश्चतुर्थो वर्ण एकजातिः' इत्यादिस्मृतिषु तदभावश्रवणात्, तस्य ब्रह्मविद्यायामनधिकारः। 'निषादस्थपतिं याजयेत्' इति विधिरस्तीति न विरोधः। उनयनाभावेऽपि शूद्रस्य महावाक्यश्रवणे कुत्रापि न विधिः।।

।।सू०।। तदभावनिर्धारणे च प्रवृत्तेः।।३७।।

'नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहरोप त्वा नेष्ये न सत्यादगाः' इति सत्यवचनेन जाबालस्य शूद्रत्वाभावनिर्धारणे सत्येव तदुपनयनानुशासनविद्योपदेशप्रवृत्तेश्च न शूद्रस्याधिकारः।।

ननूपनयनाभावे ब्रह्मोच्चारणनिषेधः क्वाचित्कः सार्वत्रिको वा। न सार्वत्रिकः। शिशोरुपनयनाभावेऽपि 'न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात्' इति स्वधानिनयने ब्रह्मोच्चारणविधानात्। तेन क्वाचित्क इति युज्यते। अतः शूद्रस्यानुपनीतस्य पाकयज्ञादिषु ब्रह्मोच्चारणनिषेधो न ब्रह्मविद्यायामित्याशङ्कायामाह–

।।सू०।। श्रवणाध्ययनार्थप्रतिषेधात्।।३८।।

शूद्रस्य वेदवाक्यश्रवणादि निषिध्यते 'तस्माच्छूद्रसमीपे नाध्येतव्यम्' इति। अनुपशृण्वतः कुतोऽध्ययनादिप्रसक्तिः।।

इति श्री कण्ठभाष्य अपशूद्राधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

छान्दोग्य इति। एवं तत्रोपाख्यायते। जानश्रुतिः पौत्रायणः श्रद्धया बहुधनान्नप्रदः सर्वासु दिक्षु ग्रामनगरमार्गारण्यतीर्थादिषु पान्थानामनाथानां च शीतवातातपवर्षबाधानिवारकान्नोदक-शयनाच्छादनादिभोग्यजातसम्पूर्णानावसथान्मापयाञ्चक्रे। तस्य धार्मिकप्रवरस्य कर्मभिः क्षीणदुरितस्य ब्रह्मविविदिषामुत्पादयितुं केचन महर्षयो हंसरूपमास्थाय निशायां हर्म्ये शयानस्य तस्योपरि पङ्क्तिमाबध्याजग्मुः। तेषामग्रेसरं हंसं भोभो भल्लाक्षभल्लाक्षेति विपरीतलक्षणया मन्दलोचनेति सम्भ्रमेण द्विवारं सम्बोध्य पृष्ठगामी कश्चिद्धंस उवाच। जानश्रुतेरन्नदानादिप्रभावजनितं ज्योतिर्द्युलोकपर्यन्तं व्याप्तं वर्तते। तत्र त्वं लग्नो माभूः तेन तव प्रदग्धता माभूदिति। एवमुक्तवन्तमग्रगामी हंसः प्रत्युवाच। एनं जानश्रुतिं मनुष्यसामान्यदशामनतिक्रम्य वर्तमानं शकटसहितं रैक्वमिव कीदृशमाहात्म्यशालिनमात्थ। रैक्व एव खलु ब्रह्मज्ञो महाप्रभावः। अस्य जानश्रुतेरब्रह्मज्ञस्य कः प्रभावः यज्जनितमस्य तेजो रैक्वप्रभावजं तेज इव दहेदित्याशयः। एतदाकर्ण्य तेन पृष्ठगामिना कोऽसौ रैक्व इति पुनः पृष्टः स एव प्रत्युवाच। सर्वेषामपि यद्यावत्कर्मजातं विज्ञानं च यदीयकर्मविज्ञानान्तर्भूतमसौ रैक्व इति। तदेतद्धंसवाक्यं रैक्वप्रशंसारूपं तथाभूतस्य रैक्वस्यैव ज्योतिरसह्यं न त्वस्य वराकस्येति स्वनिन्दागर्भं च जानश्रुतिराकर्ण्य कथमपि निशामतिवाह्य तल्पं त्यजन्नेव क्षत्तारमाहूय सचिह्नं रैक्वमुक्त्वा दतन्वेषणाय तं प्रेषयित्वा क्वचिद्विविक्तदेशे शकटस्याधस्तात्पामानं कण्डूयमानरैक्वमुपलभ्य प्रत्यागम्य निवेदितवति तस्मिन् स्वयं रैक्वमुपगम्य गवां षट्शतानि निष्कं हारमश्वतीयुक्तं रथं चोपहृत्य त्वदुपास्यां देवतामनुशाधीति रैक्वं प्रार्थयामास। स रैक्वस्तेन दीयमानं सर्वं प्रत्याचक्षाण उवाच। 'अह हारेत्वा शूद्र तवैव सह गोभिर'स्त्विति। अहेति निपातः। हारसहित इत्वा रथः गोभिस्सह तवैवास्तु, किमनेनाल्पधनेन सन्तोषः मम कलत्रहीनस्य प्रतिष्ठाहीनस्य च। का मम एतद्धनरक्षणे शक्ति', तव वा मत्प्रयोजनापर्यवसाय्यल्पधनदानेन ब्रह्मविद्या प्रतिष्ठिता न भवेदिति भावः। पुनर्जानश्रुतौ सहस्त्रं गवां पूर्वानीतं हारादिकं रैक्वस्य परिणयनार्थं कन्यामावसथार्थं तत्रत्यं ग्रामं चोपहृत्य प्रार्थयमाने विद्याप्रदानर्थमुपहारस्य

पर्याप्ततामनुजानानस्य रैक्वस्येदं वाक्यम् 'आजहारेमाः शूद्रे' त्यादि। इमा दक्षिणा आहृतवानसि अनेनैव मुखेन विद्याग्रहणोपायेन मामालापयिष्यसि ब्रह्मविद्योपदेष्टारं करिष्यसीत्यर्थः। ननु, कर्मस्विव विद्यास्वपि शूद्रस्य नाधिकार इत्येव युक्तम्। कथमस्याधिकारसंशय इत्याशङ्क्य पूर्वपक्षकोटेर्बीजोपन्यासपूर्वकं संशयं दर्शयति–**अत्रेति।** अत्र 'आजहारे'ति वाक्ये। यद्यप्य'ह हारेत्वा शूद्रे'ति दक्षिणाप्रत्याख्यानवाक्ये शूद्रेत्यामन्त्रणं शूद्रवत् ब्रह्मविद्यागौरवमजानानः स्वल्पां दक्षिणामाहरसीति कोपेन शूद्रेत्यामन्त्रणस्यान्यथासिद्धिर्वक्तुं शक्या, तथाप्यत्र प्रसादवाक्ये न सा वक्तुं शक्येति। अत्र शूद्रेत्यामन्त्रणलिङ्गेन शूद्रस्याप्यधिकारोऽस्तीति प्रतीयते। जानश्रुतेश्शोकाविष्टत्वं प्राक्सूचितमस्तीति बुद्धिसन्निहितयोगेन शूद्रशब्दस्य क्षत्रियवृत्तित्वसम्भवात्। लिङ्गासिध्द्या तस्य नाधिकार इत्यपि प्रतीयते। अतस्संशय इति भावः। नन्वर्थित्वसामर्थ्ययोरन्यत्रापि सम्भवेऽपि यथा त्रैवर्णिकानामेव कर्माणि तथा विद्या अपि स्युरित्याशङ्क्याह-**न चेति।** न कर्मवद्विद्यायास्त्रैवर्णिकनियमोऽस्ति। देवेष्वपि तदङ्गीकारादित्यर्थः। पूर्वाधिकरणेनापि दृष्टान्तरूपा सङ्गतिरनेन लब्धा। देवानां वैदुष्यं सम्भवति न शूद्राणामिति विशेषमाशङ्क्य निराकरोति–**देवानामिति। एषामपीति।** यद्यपि पुराणादिश्रवणमात्रेण कर्माधिकारो न सम्भवति 'वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यश्शरदि वैश्य' इति त्रैवर्णिकाधिकारत्वेन विहितस्याधानस्यासम्भवेन तेषामाहवनीयाद्यग्न्यभावात् कर्माङ्गवैदिकमन्त्राध्ययनाभावाञ्च। तथापि विद्यास्वग्नीनां मंत्राणां चानपेक्षितत्वात् पुराणेभ्यो विद्योपयुक्तब्रह्मप्रतिपत्तिसम्भवात् यज्ञादिधर्मराहित्येऽपि 'स्वे स्वे कर्मण्यभिरतस्संसिद्धिं लभते नर' इत्युक्तरीत्या शूद्रवर्णोचितकर्मभिरेव विद्यानुग्रहसम्भवाञ्च सम्भवति विद्याधिकार इति भावः। ब्रह्मप्रतिपत्तावुपायान्तरमाह–**निषादेति।** यथै'तया निषादस्थपतिं याजये'दिति वाक्ये निषादस्थपतिशब्दे षष्ठ्यर्थलक्षणापरिहाराय समानाधिकरणसमासस्याभ्युपगन्तव्यतया निषादजातीयस्य 'रौद्रं वास्तुमयं चरुं निर्वपे'दिति प्रकृतायामिष्टावधिकारे सिद्धे तदङ्गभूतमन्त्रग्रहणमत्रैवर्णिकस्यापि निषादजातीयस्य सिद्ध्यति। एवं शूद्रेत्यामन्त्रणलिङ्गेन शूद्रस्यापि विद्याधिकारे सिद्धे ब्रह्मपरमहावाक्यग्रहणं तस्यार्थापत्त्या सिद्ध्यतीत्यर्थः। ततश्च ब्रह्मपरमहावाक्येषु संशयविपर्ययनिरासार्थं विचारोऽपेक्षितश्चेत् सोऽप्यर्थापत्तिलभ्योऽङ्गीक्रियतामिति भावः। ननु, विधिबलान्निषादस्य मन्त्रग्रहणाक्षेपो युक्तः। न त्वर्थवादमात्रानुरोधात् शूद्रस्य महावाक्यग्रहणाक्षेपः। 'गावो वा एतत्सत्रमासत' 'देवा वै सत्रमासते'त्यादिवदार्थवादिकस्यान्यार्थदर्शनलिङ्गस्य यथाकथञ्चित्स्तुत्यालम्बनत्वोपपत्तेरित्याशङ्क्यां परिहरन्नुपसंहरति–**तस्मादिति।** उचित एव शूद्रस्य ब्रह्मविद्याधिकारः। अर्थित्वादिसम्भवेन विरोधाभावात्। न हि गवां सत्रेष्वशक्तयादिवत् देवातनामुद्देश्यदेवतान्तरसूत्राधानाधिकारिविशेषणब्राह्मण्याद्यभाववञ्च शूद्रस्य विद्याधिकारे

किञ्चिद्बाधकमस्ति। ननु, तस्मा 'च्छूद्रो यज्ञेऽनवक्ळप्त' इति श्रुतिर्बाधिका। तस्याश्श्रुतेर्यज्ञानधिकारमात्रप्रतिपादनपरत्वात्। प्रत्युत शूद्रस्य विशिष्य यज्ञाधिकारनिषेधेन विद्याधिकारानुमतेरेव प्रतीतेरिति भावः। शूद्राणां मुक्त्यर्थित्वस्य देहेन्द्रियपाटवरूपसामर्थ्यस्य च सम्भवेऽप्युपास्यतद्गुणज्ञानविरहात् नास्त्युपासनाधिकार इति सिद्धान्तयति-**इति प्राप्त इति।** उक्तज्ञानविरहे हेतुमाह-**अध्ययनाभावेनेति।** उपासनाविधयो हि स्वविषयानुष्ठानार्थमनुष्ठेयार्थज्ञान-सम्पन्नान्द्विजातीनासाद्य निर्वृण्वन्ति यथा क्रतुविधयो याजकानपेक्षमाणाः स्ववर्णोचितद्रव्यार्जनोपाय इति याजने स्वत एव प्रवृत्तान्ब्राह्मणानासाद्य निर्वृण्वन्ति। अत उपासनाविधिभिरङ्गत्वेन गृहीतज्ञानं तावत् शूद्राणां न सम्भवति। स्वेच्छया केनचिच्छूद्रेण लिखितपाठादिना महावाक्यग्रहणतस्संपादितमपि तज्ज्ञानं तदुपायतामश्नुते। न 'ह्याग्नेय्याग्नीध्रमुपतिष्ठत' इत्यत्र ज्योतिष्टोमापूर्वसम्बन्धित्वेन क्ळप्तायां प्रकरणाम्नातायामाग्नेय्यां लाघवानुसारिणा विधिना उपस्थानाङ्गत्वेन गृहीतायां कस्यचिद्बुद्धिसन्निहित-माग्नेय्यन्तरं विधिनोपस्थानाङ्गत्वेन गृहीतं तदुपायतामश्नुवीतेति भावः। ननु, वेदान्तेष्विव पुराणेतिहासेष्वपि उपास्यस्य ब्रह्मणस्तद्गुणानां च वेदान्तानुसारेणैव तत्रतत्र प्रपञ्चेन प्रतिपादनं दृश्यते। तज्जन्यं ज्ञानमुपासनाङ्गं यदि न स्यात्तदा तेषु तत्प्रतिपादनं व्यर्थमेव स्यात्। अतो यथा प्रबलेन 'अथातोऽग्निमग्निष्टोमेनानुयजन्ती'ति वाक्येन इष्टकारचितस्थण्डिलरूपस्याग्नेराहवनीयाधारतया ज्योतिष्टोमाङ्गत्वे सिद्धे दुर्बलप्रकरणोपनीता उत्तरवेदिरप्यग्न्याधारतया तदङ्गमन्यथाज्योतिष्टोमप्रकरणे तदाम्नानवैयर्थ्यापत्तेरित्याशङ्क्याह-**इतिहासेति।** 'बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरेदिति। इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।' इति वेदतात्पर्यनिर्णयार्थत्वेन विनियुक्तत्वान्न तद्वैयर्थ्यमिति भावः। ननु, पुराणादीनां वेदोपबृंहणार्थत्वेन विनियुक्तत्वेऽपि तेभ्यस्स्वातन्त्र्येणापि ब्रह्मप्रतिपत्तिर्भवन्ती नापह्नोतुं शक्या। साप्युपासनाङ्गमेव। अन्यथा शूद्रकर्तृकपुराणश्रवणवैफल्यप्रसङ्गात्। न च तस्य फलान्तरमेव। विदुरधर्मव्याधादीनां ब्रह्मनिष्ठतायामुपायान्तरादर्शनेन तदङ्गत्वस्याप्यवश्यकल्प्य-त्वादित्याशङ्क्याह-**शूद्राणामिति।** एवं सूत्राभिप्रेतं ज्ञानाभावेन शूद्रस्य विद्यानधिकारमुपपाद्य सूत्रेण कण्ठोक्तं शूद्रेत्यामन्त्रणस्य निर्वाहमुपपादयितुमाशङ्कां दर्शयति-**कथमिति।** एतच्छङ्कोत्तरत्वेन 'शुगस्ये'ति सूत्रांशविवक्षितमर्थमाह-**न जातीति।** यद्यपि शूद्रशब्दस्य जातौ रूढिः, तथाप्यत्र ब्रह्मज्ञानाप्राप्त्या जानश्रुतेर्या शुक् सञ्जाता तां दृष्ट्वा रैक्केण व्यवहितार्थविषयस्वज्ञानवैभवप्रकटनाय शोचितृत्वयोगेन शूद्रेत्यामन्त्रणं कृतमित्यङ्गीकर्तु युक्तम्। बुद्धिसन्निहितयोगस्य रूढितो बलवत्त्वात्। स्वज्ञानवैभवप्रकटस्य प्रथमामन्त्रणे राज्ञोऽधिकदक्षिणादित्सासम्पादनार्थत्वेन द्वितीयामन्त्रणे राज्ञः स्वोपदेक्ष्यमाणविद्यायां श्रद्धातिशयसम्पादनार्थत्वेन च प्रकृतोपयुक्तत्वाच्चेति भावः। ननु, जानश्रुतेश्शुक् सञ्जातेति केन प्रमाणेन बोध्यते यां दृष्ट्वा रैक्कः शूद्रेत्यामन्त्रितवानिति कल्प्यत

इत्याशङ्कापरिहारत्वेन 'तदनादरे' त्यादिसूत्रशेषं व्याचष्टे-**शुगस्येति।** हंसोक्तानादरवाक्यश्रवणेन कारणेन तदैवाचार्यं प्रत्याद्रवणेन कार्येण च शुगस्य सञ्जातास्तीति ज्ञाप्यते। अतश्शूद्रेत्यामन्त्रणं न रूढ्या, किं तु शोचितृत्वयोगेनैवेत्यर्थः। ननु शोचतीत्यर्थे शूद्रशब्दस्य व्युत्पत्तिर्व्याकरणप्रक्रियया न दृश्यते, नाप्युणादिप्रक्रियया। उणादिसूत्रे हि 'स्थायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपी' त्यादिसूत्रतो रक्प्रत्ययेऽनुवर्तमाने 'शतेरश्चे'ति सूत्रेण 'शटशातने' इति धातो रक्प्रत्ययेन धातोरकारस्य ऊकारादेशेन च शूद्रशब्दो निष्पादितः। न च 'शुचिदॢशोक' इति धातोरौणादिकरक्प्रत्ययेन शूद्रशब्दस्य कथञ्चिन्निष्पत्तिसम्भवेऽपि ततस्तस्य न यौगिकत्वनिर्वाहः। उणादयोऽव्युत्पन्नानि प्रातिपदिकानी'त्यतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य'इति (पा० ८-३-४६) सूत्रे कमिग्रहणे सत्यपि कमेरौणादिकसप्रत्ययान्तस्य कंसपदस्य ग्रहणेन सर्वेषां नाम्नामुणादिप्रत्ययैः पदान्तानां कृत्तद्धितसूत्रेण प्रातिपदिकसंज्ञासिद्धिसम्भवेऽपि अर्थवत्सूत्रप्रणयनेन च ज्ञापितत्वादिति चेत् अत्राहुः। रुजं द्रावयतीत्यर्थे रुद्रशब्दस्येव शोचतीत्यर्थे शूद्रशब्दस्य नैरुक्तप्रक्रियया सिद्धिरिति। केचित्तु 'स्थायितञ्ची'त्यादिरक्प्रकरणे 'अमितम्योर्दीर्घश्चे'ति सूत्रादनन्तरं 'शुचेर्दश्चे'ति सूत्रान्तरपाठं कल्पयन्तः तेन शुचेश्चकारस्य दकारेण रक्प्रत्ययेन पूर्वसूत्रानुवृत्तेन धातोरुकारस्य दीर्घादेशेन च शूद्रशब्दनिष्पत्तिं मन्यन्ते। ननु, हंसवाक्यश्रवणरैक्वोपसर्पणाभ्यां जानश्रुतेश्शोकस्सूच्यत इत्युक्तमयुक्तम्। हंसवाक्यश्रवणानन्तरमेव क्षत्तृप्रेषणपूर्वकरैक्वोपसर्पणेन हि जानश्रुतेः कश्चन रैक्वोपसर्पणहेतुः मानसो भावो हंसवाक्यश्रवणेन सञ्जात इत्येतावत्प्रतिपत्तुं शक्यम्। स भावः शोक इतिं कुतः प्रतिपत्तव्यम्। हंसवाक्यं जानश्रुतिनिन्दात्मकमिति ततस्तस्य शोकोदय एव युक्त इति चेन्न। तद्रैक्वस्य स्तुतिरूपमपि भवतीति ततस्तोषोदयोऽपि युक्तएव। स्वस्यापि रैक्वमहिमप्राप्त्युपायस्य तदुपास्यदेवतोपासनस्य तेन प्रदर्शनात् तदुपासनप्रकारोपदेशार्थं प्रार्थनीयस्स एव रैक्व इति सूचयितुं 'सयुग्वान' मिति तच्चिह्नस्योपन्यासाच्च। तथापि जानश्रुतेस्स्वनिन्दया हंसवाक्यगतया शोकोदयोऽपि स्यादिति चेन्न। हंसवाक्ये प्रकृतानुपयुक्तरैक्वस्तुतेस्तच्चिह्नोपन्यासस्य च सत्त्वेन तेन लिङ्गेन नायं लौकिको हंसः किं तु मम हितैषी कश्चिदृषिरेव अन्येन ऋषिणा सह स्वयमुक्तिप्रत्युक्तिव्याजेन रैक्वो देवतोपासनालब्धमहामहिमवैभवस्त्वमपि रैक्वोपास्यां देवतामुपास्व, स इव महामहिमा भविष्यसि, तदुपासनालाभे च स एव रैक्व उपदेष्टा, तस्य चिह्नं शकटपर्यटनं, तमन्विष्य ततो विद्यां लब्ध्वा कृतार्थो भवेति मामवबोधयितुमागतः इत्यतिविदग्धस्य विविधधर्मानुष्ठानविशुद्धान्तःकरणस्य राज्ञोऽवगतिसम्भवेन हंसकृतस्वनिन्दायाः सम्राजमेव राजानं प्रति 'कियदस्त्यधुना राज्यं कियदाज्ञाबलं तव। अनेन त्वमुपायेन सार्वभौमो भविष्यसी'त्यैश्वर्योपाये प्रवर्तयितुकामेन हितैषिणा कृताया निन्दाया इव हर्षएव हेतुत्वात्। किं च नेयं जानश्रुतेर्निन्दा यद्भुवमारभ्य द्युलोकपर्यन्तं व्याप्तस्य कालाग्निज्वालाकलापवत्स्पर्शमात्रेण दहनशक्तस्य सूर्येऽप्यसम्भावितस्य

ज्योतिषस्तस्मिन्नभाववर्णनम्। सम्भावितगुणवैकल्यवर्णनं हि निन्दा भवति। न 'त्वाकाशमयं खादितुं न शक्त' इतिवदसम्भावितगुणवैकल्यवर्णनम्। यदि कस्याप्यसम्भावितं ज्योतिस्स्वस्य नास्तीति जानश्रुतैः शोकः कल्प्यते। तदा तस्य जडत्वमेवोपपादितं स्यात्। तस्मादिह शोकस्य सूचितत्ववर्णनमयुक्तमिति चेत्। उच्यते। भल्लाक्षस्य रैक्वजानश्रुतिविषयादरानादरवचसी दिव्यज्योतिस्सत्त्वासत्त्वालम्बनत्वेऽपि वस्तुतो विद्यातद्वैकल्यप्रयुक्ते एव पर्यवस्यतः। अन्यथा 'गगनमयं खादति 'अयं तु खादितुं न शन्कोती' त्युक्तिप्रत्युक्तिवत् हंसाभ्यां कृतयोरुक्तिप्रत्युत्तयोरपार्थकत्वप्रसङ्गात्। विद्या च सम्भावितगुण इति तद्वैकल्येन 'किमपर एन'मित्यादिजानश्रुत्यनादरवचनं तावत्तन्निन्दा भवत्येव। अतस्तद्वर्णनं जानश्रुतेरत्यन्तास्तिकस्य एतावन्तं कालमेवं प्रशस्तां विद्यां नाध्यगमं येनैवमवमानस्य पात्रमभूवमिति शोकहेतुकं भवति। एवं च यद्यपि भल्लाक्षवचनं प्रशस्तविद्यातदुपदेष्ट्टगुरुसद्भावप्रत्यायकतया हर्षहेतुः, तथापि हर्षवदेव सद्यो गुरूपसर्पणहेतौ शोकेऽपि हेतुरिति स एव शोकः शूद्रेत्यामन्त्रणेन सूचितो महर्षिणा स्ववैभवख्यापनाय राज्ञो विद्याधिगमे विशिष्टाधिकारित्वज्ञापनाय च। केवलविद्याकामाद्धि विद्यावैकल्यकृतेनानुतापेन युक्तोऽधिकारी विशिष्यते। शूद्रेत्यामन्त्रणस्य यौगिकत्वे हेत्वन्तरपरत्वेनोत्तरसूत्रमवतारयति–**इतश्चेति।सू०॥ क्षत्रियत्वगतेश्च॥३४॥** जनश्रुतस्यापत्यं जानश्रुतिः। पुत्रनाम्नो गोत्रापत्यं पौत्रायणः। श्रद्धया देयमस्येति श्रद्धादेयः। अर्थिभ्यो बहु दातुं शीलमस्येति बहुदायी। बहु पाक्यं पक्तव्यमन्नादिकमस्य गृहेष्वावसथेषु वास्तीति बहुपाक्यः। आगत्य वसन्ति येष्वतिथय इति तानावसथानतिथीनां निवासार्थान् गृहान्कारयामास। किमिति। सर्वत एवेमे ममान्नमत्स्यन्ति भोक्ष्यंते जना इत्यभिप्रायेण। 'वैश्याद्ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते। जीविका वृत्तिरेतस्य राजान्तःपुररक्षणम्॥' इत्युक्तलक्षणः क्षत्ता। इयं जायेति रैक्वाय स्वकन्यासमर्पणम्। अयं ग्रामो यस्मिन्नास्से वर्तसे इति तदानीं यत्र ग्रामे रैक्वः स्थितः तस्य समर्पणम्। 'ते हैत' इत्यादिना महावृषाख्येषु देशेषु येषु ग्रामेषु रैक्वः पूर्वमुषितवान् तेषां रैक्वाय दत्तानां रैक्वापर्णा इत्यद्यापि रैक्वनाम्ना प्रसिद्धिरित्युक्तम्। ननु, सर्वमेतत् बहुदायित्वादिकं जानश्रुतेः क्षत्रियत्वे लिङ्गं न भवति। तथा हि–दानं तावत् शूद्रस्याप्यस्ति। 'दानं च दद्याच्छूद्रोऽपि पाकयज्ञैर्यजेत च॥' इति स्मरणात्। शूद्रादिभ्यः पक्वान्नदानं च तस्य सम्भवति। न च वाच्यं बहुदायीत्युक्तं दानपतित्वं सर्वत्रावसथान्निर्मायान्नसत्रप्रवर्तनं च बहुधनसाध्यं न तस्य सम्भवति। 'शक्तेनापि हि शूद्रेण न कार्यो धनसञ्चयः। शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते॥' इति तस्य बहुधनसम्पादननिषेधात् इति। तस्य निषेधस्य धर्मप्रावण्यरहितशूद्रविषयत्वात्। अत एव व्यासस्मृतौ 'शूद्रो धनसञ्चयं न कुर्वीत'ति निषेधानन्तरं 'राज्ञा वा समनुज्ञातः कामं कुर्वीत धार्मिकः। पापीयान्हि धनं लब्ध्वा वशे कुर्याद्गरीयसः'॥ इति विशेषः स्मर्यते। क्षत्तृप्रेषणांर्थं ग्रामदानांर्थं चापेक्षितं राज्याधिपत्यमपि शूद्रस्य

सम्भवतीत्यवेष्टिनयपूर्वपक्षसिद्धान्तप्रवृत्तिवशादवगतम्। अवेष्ट्यधिकरणे हि 'राजा स्वाराज्यकामो राजसूयेन यजेते'ति विहितराजसूये त्रयाणामपि वर्णानामधिकारोऽस्ति न क्षत्रियस्यैव, राजशब्दस्यार्यावर्तप्रसिद्ध्या राज्यपालयितृवाचित्वात् चतुर्णामपि वर्णानां राज्यपालयितृत्वदर्शनेन शूद्रस्यानग्नित्वावैद्यत्वप्रतिषेधहेतुभिरधिकारपर्युदासेऽपि ब्राह्मणवैश्ययोरपर्युदासादिति पूर्वपक्षं कृत्वा भवेदेवं राजशब्दस्य राज्यपालयितृत्वार्थत्वे। स तु राज्ञः कर्म राज्यमित्यस्मिन्नर्थे राज्यशब्दनिष्पत्त्यर्थं राजशब्दाद्यत्प्रत्ययविधायकेन पाणिनिस्मरणेनानुगृहीतया दक्षिणापथप्रसिद्ध्या क्षत्रियस्यैव वाचकः। अतस्तस्यैव तत्राधिकार इति स्थापितम्। तस्मात्क्षत्रियत्वलिङ्गोपन्यासोऽयमशक्त इति चेन्न। राजभिरावसथनिर्माणं सर्वेषां बुभुक्षूणां भोजनार्थादिकं लभ्यतामित्यनेनैवाभिप्रायेण क्रियते। ततश्चावसथनिर्माणोक्तयैव सिद्धो राजाभिप्रायः। यत्पुनः कीर्त्यते 'सवर्त एव मेऽत्स्यन्तीति' तस्यायमाशयः। ममान्नं शूद्रपतितादीनामन्नमिवाश्रयदुष्टं न भवति। अतस्सर्वतस्समागतस्य सर्वेऽपि ब्राह्मणादयः ममान्नं भोक्ष्यन्त इत्यभिप्रायेण सर्वतस्सर्वेषु ब्राह्मणादिमेलनस्थलेषु आवसथान्मापयाञ्चक्रे इति। एवमुपक्रमगतं लिङ्गं तावत् शूद्राव्द्यावृत्तम्। तथा मध्ये श्रुत 'मियं जाये'ति लिङ्गमपि'न ब्राह्मणंक्षत्रिययोरापत्स्वपि हि तिष्ठतोः। कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यत' इति ब्राह्मणस्य शूद्रभार्याया निषिद्धत्वात्। न च रैक्वस्य ब्राह्मणत्वे विप्रतिपात्तः कार्या। तदन्वेषणार्थं प्रेषिते क्षत्तरि तमन्विष्य नाद्राक्षमिति प्रत्यागते सति 'यत्रारे ब्राह्मणस्यान्वेषणा तदेनमृच्छे'ति जानश्रुतिवाक्येन यत्र तपोवनादौ ब्राह्मणस्यान्वेषणं कर्तुमुचितं तत्र गत्वैनं प्राप्नुहीत्यर्थकेन तस्य ब्राह्मणत्वस्फुटीकरणात्। तथा 'यत्रास्मा उवासे'त्युपसंहारे श्रुतमपि शूद्राव्द्यावृत्तं लिङ्गम्। 'नाधार्मिकाश्रिते ग्रामे न व्याधिबहुले तथा। न शूद्रराज्ये निवसेन्न पाषण्डजनैर्वृत' इति शूद्रपालितराज्ये निवासस्य प्रतिषिद्धत्वात्। क्षत्तृप्रेषणग्रामदानलिङ्गद्वयं तु साक्षात्क्षत्रियत्व एव लिङ्गम्। तदुभयं हि पालयितृधर्मः। पालनं च क्षत्रियस्यैव वृत्तिः। 'ब्राह्मं प्राप्तेन सं स्कारं क्षत्रियेण यथाविधि। धर्मस्यास्य यथान्यायं कर्तव्यं परिरक्षण'मिति स्मरणात्। अवेष्ट्यधिकरणे त्वतिक्रान्तनिषेधानां ब्राह्मणवैश्यशूद्राणां पालयितृत्वं दृश्यमानमवलम्ब्य प्रवृत्तं वर्णान्तराणामपि राजसूयाधिकारमापादयता हि पूर्वपक्षिणा स्वाभिमतं राजशब्दप्रवृत्तिनिमित्तं पालनं वर्णान्तरेष्वपि दर्शनीयं शब्दप्रवृत्तिनिमित्तत्वं च धर्मवदधर्मस्याप्यस्य राजत्वादेरिवोपपद्यते। अत एव तदधिकरणपूर्वपक्षे वार्तिके क्षत्रियसम्बन्धित्वेन राज्यं विहितमन्यायेनेतरौ कुर्वाणौ न स्यातामित्याशङ्क्य, सर्वथा तावद्राज्यकरणात्ताभ्यामपि राजत्वं लब्धम्। तावता च राजसूयचोदनायाः प्रयोजनम्। यौ तु न्यायान्यायौ तयोः पुरुषधर्मत्वान्नैकोऽपि क्रतुविधिना गृह्यत इति परिहृतं च। इदमपि जानश्रुतेः क्षत्तृप्रेषणादिलिङ्गावगतं राज्यकरणं तादृशमिति वक्तुं शक्यम्। बाधकाभावे वैदिकलिङ्गावगतस्य तस्य धर्म्यस्यैव ग्राह्यत्वात्। अन्यथा शूद्रेत्यामन्त्रणावगतं शूद्रस्य

विद्याग्रहणमवर्ज्यं वेदे निबद्धमिति वक्तुं शक्यतया शूद्रस्य विद्याधिकारे उक्तवैदिकलिङ्गासिद्धेः वक्ष्यमाणबाधकानां चानुपन्यसनीयतापत्तेः। तस्मादुपक्रमादिगतलिङ्गैः शूद्रत्वाभावः क्षत्तृप्रेषणग्रामदानलिङ्गावगतेन राज्य करणेन क्षत्रियत्वं चावगम्यते। 'सर्वैरप्युक्तलिङ्गैः क्षत्रियत्वमवगम्यत' इति भाष्यं तु सर्वेषामेषां लिङ्गानां क्षत्रियपर्यवसायित्वाभिप्रायमिति न विरोधः। अस्यां संवर्गविद्यायामुपसंहारगताख्यायिकान्तरे ब्राह्मणक्षत्रिययोरन्वयदर्शनात्पूर्वाख्यायिकायामपि तत्प्रायपाठात् रैक्केन ब्राह्मणेनान्वयी जानश्रुतिः क्षत्रियोऽवगम्यत इति॥ तस्य क्षत्रियत्वावगतौ हेत्वन्तरपरं सूत्रम्॥सू०॥ **उत्तरत्र चैत्ररथेन लिङ्गात्**॥३५॥ परिविष्यमाणौ भोजनार्थमुपविष्टौ सूपकारैः प्रदीयमानान्नौ। अत्र कपिगोत्रोत्पन्नश्शौनकस्तावद्ब्राह्मणः प्रसिद्धः। तदन्वयिनोऽभिप्रतारिणः क्षत्रियत्वं साधनीयम्। प्रायपाठसिद्ध्यर्थं तत् चित्ररथवंश्यत्वेन सिसाधयिषुः तदुभयं प्रतिजानीते-**अत्रेति।** तत्र चित्ररथवंश्यत्वे हेतुमाह-**कापेययाज्यस्येति।** तस्य हेतुत्वमुपपादयति-**कापेययाजकेति।** छन्दोगब्राह्मणे 'अथ यस्य ज्योतिरुस्यपूर्वमहर्भवति आयुरुत्तरः' इति द्विरात्रप्रकरणे 'एकाकिनमेवैनमन्नाद्यस्याध्युषं करोती' ति एनं द्विरात्रयाजिनमेकमेव भ्रातृवर्गादिमध्ये ऐश्वर्यस्याध्यक्षं करोतीति फलार्थवादस्यानन्तरं तदुपपादकमर्थवादान्तरं दृश्यते। 'एतेन वै चित्ररथं कापेया अयाजयन् तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वन् तस्माज्चैत्ररथिर्नाम एकः क्षत्रपतिरजायते'ति। अत्र चित्ररथस्य कापेययाजकयोगः श्रुतः। ननु, तेनाभिप्रतारिणः चित्ररथत्वमेव सिद्ध्येत् न तु चित्ररथवंश्यत्वमित्यत आह-**तेनेति।** ननु संज्ञाभेदादभिप्रतारिणः चित्ररथादन्यत्वे तद्वंश्यत्वं कुतस्सिद्ध्यतीत्यत आह-**समानान्वयानामिति।** याजकास्त्रिप्रकाराश्शाट्यायनिशाखायां दर्शिताः। 'पितृभूता मनुष्यभूता देवभूता' इति। पितृपितामहादिपरम्परया कुलक्रमेणागता ऋत्विजः पितृभूताः। तदसंभवे कस्यचिदाधानप्रभृति यावज्जीवमृत्विक्त्वेन प्राप्ता मनुष्यभूताः। तदसम्भवेन तत्र तत्र कर्मणि दैवादागत्यार्त्विज्यं कुर्वन्तो देवभूताः। अतस्समानान्वयानामेव याज्ययाजकभावः इति नास्ति नियत इत्याशङ्क्योक्तं-**प्रायेणेति।** नियमाभावेऽपि मुख्यत्वात्प्रायिकत्वरूपमौत्सर्गिकत्वं तावदस्ति। ततश्च औत्सर्गिकत्वात् पूर्वराजचरित्रेषु बहुशो याज्ययाजककुलव्यवस्थादर्शनात् इहापि 'चित्ररथं कापेया अयाजय'न्निति कपिगोत्रोत्पन्नानामेव बहूनां चित्ररथं प्रति याजकत्ववर्णनाञ्च तेषां पितृभूतयाजकत्वनिश्चयात् कापेययाजकयोगेन चित्ररथवंश्यत्वं सिद्ध्यतीति भावः। चित्ररथवंश्यत्वसिद्धौ तत एव तस्य क्षत्रियत्वं सिद्ध्यति। 'तस्माञ्चैत्ररथिर्नामे'त्यादिवाक्यशेषात् इत्याह-**चित्ररथेति।** एवं प्रायपाठसिद्ध्या तेन प्रकृतार्थसिद्धिं दर्शयति-**एवं चेति।** स्यादेतत्। प्रायपाठेन रैक्कान्वितस्य जानश्रुतेः क्षत्रियत्वनिर्धारणं प्रायपाठसत्त्वाधीनं तदभिप्रतारिणः क्षत्रियत्वनिर्धारणाधीनं तदपि तस्य चैत्ररथित्वनिर्धारणाधीनं तञ्च तस्य कापेययाज्यत्वनिर्धारणाधीनं तत्कुतो निर्धार्यते। न हि तदस्यां श्रुतौ श्रुत्यन्तरे वा श्रुतमस्ति। नापि कल्प्यम्। कल्पकाभावात्। ननु,

यथा 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यत्र स्वर्गार्थ विधीयमानस्य यागस्य ज्योतिष्टोमनामसम्बन्धावगतस्त्रिवृत्पञ्चदशसप्तदशैकविंशरूपज्योतिर्नामकस्तोमसम्बन्धो 'ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोती'ति श्रुत्यन्तरप्रसिद्धेः स्तोत्रोपकरणसोमयोगाङ्गग्रहग्रहण-पौर्वापर्यलक्षणः पर्यवस्यति। ततः फलांर्थ विधीयमानो यागः सोमयाग इत्यपि सिद्ध्यति। तथेहाप्यभिप्रतारिणः कापेयसम्बन्धः प्रतीयमानश्रुत्यन्तरप्रसिद्धस्तद्याज्यत्वलक्षणः पर्यवस्यतीति तत एव स चैत्ररथ इत्यपि सिद्ध्येदिति चेत्स्यादेतदेवं, यदि 'त्रिवृत्पञ्चदशस्सप्तदश एकविंश एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा' इति ज्योतिष्टोमनामनिर्वचनरूपार्थवादानुसारिणि 'ज्योतींषि स्तोमा अस्ये' ति विग्रहवाक्ये षष्टयन्तपदेन यागस्य स्तोमसम्बन्ध इवात्राभिप्रतारिणः कापेयसम्बन्धः केनचित्पदेन यागस्य बोध्येत। न च कापेयसहपाठात् तत्सम्बन्धः कश्चित् अर्थात्सिद्ध्येदिति वाच्यम्। भोजनांर्थ सहोपविष्टाविति हि सहपाठः। न च तावन्मात्रेण कश्चन सम्बन्धस्सिद्ध्यति। अतिथिगृहस्थयोरदर्शनात्। न च विद्याङ्गोपाख्याने सहपाठस्सम्बन्धनियतः। भूमवैश्वानरादि-विद्याङ्गोपाख्यानेषु सहपठितानां प्राचीनशालसत्ययज्ञादीनां तदश्रवणात्। एकविद्यात्वं तेषां सम्बन्ध इति चेत् इहापि स एवास्तु। तस्यैवान्योन्यस्माद्विद्यागतविशेषगुणग्रहणार्थत्वेन विद्याङ्गोपाख्यानेषु विवक्षितुमुचितत्वात्। केचि'त्त्वेतेन वै चैत्ररथं कापेया अयाजय'न्निति द्विरात्रब्राह्मणपाठं कल्पयित्वा तेनाभिप्रतारी साक्षादेव श्रुत्यन्तरश्रुतकापेययाज्यभावः चैत्ररथस्सिद्ध्यतीत्याहुः। तेषामसाम्प्रदायिकश्रुतिपाठकल्पनेनानाप्तत्वं तावत्सिद्ध्यति। न तु ततः अभिप्रतारिणः कापेययाज्यत्वं चैत्ररथित्वं च सिद्ध्यति। सहपाठस्य द्विरात्रब्राह्मणश्रुतसम्बन्धानपेक्षत्वस्योक्तत्वात्। तस्मादनुपपन्नोऽयं प्रायपाठेन क्षत्रियत्वावगत्युपन्यासइति चेदुच्यते। श्रुतितोऽर्थतोऽभिप्रतारिणः कापेयेन सम्बन्धे सामान्यतस्सिद्धे श्रुत्यन्तरतस्स याज्ययाजकभावस्सिद्ध्यतीत्यभिप्रेत्य श्रुत्यन्तरं नोदाहृतम्। किं त्वभिप्रतारिणाप्तह पठिते कापेये श्रुत्यन्तरबलात् चित्ररथयाजकत्वेन प्रत्यभिज्ञायमाने कापेययाज्योऽयमभिप्रतारी चित्ररथवंश्यश्चेति बुद्धिर्भवतीत्यभिप्रेत्य श्रुत्यन्तरमुदाहृतम्। इयं च बुद्धिस्सम्भवत्येव। यथा खल्वविदितपूर्वस्य हस्तिनो निकटे दृश्यमाने पुरुषे राज्ञो हस्तिपकोऽयमिति प्रत्यभिज्ञायमाने सत्ययमस्य हस्तिपकस्य शिक्षणीयो हस्ती राजकीयेश्चेति बुद्धिः। अतो युक्तः प्रायपाठादभिप्रतारिणः क्षत्रियत्वावगमः। सूत्रे 'चैत्ररथेन लिङ्गा'दिति भिन्नविभक्तिनिर्देशेन चैत्ररथेन समभिव्याहारादित्यध्याहाराशय उन्नीयते। अभिप्रतारिणेति श्रुत्युपात्तशब्दे निर्देष्टव्ये चैत्ररथेनेति निर्देशश्शङ्कापरिहारार्थः। एवमत्र शङ्का समुन्मिषति। नाभिप्रतारिणः कापेययाज्यत्वेन क्षत्रियत्वमवगन्तुं शक्यम्। तद्धि तस्य तेन चित्ररथत्वसिद्धिद्वारावगन्तव्यम्। श्रुत्यन्तरे चित्ररथस्यैव कापेययाज्यत्वेन निर्दिष्टत्वात्। न च तस्य तत्सिद्ध्यति। संज्ञाभेदेन चित्ररथाद्भेदप्रतीतेरिति। तत्रायं परिहारो विवक्षितः।

चित्ररथाद्भेदेऽपि तद्वंश्यत्वसिद्धितः क्षत्रियत्वं सिद्ध्यति। ननु, श्रुतौ चित्ररथवंश्येषु चैत्ररथिशब्दः इकारान्तः प्रयुक्तः सूत्रे कथं चैत्ररथशब्दप्रयोगः। उच्यते। चित्ररथस्य द्विरात्रानुष्ठानानन्तरं तदपत्यभूततत्पुत्रपौत्रादिपरम्परायामद्याप्येकैक एव क्षत्रपतित्वं तदीयद्विरात्रानुष्ठानफलमनुभवतीति प्रदर्शनार्थेऽर्थवादे 'अत इदिति, अपत्यार्थेप्रत्ययान्तश्चैत्ररथिशब्दः प्रयुक्तः। अभिप्रतारिणः कापेययाज्यत्वेन चित्ररथवंश्यत्वमात्रं ज्ञातुं शक्यं न तु तदपत्यत्वमित्यभिप्रेत्य चित्ररथवंश्यत्वज्ञापनाय सूत्रे सम्बन्धसामान्यविहिताण्प्रत्ययान्तस्य चैत्ररथशब्दस्य प्रयोग इति विवेकः। 'अयमश्वतरीरथः' इत्युक्तचित्ररथवत्त्वं क्षत्रियत्वे लिङ्गतयोपन्यस्तमिति मन्दानां भ्रान्तिवारणार्थमुत्तरत्रेति विशेषणम्। अस्तु तदपि लिङ्ग को दोष इति चेन्न। तस्य लिङ्गत्वासिद्धेः। शूद्रस्यापि रथसम्भवात् शूद्रस्य वेदनिषेधवद्रथनिषेधस्य प्रामाणिकवचनारूढस्यादर्शनात् तस्य तन्निषेधसत्त्वेऽपि सशकटं पर्यटतो रैक्वस्याश्वतरीरथः प्रियो भवेदिति तदर्थं सम्पाद्यानयनसम्भवात् स्वोपभोगार्हमेव परस्मै दातव्यमिति नियमाभावात्॥ एवं तावच्छूद्रस्य विद्याधिकारे शूद्रेत्यामन्त्रणरूपं लिङ्गं विघटितम्। तथाप्यर्थित्वादिसद्भावादध्ययनाभावेऽपि निषादस्थपतिन्यायेन विद्यानुष्ठानोपयोगिब्रह्मपरमहावाक्यादिग्रहणं स्यादित्याशङ्कामुद्भाव्य तत्परिहारार्थत्वेनोत्तरसूत्रमवतारयति-**यदुक्तमिति॥** ॥सू०॥ **संस्कारपरामर्शात्तदभावाभिलापाच्च॥३६॥ ब्रह्मविद्योपक्रम इति।** एवं छन्दोगोपनिषद्युपाख्यायते। शैशवे प्रमीतपितृकः सत्यकामो विद्यार्थमाचार्यमुपेत्य ब्रह्मचर्यं चरिष्यामि किंगोत्रोऽहमिति मातरं पृष्ट्वा तया त्वज्जनकपरिचरणं कृत्वैव सूतास्मि नाहं गोत्रं वेदेत्युक्तो गौतममासाद्य ब्रह्मचर्यं भगवति वत्स्यामि उपेयां भगवन्तमित्युक्त्वा किंगोत्रस्त्वमिति तेन पृष्टो नाहं मम गोत्रं वेद मातापि नावेदीत् माता मे जाबाला सत्यकामोऽहमित्येतावद्वेद्मीत्युवाच। अथ गौतमस्सत्यवचनेनायं ब्राह्मण इति निर्धार्य 'समिधं सोम्याहर उप त्वा नेष्य' इति चोक्त्वा तथैव तमुपनीय स्वकीयात् गोयूथात् कृशानां दुर्बलानां गवां चत्वारि शतानि पृथक्कृत्य तत्पोषणे तं नियुयुजे। स तु सत्यकामस्तावद्गवां सहस्रसङ्ख्यापूरणात्प्राङ्न प्रत्यागच्छेयमिति प्रतिज्ञाय तृणोदकबहुलमरण्यं नीत्वा तास्संरक्षन् वर्षगणं प्रोवास। ताश्च सहस्रं संपेदिरे। तदनन्तरमृषभोऽग्निः हंसो मद्गुरिति चत्वारो देवतात्मानः तस्य गुरुशुश्रूषया सन्तुष्टास्तस्मै षोडशकलब्रह्मविद्यामुपदिदिशुः। ततस्सहस्रगोभिराचार्यकुलं प्राप्याचार्येण 'ब्रह्मविदिव सोम्य भासि कोऽनु त्वामनुशशास' इति पृष्टस्तद्वृत्तान्तमुक्त्वा देवैरुपदिष्टमित्यतोऽपि नाहं हृष्यामि स्वकीयादाचार्यादेव किल लब्धा विद्या साधीयसी भवति भगवानेव मह्यं ब्रवीत्विति प्रार्थयामास। ततो गौतमस्तामेव षोडशकलब्रह्मविद्यामुपदिदेशेति। अत्र विद्योपक्रमे तावदुपनयनं परामृश्यत इति उपनयनवतामेव ब्रह्मविद्याधिकार इत्येष्टव्यमिति भावः। अस्तु शूद्रस्याप्युपनयनमित्यत आह शूद्रस्येति। पातकं वृथामांसभक्षणादिकृतम्। ननु मानवधर्मशास्त्रे 'न शूद्रे पातकं किञ्चिदि'ति शूद्रस्य

संस्कारनिषेधानन्तरं 'धर्मेप्सवस्तु धर्मज्ञास्सतां वृत्तिमनुव्रता:। मन्त्रवर्जं न दुष्यन्ति प्रतिष्ठामाप्नुवन्ति च॥ इति श्लोकेन धार्मिकाणां शूद्राणां मन्त्रवर्जं संस्काराणामभ्यनुज्ञानं कृतमिति चेत् सत्यम्। तदभ्यनुज्ञानं जातकर्मादिसंस्कारान्तरविषयं नोपनयनविषयमपि। शूद्राणामाहत्योपनयनाभाव-स्मरणादित्यभिप्रेत्य गौतमस्मृतिमुदाहरति-शूद्र इति। एकजाति: द्वितीयादिजन्मरहित इत्यर्थ:। तच्छूद्रस्य द्वितीयजन्मरूपोपनयनाभावद्विद्यायां नाधिकार इत्याह-**तस्येति।** निषादस्य त्वनुपनीतस्यापि विशिष्टविधिबलात् मन्त्रग्रहणमुपपद्यत इत्याह-**निषादेति।** शूद्रस्य महावाक्यग्रहणे विशिष्य विधिर्नोपलभ्यत इति न तस्य विद्याधिकारप्राप्ति:। प्रत्युत विद्याप्रकरणे उपनयनपरामर्शात्तद्रहितस्य तत्रानधिकार एवोन्नीयते इत्यभिप्रेत्याह-**उपनयनाभावेऽपीति।** नन्वेवं सति तत्र 'नैतदब्राह्मणो विवक्तुमर्हती'ति ब्राह्मण्यनिर्धारणपूर्वकं सत्यकामस्य शिष्यत्वेन स्वीकारस्योक्तत्वात् ब्राह्मणस्यैव विद्याधिकार: स्यात् न क्षत्रियवैश्ययो:। ब्राह्मण्यनिर्धारणं तु तत्र उनयनार्थमुच्यते न विद्यार्थमुपनयने ब्राह्मणक्षत्रियवैश्यजातिभेदेन प्रकारभेदसत्त्वेन तत्रैव जातिनिर्धारणस्यापेक्षिततत्वादिति चेत् तर्ह्युपनयनमप्यध्ययनार्थमित्युच्यते न विद्यार्थमिति तुल्यम्। न च वाच्यं नाध्ययनाङ्गमिदमुपनयनमुपनयनानन्तरमध्ययनस्याप्रतिपादनात् तदनन्तरमेव गोसंरक्षणे नियुज्य तन्नियोगानुष्ठानपूर्वकं प्रत्यागताय तस्मै विद्योपदेशस्यैव प्रतिपादनात्। किं तु श्रुत्यन्तरप्रसिद्धमध्ययनाङ्गोपनयनादन्यद्विद्याङ्गमिदमुपनयनम्। तत्रैव 'समिधं सोम्याहरे'ति समिदाहरणानुशासनस्योपयुक्तत्वात् तदर्थे शिष्यकर्तृकोपगमने 'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणि: श्रोत्रियं ब्रह्मनिष्ठ'मिति समित्पाणित्वस्य विहितत्वादिति। उपक्रमगताभ्यां गोत्रापरिज्ञानगोत्रप्रश्नाभ्यामध्ययनाङ्गमिदमुपनयनमिति प्रतीते:। गोत्रापरिज्ञानं हि अकृताध्ययनाङ्गोपनयनस्य बालस्य सम्भवति। न तूपनीतस्याधीतसाङ्गस्वाध्यायस्य ब्रह्मविद्याधिजिगमिषया गुरुमुपसीदत:। अध्ययनाङ्गोपनयन एव च गोत्रपरिज्ञानमुपयुज्यते। गोत्रभेदेन तत्र प्रकारभेदसत्त्वात् विद्याङ्गोपनयने तदभावात्। समिदाहरणानुशासनं तु अध्ययनाङ्गोपनयनहोमोपयुक्तसमिदाहरणं येन केनचित्कर्तव्यमयमेव सन्निहित: करोत्वित्यभिप्रायेणाप्युपपद्यते। तमुपनीय 'कृशानामबलानां चतुश्शता गा निराकृत्योवाचे'त्यनन्तरवाक्यगतमुपनीयेत्येतद्यदर्थोऽयमुपनयनसंस्कार: तत्पर्यन्ताध्ययनपरमित्य-ध्ययनप्रतिपादनमपि लभ्यते। दृष्टं हि 'तस्मादग्निचिद्वर्षति न धावे' दित्यत्राग्निचिदित्यस्य यदर्थोऽग्नेश्चयनसंस्कारस्तत्पर्यन्ताग्निचयनपरत्वम्। अत एवाग्निचयनाङ्गकक्रतौ भूत एव वर्षति न धावेदित्याद्यग्निचिद्व्रतानि न त्वग्निचयनसंस्कारमात्रे भूत इति निर्णीतं पूर्वतन्त्रे क्रमलक्षणे। एवं चोपनयने सत्युपनीतकर्तृकेऽध्ययने निवृते सत्याचार्यस्समावर्तनात्प्राक् गुरुदक्षिणार्थतया महतीं शुश्रूषां कृत्वा तया शुद्धान्त: करण: कांचन ब्रह्मविद्यामयमधिगच्छत्वित्यभिप्रायेण गवां संरक्षणे नियुयुजे

इत्युत्तरसंदर्भोऽपि सङ्गच्छते। तस्माद्विद्योपक्रमगतस्यापि ब्राह्मण्यनिर्धारणस्य उपनयनार्थत्वेनान्यथासिद्धौ तस्योपनयनस्यप्यध्ययनार्थत्वेनान्यथासिद्धिः स्यादिति तुल्य एव न्यायः। यद्युच्येताध्ययनार्थत्वेऽप्युपनयनस्य विद्याङ्गोपाख्याने तत्कीर्तनमुपनीतस्यैव विद्यायामधिकार इति ज्ञापनार्थत्व एव साफल्यमश्रुत इति। तर्हि तत्र ब्राह्मण्यनिर्धारणवचनमपि ब्राह्मणस्य सत उपनीतस्य तत्राधिकार इति ज्ञापनार्थत्व एव साफल्यमश्रुत इति तुल्यम्। न च वाच्यं 'नैतदब्राह्मणो विवक्तुमर्हती'ति शूद्रत्वाभावमात्रनिर्धारणं न तु ब्राह्मणत्वनिर्धारणमिति। ब्राह्मणभिन्नत्वस्य प्रवृत्तिनिमित्तस्य क्षत्रियवैश्यसाधारणत्वेनाब्राह्मणशब्दस्य शूद्रमात्रविषयत्वाभावात् 'यद्ब्राह्मणश्चाब्राह्मणश्च प्रश्नमेयाता'मित्यत्र क्षत्रियादिवर्णत्रयसाधारण्येन तत्प्रयोगदर्शनाञ्च। 'नञिवयुक्तमन्यसदृशाधिकरणे तथा ह्यर्थगति'रिति शाब्दिकोक्तन्यायेन ब्राह्मणसदृशतद्भिन्नपरस्याब्राह्मणशब्दस्य द्विजन्मतया ब्राह्मणेनात्यन्तसदृशौ क्षत्रियवैश्यौ परित्यज्य शूद्र एव वृत्त्ययोगाञ्च। मातरं प्रति ब्राह्मण्यनियतगोत्रप्रश्नस्य विशिष्य ब्राह्मण्यनिर्धारणहेतुत्वेन ततश्शूद्रत्वाभावमात्रनिर्धारणोत्तययोगाञ्च। तस्माद्विद्याङ्गोपाख्याने ब्राह्मण्यनिर्धारणवचनं ब्राह्मणस्यैव विद्यायामधिकार इत्यत्रेव तस्यामुपनयनवचनमप्युपनीतस्यैव तत्राधिकार इत्यत्रापि न लिङ्गमित्याशङ्कानिराकरणार्थं सूत्रम्–**तदभावनिर्धारणे च प्रवृत्तेः॥३७॥** शूद्रत्वाभावनिर्धारणे सत्याचार्यस्सत्यकाममुपनेतुं प्रववृते इति 'नैतदब्राह्मणो विवक्तुमर्हती' त्यादिनोच्यते। न ह्यत्रोच्यमाने निर्धारणे मातरं प्रति गोत्रप्रश्नो हेतुः। येनेदं ब्राह्मण्यनिर्धारणं स्यात्। किं तु 'न सत्यादगा' इत्युच्यमानं 'नाहं गोत्रं वेद न मे मातापि माता जाबाला सत्यकामोऽह'मिति यथाभूतार्थवादित्वरूपं सत्यवचनानतिक्रमणम्। 'न सत्यादगा' इति वाक्यस्य वर्ण्यमाननिर्धारणहेतुपरत्वात्। सत्यवचनानतिक्रमणं च शूद्रत्वाभावनिर्धारण एव हेतूभवनयोग्यम्। 'अनृतं चातिवादश्च पैशुन्यमतिलोभिता। निकृतिश्चाभिमानश्च जन्मतश्शूद्रमाविशत्॥ दृष्ट्वा पितामहश्शूद्रमभिभूतं तु तामसैः॥ द्विजशुश्रूषणं धर्मं शूद्राणां समकल्पयत्॥ न सन्ति तामसा भावः शूद्राणां द्विजसेवनात्॥' इत्यनृतवादित्वस्य शूद्रेषु प्रसिद्धत्वात्। एवं च साधारणस्यापि अब्राह्मणशब्दस्य हेतुवचनानुसारेणात्र विशिष्य शूद्रे तात्पर्यमेष्टव्यम्। अतः पूर्वसूत्रोक्ते लिङ्गे न काचिदनुपपत्तिः। प्रत्युतेदमपि विद्याधिकारिणश्शूद्रत्वाभावनिर्धारणं शूद्रस्य विद्यानधिकारे लिङ्गान्तरमित्यभिप्रेत्य सूत्रं व्याचष्टे-**नैतदब्राह्मण इति॥** ननु विद्याप्रकरणे अध्ययनाङ्गोपनयनपरामर्शस्तद्वतामेव विद्याधिकार इत्यत्र लिङ्गमिति यदुक्तं तत्रेदं विचारणीयम्। अध्ययनाङ्गमुपनयनमध्ययन इव विद्यायां नोपनेयासत्तिद्वारोपयुज्यते। तदर्थस्य विद्योपदेशकाले कर्तव्यस्य विद्याङ्गोपनयनस्य सत्त्वात्। नाप्यध्ययनेन विद्योपयुक्तसकलवेदवाक्यावाप्तिद्वारा। स्वस्वशाखामात्रविषयविधिविहितेनाध्ययनेन शाखान्तरगततदुपयुक्तवाक्यानामवाप्त्यसम्भवात्। किं तु'न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात्'

'नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृत' इत्यनुपनीतस्य वेदवाक्यग्रहणं निषिद्धमिति विद्योपयुक्तस्वपरशाखागतसकलवाक्यग्रहणार्थं तन्निषेधं तन्निषेधाविषयत्वसम्पादनद्वारेत्युपपादनीयम्। ततश्च शूद्रस्यानुपनीतस्य वेदवाक्योच्चारणनिषेधादेव प्रणवादिमन्त्रवतीषु वेदान्तवाक्यश्रवणमनन-पूर्विकासु च दहरपाशुपतादिविद्यासु नाधिकारः। विद्याप्रकरणे अध्ययनाङ्गोपनयनपरामर्श-स्यात्रान्यार्थदर्शनं लिङ्गमित्येव पर्यवस्यति। न त्वेतद्युक्तम्। अनुपनीतानां वेदवाक्यग्रहणनिषेधो हि न सर्ववेदवाक्यविषयः। त्रैवर्णिकानां मातापित्रोः पैतृमेधिके कर्मणि तदुपयुक्तवेदवाक्योच्चारण-स्योपनयनाभावेऽपि स्मृत्यनुमतत्वात्। किं तु तदतिरिक्तवेदवाक्यविषय इति वक्तव्यम्। एवं शूद्रस्याप्यनुपनीतस्य वेदवाक्योच्चारणनिषेधः सर्वविषयो माभूत्। विद्यानुपयोगिपाकयज्ञाद्यपेक्षित-मन्त्रादिविषयोऽस्तु। अस्ति हि शूद्रस्यापि पाकयज्ञाधिकारः। 'दानं च दद्याच्छूद्रोऽपि पाकयज्ञैर्यजेत चे'ति स्मरणात्। तदङ्गमन्त्रोच्चारणविषयः शूद्रस्य वेदवाक्योच्चारणनिषेधः। अत एव गौतमस्मृतौ शूद्रधर्मप्रकरणे 'पाकयज्ञैः स्वयं यजेते'ति श्लोके अनुज्ञातोऽस्य नमस्कारो मन्त्र इति तेषां लौकिको नमोऽन्तमन्त्र एवोक्तः। तस्मादुपनयनाभावेऽपि शूद्रस्य वि धिकारस्सङ्गच्छते। विद्याप्रकरणे दृष्टस्यापि शूद्रस्यापि शूद्रत्वाभावनिर्धारणस्य उपनयनार्थत्वादुपनयनस्य चाध्ययनार्थत्वात् अन्यार्थप्रवृत्तं तल्लिङ्गद्वयं मुक्तयर्थित्वेन सामान्यतः प्राप्तस्य शूद्राणां विद्याधिकारस्य न व्यावर्तकमिति शङ्कोत्तरत्वेनोत्तरसूत्रमवतारयति **नन्विति**। यद्यपि त्रैवर्णिकानामुपनयनाभावेऽपि क्वचिद्वेदवाक्योच्चारणं दृष्टमित्येतदवलम्ब्य तद्वदेव शूद्राणामपि क्वचिद्वेदवाक्योच्चारणमस्त्विति शङ्का मन्दा। तथापि संवर्गविद्यायां क्वचिदुपाख्याने ब्राह्मणस्य द्वितीयः क्षत्रियो दृष्ट इत्येतदवलम्ब्य उपाख्यानान्तरेऽपि तथेति निर्णीतवन्तं सिद्धान्तिनं प्रत्येव शङ्का युक्तेति भावः।।सू०।।

श्रवणाध्ययनार्थप्रतिषेधात्।।३८।।

इति शिवार्कमणिदीपिका अपशूद्राधिकरणम् समाप्तम्

अथ कम्पनाधिकरणम्। ॥सू० ३९॥

शाङ्करभाष्यम्

***कम्पनात्*॥३९॥**

अवसितः प्रासङ्गिकोऽधिकारविचारः। प्रकृतामेवेदानीं वाक्यार्थविचारणां प्रवर्तयिष्यामः। ''यदिदं किञ्च जगत्सर्वं प्राण एजति निःसृतम्। महद्भयं वजमुद्यतं य एतद्विदुरमृतास्ते भवन्ति'' (का० २/६/२) इति। एतद्वाक्यं ''एजृ कम्पने'' इति धात्वर्थानुगमाल्लक्षितम्। अस्मिन्वाक्ये सर्वमिदं जगत्प्राणाश्रयं स्पन्दते, महच्च किंञ्चिद्भयकारणं वज्रशब्दितमुद्यतम्, तद्विज्ञानाच्चामृतत्वप्राप्तिरिति श्रूयते। तत्र कोऽसौ प्राणः, किं तद्भयानकं वज्रमित्यप्रतिपत्तेर्विचारे क्रियमाणे प्राप्तं तावत्प्रसिद्धेः पञ्चवृत्तिर्वायुः प्राण इति। प्रसिद्धेरेव चाशनिर्वज्र स्यात्। वायोश्चेदं महात्म्यं सङ्कीर्त्यते। कथम्? सर्वमिदं जगत्पञ्चवृत्तौ वायौ प्राणशब्दिते प्रतिष्ठायैजति। वायुनिमित्तमेव च महद्भयानकं वज्रमुद्यम्यते, वायौ हि पर्जन्यभावेन विवर्तमाने विद्युत्स्तनयित्नुवृष्ट्यशनयो विवर्तन्त इत्याचक्षते। वायुविज्ञानादेव चेदममृतत्वम्। तथाहि श्रुत्यन्तरम्–''वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद'' इति। तस्माद्वायुरयमिह प्रतिपत्तव्य इति॥

एवं प्राप्ते ब्रूमः–ब्रह्मैवेदमिह प्रतिपत्तव्यम्। कुतः? पूर्वोत्तरालोचनात्॥ पूर्वोत्तरयोर्हि ग्रन्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे। इहैव कथमकस्मादन्तराले वायुं निर्दिश्यमानं प्रतिपद्येमहि? पूर्वत्र तावत् ''तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते। तस्मिँल्लोकाः श्रिताः सर्वे तदु नात्येति कश्चन'' (का० २/६/१) इति ब्रह्म निर्दिष्टम्, तदेवेहापि संनिधानात् जगत्सर्वं प्राण एजतीति च लोकाश्रयत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते। प्राणशब्दोऽप्ययं परमात्मन्येव प्रयुक्तः ; ''प्राणस्य प्राणम्'' (बृ० ४/४/१८) इति दर्शनात्। एजयितृत्वमपीदं परमात्मन एवोपपद्यते, न वायुमात्रस्य। तथा चोक्तम्–''न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ'' (का० २/५/५) इति। उत्तरत्रापि ''भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः'' (का० २/६/३) इति ब्रह्मैव निर्देक्ष्यते, न वायुः। सवायुकस्य जगतो भयहेतुत्वाभिधानात्। तदेवेहापि संनिधानात महद्भयं वज्रमुद्यतं च भयहेतुत्वप्रत्यभिज्ञानान्निर्दिष्टमिति गम्यते।

वज्रशब्दोऽप्ययं भयहेतुत्वसामान्यात्प्रयुक्तः। यथाहि वज्रमुद्यतं ममैव शिरसि निपतेद्यहमस्य शासनं न कुर्यामित्यनेन भयेन जनो नियमेन राजादिशासने प्रवर्तते, एवमिदमग्निवायुसूर्यादिकं जगदस्मादेव ब्रह्मणो बिभ्यन्नियमेन स्वव्यापारे प्रवर्तत इति भयानकं वज्रोपमितं ब्रह्म। तया च ब्रह्मविषयं श्रुत्यन्तरम्–"भीषाऽस्माद्वातः पवते। भीषोदेति सूर्यः। भीषाऽस्मादग्निश्चेन्द्रश्च। मृत्युर्धावति पञ्चमः" (तै॰ ८/१) इति। अमृतत्वफलश्रवणादपि ब्रह्मैवेदमिति गम्यते। ब्रह्मज्ञानाद्ध्यमृतत्वप्राप्तिः। "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनय" (श्वे॰ ६/१५) इति मन्त्रवर्णात्। यत्तु वायुविज्ञानात्क्वचिदमृतत्वमभिहितम्, तदापेक्षिकम्। तत्रैव प्रकरणान्तरकरणेन परमात्मानमभिधाय "अतोऽन्यदार्तम्" (बृ॰ ३/४) इति वाय्वादेरार्तत्वाभिधानात्। प्रकरणादप्यत्र परमात्मनिश्चयः ; "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद" (का॰ १/२/१४) इति परमात्मनः पृष्ठत्वात्॥३९॥ इति दशमं कम्पनाधिकरणम्॥

इति शाङ्करभाष्यम् कम्पनाधिकरणम् समाप्तम्

वार्तिकम्

कम्पनात्।।३९।। समाप्ता प्रासङ्गिकी कथा। सम्प्रति प्रकृतमेव समन्वयं वर्णयामः। ''शब्दादेव प्रमित'' इत्यत्र जीवस्य ब्रह्मस्वरूपावबोधनायानुवादसंभवाद् न ब्रह्मप्रकरणादङ्गुष्ठमात्रश्रुतिरुत्क्रष्टव्येत्युक्तम्, इह तु प्राणस्य स्वरूपेण मिथ्यात्वाद् न ब्रह्मैक्यबोधायानुवादः संभवति; अतः प्रकरणं भित्त्वा लिङ्गेनास्य मन्त्रस्योत्कर्ष इत्यवान्तरसङ्गतिः ; प्रासङ्गिकेनापशूद्रेण सङ्गत्यभावात्। अधिकरणविषयमुपस्थापयति—*यदिदमिति*।। *लक्षितम्*।। कम्पनादिति सूत्रपदेनेति शेषः। तत्र संशयबीजमाह—*अस्मिन् वाक्य इति*।। पूर्वपक्षं परिगृह्णाति—*विचारे क्रियमाणे प्राप्तं तावदिति*।। अत्र किं प्राण वज्रश्रुत्योरनुग्रहेण प्रकरणं भङ्क्त्वा वाय्वात्मकः पञ्चवृत्तिः प्राणो मन्त्रार्थः परिगृह्यताम्, किं वा प्रकरणानुग्रहेण तयोर्बाधया परं ब्रह्मेति। तत्र श्रुतिप्रकरणयोस्त्रिकक्ष्यान्तरितत्वात् श्रुत्या प्रकरणबाधेन वाय्वात्मकपञ्चवृत्तिप्राणपरिग्रहो युक्तः। प्राणशब्दो हि रूढेः पञ्चवृत्तिप्राणे मुख्यः, ब्रह्मणि त्वतत्संबन्धाद् भाक्तः। तथा वज्रशब्दोऽपि वाय्वात्मके तस्मिन् मुख्यः स्यात्; वायोरेव पर्जन्यादिक्रमेणाशनिरूपतया विवर्तनात्, अशनौ च वज्रशब्दप्रसिद्धेः, ब्रह्मणि तूपमार्थतया गौणः स्यात्। एवं च प्राणवज्रश्रुतिभ्यां प्रकरणबाधे सति तदनुसारेणान्यान्यपि तदेकवाक्यतापन्नानि मन्त्रपदानि व्याख्येयानि। तत्र सत्पमीश्रुतिः सत्यर्था, नाधारार्था; प्रकृत्यर्थेन तस्यान्वयासंभवात्। जगत्पदं तु योगेन जङ्गमाभिप्रायम्, सर्वशब्दोऽपि वैश्वदेबीपदवत् सर्वनामत्वात् संनिहिततदनन्तराभिहितार्थाभिधानपर्यवसायी सन् जङ्गममात्राभिप्राय एव; अतो न तद्बाधशङ्काऽपि। तेनायं मन्त्रार्थः संपद्यते—यस्मिन् पञ्चवृत्तिप्राणे सति सर्ववेष्टाऽदर्शनम्, यच्च बहिरशनिरूपेण विवर्तमानं लोकानां महद्भयकारणम्, उपासका एतत्प्राणतत्त्वमेवंगुणतया विदुः=विजानन्ति, ते अमृताः=अमरधर्माणो भवन्तीत्यर्थः। श्रुत्यन्तरेऽपि वायुविज्ञानादमृतत्वफलं श्रुतम्। ''वायुरेव व्यष्टिर्वायुरेव समष्टिरपपुनर्मृत्युं जयति य एवं वेदे''ति। यदि चाधारार्थैव सप्मी व्याख्यायते,

जगच्छब्दश्च रूढयाऽविशेषेण स्थावरजङ्गमार्थ इति, अस्तु नाम; तथापि प्राणस्तुतिरेवेयं भविष्यति; प्राणबज्रश्रुत्यनुसारात्, अत्यथा तद्बाधः स्यादित्युक्तम्। तमिमं पक्षं गृहीत्वा भाष्यकार आह–वायोश्चेदं माहात्म्यं सङ्कीर्त्यत इत्यादि*।। तस्मात् पञ्चवृत्तिप्राण एवास्य मन्त्रस्यार्थः। तथाच प्रकरणादुत्कर्ष इति प्राप्तम्।।

एवं प्राप्तेऽभिधीयते–परमेव ब्रह्म प्राणशब्दम्। कुतः? कम्पनात्। तस्मिन् हि प्राणाधारे तत एव निःसृतस्य स्थावरजङ्गमात्मकस्य जगतः कम्पनम्=चलनम्, जीवनानुकूलव्यापारः श्रूयते–''यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतम्'' इति। तञ्च परब्रह्मणः प्राणशब्दत्वे घटते, नान्यथा। न हि पञ्चवृत्तिप्राणाधारे प्राणसहितस्य समग्रस्य जगतस्ततो निःसृतस्य व्यापारः संभवति; ''यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति'' ''सन्मूलास्सोम्येमाः सदायतनाः सत्प्रतिष्ठाः'' ''न प्राणेन नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति यस्मिन्नेता उपाश्रिताः'' इत्यादिश्रुतिशतविरोधात्। न च प्राणशब्दप्रयोगो ब्रह्मण्यनुपपन्नः ; ''प्राणस्य प्राणम्'' ''स प्राणन्नेव प्राणो भवति'' ''प्राणबन्धंन हि सोम्य मनः'' ''प्राण एवैकधा भवति'' ''प्राणोऽस्मि प्रज्ञात्मे'' त्यादिश्रुतिषु ब्रह्मणि प्राणशब्दप्रयोगदर्शनात्, लाक्षणिकत्वेऽपि निरूढलक्षणायाः, प्रसिद्धेरविशिष्टत्वात्। एतेन–यदुक्तम्–सतिसप्तमी परिगृह्यते, नाधारसप्तमी; वैपरीत्यात्–इति, तदपि–अपास्तम्; निःसृतशब्दसमभिहारादाधारसप्तम्या एव निर्धारितत्वाञ्च, अन्यथा निःसरणापादानान्तरकल्पनापत्तेः। जगच्छब्दोऽपि योगेन न जङ्गममात्रपरः ; विश्वस्मिन् तस्य रूढत्वात्, रूढया योगस्य बाधात्, योगेनैव व्यापारलाभात्, एजतिपदवैयर्थ्यापत्तेश्च, ''यदिदं किञ्चे''ति ''सर्वमि''ति च सर्वनामश्रुतिसङ्कोचापत्तेश्च। एतेन–यदप्युक्तम्–प्राणस्तुतिरियम्–इति, तदपि–प्रत्युक्तम्; मुख्यार्थे संभवति स्तुत्याश्रयणायोगात्। यदपि–ब्रह्मपक्षे वज्रशब्द उपमार्थतया गौणः स्यात्–इत्युक्तम्, तत् तथैंव; अशनिवाचकस्य वज्रपदस्य मुख्यया वृत्त्या ब्रह्मण्यसंभवात्, भयहेतुत्वगुणयोगेनैव तत्र प्रवर्तनात्, ''भीषाऽस्माद् वातः पवते'' इत्यादिश्रुतेर्ब्रह्मणि भयकारणत्वप्रसिद्धेः। न च मुख्यवृत्त्या वाक्ये सर्वाणि पदानि प्रयोक्तव्यानीति नियमोऽस्ति; गौणलक्षणावृत्त्युच्छ्रेदापत्तेः। न च त्वप्रक्षेऽपि वज्रशब्दस्य मुख्या वृतिः संभवति; कार्यशब्दस्य कारणे विना लक्षणामप्रवृतेः न हि वायुः साक्षादशनिः, अपि तु तस्य कारणम्। वाह्याभ्यात्मभेदेन वाह्यवायु पञ्चवृत्तिपाणयोर्भेदाञ्च। तद्विज्ञानादमृतत्वफलश्रवणमपि ब्रह्मपक्ष एवोपपद्यते; ''तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्ययेऽयनाय'' ''येऽन्यथाऽतो विदुस्तेन राजानः क्षय्यलोका भवन्ती'' त्यादिश्रुतेः। एतेन–यदुक्तम्–वायुविज्ञानादपि श्रुत्यन्तरेऽमृतत्वफलं श्रूयते–''वायुरेव

व्यष्टिर्वायुरेव समष्टिरपपुनर्मृत्युं जयति य एवं वेदेति, तदपि–प्रत्युक्तम्; तस्योक्तश्रुतिविरोधित्वेनाऽऽपेक्षिकत्वात्, अपमृत्युक्षयस्यैव तत्फलत्वश्रवणाञ्च, न पुनः सर्वात्मना मृत्युजयस्य, अपेतिविशेषणवैयर्थ्यापत्तेः। अपि च पञ्चवृत्तिप्राणपरिग्रहे प्रकरणसंनिधी व्याकुप्येयाताम्, ब्रह्मपरिग्रहे तु न तद्वयाकोपः। तत्र संनिधिकोपं भाष्यकारो दर्शयति– *पूर्वोत्तरयोर्हीत्यादिना*।। अनेनैकवाक्यतापि व्याकुप्ता भवतीति दर्शितम्। प्रकरणव्याकोपमाह– *प्रकरणादप्यत्रेति*।। तस्माद् ब्रह्मैवात्र प्राणशब्दमिति सिद्धम्।।३९।। इति दशमं कम्पनाधिकरणम्।।

इति वार्त्तिकम् कम्पनाधिकरणम् समाप्तम्

प्रदीपः

कम्पनात्।।३९।। प्राणवज्रपदार्थः, परमात्मा, सर्वप्रपञ्चकम्पकत्वादिति सूत्रार्थः। सर्वजगत्कम्पनमहाभीतिजनकत्वरूपब्रह्मलिङ्गं प्राणवज्रश्रुतिभ्यामभिभूयते। आकाशाधिकरणादौ त्वेकैव श्रुतिर्लिङ्गेनाभिभूयते, नात्रेव श्रुतिद्वयमिति न तेनास्य गतार्थत्वम्, इत्यस्पष्टब्रह्मलिङ्गकत्वम्। ''शब्दादेव प्रमित'' इत्यस्य तु–स्मृत्यनुगृहीताऽङ्गुष्ठमात्रश्रुतिर्ब्रह्मस्वरूपाभेदबोधनार्थं तत्त्वमसीत्यादौ त्वम्पदमिवोद्देश्यसमर्पकत्वात् तात्पर्यगत्या परमात्मपरैव, इति न जीवश्रुतित्वं तस्येति युक्तम्, अत्र तु न प्राणवज्रशब्दयोर्लक्षणायां प्रमाणमित्याक्षेपसङ्गत्येदमधिकरणं प्रवृत्तम्, इति प्रमिताधिकरणेनैवानन्तरसङ्गतिः ; पूर्वतनाधिकरणयोः प्रासङ्गिकत्वेन तेन सङ्गत्यसंभवात्।।

अत्रानुसन्धेयानि विषयवाक्यानि–''ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः। तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते। तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन। यदिदं किञ्च जगत्सर्वं प्राणएजति निःसृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति। भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः।।'' इति कठवल्ल्या द्वितीयाध्याये षष्ठवल्लीगतानि वाक्यानि, अन्यानि च–''अन्यत्र धर्मादि'' त्यादिपरमात्मप्रकरणगतानि।।

तत्र प्रथममन्त्रस्याश्वत्थ इति विशेष्यान्तरसत्त्वात् प्रधानविषयवाक्यतयात्राभिमतस्य द्वितीयमन्त्रस्य प्राणादिशब्दान्तरवत्त्वाच्च नानयोरेकवाक्यता, इति नात्र प्रकरणानुवृत्तिकल्पनं युक्तम्। वाक्यशेषस्तु यद्यपि ब्रह्मपक्षस्यैवानुगुणः ; एवमपि सन्दिग्ध एव, इति तस्यानिर्णायकत्वात् प्राणवज्रशब्दयोश्चात्र ब्रह्मेतरपरतायामेव स्वारस्याच्च न तेनापि व्यवस्थेति प्राणवज्रशब्दयोर्ब्रह्मेतरवायुपरत्वमेवेति पूर्वपक्षः।।

सिद्धान्तस्तु–सर्वजगदादिशब्दसङ्कोचाद्यापत्त्या प्राणशब्दस्य ब्रह्मार्थेऽपि प्रयोगाद् वज्रशब्दस्य तु पक्षद्वयेऽपि लाक्षणिकत्वाविशेषाद् ब्रह्मपरत्वमेव तयोर्युक्तम्। सति चैवं वाक्यशेषोऽपि–''भयादस्याग्निस्तपती'' त्यस्यपदघटितः प्रकरणानुवृत्तिसूचकोऽनुगृहीतो भवति–इति।।

तत्र पूर्वपक्षं संगृह्णाति– *प्राप्तं तावदित्यादिना*। अत्र ''यदिदं किञ्च जगत्सर्वमि'' ति पदानि वायुस्तुतिपरतया योजयति– *वायोश्रेति*।। वज्रशब्दस्य वायौ प्रवृत्तिमाह– *वायुनिमित्तमिति*।। निमित्तत्वं चात्र परिणामिभावेनेत्याह– *वायौ हि पर्जन्यभावेनेति*।। अमृतत्वप्राप्तिफलनिर्देशं पूर्वपक्षानुगुणतयोपपादयति– *वायुविज्ञानादिति*।। सिद्धान्तपक्षं संगृह्णाति– *ब्रह्मैवेति*।। सन्दंश-न्यायेन ब्रह्मपरत्वमाह– *पूर्वोत्तरयोरिति*।। पूर्वोत्तरवाक्यानि तु संगृहीतान्येव ब्रह्मपरतया निर्णीतानि। अस्मिन् वाक्ये प्राण इति सप्तम्याधारपरैव; अन्यथा ततो निस्सरणासंभवात्। तथाच पूर्वतनवाक्ये ''तस्मिन् लोकाः श्रिताः सर्वे'' इति श्रुतं सर्वाधारत्वमेवात्रापि प्रत्यभिज्ञायत इत्याह– *पूर्वत्रेत्यादिना*– *गम्यत इत्यन्तेन*।। प्राणश्रुतेरपि ब्रह्मसाधारण्यमाह– *प्राणशब्दोऽपीति*।। तथाचोभपत्र श्रुतिबाधे समाने वाक्यप्रकरणयोरेवानुसरणं युक्तमिति भावः। वाक्यशेषोऽपि प्रकृतपक्षस्यैवानुगुण इत्याह– *उत्तरत्रापीति*।। ''भयादग्निश्चे'' त्यादीनां ब्रह्मपरत्वे श्रुत्यन्तरं निर्णीतार्थं प्रमाणयति– *तथाच ब्रह्मविषयमिति*।। अन्यत् स्पष्टम्।।३९।। इति दशमं कम्पनाधिकरणम्।।

इति प्रदीपः कम्पनाधिकरणम् समाप्तम्

भामती

प्राणवज्रश्रुतिबलाद्वाक्यं प्रकरणं च भङ्क्त्वा वायुः पञ्चवृत्तिराध्यात्मिको वाह्यश्चात्र प्रतिपाद्यः। तथाहि–प्राणशब्दो मुख्यो वायावाध्यात्मिके, वज्रशब्दश्चाशनौ। अशनिश्च वायुपरिणामः। वायुरेव हि वाह्यो धूमज्योतिः सलिलसंवलितः पर्जन्यभावेन परिणतो विद्युत स्तनयित्नुवृष्टयशनिभावेन विवर्त्तते। यद्यपि च सर्वं जगदिति सवायुकं प्रतीयते, तथापि सर्वशब्द आपेक्षिकोऽपि न स्वाभिधेयं जहाति किन्तु सङ्कुचितवृत्तिर्भवति। प्राणवज्रशब्दौ तु ब्रह्मविषयत्वे स्वार्थमेव त्यजतः। तस्मात् स्वार्थत्यागद्वरं वृत्तिसङ्कोचः, स्वार्थलेशावस्थानात्। अमृतशब्दोऽपि मरणाभाववचनो न सार्वकालिकं तदभावं ब्रूते, ज्योक्जीवितयापि तदुपपत्तेः। यथा अमृता देवा इति। तस्मात् प्राणवज्रश्रुत्यनुरोधाद्वायुरेवात्र विवक्षितो न ब्रह्मेति प्राप्तम् एवं प्राप्ते उच्यते कम्पनात् सवायुकस्य जगतः कम्पनात् परमात्मैव शब्दात् प्रमित इति मण्डूकप्लुत्यानुषज्यते। ब्रह्मणो हि बिभ्यदेतज्जगत् कृत्स्नं स्वव्यापारे नियमेन प्रवर्त्तते न तु मर्यादामतिवर्त्तते। एतदुक्तं भवति–न श्रुतिंसङ्कोचामात्रं श्रुत्यर्थपरित्यगे हेतुरपि तु पूर्वापरदाक्यैकवाक्यताप्रकंरणाभ्यां संवलितः श्रुतिसङ्कोचः। तदिदमुक्तं पूर्वापरयोर्ग्रन्थभागयोर्ब्रह्मैव निर्दिश्यमानमुपलभामहे, इहैव कथमन्तराले वायुं निर्दिश्यमानं प्रतिपद्येमहि इति*। तदनेन वक्यैकवाक्यता दर्शिता। *प्रकरणादपीति* भाष्यण प्रकरणमुक्तम्। यत् खलु पृष्टं तदेव प्रधानं प्रतिवक्तव्यमिति तस्य प्रकरणम्। पुष्टादन्यस्मिंस्तूच्यमाने शास्त्रमप्रमाणं भवेदसंम्बद्धप्रलापित्वात्। *यत्तु वायुविज्ञानात् क्वचिदमृतत्वमभिहितमापेक्षिकं तदिति*। अपपुनर्मृत्युं जयतीति श्रुत्या ह्यपमृत्योर्विजय उक्तो न तु परममृत्युविजय इत्यापेक्षित्तवं तच्च तत्रैव प्रकरणान्तरकरणेन हेतुना। न केवलमपश्रुत्या तदापेक्षिकमपि तु परमात्मानमभिधायातोऽन्यदार्त्तमिति वाय्वादेरार्त्तत्वाभिधानात्। नह्यार्त्तोऽभ्यासादनार्त्तो भवतीति भावः।।३९।।

इति भामती कम्पनाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

॥सू०॥ स्मृतेश्च॥३९॥

स्मर्यते च शूद्रस्य वेदश्रवणादौ दण्डः 'अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् उदाहरणे जिह्वाच्छेदः धारणे शरीरभेदः' इति। एवं श्रुतिस्मृतिभ्यां शूद्रसमीपेऽध्ययनादिनिषेधात् कुतस्तेषां वेदार्थविचारादिकम्। अतः सर्वथा अष्टवर्षब्राह्मणाद्युपयुक्तोपनयनसंस्कारमन्तरेण वेदाध्ययनप्राप्तिर्न कुत्रापि कस्यचिदिति सिद्धम्। ततः शूद्रा ब्रह्मविद्यायामनधिकारिण एव॥

इत्यपशूद्राधिकरणम्॥८॥

इति श्री कण्ठभाष्य कम्पनाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

शूद्रस्य वेदवाक्यश्रवणतदध्ययनतदर्थविचारज्ञानानुष्ठानानि शूद्रसमीपेऽध्ययननिषेधेनार्थात् प्रतिषिध्यन्ते। यस्य हि समीपेऽपि नाध्येतव्यं वेदवाक्यं स तत्कथं शृणुयात् अशृण्वतः कुतोऽध्ययनं तदभावे कुतोऽर्थज्ञानमनुष्ठानं वेति सूत्रार्थमभिप्रेत्य व्याचष्टे–**शूद्रस्येति**। न केवलं शूद्रसमीपे वेदोञ्चारणनिषेधसामर्थ्यात् शूद्रस्य श्रवणादिप्रतिषेधसिद्धिः। अपि तु श्रवणादौ दण्डस्मरणाञ्चेत्येतदर्थं सूत्रम्।। **स्मृतेश्च**।।३९।।

इति शिवार्कमणिदीपिका कम्पनाधिकरणम् समाप्तम्

अथ ज्योतिरधिकरणम्। ॥ सू० ४०॥

शाङ्करभाष्यम्

***ज्योतिर्दर्शनात्*॥४०॥**

''एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'' (छा० ८/१२/३) इति श्रूयते। तत्र संशय्यते–किं ज्योतिः शब्दं चक्षुर्विषयतमोऽपहं तेजः, किंवा परं ब्रह्मेति। किं तावत्प्राप्तम्? प्रसिद्धमेव तेजो ज्योतिः शब्दमिति। कुतः? तत्र ज्योतिः शब्दस्य रूढत्वात्। ''ज्योतिश्चरणाभिधानात्'' (ब्र० सू० १/१/२४) इत्यत्र हि प्रकरणाज्ज्योतिः शब्दः स्वार्थं परित्यज्य ब्रह्मणि वर्तते। न चेह तद्वत्किंचित्स्वार्थपरित्यागे कारणं दृश्यते। तथा च नाडीखण्डे–''अथ तत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते'' (छा० ८/६/५) इति मुमुक्षोरादित्यप्राप्तिरभिहिता। तस्मात्प्रसिद्धमेव तेजो ज्योतिः शब्दमिति॥

एवं प्राप्ते ब्रूमः–परमेव ब्रह्म ज्योतिः शब्दम्। कस्मात्? दर्शनात्। तस्य हीह प्रकरणे वक्तव्यत्वेनानुवृत्तिर्दृश्यते; ''य आत्माऽपहतपाप्मा'' (छा० ८/७/१) इत्यपहतपाप्मत्वादि-गुणकस्यात्मनः प्रकरणादावन्वेष्टव्यत्वेन विजिज्ञासितव्यत्वेन च प्रतिज्ञानात्, ''एतं त्वेव ते भूयोऽनुब्याख्यास्यामि'' (छा० ८/९/३) चानुसन्धानात्। ''अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः'' (छा० ८/१२/१) इति चाशरीरतायै ज्योतिः सम्पत्तेरस्याभिधानात्, ब्रह्मभावाञ्चान्यत्राशरीरतानुपपत्तेः, ''परं ज्योतिः'' ''स उत्तमः पुरुषः'' (छा० ८/१२/३) इति च विशेषणात्॥ यत्तूक्तम्–मुमुक्षोरादित्यप्राप्तिरभिहितेति, नासावात्यन्तिको मोक्षो गत्युत्क्रान्तिसम्बन्धात्। न ह्यात्यन्तिके मोक्षे गत्युत्क्रान्ती स्त इति वक्ष्यामः॥४०॥ इत्येकादशं ज्योतिरधिकरणम्॥

इति शाङ्करभाष्यम् ज्योतिरधिकरणम् समाप्तम्

वार्तिकम्

ज्योतिर्दर्शनात्।।४०।। पूर्वाधिकरणे तूभयोरपि पक्षयोः श्रुतिपीडायां कः पक्षो ज्यायानित्यपेक्षायां प्रकरणसंनिधिभ्यामेकवाक्यताध्यवसानाद् ब्रह्मैव प्राणशब्दमिति निश्चितम्, इह तु ब्रह्मपरिग्रहपक्ष एव श्रुतिपीडनादि, ज्योतिः परिग्रहपक्षे। अतः श्रुत्या बलवत्प्रमाणभावया दुर्बलयोः प्रकरणसंनिध्योर्बाधाददित्य एवात्र परं ज्योतिः परिगृह्यते।।

तथाहि–ब्रह्मणो ज्योतिश्शब्दत्वे प्रकरणसंनिधानाभ्यामभ्युपगम्यमाने समुत्थान ज्योतिः क्त्वाश्रुतीनां पीडा स्यात्; तासां यथासङ्ख्यमुद्गमन वक्षुरावरकतमोऽपहन्तृ पूर्वकालार्थेषु प्रसिद्धेः, तेषां च ब्रह्मपक्षेऽसंभवात्। न ह्यस्माच्छरीरात् समुद्गम्य कश्चिदपि तद्विद्वान् परं ब्रह्मोपसंपद्यते; ''ब्रह्मैव सन् ब्रह्माप्येति'' ''इहैव समवजीयन्ते'' ''न तस्मात् प्राणा उत्क्रामन्ती'' त्यादिश्रुतिशतविरोधात्। नापि परब्रह्मणो बहिस्तमोपहन्तृत्वमस्ति, न वा ब्रह्मोपसम्पत्तिस्वरूपाभिनिष्पत्त्योः पूर्वापरभावः संभवति; तयोरेकत्वात्, इत्यस्ति भवत्पक्षे श्रुतीनां पीडा, अस्मत्पक्षे तु नैकस्या अपि श्रुतेः पीडाऽस्ति। तथाहि–अस्माच्छरीरात् समुत्क्रम्यार्चिरहरादिपर्वक्रमेण संप्रसादो विद्वान् परं ज्योतिर्लक्षणमादित्यमुपसंपद्यते, तदुपसम्तत्त्यनन्तरं पुनः पर्वक्रमेण ब्रह्मलोकं गत्वा स्वेन रूपेण=हिरण्यगर्भात्मनाऽभिनिष्पद्यत इति न श्रुतिविरोधः। हिरण्यगर्भो हि तदुपासकस्य स्वरूपं भवति; आत्मत्वेन तदुपासनात्, तेन न स्वरूपाभिनिष्पत्तिश्रुतिविरोधः, ब्रह्मपक्षे तु विरुद्धेयतापि; तत्स्वरूपस्य सदा प्राप्तत्वात्। नाप्यादित्यज्योतिषः परत्वश्रवणं विरुद्धयते; नाडीरश्म्यपेक्षया तस्य परत्वोपपत्तेः। तथाच श्रुतिर्मुमुक्षोर्नाडीरश्मिद्वाराऽऽदित्यप्राप्तिं दर्शयति–''अथ यत्रैतदस्मात् शरीरात् समुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स आदित्यं गच्छती'' ति।। तस्मात् श्रुतिविरोधात् प्रकरणं भङ्क्त्वाऽस्योत्कर्षः।।

''ज्योतिश्चरणाभिधानादि'' त्यत्र तु यच्छब्देन प्रकृतब्रह्मप्रत्यभिज्ञानकारणाद् लक्षणया ज्योतिः पदं ब्रह्मणि व्याख्यातम्, न तथेह बलवत् किञ्चित् कारणमस्ति। अस्तु वा प्रकरणानुग्रहः, तथापि क्रममुक्तिप्रतिपादनपरतयेदं वाक्यमुपपद्यते–इति।।

एवं प्राप्ते ब्रूमः–ज्योतिरिह परमात्मैव भवितुमर्हति। कुतः? दर्शनात्="अथ यदतः परो दिवो ज्योतिर्दीप्यते" "यद्देवा ज्योतिषां ज्योतिः" इत्यादिश्रुतिषु तत्र ज्योतिःशब्दप्रयोगदर्शनात्, प्रकरणसंनिधिभ्यामेकवाक्यतावगमेन परमात्मन एवास्मिन् वाक्येऽनुवृत्तिदर्शनाच्च। तदेतद् भाष्यकार आह– *तस्य हीह प्रकरणे वक्तव्यत्वेनानुवृत्तिर्दृश्यत इत्यादिना*।।

अयमभिप्रायः–येनोपक्रम्यते, येन चोपसंह्रियते, यच्च भूयो मध्ये परामृश्यते, स तत्र प्रधानतया प्रकरणितया च वाक्यार्थः, तदनुसारेण च तत्रत्यपदानि व्याख्येयानि; "वाक्यार्थमितये तेषां पदार्थप्रतिपादनम्।" इत्युपपादितमधस्तात्। अतो यत्र प्रधानानुगुण्येन मुख्यैव वृत्या तत्प्रतिपादनं संभवति, तत्र तयैव तदङ्गीक्रियते। यत्र तु तत् प्रधानानुगुणम्, तत्रान्यथापि लक्षणादिना तत्प्रतिपादनं क्रियते; अन्यथा सर्वत्र मुख्ययैव वृत्त्या तत्प्रतिपादने लक्षणाद्युच्छेदप्रसङ्गात्। यत्रापि पूषानुमन्त्रणानुवाकादेः प्रकरणादुत्कर्षः, तत्रापि सोऽगत्या क्रियते; केनापि प्रकारेण प्रकरणेऽसंभवात्। तस्मात् प्रकरणाद्यबाधेन ब्रह्मपरतयैवेदं वाक्यं व्याख्येयम्। व्याख्यातं चास्माभिरधस्ताद् दहराधिकरणे शरीरात् समुत्थानं ततो विवेकः। स्वरूपाभिनिष्पत्तिस्तु ब्रह्मसाक्षात्कार उच्यते। तेन च परज्योतिरुपसंपत्तिरूपब्रह्मभावः ; "ब्रह्म वेद ब्रह्मैव भवती" ति श्रुत्यन्तरात्, "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इति कालव्यत्ययश्रवणं 'मुखं व्यादाय स्वपिती' तिवत्प्रयोगोपपत्तेरविरुद्धम्–इति।।

अपि च तवापि मतेऽस्ति श्रुतिविरोधः–(१) परमिति विशेषणं निरुपचरितं ब्रह्मण्येवोपपद्यते; तस्य सर्वकारणत्वेन परत्वात्, अन्यथाऽऽपेक्षिकत्वात्। यथाचैतत् तथोपपादितम्– "ईक्षतिकर्मव्यपदेशात् स" इत्यत्र। (२) स्वेन रूपेणेत्यपि श्रुतिः पीडयेत; न हि हिरण्यगर्भ उपासकस्य भाविक आत्मा, येन स्वरूपं स्यात्; तथासत्युपासनाया एवासिद्धेः, उपास्योपासकभावस्य भेदनियतत्वात्। न च–ज्ञानिनो ब्रह्मलोक इतो गत्वा ब्रह्मस्वरूपेणाभिनिष्पत्तिः, नेहेति–वक्तुं शक्यते; तत्प्राप्तेरविद्यामात्रान्तरायत्वेन ज्ञानात् तन्नाशे सतीहैव तल्लाभात्। एतेन–यदुक्तम्– मुमुक्षोरादित्यप्राप्तिः श्रुत्यन्तरेऽभिहिता–इति, तदपि–प्रत्युक्तम्; मुमुक्षोरुत्क्रान्त्यसंभवेन तन्मोक्षस्यानात्यन्तिकत्वात्। अपि च किमिह परं ज्योतिः तेजोविशेषः, किं वा परं ब्रह्मेति संशये "स उत्तमः पुरुषः" इत्युपरिष्ठात्तस्योत्तमपुरुषत्वेन निर्दिष्टत्वात्, आत्मन्येव च पुरुषशब्दप्रसिद्धेः, "सन्दिग्धे च वाक्यशेषः" इति न्यायेन तस्य परब्रह्मत्वमध्यवसीयते। तस्मादपि परं ब्रह्मैवात्र ज्योतिःशब्दमिति।।४०।। इत्येकादशं ज्योतिरधिकरणम्।।

इति वार्त्तिकम् ज्योतिरधिकरणम् समाप्तम्

प्रदीपः

ज्योतिर्दर्शनात्।।४०।। एष संप्रसाद इति वाक्यगतज्योतिः पदम्, ब्रह्मपरम्, प्रकृतत्वात्, प्रकृतत्वेन दृश्यमानत्वादिति यावदिति सूत्रार्थः। अत्र ज्योतिः समुत्थानश्रुतिविरोधेन स्वरूपाभिनिष्पत्तेर्ब्रह्मलिङ्गस्यान्यथानयनादस्पष्टब्रह्मलिङ्गत्वम्। पूर्वाधिकरणे जगत्सर्वादिशब्दस्यासङ्कुचितवृत्तिकस्याबाधार्थं प्राणपदं ब्रह्मपरमिति स्वीकृतम्, अत्र तु न कस्या अपि श्रुतेः सङ्कोचः क्रियते, परपदं तु विशेषणत्वात् स्वत एव सङ्कुचितवृत्तिकमिति तेनाक्षेपसङ्गतिः।। अत्रानुसन्धेयानि विषयवाक्यानीमानि-''य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच। तद्धोभये देवासुरे अनुबुबुधिरे ते होचुर्हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानितीन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः।। तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति'' इत्युपक्रम्य जाग्रदाद्यवस्थाविशेषेणात्मानं तं प्रतिपाद्यान्ते श्रूयमाणानि ''मघवन् मर्त्यं वा इदं शरीरमात्तं मृत्युना तदस्यामृतस्याशरीरस्यात्मनोऽधिष्ठानमात्रो वै सशरीरः प्रियाप्रियाभ्यां न व सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्त्यशरीरं वाव संन्तं प्रियाप्रिये न स्पृशतः। अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यन्ते। एवमेवैष संप्रसादोऽस्मात् शरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः। स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनं स्मरन्निदं शरीरं स यथाप्रयोग्य आचरणे युक्त एवमेवास्मिन् शरीरे प्राणो युक्त'' इति।।

संशयं सबीजं दर्शयति- *किं ज्योतिः शब्दमिति*।। *चक्षुर्विषयेति*।। *परमिति*।। ब्रह्मेत्येनैव निर्वाहे परपदप्रयोगः परस्तुतिरेव सिद्धान्तकोटिबीजमिति सूचयति। ''अथ यदितः पर इत्यस्य

स्पष्टब्रह्मलिङ्गकत्वादस्य चास्पष्टब्रह्मलिङ्गकत्वाद् न तेन गतार्थत्वशङ्कावसर इत्याह- *ज्योतिश्चरणाभिधानादित्यादिना*।। उत्क्रान्तस्य जीवस्यादित्यादिज्योतिःप्राप्तत्वस्य शास्त्रसिद्धत्वात् समुत्थाय ज्योतिरुपसंपद्येति ज्योतिः परत्व एव घटते, परमात्मपरत्वे तु तत्प्राप्तेर्गतिनिरपेक्षत्वाद् नैतद्घटत इति भावेनाह- *तथाच नाडीखण्ड इत्यादिना*।। अत्र मते स्वेन रूपेणेति स्वशब्दस्यात्मीयपरत्वात् स्वप्राप्यं कार्यब्रह्मैव विवक्ष्यते; जगद्व्यापारवर्ज भोगमात्रसाम्यस्य तेन मुमुक्षोरपि संभवात्। एष संप्रसाद इति तु जीपरमेवेति मन्तव्यम्। सिद्धान्तं संगृह्णाति- *परमेवेति*।। तथाचात्र वाक्ये ज्योतिरित्येव परविशेषणम्, न परम्। अथवा परशब्दस्य विशेषणत्वेऽपि निरपेक्षपरत्वयोग्ये ज्योतिः-पदार्थे संभवति तत्परतयैव परपदार्थविवक्षापि युक्तेति विशेषणस्यापि तस्य पूर्वपक्षे बाधापत्तिरेवेति भावः। दहरविद्याविषयस्यैवात्र ज्योतिः पदार्थत्वमिति तत्प्रकरणनुवृतिं दर्शयति- *तस्य हीति*।। कथमवगम्यते तस्यैव प्रकरणस्यानुवृत्तिरित्यत आह- *एतं त्वेव त इति*।। ननु-एवमपि ज्योतिः पदस्य तेजः परत्वे का हानिरित्यत आह- *अशरीरमिति*।। तथाचात्रार्चिरादिमार्गेण गतिविवक्षायां नाशरीरताप्राप्तिः स्यात्; हिरण्यगर्भसाख्येऽपि सशरीरत्वाविशेषादिति भावः। अयमाशयः-अशरीरत्वं हि शरीराभिमानराहित्यम्, शरीरादात्मनो विवेको वा, न तु शरीरनाशमात्रम्; अन्यथा मरणमात्रेण सर्वेषां मुक्त्यापत्तेः। सूक्ष्मशरीरस्यापि नाशो हीहैवानुत्क्रमणेन भवति, उत्क्रमणे तु कार्यात्यये तदध्यक्षेण स मुक्तौ वा; न तु ततः पूर्वमिति कथमशरीरत्वमादित्यादिप्राप्तिमात्रेणेति। तदिदमाह- *ब्रह्मभावाच्चान्यत्रेति*।। अयमत्र सिद्धान्ताभिमतो वाक्यार्थः-संप्रसादः शुद्धात्मा जीवः शरीरात्मविवेकज्ञानात् स्वस्वरूपं साक्षात्कृत्य परब्रह्मरूपो भवतीति। अधिकं वार्तिके द्रष्टव्यम्।।४०।। इत्येकादशं ज्योतिरधिकरणम्।।

इति प्रदीपः ज्योतिरधिकरणम् समाप्तम्

भामती

अत्र हि ज्योतिः शब्दस्य तेजसि मुख्यत्वाद् ब्रह्मणि जघन्यत्वात् प्रकरणाच्च श्रुतेर्बलीयस्त्वात् पूर्ववच्छ्रुतिसङ्कोचस्य चात्राभावात्, प्रत्युत ब्रह्मज्योतिः पक्षे क्त्वाश्रुतेः पूर्वैकालार्थायाः पीडनप्रसङ्गात्। समुत्थानश्रुतेश्च तेज एव ज्योतिः। तथाहि—समुत्थानमुद्गमनमुच्यते, न तु विवेकविज्ञानम्। उद्गमनञ्च तेजःपक्षेऽर्चिरादिमार्गेणोपपद्यते। आदित्यश्चाचिराद्यपेक्षया परं ज्योतिर्भवतीति। तदुपसम्पद्य तस्य समीपे भूत्वा स्वेन रूपेणाभिनिष्पद्यते, कार्यब्रह्मलोकप्राप्तौ क्रमेण मुच्यते। ब्रह्मज्योतिःपक्षे तु ब्रह्म भूत्वा का परा स्वरूपनिष्पत्तिः? न च देहादिविविक्तब्रह्मस्वरूपसाक्षात्कारो वृत्तिरूपोऽभिनिष्पत्तिः। सा हि ब्रह्मभूयात् प्राचीना न तु पराचीना। सेयमुपसम्पद्येति क्त्वाश्रुतेः पीडा। तस्मात्तिसृभिः श्रुतिभिः प्रकरणबाधनात्तेज एवात्र ज्योतिरिति प्राप्तम्। एवं प्राप्तेऽभिधीयते— *परमेव ब्रह्म ज्योतिःशब्दम्। कस्मात्? दर्शनात्। तस्य हीह प्रकरणे अनुवृत्तिर्दृश्यते*। यत् खलु प्रतिज्ञायते यच्च मध्ये परामृश्यते यच्चोपसंह्रियते स एवं प्रधानं प्रकरणार्थः। तदन्तःपातिनस्तु सर्वे तदनुगुणतया नेतव्याः। न तु श्रुत्यनुरोधमात्रेण प्रकरणादपक्रष्टव्य इति हि लोकस्थितिः। अन्यथोपांशुयाजवाक्ये जामितादोषोपक्रमे तत्प्रतिसमाधानोपसंहारे च तदन्तः पातिनो विष्णुरुपांशु यष्टव्य इत्यादयो विधिश्रुत्यनुरोधेन पृथग् विधायः प्रसज्येरन्। तत् किमिदानीं तिस्रः साह्नस्योपसदः कार्या द्वादशाहीनस्येति प्रकरणानुरोधात् समुदायप्रसिद्धिबललब्धमहर्गणाभिधानं परित्यज्याहीनशब्दः कथमप्यवयवव्युत्पत्त्या साह्नं ज्योतिष्टामोमभिधाय तत्रैव द्वादशोपसत्तां विधत्ताम्? स हि कृत्स्नविधानान्न कुतश्चिदपि हीयते क्रतोरित्यहीनः शक्यो वक्तुम्। मैवम्, अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसीति श्रुत्या प्रकरणबाधनान्न द्वादशोपसत्तामहीनगुणयुक्ते ज्योतिष्टोमे शक्नोति विधातुम्। नाप्यतोऽपकृष्टः सन्नहर्गणस्य विधत्ते परप्रकरणेऽन्यधर्माविधेरन्यायत्वात्। असम्बद्धपदव्यवायविच्छिन्नस्य ग्रकरणस्य पुनरनुसन्धानक्लेशात्। तेगानपकृष्टेनैव द्वादशाहीनस्येति वाक्येन साह्नस्य तिस्त्र उपसदः कार्या इति विधिं स्तोतुं द्वादशाहविहिता द्वादशोपसत्ता तत्प्रकृतित्वेन च सर्वाहीनेषु प्राप्ता निवीतादिवदनूद्यते।

तस्मादहोनश्रुत्या प्रकरणबाधेऽपि न द्वादशाहीनस्येति वाक्यस्य प्रकरणादपकर्षो ज्योतिष्टोमप्रकरणाम्नातस्य। पूषाद्यनुमन्त्रणमन्त्रस्य यल्लिङ्गबलात् प्रकरणबाधेनापकर्षस्तदगत्या, पौष्णादौ च कर्मणि तस्यार्थवत्त्वादिह त्वपकृष्टस्यार्चिरादिमार्गोपदेशे फलस्योपायमार्गप्रतिपादकेऽतिविशदे एष सम्प्रसाद इति वाक्यस्याविशदैकदेशमात्रप्रतिपादकस्य निष्प्रयोनजत्वात्। न च द्वादशाहीनस्येतिवद्यथोक्तात्मध्यानसाधनानुष्ठानं स्तोतुमेष सम्प्रसाद इति वचनमर्चिरादिमार्गमनुवदतीति युक्तम्, स्तुतिलक्षणायां स्वाभिधेयसंसर्गतात्पर्यपरित्यागप्रसङ्गात्। द्वादशाहीनस्येति तु वाक्ये स्वार्थसंसगंतात्पर्ये प्रकरणविच्छेदस्य प्राप्तानुवादमात्रस्य चाप्रयोजनत्वामिति स्तुत्यर्थो लक्ष्यते। न चैतद्दोषभयात्समुदायप्रसिद्धि-मुल्लङ्ध्यावयवप्रसिद्धिमुपाश्रित्य साह्नस्यैव द्वादशोपसत्तां विधातुमर्हति, त्रित्वद्वावश-त्वयोर्विकल्पप्रसङ्गात्। न च सत्यां गतौ विकल्पो न्याय्यः। साह्नाहीनपदयोश्च प्रकृतज्योतिष्टोमाभिधायिनोरानर्थक्यप्रसङ्गात्। प्रकरणादेव तदवगतेः। इह तु स्वार्थसंसर्गतात्पर्ये नोक्तदोषप्रसङ्ग इति पौर्वापर्यपर्यालोचनया प्रकरणानुरोधाद्रूढिमपि पूर्वकालतामपि परित्यज्य प्रकरणानुगुण्येन ज्योतिः परं ब्रह्म प्रतीयते। यत् तूक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति, नासावात्यन्तिको मोक्षः, किन्तु कार्यब्रह्मलोकप्राप्तिः। न च क्रममृक्तयभिप्रायं स्वेन रूपेणाभिनिष्पद्यत इति वचनं, नह्येतत् प्रकरणोक्तब्रह्मतत्त्वविदुषो गत्युत्क्रान्ती स्तः। तथा च श्रुतिः—'न तस्मात् प्राणा उत्क्रामति अत्रैव सयवनीयन्ते' इति। न च तद्द्वारेण क्रममुक्तिः। अर्चिरादिमार्गस्य हि कार्यब्रह्मलोकप्रापकर्त्वं न तु ब्रह्मभूयहेतुभावः, जीवस्य तु निरुपाधिनित्यशुद्धबुद्धब्रह्मभावसाक्षात्कारहेतुके मोक्षे कृतमर्चिरादिमार्गेण कार्यब्रह्मलोकप्राप्त्या? अत्रापि ब्रह्मविदस्तदुपपत्तेः। तस्मान्न ज्योनिरादित्यमुपसम्पद्य सम्प्रसादस्य जीवस्य स्वेन रूपेण पारमार्थिकेन ब्रह्मणाऽभिनिष्पत्तिराञ्जसीति श्रुतेरत्रापि क्लेशः। इापि च परं ज्वोतिः स उत्तमः पुरुष इतीहैवोपरिष्टाद्विशेषणात्तेजसो व्यावर्त्यतुरुषविषयत्वेनावस्थापनाज्ज्योतिष्पदस्य परमेव ब्रह्म ज्योतिः न तु तेज सिद्धम्।।४०।।

इति भामती ज्योतिरधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ कम्पनाधिकरणम्॥९॥

एवं प्रासङ्गिकमधिकारिनिरूपणं कृत्वा प्रकृतमनुसरति–

॥सू॥ कम्पनात्॥४०॥

अङ्गुष्ठप्रमितपुरुषप्रकरणे कठवल्लीषु श्रूयते–

'यदिदं किंच जगत् सर्व प्राण एजति निस्सृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति॥' इति॥ तत्र कम्पनहेतुः परमेश्वरोऽन्यो वेति संशयः।

अत्र प्राणशब्दनिर्दिष्टजनितभयेन सकलजगत्कम्पनमुच्यते। परमेश्वरस्य सकलजगदभयप्रदानमधुरस्वभावस्य परमकारुणिकस्य जगत्कम्पनहेतुत्वमयुक्तम्। तस्माद्वज्रश्रुतेरशनिः कम्पनहेतुः। यद्या-प्राणवायुः, कम्पनेहतुः प्राणश्रुतेः। प्राणवायोर्देहचलनहेतुत्वेन प्राणे निमित्ते सर्वमिदं जगच्छरीररूपं चलतीति 'यदिदं किंच जगत् संर्व प्राण एजति निस्सृतम्' इत्यस्य तत्रोपत्तेः। वायुनिमित्तमेव विद्युत्स्तनयित्नुवृष्टिवन्महाभयहेतुरशनिरपि विवर्तत इति 'महद्भयं वज्रमुद्यतम्' इत्यस्यापि तत्रोपपत्तेः। 'वायुरेव व्यष्टिर्वायुरेव समष्टिरप पुनर्मृत्युं जयति य एवं वेद' इति श्रुतेर्वायुविज्ञानादमृतत्वोपपत्तेश्च॥

इति प्राप्ते परमेश्वर एव कम्पनहेतुरिति ब्रूमः। परमेश्वरस्य सकलजगत्कम्पनहेतुत्वं शासकत्वात् भवति, यस्य शासनभयेन सर्वे वयं निषिद्धेषु विमुखा विहितेषु प्रवर्तामहे, यच्छासमनभयादेव वाय्वादीनां स्वस्वाधिकारप्रवृत्तिः 'भीषाऽस्माद्वातः पवते' इत्यादिष्ववगम्यते। कल्याणमूर्तिरपि परमेश्वरः शासकतया भयदर्शनो भवति। तत् श्रूयते-'तस्माद्राजमुखं भीष्मं भावुकम्' इति। तस्मात् स्वामितया सकलजगद्भयहेतुरिश्वर एव॥ ॥ इति कम्पनाधिकरणम्॥९॥

इति श्री कण्ठभाष्य ज्योतिरधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

कुतस्तेषां वेदार्थविचारादिकमित्येतत्सिंहावलोकनन्यायेन पूर्वसूत्रस्थार्थपदविवरणं सूत्रद्वस्याप्येकप्रयोजनत्वादिहेतुकम्। एवं च शूद्रविषय एव साक्षाद्वेदवाक्योञ्चारणादिप्रतिषेधस्य सत्त्वादनुपनीतानां वेदवाक्योञ्चारणनिषेधस्य शूद्रविषये पाकयाद्यर्थमन्त्रविषयत्वेनासङ्कोचनीयतया उपनयनराहित्येनापि हेतुना शूद्राणां वेदवाक्योञ्चारणासम्भवान्न विद्याधिकार इत्युपसंहरति–**अत इति।** स्यादेतत्। शूद्रस्यानुपनीतत्वेन शूद्रत्वेन च हेतुना शूद्राणां वेदवाक्योञ्चारणादिनिषेधात् न तदपेक्षासु अधिकार इत्यधिकरणस्य निष्कृष्टोऽर्थः। नायमुपपद्यते। निषादस्येव शूद्रस्य वेदोञ्चारणे विध्याक्षिप्ते पुरुषार्थनिषेधाप्रवृत्तेः। न च वाच्यं विशिष्य निषादं प्रति इष्टिविधिना तस्य तदुपयोगिमन्त्रोञ्चारणाक्षेपो युक्तः। न तथा शूद्राणां विशिष्य विद्याविधानमस्ति। सामान्यविधयस्त्वध्ययनलब्धमहावाक्यादिग्रहणेषु त्रैवर्णिकेषु चरितार्था इति। त्रैवर्णिकानामपि 'स्वाध्यायोऽध्येतव्य' इति पितृपितामहादिपरम्परागतस्वशाखामात्र एवाध्ययनस्य विहितत्वेन शाखान्तरगतगुणमन्त्रोपसंहारेण विद्यानुष्ठानार्थ शाखान्तरगततत्तद्वाक्यार्थग्रहणावश्यम्भावेन तथैव शूद्रस्यापि विद्यातदङ्गविषयवेदवाक्यग्रहणाक्षेपोपपत्तेः। न च वाच्यं शूद्रस्य विद्यानुष्ठानापेक्षितं कात्स्न्र्येन तदर्थतयाक्षेपणीयम्। त्रैवर्णिकानां तु शाखान्तरमाम्नातगोचरमात्रमित्याक्षेप-लाघवाद्विद्याविधयस्त्रैवर्णिकानेवाधिकुर्युः न शूद्रमिति। एवं तर्हि यस्य कर्मणः उपासनस्य वा यस्यां शाखायां भूयसामङ्गानां विद्यानां भूयस्त्वेनोभयश्रुतिन्यायेन प्रधानस्यापि तत्र विधानं शाखान्तरे किञ्चिदङ्गमन्त्रविधानं तत्र कर्मण्युपासने वा तच्छाखाध्यायिनामेवाधिकारस्स्यात्। यस्य क्षुद्रस्य कर्मणः साङ्गस्य कस्याञ्चिदेव शाखायां विधानं तत्रापि तच्छाखाध्यायिनामेवाधिकारः स्यात्। तस्मात्रैवर्णिकानामप्यनुष्ठानोपयोगिज्ञानाक्षेपस्य सम्प्रतिपन्नत्वात् तद्वच्छूद्रस्यापि विद्यानुष्ठानोपयोगि-ज्ञानाक्षेपस्सम्भवति। न हि वृत्त्यर्थं याजने प्राप्ते ब्राह्मणैरेवार्त्विज्यमिव स्वस्वशाखामात्रविषयाध्ययनजन्यज्ञानेनैव त्रैवर्णिकानां विद्यानुष्ठानं निर्वर्तते। येनार्त्विज्यार्थं क्षत्रियवैश्ययोरिव तेषां विद्यानुष्ठानार्थमनधीतशाखान्तरजन्यज्ञानस्यानाक्षेप्यत्वात् तदृष्टान्तेन

शूद्राणामपि तदुपयुक्तवेदार्थज्ञानं नाक्षिप्येत। अवश्यं च स्त्रीणां विद्यानुष्ठानमेवमेवोपपादनीयम्। अन्यथाध्ययनाभावेन शूद्रस्य विद्याप्रत्याख्याने मैत्रेयीवाचक्नवीप्रभृतीनां ब्रह्मविद्यावाप्तौ का गतिः। अत्रत्यस्य शूद्रशब्दस्य क्षत्रिय इव 'अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रीयी च कात्यायनी चे' त्यादिषु विद्याङ्गोपाख्यानेषु श्रुतानां मैत्रेय्यादिशब्दानां पुरुषेषु वृत्तिस्सिद्धान्तिनापि कल्पयितुं न शक्यते। तस्माद्यथा 'स क्रतुं कुर्वीते' त्यादिविद्याविधिषु अधिकारिणि श्रुतस्यापि पुंस्त्वस्य उद्देश्यविशेषणत्वेनाविवक्षितत्वात् स्त्रीणां विद्यास्वधिकारः। अत एव पूर्वतन्त्रे 'स्वर्गकामो यजेते' त्यादिविधिवाक्येषु अधिकारिणि पुल्लिङ्गनिर्देशात् पुमधिकारिकमेव यागादिकं कर्मेति 'लिङ्गविशेषनिर्देशात् 'पुंयुक्तमैतिशायन' इति सूत्रे पूर्वपक्षं कृत्वा 'जातिं तु बादरायणोऽविशेषात् तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वा' दिति सूत्रेण स्वर्गकामधर्मस्य स्वर्गकामपदप्रवृत्तिनिमित्तस्य स्त्रियामप्यविशिष्टत्वात् सापि कर्मण्यधिकारिणीति सिद्धान्तितम्। तथा शूद्रस्यापि विद्याविधिश्रुतफलार्थित्वाविशेषात् अस्ति विद्याधिकार इत्येव युक्तम्। इयांस्तु विशेषः। फलार्थित्वाविशेषेऽपि 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्त' इति निषेधान्नास्ति शूद्रस्य क्रत्वधिकार इति। तस्मान्निषादं प्रति विशिष्येष्टिविधेर्मुत्तयर्थिनं प्रति सामान्येन विधानं च नास्ति तत्तदनुष्ठानोपयोगिवदेवाक्यग्रहणतदर्थग्रहणाक्षेपकत्वे विशेषः। किं च माभूच्छूद्राणां विध्याक्षेपेण विद्योपयुक्तवेदचाक्यतदर्थग्रहणलाभः। मुत्तयर्थिनां तेषां विद्यानुष्ठानसम्पत्तये शूद्रत्वानुपनीतत्वप्रयुक्तं प्रतिषेधमुल्लङ्घ्याध्ययनं लिखितपाठादिना भविष्यति। प्रतिषिद्धानुष्ठानेन दुरितं भवेदिति निश्चयवतामपि कूपखानकन्यायेन प्रवृत्तिरुपपद्यते। यथा खलु सलिललाभार्थेन कूपखननेन देहस्य धूसरत्वं भवेदिति निश्चयवतामपि खननोद्गतेन सलिलेन तस्य क्षालनं भविष्यतीत्यभिसन्धिना कूपखनेन प्रवृत्तिः तथा विद्यालाभार्थेन वेदवाक्यतदर्थग्रहणेन दुरितं भवेदिति निश्चयवतामपि शूद्राणां तथैव विद्यया प्रारब्धेतरसकलदुरितध्वंसकारिण्या तस्यापि दुरितस्य निवृत्तिर्भवेदित्यभिसन्धिनां प्रतिषेधमुल्लङ्घ्य वेदवाक्यतदर्थग्रहणे प्रवृत्तिरुपपद्यत एव। अपि च माभूच्छूद्राणां प्रतिषिद्धश्रवणादिकेन वेदेन विद्योपयुक्तवेदार्थग्रहणम्। न ह्याहवनीयादिषु आधानमिव वेदार्थग्रहणे वेद एवोपायः। पुराणादीनामपि सत्त्वात् वेदाध्ययनाधीनमेव वेदार्थग्रहणमनुष्ठानाङ्गमिति नियम स्याहतत्वात्। ननु, यद्यप्युक्तरीत्याध्ययनाङ्गोपनयनरहितत्वेऽपि विद्याधिकारः शूद्राणां सम्भावयितुं शक्यते, तथापि नासौ युज्यते। तेषां विद्याङ्गोपनयनासम्भवात्। अस्ति खल्वध्ययनाङ्गोपनयनादन्यद्विद्याङ्गमुपनयनं 'तद्विज्ञानार्थं सगुरुमेवाभिगच्छे' दिति विहिते गुरूपसदने 'अधीहि भगव' इति मन्त्रपूर्वकं 'शिष्यस्तेऽहं शाधि मा' मिति प्रार्थयमानेन क्रियमाणे तस्य शिष्यत्वमङ्गीकृत्य गुरुणा क्रियमाणमनुज्ञादानादिना स्वसमीपप्रापणरूपम्। तदेतत् 'भृगुर्वै वारुणिर्वरुणं पितरमुपससाराधीहि भगवो ब्रह्मेति' 'अधीहि भगवो ब्रह्मेत्युपससार सनत्कुमारं नारद'

इत्यादिश्रुतिषूपसन्नेभ्यो विद्योपदेशेनार्थात्सिद्धं प्रजापतिविद्यायां 'वसापराणि द्वात्रिंशद्वर्षाणी' त्यग्रेतनवचनैरपि स्फुटीकृतम्। वैश्वानरविद्यायां 'ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान्हानुपनीयैतदुवाचे' ति वाक्येन बालाक्यजातशत्रुसंवादे विधिवदुपसदनोद्युक्तं बालाकिं प्रति 'प्रतिलोमरूपमेव स्यात् यत् क्षत्रियो ब्राह्मणमुपनये' दित्यजातशत्रुवाक्येन चाचार्यस्यावरणवर्णनया उपनेतृसद्भावं प्रतिपादयता ह्यत्र विद्याङ्गोपनयनसत्त्वं व्यञ्जितम्। 'तं होपनिन्य' इत्यादौ कण्ठतश्चोक्तम्। तदेतद्विद्याङ्गमुपनयनं शूद्राणां न सम्भवति। 'न च संस्कारमर्हती'ति प्रतिषेधात् तदसम्भवे चाङ्गवैकल्येनानुष्ठितापि विद्या फलाय नालमिति कूपखननन्यायेनापि तत्र प्रवृत्तिर्नोपपद्यत इति चेन्मैवम्। शूद्राणाममन्त्रसंस्काराभ्यनुज्ञानेन स्त्रीणामिवामन्त्रकविद्याङ्गोपनयनसम्भवात्। अत एव मैत्रेयीब्राह्मणे 'यदेव भगवान्वेद तदेव मे ब्रूही' त्यमन्त्रकं विद्योपदेशं प्रार्थयमानां मैत्रेयीं प्रति 'एह्यास्व व्याख्यास्यामि व्याचक्षाणस्य तु मे निदध्यासस्वेति' विद्यार्थं समीपस्थित्यभ्यनुज्ञानं कृतमिति श्रूयते। 'शूद्रश्चतुर्थो वर्णः एकजाति' रित्यनेन तु शूद्रस्य द्वितीयजन्मरूपमध्ययनाङ्गोपनयनमेव निषिध्यते न तु विद्याङ्गोपनयनम्। ननु तथापि विद्याप्रकरणे शूद्रत्वाभावनिर्धारणाल्लिङ्गात् शूद्रस्य विद्यानधिकारस्सिद्ध्यति। न च तत्समनन्तरप्रतिपाद्ये अध्ययनाङ्गोपनयने प्रवृत्त्यर्थम्। सत्यपि शूद्रत्वाभावनिर्धारणे ब्राह्मणादिजातिभेदेन प्रकारभेदवत्युपदेश्यगायत्रीभेदवति च उपनयने प्रवृत्त्यर्थं वर्णत्रयमध्येऽपि जातिभेदनिर्धारणस्यावश्योपपादनीयतया तत एवोपनयननिर्वाहेण तत्र शूद्रत्वाभावनिर्धारणस्याकिञ्चित्करत्वात्। मातरं प्रति गोत्रप्रश्नेन ब्राह्मण्यनिधारणस्योपपत्तेश्च। शूद्रत्वाभावनिर्धारणानन्तरमध्ययनाङ्गोपनयने वर्ण्यमाने कथं तच्छूद्रस्य विद्यानधिकारे लिङ्गं स्यात्। इत्थं सत्यकामेन 'ब्रह्मचर्यं भगवति वत्स्यामि उपेयां भगवन्त' मित्यध्ययनार्थविद्यार्थोपनयनद्वयसाधारणरूपमुपगमनं कृतम्। तत्र यदि शूद्रस्य विद्याधिकारःस्यात् तदा सत्यकामश्शूद्रस्सन्नध्ययनाङ्गोपनयनानर्होऽपि विद्यार्थमुपगत इति विद्याङ्गोपनयनेन संस्कृत्य विद्यां ग्राहयितुं योग्यो भवेत्। तथा सति शूद्रत्वाभावनिर्धारणमपेक्ष्य समिदाहरणार्थं न नियुज्येत। तस्य तदर्नाधिकारे तु अस्य शूद्रत्वाभावे निश्चिते सत्युपनीतचिह्नरहितत्वादकृताध्ययनाङ्गोपनयनोऽयं प्रथमं तेन संस्कृत्याध्यापनीयः ततो विद्याकामश्चेत् क्रमेण तामपि ग्राहयितव्य इत्यालोच्य गौतमेन शूद्रत्वाभावनिश्चयानन्तरमुपनिनीषुणा समिदाहरणार्थं तस्य नियोगः कृत इति सङ्गच्छते इति ततस्सत्यवचनेन शूद्रत्वाभावनिर्धारणलिङ्गाद्विद्यायां शूद्रो नाधिकारीति चेत्। अस्मादेव लिङ्गाद्विद्यायां शूद्रोऽधिकारीति ब्रूमः। यदि हि शूद्रोऽध्ययन इव विद्यायामप्यनधिकारी भवेत्तदा यदीदमस्योपगमनमध्ययनार्थं यदि वा विद्यार्थम्। उभयथापि तत एव नायं शूद्र इति निर्णयसम्भवात् तदनन्तरं तन्निर्णयार्थं सत्यवचनं नापेक्ष्येत। तस्य तदधिकारसद्भावे तु विद्यार्थोपगमनस्य शूद्रेऽपि

सम्भवात् अग्रे सत्यवचनेनैव तन्निणय इति युज्यते। शूद्रस्य विद्याधिकारसत्त्वे शूद्रत्वाभावनिर्धारणं क्वोपयुज्यत इति चेत्। अध्ययनाङ्गोपनयन एवोपयुज्यते। तथा हि–उपगमनं कुर्वन्नुपनीतचिह्नरहितोऽयं किमध्ययनार्थी त्रैवर्णिकः किं वा विद्यार्थी शूद्र इति सन्दिग्धोऽभूत्। तस्य गोत्रप्रश्नो न तद्गोत्रविशेषनिर्दिधारयिषया। शूद्रत्वपर्यन्तसन्देहानुदयात् 'नैतदब्राह्मणो विवक्तमर्हती' ति तन्निर्णयात्प्राक् ब्राह्मण्यनिर्धारणाधीनस्य गोत्रविशेषप्रश्नस्यानवसरदुःस्थत्वात्। किं तु गोत्रप्रश्ने किमयं वक्ष्यतीति तज्जातिपरीचिक्षिषया। स त्वशूद्रश्चेदनुपनीतोऽयमिदानीमध्ययनाङ्गोपनयनेन संस्कार्यः शूद्रश्चेदिदानीमेव विद्याङ्गोपनयनेन संस्कार्य इति कर्तव्योपनयनविशेषनिर्णयार्थः। ततश्च शूद्रत्वाभावनिर्धारणमध्ययनाङ्गोपनयनकर्तव्यतानिर्णय उपयुज्यत इति व्यक्तमेव। अस्तु वा तस्य विद्योपदेशार्थता। तथापि न शूद्रस्य विद्यानधिकारसिद्धिः। तस्य सत्यपि विद्याधिकारे 'न शूद्राय मतिं दद्यादि'ति प्रतिषेधमालोच्य शूद्रत्वाभावनिर्धारणपूर्वकमाचार्यो विद्यामुपदेष्टुं प्रववृत इत्युपपत्तेः। न हि ज्योतिष्टोमादिष्वहीनत्वाभावमालोच्य आर्त्विज्ये याजकाः प्रवर्तन्त इत्येतावता प्रजाकामादीनां द्वादशाहादिष्वनधिकारः। तस्माच्छूद्रस्य विद्यानधिकारसिद्ध्युपसंहारोऽयमयुक्त इति चेत्। उच्यते। युक्त एवायमुपसंहारः। शूद्रस्याष्टवर्षत्वादियुक्तब्राह्मणादिसंस्काररूपोपनयनाभावेन विद्याधिगमोपयुक्तानां 'गुरुरनुगन्तव्योऽभिवादयितव्य' इत्यादिस्मृतिविहितानां प्रत्युपस्थितनियमाचाराणां सन्ध्यावन्दनादीनां च विद्यापेक्षितानां विद्यायाश्चानुष्ठानासम्भवात्। पूर्वतन्त्रे हि गुर्वनुगमनादयः किमनुपनीतेनापि शक्तेन पुरुषेण कर्तव्याः उत उपनीतेनैव कर्तव्या इति संशये गुर्वादिप्रीतिरूपद्रष्टफलकत्वात्तदर्थिनानुपनीतेनापि कर्तव्या इति 'तस्मिंस्तु शिष्यमाणा निजनने न प्रवर्तेर'न्निति (जै०) सूत्रेण पूर्वपक्षं कृत्वा जातकमाद्युपनयनान्तकर्मसु पुत्रगामिफलार्थेष्वपि बालादन्यस्य पित्रादेरधिकारश्रवणात् उपनयनादूर्ध्वमध्ययनादिषु सर्वेष्वपि तद्गामिफलकेषु कर्मसु तस्यानधिकारश्रवणादुपनयनसंस्कारेण वेदाध्ययनयोग्यतेव सकलवैदिककर्मयोग्यतापि क्रियत इत्यवगमात् स्मार्ता चाराणामप्यनुमितवेदमूलकत्वेन वैदिकत्वाविशेषादुपनीतेनैव कर्तव्या इति 'अपि वा वेदमूलत्वादुपाये न प्रवर्तेर'न्निति (जै०) सूत्रेण सिद्धान्तितम्। स्मरन्तिच 'उपनयनादिर्नियम' इत्यादि। तस्मादनुपनीतस्य नास्ति सन्ध्योपासनादिकम्। तच्च वैदिककर्मानुष्ठानयोग्यतापादकमिति 'आनर्थक्यमिति चेन्न तदपेक्षत्वादि'ति (ब्र०३-१-१०) सूत्रेण सूत्रकारो वक्ष्यति। स्मरन्ति च 'सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु। यदन्यत्कुरुते कर्म न तस्य फलभाग्भवे'दित्यादि। एवं च शूद्रस्योपनयनाभावेऽपि तदुद्देशेन विशिष्य विहितानां कर्मणां तदङ्गनियमानां चानुष्ठानसम्भवेऽप्यन्येषां वैदिककर्मणां तदपेक्षितानां प्रत्युपस्थितनियमाचाराणां च संन्ध्योपासनादीनां चानुष्ठानं न सम्भवति। अतो युक्तो वैदिकीषु विद्यासु शूद्रस्यानधिकार इत्युपसंहारः। अत्रोपसंहारभाष्ये 'वेदाध्ययनादिप्राप्ति'रित्यत्र वेदाध्ययनग्रहणमनुपनीतस्य वेदाध्ययनाभावान्न शूद्रस्य

ब्रह्मविद्यायामधिकार इत्येतदर्थं न भवति। उपनयनस्य सकलवैदिककर्मयोग्यतापादकत्वस्योपपादितत्तया तदभावे साक्षादेव तदनधिकारोपपादनसम्भवात्। किं तु दृष्टान्तार्थम्। तच्चोदाहृतपूर्वमीमांसाधिकरणसिद्धान्तसूत्रे 'वेदतुल्यत्वा'दित्यनेन विवक्षितम्। यथा वेदाध्ययनस्य उपनयनात्पूर्वमप्राप्तिः एवं स्मार्तनियमानामपि। वैदिकत्वाविशेषादित्येतद्वेदाध्ययनदृष्टान्तीकरणमनुकुर्वदिह तदधिकरणन्यायसञ्चारस्य विवक्षितत्वं सूचयति। यद्यपि 'वेदतुल्यत्वा'दित्येतत् स्मृतीनामनुमेयवेदसिद्धार्थविषयतया वैदिकार्थनिबद्धत्वेन वेदतुल्यत्वादिति तत्सूत्रभाष्ये शवरस्वामिना व्याख्यातम्। तथापि तस्य स्मार्ताचाराणामनुमेयवेदमूलतया वैदिकत्वेन वेदाध्ययनतुल्यत्वादित्यपि व्याख्यानमुपपद्यत इति भाष्यकाराभिप्रायः। एवं च यद्यपि स्त्रीणामुपनयनसन्ध्यावन्दनाद्यभावात् पत्न्यधिकरणसिद्धः क्रतुष्वधिकारो न प्राप्नोति। तासां विवाहसंस्कारस्योपनयनस्थानीयत्वस्मरणात् क्रतुष्वधिकारसमर्थने सन्ध्यावन्दनादिष्वधिकारः प्राप्नोति। तथापि तासां यत्राधिकारे लिङ्गमस्ति तन्मात्रेऽधिकारस्तद्बलादाश्रीयते। तदर्थमेव 'विवाह एव तु स्त्रीणामौपनायनिको विधि'रिति स्मरणम्। अस्ति च क्रतुषु पत्न्याः सहाधिकारे 'मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीं मिथुनत्वाय संपत्नी पत्या सुकृतेन गच्छतां यज्ञस्य युक्तौ धुर्यावभूतां संजानानौ विजहतामरातीर्दिवि ज्योतिरजरमारभेता'मित्यादिविध्यर्थवादमन्त्रगतं लिङ्गम्। न तथा सन्ध्यावन्दनादिष्वधिकारे लिङ्गमस्ति। एवं विद्यास्वपि मैत्रेयीगार्गीसुलभाद्युपाख्यानगतलिङ्गवशात्तासामधिकारः। अत एव फलार्थित्वाविशेषाच्छूद्राणां पत्न्यधिकरणन्यायेन प्रसक्तस्य विद्याधिकारस्योपनयनसन्ध्यावन्दनाद्यभावेन प्राप्तोऽपवादः स्त्रीणामिव वैदिकलिङ्गबलादपोद्येतेति तत्परिहाराय प्रथममस्मिन्नधिकरणे लिङ्गान्यथाकरण एव प्रववृते सूत्रकारः। अन्यथा सिद्धान्तहेतूक्तयनन्तरं पूर्वपक्षहेतुनिराकरणं कार्यमिति 'संस्कारपरामर्शा' दित्यादिसूत्राण्येव प्रथमं क्रियेरन्। अत्रोपसंहारभाष्ये सर्वथेत्यस्यायमर्थः। यद्यत्र शूद्रस्य विद्यानधिकारे दर्शितानि न्यायान्तराण्युपपद्येरन् यदि वा नोपपद्येरन् सर्वथाप्यध्ययनाङ्गोपनयनराहित्येन तत्सिद्धिस्तावदप्रतिहता। वस्तुतस्तु तान्यप्युपपद्यन्त एवेति। तत्रायमाशयः। विद्याङ्गोपनयनसंस्कारासम्भवेन तावदधिकारस्सिद्ध्यति। शूद्राणाममन्त्रकसंस्काराभ्युपगमेऽपि 'शूद्रश्चतुर्थो वर्ण एकजाति'रिति तेषां जन्मरूपसंस्कारनिषेधात् 'तत्र यत् ब्रह्मजन्माख्यं मौञ्जीबन्धनचिह्नितम्। तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते।' इति स्मरणादध्यायनाङ्गोपनयनस्यैव 'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसी'ति वैदिकलिङ्गात्तस्यापि जन्मरूपत्वावगमात्। न च द्विजातीनां जन्मद्वयमेवेति नियमः। 'मातर्यग्रेऽधिजननं द्वितीयं मौञ्जिबन्धनम्। तृतीयं यज्ञदीक्षायां द्विजस्य विधिचोदित'मिति मनुना यज्ञदीक्षाया अपि जन्मरूपत्वस्योक्तत्वात् 'अनृतात्सत्यमुपैमि मानुषाद्दैव्यमुपैमि' 'दक्षिणं पूर्वमाङ्क्ते सव्यं हि पूर्वं मनुष्या आञ्जत' इत्यादिमन्त्रार्थवादलिङ्गैरन्वाधानपूर्विकाया यज्ञदीक्षाया

मनुष्यतोत्तीर्णदेवजन्मत्वसूचनाञ्च। अयमपि न्याय'स्संस्कारपरामर्शा'दिति (ब्र० १-३-३७) सूत्रेणैव सङ्गृहीत:। अत एव भाष्ये विद्याप्रकरणे क्वचि'दुप त्वा नेष्ये' इत्यध्ययनाङ्गोपनयनपरामर्शवदन्यत्र 'तं होपनिन्य' इति विद्याङ्गोपनयनपरामर्शोऽप्युदाहृत:। यद्यप्यध्ययनाङ्गोपनयनस्य विद्याप्रकरणे परामर्शस्यानुदाहरणेऽपि गुर्वनुगमनादिनियमेष्विव विद्यास्वप्यनुपनीतानामनधिकार: पूर्वतन्त्राधिकरणन्यायेनैव सिद्ध्यति। तथापि विशिष्य विद्याप्रकरणे अध्ययनाङ्गोपनयनपरामर्शरूपमन्यदप्युपष्टम्भकमत्रास्तीति दर्शयितुं तदुदाहरणं चेत् तत्परामर्शस्याध्ययनार्थत्वेनान्यथासिद्धि:। विद्याप्रकरणगतस्य तस्य साक्षाद्विद्या-विध्यपेक्षितार्थसमर्पकत्वे सम्भवति तदन्यत्रोपक्षयकल्पनाया अयुक्तत्वात्। न चाध्ययनमत्रोपात्तं येनायमुपनयनपरामर्शस्तदर्थस्स्यात्। न चोपनीयेत्यत्रैवान्तर्भूतमध्ययनं फलपर्यन्तत्वात्संस्कारस्येति वाच्यम्। उपनयनसंस्कारस्य सर्वकर्मार्थताया: उपपादितत्वेनाध्यनमात्रे विश्रान्त्यभावात् उपनयनसाध्यसर्वकर्मानन्तर्यस्य गोसंरक्षणनियोगादिष्विवासम्भवात्। तथाप्युपनयनानन्तरं तत्राध्ययनमस्तीति चेत् को नेत्याह। मध्ये सदपि तदनुपन्यस्य उपनयनोपन्यासानन्तरं विद्योपदेशस्यैवोपन्यासेनाध्ययनादिसर्वकर्मार्थस्याप्युपनयनस्यात्र विद्यार्थत्वमात्रमावेदितमुपनयन-रहितशूद्राधिकारशङ्कानिरासायेति ब्रूम:। एतेन शूद्रत्वाभावनिर्धारणमपि विद्यार्थमिति व्याख्यातम्। ननु, शूद्रस्याध्ययन इव विद्यायामप्यनधिकारे तदुभयान्यतरार्थेनोपसदनेनैव शूद्रत्वसन्देहनिरास-सिद्धेस्तन्निरासार्थं सत्यवचनं नापेक्ष्येतेति चेदुच्यते। सत्यमुपसदनेनैव शूद्रत्वसन्देहनिरासस्सिद्ध:। आकृतिविशेषानुमितेन ब्राह्मणजात्युपनयनोचितवयोविशेषेण ब्राह्मण्यनिर्णयोऽपि सिद्ध:। अत एव गोत्रप्रश्न:। न चायं गोत्रप्रश्न: श्रुताद्गोत्रविषयात्प्रच्याव्याश्रुतं जातिविषयं नेतुं युक्त:। न चाग्रेतनसत्यवचनकृतशूद्रत्वाभावनिर्धारणानुसारेण तथानयनम्। उपसंहारस्वारस्यानुसारेणोप-क्रमस्वारस्यभङ्गायोगात्। तस्माद्गोत्रप्रश्ने गोत्रापरिज्ञानोक्तिमात्रेण यथाकथञ्चिदब्राह्मण्यसन्देहमापाद्य सत्यवचनेन तदभावनिर्धारणं प्रतिपादयति श्रुतिरित्युपसंहारनयनं युक्तम्। आपाद्यप्रतिपादनस्य चेदं प्रयोजनं यद्विद्यायां शूद्रानधिकारज्ञापनम्। न चोपनयने तदनधिकारज्ञापनं प्रयोजनमस्त्विति वाच्यम्। प्राकरणिकार्थोपयोगे सम्भवत्यन्यत्रोपयोगकल्पन- स्यायुक्तत्वात्। 'प्रकरणे सम्भवन्नपरीषो न कल्प्येते'ति न्यायात्। केचित्तु गोत्रप्रश्नदशायामसन्तमप्यब्राह्मण्यसन्देहं 'बह्वहं चरन्ती' त्यादिजाबालोक्तिश्रवणेन सञ्जातं स्वारसिकमेवोपपाद्य सत्यवचनेन तन्निरासं वर्णयन्ति। भर्तृश्वशुरादिपरिचर्याव्यग्रतया प्राग्गोत्रविचारं नाकार्षम्। अत इदानीं गोत्रं न वेदेति न जाबालोक्तेरर्थ:। परिचर्याया गोत्रज्ञानाविरोधित्वात् प्रत्युत तस्यां गोत्रसङ्कीर्तनयुक्तदैवपित्र्यकर्मानुष्ठातृ-भर्तृश्वशुरादिसन्निधिप्रयोजकत्वेन गोत्रज्ञानानुकूलत्वात् प्राग्गोत्रपरामर्शाभावेऽपि पुत्रप्रश्नकालेऽवश्य-कर्तव्यतदुपनयननिर्वाहार्थं स्वबन्ध्वादिभ्योऽवगम्य पुत्राय गोत्रोपदेशसम्भवेन सर्वथा गोत्रापरिज्ञानेन

वाक्यपरिसमाप्त्ययोगाञ्च। अत: 'परिचारिणी'त्यनेन स्वभर्तारमतिक्रम्य परितश्चरणरूपं व्यभिचरणमुच्यते। 'बहु चरन्ती'त्यनेनातिक्रान्तमर्यादाया: बहुपुरुषसम्पर्क उच्यते। यौवनविशेषणेन तत्कारणं मदपारवश्यं सूच्यते। ततश्च बहुपुरुषसंपर्केण कृतो गर्भ इत्यननुसन्धानात्तव गोत्रं न वेद्मीति तदर्थ:। एवं जाबालोक्तिश्रवणात् किमयं शूद्रगर्भसंभूत इति सन्देहे सति तस्य सत्यवचनेन निरास इति। अस्मिन्पक्षे 'नैतदब्राह्मण' इति वाक्यं शूद्रत्वाभावनिर्धारणपरं वर्णयत'स्तदभावनिर्धारणे चे'ति सूत्रस्य नाञ्जस्यम्। प्रतिलोमत्वाभावनिर्धारणंपरं हि तदा तद्वाक्यं भवेत्। अतस्तत्पक्षाश्रयणे तद्वाक्यमित्थं व्याख्येयम्। सत्यवचनदर्शनात् शूद्रोऽपि तावन्न भवति। शूद्राद्ब्राह्मण्यामुत्पन्नश्चण्डालो न भवतीति किमु वक्तव्यमिति। न च शूद्रत्वाभावनिर्धारणं 'न शूद्राय मतिं दद्यादि'ति प्रतिषेधपरिहारार्थत्वेनान्यथासिद्धं न शूद्रस्य विद्यानधिकारगमकमिति वाच्यम्। शूद्रस्य विद्याधिकारसत्त्वे तस्मै विद्यादाने प्रतिषेधस्याप्रसक्ते: शूद्राय तदनुष्ठानानुपयुक्तज्ञानदानस्यैव प्रतिषेधविषयत्वात् अत एव 'न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्। न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशे' दिति श्लोकस्यानन्तरश्लोके 'यो ह्यस्य धर्ममाचष्टे यश्चैवादिशति व्रतम्। सोऽसंवृते नाम तमस्सह तेनैव गच्छती'ति तत्सम्प्रदानस्य शूद्रस्यापि प्रत्यवाय: श्रूयते। न हि स्वानुष्ठेयधर्मग्रहणे प्रत्यवायोऽस्ति। एतेन शूद्राणां विद्योपयुक्तवेदार्थग्रहणं लिखितपाठादिगृहीतेन वेदेन भविष्यति। विध्याक्षिप्ते प्रतिषेधाप्रवृत्ते:। कूपखानकन्यायत: प्रतिषेधोल्लङ्घनेन वा भविष्यति पुराणादिना वेति निरस्तम्। तषामनुष्ठानप्रसक्तौ हि तदपेक्षितवेदार्थग्रहणप्राप्ति:। सैव नास्तीत्युक्तम् 'उपनयनाभावा'दिति हेतुभि:। ननूपनयनाभावश्शूद्रस्य तन्निषेधादिति तदभावेऽपि तस्य विद्यानुष्ठानं स्यात्। यस्याधिकारिणो यस्मिनकर्मणि यदङ्गं निषिद्धं तस्य तदतिरिक्ताङ्गमात्रसहितात्तस्मात्कर्मण: फलनिष्पत्तेरभ्युपगमात्। अभ्युपगम्यते हि राजन्यस्य सोमभक्षणं निषिद्धमिति तस्य भक्षणरूपप्रतिपत्तिरहितात्सोमयागात्फलनिष्पत्ति:। अनूचानस्य प्रथमयज्ञे प्रवर्ग्यो निषिद्ध इति तस्य तद्रहितात्तत: फलनिष्पत्ति:। किंच। एकफलकानेकप्रधानमध्ये यस्य यत्प्रधानं निषिद्धं यथा दर्शपूर्णमासयोरसोमयाजिनस्सान्नाय्ययाग: अग्नीषोमीयपुरोडाशयागश्च निषिद्ध: तस्य तदतिरिक्तप्रधानैरेव फलनिष्पत्तिरभ्युपगम्यते। निषेधात् किञ्चित्प्रधानाननुष्ठानेऽपि फलनिष्पत्तौ ततोऽङ्गाननुष्ठाने फलनिष्पत्तिरिति किमु वक्तव्यम्। येषामनिषिद्धमप्यङ्गं प्रधानं वोपसंहर्तुमशक्यं यथा ऋषीणामार्षेयवरणमत्र्यार्षेयाणां त्र्यार्षेयवरणमप्रतिसमाधेयाङ्गवैकल्यानामाज्यावोक्षणविष्णु-क्रमणादिकं देवतादीनां देवतोद्देशादिकं चोपसंहर्तुमशक्यं तेषां तु तत्र तत्राधिकार:। ततश्च निषेधाच्छूद्राणामुपनयनाभावेऽपि विद्यानुष्ठानं स्यादिति चेत्। उच्यते। सोमयागादिषु क्षत्रियादीनामधिकारमनुमत्यैव कस्यचिदङ्गस्य प्रधानस्य वा निषेध इति तत्र तथा भवतु नाम। इह तु संस्कारनिषेध: संस्कारापेक्षविधिप्रतिषेधानधिकारार्थ इति कथं तथा स्यात्। एवं हि मानवे

धर्मशास्त्रे स्मर्यते–'न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति। नास्याधिकारो धर्मेऽस्ति नाधर्मात्प्रतिषेधन'मिति। अत्र सामान्येन विधिप्रतिषेधमात्रानधिकारः शूद्रस्य नोच्यते। उपनयनादिसंस्कारनिरपेक्षेषु परोपकारादिधर्मेषु हिंसानृताद्यधर्मप्रतिषेधेषु च तस्याप्यधिकारसम्भवात्। 'किं तु संस्कारनिषेधसन्निधानात् संस्कारापेक्षेषु सन्ध्यावन्दनादिकर्मसु 'नादित्यमीक्षेत' 'नाग्निमपश्च युगपद्धारयेत्' 'नाञ्जलिना पिबे'दित्यादिनिषेधेषु वानधिकार उच्यते। 'न शूद्रे पातकं किञ्चिदि'ति च संस्कारापेक्षविधिप्रतिषेधोल्लङ्घने च दुरिताभाव उच्यते तदनधिकारद्रढिमसिद्धये। तस्माद्युक्तोऽयमुपनयनसंस्काराभावेन शूद्राणां ब्रह्मविद्यानधिकारोपसंहारः।। **इत्यपशूद्राधिकरणम्।।८।।**

।। अथ कम्पनाधिकरणम्।।९।।

उत्तराधिकरणमवतारयति–**प्रासङ्गिकमिति।** मनुष्याधिकारोक्तिप्रसङ्गादागतम्। देवादयोऽप्युपासनाधिकारिणः। मनुष्येषु अपशूद्रास्त्रयो वर्णाः इत्याधिकारनिरूपणं कृत्वा। तेन तत्र मनुष्यग्रहणं न मनुष्याणामेवाधिकार इति मनुष्यव्यतिरिक्तसर्वव्यावर्तकं नापि सर्वेषां मनुष्याणामधिकार इति सर्वमनुष्यसङ्ग्राहकं किं तु तिर्यगादिव्यावर्तकम्। तथा चाधिकारिणां सर्वेषां स्वस्वाङ्गुष्ठपरिमितं हृदयमस्तीति अङ्गुष्ठमात्रत्वश्रवणस्य न काचिदनुपपत्तिरिति प्रदर्श्य प्रकृतमङ्गुष्ठवाक्यविचारमेवानुसृत्य तत्प्रकरणपठितवाक्यान्तरविचारं करोतीत्यर्थः। अनेन वक्ष्यमाणाधिकरणस्याङ्गुष्ठाधिकरणेन सङ्गत्या प्रवृत्तिः न तु प्रासङ्गिकेनाधिकारविचारेणेति दर्शितं भवति।।सू०।। **कम्पनात्।।४०।।**

इति शिवार्कमणिदीपिका ज्योतिरधिकरणम् समाप्तम्

अथ अर्थान्तरत्वाधिकरणम्। ॥ सू० ४१॥

शाङ्करभाष्यम्

अकाशोऽर्थान्तरत्वादिव्यपदेशात्॥४१॥

"आकाशौ वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मा" (छा० ८/१४/१) इति श्रूयते। तत्किमाकाशशब्दं परं ब्रह्म किंवा प्रसिद्धमेव भूताकाशम्मिति विचारे भूतपरिग्रहो युक्तः ; आकाशशब्दस्य तस्मिन्रूढत्वात्, नामरूपनिर्वहणस्य चावकाशदानद्वारेण तस्मिन्योजयितु शक्यत्वात्, स्रष्ट्वादेश्च स्पष्टस्य ब्रह्मलिङ्गस्याश्रवणादिति॥ एवं प्राप्त इदमुच्यते–परमेव ब्रह्मेहाकाशशब्दं भवितुमर्हति। कस्मात्? अर्थान्तरत्वादिव्यपदेशात्। "ते यदत्तरा तद् ब्रह्म" इति हि नामरूपाभ्यामर्थान्तरभूतमाकाशं व्यपदिशति। न च ब्रह्मणोऽन्यन्नामरूपाभ्यामर्थान्तरं सम्भवति; सर्वस्य विकारजातस्य नामरूपाभ्यामेव व्याकृतत्वात्। नामरूपयोरपि निर्वहणं निरङ्कुशं न ब्रह्मणोऽन्यत्र सम्भवति; "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" (छा० ६/३/२) इत्यादिब्रह्मकर्तृकत्वश्रवणात्॥ ननु–जीवस्यापि प्रत्यक्षं नामरूपविषयं निर्वोढृत्वमस्ति? बाढमस्ति। अभेदस्त्विह विवक्षितः। नामरूपनिर्वहणाभिधानादेव च स्रष्ट्त्वादि ब्रह्मलिङ्गमभिहितं भवति। "तद् ब्रह्म तदमृतं स आत्मा" (छा० ८/१४) इति च ब्रह्मवादस्य लिङ्गानि। "आकाशस्तल्लिङ्गात्" (ब्र० १/१/२२) इत्यस्यैवायं प्रपञ्चः॥४१॥ इति द्वादशमर्थान्तरत्वव्यपदेशाधिकरणम्॥

इति शाङ्करभाष्यम् अर्थान्तरत्वाधिकरणम् समाप्तम्

वार्तिकम्

आकाशोऽर्थान्तरत्वादिव्यपदेशात्।।४१।। ''आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मे'' ति श्रूयते।।

तत्र संशयः—किमाकाशशब्दं भूताकाशम्, किं वा परं ब्रह्म—इति। तदर्थं चायमन्यो विचारः—किं 'ते यदन्तरे' त्यत्र यच्छब्देनाकाशशब्दोदितस्य पूर्वोपात्तस्य परामर्शः, किं वा वक्ष्यमाणब्रह्मशब्दोदितस्य; उभयोरपि बुद्धिस्थत्वाविशेषेण परामर्शसंभवात्। यद्याद्यः, ''आकाशस्तल्लिङ्गादि'' ति न्यायेनैव परं ब्रह्माकाशं भविष्यति। अथ द्वितीयः, तदा ब्रह्मलिङ्गाभावात् प्रसिद्धं भूताकाशम्—इति। एतेन—''आकाशस्तल्लिङ्गादि'' त्यनेनास्यागतार्थत्वम्—व्याख्यातम्; उक्ताधिकसंशयसत्त्वात्।।

किं प्राप्तम्? आकाशशब्दमिह भूताकाशं परिगृह्यते। कुतः? तत्राकाशशब्दप्रसिद्धेः। पूर्वस्मिन् अधिकरणे हि ज्योतिःशब्दस्य प्रकृते स्वार्थसंभवादानर्थक्यं मा भूत, इति प्रकरणवशाद् लक्षणयाऽपि ब्रह्मपरत्वमध्यवसितम्, इह तु न ब्रह्मप्रकरणमस्ति, न वा श्रुतेरानर्थक्यम्; भूताकाशस्यावकाशदानादिद्वारेण नामरूपनिर्वोढृत्वप्रतिपादनेन तत्सार्थकत्वोपपत्तेः। किमर्थं तत्प्रतिपादनमिति चेत्, उपासनार्थमिति ब्रूमः। ननु—''ते यदन्तरा तद् ब्रह्म'' ''तदमृतम्'' ''स आत्मे'' ति ब्रह्मलिङ्गं श्रूयते, सत्यं श्रयते; न तदाकाशान्वयि। किं तर्हि? ब्रह्मान्वयि; यच्छब्दस्य निर्देक्ष्यमाणब्रह्मपरामर्शित्वात्, क्लीबलिङ्गनिर्देशात्। पूर्वनिर्दिष्टाकाशपरामर्शित्वे तु तस्य पुंलिङ्गान्तेन यच्छब्देन परामर्शः स्यात्—ते योऽन्तरेति। न च—एवं सति वाक्यभेदः, तथाचैकवाक्यता प्रतीयमाना बाध्येतेति—वाच्यम्; ''स्योनं ते सदनं कृणोमी'' त्यादाविव लिङ्गेन तद्बाधस्येष्टत्वात्। अस्तु वैकवाक्यता, तथापि न काचित् क्षतिरस्ति; ब्रह्मस्तुत्यर्थत्वेनैकवाक्यतोपपत्तेः। कथम्? इत्थम्—भूताकाशस्तावदवकाशदानेन नामरूपयोर्निर्वोढृत्वमात्रेण केवलं प्रसिद्धेन ब्रह्मत्वादिना। यत्तु तयोर्नामरूपयोरन्तरा मध्येऽन्तर्यामितया स्थितम्, तद् ब्रह्म, तदमृतम्, स आत्मेत्युपवीतविधिपरे वाक्ये

निवीतादिसंकीर्तनवद् ब्रह्मोपासनावाक्ये भूताकाशसङ्कीर्तनं तत्स्तुतये भविष्यति। तस्मात् यथा–''आकाशादेव खल्विमानि भूतानि जायन्त'' इत्यत्र जगत्स्रष्टृत्वादि ब्रह्मलिङ्गं श्रुतमस्त्याकाशशब्दस्य स्वार्थात् प्रच्यावकारणम्, नैवं तथाऽत्र किञ्चिद् ब्रह्मलिङ्गं श्रुतमस्ति। अत आकाशशब्दमिह भूताकाशमिति।।

एवं प्राप्ते ब्रूमः–आकाशोऽत्र परमात्मा भवितुमर्हति। कस्मात्? अर्थान्तरत्वादिव्यपदेशात्=आकशशब्दोदितस्य हि भूताकाशादर्थान्तरत्वं व्यपदिश्यते–''आकाशो वै नाम नामरूपयोर्निर्वहिते'' ति। भूताकाशो हि न स्वस्यापि निर्वोढा। न हि सुशिक्षितोऽपि नरः स्वस्कन्धमारुह्य वर्तितुं शक्नोति। न च 'नामरूपयो' रित्याकाशातिरिक्तनामरूपपरम्; सामान्यश्रुतिबाधापत्तेः। न च मूलकारणब्रह्मणोऽन्यत्र मुख्यया वृत्त्या नामरूपनिर्वोढृत्वमप्यस्ति। अयमपरो भूताकाशादर्थान्तरत्वव्यपदेश आकाशशब्दोदितस्य–''ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मे'' ति। न हि भूताकाशस्य सर्वनामरूपान्तरानुप्रवेशः, ब्रह्मत्वम्, अमृतत्वम्, आत्मत्वं वा सम्भवति। ननु–उक्तं यच्छब्दो निर्देक्ष्यमाणपरामर्शी; तल्लिङ्गतया निर्देशात्, न निर्दिष्टपरामर्शी; अतल्लिङ्गनिर्देशात्–इति, तत्र स्वारस्येन सर्वनाम्नो निर्दिष्टपरामर्शित्वमित्युपपादितमधस्तात्–''ज्योतिश्चरणाभिधानादि''त्यत्र; न तदसति बाधकेऽपोदितुं शक्यते। न च लिङ्गव्यत्ययस्तदपोदकः ; आकाशस्योभयलिङ्गत्वेन तदसिद्धेः, विधेयलिङ्गताया अपि सर्वनाम्नो दर्शनाच्च। अपि च ''ते तदन्तरे'' त्यत्र तच्छब्देन पूर्वनिर्दिष्टनामरूपयोः परामर्शात् साहचर्यात् यच्छब्देनापि तत्सम्बन्धितया पूर्वनिर्दिष्टाकाशस्यैव परामर्शो युक्तः ; अन्यथा वाक्यवैरूप्यापत्तेः। तस्मादर्थान्तरत्वव्यपदेशादाकाश-शब्दमिह परं ब्रह्मेति। ''अर्थान्तरव्यपदेशादि'' त्यत्रादिशब्देन नामरूपनिर्वोढृत्वसूचितं जगत्स्रष्टृत्वादि ब्रह्मलिङ्गं परिगृह्यते। एतेन–यदुक्तम्–आकाशश्रुतिलिङ्गविरोधात् ''स्योनं ते सदनम्'' इत्यत्रेवैकवाक्यताबाधः–इति, तदपि–प्रत्युक्तम्; ''त्यजेदेकं कुलस्यार्थ'' इति न्यायात्। अत एव स्तुतिपरतयैकवाक्यतापि–निरस्ता; तथा सति वाक्यस्यैव स्वार्थत्यागप्रसङ्गात्। भाष्यम्–ब्रह्मणोऽन्तः प्रविश्य नामरूपनिर्वहणे वाक्यान्तरं प्रमाणयति–*अनेन जीवेनात्मनाऽनुप्रविश्येति*।। ''अनेन जीवेनात्मनानुप्रविश्ये''ति श्रवणात् अस्मिन् वाक्ये जीवस्याप्यन्तः प्रवेशेन नामरूपनिर्वहणं श्रुतम्, न केवलं ब्रह्मण एवेत्याशङ्कते–*नन्विति*।। परिहरति–*बाढमिति*।। न हि जीवो नाम भाविकः कश्चित् परमेश्वरादन्योऽस्ति, न वा जीवादन्यः परमेश्वरः। किं तर्हि? एक एव नित्यशुद्धबुद्धमुक्तपरमानन्दस्वभावात्माऽनाद्यविद्यावशाद् नामरूपव्याकृतप्रपञ्चमुच्चावचं सृष्टवा मृदिव घटं तदन्तरनुप्रविश्य ''तदेवानुप्राविशदि'' ति श्रुतेः तमेवात्मत्वेनाभिमत्य जीव इति

व्यपदेशभाग् भवति, तत्स्रष्टत्वादिना चेश्वर इति अतस्तदभेदविवक्षयाऽस्या श्रुतेः प्रवर्तनाद्र न कश्चित विरोध इत्याशयः। "अर्थान्तरत्वादिव्यपदेशादि" त्यत्रादिशब्दार्थमाह– *नामरूपनिर्वहणाभिधानादेवेति*।। एतेन–यदुक्तम्–"सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त" इत्यत्रैव नैवमिह जगत्स्रष्टृत्वादिब्रह्मलिङ्गमस्ति–इति, तदपि–प्रत्युक्तम्। "*आकाशस्तल्लिङ्गादि"–त्यस्यैवायं प्रपञ्च इति*।। अभ्यधिकाशङ्कानिराकरणेनेति शेषः। सा च प्रदर्शिताऽस्माभिः।।४१।। इति द्वादशमर्थान्तरत्वाधिकरणम्।।

इति वार्त्तिकम् अर्थान्तरत्वाधिकरणम् समाप्तम्

प्रदीपः

आकाशोऽर्थान्तरत्वादिव्यपदेशात्।।४१।। आकाशः, ब्रह्म, भूताकाशभिन्नत्वे सत्याकाशपदबोध्यत्वात्, "आकाश इति होवाचे" त्यादिवाक्यगताकाशशब्दवदिति सूत्रार्थः। नामरूपनिर्वहणं नानन्तत्वादिकमिव ब्रह्मलिङ्गम्, इति श्रुत्याऽत्र पूर्वपक्षकरणादस्पष्टब्रह्मलिङ्गत्वम्। अत एवाकाशाधिकरणेन न गतार्थत्वम्; श्रुत्यभिभूतब्रह्मलिङ्गकत्वाभावात्। पूर्वाधिकरणे हि ज्योतिःशब्दस्य परविशेषणकत्वाद् ब्रह्मपरत्वं परश्रुतिबलेन निर्धारितम्, न चात्र तादृशमाकाशविशेषणश्रुतिर्वर्तते, इति पूर्वाधिकरणाक्षेपेणास्याधिकरणस्य प्रवृत्तिः।।

अत्रानुसन्धेयं विषयवाक्यम्–छान्दोग्येऽष्टमाध्याये पूर्वाधिकरणविषयवाक्यानन्तरं श्रूयमाणम्–"आकाशो वै नाम नामरूपयोर्निर्वहिता, ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मा प्रजापतेः सभां प्रपद्ये यशोऽहं प्रपद्ये" इति।।

अस्य पूर्वपक्षरीत्याऽर्थः–आकाशः=भूताकाशः, नामरूपयोः=तदतिरिक्तनामरूपयोः निर्वहिता, अवकाश दानेनं सर्वेषां निर्वोढा। तदेवावकाशदानमाह–नामरूपे यदन्तरेति। सर्वगतत्वात् बृहत्, अमृतत्वं बहुकालस्थायित्वात्। आत्मत्वं तु तत्रात्मदृष्टिविधानार्थमिति। अथवा–तद् ब्रह्मेत्यपि तत्प्रतीकोपासनपरं भवतु। सिद्धान्तदृष्टया तु–सर्वमेकावाक्यतया ज्ञेयस्वरूपनिरूपणपरमिति। पूर्वपक्षे नामरूपपदामृतपदादिसंकोचः, सिद्धान्ते तु न सङ्कोचलेशोऽपि। अन्यत् स्पष्टम्। *अयं प्रपञ्च इति*।। अस्पष्टब्रह्मलिङ्गत्वेऽप्याकाशपदस्य ब्रह्मपरत्वव्युत्पादनेन। तथाच न तेनास्य गतार्थत्वमिति शेषः।।४१।। इति द्वादशमर्थान्तरत्वाधिकरणम्।।

इति प्रदीपः अर्थान्तरत्वाधिकरणम् समाप्तम्

भामती

यद्यप्याकाशस्तल्लिङ्गादित्यत्र ब्रह्मलिङ्गदर्शनादाकशः परमात्मेति व्युत्पादितं, तथापि तद्वदत्र परमात्मलिङ्गदर्शनाभावान्नामरूपनिर्वहणस्य भूताकाशेऽप्यवकाशदानेनोपपत्तेरकस्माच्च रूढिपरित्यागस्यायोगात्। नामरूपे अन्तरा ब्रह्मेति च नाकाशस्य नामरूपयोर्निर्वहितुरन्तरालत्वमाहापि तु ब्रह्मणस्तेन भूताकाशो नामरूपयोर्निर्वहिता। ब्रह्म चैतयोरन्तरालं मध्यं सारमिति यावत्। न तु निर्वोढैव ब्रह्म अन्तरालं वा निर्वोढृ। तस्मात्प्रसिद्धेर्भूताकाशमेवाकाशो न तु ब्रह्मेति प्राप्तम्। एवं प्राप्त उच्यते– *परमेवाकाशं ब्रह्म कस्मात्? अर्थान्तरत्वादिव्यपदेशात्*। नामरूपमात्रनिर्वाहकमिहाकाशमुच्यते। भूताकाशञ्च विकारत्वेन नामरूपान्तः पाति सत् कथमात्मानमुद्वहेत्। न हि सुशिक्षितोऽपि विज्ञानी स्वेन स्कन्धेनात्मानं वोढुमुत्सहते। न च नामरूपश्रुतिरविशेषतः प्रवृत्ता भूताकाशवजं नामरूपान्तरे सङ्कोचयितुं सति सम्भवे युज्यते, न च निर्वाहक्तवं निरङ्कुशमवगतं ब्रह्म लिङ्गं कथञ्चित् क्लेशेन परतन्त्रे नेतुमुचितम्। अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति च तत्स्रष्टृत्वमतिस्पर्ष्ट ब्रह्मरूपतया च जीवस्य व्याकर्त्तृत्वं ब्रह्मण एव व्याकर्त्तृत्वमुक्तम्। एवं च निर्वहितुरेवान्तरालतोपपत्तेरन्यो निर्वहिताऽन्यच्चान्तरालमित्यर्थभेदकल्पनापि न युक्ता। तथा च ते नामरूपे यदाकाशमन्तरेऽत्ययमर्थान्तरव्यपदेश उपपन्नो भवत्याकाशस्य। तस्मादर्थान्तरव्यपदेशात्तथा। तद् ब्रह्म तदमृतमिति व्यपदेशाद् ब्रह्मैवाकाशशमिति सिद्धम्।।४१।।

इति भामती अर्थान्तरत्वाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ ज्योतिरधिकरणम्॥१०॥

दहरादिषूपास्यतया निर्दिष्टस्य परमेश्वरस्य प्राप्यत्वमुपपादयितुमधिकरणान्तरमारभ्यते-

॥सू॥ ज्योतिर्दर्शनात्॥४१॥

छान्दोग्येऽस्य प्रजापतिविद्यायामाम्नायते विषयः—'एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' इति॥

मुक्तप्राप्यतया श्रूयमाणं परं ज्योतिः परमेश्वरः किं वा नारायणो मूर्त्यात्मेति संशयः॥

'उत्तमः पुरुषः' इति मुक्तप्राप्यस्य परज्योतिषः पुरुषोत्तमशब्दवाच्यतयाऽवगमात् पुरुषोत्तमशब्दस्य नारायणे रूढतया स एवोत्तमपुरुषशब्दसमानाधिकरणं परं ज्योतिः॥

इति प्राप्ते ब्रूमः—मुक्तप्राप्यं परं ज्योतिरिह परमशिवाभिधानं परं ब्रह्म, तत्प्राप्तानामेवानावृत्तिदर्शनात्। परब्रह्मणोऽन्यत् प्राप्तानां, कथमनावृत्तिः समुचिता। पुरुषोत्तमशब्दो नारायणे रूढोऽपि ब्रह्मण्यपि वर्तते, पुरुषेभ्यो जीवेभ्योऽधिकत्वात्, ब्रह्ममेधकल्पेऽपि—'वेष्टितुं पुरुषोत्तमम्' इति प्राप्यस्य परब्रह्मणः पर्यायत्वेन पुरुषोत्तमशब्दस्य प्रयोगात्। अतः परं ब्रह्मैव परं ज्योतिः॥

इति ज्योतिरधिकरणम्॥१०॥

इति श्री कण्ठभाष्य अर्थान्तरत्वाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अत्र प्रकरणेन प्राणवज्रश्रुतिभ्यां च संशयमभिप्रेत्य प्रकरणकीर्तनपुरस्सरं प्राणवज्रश्रुतियुक्तं विषयवाक्यमुदाहरति–**अङ्गुष्ठेति**। श्रुत्यपेक्षया प्रकरणस्य स्वतो दुर्बलत्वेऽपि श्रुतिद्वयमिह परस्परविरोधात् अन्तरिछद्रापादितदौर्बल्यं न तथा प्रकरणमिति तथाभूतयोः श्रुतिप्रकरणयोर्बलाबलानवधारणात् संशयो युक्त इति भावः। **अन्यो वेति**। अशनिः प्राणवायुर्वेत्यर्थः। अशनिपूर्वपक्षं तावदुपपादयति–**अत्रेति**। अत्र हि मन्त्रे प्राणशब्दनिर्दिष्टनिमित्तकं कम्पनमुच्यते। तत्तु तज्जनितभयहेतुकमेव। उत्तरार्धे तस्यैव प्राणशब्दनिर्दिष्ट'स्यैत'दिति परामृष्टस्य महाभयहेतुत्वेन विशेषितत्वात् भयपदं 'बिभेत्यस्मादित्यपादानविषय एच्प्रत्ययान्तं भीतिहेतुपरम्। न तु भावप्रत्ययान्तं भीतिपरम्। वज्रपदसामानाधिकरण्यात्प्राणशब्दनिर्दिष्टधर्मपरामर्शकैतत्पदसामानाधिकरण्याच्चेति भावः। अस्त्वेवं ततः किमित्यत आह–**परमेश्वरस्येति**। ननु तथाभूतस्यापि परमेश्वरस्य शासकतया भयहेतुत्वं भूपालादेरिव युक्तम्। श्रयते चानन्तरमन्त्र एव तस्य भयहेतुत्वं 'भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम'इति। न हि तस्यापि मन्त्रस्याशनिपरत्वं वक्तुं युक्तम्। अशनितो भयेनाग्न्यादीनां स्वस्वकार्येषु प्रवृत्तेरनुपपत्तेः। आनन्दमयप्रकरणे, 'भीषास्माद्वातः पवत' इति परमेश्वराद्भयेनैव देवानां स्वस्वकार्येषु प्रवृत्तेरुक्तत्वात्। किं च विषयवाक्योपात्तं सर्वजगद्भयहेतुत्वमसङ्कुचितसकलशासकस्य परमेश्वरस्यैव सम्भवति न त्वशनेः कतिपयक्षुद्रप्राणिभीतिहेतोः। अपि च प्रकरणमिदं परमेश्वरस्येति निर्विवादम्। तत्र का प्रसक्तिरश निवर्णनस्येत्याशङ्क्यां हेत्वन्तरेण निराकुर्वन्नशनिपूर्वपक्षमुपसंहरति–**तस्मादिति**। अयमाशयः। परमेश्वरस्य भयहेतुत्वं श्रुतिप्रसिद्धमशनेर्लोकप्रसिद्धमित्युभयत्राप्यविशिष्टम्। अथाप्यत्र समभिव्याहृतवज्रश्रुत्यनुग्राहकमशनिगतमेव ग्राह्यम्। न तु मन्त्रान्तरसमर्पितं मन्त्रान्तरगतम्। असङ्कुचितत्वं तु परमेश्वरस्यापि तस्याविशिष्टम्। न हि परमेश्वरमजानानास्ततो भयात्कम्पन्ते। ब्रह्मप्रकरणेऽप्यस्मि'न्नूर्ध्वमूलो ह्यधश्शाख एषोऽश्वत्थस्सनातन'इति संसारवृक्षकीर्तनवदश-

निवर्णनमप्युपपद्यते। तन्मूलत्वेन ब्रह्मप्रतिपत्त्यर्थं तत्कीर्तनमिति चेत् ब्रह्मोपासनाङ्गत्वेनाशन्युपासनासिद्ध्यर्थमशनिवर्णनमित्यस्तु। दृश्यते ह्युपकोसलविद्यायां ब्रह्मोपासनाङ्गत्वेनाशन्युपासनाविधानम्। तस्माद्यथेशानश्रुतेरङ्गुष्ठमात्रः परमेश्वरः। तथा वज्रश्रुतेरशनिरेव कम्पनहेतुः। यद्यपि वज्रशब्दः शक्रायुधेऽपि प्रसिद्धः। उद्यतशब्दोऽपि तत्रैव स्वारसिकः। 'उद्यतायुधदोर्दण्डा' इत्यायुधेष्वेव उद्यतत्वप्रसिद्धेः। 'इन्द्रो वृत्राय वज्रमुदयच्छ' दित्यादिश्रवणाच्च। तथापि शक्रायुधस्यासुरादिभयहेतुत्वं श्रुतिपुराणादिभिरवगन्तव्यम्। अशनेस्तल्लोकप्रसिद्धं शीघ्रमेव बुद्धिमारोहतीति तदेवात्र वाक्यप्रतिपाद्यं ग्राह्यम्। अशनेरप्युद्गच्छतः परमेश्वरेणोद्यतत्वमस्तीति तत्रापि नोद्यतश्रुतिभङ्गः। प्रधानभूतवाक्यार्थप्रसिद्ध्यनुसारेण पदार्थस्याप्रसिद्धस्यापि ग्रहणं युक्तम्। एवं च प्राणशब्दोऽपि अशनावेव योजनीयः। प्राणस्याशनेश्च वायुविकारत्वेन लक्षणोपपत्तेः। उपक्रमगतत्वेऽपि प्राणश्रुतेर्महाभयहेतुत्वतन्मूलकम्पनजनकत्वलिङ्गसहकृतवज्रश्रुतितो दुर्बलत्वादिति। अथ द्वितीयपूर्वक्षमुपपादयति-**यद्वेति।** उपक्रमगतप्राणश्रुत्यनुसारेण प्राणवायुरेव कम्पनहेतुः। तन्निमित्तं हि शरीरात्मकस्य सर्वस्य जगतश्चलनम्। 'महद्भयं वज्रमुद्यत'मित्यत्र प्राण इत्यनुषञ्जनीयम्। तथा च प्राणनिमित्तकमेव महाभयहेतोरशनेरुद्गमनमित्यर्थः। यद्यपि बाह्यवायुरेव धूमज्योतिस्सलिलसंवलितो विद्युत्स्तनयित्नुवृष्टयशनिभावेन विवर्तते। न त्वान्तरः प्राणवायुः। तथापि बाह्याध्यात्मिकभेदेन वायुतत्वस्यैव द्वेधावस्थानादभेदोपचारेण एवमुक्तिरुपपद्यत इति भावः। पूर्वपक्षद्वयेऽप्यमृतत्वफलश्रुतेरुपपत्तिमाह-**वायुरेवेति।** व्यष्टिः पृथक्पृथक्तत्तत्प्राणादिरूपेण विविधा व्याप्तिः। 'अशू व्याप्ताविति' धातोर्व्यष्टिशब्दो व्याप्तिवाची। समष्टिस्समन्तात्सर्वसाधारण्येन सूत्रादिरूपेण व्याप्तिः। पुनर्मृत्युमपजयति अपहन्ति पुनर्न म्रियते मुक्तो भवतीत्यर्थः। यद्वा। अपमृत्युं पुनर्मृत्युं च जयतीत्यर्थः। यद्युच्येत वायुविज्ञानादमृतप्राप्तिर्न सम्भवति 'तदा शिवमविज्ञायेति' श्रुतेः। अपपुनर्मृत्युं जयतीत्यस्यातीते क्वचित् जन्मनि अपमृत्युं यथा प्राप्तः न तथोक्तरूपवायुविज्ञानानन्तरं पुनरपमृत्युं प्राप्नोतीत्यर्थ इति। एवं तर्हि प्रधानब्रह्मोपासनाफलस्य एतदशन्युपासने प्राणोपासने वा तदङ्गभूते श्रवणमित्यस्तु। दृष्टं हि 'सोमापौष्णं त्रैतमालभेत पशुकाम' इति प्रधानसम्बन्धित्वेनावगतस्य, पशुफलस्य 'औदुम्बरो यूपो भवत्यूर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जं पशूनवरुन्धे' इति तदङ्गविधावपि श्रवणम्। अभ्युपगतं च प्राभाकरै'रष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीते'त्यत्र प्रधानाध्यापनफलस्य आचार्यकस्य तदङ्गोपनयनविधौ श्रवणम्। अङ्गीकृतश्च

सर्वैरपि मीमांसकैरिष्टयन्वयिनां वारणवैकङ्कतादिपात्राणामिष्टयपेक्षिताग्निसम्पादकत्वेन इष्टयङ्गकल्पस्याधानस्य प्रकरणे श्रवणमिति युक्तयन्तरसमुच्चयार्थः उपपत्तेश्चेति चशब्दः। प्राणः कम्पनादिति धर्मिनिर्देशेन सह हेतुरधिकरणान्तरेष्विव सूत्रयितव्यः। परमेश्वर इति साध्यमात्रं हि 'भेदव्यपदेशाच्चान्यः' 'अत एव स ब्रह्म' 'वदतीति चेन्न प्राज्ञो हि' 'प्रकरणात्' इति सूत्रगतैरन्यशब्दादिभिर्लब्धमाध्यायपरिसमाप्ति तदपेक्षेष्वधिकरणेष्वनुवर्तते। तथापि कम्पनात् कार्याद्यस्तद्धेतुत्वेनावगम्यते स परमेश्वरकंपनाद्धेतोरित्यावृत्त्या योजनेन कम्पनादित्येतदेव लाघवार्थं प्रतिज्ञाहेतूभयपरं सूत्रितमित्यभिप्रेत्य सिद्धान्तप्रतिज्ञां दर्शयति—**परमेश्वर एव कम्पनहेतुरिति।** यद्यपि शरीरकम्पहेतुत्वं प्राणवायोस्सम्भवति। भयजननद्वारा कम्पनहेतुत्वमशनेस्सम्भवति। तथापि महद्भयमिति विशेषणात् 'भयादस्याग्निस्तपती'त्युत्तरमन्त्रे अस्येत्यनेन प्रकृतं कम्पनहेतुं परामृश्य तद्भयादग्न्यादीनां स्वस्वाधिकारे प्रवृत्त्युक्तेश्च। शासकत्वात् भयजननद्वारा यत्कम्पनहेतुत्वं तदिह विवक्षितमित्यवसीयते। न कम्पनहेतुत्वमात्रं नापि भयजननद्वारककम्पनहेतुत्वमात्रम्। 'महद्भयं वज्रमुद्यत'मित्यस्य एतच्छब्दपरामर्शनीयं प्रकृतं कम्पनहेतुत्वं प्रत्युद्यतं वज्रमिव महाभयहेतुरित्येवंरूपविशेषणसमर्पकतया तदेकवाक्यत्वे सम्भवति प्राण इत्यस्यानुषङ्गं कृत्वा प्राणनिमित्तमेव महाभयहेतुरशनिर्विवर्तत इत्येवमर्थपरतया भिन्नवाक्यत्वकल्पनानुपपत्तेः। अनुषङ्गवाक्यभेददोषद्वयपरिहारार्थं वज्रशब्दलक्षणाया युक्तत्वात्। एवं 'महद्भय'मित्यस्य कम्पनहेतुविशेषणत्वे स्थिते तस्य कम्पनहेतुतोपयुक्तद्वारसमर्पकतयान्वयसम्भवे तदनाकाङ्क्षितपरत्वकल्पनानुपपत्तेश्च। उत्तरमन्त्रस्यापि प्रकृतकम्पनहेतुपरामर्शकास्यपदयुक्तस्य भयजननद्वारभूतशासकत्वसमर्पकतया सर्वं जगदित्यस्यासङ्कोचनीयस्य परमेश्वरशासनाभिज्ञाग्न्यादिविषयत्वेन तदाकाङ्क्षितार्थसमर्पकत्वसम्भवे तदनाकाङ्क्षितार्थपरत्व-कल्पनानुपपत्तेश्च। एवं च द्वारद्वयप्रतिपादनरूपयोपपत्त्या प्रकरणेन चानुगृहीतं शासकत्वाद्भयजननद्वारा कम्पहेतुत्वं ब्रह्मलिङ्गमन्योन्यकलहायमानात् प्राणवज्रश्रुतिद्वयात् बलवदित्यभिप्रेत्य कम्पनादिति सौत्रहेतोर्वाक्यशेषलब्धं विशेषणं दर्शयति-**शासकत्वाद्भवतीति।** भयजननद्वारेति शेषः। अत एव परमकारुणिकस्य परमेश्वरस्य शासकत्वेन भयजनकत्वमुपपादयति- **यस्य शासनभयेनेत्यादिना।** भीष्मं भंयकरं भावुकं भवनशीलं 'वृषपतपदे' त्यादि सूत्रेण ताच्छील्यार्थे भूधातोरुकञ्प्रत्ययः। भयंकर भवितुं शीलवदित्यर्थः। यद्वा। भावुकं मङ्गलं शासकतया भयंकरमपि परिणामे श्रेयस्करमित्यर्थः। 'श्वश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्। भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्। शस्तं चाथ त्रिषु द्रव्ये पापपुण्यसुखादि चे'ति अमरसिंहोक्तेः। अत्र प्राकरणिकानां ब्रह्मलिङ्गानां पूर्वपक्षे

कम्पनहेतोरन्यत्रैवाशयात्तत्र तदन्वयोऽस्पष्ट इति स्पष्टास्पष्टब्रह्मलिङ्गता।। ।। **इति कम्पनाधिकरणम्।।९।।**

अथ ज्योतिरधिकरणम्।।१०।।

उत्तराधिकरणमवतारयति–**दहरादिष्विति।** दहरादिषु स्थानेषु उपास्यतया परमेश्वरः पूर्वाधिकरणान्तेष्वधिकरणेषु सिद्धः तदुपासनया तस्यैव प्राप्यत्वमित्युपपादयितुमुत्तराधिकरणामरभ्यत इत्यर्थः। यद्यपि 'मुक्तोपसृप्यव्यपदेशा'दिति द्युभ्वाद्यधिकरणगुण सूत्रे परमेश्वरस्य मुक्तप्राप्यत्वमुक्तं तथापि क्वचिद्विषयवाक्यविशेषे प्रसक्तशङ्कानिराकरणेन तदेव दृढीक्रियत इति भावः।।सू०।। **ज्योतिर्दर्शनात्**।।४१।।

इति शिवार्कमणिदीपिका अर्थान्तरत्वाधिकरणम् समाप्तम्

अथ सुषुप्त्युत्क्रान्तधिकरणम्। ॥ सू० ४२-४३॥

शाङ्करभाष्यम्

सुषुप्त्युत्क्रान्त्योर्भेदेन॥४२॥

व्यपदेशादित्यनुवर्तते। बृहदारण्यके षष्ठे प्रपाठके ''कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः'' (बृ० ४/३/७) इत्युपक्रम्य भूयानात्मविषयः प्रपञ्चः कृतः। तत्किं संसारिस्वरूपमात्रान्वाख्यानपरं वाक्यम्, उतासंसारिस्वरूपप्रतिपादनपरमिति संशयः॥ किं तावत्प्राप्तम्? संसारिस्वरूपमात्रविषयमेवेति। कुतः? उपक्रमोपसंहाराभ्याम्। उषक्रमे ''बोऽयं विज्ञानमयः प्राणेषु'' इति शारीरलिङ्गात्। उपसंहारे च ''स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु (बृ० ४/४/२२) इति तदपरित्यागात्, मध्येऽपि बुद्धान्ताद्यवस्थोपन्यासेन तस्यैव प्रपञ्चनादिति॥

एवं प्राप्ते ब्रूमः–परमेश्वरोपदेशपरमेवेदं वाक्यम्, न शारीरमात्रान्वाख्यानपरम्। कस्मात्? सुषुप्तावुत्क्रान्तौ च शारीराद्भेदेन परमेश्वरस्य व्यपदेशात् सुषुप्तौ तावत् ''अयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्'' (बृ० ४/३/२१) इति शारीराद्भेदेन परमेश्वरं व्यपदिशति। तत्र पुरुषः शारीरः स्यात्; तस्य वेदितृत्वात् बाह्याभ्यन्तरवेदनप्रसङ्गे सति तत्प्रतिषेधसम्भवात्। प्राज्ञः परमेश्वरः ; सर्वज्ञत्वलक्षणया प्रज्ञया नित्यमवियोगात्। तथोत्क्रान्तावपि ''अयं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्याति'' (बृ० ४/३/३५) इति जीवाद्भेदेन परमेश्वरं व्यपदिशति। तत्रापि शारीरो जीवः स्यात्; शारीरस्वामित्वात्, प्राज्ञस्तु स एव परमेश्वरः। तस्मात् सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशात्परमेश्वर एवात्र विवक्षित इति गम्यते। यदुक्तमाद्यन्तमध्येषु शारीरलिङ्गात्तत्परत्वमस्य वाक्यस्येति, अत्र ब्रूमः–उपक्रमे तावत् ''योऽयं विज्ञानमयः प्राणेषु'' इति न संसारिस्वरूपं विवक्षितम् किं तर्हि? अनूद्य संसारिस्वरूपं परेण ब्रह्मणाऽस्यैकतां विवक्षति। यतो ''ध्यायतीव लेलायतीव'' इत्येवमाद्युत्तरग्रन्थप्रवृत्तिः संसारिधर्मनिराकरणपरा लक्ष्यते। तथोपंसहारेऽपि यथोपक्रममेवोपसंहरति–''स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु'' इति। योऽयं विज्ञानमय प्राणेषु संसारी लक्ष्यते, स बा एष महानज आत्मा परमेश्वर एवास्माभिः प्रतिपादित

इत्यर्थः। यस्तु मध्ये बुद्धान्ताद्यवस्थोपन्यासात्संसारिस्वरूपविवक्षां मन्यते, स प्राचीमपि दिशं प्रस्थापितः प्रतीचीमपि दिशं प्रतिष्ठेत। यतो न बुद्धान्ताद्यबस्थोपन्यासेनावस्थावत्त्वं संसारित्वं वा विवक्षति किं तर्हि? अवस्थारहितत्वमसंसारित्वं च। कथभेतदवगम्यते? यत् ''अत ऊर्ध्वं विमोक्षायैव ब्रूहि'' इति पदे पदे पृच्छति। यञ्च ''अनन्वागतस्तेन भवत्यसङ्गो ह्ययं पुरुषः (बृ॰ ४/३/१४/१५) इति पदे पदे प्रतिवक्ति। ''अनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान शोकान्हृदयस्य भवति'' (बृ॰ ४३/१२) इति च। तस्मादसंसारिस्वरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्तव्यम्।।४२।।

***पत्यादिशब्देभ्यः*।।४३।।**

इतश्चासंसारिस्बरूपप्रतिपादनपरमेवैतद्वाक्यमित्यवगन्तव्यम्। यदस्मिन्वाक्ये पत्यादयः शब्दा अंससारिस्बरूपप्रतिपादनपराः संसारिस्वभावप्रतिषेधनाश्च भवन्ति। ''सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः'' इत्येवंजातीयका असंसारिस्वभावप्रतिपादनपराः। ''स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्'' इत्येवंजातीयका संसारिस्वभाप्रतिषेधनाः तस्मादसंसारी परमेश्वर इहोक्त इत्यवगम्यते।।४३।।

इति श्रीमच्छङ्करभगवत्पादकृतौ शारीरकमीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः।।३।।

इति शाङ्करभाष्यम् सुषुप्त्युत्क्रान्तधिकरणम् समाप्तम्

वार्तिकम

सुषुप्त्युत्क्रान्त्योर्भेदेन।। अनुषङ्गेण प्रथमं सूत्रं पूरयति– *व्यपदेशादित्यनुवर्तत इति*।। तथाच सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशादिति सूत्रं सम्पद्यत इत्यभिप्रायः। अस्य विषयमाह– *बृहदारण्यके षष्ठे प्रपाठक इति*।। विषयं दर्शयित्वा तत्र संशयमाह– *तत्किमिति*।। विज्ञानमयादिशब्दश्रवणात् सर्वेशानादिशब्दश्रवणाच्च संशयः। अङ्गुष्ठमात्र इत्यत्र जीवेनोपक्रमे सत्यपि न तेनोपसंहारोऽस्ति, न वा मध्ये परामर्शः, इह तु जीवेनोपक्रमोपसंहारौ मध्ये परामर्शश्च, अतो न तन्न्यायेनास्य गतार्थता। पूर्वस्मिन्नाधिकरणेऽर्थान्तरत्वव्यपदेशाद् आकाशशब्दं परं ब्रह्मेत्युक्तम्, ''प्राज्ञेनात्मना संपरिष्वक्तः'' इत्यत्र सत्यपि प्राज्ञविज्ञानमययोरभेदे भेदव्यपदेशदर्शनेन तस्यानैकान्तिकत्वमिति पूर्वोत्तराधिकरणयोराक्षेपिकी सङ्गतिः।।

विमृश्य पूर्वपक्षं गृह्णाति– *किं तावत्प्राप्तम् संसारिस्वरूपविषयमेवेति*।। *कुत उपक्रमोपसंहाराभ्यामिति*।। येन ह्युपक्रम्यते, उपसंह्रियते च, मध्ये च परामृश्यते, स तस्य वाक्यस्य तात्पर्यमर्यादयार्थः। न चास्मिन् वाक्य उपक्रमोपसंहारौ मध्ये परामर्शश्च जीवे। तथाहि–''योऽयं विज्ञानमयः प्राणेष्वि'' ति जीवेनोपक्रमः, ''स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेष्वि'' ति जीवे तदपरित्यागेन तस्यैवोपसंहारः। संसारस्यानादित्वेन तस्याजत्वम्, किञ्चिदपेक्ष्य महत्त्वं च नानुपपन्नम्। मध्ये च जागराद्यवस्थोपन्यासेन तस्यैवावस्थावतः परामर्शः। ''योऽपि ह्ययं पुरुषः प्राज्ञेनाप्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमि'' ति–''अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन् याती'' ति च सुषुप्त्युत्क्रान्त्योर्भेदेन प्राज्ञस्यात्मनो व्यपदेशः श्रूयते, सोऽपि न परमात्मविषयः ; तत्काले जीवस्यैव सम्पिण्डितकरणत्वेन सर्वज्ञानशून्यतया प्राज्ञशब्दाभिलप्यत्वात्, अभेदेऽपि 'राहोः शिर' इतिवदवस्थाभेदमपेक्ष्य भेदव्यपदेशाविरोधात्। योऽपि–''सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः'' इत्यादिव्यपदेशः, सोऽपि कार्यकरणसङ्घातात्मकस्य जगतो भोक्तृत्वात् जीव उपपद्यते। ननु–जीवस्यावगतेः प्रत्यक्षसिद्धत्वात् तदनुवादे च प्रयोजनाभावात् श्रुतेरज्ञातज्ञापकत्वस्वारस्याञ्च न स वाक्यार्थ इति–चेत्, न;

ब्रह्मव्यतिरिक्तस्य तस्याप्रत्यक्षसिद्धत्वेन श्रुत्येकसमाधिगम्यत्वात्। तस्य च क्रतुभावनापेक्षितत्वेन संनिहितोपास्तिभावनापेक्षितत्वेन च पर्णत्ववत् तत्प्रतिपादनस्य सप्रयोजनत्वात्। तस्मात् जीव एवास्य वाक्यसन्दर्भस्य विषय इति।।

एवं प्राप्ते ब्रूमः—परमात्मैवास्य वाक्यस्य विषयः। कुतः? सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशात्=सुषुप्तावुत्क्रान्तौ च जीवाद् भेदेन प्राज्ञात्मा सर्वज्ञः परमेश्वरो व्यपदिश्यते ''प्राज्ञेनात्मना संपरिष्वक्तः'' ''प्राज्ञेनात्मनाऽन्वारूढः'' इति। प्राज्ञशब्दस्य ज्ञानप्रकर्षवति रूढत्वात् सर्वज्ञे च परमेश्वरे तत्प्रकर्षकाष्ठायाः समाप्तत्वेन तस्यासङ्कुचितवृत्तित्वात्। न च संभवति भेदव्यपदेशस्य मुख्यार्थत्वे कथञ्चिदुपचारेण ''राहोः शिर'' इतिवद् व्याख्यानमप्युचितम्। योऽपि विज्ञानमयस्योपक्रमोपसंहारयोर्मध्ये च परामर्शो दर्शितः, सोऽपि तस्य ब्रह्मस्वरूपोपपिपादयिषयैव, न जैवरूपोपपिपादयिषया; तादृरूप्यस्य प्रत्यक्षसिद्धत्वेन शास्त्रप्रतिपाद्यत्वानुपपत्तेः। यथा चोपक्रमादीनां प्रत्यक्षसिद्धस्वरूपानुवादेन तस्यावस्थात्रयातीतब्रह्मस्वरूपावबोधपरत्वम्, तथा प्रपञ्चितं भाष्ये। एतेन—यदुक्तम्—क्रतुभावनापेक्षितकर्तृप्रतिपादनपरत्वमस्य वाक्यस्य—इति, तदपि प्रत्युक्तं भवति; कार्यकरणसङ्घाताद् विविक्तस्य ब्रह्मत्वात्, तदविविक्तस्य च प्रत्यक्षसिद्धत्वादित्युक्तत्वात्।।

पत्यादिशब्देभ्यः।। ''सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमयं प्रशास्ति स न साधुना कर्मणा भूयान् नो एवासाधुना कर्मणा कनीयान्'' इत्येवमादयः शब्दा असंसारिस्वरूपं भगवन्तं श्रीरामभद्रं प्रतिपादयन्ति, प्रतिषिध्यन्ति च संसारिस्वरूपम्। ते च तव पक्षे सामञ्जस्येन नोपपद्येरन्। तस्मात् परं ब्रह्मैवास्मिन् वाक्ये प्रतिपाद्यत इति।।४३।। इति त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणम्।।

इति श्रीमत्परमहंसपरिव्राजकायार्चश्रीगोविन्दानन्दपूज्यपादशिष्यनारायणसरस्वतीकृतौ शारीर- कमीमांसाभाष्यवार्तिके प्रथमाध्यायस्य तृतीयः पादः।।

इति वार्त्तिकम् सुषुप्त्युत्क्रान्तधिकरणम् समाप्तम्

प्रदीप:

सुषुप्त्युत्क्रान्त्योर्भेदेन।।४२।। यथा पूर्वाधिकरणे भेदव्यपदेशेनाकाशपदस्य ब्रह्मत्वम्, एवमत्रापि विज्ञानमय: परमात्मेति निर्धार्यत इति दृष्टान्तसङ्गति:।।

अत्रानुसन्धेयानि विषयवाक्यानि बृहदारण्यकचतुर्थाध्यायतृतीयचतुर्थब्राह्मणगतानि। तत्र हि याज्ञवल्क्यात् कामप्रश्ने वरं प्राप्य जनक:–किं ज्योतिरेवायं पुरुष इति तं पप्रच्छ। तेन त्वादित्यचन्द्राग्नि वागादिकमेणात्मैकास्य पुरुषस्य ज्योतिरिरिति प्रत्युत्तरितम्। अनन्तरं चायं याज्ञवल्क्यस्य प्रश्न:–कतम आत्मेति। कथरं तु याज्ञवल्क्यल्य–योऽयं विज्ञानमय: प्राणेषु हृद्यन्तज्र्योति:–इति। अनन्तरं तु तमेव विज्ञानमयमात्माननुकृष्ण जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयवत्त्वं वस्तुगत्या तदवस्थाशून्यत्वस्यापि विवेचनपूर्वकं प्रतिपादितम्। तत्र सुषुप्तिमुत्क्रान्तिं च प्रक्रम्य–प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्, प्राज्ञेनात्मनान्वारूढ उत्सर्जन् यातीति प्राज्ञभावं सुषुप्त्यादौ प्रतिपाद्य तस्यैव प्राज्ञभावापन्नस्य विज्ञानमयस्य "तद्वा अस्यैतदाप्तकाममात्मकाममकामं रूपं शोकान्तरम्।" इत्यादिनाऽऽप्तकामत्वादिकं प्रतिपाद्य पुनस्तमेव विज्ञानमयं मध्ये "सर्वस्य वशी सर्वस्येशान: सर्वस्याधिपति:" "स न साधुना कर्मणा भूयान् नो एवासाधुना कर्मणा कनीयान् एष सर्वेश्वर एष भूपाल एष सेतुर्विधारण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती" त्यादिना पुण्यपापासङ्गिनं ज्ञेयं च निरूप्य–"स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्जते।" इत्यादिना तज्ज्ञनोपायादिकमपि प्रतिपाद्यान्ते उपसंहारेऽप्येवमेवाम्नातम्–"स वा एष महानज आत्माऽन्नादो वसुदानो विन्दते वसु य एवं वेद।। स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयोऽभयं वै ब्रह्माभयं हि ब्रह्म भवति य एवं वेदे" ति।।

अत्रायं संशय:–किं विज्ञानमयोऽयं जीव:, उत परमात्मेति। तत्र–"अन्यार्थश्च परामर्श" इति न्यायेन ब्रह्माभेदोपपादनार्थ विज्ञानमयनिर्देशोऽपि यद्यपि भवन् परमात्मपक्षस्य न विरुद्ध:। अयमेवार्थ: प्रमिताधिकरणेऽपि व्यवस्थाप्यते; तथापि तत्र सर्वत्र न भेदनिर्देशोऽपि वर्तते, अत्र तु जागराद्यवस्थावत एवाजरत्वादिकं किमाम्नातम्, किं वा प्राज्ञस्यान्यस्येति विचार्यते, इति न

ताभ्यामधिकरणाभ्यामस्य गतार्थत्वम्। तथाच "योऽयं विज्ञानमय" इत्यस्यापि ब्रह्माभेदबोधनार्थत्वाभावे पूर्वपक्षकोटिः, तदर्थत्वे तु सिद्धान्तकोटिः। तथाच पूर्वत्रैकस्मिन्नेव वाक्ये जीवबोधकं ब्रह्मरूपबोधकं च परमासीत्, अत्र तु न तथेति पदैकवाक्यतया पूर्वतनविचारः, अत्र तु नैकवाक्यतेति च विशेषः। पूर्वतनन्याये महावाक्यार्थविचारः, अत्र पदार्थशोधनमिति तु निष्कर्षः।। सति चैवं जीवस्य सांसारिकं जाग्रदाद्यवस्थावत्त्वं पारमार्थिकमेव रूपमिति पूर्वपक्षफलम्, सिद्धान्तफलं त्वसंसारिरूपमेव तस्य पारमार्थिकमिति। अत्र पूर्वोत्तरपक्षयोरुभयोरपि विज्ञानमयप्राज्ञौ द्वौ निर्दिष्टाविति संप्रतिपन्नम्। अयमेव विशेषः—आप्तकामत्वसर्वेशानत्वादिना प्राज्ञः प्रतिपाद्यते, विज्ञानमयस्तु जीव एवेति पूर्वपक्षः, सिद्धान्तस्तु आप्तकामत्वादिना विविच्यमानोऽपि विज्ञानमय एवेति। तथाचाप्तकामादिवाक्यानां प्राज्ञप्रकरण उत्कर्षणं कर्तव्यमिति पूर्वपक्षपर्यवसाने परमात्मलिङ्गानां विज्ञानमयासम्बन्धेन वाक्यार्थव्यवस्थापने क्रियमाणे ब्रह्मलिङ्गं विज्ञानमयेनासङ्गतं भवतीति तस्याभिभवादस्पष्टब्रह्मलिङ्गकत्वमस्यापि वाक्यस्य। तत्र पूर्वसूत्राद् व्यपदेशादित्यनुषङ्गः। तथाच "योऽयं विज्ञानमय" इत्यादिवाक्यसन्दर्भः, त्वम्पदलक्ष्यार्थपरः, असंसारिस्वरूपबोधकत्वात्, न तु तत्पदलक्ष्यार्थपरः ; सुषुप्त्युत्क्रान्त्योस्तद्भिन्नतया प्राज्ञस्य निर्देशादिति सूत्रार्थः। इदमेवाभिप्रेत्य "योऽयं विज्ञानमय" इत्यस्य त्वम्पदलक्ष्यार्थसमर्पकत्वं सिद्धान्तबिन्दुन्यायरत्नावल्योर्विवेचितम्। एतेन—अनेनाधिकरणेन विज्ञानमयपरमात्मताविवक्षायां तत्र परमात्मनो भेदव्यपदेशस्य कथं हेतुत्वमिति—परास्तम्; त्वम्पदलक्ष्यार्थो ब्रह्मेत्यत्रव तात्पर्यात्। तदिदं वक्ष्यति—*अत्र ब्रूमः ; उपक्रमे तावदित्यादिना*।। संशयं निर्दिशति—*तत्किं संसारिस्वरूपमात्रान्वाख्यानपरमिति*।। उपक्रमोपसंहारौ निर्दिश्य मध्ये परामर्शं निर्दिशति—*मध्येऽपीति*।। सिद्धान्तं संगृह्णाति—*परमेश्वरोपदेशपरमिति*।। असंसारिस्वरूपोपदेशपरमित्यर्थः। आपातदृष्टया तु विज्ञानमय आकाशादिवत् परमेश्वर इति प्रतीयते। तत्र च परमेश्वरभेदनिर्देशस्य हेतुत्वं न संभवति। तथाच संसारिस्वरूपमनूद्यासंसारिस्वरूपबोधनमत्र विवक्षितम्। तदिदमाह—न शारीरमात्रान्वाख्यानपरम्। सति चवम्—सत्यं ज्ञानमिति तत्पदार्थस्येव विज्ञानमय इत्यादिवाक्यं त्वम्पदार्थस्य लक्ष्यार्थस्योपस्थापकमिति तत्त्वमसीति वाक्यैकवाक्यतायोग्यमवान्तरवाक्यमिदमिति भावः। अत्रान्तःकरणाद्युपाधिरहितस्य जीवस्य त्वम्पदलक्ष्यस्योपस्थितिः सुषुप्त्यसंप्रज्ञातसमाधिभ्यामिति सिद्धान्तबिन्दौ प्रतिपादितमपि स्मर्तव्यम्, यतोऽत्रापि सुषुप्त्यवस्थामादायैव प्राज्ञभिन्नस्य तस्य प्रतिपादनं क्रियते। अन्यद् वार्तिकादौ व्यक्तम्।।

अत्र पादे द्युभ्वाद्यधिकरणे "मुक्तोपसृप्यव्यवदेशात्" "भेदव्यपदेशात्" "स्थित्यदनाभयामि" ति सूत्रत्रये प्रथमेन मुक्तिदशायां जीवात्मपरमात्मनोः प्राप्तृप्राप्तव्यभावस्य श्रुतौ व्यपदिश्यमानतया

भेदः सूत्रितः, द्वितीयेन श्रुतौ साक्षात् तयोः स्वरूपभेदव्यपदेशः सूत्रितः, तृतीयेन तयोः स्वरूपैक्यविरुद्धं परस्परवैलक्षण्यं सूत्रितम्। तेन च मुण्डकगतस्य ''ब्रह्म वेद ब्रह्मैव भवती'' त्यस्य ब्रह्मभावापत्तिपरताभ्रमो निरस्यते। अत्र हि प्रकरणे ''परात्परं पुरुषमुपैति दिव्यम्'' इति दिव्यत्वविशेषणे देशविशेषसम्बन्धित्वेन ब्रह्मणः प्राप्तिर्विवक्ष्यते; ''विद्वान् नामरूपाद्विमुक्तः परात् परं पुरुषमुपैति दिव्यमि'' ति मुक्तोपसृप्यतावाक्ये तथाऽवगमादिति श्रीभाष्यानुयायिनो मन्यन्ते। अत्रैव मुक्तोपसृप्यव्यपदेशादिति सूत्रं स्वरसम्। न केवलमियत्, किन्तु भूमाधिकरणे ''धर्मोपपत्तेरि'' ति सूत्रम्, ''सुषुप्त्युत्क्रान्त्योर्भेदेनेति'' ''पत्यादिशब्देभ्यश्चे'' ति सूत्रे च श्रीभाष्यमते स्वरसानि। न हि निर्विशेषताविवक्षायां धर्मोपपत्तिर्भवति हेतुः। न हि सुषुप्त्युत्क्रान्त्योर्भेदव्यपदेशो जीवविवक्षायां हेतुर्भवतीत्यसंसारिजीवप्रतिपादकत्वं न युक्तमिति तदाशयः॥

अत्र मते क्लिष्टकल्पनया व्याख्यायमानानि तु सूत्राणि–''उत्तराच्चेदाविर्भूतस्वरूपस्तु'' ''अन्यभावव्यावृत्तेश्च'' ''सुषुप्त्युत्क्रान्त्योर्भेदेने''ति। आद्यं हि–आविर्भूतस्वरूपो जीवो यद्यपि प्रजापतिवाक्यार्थः ; तथापि नात्र स विवक्ष्यते; सेतुत्वाद्यसंभवादिति हेत्वध्याहारेण व्याख्यायते। तृतीयं तु–जीवब्रह्मैक्यनिषेधपरतया व्याख्यायते। तथाच मुक्तावस्थजीवविवक्षायामपि तस्य परमात्मनैक्यमिति सिद्धान्तनिरसनं यद्यत्र विवक्ष्यते, तर्हि सुषुप्त्युत्क्रान्त्योर्भेदव्यपदेशः कथं हेतुः स्यात्; मुक्तेन ब्रह्मणो भेदव्यपदेशः खलु तद्भेदसाधकतामर्हति। तथाच सूत्रद्वयस्यापि मुख्यं तात्पर्यं मुक्तस्य प्रत्यगात्मनो ब्रह्माभेदः, सौषुप्तादेरुत्क्रान्तस्य वा तु ततो भेद इति तात्पर्याद् नोत्क्रान्तिसापेक्षा मुक्तिः, किन्तु नामरूपविवेकमात्रापेक्षेत्येवाशय इत्यवगम्यते। सति चैवम्–उत्तराच्चेदिति शङ्कायाः समाधानमिष्टापत्तिरेव; आविर्भूतस्वरूपस्य जीवस्य ब्रह्मभावेन तद्विवक्षायां जीवपरताया असम्भव इति सूत्रार्थेऽवगम्यते। तथाच–''नामरूपाद्विमुक्तः'', ''परात् परं पुरुषमुपैति दिव्यम्'' ''ब्रह्म वेद ब्रह्मैव भवती'' ति वाक्यानामेकार्थता सूत्रकाराभिमतेति ज्ञायते।

तदयं निष्कर्षः साधनावस्थो जीवो ज्ञानपरिपाकेऽविद्यानिवृत्तौ ब्रह्मभूतो भवति, तस्य साधनावस्थां ब्रह्मणः साध्यावस्थां च कल्पितां गृहीत्वा कल्पितभेदव्यपदेश इति। श्रीभाष्यादिमते तु द्युभ्वाद्यायतनस्य जीवाभेदनिरासे मुक्तोपसृप्यत्वं कथमुपयुज्यते? यदि बद्धमुक्तसाधारणसर्वजीवत्वव्यावर्तनार्थम्, तर्हि मुक्तपदं वितथम्। अद्वैतमते तु मुक्तत्वमेवोपसर्प्यत्वमिति सूचनार्थं तदिति न तद्वितथम्। तथा च–प्राणभृता जाग्रदाद्यवस्थावता बद्धेन जीवेनैव ब्रह्मणो भेदव्यपदेशादिकम्, न तु मुक्तेनापि। अत एव भेदव्यपदेशादिति सूत्रान्तरमपि सार्थकम्। प्रत्यग्ब्रह्मणोरभेदेऽपि जीवब्रह्मणोर्भेदस्यैवाद्वैतेऽपि स्वीकाराद् न तत्सूत्रानुपपत्तिः॥

मुक्तोपसृप्यसूत्रे मुख्योपसर्पणाविवक्षाऽप्यत एव व्याख्याता। तथाच ''मुक्तोपसृप्यव्यपदेशात्'' भेदव्यपदेशाच्चे'' ति सूत्रद्वयमप्यद्वैतवाद एव स्वरसम्, न श्रीविशिष्टाद्वैतवादे। तदेवमस्मिन् पादे सामान्यतस्तत्र तत्र भेदव्यपदेशादयो हेतवः संसारिजीवस्य ब्रह्मणा साकमेव, नासंसारिजीवस्यापि तेन साकम्। असंसारित्वब्रह्मत्वयोरैक्यादिति–''मुक्तोपसृप्यव्यपदेशादि'' ति पादोपक्रमद्वितीयसूत्रेण ''सुषुप्त्युत्क्रान्त्योर्भेदेने'' त्युपसंहारद्वितीयसूत्रेण च ज्ञाप्यते।।

''धर्मोपपत्तेरि'' ति तु सूत्रमन्यविज्ञानविरोधित्वरूपं वाक्यशेषे श्रूयमाणं बाधज्ञानविषयत्वरूपमेव धर्म गोचरयतीति निर्विशेषतासिद्धान्ततायामप्यनुगुणमेव। न ह्यद्वतमते भेदः, धर्मवत्त्वं वा ब्रह्मणो नास्तीति मन्यते, किन्तु तत्पारमार्थिकत्वमेवेति न विरोधः। तदुक्तम्–''अक्षमा भवतः केयं साधकत्वप्रकल्पने। किं न पश्यसि संसार तत्रैवाज्ञानकल्पितमि'' ति।।

पादत्रये आलोचितासु महाविद्यास्वष्टादशसु– अक्षराङ्गुष्ठमात्रान्तरादित्याकाशानन्दमयान्तर्याम्युपकोसलगायत्री गार्ग्यक्षर ज्योतिस्त्रिमात्रप्रणव दहर नाचिकेत परंज्योतिः प्रतर्दन भूम मधु सद्विद्यासु– अक्षराङ्गुष्ठमात्रानन्दमयान्तर्यामि गार्ग्यक्षर त्रिमात्रप्रणव नाचिकेत प्रतर्दन भूम सद्विद्या एकादश निर्विशेषपराः, अपरास्तु सगुणपराः। तथाच सार्थादपि तस्करा बहव इति द्वैताभिमतन्यायेनापि न सगुण एव ब्रह्ममीमांसायाः पर्यवसानम्।।

एतेन–अद्वैतमते सूत्रस्वारस्यभङ्गवादोऽपि षट्पष्टितमः शतदूषणीगतः–परास्तः ; आपादचूडं ब्रह्मसूत्रेषु निर्विशेषस्यैवार्थस्य प्रतिपाद्यमानत्वात्। अत्र च ''न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि'' ''भेदादिति चेन्न प्रत्येकमतद्वचनात्'' ''अरूपवदेव हि तत्प्रधानत्वाद'' ''आह च तन्मात्रम्'' मायामात्रं तु कात्स्न्येनाभिव्यक्तस्वरूपत्वात् अविभाणेन दृष्टत्वात् इत्यादिसूत्राण्यपि प्रमाणानि। यत्त शतदूषण्याम्–अद्वैतमते चिन्मात्रस्य स्वप्रकाशत्वेन ज्ञानाविषयतया जिज्ञासासूत्रमेव न घटते। सगुणं तु कल्पितगुणविग्रहादिविशिष्टतया तैर्मन्यमानं सुतरां न जिज्ञास्यम्। एतेन–जन्माद्यस्य यत इति सूत्रमपि–व्याख्यातम्; तस्यापि ब्रह्मणोऽसाधारणधर्मलक्षणपरतया निर्विशेषपरत्वायोगादद्वैतमते तदस्वारस्यात्। शास्त्रयोनित्वसूत्रं तु ब्रह्मणि तैः शास्त्रस्य प्रामाण्यानङ्गीकारादस्वरसमेव। एतेन–समन्वयसूत्रमपि–व्याख्यातम्; भेदगर्भस्यान्वयस्य हेतूकरणेनैव सविशेष एव पर्यवसानस्य सिद्धेः। अत्र–ईक्षणादिगुणयोगस्य मुख्यतयाऽभिधानाद् ईक्षत्यधिकरणम्, प्राचुर्यार्थकमयट्प्रयोगात् अभ्यासस्य हेतुत्वेनोपादानाच्चानन्दमयाधिकरणम्, असाधारणधर्मरूपस्य लिङ्गस्यैव हेतुत्वेन विवक्षणादाकाशप्राणाधिकरणे, चरणभिधानहेतुत्वविवक्षणात् ज्योतिरधिकरणम्, वाक्यस्यान्विताभिधानेऽभिहितान्वयवादे वा सविशेषपरत्वनियमात् तथाऽनुगमदित्युपक्रमोपसंहारादिषड्विध-

तात्पर्यलिङ्गोपेतमहावाक्यसामर्थ्यादिन्द्रान्तर्यामिणो महापुरुषस्यैव प्रसाधनाद् इन्द्रप्राणाधिकरणं च निर्विशेषवादे नानुगुणम्, किन्तु सविशेषवाद एव। एतेन–त्रिपाद्यपि–व्याख्याता; स्थालीपुलाकन्यायेन तस्या अपि तथैव स्वीकरणीयत्वात्। अविरोधाध्यायस्तु प्रथमाध्यायशेषत्वाद् न पृथग् विचारमपेक्षते। वैराग्योभयलिङ्गपादयोर्जीवपरमात्मनोर्वैषम्यं प्रतिपाद्यत इति तौ भेदवाद एव स्वरसौ, नाभेदवादे। गुणोपसंहारपाद इति नामैव निर्गुणवादस्य हृदयशूलम्। अङ्गाङ्गिभाववादोऽपि तस्यैव कर्णज्वरः। फलाध्याये तु फलनिर्देश एव निर्गुणवादिनां निष्फलं प्रलापमाविष्करोतीति–प्रतिपाद्यते, तत्राद्वैतमते स्वप्रकाशस्यापि चैतन्यस्याज्ञानेनावृतत्वस्वीकारात् तन्निवृत्त्यर्थं स्वातिरिक्तवृत्तिविषयत्वस्वीकाराद् अज्ञाते सन्दिग्धे वा तत्र न जिज्ञासानुपपत्तिः, इति कथं न जिज्ञासासूत्रं घटते निर्विशेषस्यैव जिज्ञास्यत्वेऽपि। सगुणं तु कल्पिगुणविग्रहादिविशिष्टमपि मुख्यतयाऽजिज्ञास्यत्वेऽपि न सर्वथाऽजिज्ञास्यम्; अवान्तरविचारविषयत्वस्वीकारात्। तथाचोभयविधमपि ब्रह्म जिज्ञासासूत्रविषय इत्यवाद्वैतिनां सिद्धान्तात् सगुणपराणामधिकरणानामपि बहूनां सत्त्वेऽपि न विरोधः। एतेन–जन्माद्यधिकरणमपि–व्याख्यातम्; तस्यापि "आनन्दाद्धेयवे" तिवाक्यान्तप्रकरणविषयस्य सगुणद्वारैव निर्गुणस्वरूपलक्षणमित्यत्रैव तात्पर्याद् अवान्तरतात्पर्यस्य सगुणे सत्त्वेऽप्यद्वततात्पर्याविरोधात्। जगत्कारणत्वं हीदमनुमानादिप्रमाणान्तरस्यापि गम्यमिति न शास्त्रमात्रगम्यं ब्रह्म स्यात्, यदि तत्रैव शास्त्रस्य पर्यवसानम्। तथाच जन्मादिसूत्रस्यापि शास्त्रयोनित्व एव पर्यवसानमिति भगवत्पादसिद्धान्तात् तस्य निर्विशेषे प्रामाण्यं न सगुणवाक्यद्वारैवेति बोधनार्थमेव। तेन च न केवलं निर्गुणवाक्यानि, किन्तु सगुणवाक्यान्यपि निर्विशेषवाद एव पर्यवस्यन्तीति बोध्यते। तत्र च किं सगुणवाक्यानुसारेण निर्गुणवाक्यानां नयनम्, उत निर्गुणवाक्याविरोधेन सगुणवाक्यानामिति विशये तु निर्गुणवाक्यप्राधान्येनैव व्यवस्थेति व्यवस्थापनार्थं समन्वयाधिकरणम्। समन्वयो नाम तात्पर्यमेव, न तु भेदगर्भः संसर्गः ; शब्दप्रामाण्यनिर्णये तात्पर्यस्यैव गमकत्वात्। तथाचद्वैतमत एव चतुःसूत्री स्वरसा, न तु शतदूषणीकारमते। तत्र हि वेदान्तेभ्यः सगुणब्रह्मणो निर्णीतत्वाद् न ब्रह्मणि संशय इति न जिज्ञासासूत्रं घटते। तस्य च सगुणस्य सत्यकामत्वादिगुणगणपूर्णस्यान्तर्यामिणश्च जगत्कारणत्वमात्रं न लक्षणमिति जन्मादिसूत्रायोगः। एतेन–शास्त्रयोनित्वसूत्रमपि–व्याख्यातम्; उपास्ये तत्र शास्त्रातिरिक्तप्रमाणस्यैवाप्रसङ्गात्। समन्वयसूत्रं तु शास्त्रयोनित्वसूत्रेणैव शास्त्रप्रमाणकत्वव्यवस्थापनेन तदसत्त्वशङ्काया अनुत्थानात् निष्प्रयोजनमेवेत्यन्यत्र व्यक्तम्॥

ईक्षत्यधिकरणं तु कारणं सगुणमेवाधिकृत्य प्रवृत्तमिति तत्रावान्तरतात्पर्यविषय ईक्षणादिहेतूपन्यासो न विरुद्धः ; अध्यारोपापवादन्यायेन हि सद्विद्या प्रवर्तते, इति हि वस्तुस्थितिः।

यथाचानन्दमयाधिकरणे मयट्प्रत्ययो न प्राचुर्यार्थः, न वाऽऽभ्यासस्यानन्दमयब्रह्मतासाधनत्वम्, तथाऽन्यत्र विशदम्। आनन्दमस्यानभ्यासात्, तदधिष्ठानस्यैवावाङ्मनसागोचरस्य ब्रह्मणः पुनः पुनराम्नानाञ्च निर्विशेषब्रह्मवाद एवानन्दमयाधिकरणमपि गमकम्। एतेन–अन्तराकाशप्राणज्योतिरिन्द्रप्राणाधिकरणानि, किं बहुनाऽवशिष्टा त्रिपाद्यपि–व्याख्याता; यथायोगं सगुणनिर्गुणान्यतरपरतायामप्यविरोधात्। यत्तु–वैराग्यपादादौ जीवब्रह्मणोर्गन्तृगन्तव्यत्वादिकमालोचितम्, तेन च तयोर्वैषम्यं सूचितम्; तदिदं विशिष्टजीवेश्वराभिप्रायमेव, न तु शुद्धजीवेश्वराभिप्रायम्। अतो न वैराग्योभयलिङ्गपादयोरपि निर्विशेषवादे प्रातिकूल्यम्। वस्तुतस्तु नस्थानतोऽप्यधिकरणस्य शुद्धजीवेश्वरपरस्य निर्विशेषवाद एव स्वारस्याद् नोभयलिङ्गपादस्य सविशेषवाद एव स्वारस्यम्। गुणोपसंहारपाद इति नाम तु तत्र सगुणवाक्यानामेव विशेषतो विचार इत्येव गमयति, न तु तावता ब्रह्ममीमांसाया निर्विशेषवादे विरोधशङ्कापि। फलपदं तु वृत्तिप्रतिफलितत्वमेव शूद्धचैतन्यस्य फलत्वं नाम, न तु साध्यत्वरूपमिति सूचयदद्वैतवाद एव नितरां स्वरसम्॥

यत्तु–अद्वैतवादे "असम्भवस्तु सतोऽनुपपत्तेरि" त्यनेन गतार्थत्वात् "नात्मा श्रुतेर्नित्यत्वाञ्च ताभ्यः" इति पुनरारम्भो निरर्थकः, एवम्–"कर्ता शास्त्रार्थवत्त्वादि" त्यादिनाऽऽत्मनः कर्तृत्वादिसमर्थनं न सम्प्रतमिति शतदूषण्यामुक्तम्, तत्रेदमेवाद्वैतिनो मन्यन्ते–यत् सतोऽनुत्पत्तौ साधितायां सत्यमात्मनोऽप्यनुत्पत्तिः सिद्ध्यति; तथाप्यहमर्थमात्मानं मत्वा तस्योत्पत्तिसम्भवेऽहमुत्पन्न इत्याद्यध्यक्षेण शङ्क्यमाने तेनैव सतोऽप्युत्पत्तिराशङ्कितप्रायेति सत एवाशङ्कान्तरनिराकरणेनानुत्पत्तिसाधनार्थमेव "नात्मा श्रुतेरि" त्यधिकरणम्, येन नात्माऽहमर्थः, येन प्रत्यक्षेण तदुत्पत्तिराशङ्क्येत, किन्तु श्रुत्येकसमधिगम्यचैतन्यमात्रमेवात्मा, य एव। "सदेवे" त्यादिवाक्ये सत्पदार्थोऽपीति तस्य श्रुत्या नित्य –त्वव्यवस्थापनाद्र नोक्तस्याक्षेपस्यावसर इति न "नात्मा श्रुतेरि" त्यधिकरणान्तरारम्भनैरर्थक्यम् अहमर्थानात्मत्ववादोऽप्येतदधिकरणमूल एव। एतेन–"कर्ता शास्त्रार्थवत्त्वादि" त्याद्यधिकरणान्यपि व्याख्यातानि; तेषागहमर्थजीवविषयत्वात्। तथाच शुद्धचैतन्यमात्रदृष्ट्याऽऽत्मनित्यत्वम्, विशिष्टचैतन्यदृष्ट्या कर्तृत्वादिव्यवस्थाविशेषमात्रदृष्ट्या चानित्यत्वादिकमिति चराचरव्यपाश्रयस्त्वित्यधिकरणमिति। तथाच त्वम्पदार्थविशेष्य विशेषण विशिष्टधर्माणां विचार एवाविरोधप्रसङ्गेन द्वितीयद्वितीयपादार्थ इति न कोऽपि विरोधोऽद्वैतमते। शतदूषणीकारमते तु ब्रह्मजिज्ञासायां प्रतिज्ञातायामात्मानुत्पत्तितत्कर्तृत्वादिविचारः कथमपि नोपयुज्यते, इति सर्वाणीमान्यधिकरणानि वितथानि। समष्टिस्वरूपं सगुणमिव ब्रह्म व्यष्टिरूपं सगुणं जीवस्वरूपमति त्वम्पदलक्ष्यार्थनिर्णये परम्परयोपकरिष्यतीति तु ब्रह्मजिज्ञासायामपि प्रतिज्ञातायां

जीवजिज्ञासाऽपि नानुपपन्ना। यथाच नस्थानतोऽपीत्याद्यधिकरणान्यद्वैतवाद एव स्वरसानि, तथाऽन्यत्र व्यक्तमिति दिक्॥

सर्वथा तु वेदान्तवाक्यानां समन्वयो निर्विशेष एव ब्रह्मणि; यतः सद्विद्या संक्षिप्तविचारोपसंहारे, आनन्दमयविद्या विस्तृतविचारोपक्रमे, प्रतर्दनविद्या च प्रथमपादोपसंहारे, आनन्दमयमीमांसैव प्रथमपादमध्यमापीत्युपक्रममध्यपरामर्शोपसंहारास्तदनुकूला एवेत्याद्यन्यत्र विस्तृतम्॥

अद्वैतिनो हि ब्रह्मणः स्वप्रकाशतया न तद्बोधनार्थं शास्त्रम्; किन्तु कल्पिततद्गतसामान्याद्याकारतत्प्रयोजकाज्ञानादिनिरासकाखण्डाकारवृत्तिजननार्थमेव तदित्येव मन्यन्ते। तथाच ब्रह्मशब्दप्रवृत्त्यादीनां सगुणब्रह्मण्येव मतान्तरेष्विव मुख्यत्वेऽपि न लक्षणयाऽखण्डब्रह्ममात्रबोधानुपपत्तिः। एतेन–निर्विशेषब्रह्मवादे ब्रह्मशब्दस्य क्वचिन्मुख्यवृत्तत्वमस्ति वा, न वा। न चेत्, असाधुत्वापत्तिः। मुख्यार्थशून्यस्य तन्मूलवृत्त्यन्तरे लिङ्गत्वे चासम्भवति कथं क्वचिद् बोधकत्वमपि? मुख्यार्थविरहेऽपि ब्रह्मबोधकत्ववर्णनं तु वन्ध्यायाः पौत्रदर्शनमेव। मुख्यार्थसम्बन्धिन्यमुख्येऽर्थे वृत्तिर्हि लक्षणा। क्वचिन्मुख्यवृत्तत्वस्वीकारस्तु नाद्वैतमते सम्भवति; शुद्धे निर्विशेषतया तदभिमते वृंहति ब्रह्मयतीति श्रुत्युक्तनिमित्ताभावात्, उपहिते तत्सत्त्वेऽपि तत्र सार्वज्ञ्यादीनामपि विवक्षावश्यम्भावेन स्वमतसिद्ध्यभावाञ्चेति शतदूषण्यां प्रथमं दूषणमपि–अनवसरम्, मुख्यवृत्तत्वपदेन शक्तत्वविवक्षायां सगुणस्यैव मतान्तर इव शक्यत्वस्वीकाराद् न शब्दासाधुत्वम्। निर्विशेषं तु लक्ष्यमेव स्वीक्रियते, इति लक्षकशब्दान्तराणामिव नासाधुत्वप्रसङ्गः। सगुणस्यापि ब्रह्मणो निर्विशेषे कल्पितत्वस्वीकारात्तु न मुख्यार्थासम्बन्धिनि लक्षणाऽद्वैतिभिरपि मन्यते। मुख्यत्वस्य तात्पर्यविषयत्वमित्यर्थपरतायां तु निर्विशेषपरतायामेव साधुत्वम्, न सविशेषविवक्षायाम्। एतेन–स्वमतविरोधोऽप्यद्वैतमत आपादितोऽपास्तः। ''परं ब्रह्म परं धामे'' ति स्तुतिर्निर्विशेषलक्षणायां कथञ्चिदपि न सम्भवति; गुण्यवच्छिन्नगुणाभिधानरूपत्वात् तस्या'' इति तदुक्तिस्तु अविद्यमानेनाप्यर्थेन स्तुतिवादस्य ''स प्रजापतिरात्मनो वपामुदखिदत्'' ''शिखा ते वर्धते वत्स गुडूर्ची श्रद्धया पिबे'' त्यादौ वेदे लोके च बहुशो दर्शनाद् न विकल्पसहा। ब्रह्मणोऽज्ञेयत्वोक्तयस्तु तस्य घटादेरिव वृत्त्यभिव्यक्तचैतन्याभास्यत्वमेवाभिप्रयन्ति, न तु केवलवृत्तिव्याप्यत्वमपीति जिज्ञासानुपपत्तिवादोऽपि द्वितीयः शतदूषणीगतो नावसरति। एतदभिप्रायमेव ''प्रतिबोधविदितं मतमि'' त्यादिवाक्यजातम्॥४२॥ ॥४३॥ इति त्रयोदशं सुषुप्त्युत्क्रान्त्यधिकरणम्॥

इति शारीरकमीमांसाभाष्यटिप्पणे प्रदीपे प्रथमाध्यायस्य तृतीयः पादः॥

इति प्रदीपः सुषुप्त्युत्क्रान्तधिकरणम् समाप्तम्

भामती

आदिमध्यावसानेषु संसारिप्रतिपादनात्।
तत्परे ग्रन्थसन्दर्भे सर्वं तत्रैव योज्यते॥

संसार्य्यैव तावदात्माऽहङ्कारास्पदं प्राणादिपरीतः सर्वजनसिद्धः। तमेव च योऽयं विज्ञानमयः प्राणेष्वित्यादिश्रुतिसन्दर्भ आदिमध्यावसानेष्वामृशतीति तदनुवादपरो भवितुमर्हति। एवं च संसार्य्यात्मैव कञ्चिदपेक्ष्य महान्, संसारस्य चानादित्वेनानादित्वादज उच्यते, न तु तदतिरिक्तः कश्चिदत्र नित्यशुद्धवुद्धमुक्तस्वभावः प्रतिपाद्यः। यत्तु सषुप्त्युत्क्रान्त्योः प्राज्ञेनात्मना संपरिष्वक्त इति भेदं मन्यसे, नासौ भेदः, किन्त्वयमात्मशब्दः स्वभाववचनस्तेन सुषुप्त्युत्क्रन्त्यवस्थायां विशेषविषयाभावात्संपिण्डितप्रज्ञेन प्राज्ञेनात्म्ना स्वभावेन परिष्वक्तो न किञ्चिद्वेदेत्यभेदेऽपि भेदवदुपचारेण योजनोयम्। यथाहुः–प्राज्ञः संपिण्डितप्रज्ञः' इति। पत्यादयश्च शब्दाः कार्यकरणसङ्घातात्मकस्य जगतो जीवकर्मार्जिततया तद्भोग्यतया च योजनीयाः तस्मात्संसार्य्येवानूद्यते न तु परमात्मा प्रतिपाद्यत इति प्राप्तम्।

एवं प्राप्त उच्यते 'सुषुप्त्युत्क्रान्त्योर्भेदेन' व्यपदेशादित्यनुवर्त्तते। अयमभिसन्धिः–किं संसारिणोऽन्यः परमात्मा नास्ति, तस्मात् संसार्य्यात्मपरं योऽयं विज्ञानमयः प्राणेष्विति वाक्यम्? आहोस्विदिह संसारिव्यतिरेकण परमात्मनोऽसङ्कीर्त्तनात्संसारिणश्चादिमध्यावसानेष्व-मर्शात्संसार्य्यात्मपरं? न तावत्संसार्य्यतिरिक्तस्य तस्याभावः तत्प्रतिपादका हि शतश आगमा ईक्षतोर्नाशब्दं गतिसामान्यादित्यादिभिः सूत्रसन्दर्भैरुपपादिताः। न चात्रापि संसार्य्यतिरिक्तपरमात्मसङ्कीर्त्तनाभावः, सुषुप्त्युत्क्रान्त्योस्तत्सङ्कीर्त्तनात्। न च प्राज्ञस्य परमात्मनो जीवाद्भेदेन सङ्कीर्त्तनं सति सम्भवे राहोः शिर इतिवदौपचारिकं युक्तम्। न च प्राज्ञशब्दः प्रज्ञाप्रकर्षशालिनि निरूढवृत्तिः कथञ्चिदज्ञविषयो व्याख्यातुमुचितः। न च प्रज्ञाप्रकर्षोऽसङ्कुचदवृत्तिर्बिदितसमस्तवेदितव्यात्सर्वविदोऽन्यत्र सम्भवति। न चेत्थम्भूतो जीवात्मा,

तस्मात् सुषुप्त्युत्क्रान्त्योर्भेदेन जीवात् प्राज्ञस्य परमात्मनो व्यपदेशाद्योऽयं विज्ञानमय इत्यादिना जीवात्मानं लोकसिद्धमनूद्य तस्य परमात्मभावोऽनधिगतः प्रतिपाद्यते। न च जीवात्मानुवादमात्रपराण्येतानि वचांसिं। अनधिगतार्थावबोधरं हि शाब्दं प्रमाणं न त्वनुवादमात्रनिष्ठं भवितुमर्हति। अत एव च संसारिणः परमात्मभावविधानायादिमध्यावसानेष्वनुवाद्यतयाऽवमर्श उपपद्यते। एवं च महत्त्वं चाजत्वं च सर्वगतस्य नित्यस्यात्मनः सम्भवान्नापेक्षिकं कल्पयिष्यते। यस्तु मध्ये बुद्धान्ताद्यवस्थोपन्यासादिति नानेनावस्थावत्त्वं विवक्ष्यते। अपि त्ववस्थानामुपजनापायधर्मकत्वेन तदतिरिक्तमवस्थारहितं परमात्मानं विवक्षति *उपरितनवाक्यसन्दर्भालोचनाद् इति*।।४२।।

सर्वस्य वशी वशः सामर्थ्यं सर्वस्य जगतः प्रभवत्ययम्, व्यूहावस्थानसमर्थ इति। अत एव सर्वस्येशानः सामर्थ्येन ह्ययुक्तेन सर्वस्येष्टे तदिच्छानुविधानाज्जगतः। अत एव सर्वस्याधिपतिः सर्वस्य नियन्ताऽन्तर्यामीति यावत्। किञ्च स एवम्भूतो हृद्यन्तर्ज्योतिः पुरुषो विज्ञानमयो न साधुना कर्मणा भूयानुत्कृष्टो भवतीत्येवमाद्याः श्रुतयोऽसंसारिणं परमात्मानमेव प्रतिपादयन्ति। तस्माज्जीवात्मानं मानान्तरसिद्धमनूद्य तस्य ब्रह्मभावप्रतिपादनपरो योऽयं विज्ञानमय इत्यादिर्वाक्यसन्दर्भ इति सिद्धम्।।४३।।

इति श्रीमद्वाचस्पतिमिश्रविरचितशारीरकभगवत्पादभाष्यविभागे भामत्यां प्रथमस्याध्यायस्य तृतीयः पादः।।

इति भामती सुषुप्त्युत्क्रान्तधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ अर्थान्तरत्वादिव्यपदेशाधिकरणम्॥११॥

॥सू०॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात्॥४२॥

छान्दोग्ये श्रूयतेऽस्य विषयः–'आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा' इति॥

अत्र नामरूपयोर्निर्वोढृत्वेन श्रूयमाणः स आकाशः परमेश्वरो वियद्वा जीवो वेति संशयः॥

सर्वश्रूतावकाशप्रदानेन नामरूपनिर्वोढृत्वस्य वियति संभवात् वियदिहाकाशः। अथवा जीवः, 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति तस्य नामरूपव्याकरणसंबन्धदर्शनात्॥

इत्येवं प्राप्ते ब्रूमः–परमेश्वर एवात्राकाशशब्देन नामरूपनिर्वोढा श्रूयते, अमृतत्वादितद्धर्मव्यपदेशात्। न ह्याकाशेऽमृतत्वादिकं संभवति जीवे वा। अतः परमेश्वर एवाकाशः॥

ननु 'तत्त्वमसि' इत्यादिनैक्यव्यपदेशान्न प्रत्यगात्मनोऽर्थान्तरश्रूतः परमेश्वरोऽस्तीत्याशङ्क्याह–

॥सू॥ सुषुप्त्युत्क्रान्त्योर्भेदेन॥४३॥

'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किं चन वेद नान्तरं' 'प्राज्ञेनात्मनाऽन्व रूढ उत्सृजन् याति' इति सुषुप्त्युत्क्रान्त्योः बाह्यान्तरविषयज्ञानशून्यात् जीवात् तदानीमेव प्राज्ञतया भेदेन व्यपदेशात् जीवादर्थान्तरश्रूतः परमेश्वरोऽस्ति। स एवात्राकाशशब्दवाच्यः॥

॥सू॥ पत्यादिशब्देभ्यः॥४४॥

परिष्वञ्जके प्राज्ञे श्रूयमाणेभ्यः पत्यादिशब्देभ्यश्च अयमन्य एव जीवादित्यवगम्यते। 'स सर्वस्य

वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः' इत्यादिकमुत्तरत्र हि श्रूयते। 'पशूनां पतये....वृक्षाणां पतये' इत्यादिभिश्च परमेश्वरस्य जगदाधिपत्यं प्रसिद्धं, न कुत्रापि जीवस्य। तस्मादयं जीवादन्यः परमेश्वर एवात्राकाशशब्दवाच्यः।। इत्यर्थान्तरत्वादिव्यपदेशाधिकरणम्।।११।।

इति श्रीकण्ठाचार्यविरचिते ब्रह्ममीमांसाभाष्ये प्रथमस्याध्यायस्य तृतीयः पादः।।

इति श्री कण्ठभाष्य सुषुप्त्युत्क्रान्तधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अत्र प्रजापतिविद्यागतेन वाक्येन विद्वान् देहादुत्क्रान्तस्सन्यदुपसम्पद्यापहतपाप्मत्वादि-स्वरूपेणाविर्भवतीत्युच्यते तत् परं ज्योतिः नारायणः परमेश्वरो वेत्युत्तमपुरुषशब्दनिरूढियोगाभ्यां संशयं दर्शयति—**मुक्तप्राप्यतयेति।** 'उत्तमः पुरुष' इति वाक्यं तावत् पुरुषोत्तमशब्दासाधारणयौगिकार्थप्रतिपादकतया निरूढमिह मुक्तप्राप्ये परस्मिन् ज्योतिषि प्रयुक्तं तस्य पुरुषोतमस्य शब्दविषयतामवगमयतीति तदवगमितस्य पुरुषोत्तमशब्दस्य रूढ्या मुक्तप्राप्यपरंज्योतिर्नारायण इत्यवसीयते। अत एव गीतासु 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरस्सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते' इति श्लोके पुरुषशब्दाभिधेयतया प्रसिद्धं जीवजातं क्षराक्षरशब्दोक्तसंसार्यसंसारिरूपेण द्वेधा विभज्य 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वर' इति श्लोकेन द्विविधादपि जीवजातादुत्कृष्टं तदुभयनियामकमन्यपुरुषं पुरुषोत्तमपदयौगिकार्थप्रतिपादकेन 'उत्तमः पुरुष' इति वाक्येन निर्दिश्य स क इति जिज्ञासायां 'यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः। अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति श्लोकेन लोकवेदयोः पुरुषोत्तमपदवाच्यतया प्रसिद्धोऽहमेव स उत्तमः पुरुष इति भगवतोपदिष्टमिति भावः। एवं च यद्यपि दहरविद्यादिषु परमेश्वर एवोपास्यः स्यात् तथापि तत्तद्विद्याप्रकरणे 'य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणभिनिष्पद्यते एष आत्मेति होवाचे'ति 'परात्परं पुरुषमुपैति दिव्यं' 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद'मित्यादिवाक्येषु तत्तद्विद्यानिष्ठैः प्राप्यतया प्रतिपाद्यमानं परं ज्योतिः परमपुरुषादिशब्दितो नारायण एवेति तात्पर्यम्। 'नारायणः परं ब्रह्मे'ति तस्य मुक्तप्राप्यत्वमुच्यते उत तस्य परब्रह्मणोऽन्यत्वेऽपि पुरुषोत्तमशब्दरूढिबलात्तदुच्यते। नाद्यः। जन्माद्यधिकरणशारीराधि-करणादिषु शिव एव परं ब्रह्म नारायणस्तु तदीयचिच्छक्तिमहाविभूतिरिति निपुणतरं व्यवस्थापितत्वात् इत्यभिप्रेत्य द्वितीयपक्षपर्यवसितं पूर्वपक्षमापाद्य सिद्धान्तयति—**इति प्राप्त इति।** ननु नारायणं प्राप्तानामप्यावृत्तिर्नास्ति। आनुशासनिकपर्वण्युमामहेश्वरसंवादे 'सायुज्यानां विशिष्टे द्वे

मामकं वैष्णवं तथा। मां प्राप्य न निवर्तन्ते विष्णुं वा शुभलोचने।' इति शिववचनादिति चेत्। सत्यम्। तत्रैव 'धर्मान्वेषी तपः कर्तुं यतेत सततं प्रिये। अमरत्वं शिवत्वं च तपसा चाप्नुयान्नर' इति प्राचीनश्लोके मुक्तयर्थेन शिवत्वमितिशब्देन मुक्तेश्शिवसायुज्यरूपतया विष्णुतत्त्वेन तस्य वचनस्य विष्णुप्रतीकशिवोपासनया प्रथमं विष्णुसायुज्यं प्राप्तानां क्रमेण शिवपदप्राप्त्या स्वरूपाविर्भावे सत्यनावृत्तिर्भवतीत्येवंपरत्वात्। यथाकथञ्चित् नारायणं प्राप्तानामनावृत्तौ 'अनावृत्तिदर्शना' दिति हेतुरनैकान्तिक एवेति चेत्। एवं तर्हि तत्र हेतावनावृत्तिपदमावृत्तिविरोध्यपहतपाप्मत्वाद्याविर्भावपरं ब्रूमः। स एव हि ज्योतिर्वाक्ये दृश्यते 'स्वेन रूपेणाभिनिष्पद्यत' इति। अनावृत्तिस्तु निश्शेषनिवृत्तमलावरणानां निर्धूतनिखिलपुण्यपापानामाविर्भूतस्वरूपाणामावृत्तिकारणाभावेनार्थाल्लभ्यते। तथा चावृत्तिविरोध्यपहतपाप्मत्वाद्याविर्भावदर्शनादिति हेतुर्नानैकान्तिकः। पूर्वपक्षहेतुमन्यथाकरोति–पुरुषोत्तमशब्द इति। प्रबलापि तस्य रूढिरनन्यथासिद्धलिङ्गविरोधात् बाध्येति ब्रह्मणि तस्य योग एवाश्रयणीय इति भावः। पुरुषोत्तमशब्दस्यान्यत्र योगेन परब्रह्मणि शिवे प्रयोगोदाहरणव्याजेन तत्रापि पुरुषोत्तमशब्दस्य शिवपरत्वमेवेति दर्शयति–**ब्रह्ममेधकल्प इति।** आपस्तम्बसूत्रे 'हौत्रं च पितृमेघं च संसृज्य विधिरुत्तर' इति पितृमेधे 'ब्रह्म वै चतुर्होतार' इति परब्रह्मत्वेन स्तुतानां 'चित्तिस्रुगि' त्यादिमन्त्राणां हौत्रशब्दोक्तानां संसर्गेण लब्धविशेषस्य ब्रह्मविदामेव पित्रादीनां मृतौ कर्तव्यस्य ब्रह्ममेधाचयसंस्कारस्य प्रतिपादने 'वेष्टितुं पुरुषोत्तममिति तदुचितं मुक्तिफलं प्रतिपादितम्। तत्रापि पुरुषोत्तमशब्दः केवलं यौगिक एवाश्रयणीय इत्याशयः। नन्वत्र विषयवाक्ये पुरुषोत्तमशब्दो न श्रूयते। श्रूयमाणस्य तु 'उत्तमः पुरुष' इति शब्दस्य नारायणे रूढिरस्तु। तस्मादिहोत्तमः पुरुष इति शब्दविषयत्वलिङ्गेन मुक्तप्राप्यस्य ज्योतिषः पुरुषोत्तमशब्दविषयत्वानुमाने प्रसक्ते तदनुत्थानमात्रमनन्यथासिद्धलिङ्गविरोधेन वक्तव्यमिति चेत् सत्यम्। इह पुरुषोत्तशब्दः श्रूयत इति कृत्वाचिन्तयेदमुक्तम्। कृत्वाचिन्तायास्तु फलमिदं यत्पूर्वपक्षोपोद्बलकत्वेन पूर्वपक्षदशायां भाष्याभिप्रेतस्य गीतासू'त्तमः पुरुष' इति शब्दविषय एव प्रयुक्तस्य पुरुषोत्तमशब्दस्य रूढिं परित्यज्य योगेन परमशिवे ब्रह्मणि वर्तनम्। नन्व'तोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम' इति कृष्णेन स्वस्मिन्नेव पुरुषोत्तमशब्दप्रवृत्तिर्दर्शिता। तत्र तस्यानूदिता लौकिकी प्रसिद्धिश्च तत्रैवास्ति। 'देवकीनन्दनश्शौरिः श्रीपतिः पुरुषोत्तमः'। 'हरिर्यथैकः पुरुषोत्तमः स्मृतः' 'महेश्वरस्त्र्यम्बक एव नापरः' इति कथं तस्य शिवे वर्तनमुपपादयितुं शक्यम्। इत्थम् अध्यायादा 'वूर्ध्वमूलमधश्शाखमश्वत्थं प्राहुरव्यय' मित्यादिना संसारवृक्षं परिकीर्त्य 'ततः परं तत्परिमार्गितव्यं यस्मिन्गता न विवर्तन्ति भूय' इति संसारमण्डलातीतमप्राकृतदिव्यपदे स्थितं परं ब्रह्मानावृत्तिफलसिद्धये समुपासनीयमित्युक्त्वा 'तमेव चाद्यं पुरुषं प्रपद्य' इति भगवान् कृष्णः तमेवादिमं सर्वोत्तमं पुरुषमहमप्युपास इति बभाण। स चोपास्य उत्तमः पुरुषः परमशिव इति

स्पष्टीचकार। 'यतः प्रवृत्तिः प्रसृता पुराणी'ति चतुर्थपादेन 'प्रज्ञा च तस्मात्प्रसृता पुराणी'ति श्वेताश्वतरमन्त्रभागसमानार्थेन पारमेश्वरी शक्तिर्ज्ञानशक्तिरूपत्वात्प्रज्ञेतिक्रियाशक्तिरूपत्वात्प्रवृत्तिरिति च व्यपदेशमर्हति। एवं मुमुक्षूणां कृष्णस्य चोपास्यत्वेनोक्तः परमशिवाख्यस्सर्वोत्तमः पुरुष एव क्षराक्षररूपोत्तमत्वप्रतियोगिनिर्देशपूर्वक'मुत्तमः पुरुषस्त्वन्य' इति श्लोकेन वर्णितः। तद्विषय एव प्रवर्तमानो यस्मात्क्षरमतीतोऽहमिति तदनन्तर श्लोकः कथं परमशिवविषयो न स्यात्। तद्विषयत्वेऽपि तदभेदभावनादाढर्येन 'शास्त्रदृष्टया तूपदेशो वामदेववदि'ति न्यायात् 'पुरुषोत्तमः प्रथितोऽस्मी'ति कृष्णवचनं लोकवेदप्रसिद्धिश्चेत्युपपन्नम्। अत एवाहुः-'ब्रह्मोच्यते परमसौ परमं च तत्त्वं ज्योतिः परं च परमेश्वर पद्मनाभः। त्वद्भावनैकरसिकस्त्वदनन्यभावान्मन्त्री यथा गरुडभावनया गरुत्मानि'ति। तस्मान्मुक्तप्राप्यं परं ज्योतिः परमेश्वराख्यं परं ब्रह्मैवेत्युपसंहरति-**अत इति**। नन्वस्याधिकरणस्य कथं स्पष्टास्पष्टब्रह्मलिङ्गता। न हि प्रजापतिविद्यायामवस्थात्रययुक्तं तद्विविक्तं च जीवस्वरूपं प्रतिपादयन्त्यां ब्रह्मलिङ्गानि सन्ति। येषां पूर्वपक्षदशायां मुक्तप्राप्यात्परज्योतिषोऽन्यत्रान्वयेन परज्योतिरन्वयोऽस्पष्ट इति स्पष्टास्पष्टब्रह्मलिङ्गतोच्येत। मुक्तप्राप्यत्वं च ब्रह्मधर्मत्वेन शङ्क्यमानं नास्मिन्नधिकरणे स्पष्टं ब्रह्मलिङ्गमिति चेत् उच्यते। 'यदेवैष सम्प्रसाद'इत्यादिवाक्यं प्रजापतिविद्यायां पठ्यते। तदेव दहरविद्यायामपि पठ्यते। तत्र स उत्तमः पुरुष इति पूर्वपक्षलिङ्गं नास्तीति परं तदिह नोदाहृतम्। तथा च प्रजापतिविद्यायां 'परं ज्योति'रित्यस्य नारायणपरत्वे दहरविद्यायामपि तन्नारायणपरमेव पर्यवस्यतीति तस्यां श्रूयमाणानामपहतपाप्मत्वादीनां स्पष्टब्रह्मलिङ्गानां परज्योतिषोऽन्यत्रैवान्वय इति स्पष्टास्पष्टब्रह्मलिङ्गता। इति ज्योतिरधिकरणम्॥१०॥

अथ अर्थान्तरत्वादिव्यपदेशाधिकरणम्॥११॥

प्रजापतिविद्यान्तर्गतवाक्यार्थनिर्णयानन्तरं प्रजापतिविद्यानन्तरपठिताकाशवाक्यार्थनिर्णयार्थमधिकरणान्तरमारभ्यते-सू॥ **आकाशोऽर्थान्तरत्वादिव्यपदेशात्॥४२॥** यद्यस्मिन्विषयवाक्ये नामरूपनिर्वोढुराकाशस्य नामरूपमध्यस्थात् ब्रह्मणोऽन्यत्वप्रतीतिः तदा निर्वोढृत्वमाधारत्वं चेदयमाकाशो जगदाधारो भूताकाशः व्याकर्तृत्वं चेदिन्द्रादिनामरूपव्याकर्ता हिरण्यगर्भजीवस्तस्य ततो यदि भेदप्रतीतिर्नास्ति तदा परमेश्वर इति त्रिकोटिकसंशयोपपत्तिः। आद्यकोटावाकाशं विचिन्त्य तत्कर्तृकसकलनामरूपास्पृष्टत्वेन तृतीयकोटौ सकलनामरूपनिर्वोढृत्वेन निर्वाह्यसकलनामरूपमध्यस्थत्वेन च तस्योपासनेति फलभेदः। क्रमेण पूर्वपक्षद्वयमुपपादयति-**सर्वभूतेत्यादिना**। वियदाकाशः आकाशश्रुत्यनुग्रहात् अवकाशप्रदायके तस्मिन्नामरूपवोढृत्वश्रवणोपपत्तेरित्याद्यः पूर्वपक्षः। नन्वाकाशशब्दस्य ब्रह्मण्यपि प्रसिद्धिरस्ति सर्वलोकगतिवाक्यादिषु। तत्र सर्वभूतकारणत्वादीनि बलवन्ति वाक्यशेषे ब्रह्मप्रकरणादीनि सन्ति चेदिहापि सन्त्येव वाक्यशेषे

ब्रह्मात्मश्रुत्यमृतत्वलिङ्गानीत्याशङ्क्याह–**इहेति।** अयमाशयः। अन्यत्राकाशशब्दस्य ब्रह्मविषयत्वकल्पनेऽपि नेह तथा कल्पयितुं शक्यम्। 'वैनामे'ति निपातसमुदायद्योतितप्रसिद्धिरूपाकाशविशेषणस्याप्रसिद्धाकाशरूपब्रह्मव्यावृत्त्येकफलकत्वात्। न हि ब्रह्म वेदप्रतिपन्नत्वेऽपि क्वचिद्वेदभागे निरूढ्याकाशशब्दविषयत्वेऽपि भूताकाशवत् स्वरूपेणाकाशशब्दविषयत्वेन वा लोकवेदयोः प्रसिद्धम्। 'सर्वाणि ह वा इमानि भूतानी' त्यत्र तु 'ह वै' शब्दद्योतितप्रसिद्धे नाकाशे धर्मिण्यन्वयः। किं तु सर्वजगत्कारणत्वरूपे तद्धर्मे। तस्य धर्मस्य लोके प्रसिद्धिर्नास्तीति केवलं ब्रह्मविषया वैदिक्येव प्रसिद्धिर्ग्राह्या। सा सिद्धान्ते उपयुज्यते। इह प्रसिद्धेर्धर्मिण्यन्वयः। सा तु भूताकाशविषयिणी लोकवेदसिद्धा ग्राह्या। न तु ब्रह्मविषयिणी केवलवेदप्रसिद्धा। सार्वत्रिकप्रसिद्धिमपेक्ष्य क्वाचित्कप्रसिद्धेरप्रसिद्धिरूपत्वात्। तस्मादप्रसिद्धाकाशव्यावर्तनैकप्रयोजनकेन प्रसिद्धिविशेषणेन भूताकाश एवात्राकाशश्रुतिर्नियम्यते। यत्तु वाक्यशेषे ब्रह्मात्मश्रुत्यमृतत्वलिङ्गग्रहणं न तन्नामरूपयोर्निर्वोढर्याकाशेऽन्वेति। किं तु तयोम धस्थत्वेन लक्ष्यमाणे वस्तुनि। न च तयोरभेदः। नामरूपनिर्वोढृत्वेनाकाशमुक्त्वा तदनन्तरं नामरूपमध्यवर्तित्वेन किञ्चिद्वस्तु लक्षयित्वा तत्र तत् ब्रह्मेति शब्दान्तरप्रयोगेणाकाश इति यदिति च लिङ्गभेदनिर्देशेन च तयोर्भेदप्रतीतेः। 'देवदत्तः खलु महान् पोषकश्चैत्रमैत्रयोः। या तयोर्वर्तते मध्ये सा मैत्रीति प्रतीयता'मित्यत्र हि मैत्रदेवदत्तयोः स्पष्टं भेदः प्रतीयते। 'यस्तयोर्वर्तते मध्ये यज्ञदत्तस्स बुध्यता'मिति लिङ्गाभेदेन पाठेऽपि देवदत्तयज्ञदत्तयोर्भेदः प्रतीयत इति। वियत्त्विह नाकाशः। किं तु हिरण्यगर्भजीवः। नामरूपनिर्वोढृत्वश्रवणात्। निर्वोढृत्वं हि कर्तृत्वं न तु वोढृत्वम्। निरुपसृष्टस्य वहतेः कतेरिप्रत्ययः। नामरूपव्याकर्तृत्वस्य परब्रह्महिरण्यगर्भसाधारणत्वेऽपि अत्र परब्रह्मणोऽन्यत्वेन निश्चिते श्रूयमाणस्य तस्य हिरण्यगर्भलिङ्गत्वपर्यवसानात् तदनुसारेणाकाशश्रुतेस्सर्वज्ञे तस्मिन्नसङ्कुचितप्रकाशत्वयोगेन वृत्त्युपपत्तेः। लिङ्गतश्श्रुतेस्स्वतो बलीयस्त्वेऽपि पूर्वत्र 'ब्रह्मलोकमभिसम्भवितास्मी'त्युत्तरत्र प्रजापतेस्सभां वेश्म प्रपद्ये इति हिरण्यगर्भसन्निधिना हिरण्यगर्भलोकप्राप्त्यभिसन्धिलिङ्गेन च सन्दष्टलिङ्गस्यात्र श्रुतितः प्रबलत्वात्। न च 'प्रजापतेस्सभा'मित्यत्र प्रजापतिशब्दस्य नारायणपरत्वं। 'न च कार्ये प्रत्यभिसन्धि'रिति (ब्र.४.३.१३) सूत्रेण वक्ष्यत इति शङ्कनीयम्। 'कार्यं बादरि' रित्यधिकरणस्य द्वितीयपूर्वपक्षे कल्पे सा वक्ष्यन्ते। सिद्धान्ते तस्य हिरण्यगर्भपरत्वे को दोषः। अत्र नामरूपमध्यस्थब्रह्मोपासनायां नामरूपनिर्वोढृहिरण्यगर्भस्योपासनमङ्गमिति तदङ्गकब्रह्मोपासनायास्तल्लोकप्राप्तिरवान्तरफलमित्युपपत्तेः। तस्माद्धिरण्यगर्भजीव एवात्राकाश इति द्वितीयः पूर्वपक्षः। नन्वयं पूर्वपक्षो नोपपद्यते। आकाश इति हिरण्यगर्भस्य क्वचिदपि प्रसिद्धेरभावेन प्रसिद्धिविशेषणविरोधादित्याशङ्क्याह--**अनेन जीवेनेति।** अयमाशयः। 'वैनामे'ति निपातसमुदायो नाकाशशब्दस्य तेन रूपेण प्रसिद्धिद्योतकः। किं

तु नामरूपनिर्वोढृत्वरूपविधेयवत्त्वेन तथैव व्युत्पत्तेः। न हि 'देवदत्तः खलु विद्वा'नित्युक्ते यः प्रसिद्धो देवदत्तः स विद्वानिति प्रतीयते। किं तु विधेयस्य विद्वत्त्वस्यैव प्रसिद्धिः प्रतीयते। एवं च यत्र नामरूपव्याकर्तृत्वं प्रसिद्धं स एव परमेश्वरादन्यः आकाशशब्दविषय इति सिद्धावनेन जीवेनेत्यादिश्रुतौ हिरण्यगर्भस्य नामरूपव्याकर्तृत्वप्रसिद्धेस्स एवात्राकाशशब्दविषयः पर्यवस्यतीति। यद्यप्य'नेन जीवेने'ति श्रुतिः परमेश्वरस्य नामरूपव्याकरणकर्तृत्वं प्रतिपादयति न तु हिरण्यगर्भस्य। तथैव संज्ञामूर्तिकलृप्त्यधिकरणे स्थापयिष्यमाणत्वात्। तथा च हिरण्यगर्भस्य व्याकर्तृत्वप्रतिपादकं 'वेदे नामरूपे व्याकरोत्' 'सर्वेषां च स नामानी' त्यादिश्रुतिवचनजातमत्रोदाहरणीयम्। तथापि तेन यन्नामरूपव्याकरणं हिरण्यगर्भकर्तृकं प्रतिपाद्यते तत्रैव परमेश्वरस्य कर्तृत्व 'मनेन जीवेने' त्यादिवाक्येन प्रतिपाद्यत इत्युभयत्रापि व्याकर्तृभेदेऽपि व्याकर्तव्यमभिन्नमिति ज्ञापनाय तस्मिन्नुदाहरणीयेऽप्यनेनेत्यादिवाक्यमुदाहृतम्। तथा हि-हिरण्यगर्भविषयेन वाक्यजातेन ब्रह्माण्डान्तर्वर्तिदेवादिनामरूपगोचरं व्याकर्तृत्वं हिरण्यगर्भस्य प्रतिपाद्यते। तद्गोचरमेव च तदनेन जीवेनेत्यादिवाक्येन परमेश्वरस्य प्रतिपाद्यते। अनेन हि वाक्येन परमेश्वरस्य सकलनामरूपव्याकर्तृत्वं न प्रतिपाद्यते किं तु आकाशादिषु भूतेषु सदाशिवादिभिरधिष्ठातृभिस्सह सृष्टेषु त्रिवृत्करणेन ब्रह्माण्डसृष्टिपूर्वकं तदन्तर्वर्तिदेवादिनामरूपव्याकर्तृत्वं प्रतिपाद्यते। तेजोऽबन्नानां सृष्टिमभिधाय 'हन्ताहमिमास्तिस्त्रो देवता' इत्यनुक्रमात्। एव 'मनेन जीवेने'ति वाक्योपात्तव्याकर्तव्यस्य हिरण्यगर्भव्याकर्तव्यैक्यज्ञापनस्य प्रयोजनं सिद्धान्ते स्पष्टीभविष्यति। एवं प्राप्ते पूर्वपक्षे सिद्धान्तप्रतिज्ञापूर्वकं सूत्रहेतुं व्याचष्टे-**अमृतत्वादीति।** इहाकाशः परमेश्वर इति साध्ये नामरूपनिर्वोढृत्वं न हेतुः। तस्य निपातद्योतितप्रसिद्धिविशेषणानुरोधा 'दनेन जीवेने'ति श्रुत्युक्तहिरण्यगर्भव्याकर्तव्यनामरूपमात्रगोचरव्याकर्तृत्वरूपतया हिरण्यगर्भसाधारणत्वात्। नापि 'ते यदन्तरे'त्युक्तं नामरूपमध्यवर्तित्वम्। तद्धि तटाकयोर्मध्ये वृक्षस्येव नामरूपयोर्मध्ये परमेश्वरस्य न वर्तनम्। तटाकयोरिव नामरूपयोर्व्यंवस्थिदेशस्थितदेशस्थितत्वाभावेन तन्मध्यावकाशस्याप्रसिद्धत्वात्। किं तु मध्यस्थस्येवान्यतरपक्षपाताभावेन तदुमयास्पृष्टत्वम् तदपि न सकलनामरूपास्पृष्टत्वम्। शिवभवादि नामभिर्नीलकण्ठत्वादिविशिष्टविग्रहैश्च नित्ययुक्ते परमेश्वरे तदभावात् किं तु व्याकर्तव्यत्वेन पूर्ववाक्यसन्निहितैतत्पदपरामृष्टैर्देवमनुष्यादिशब्दैस्तद्वाच्यरूपैर्ब्रह्माण्डान्तर्गतैस्तनु-भुवनभोगस्थानभोगोपकरणैश्चासाधारणसम्बन्धराहित्यम्। इदं तावद्धिरण्यगभसाधारणम्। तदसाधारणस्य हिरणगर्भादिनाम्नस्तद्वाच्यस्य तदसाधारणरूपस्य च तद्व्याकर्तव्यनामरूपप्रपञ्चसृष्टेः प्रागेव सिद्धत्वात्' आकाशसाधारणं च ततोऽपि प्रागेव भूतानां निष्पन्नत्वादिति शङ्काकलुषितमादिमलिङ्गद्वयं प्रथमं नोपन्यसनीयतित्यमृतत्वं प्रथममुपात्तम्। एवं चाग्रे स्फुटतरब्रह्मलिङ्गदर्शनात् पूर्वे अपि ब्रह्मलिङ्गभूते एव ग्राह्ये। नामरूपनिर्वोढृत्वमात्रस्य साधारणत्वेऽपि

हि निरपेक्षं तत् ब्रह्मासाधारणम्। सापेक्षनिरपेक्षयोश्च निरपक्षं ग्रहीतुमुचितम्। 'ते यदन्तरे' त्येदपि यस्य मध्ये ते नामरूपे वर्तेते यदाधारकोऽयं नामरूपप्रप्रञ्च इति व्याख्याने तदसाधारणम्। न च यत्रावधिद्वयनिर्देशः अवधिद्वयानाक्रान्तश्च मध्यदेशोऽस्ति तत्रैवान्तरेति शब्दप्रयोग इति नियमः। सूत्रवार्तिकादिषु विशेषवचनाभावात्। तदभावेऽपि 'ततः खड्गं समुद्यम्य रावणः क्रूरविग्रहः। वैदेहीमन्तरा क्रुद्धः क्षणमूचे विनिश्वसन्नि'ति भट्टिकाव्ये अन्तराशब्दप्रयोगदर्शनाञ्च। तथा नियमसद्भावेऽपि यस्यान्तरे यदन्तर्गते ते नामरूपे इत्यस्मिन्नर्थे अन्तरशब्दादन्तस्स्थितवाचिनः प्रथमाद्विवचनस्य 'सुपां सुलुगि' त्यादिसूत्रत आकारादेशोपपत्तेरित्यभिप्रेत्य तयोरपि ग्रहणार्थमादिशब्दः कृतः। पूर्वपठितयोरपि वैवक्षिकं क्रममाश्रित्यादिशब्देन ग्रहणं युक्तम्। न हि 'दिवादिभ्यः श्य'न्नि त्यादाविव पाठक्रम एवाश्रयणीय इत्यत्र निर्बन्धोऽस्ति। न चात्रामृतत्वानन्तरं पठितं लिङ्गमस्ति। क्रमश्रुतिर्हि तदनन्तरं श्रूयते। अथ वात्रापि पाठक्रममाश्रयिष्यामः। अमृतत्वरूपब्रह्मलिङ्गसन्निधिमनपेक्ष्यैव सापेक्षनिरपेक्षन्यायादिमात्रेण नामरूपनिर्वोढृत्वादे-र्ब्रह्मलिङ्गतोन्मेषमभ्युपगमिष्यामः। अत्र पक्षे आत्मश्रुत्युपस्थापितमात्मत्वलिङ्गमादिपदेन ग्राह्यम्। यत्र ह्यभिधानश्रुतिः प्रमाणं तत्र तत्प्रवृत्तिनिमित्तभूतं लिङ्गमपि प्रमाणं भवत्येव। अत एव 'शब्दादेव प्रमित' इति (ब्र० १.३.२३) सूत्रे आस्तामीशानश्रुत्युपस्थापितमैश्वर्यलिङ्गमीशानशब्दरूपा श्रुतिरेव तावदङ्गुष्ठप्रमितस्य परमेश्वरत्वमवगमयितुं पर्याप्तमित्यभिप्राय एवकारः प्रयुक्तः। एवं चामृतत्वादिशब्देन तद्गुणसंविज्ञानबहुव्रीहिमाश्रित्यामृतत्वात्मत्वे ग्राह्ये। अमृतत्वस्यादय इति तत्पुरुषमाश्रित्य नामरूपनिर्वोढृत्वं तदाधारत्वं ब्रह्मश्रुत्युपस्थापितनिरतिशयबृहत्त्वलिङ्गं च ग्राह्यमिति बहुव्रीहितत्पुरुषयोरेकशेषः कार्यः। एवं विवक्षितेऽर्थे नायरूपनिर्वोढृत्वादिव्यपदेशा-दित्येवमृजुवाक्यप्रयोगसम्भवे किमर्थमित्थं क्लिष्टवाक्यप्रयोग इति चेत्। किमर्थमिति न विद्मः। स्वतन्त्रेच्छा महाग्रन्थकाराः क्वचित्क्वचिदेवमपि प्रयुञ्जते। यथा पाणिनिर्गाङ्कुटादिसूत्रे कुटादिभ्य इति पदं बहुव्रीहितत्पुरुषयोरेकशेषेण निष्पन्नं प्रायुङ्क्त। तत्र हि कुटादिपदं तद्गुणसंविज्ञानबहुव्रीहिणा कुटतिधातोस्तदनन्तरपठितधातूनां च यथा ग्राहकं तथा तस्मात्प्राक्पठितस्य लिखतिधातोरपि कुटस्यादिः कुटादिरिति तत्पुरुषाश्रयणेन ग्राहकम्। अन्यथा लिखतिधातोः परेषां ञ्णितां प्रत्ययानां ङिद्वद्भावविधानासिद्ध्या लिखितुमलिखदित्यादिरूपासिद्धिप्रसङ्गात्। एतेन 'देवदत्तः खलु महा' नित्यादिवाक्यच्छायापत्त्या ब्रह्माकाशयोर्भेदप्रतीतिशङ्का निरस्ता। ब्रह्माकाशशब्दयोर्द्वयोरपि ब्रह्मणि दृष्टप्रयोगत्वेन ब्रह्माकाशवाक्यद्वयेऽपि ब्रह्मलिङ्गसत्त्वेन च तदुभयाभेदप्रतीत्या वैषम्यात्। **न हीति।** यद्यप्याकाशे जीवे चामृतत्वासम्भवः स्पष्ट एव। तथाप्युक्तमर्थं सूत्रारूढं कर्त्तुं तदुक्तिः। अनेन सौत्रहेतोरित्थमर्थो दर्शितो भवति। अर्थान्तरत्वं जीवादाकाशाञ्च भिन्नत्वं तस्यादिः कारणं भेदको धर्म इति यावत्। भेदज्ञापके भेदकारणत्वोपचारादेवमुक्तिः। अर्थान्तरत्वशब्दो वा तत्प्रतीतिं लक्षयति। तथा

च जीवाकाशव्यावर्तकनामरूपनिर्वोढृत्वादिधर्मव्यपदेशादिति सौत्रस्य हेतोरर्थ इति। यद्यपि परमेश्वरे साध्ये तद्धर्मव्यपदेशादित्येव हेतूकरणीयम्। तथाप्यत्र नामरूपनिर्वोढृत्वादेर्हिरण्यगर्भादि-साधारण्यशङ्कावारणाय तद्भेदकत्वमुखेन सूत्रे तदुपन्यास इति भावः। उत्तरसूत्रमवतारयितु शङ्कते–**नन्विति।** जीवातिरिक्तपरमेश्वराभावे च जीवभेदकधर्मेण परमेश्वरत्वसाधनं विरुद्धम्। अचेतनैकान्तिकधर्मस्य जीवभेदकत्वं न सम्भवति। हेतोश्चासिद्धिरिति भावः। यद्यपि जीवातिरिक्तपरमेश्वराभावशङ्कानिराकरणं नास्मिन्नधिकरणे विशिष्योपयोगि। सर्वेष्वप्यधिकरणेषु तदुपयोगसत्त्वात्। तथापि प्रपञ्चेनैतच्छङ्कानिराकरणार्थमुत्तरः पादः प्रवर्तिष्यत इति तदुपोद्घातरूपमिदमुत्तरसूत्रद्वयं प्रवृत्तमित्याशयः।सू०।। **सुषुप्त्युत्क्रान्त्योर्भेदेन॥४३॥** सुषुप्तिविषयं सम्परिष्वक्तवाक्यम्। उत्क्रान्तिविषयमन्वारूढवाक्यम्। उत्सृजन् शरीरमित्यर्थः। **तदानीमेव प्राज्ञतयेति।** यदा जीवस्य बाह्याभ्यन्तरविषयज्ञानशून्यत्वं तदानीमेव प्रकर्षेण ज्ञातृत्वलक्षणं सर्वज्ञत्वं तस्य न सम्भवति। जीवान्तरस्यापि सर्वज्ञत्वं न सम्भवत्येव। अत उभयोर्भेदसिद्धिरिति भावः। **भेदेन व्यपदेशादिति।** अनेन 'व्यपदेशा'दिति पूर्वसूत्रतोऽनुवर्तत इति दर्शितं भवति। **जीवादर्थान्तरभूतः परमे श्वरोऽस्तीति।** इदं साध्यं हेतुसामर्थ्याल्लभ्यते।। सर्वज्ञो मुक्तात्मा परिष्वञ्जकः स्यादित्याशङ्कानिराकरणांर्थ सूत्रम्–सू०।। **पत्यादिशब्देभ्यः॥४४।** परिष्वञ्जके प्राज्ञ एवोत्तरत्र पत्यादिशब्दाः श्रूयन्त इति मुक्तात्मनोऽपि व्यतिरेकसिद्धिः। तस्य जगव्द्यापाराभावादित्यर्थः। **सर्वस्य वशीति** सर्वस्य तादधीन्यमुक्तम्। **सर्वस्येशान इति** तन्नियम्यत्वम्। **सर्वस्याधिपतिरिति** तद्रक्षणीयत्वम्। **सर्वेश्वरस्सर्वनियन्ता। भूताधिपतिर्भूतानां** रक्षकः। **भूतपालः** भूतानां पालकः। रक्षणमिष्टप्रदानमुखं पालनमनिष्टनिवारणमुखमिति भेदः। विषयवाक्ये अधिपतिशब्दे श्रूयमाणे किमर्थ 'पत्यादिशब्देभ्य' इति सूत्रितमित्याशङ्क्य बहुधा पतिशब्दाभ्यासवद्भिः श्रीरुद्रादिप्रकरणैरस्य प्रकरणस्यैकार्थ्य दर्शयितुमित्येतदुदाहरणेनाभिव्यनक्ति। **पशूनां पतय इति।** आदिशब्देन 'पतिं पतीनां परमं परस्ता' दित्यादीनि गृह्यन्ते। जीवातिरिक्तपरमेश्वराभावशङ्कानिराकरणसिद्धमधिकरणार्थमुप-संहरति–**तस्मादिति॥** ।।

इत्यर्थान्तरत्वादिव्यपदेशाधिकरणम्।।११।।

इतिश्रीशिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रतिष्ठापकश्रीमञ्चिन्नबोम्मभूपालहृदय-कमलकुहरविहरमाणश्रीसाम्बशिवप्रेरितस्य श्रीमद्भरद्वाजकुलजलधिकौस्तुभविश्वजिद्याजिश्रीरङ्गराजा-ध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणि-दीपिकाख्यायां प्रथमस्याध्यायस्य तृतीयः पादः।।१।।३।।

इति शिवार्कमणिदीपिका सुषुप्त्युत्क्रान्तधिकरणम् समाप्तम्

अथ आनुमानिकाधिकरणम्। ॥सू० १-७॥

शाङ्करभाष्यम्

***आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥१॥**

ब्रह्म जिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तम्–''जन्माद्यस्य यत'' (ब्र० १/१/२) इति। तल्लक्षणं प्रधानस्यापि समानमित्याशङ्क्य तदशब्दत्वेन निराकृतम्–''ईक्षतेर्नाशब्दम्'' (ब्र० १/१/४) इति। गतिसामान्यं च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति न प्रधानकारणवादं प्रतीति प्रपञ्चितं गतेन ग्रन्थेन॥

इदं त्विदानीमवशिष्टमाशङ्क्यते–यदुक्तं प्रधानस्याशब्दत्वम्, तदसिद्धम्; कासुचिच्छखासु प्रधानसमर्पणाभासानां शब्दानां श्रूयमाणत्वात्। अतः प्रधानस्य कारणत्वं वेदसिद्धमेव महद्भिः परमर्षिभिः कपिलप्रभृतिभिः परिगृहीतमिति प्रसज्यते; तद्यावतेषां शब्दानामन्यपरत्वं न प्रतिपाद्यते, तावत्सर्वज्ञं ब्रह्म जगतः कारणमिति प्रतिपादितमप्याकुलीभवेत्। अतस्तेषामन्यपरत्वं दर्शयितुं परः सन्दर्भः प्रवर्तते॥ आनुमानिकमपिस्यनुमाननिरूपितमपि प्रधानमेकेषां शाखिनां शब्दवदुपलभ्यते। काठके हि पठयते–''महतः परमव्यक्तमव्यक्तात्पुरुषः पर'' (१/३/११) इति। तत्र य एव यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धास्त एवेह प्रत्यभिज्ञायन्ते। तत्राव्यक्तमिति स्मृतिप्रसिद्धेः शब्दादिहीनत्वाञ्च न व्यक्तमव्यक्तमिति व्युत्पतिसम्भवात् स्मृतिप्रसिद्धं प्रधानमभिधीयते। तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नम्। तदेव च जगतः कारणं श्रुतिस्मृतिन्यायप्रसिद्धिभ्य इति चेत्?

नैतदेवम्; न ह्येतत्काठकं वाक्यं स्मृतिप्रसिद्धयोर्महदव्यक्तयोरस्तित्वपरम्। न ह्यत्र यादृशं स्मृतिप्रसिद्धं स्वतन्त्रं कारणं त्रिगुणं प्रधानम्, तादृश प्रत्यभिज्ञायते। शब्दमात्रं ह्यत्राव्यक्तमिति प्रत्यभिज्ञायते। स च शब्दो न व्यक्तमव्यक्तमिति यौगिकत्वादन्यस्मिन्नपि सूक्ष्मे सुदुर्लक्ष्ये च प्रयुज्यते। न चायं कस्मिंश्चिद्रूढः। या तु प्रधानवादिनां रूढिः, सा तेषामेव पारिभाषिकी सती न वेदार्थनिरूपणे कारणभावं प्रतिपद्यते। न च क्रममात्रसामान्यात्समानार्थप्रतिपत्तिर्भवत्यसति तद्रूपप्रत्यभिज्ञाने। न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यति। प्रकरणनिरूपणायां चात्र न परपरिकल्पितं प्रधानं प्रतीयते; शरीरं ह्यत्र रथरूपकविन्यस्तमव्यक्तशब्देन परिगृह्यते॥ कुतः? प्रकरणात्परिशेषाञ्च। तथा

ह्यनन्तरातीतो ग्रन्थ आत्मशरीरादीनां रथिरथादिरूपकक्लृप्तिं दर्शयति—"आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः।।" (का॰ १/३/२/४) इति। तैश्चेन्द्रियादिभिरसंयतैः संसारमधिगच्छति। संयतैस्त्वध्वनः पारं तद्विष्णोः परमं पदमाप्नोतीति दर्शयित्वा, किं तदध्वनः पारं विष्णोः परमं पदमित्यस्यामाकाङ्क्षायाम्, तेभ्य एव प्रकृतेभ्य इन्द्रियादिभ्यः परत्वेन परमात्मानमध्वनः पारं विष्णोः परमं पदं दर्शयति—"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः।। महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित् काष्ठा स परा गतिः।।" (का॰ १/३/१०/११) इति। तत्र य एवेन्द्रियादयः पूर्वस्यां रथरूपककल्पनायामश्वादिभावेन प्रकृतास्त एवेह परिगृह्यन्ते प्रकृतहानाप्रकृतप्रक्रियापरिहाराय। तत्रेन्द्रियमनोबुद्धयस्तावत्पूर्वत्रेह च समानशब्दा एव। अर्था ये शब्दादयो विषया इन्द्रियहयगोचरत्वेन निर्दिष्टास्ततेषां चेन्द्रियेभ्यः परत्वम्; "इन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वम्" (बृ॰ ३/२) इति श्रुतिप्रसिद्धेः। विषयेभ्यश्च मनसः परत्वम्; मनोमूलत्वाद्विषयेन्द्रियब्यवहारस्य। मनसस्तु परा बुद्धिः ; बुद्धिं ह्यारुह्य भोग्यजातं भोक्तारमुपसर्पति। बुद्धेरात्मा महान्परः यः, स "आत्मानं रथिनं विद्धि" इति रथित्वेनोपक्षिप्तः।। कुतः? आत्मशब्दात्, भोक्तुश्च भोगोपकरणात्परत्वोपपत्तेः। महत्त्वं चास्य स्वामित्वादुपपन्नम्।। अथवा—"मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः। प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठयते।।" इति स्मृतेः, "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" (श्वे॰ ६/१८) इति च श्रुतेः प्रथमजस्य हिरण्यगर्भस्य बुद्धिः, सा सर्वासां बुद्धीनां परा प्रतिष्ठा। सेह महानात्मेत्युच्यते। सा च पूर्वत्र बुद्धिग्रहणेनैव गृहीता सती हिरुगिहोपदिश्यते; तस्या अप्यस्मदीयाभ्यो बुद्धिभ्यः परत्वोपपत्तेः। एतस्मिस्तु पक्षे परमात्मविषयेणैव परेण पुरुषग्रहणेन रथिन आत्मनो ग्रहणं द्रष्टव्यम्; परमार्थतः परमात्मविज्ञानात्मनोर्भेदाभावात्। तदेवं शरीरमेवैकं परिशिष्यते। इतराणीन्द्रियादीनि प्रकृतान्येव परमपददिदर्शयिषया समनुक्रामन्परिशिष्यमाणेनेहान्त्येनाव्यक्तशब्देन परिशिष्यमाणं प्रकृतं शरीरं दर्शयतीति गम्यते। शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य ह्यविद्यावतो भोक्तुः शरीरादीनां रथादिरूपककल्पनया संसारमोक्षगतिनिरूपणेन प्रत्यगात्मब्रह्मावगतिरिह विवक्षिता। तथा च "एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्रयया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभिः।।" (का॰ १/३/१२) इति वैष्णवस्य परमपदस्य दुरवगमत्वमुक्त्वा तदवगमार्थं योगं दर्शयति—"यच्छेद्वाङ्मनसी प्राज्ञंस्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेदतद्यच्छेच्छान्त आत्मनि।।" (का॰ १/३/१३) इति। एतदुक्तं भवति—वाचं मनसि संयच्छेत् वागादिवाह्येन्द्रिय-व्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत। मनोऽपि विषयविकल्पाभिमुखं विकल्पदोषदर्शनेन ज्ञानशब्दोष-दर्शनेन ज्ञानशब्दोदितायां बुद्धावध्यवसायस्वभावायां धारयेत्। तामपि बुद्धिं महत्यात्मनि

भोक्तर्यग्रयायां वा बुद्धौ सूक्ष्मतापादनेन नियच्छेत्। महान्तं त्वात्मानं शान्त आत्मनि प्रकरणवति परस्मिन्पुरुषे परस्यां काष्ठायां प्रतिष्ठापयेदिति च। तदेवं पूर्वापरालोचनायां नास्त्यत्र परपरिकल्पितस्य प्रधानस्यावकाशः॥१॥

*सूक्ष्मं तु तदर्हत्वात्॥२॥

उक्तमेतत्प्रकरणपरिशेषाभ्यां शरीरमव्यक्तशब्दम्, न प्रधानम्मिति। इदमिदानीमाशङ्क्यते—कथमव्यक्तशब्दार्हत्वं शरीरस्य? यावता स्थूलत्वात्स्पष्टतरमिदं शरीरं व्यक्तशब्दार्हम्स्पष्टवचनस्त्वव्यक्तशब्द इति। अत उत्तरमुच्यते—सूक्ष्मं त्विह कारणात्मना शरीरं विवक्ष्यते; सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। यद्यपि स्थूलमिदं शरीरं न स्वयमव्यक्तशब्दमर्हति तथापि तस्य त्वारम्भकं भूतसूक्ष्ममव्यक्तशब्दमर्हति। प्रकृतिशब्दश्च विकारे दृष्टः।—यथा ''गोभिःश्रीणीत मत्सरम्'' (ऋ॰ सं॰ ९/४/६/४) इति। श्रुतिश्च—''तद्धेदं तर्ह्यव्याकृतमासीत्'' (बृ॰ १/४/७) इतीदमेव व्याकृतनामरूपविभिन्नं जगत्प्रागवस्थायां परित्यक्तव्याकृतनामरूपं बीजशक्त्यवस्थमव्यक्तशब्दयोग्यं दर्शयति॥२॥

तदधीनत्वादर्थवत्॥३॥

अत्राह—यदि जगदिदमनभिव्यक्तनामरूपं बीजात्मकं प्रागवस्थमव्यक्तशब्दार्हमभ्युपगम्येत, तदात्मना च शरीरस्याप्यव्यक्तशब्दार्हत्वं प्रतिज्ञायेत, स एव तर्हि प्रधानकारणवाद एवं सत्यापयेत अस्यैव जगतः प्रागवस्थायाः प्रधानत्वेनाभ्युपगमादिति। अत्रोच्यते—यदि वयं स्वतन्त्रां कांचित्प्रागवस्थां जगतः कारणत्वेनाभ्युपगच्छेम, प्रसञ्जयेम तदा प्रधानकारणवादम्। परमेश्वराधीना त्वियमस्माभिः प्रागवस्था जगतोऽभ्युपगम्यते, न स्वतन्त्रा। सा चावश्याभ्युपगन्तव्या। अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्धयति; शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः॥ मुक्तानां च पुनरनुत्पत्तिः। कुतः? विद्यया तस्या बीजशक्तेर्दाहात्। अविद्यात्मिका हि बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः, यस्यां स्वरूपप्रतिबोधरहिताः, शेरते ससारिणो जीवाः। तदेतदव्यक्तं क्वचिदाकाश शब्दनिर्दिष्टम्; ''एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चे'' (बृ॰ ३/८/११) इति श्रुतेः। क्वचिदक्षरशब्दोदितम्; ''अक्षरात्परतः परः'' (मु॰ २/१/२) इति श्रुतेः। क्वचिन्मायेति सूचितम्; ''मायां तु प्रकृतिं विद्यान्मायिन तु महेश्वरम्'' (श्वे॰ ४/१०) इति मन्त्रवर्णात्। अव्यक्ता हि सा माया; तत्त्वान्यत्वनिरूपणस्याशक्यत्वात्। तदिदं ''महतः परमव्यक्तम्'' इत्युक्तम्, अव्यक्तप्रभवत्वान्महतः यदा हैरण्यगर्भी बुद्धिर्महान्। यदा तु जीवो महान्, तदाप्यव्यक्ताधीनत्वाज्जीवभावस्य महतः परमव्यक्तम्इत्युक्तम्। अविद्या ह्यव्यक्तम्। अविद्यावत्त्वेनैव

जीवस्य सर्वः संव्यहारः सन्ततो वर्तते। महतः परत्वमभेदोपचारात्तद्विकारे शरीरे परिकल्प्यते। सत्यपि शरीरवदिन्द्रियादीनां तद्विकारत्वाविशेषे शरीरस्यैवाभेदोपचारादव्यक्तशब्देन ग्रहणम्; इन्द्रियादीनां स्वशब्दैरेव गृहीतत्वात्परिशिष्टत्वाञ्च शरीस्य।।

अन्ये तु वर्णयन्ति–द्विविधं हि शरीरं स्थूलं सूक्ष्मं च। स्थूलं यदिदमुपलभ्यते। सूक्ष्मं यदुत्तरत्र वक्ष्यते–''तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्'' (ब्र० ३/१/१) इति। तञ्चोभयमपि शरीरमविशेषात्पूर्वत्र रथत्वेन सङ्कीर्तितम्। इह तु सूक्ष्ममव्यक्तशब्देन परिगृह्यते; सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। तदधीनत्बाञ्च बन्धमोक्षव्यवहारस्य जीवात्तस्य परत्वम्। यथार्थाधीनत्वादिन्द्रियव्यापारस्येन्द्रियेभ्यः परत्वमर्थानामिति।

तैस्त्वेतद्वक्तव्यम्–अविशेषेण शरीरद्वयस्य पूर्वत्र रथत्वेन सङ्कीर्तितत्वात्समानयोः प्रकृतत्वपरिशिष्टत्वयोः कथं सूक्ष्ममेव शरीरमिह गृह्यते, न पुनः स्थूलमपिति? आम्नातस्यार्थं प्रतिपत्तुं प्रभवामः, नाम्नातं पर्यनुयोक्तुम्। आम्नातं चाव्यक्तपदं सूक्ष्ममेव प्रतिपादयितुं शक्नोति, नेतरत्, व्यक्तत्वात्तस्येति चेत्? न; एकवाक्यताधीनत्वादर्थप्रतिपत्तेः। न हीमे पूर्वोत्तरे आम्नाते एकवाक्यतामनापद्य कञ्चिदर्थं प्रतिपादयतः ; प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्। न चाकाङ्क्षामन्तरेणैकवाक्यताप्रतिपत्तिरस्ति। तत्राविशिष्टायां शरीरद्वयस्य ग्राह्यत्वाकाङ्क्षायां यथाकाङ्क्षं सम्बन्धेऽनभ्युपगम्यमान एकवाक्यतैव बाधिता भवति, कुत आम्नातस्यार्थप्रतिपत्तिः? न चैवं मन्तव्यं दुःशोधत्वात्सूक्ष्मस्यैव शरीरस्येह ग्रहणम, स्थूलस्य तु दृष्टबीभत्सतया सुशोधत्वादग्रहणमिति। यतां नैवेह शोधनं कस्यचिद्विवक्ष्यते। न ह्यत्र शोधनविधायि किञ्चिदाख्यातमस्ति। अनन्तरनिर्दिष्टवात्तु किं ''तद्विष्णोः परमं पद'' मितीदमिह विवक्ष्यते। तथाहीदमस्मात्परमिदमस्मात्परमित्युक्त्वा ''पुरुषान्न परं किञ्चिद्'' इत्याह। सर्वथाऽपि त्वानुमानिकनिराकरणोपपत्तेस्तथा नामास्तु, न नः किञ्चिच्छिद्यते।।३।।

***ज्ञेयत्वावचनाञ्च*।।४।।**

ज्ञेयत्वन च साङ्ख्यैः प्रधानं स्मर्यते ''गुणपुरुषान्तरज्ञानात्कैवल्यमि'' ति वदद्भिः। न हि गुणस्वरूपमज्ञात्वा गुणेभ्यः पुरुषास्यान्तरं शक्यं ज्ञातुमिति। क्वचिञ्च विभूतिविशेषप्राप्तये प्रधानं ज्ञेयमिति स्मरन्ति। न चेदमिहाव्यक्तं ज्ञेयत्वेनोच्यते। पदमात्रं ह्यव्यक्तशब्दः। नेहाव्यक्तं ज्ञातव्यमुपासितव्यं चेति वाक्यमस्ति। न चानुपदिष्टपदार्थज्ञानं पुरुषार्थमिति शक्यं प्रतिपत्तुम्। तस्मादपि नाव्यक्तशब्देन प्रधानमभिधीयते। अस्माकं तु रथरूपकक्लृप्तशरीराद्यनुसरणेन विष्णोरेव परमं पदं दर्शयितुमयमुपन्यासइत्यनवद्यम्।।४।।

***वदतीति चेन्न प्राज्ञो हि प्रकरणात्*।।५।।**

अत्राह साङ्ख्यः—"ज्ञेयत्वावचनात्" इत्यसिद्धम्? कथम्? श्रूयते ह्युत्तरत्राव्यक्तशब्दोदितस्य प्रधानस्य ज्ञेयत्वचनम्—"अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवञ्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते।।" (का० २/३/१५) इति। अत्र हि यादृशं शब्दादिहीनं प्रधानं महतः परं स्मृतौ निरूपितम्, तादृशमेव निचाय्यत्वेन निर्दिष्टम्। तस्मात्प्रधानमेवेदम्। तदेव चाव्यक्तशब्द निर्दिष्टम्—इति; अत्र ब्रूमः—नेह प्रधानं निचाय्यत्वेन निर्दिष्टम्। प्राज्ञो हीह परमात्मा निचाय्यत्वेन निर्दिष्ट इति गम्यते। कुतः? प्रकरणात्। प्राज्ञस्य हि प्रकरणं विततं वर्तते; "पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" इत्यादिनिर्देशात्, "एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते" इति च दुर्ज्ञातत्ववचनेन तस्यैव ज्ञेयत्वाकाङ्क्षणात्। "यच्छेद्वाङ्मनसी प्राज्ञः" इति च तज्ज्ञानायैव वागादिसंयमस्य विहितत्वात्, मृत्युमुखप्रमोक्षणफलत्वाञ्च। न हि प्रधानमात्रं निचाय्य मृत्युमुखात्प्रमुच्यत इति साङ्ख्यैरिष्यते। चेतनात्मविज्ञानाद्धि मृत्युमुखात्प्रमुच्यत इति तेषामभ्युपगमः। सर्वेषु वेदान्तेषु प्राज्ञस्यैवात्मनोऽशब्दादिधर्मत्वमभिलप्यते। तस्मान्न प्रधानस्यात्र ज्ञेयत्वमव्यक्तशब्द-निर्दिष्टत्वं वा।।५।।

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।।६।।

इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा। यस्मात्त्रयाणामेव पदार्थानामग्निजीव-परमात्मनामस्मिन्ग्रन्थे कठवल्लीषु वरप्रदानसामर्थ्याद्वक्तव्यतयोपन्यासो दृश्यते। तद्विषय एव च प्रश्नः। नातोऽन्यस्य प्रश्न उपन्यासो वाऽस्ति।। तत्र तावत् "स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम्" (का० १/१/१३) इत्यग्निविषयः प्रश्नः। "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः।।" (का० १/१/२०) इति जीवविषयः प्रश्नः। "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताञ्च भव्याञ्च यत्तत्पश्यसि तद्वद।।" (१/२/१४) इति परमात्मविषयः।। प्रतिवचनमपि "लोकादिमग्निं तमुवाच तस्मै या इष्टका यावतीर्वा यथा वा।" (का० १/१/१५) इत्यग्निविषयम्। "हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्। यथा च मरणं प्राप्य आत्मा भवति गौतम। योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्" (का० २/५/६/७) इति। व्यवहित जीवविषयम्। "न जायते म्रियते वा विपश्चित्" (का० १/२/१८) इत्यादिबहुप्रपञ्चं परमात्मविषयम्। नैवं प्रधानविषयः प्रश्नोऽस्ति, अपृष्टत्वाञ्चानुपन्यसनीयत्वं तस्येति। अत्राह—योऽयमात्मविषयः प्रश्नो "येयं प्रेते विचिकित्सा मनुष्येऽस्ती" ति, किं स एवायम् "अन्यत्र धर्मादन्यत्राधर्माद्" इति पुनरनुकृष्यते? किंवा ततोऽन्योऽयमपूर्वः प्रश्न उत्थाप्यत इति? किञ्चातः स एवायं प्रश्नः

पुनरनुकृष्यत इति यद्युच्येत, द्वयोरात्मविषययोः प्रश्नयोरेकतापत्तेरग्निविषय आत्मविषयश्च द्वावेव प्रश्नावित्येता न वक्तव्यं त्रयाणां प्रश्नोपन्यासाविति। अथान्योऽयमपूर्वः प्रश्न उत्थाप्यत इत्युच्येत, ततो यथैव वरप्रदानव्यतिरेकेण प्रश्नकल्पनायामदोषः, एवं प्रश्नव्यतिरेकेणापि प्रधानोपन्यासकल्पनायामदोषः स्यादिति। अत्रोच्यते—नैवं वयमिह वरप्रदानव्यतिरेकेण प्रश्नं कञ्चित्कल्पयामः ; वाक्योपक्रमसामर्थ्यात्। वरप्रदानोपक्रमा हि मृत्युनचिकेतः संवादरूपा वाक्यप्रवृत्तिरासमाप्तेः कठवल्लीनां लक्ष्यते। मृत्युः किल नचिकेतसे पित्रा प्रहिताय त्रीन्वरान्प्रददौ। नचिकेताः किल तेषां प्रथमेन वरेण पितुः सौमनस्यं वव्रे, द्वितीयेनाग्निविद्याम्, तृतीयेनात्मविद्याम्; "येयं प्रेते" इति "वराणामेष वरस्तृतीयः" (का० १/१/२०) इति लिङ्गात्। तत्र यद्यन्यत्र धर्मादि" त्यन्योऽयमपूर्वः प्रश्न उत्थाप्येत, ततो वरप्रदानव्यतिरेकेणापि प्रश्नकल्पनाद्वाक्यं बाध्येत। ननु—प्रष्टव्यभेदादपूर्वोऽयं प्रश्नो भवितुमर्हति। पूर्वो हि प्रश्नो जीवविषयः ; येयं प्रेते विचिकित्सा मनुष्येऽस्तिनास्तीतिविचिकित्साभिधानात्। जीवश्च धर्मादिगोचरत्वान्ना "न्यत्र धर्मादि" ति प्रश्नमर्हति। प्राज्ञस्तु धर्माद्यतीतत्वाद "न्यत्र धर्मादि" ति प्रश्नमर्हति। प्रश्नच्छाया च न समाना लक्ष्यते; पूर्वस्यास्तित्वनास्तित्वविषयत्वादुत्तरस्य धर्माद्यतीतवस्तुविषयत्वात्। तस्मात्प्रत्यभिज्ञाना-भावात्प्रश्नभेदः। न पूर्वस्यैवोत्तरत्रानुकर्षणमिति—चेत्, न; जीवप्राज्ञयोरेकत्वाभ्युपगमात्। भवेत्प्रष्टव्य-भेदात्प्रश्नभेदः, यद्यन्यो जीवः प्राज्ञात्स्यात्। न चान्यत्वमस्ति; "तत्त्वमसी" त्यादिश्रुत्यन्तरेभ्यः। इह च "अन्यत्र धर्मात्" इत्यस्य प्रश्नस्य प्रतिवचनम् "न जायते म्रियते वा विपश्चित्" इति जन्ममरणप्रतिषेधेन प्रतिपाद्यमानं शारीरपरमेश्वरयोरभेदं दर्शयति। सति हि प्रसङ्गे प्रतिषेधो भागी भवति। प्रसङ्गश्च जन्ममरणयोः शरीरसंस्पर्शाच्छारीरस्य भवति, न परमेश्वरस्य। तथा—"स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति। महान्तं विभुमात्मानं मत्वा धीरो न शोचति।।" (का० २/४/४) इति स्वप्नजागरितदृशो जीवस्यैव महत्त्वविभुत्वविशेषणस्य मननेन शोकविच्छेदं दर्शयन्न प्राज्ञादन्यो जीव इति दर्शयति। प्राज्ञविज्ञानाद्धि शोकविच्छेद इति वेदान्तसिद्धान्तः। तथाऽग्रे—"यदेवेह तदमुत्र यदमुत्र तदन्विह। मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।।" (का० २/४/१०) इति जीवप्राज्ञभेददृष्टिमपवदति। तथा जीवविषयस्यास्तित्वनास्तित्वप्रश्नस्यानन्तरम् "अन्यं वरं नचिकेतो वृणीष्व" इत्यारभ्य मृत्युना तैस्तैः कामैः प्रलोभ्यमानोऽपि नचिकेता यदा न चचाल, तदैनं मृत्युरभ्युदयनिश्रेयसविभागप्रदर्शनेन विद्याविद्याविभागप्रदर्शनेन च "विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त" (का० १/२/४) इति प्रशस्य प्रश्नमपि तदीयं प्रशंसन्नुवाच—"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।।" (का० १/२/१२) इति, तेनापि जीवप्राज्ञयोरभेद एवेह विवक्षित इति गम्यते। यत्प्रश्ननिमित्तां च प्रशंसां महतीं मृत्योः प्रत्यपद्यत नचिकेताः, यदि तं विहाय प्रशंसानन्तरमन्यमेव प्रश्नमुपक्षिपेदस्थान एव सा

सर्वा प्रशंसा प्रसारिता स्यात्। तस्मात् ''येयं प्रेते'' इत्यस्यैव प्रश्नस्यैतदनुकर्षणम् ''अन्यत्र धर्माद्'' इति। यत्त प्रश्नच्छायावैलक्षण्यमुक्तम्, तददूषणम्; तदीयस्यैव विशेषस्य पुनः पृच्छयमानत्वात्। पूर्वत्र हि देहादिव्यतिरिक्तस्यात्मनोऽस्तित्वं पृष्टम्, उत्तरत्र तु तस्यैवासंसारित्वं पृच्छयत इति, यावद्धयविद्या न निवर्तते, तावद्धर्मादिगोचरत्वं जीवस्य जीवत्वं च न निवर्तते। तन्निवृत्तौ तु प्राज्ञ एव ''तत्त्वमसी'' ति श्रुत्या प्रत्याय्यते। न चाविद्यावत्त्वे तदपगमे च वस्तुनः कश्चिद्विशेषोऽस्ति। यथा कश्चित्सन्तमसे पतितां कांञ्चिद्रज्जुमहिं मन्यमानो भीतो वेपमानः पलायते, तं चापरो ब्रूयान्मा भैषीर्नायमही रज्जुरेवेति। स च तदुपश्रुत्याहिकृतं भयमुत्सृजेद्वेपथुं पलायनं च। न त्वहिबुद्धिकाले तदपगमकाले च वस्तुनः कश्चिद्विशेषः स्यात्। तथैवैतदपि द्रष्टव्यम्। ततश्च ''न जायते म्रियते वा'' इत्येवमाद्यपि भवत्यस्तित्वप्रश्नस्य प्रतिवचनम्। सूत्रं त्वविद्याकल्पितजीवप्राज्ञभेदापेक्षया योजयितव्यम्। एकत्वेऽपि ह्यात्मविषयस्य प्रश्नस्य प्रायणावस्थायां देहव्यतिरिक्तास्तित्वमात्रविचिकित्सानात्कर्तृत्वादिसंसार-स्वभावानपोहनाञ्च पूर्वस्य पर्यायस्य जीवविषयत्वमुत्प्रेक्ष्यते। उत्तरस्य तु धर्माद्यत्ययसङ्कीर्तनात्प्राज्ञ-विषयत्वमिति। ततश्च युक्ताऽग्निजीवपरमात्मकल्पना। प्रधानकल्पनायां तु न वरप्रदानम्, न प्रश्नो, न प्रतिवचनमिति वैषम्यम्।।६।।

***महद्वञ्च*।।७।।**

यथा महच्छब्दः साङ्ख्यैः सत्तामात्रेऽपि प्रथमजे प्रयुक्तो न तमेव वैदिकेऽपि प्रयोगेऽभिधत्ते। ''बुद्धेरात्मा महान्परः'' (का० १/३/१०) ''महान्तं विभुमात्मनम्'' (का० १/२/२२) ''वेदाहमेतं पुरुयं महान्तम्'' (श्वे० ३/८) इत्येवमादावात्मशब्दप्रयोगादिभ्यो हेतुभ्यः। तथाव्यक्तशब्दोऽपि न वैदिके प्रयोगे प्रधानमभिधातुमर्हति। अतश्च नास्त्यानुमानिकस्य शब्दवत्त्वम्।।७।। इति प्रथममानुमानिका-धिकरणम्।।

इति शाङ्करभाष्यम् आनुमानिकाधिकरणम् समाप्तम्

वार्तिकम्

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च।। समन्वयाध्यायेन सहास्य पादस्य सङ्गतिं दर्शयितुं वृत्तं कीर्तयति– *ब्रह्मजिज्ञासां प्रतिज्ञायेति*।। गतिसामान्यं च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति विद्यते, न प्रधानकारणवादं प्रतीति प्रपञ्चितमिति*।।

अत्र केचित् चोदयन्ति–ननु सिद्धे गतिसामान्ये का शङ्का? ''महतः परमव्यक्तम्'' इत्यादिवाक्यार्थानिर्णये च कथं गमिसामान्यसिद्धिरिति? अत्राहुः–

असाधि प्रतिवेदान्तं ब्रह्मकारणतागतिः।
प्रतिवाक्यं न तत्सिद्धिः क्वचिदन्यार्थदर्शनात्।।

पूर्वत्र हि प्रधानाद्येव सर्ववेदान्तार्थ इति प्रत्यवस्थिते तन्निषेधेन सर्ववेदान्तेषु ब्रह्मावगतिः साधिता, इह तु तामुपेत्य प्रधानाद्यपि कारणत्वेन समन्वयविषयः। न चानेककारणवैयर्थ्यम्; कल्पभेदेन व्यवस्थोपपत्तेरिति प्रत्यवस्थीयते। सूत्रकारोऽपि–अपिशब्दम्, एकशब्दं च प्रयुञ्जान इममभिप्रायं सूचयाम्बभूव; अतो युक्ता शङ्का।।

तदेतदुभयमपि न मह्यं रोचते। तथाहि–पूर्वपक्षस्तावदादौ न संभवति। न ह्यत्र भाष्यकारणे गतिसामान्यं निरवशेषं सिद्धमित्युक्तमस्ति, येन सिद्धे गतिसामान्ये का शङ्केति चोद्यमवतरेत्; गतिसामान्यं प्रपञ्चितमित्येवाभिधानात्। न च–प्रपञ्चितमिति पदं निरवशेषप्रपञ्चपरम्, येनार्थात् तत्सिद्धयभिधानलाभ इति–वाच्यम्; ''जगद्वाचित्वादि'' त्यादिनाऽवशिष्टगतिसामान्यप्रपञ्चस्य करिष्यमाणत्वात् तत्परत्वासिद्धेः, इदं त्विदानीमवशिष्टमाशङ्कयत इति भाष्यविरोधापत्तेः। न हि 'निरवशेषमभिहितमि' त्युक्तवाऽवशिष्टमाशङ्क्यत इत्यभिधानमुपपद्यते; पूर्वापराभिधानयोः परस्परव्याघातापत्तेः। तस्मात् 'सिद्धे गतिसामान्ये का शङ्का' इतीयमाशङ्काऽस्थानपतितैव;

विषयाभावात्। यदप्युक्तम्—महतः परमित्यादिवाक्यार्थानिर्णये वा कथं गतिसामान्यसिद्धिः—इति, तदप्यसत्; न हि किमत्राव्यक्तशब्देन प्रधानं गृह्यते, किं वा परिशिष्टं शरीरम्, —"अजामेकामि" त्यत्राजाशब्देन किं प्रधानमुच्यते, किं वा प्रकृतं तेजोबन्नलक्षणं भूतत्रयम्,—"पञ्च पञ्चजना" इत्यत्र किं साङ्ख्याभिमतपञ्चविंशतितत्त्वम्, किं वान्यत्, इति विचारकलापेन "महतः परमव्यक्तम्" इत्यादिवाक्यानां गतिसामान्यं ब्रह्मणि प्रदर्श्यते, येन तदर्थानिर्णये ब्रह्मणि गतिसामान्यासिद्धिः स्यात्; ब्रह्मकोटिकविचारकलापस्यैव तत्प्रदर्शकत्वात्, अन्यथा यावत् किञ्चिद् वेदान्तसम्बन्धि विचारजातम्, तत्सर्वं साक्षात् परम्परया वा ब्रह्मपरत्वेन गतिसामान्यप्रदर्शकमेव स्यात्। अपि चाव्यक्तपदस्य प्रधानपरत्वेऽपि न ब्रह्मणि गतिसामान्यं विरुद्ध्यते; "अव्यक्तात् पुरुषः परः" इति तन्मते तत्परत्वेनापि ब्रह्मणोऽवधारणाद् ब्रह्मपरत्वप्रतिपादनपरमेवेदं वाक्यम्, नार्थादेरपि परत्वं प्रतिपादयतीति विचारान्तरस्यापि सूत्रभाष्यकाराभ्यां कृतत्वाञ्च। तस्मादपेशलमिदं चोद्यम्। एतेन—तत्समाधान-मपि—प्रत्युक्तम्; पूर्वपक्षाभावात्। अभ्युपेत्यापि पूर्वपक्षं तत्समाधाने दूषणं ब्रूमः। यदुक्तम्—"असाधि प्रतिवेदान्तं ब्रह्मकारणतागतिः। प्रतिवाक्यं तु तत्सिद्धिः क्वचिदन्यार्थदर्शनादि" ति, एतस्यार्थं न बुध्यामहे। ननु—उक्त एव तस्यार्थः पूर्वम्—न हि प्रधानाद्येव सर्ववेदान्तार्थ इति प्रत्यवस्थिते तन्निषेधेन ब्रह्मावगतिः साधिता, इह तु तामुपेत्य प्रधानाद्यपि कारणत्वेन समन्वयविषय इति प्रत्यवस्थिते तन्निराकरणेन बह्मकारणतावगतिः प्रतिवाक्यं साध्यत इति, तन्न; 'ईक्षतेर्नाशब्दम्'' "गतिसामान्यात्" इति प्रतिवेदान्तं ब्रह्मकारणतावगतिं दर्शयित्वा तस्याश्च प्रतिवाक्यम् "आनन्दमयोऽभ्यासात्" इत्यादिना प्रपञ्चितत्वाञ्च। सत्यं प्रपञ्चितं प्रतिवाक्यम्, तथापि तदवशेषो विद्यत इति चेत्, एवं तर्हि पूर्वपक्षासंभव इत्युक्तम्। भ्रान्त्या पूर्वपक्ष इति चेत्, न; 'इदं त्विदानीमवशिष्टं शङ्क्यते' इति स्पष्टं भाष्येण विवेकसंभवाद् भ्रान्त्यनुपपत्तेः। अपि च कारणद्वयाभ्युपगमो न संभवति; वैयर्थ्यात्। कल्पभेदेन व्यवस्थोपपत्तिरिति चेत्, न; कल्पभेदात् कारणभेदस्य केनाप्यनङ्गीकारात्, वस्तुस्वभावहानिप्रसङ्गाञ्च, सौत्राप्येकशब्दयोः सिद्धान्तपक्षापेक्षया पक्षान्तरोपन्यासार्थत्वेनोपपन्न-परत्वात्, अन्यथा "तदेव जगतः कारणम् श्रुतिस्मृतिन्यायप्रसिद्धिभ्य" इति पूर्वपक्षोपसंहार-भाष्यविरोधापत्तेरित्यास्ताम्। सर्वथा त्वशब्दहेतोरसिद्धत्वपरिहारायावशिष्ट- गतिसामान्यप्रपञ्चनाय चाग्रिमपादारम्भ उपपन्नः॥

एतेन—पूर्वतनपादेभ्योऽस्य पादस्य विषयभेदोऽपि दर्शितः—भवति; स्पष्टान्यलिङ्गकावशिष्ट-ब्रह्मलिङ्गकवाक्यानामेवात्र विषयत्वात्। ननु—एवं तर्हि आक्षेपसङ्गत्या "ईक्षतेर्नाशब्दम्" इत्यनन्तरं स्पष्टांन्यलिङ्गकानि वाक्यानि किमिति न विचारितानि? मैवम्; ब्रह्मण आनन्दरूपत्वादिजिज्ञासया गतिसामान्यजिज्ञासया च तदाकाङ्क्षाभावावरोधात्, इदानीं तत्प्रक्षेपेणावसरप्राप्तेस्तद्विचारोपपत्तेरिति।

कठबल्ल्यां श्रूयते–''इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गति'' इति॥

तत्र सन्देहः–किमत्राव्यक्तशब्देन साङ्ख्यप्रसिद्धया तदभिमतं प्रधानमुच्यते, किं वा प्रकरणपरिशेषानुमानाभ्यां रथरूपकत्वेन पूर्वमन्त्रोपात्तं शरीरम्–इति। तत्र यद्याद्यः, तदा प्रधानस्याशब्दत्वासिद्धेस्तस्मिन्नेवानुमानसिद्धकारणभावे जगत्कारणताभिधायिनां वेदान्तवाक्यानां यथाकथञ्चित् समन्वयस्य दर्शनीयत्वाद् न ब्रह्मणि प्रतिपादितोऽपि तत्समन्वयः सिद्ध्येत्। अथ द्वितीयः, तदा रथरूपकशरीरविन्यासस्य ब्रह्मप्रतिपत्त्यर्थत्वात् सिद्ध्येदेव तत्र तत्समन्वय इति॥

किं प्राप्तम्? यद् भवतोच्यते–ब्रह्मैव जगत्कारणं प्रतिवेदान्तं पठयते, नानुमानसिद्धं प्रधानम् इति, तन्न; आनुमानिकम्=प्रधानमपि, एकेषां शाखिनां महदादिकारणत्वेन पठयमानं दृष्यते; ''महतः परमव्यक्तमव्यक्तात् पुरुषः परः''–इति काठके श्रवणात्, अव्यक्तशब्दस्य प्रधाने प्रसिद्धत्वात्, श्रुत्या च प्रकरणपरिशेषानुमानयोर्बाधात्, महतः कारणत्वेन तत्प्रत्यभिज्ञानात्। अत्र ह्यव्यवहितपूर्वकालवाचिना परशब्देन कारणत्वमुच्यते; तस्यैव प्रकृते विवक्षितत्वात्, श्रुतिभाष्ये च कारणपरतयैव परशब्दस्य व्याख्यातत्वात्, अर्थान्तरस्य प्रकृतेऽसंभवात्। न च–एवं पुरुषस्याव्यक्तकारणता साङ्ख्यमते नोंपपद्यत इति–वाच्यम्; अव्यक्तस्य तदकार्यत्वेऽपि तद्भोग्यत्वेन तदुपचारोपपत्तेः। एवं च सति कस्याञ्चित् शाखायामनुमानसिद्धप्रधानकारणतानुवादपरत्वे वेदान्तवाक्यस्य निश्चिते कारणद्वयासंभवात् अनयत्रापि तदनुसारेण वाक्यानां गतिर्व्याख्येयेति मन्यते। कथं पुनरेतदवगम्यते–साङ्ख्यानुमानसिद्धप्रधानकारणतानुवादपरेयं श्रुतिः–इति? तत्राह–*तत्र य एव यन्नामानो यत्क्रमाश्च महदव्यक्तपुरुषाः स्मृतिप्रसिद्धाः, त एवेह प्रत्यभिज्ञायन्त इति*॥ तत्र=कठवल्ल्याम्, इन्द्रियेभ्यः परा ह्यर्था इति मन्त्रे वेत्यर्थः। तत्राव्यक्तशब्दस्य साङ्ख्यानां प्रधाने रूढिं जनयति–*तत्राव्यक्तमिति स्मृतिप्रसिद्धेरिति*॥ न केवलं रूढिरेव, योगोऽपि तस्य तत्रास्तीत्याह–शब्दादिविहीनत्वाञ्च। न व्यक्तमव्यक्तमिति व्युत्पत्तेः संभवदिति*॥ शान्तघोरमूढशब्दादिहीनत्वादित्यर्थः। शरीरे तु न रूढियोगयोरन्यतरस्यापि संभवोऽस्ति; तस्य शान्तघोरमूढशब्दादिमत्त्वेन व्यक्तत्वादित्याशयः। भवतुततः किमिति? अत आह–*तस्य शब्दवत्त्वादशब्दत्वमनुपपन्नमिति*॥ तस्मात् प्रधानमेव जगत्कारणम्, न ब्रह्मेति पूर्वपक्षमुपसंहरति–*तदेव चेति*॥ श्रुतिरुक्ता, समृतिन्यायप्रसिद्धयस्तु साङ्ख्यानामेव। सूत्रशेषेण परिहारं वर्णयति–*नैतदेवमिति*॥ ननु–दर्शितं श्रुतौ तत्प्रत्यभिज्ञानमिति, नेत्याह–*शब्दमात्रं हीति*॥ ननु–शब्दप्रत्यभिज्ञानेऽर्थप्रत्यभिज्ञानम्, मैवम्; किं ''पूषा प्रपिष्टभाग'' इति वत् प्रत्यभिज्ञातशब्दसामर्थ्यादेव प्रधानप्रत्यभिज्ञानमत्राध्यवसीयते, किं क्रमप्रत्यभिज्ञासामर्थ्यात्,

आहोस्वित् प्रकरणनिरूपणवशात्। आद्येऽपि किं योगात्, रूढेर्वा। रूढिपक्षे किं लोकप्रसिद्धरूढेः, प्रधानवादिपारिभाषिकरूढेर्वा, तत्र नाद्य इत्याह– *स च शब्द इति*।। तथाच शब्दस्य साधारण्यात् प्रकरणादितन्नियामकाभावस्य वक्ष्यमाणत्वाद् न प्रधानप्रत्यभिज्ञानसिद्धिरित्याशयः। नापि द्वितीय इत्याह– *न चायमिति*।। तृतीयपक्षं निराकरोति– *या त्विति*। पाणिनेर्नदीवृद्ध्यादि-परिभाषावदित्याशयः। ननु–योगस्य साधारण्येऽपि साङ्ख्यस्मृत्युपात्तक्रमसामान्यदर्शनात् विशेषेऽवस्थानं भविष्यतीति, नेत्याह– *न च क्रममात्रसामान्यादिति*।। प्रकरणादिकमनपेक्ष्य क्रमसामान्यमात्रेणार्थविशेषस्य प्रत्यभिज्ञातुमशक्यत्वादित्याशयः। तदिदमुक्तम्– *न ह्यश्वस्थाने गां पश्यन्नश्वोऽयमित्यमूढोऽध्यवस्यतीति*।। अस्तु तर्हि प्रकरणात् तदध्यवसानमिति, नेत्याह– *प्रकरणनिरूपणायां चात्रेति*।। इन्द्रियमनोयुक्तम्=इन्द्रियमनोयोगो यथा भवति तथाऽऽत्मा भोक्तेत्याहुर्मनीषिण इति। यद्वा–तृन्प्रत्ययान्तो भोक्तृशब्दः। तथाचात्मा=कार्यकरणसङ्घाताध्यक्षो रथी, इन्द्रियमनोयुक्तम्=शब्दादिविषयजातम्, भोक्तेत्याहुर्धीमन्त इत्यर्थः। प्रकरणं दर्शयित्वा परिशेषं दर्शयति–तत्र य एवेति*।। अर्थास्तु शब्दादय इति*।। नान्तरत्वेन परत्वमिन्द्रियेभ्योऽर्थानामुच्यते, किं तर्हि? प्रधानत्वेन। तच्च विवक्षाधीनम्। ग्रहेभ्यश्चेन्द्रियेभ्योऽतिग्रहतयाऽर्थानां प्राधान्यं श्रुत्या विवक्षितम्, इतीन्द्रियेभ्योऽर्थानां प्राधान्यात् परत्वं भवतीति केचित्।।

वयं तु पश्यामः–आन्तरत्वेनाप्यस्तीन्द्रियेभ्योऽर्थानां परत्वम्; गन्धादितन्मात्रभूतसूक्ष्माणां घ्राणादीन्द्रियोपादानत्वात्, श्रुतिभाष्ये तथैव व्याख्यानात्–इति। कुतः पुना रथित्वेनोपक्षिप्तस्यैवात्मनो बुद्धिपरत्वेनेह ग्रहणम्, न पराभिमतमहत्तत्त्वस्येति? नेत्याह– *आत्मशब्दादिति*।। तस्यैव प्रत्यभिज्ञानात्, पराभिमते च महत्यात्मशब्दानुपपत्तेरित्यर्थः। ननु–जीवात्मनो बुद्ध्युपाधिकत्वात् कथं स्वोपाधितः स्वस्य परत्वम्? इत्याशङ्क्य, तस्यास्तत्त्वेऽपि भोगोपकरणत्वस्यापि विद्यमानत्वात् तदपेक्ष्य भोक्तुर्जीवस्य परत्वाभिधानमुपपन्नमित्याह– *भोक्तुश्चेति*।। ननु–आत्मशब्दानुरोधेन यथा महच्छब्दोऽन्यथा नीयते, एवं महच्छब्दानुरोधेनात्मशब्द एव किमिति नान्यथा नीयते? अविशेषात्, इत्याशङ्क्य, एवमपि श्रुतिस्मृतिभ्यां हिरण्यगर्भात्मकसमष्टिबुद्धावेव महच्छब्दः प्रसिद्धः, व्यष्टिबुद्ध्यपेक्षया परत्वाच्च तस्या एवेह ग्रहणं युक्तम्, न पारिभाषिकस्य महत इत्याह– *अथवेति*।। पूरिति सर्वभोगाश्रयत्वात्। ननु–पूर्वं तस्या अनिर्देशाद् इह कथं ग्रहणं स्यादिति? नेत्याह *सा चेति*।। हिरूक्=पृथगित्यर्थः। किमर्थं तस्याः पृथक् कृत्वेह निर्देशः क्रियत इति चेत्, परत्वप्रदर्शनायेत्याह– *तस्या अपीति*।। ननु–एवं सति न परिशेषसिद्धिः, रथिनो निर्देशादिति नेत्याह– *एतस्मिन् पक्ष इति*।। शरीरेन्द्रियादीनां रथादिरूपकत्वकल्पनायाः किं प्रयोजनमिति? तत्राह– *शरीरेन्द्रियमनोबुद्धिविषयवासनासंयुक्तस्येति*।। ननु–प्रत्यगात्मनो जीवस्य

ब्रह्मात्मावगतिरिह विवक्षितेति कुतोऽवसीयते? तत्राह– *तथाचेति*।। गूढोत्मेति सन्धिः छान्दसः। वाक्=वाचम्, मनसी=मनसि, यच्छेदित्यर्थः। विभक्तिव्यत्ययो दैर्ध्यं च छान्दसम्। अत्र वाक्पदं सर्वबाह्येन्द्रियोपलक्षणार्थं सत् ''वाङ्मनसि संपद्यते'' इति न्यायेन तद्व्यापारं लक्षयतीत्याह– *बाह्यं वागादीन्द्रियव्यापारमुत्सृज्येति*।।१।।

ननु–शरीरस्य शान्तघोरमूढादिरूपत्वेनात्यन्तव्यक्तस्याव्यक्तशब्दानर्हत्वाद् नात्र प्रकरण-परिशेषाभ्यां तत्परिग्रहो युक्त इत्युक्तम्, तत्रोत्तरं पठति– *सूक्ष्मं तु तदर्हत्वात्*।।२।। तु शब्देनोक्ताशङ्कां व्यावर्तयति। नैवमाशङ्कितव्यम्–व्यक्तं सत् शरीरं कथमव्यक्तशब्दार्हमिति? सूक्ष्ममिह शरीरं परिगृह्यते। कुतः? तस्याव्यक्तशब्दयोग्यत्वात्।।

ननु–किं तत्सूक्ष्मं शरीरम्? लिङ्गमिति चेत्, न; ''शरीरं रथमेव चे'' ति निर्विशेषणशरीरश्रुतेरुभयशरीरसाधारणपदेन तद्विशेषग्रहस्यानुचितत्वात्। अपि चास्तु वा शरीरपदस्य विशेषपरत्वम्, तथापीन्द्रियमनोबुद्धीनां पृथगुपन्यासात् तेषामेव करणानां लिङ्गशरीरत्वेनाभिधानात् पुना रथत्वेन तदुपन्यासानुपपत्तेः परिशेषात् स्थूलशरीरमेव शरीरशब्देनाभिधातव्यम्। तस्मात् शरीरशब्देनेह लिङ्गानभिधानाद् रथरूपकशरीरस्यैव प्रकरणपरिशेषाभ्यामव्यक्तशब्दत्वोक्तेर्न सूक्ष्मत्वमस्ति। न च स्थूलशरीरस्य सूक्ष्मत्वमस्ति। न च शरीरद्वयातिरिक्तं शरीरान्तरमस्ति, यस्य सूक्ष्मतोपवर्णनीया। अतो न जानीमः, किं तत् सूक्ष्मं शरीरम्–इति, अत्रोच्यते; ''पञ्चम्यामाहुतयः पुरुषवचसो भवन्ती'' ति श्रुतेः, ''तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यामि'' ति वक्ष्यमाणन्यायाश्च, यान्यवधारितानि लिङ्गाधारभूतानि भूतसूक्ष्माणीहलोकपरलोकसंचारितयाऽऽमोक्षं स्थायीनि बीजावस्थादृक्षवत् बहुभूतसंयोगाद् मातापितृशुक्रशोणितसंयोगाद्वा स्थूलतां प्राप्य षाट्कौशिकं शरीरमिति व्यपदेशभाञ्जि च, तानि भूतानि स्थूलशरीरस्य सूक्ष्मावस्थतयाऽव्यक्त-शब्दार्हानीत्युच्यन्ते। अतो नोक्तदोषः, यद्वा–यद्यपि न स्थूलशरीरं साक्षादव्यक्तशब्दार्हम्; तथापि–''तद्धेदं तर्ह्यव्याकृतमासीत्'' इति श्रुतेर्यन्नामरूपात्मना व्याकृतस्य कार्यकरणसङ्घातात्मकस्य जगतो मूलकारणमव्याकृताख्यम्, तदिह सूक्ष्ममव्यक्तशब्दमर्हत्येव। न च–एवं सत्यव्यक्तशब्देन शरीरपरिग्रहो न स्यात्, तथाचार्थान्तरम्; हेत्वन्तरं वा निग्रहस्थानमापतेदिति–वाच्यम्; कार्यस्यैव तदवस्थत्वात्। अतो 'गोभिः श्रृणीत मत्सरमि' तिवत् कारणशब्देन लक्षणया विकारपरिग्रहोपपत्तेश्च। यथा हि गोशब्दः स्वार्थविकारे सोमरसश्रपणसाधने पयसि लक्षणया प्रयुज्यते, एवं प्रकृतेऽप्यव्यक्तकार्ये शरीरेऽव्यक्तशब्दः प्रयोक्ष्यते, इति न कश्चिद्विरोधः।।२।।

ननु–सर्वत्र स्थूलशरीरारम्भकभूतमात्राया: सुलभत्वाद् न स्थूलदेहारम्भकं लिङ्गसहभाविभूतसूक्ष्मं निष्प्रयोजनत्वात् कल्पयितुमुचितमिति, तत्राह सूत्रकार:– *तदधीनत्वादर्थवत्*।।३।। करणात्मकस्य लिङ्गस्य निराश्रयस्यावस्थानानुपपत्ते: स्थूलशरीरपाते लिङ्गभङ्गाद् बन्धमोक्षेहलोक परलोकगमनागमनादिव्यवहारोच्छेदापत्ति:, अतो बन्ध मोक्षादिव्यवहारस्योक्तभूतसूक्ष्माधीनत्वात् तत्कल्पनं प्रयोजनवदित्यर्थ:। न च–तत्कल्पनस्य सप्रयोजनत्वेऽपि निष्प्रमाणकत्वमिति–वाच्यम्; "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्त: प्रश्ननिरूपणाभ्यामि" त्यत्र तत्कल्पने प्रमाणस्य वक्ष्यमाणत्वादित्याशय:। यद्वा–ननु–एवं तर्हि भङ्ग्यन्तरेण प्रधानमेवाभ्युपगतं भवता; जगतो बीजावस्थाया एव प्रधानत्वेन तैरभ्युपगमादिति, नेत्याह– *तदधीनत्वादर्थवदिति*।। अस्मिन् पक्षे सूत्रव्याख्यानं भाष्ये मन्तव्यम्। अर्थवदिति सूत्रावयवं व्याचष्टे– *अर्थवती हि सेति*।। ननु–नामरूपयोरव्याकृतावस्थाया ब्रह्मवन्नित्यत्वमभ्युपगतम्, हन्त तर्हि तस्या प्रधानवद् ज्ञानेनानाशाद् मुक्तानामपि पुनरुत्पत्तिप्रसङ्ग इति, अत आह– *मुक्तानां च पुनरनुत्पत्ति:...विद्यया तस्या बीजशक्तेर्दाहादिति*।। ननु–शक्तिशक्तिमतोरभेदाद् विद्यया शक्तिनाशे शक्तिमतोऽपि नाश: प्रसज्येतेति, नेत्याह– *अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्येति*।। अभ्युपगतेति शेष:। ननु एवं तर्हि परमेश्वरस्याविद्यावत्त्वात् सर्वज्ञत्वहानिरिति, नेत्याह– *परमेश्वराश्रया मायामयीति*।। यथा चैकस्या एवाविद्याशक्तेर्गुणभेदेन कार्यभेद:, अविद्यात्वं च, तथोपपादितमधस्ताद्विस्तरेण। एतेन–प्रतिजीवमबिद्याभेदवादोऽपि–निरस्त:, निराकृतश्चास्माभिरधस्तात्। अतो भाष्यमबुद्ध्वैव कैश्चित् प्रतिजीवमविद्याभेदोपवर्णनं स्वाशयदोषात्।।

तदास्तां तावत्। ननु–एवं तर्हि महत: परत्वं संसारबीजशक्तेरेवोक्तम्, न शरीरस्येति, तत्राह– *तदेतदव्यक्तमिति*।। इन्द्रियादीनां सर्वेषामव्यक्तविकारत्वाविशेषेऽपि शरीरस्यैव तच्छब्देन निर्देश: कृत इति कुतोऽवसीयते? इत्याशङ्क्य तत्रोक्तं परिशेषकारणमाह– *सत्यपि शरीरवदिन्द्रयादीनामिति*।। "सूक्ष्मं तु तदर्हत्वात्" "तदधीनत्वादर्थवत्" इति सूत्रद्वयस्यैकदेशिव्याख्यानमुपन्यस्य दूषयति– *अन्ये तु वर्णयन्तीत्यादिना*।। एतञ्चास्माभिर्निराकृतमधस्तात्।।३।।

ज्ञेयत्वावचनाञ्च।।४।। "गुणपुरुषान्तरज्ञानात् कैवल्यमि" ति ज्ञेयत्वेनैव साङ्ख्यै: प्रधानं निर्दिष्टम्। न चात्राव्यक्तस्य ज्ञेयत्वं श्रूयते। अतोऽपि न साङ्ख्यीयप्रधानस्यात्र प्रत्यभिज्ञानमुचितमिति। पुरुषान्तरम्=पुरुषभेद इत्यर्थ:।।४।।

वदतीति चेन्न प्राज्ञो हि प्रकरणात्।।५।। यदुक्तम्–प्रधानस्य साङ्ख्यैर्ज्ञेयत्वेनैव निर्देशात् अत्र च तस्य ज्ञेयत्वावचनाद् नाव्यक्तशब्दात् साधारणात् तत्प्रत्यभिज्ञानमुचितम्–इति, तदयुक्तम्; तस्य

ज्ञेयत्वावचनासिद्धेः। वदति हि तस्याव्यक्तशब्दवाच्यस्य महतः परस्य प्रधानस्योत्तरत्र मन्त्रे ज्ञेयत्वम्–''अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवञ्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते'' इति। यादृशं हि शब्दादिहीनं महतः परं प्रधानं साङ्ख्यस्मृतौ ज्ञेयत्वेन निरूपितम्, तादृशमेवास्मिन् मन्त्रेऽपि निचाय्यत्वेन निर्दिष्टम्। तस्माद् ज्ञेयत्वावचनासिद्धेः प्रधानमेवेदमव्यक्तशब्दमिति चेत् साङ्ख्यो ब्रूयात्, तन्न; यतः प्राज्ञः परमात्मैव शब्दादिहीनो महतो हिरण्यगर्भात् परो निचाय्यत्वेनास्मिन् मन्त्रे निर्दिश्यते। कुत एतदवगम्यते? प्रकरणादिति ब्रूमः। प्राज्ञस्य ह्येतत् प्रकरणम्; उपक्रमोपसंहारयोर्मध्ये च तन्निर्देशदर्शनात्। अपि च ''एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्रयया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः'' इति प्राज्ञस्यात्मनो दूर्ज्ञेयत्ववचनेन कथं ज्ञेयमित्याकाङ्क्षामुत्थाप्य ''यच्छेद्वाङ्मनसी प्राज्ञ'' इत्यनेन तदुपायभूतवागादिसंयमलक्षणयोगस्य विहितत्वात् तस्यैव शब्दादिहीनस्य निचाय्यत्वकथनमनेन मन्त्रेणोचितम्; अन्यथाऽसम्बद्धप्रलापवदप्रमाणं स्यात्। इतश्च न प्रधानमिह ज्ञेयत्वेन निर्दिश्यते; मृत्युमुखप्रमोकफलश्रवणात्। न हि प्रधानज्ञानाद् मृत्युमुखप्रमोकफलं साङ्ख्यैरभ्युपगम्यते; ''तमेव विदित्वाऽतिमृत्युमेती'' ति श्रुतिविरोधात्। एतेन–पूषानुमन्त्रणानुवाकवद् लिङ्गेन प्रकरणबाधः–निरस्तः ; सर्ववेदान्तेषु प्राज्ञस्यैवाशब्दत्वादिगुणनिर्देशात्। तस्माद् न प्रधानस्यात्र ज्ञेयत्वेन निर्देश्यत्वाभावाद् अव्यक्तशब्दत्वमिति।।५।।

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।।६।। अपि च सर्वा हि कठवल्ली वरप्रदानपूर्वकं मृत्युनचिकेतसोः प्रश्नप्रतिवचनाभ्यामासमाप्तेः प्रवृत्तेति दृश्यते। तत्र किं वरप्रदानसामर्थ्यात् प्रधानस्याव्यक्तशब्दवाच्यत्वं ज्ञेयत्ववचनं चाभ्युपगम्यते, कि वा प्रश्नप्रतिवचनसामर्थ्यात्। नाद्यः ; त्रयाणां चैवमुपन्यासः=त्रयाणामेव वराणामेवमुपन्यासो दृश्यते; त्रीन् वरान् वृण्विति मृत्युना वरत्रय उपक्षिप्ते नचिकेताः प्रथमेन वरेण पितु सौमनस्यं वव्रे; ''एतदृणे प्रथमेन वरेण'' इति लिङ्गात्। द्वितीयेन तु स्वर्ग्यमग्निम्;–''एतत् द्वितीयेन वरेण वृणे'' इति लिङ्गात्। तृतीयेन तु देहादिव्यतिरिक्तात्मास्तित्वविज्ञानम्; ''वराणामेष वरस्तृतीयः'' इति लिङ्गात्। न चैषामन्यतमः पदार्थः प्रधानम्। न व वरान्तरमस्ति, येन वरप्रदानसामर्थ्यात् प्रधानस्येहोपन्यासः स्यात्। अस्तु तर्हि प्रश्नप्रतिवचनसामर्थ्यादिह प्रधानोक्तिरिति चेत्, न; *प्रश्नश्च*।। चकारात् प्रतिवचनमपि समुञ्चीयते; उक्तानुक्तसमुञ्चयार्थत्वात्। तेन त्रयाणामेवाग्निजीवपरमात्मनामेवं प्रश्नः प्रतिवचनं च, नाधिकस्येत्यर्थः। तदेतद् भाष्यकारो दर्शयति स्म– *यस्मात् त्रयाणामेव पदार्थानामिति*।। *व्यवहितं जीवविषयमिति*।। परमात्मस्वरूपविषयकप्रश्नप्रतिवचनाभ्यामिति शेषः। ''येयं प्रेते विचिकित्सा मनुष्ये'' इति देहादिव्यतिरिक्तजीवास्तित्वप्रश्नानन्तरम्–''अन्यत्र धर्मादि'' त्याद्युपबन्धेन

परमात्मस्वरूपविषयकप्रश्नप्रतिवचने प्रवृत्ते, तदनन्तरं च ग्रन्थशेषे तदस्तित्वप्रश्नस्य प्रतिवचनम्–"हनत त इदं प्रवक्ष्यामि" इत्यादिना। अपि च सिद्धे ह्यात्मास्तित्वे तत्स्वरूपप्रश्नप्रतिवचने सम्भवतः। तस्मात् युक्तमुक्तम्–परमात्मस्वरूपप्रश्नप्रतिवचनाभ्यां व्यवहितं जीवविषयं "हन्त ते" इत्यादि प्रतिवचनमिति।।

अत्र केचित्–ग्रन्थमेवं योजयन्ति "हन्त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्" इत्यनेन व्यवहितं जीवविषयम्, "यथाच मरणं प्राप्य आत्मा भवति गोतमे" त्यादि प्रतिवचनमिति योजना–इति।।

एतद् न बुद्ध्यामहे–कथं "हन्ते" त्यनेन "यथाच मरणं प्राप्ये" त्यस्य व्यवहितत्वमिति? "हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।" इति परमात्मप्रतिवचनप्रतिज्ञावाक्यम्, न च जीवप्रश्नस्य, तेन "यथा च मरणं प्राप्ये" ति प्रतिवचनं व्यवहितं युक्तम्; भिन्नविषयत्वादिति चेत्, न; असिद्धेः। "हन्त ते" "यथा चे" ति च मन्त्रभागयोर्भिन्नविषयत्वमसिद्धम्; एकवाक्यतावगमात्। हे गोतम! नचिकेतः। मरणम् स्थूलदेहनियोगं प्राप्यात्मा जीवो यथा भवति=येन प्रकारेणावतिष्ठते, तदिदं गुह्यम्=गोप्यम्, ब्रह्म=बृहत्, सनातनम्=चिरन्तनम्, ते=तुभ्यम्, बत प्रवक्ष्यामि; इत्येकवाक्यता तयोरवगम्यते। न च–आत्मास्तित्वविषयप्रतिवचनं न ब्रह्मविषयम्, येन सदनकरणसादनवाक्ययोरिव लिङ्गेनैकवाक्यताबाधः स्यादिति–वाच्यम्; प्रत्यगात्मब्रह्मणोरेकत्वेन तदेकविषयत्वस्य वक्ष्यमाणत्वात्। अपिच–"अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूताञ्च यत्तत्पश्यसि तद्वदे" ति परमात्मस्वरूपविषयप्रश्नाव्यवधान एव "सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मयर्चं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमि" ति तत्प्रतिवचनप्रतिज्ञानं विफलं स्यात्। तस्मादस्मद्व्याख्यानमेव युक्ततरमिति।।

विमृश्य पक्षद्वयेऽपि विरोधं चोदयति– *अत्राहेति*।। मैवम्; जीवप्राज्ञयोः परामर्थत एकत्वेन विषयाभेदात् प्रश्नैक्योपपत्तेः। न चैवं पृथकप्रश्नोपन्यासानुपपत्तिः ; आत्मास्तित्वतत्स्वरूपविषयत्व-प्रकारभेदेन पृथक्तदुपन्यासोपपत्तेः, तदभिप्रायेण च त्रयाणामिति सूत्रप्रवृत्तेस्तदविरोधादिति। प्रथम-पक्षमादाय परिहति– *अत्रोच्यत इति*।। लिङ्गेन वाक्यबाधो युक्त इत्याशङ्कते– *नन्विति*।।

किं प्रष्टव्यस्वरूपभेदात् प्रश्नभेदश्चोद्यते, किं वा तत्प्रकारभेदात्। तत्र नाद्य इत्याह– *न जीवप्राज्ञयोरेकत्वावगमादिति*।। न केवलं श्रुत्यन्तरेभ्य एव तदैक्यमवगम्यते, इहापि प्रश्नप्रतिवचननिरूपणायां तथात्वमवसीयत इत्याह– *न चेति*।। यद्धि पृष्टम्, तदेव प्रतिवक्तव्यम्; अन्यथाऽऽम्रान् पृष्टः कोविदारानाचष्टे इति न्यायमावहेत्। पृष्टश्च परमात्मा–"अन्यत्र धर्मादि" त्यादिना। अतः स एव जन्ममरणादिधर्मप्रतिषेधेन प्रत्युच्यते–"न जायते म्रियते वा विपश्चिदि"

त्यादिना। न च परमात्मनि ते धर्माः साक्षात् प्रसक्ताः, येन प्रसक्तस्य प्रतिषेधात् तच्छास्त्रमर्थवत् स्यात्। न च "नान्तरिक्षेऽग्निश्चेतव्यः" इतिवद् नित्यानुवादत्वमेवास्तु तस्येति–वाच्यम्; प्रतिवचनत्वव्याहतेः। अतः प्रतिषेधशास्त्रार्थवत्त्वाय प्रतिषेध्यानां प्रसक्तिः परमात्मनि मृग्या। तदिदमुक्तम्–*सति हि प्रसङ्गे प्रतिषेधो भागी भवतीति*।। अर्थवान् भवतीत्यर्थः। तत्र प्रतिषेध्यानां प्रसक्तावन्विष्यमाणायां शारीरे तेषां प्रसङ्गस्य प्रत्यक्षसिद्धत्वात् तत्रैव प्रतिषेधशास्त्रं प्रवर्तमानं शारीरस्य परमात्मस्वरूपाभिन्नत्वमर्थात् गमयति। तस्मात् प्रतिषेधत्वरूपप्रतिवचनसामर्थ्यादेव प्रष्टव्यभेदसिद्धिः। इतश्च तदभेदसिद्धिरित्याह–*तथा स्वप्नान्तमिति*।। अपि च "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इति जीवास्तित्वविषयप्रश्नं नचिकेतस उपश्रुत्य मृत्युस्तदधिकारपरीक्षायै "शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान्" इत्यादिना तेषु तेषु कामेषु तस्यालोभं प्रतीत्य "विद्याभीप्सिनं नचिकेतसं मन्ये। न त्वा कामा बहवोऽलोलुपन्ते" ति तं प्रशस्य तदीयप्रश्नमपि प्रशंसन् अस्मिन् प्रश्ने–"तं दुर्दर्शमि" त्यादिना ब्रह्मैवोत्तरमाह। ततोऽप्यवसीयते–न जीवब्रह्मणोर्भेदोऽस्ति–इति; अन्यथाऽन्यत् पृष्टमन्यच्चोत्तरितमिति किं केन सङ्गच्छेतेत्याह–*तथा जीवविषयस्येत्यादिना*।। इतश्च प्रश्नैक्यमित्याह–*यत्प्रश्ननिमित्तामिति*।। यस्मिन् प्रश्नो यत्प्रश्नः, कर्मधारयो वा। पूर्वपक्षबीजमनुभाष्य परिहरति–*यत्तु प्रश्नच्छायावैलक्षण्यमुक्तमिति*।। तदीयस्य=पूर्वप्रश्नगोचरात्मसम्बन्धिन इत्यर्थः। ननु–उक्तं पूर्वपृष्टसंसारिजीवस्य धर्माधर्मादिगोचरत्वाद् न "अन्यत्र धर्मादि" त्यादिप्रश्नविषयत्वमुपपद्यत इति, नेत्याह–*यावद्धीति*।। एवमप्यवस्थाभेदेन प्रष्टव्यभेद इति, नेत्याह–*न चाविद्यावत्त्व इति*।। का तर्हि सूत्रस्य गतिः? तत्राह–*सूत्रं त्विति*।। ननु–अविद्यावत्त्वे तदपगमे च वस्तुनो विशेषाभावस्योक्तत्वात् तद्विरुद्धमेतत् सूत्रयोजनमिति, नेत्याह–*एकत्वेऽपि ह्यात्मविषयस्य प्रश्नस्येति*।। यद्वा–ननु विषयैक्येन प्रश्नैक्ये–अयमविद्याकल्पितजीवविषयः, अयं च प्राज्ञविषय इति विवेक एव प्रश्नयोः कुतोऽवसीयताम्? तत्राह–*एकत्वेऽपि ह्यात्मविषयस्य प्रश्नस्येति*।।६।।

महद्वच्च।।७।। सुगमस्य भाष्यम्।। इति प्रथममानुमानिकाधिकरणम्।।

इति वार्त्तिकम् आनुमानिकाधिकरणम् समाप्तम्

प्रदीपः

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥१॥ अस्मिन् पादेऽष्टाधिकरणानि वर्तन्ते–(१) आनुमानिकाधिकरणम् अव्यक्तपदार्थनिर्धारणार्थम्, (२) चमसाधिकरणम् अजापदार्थनिर्धारणार्थम् (३) जसंख्योपसंग्रहाधिकरणम् पञ्चपञ्चजन-पदार्थनिर्धारणार्थम् (४) कारणत्वाधिकरणम् कारणवाक्यानां परस्पराविरोधनिर्धारणार्थम् (५) जगद्वाचित्वाधिकरणम् कर्मपदनिर्धारणार्थम् (६) वाक्यान्वयाधिकरणम् आत्मपदार्थनिर्धारणार्थम्, (७) प्रकृत्यधिकरणम् उपक्रान्तजगत्कारणत्वोपसंहारार्थम् (८) सर्वव्याख्याधिकरणम्–सर्वेषामुक्तकारणतावादविरोधिनामश्रौतत्वेनाप्रामाण्यनिर्धारणार्धम्, येनाविरोधाध्यायस्थापि भाविनो द्वारमुदघाटितं भवति॥

अत्र सर्वेषामधिकरणानां साङ्ख्यादिसिद्धान्तस्याश्रौतत्वसमर्थनद्वाराऽभिन्न-निमित्तोपादानब्रह्मस्वरूपस्यैव श्रौतत्वव्यवस्थापने पर्यवसानात् समन्वयाध्यायसङ्गतिः ; साङ्ख्यादिपारिभाषिकशब्देन तदीयकारणवादप्रत्यभिज्ञानादिनिरसनेन ब्रह्मणि समन्वयोपयोगित्वात्॥

अयमाशयः–गतिसामान्यं प्रतिज्ञातमानन्दमयादिवाक्यपरीक्षणेन ब्रह्मणि व्यवस्थापितम्। ईक्षतेर्नाशब्दमिति सिद्धवत्कृताशब्दत्वं तु प्रधानादेरनेन पादेन प्रपञ्चयते सर्वेषां कारणवाक्यानामविरोधादिनिरूपणेन, येन ''जन्माद्यस्य यत'' इति जिज्ञास्यब्रह्मलक्षणम-भिन्ननिमित्तोपादानत्वरूपं सिद्धं भवतीति। अत्र पदविशेषाणां ब्रह्मकारणतावादानुगुणं योजनं प्राधान्येन पादार्थः। अयं च प्रथम द्वितीय तृतीय पञ्चमं षष्ठाधिकरणेषु वर्तते, चतुर्थाधिकरणं कारणवाक्यानामविरोधम्, सप्तमाधिकरणं कारणताप्रकारविशेषम्, येन निर्गुणब्रह्मवाद एव पर्यवसानं स्यात्, अष्टमं तु मतान्तरस्याश्रौतत्वस्य सिद्धवदनूदितस्योपपादितस्य चोपसंहारं च गोचरयतीति वस्तुस्थितिः। तदिदमुक्तम्– *ब्रह्मजिज्ञासामित्यादिना–परः सन्दर्भः प्रवर्तत्त इत्यन्तेन*॥

आनुमानिकम्=प्रधानम्, एकेषां शाखिनाम्, कठवल्ल्यादिशाखाविशेषगताव्यक्तादिपद-प्रतिपाद्यम्, इति चेत्, न; तत्रत्यावयक्तशब्दस्यौपनिषदाभिमतशरीरविशेषपरत्वेन तत्परत्वाभावादिति सूत्रार्थः। तदिदमाह– *आनुमानिकमिति*।।

अत्रापिशब्दैकशब्दयोः स्वारस्येन कल्पतरुकाराः–कल्पभेदेन कारणभेदमादाय प्रत्यवस्थाने तन्निराकरणार्थमुत्तरः प्रपञ्च इति–वदन्ति। वार्तिके तु–अप्येकशब्दयोः पूर्वपक्षनिरासपरतयोपयोगात्, कल्पभेदेन कारणभेदस्याप्रसिद्धत्वाञ्च नेदमुपपन्नमिति विस्तरेणोपपादितम्। वयं तु पश्यामः–इति चेत् नेति विशयं पूर्वपक्षनिरासेना 'प्येक' शब्दयोस्तथा योजनस्यास्वरसत्वात्, कल्पभेदेन कारणभेदवादाप्रसिद्धावपि मध्यस्थस्य कस्यचनोक्ताशङ्कासंभवाच नात्यन्तमवहेयं कल्पतरुकाराणां योजनमपि–इति। पूर्वपक्षं संगृह्णाति– *काठके हीत्यादिना*।।

समाधत्ते– *नैतदेवमित्यादिना*।। शब्दमात्रप्रत्यभिज्ञानमकिञ्चित्करम्; तस्य मतान्तरसाधारण्यादिति भावः। तदाह– *न ह्यत्रेति*।। अद्वैतमतसाधारण्यमव्यक्तशब्दस्य वक्ष्यमाणमेव सौकर्यार्थमनुसन्धत्ते– *स च शब्द इत्यादिना*।। ''इन्द्रियेभ्यः परा ह्यर्था'' इति क्रमप्रत्यभिज्ञानमप्यकिञ्चित्करमित्याह– * न चेति*।। प्रकरणविरोधं पूर्वपक्ष आह– *प्रकरणेति*।। प्रकरणं दर्शयति– *शरीरस्वरूपकेति*।। ''आत्मानं रथिनं विद्धी'' ति वाक्ये परिशेषेणव्यक्तस्यैव ''शरीरं रथमेव तु'' इत्यत्र शरीरपदेन ग्रहणात् शरीरमेवात्राव्यक्तपदार्थ इति भावः। तदिदमाह– *शरीरं हीति*।। तत्र हेतुः सूत्रे– *दर्शयति चेति*।। तदिदं विवृणुते– *तथा हीत्यादिना*।। शरीस्यैव परिशेषमुपपादयति– *तत्रैत्यादिना*।। *परत्वमिति*।।

अत्र भामती–परशब्दः श्रेष्ठवचनः। श्रेष्ठत्वं चार्थानां नान्तरत्वेन, किन्तु प्रधानतया। तञ्च विवक्षाधीनम्। ग्रहेभ्यश्चेन्द्रियेभ्योऽतिग्रहतयार्थानां प्राधान्यं श्रुत्या विवक्षितमिति–वदति। वार्तिके तु–अन्तरत्वेनाप्यस्तीन्द्रियेभ्योऽर्थानां परत्वम्; गन्धादितन्मात्ररूपभूतसूक्ष्माणां घ्राणादीन्द्रियो-पादानत्वात्, श्रुतिभाष्ये तथैव व्याख्यानादित्युक्तम्। कठवल्लीषु श्रुते–''इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः'' ''मनसः सत्त्वमुत्तममि'' ति मन्त्रे तूत्तमत्वमेव परत्वं विवक्षितम्। भाष्यकारोऽपि प्रकृते–इन्द्रियाणां ग्रहत्वमर्थानामतिग्रहत्वमिति वर्णनेनोत्तमत्वमेव मन्यते। फलतंस्तु न विशिष्टो भेद इति न श्रुतिभाष्येणापि विरोध इति मन्तव्यम्।।१।।

शरीरस्य व्यक्तस्याव्यक्तशब्दत्वमुपपादयितुं सूत्रम्– *सूक्ष्मं तु तदर्हत्वात्*।।२।। *सूक्ष्मं त्विह कारणात्मनेति*।। तथाच कारणशरीरमेवात्राव्यक्तपदार्थ इति भावः।।२।।

तदधीनत्वादर्थवत्॥३॥ परमेश्वरस्य स्रष्टृत्वानुपपत्तिरस्मिन्नव्यक्तपदार्थे मायापरपर्याये प्रमाणमिति सूत्रार्थः। न केवलमीश्वरस्य सृष्टत्वानुपपत्तिः, किन्तु जीवानां मुक्त्यनुपपत्तिरपि तत्र प्रमाणमित्याह *मुक्तानां चेति*॥ अनङ्गीकारे ह्यस्याः शुद्धं चैतन्यमात्रं यदि प्रपञ्चहेतुः स्यात्, तर्हि मुक्तानामपि पुन रुत्थानापत्तिरिति भावः॥

अयमाशयः—बद्धानां पुनरुत्पत्तिः, मुक्तानामनुत्पत्तिश्च याऽवगम्यते, सा हि प्रतिजीवमविद्याभेदं विना नोपपद्यते; तत्तदविद्यावत्त्वं बन्धः, तत्तदविद्यादाहो मुक्तिरिति स्वीकारणीयत्वात्। तथाचेश्वरस्य सृष्टत्वांर्थ जीवानां बन्धमोक्षव्यवहारार्थ चाविद्या स्वीकरणीया, अन्यथैकमुक्तौ सर्वमुक्त्यापत्तिरित्यनादिमूलाविद्यायामिव तद्भेदेऽपीदं सूत्रं गमकमित्यङ्गीकर्तव्यम्; अन्यथेश्वराश्रितैकमायाया एवाव्यक्तपदार्थत्वे विवक्षिते "महतः परामव्यक्तमि" ति तत्तज्जीवात्मापेक्षया परत्वमुक्तमनुपपन्नं स्यादिति मन्तव्यम्॥

इदमेवाभिप्रेत्येयं भामती—"अयमभिसन्धिः—न प्रधानवद् अविद्यां सर्वजीवेष्वेकामाचक्ष्महे, येनैवमुपालभ्येमहि, किन्त्वियं प्रतिजीवं भिद्यते, तेन यस्यैव जीवस्य विद्योत्पन्ना, तस्यैवाविद्याऽपनीयते, न जीवान्तरस्य, भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात्"—इति। अनया भामत्या जीवाश्रया ब्रह्मविषयिण्यविद्येति, सा च केवलं निमित्तकारणमिति च बोध्यते। स्पष्टं चात्रैव प्रकरण उपरि तस्माद् जीवाधिकरणाप्यविद्या निमित्ततया विषयतया चेश्वरमाश्रयत इत्युच्यते, न त्वाधारतयेति स्वीयः सिद्धान्तो भामत्यामेव विवेचितः। यथा चाविद्यानानात्वेऽपि प्रमाज्ञानानामावरणाभिभवार्थत्वम्, तथा सिद्धान्तलेशसंग्रहे व्यक्तम्। अत्राविद्याया एकत्ववादस्यैव स्वीकारे तु प्रधानस्यैव प्रत्यभिज्ञानमिति शङ्का न परिहर्तुं शक्यत इत्यतोऽपि तन्नानात्वे सूत्रतात्पर्यमिति भामत्यामेव व्यक्तम्। तथाच पूर्वपक्षसिद्धान्ताभिमताव्यक्त- पदार्थयोरेकत्वानेकत्वोपादानत्वनिमित्तत्वज्ञानानिवर्त्यत्व तन्निवर्त्यत्वादिकृतं वैषम्यं वर्तते, इति भामत्यभिमतो निष्कर्षः॥

अत्र वार्तिके—प्रतिजीवमविद्याभेदस्याधस्तात् निरासाद् भाष्याशयानवबोधनिबन्धनैवोक्तभामतीति निरूपितम्। *परमेश्वराश्रया मायामयी महासुषुप्तिरिति*॥

भामतीमतरीत्याऽस्यावरणस्य ब्रह्मविषयत्वाद् ईश्वराश्रयत्वमिति निरूपितम्। विवरणाद्यनुसारिवार्तिकदृष्टया तु ईश्वराश्रया मायामयीति विक्षेपशक्त्यापि माया ब्रह्माश्रयेति मन्तव्यम्। परंतु—महासुषुप्तिरिति वर्णनात् मायाया आवरणशक्तिमात्रमेव, न विक्षेपशक्तिः, प्रपञ्चस्तु केवलं ब्रह्मणो विवर्त इति सिद्धान्त एव भाष्यारूढः प्रतीयते। वार्तिकादिमते तु—विक्षेपशक्तिरप्यविद्यायाः स्वीक्रियते, एकत्वमेव च स्वीक्रियते, अव्यक्तशब्दवाच्यत्वमपि

स्वीक्रियते, केवलमीश्वराश्रयत्वमधिकं मन्यते, इति कथं वाऽव्यक्तपदेन प्रधानस्य न प्रत्यभिज्ञानम्? एतेन नविलक्षणत्वाद्यधिकरणोत्थितिरपि भामतीमत एव, न वार्तिकादिमत इति सूच्यते; यतः प्रपजस्य मायोपादानकत्वस्वीकाराद् जाडयाद्यनुभवो न विरुद्ध इति तत्रैव विशदीभविष्यति। सर्वथा तु भाष्याशयानवबोधो भामतीकारणामिति प्रौढिवादमात्रम्।।

यस्याम्=यस्यां सत्याम्। स्वरूपप्रतिबोधरहिता इति। अनेन जीवाधारकत्वम्, आवरणशक्तिमात्रं चाविद्यायाः प्रतिपाद्यते। अत्र मते–बीजशक्तिरिति ब्रह्मोपादानताप्रयोजकत्वं विवक्ष्यते। *तदेतदव्यक्तमिति*।। मायाया अक्षरादिपदबोध्यत्वमिवाव्यक्तपदबोध्यत्वमपि वर्तते, इत्यद्वैतिनां मतम्, साङ्ख्यानां तु अव्यक्त प्रकृति प्रधानपदैरेव। अक्षरादिपदेन तु योगेनैवेति वक्तव्यम्। सति चैवम्–प्रधानेऽक्षरादिपदमिवास्मदीयमायायामव्यक्तपदमपि योगेन न विरुद्धमिति भावः। कुतोऽऽवक्तशब्दार्हत्वं मायाया इति? अत आह–*अव्यक्ता हीति*।। व्यञ्जकधर्मशून्यत्वादित्यर्थः। तदेतदाह– *तत्त्वेति*।। ननु–जीवाश्रयाऽविद्येति वादेनास्य ग्रन्थस्य यदि प्रवृत्तिः, तर्हि वक्तव्यम्–किं व्यष्टिजीवापेक्षया, उत समष्टिजीवापैक्षया। आद्येऽपि समष्टयविद्याया अव्यक्तपदार्थत्वम्, व्यष्टयविद्याया वा। तत्र नाद्य आद्यः कल्पः संभवति; व्यष्टिजीवस्य समष्टयविद्याश्रयत्वायोगात्। अत एवाद्ये न द्वितीयोऽपि; समष्टिजीवापेक्षया व्यष्टयविद्यायाः परत्वासंभवात्। अन्त्येऽप्येवं विकल्पेन तु सोऽप्यनुपपन्न एवेत्यतो व्यवस्थापयति–*यदा हैरण्यगर्भीति*।। *यदा त्विति*।। तथाच द्विविधजीवाविद्याविवक्षायामपि न दोषः ; व्यष्टिजीवाश्रिता व्यष्टयविद्या, समष्टिजीवाश्रिता समष्टयविद्येति व्यवस्थासंभवात्। तथाच मूलाविद्याऽवस्थाऽज्ञानभेदेनाविद्याद्वैविध्यमपि स्वीकर्तव्यमेव। तदिदमुक्तम्– ''अनिर्वाच्या- विद्याद्वितयसचिवस्ये''ति।। इतोऽपि जीवाश्रिताविद्याया एवाव्यक्तपदार्थत्वम्, यतोऽव्यक्तस्य शरीरत्वेन रूपणम्; न हि मायायामीश्वराश्रयायां विवक्षितायां शरीरपदप्रयोगस्तत्रोपपद्यत इति सूचयन् व्यष्टयव्यक्तेऽप्यव्यक्तपदप्रयोगमुपपादयति–*महतः परमिति*।। तद्विकारे=समष्टय- विद्याविकारे। अवस्थाऽज्ञानानां मूलाविद्याप्रयुक्तत्वेन तद्विकारत्वमिति भावः। शरीरे=व्यष्टिकारण- शरीर इत्यर्थः। एतेन–शरीरपदेन न स्थूलशरीरस्य ग्रहणम्, न वा लिङ्गशरीरस्य; इन्द्रियमनोबुद्धीनां पृथगुपादानात्, इन्द्रियेभ्य इत्यत्र प्राणानामग्रहणात्तु प्राणाभिप्रायेण लिङ्गशरीरविवक्षाऽपि न संभवतीति किं तत् सूक्ष्मं शरीरमव्यक्तपदवाच्यमिति शङ्काऽपि–प्रत्युक्ता; स्पष्टमेव भाष्ये व्यष्टिसमष्टयविद्याया अव्यक्तपदार्थत्वविवेचनात्। तथाच शरीररूपकेतिसूत्राक्षरस्वारस्यामप्यविद्याया जीवाश्रयत्वपक्ष एवेति फलति। मतान्तरे हि शरीरत्वेन रूपणमेवेश्वराश्रितमायायामनुपपन्नम्। एवं सूक्ष्मं शरीरं गृह्यत इति भाष्यममप्यनुपपन्नं स्यात्। सूक्ष्मं

शरीरं गृह्यत इति भाष्यमप्यनुपपन्नं स्यात्। सूक्ष्मं शरीरमित्यनेन लिङ्गशरीरं विवक्षितमिति केषाञ्चन विवरणमनुपादेयमेवेति भाष्यकार एव स्वयमनुभाष्य दूषयति-*अन्ये त्वित्यादिना*।। अन्यत्स्पष्टार्थम्।।३।।

ज्ञेयत्वावचनाञ्च।।४।। न केवलं बन्धमोक्षव्यवहाराहेतुत्वहेतुत्वाभ्याम्, किन्तु ज्ञेयत्वाज्ञेयत्वाभ्यामप्यत्रत्याव्यक्तप्रधानयोभेद इत्यनेन सूत्रेणोच्यते। ''व्यक्ताव्यक्तज्ञविज्ञानादि'' ति हि अव्यक्तज्ञानमपि नियतं मुक्तय इति हि साङ्ख्याः। अव्यक्तं तु नात्र ज्ञेयतया विवक्षितम्'' इत्यत्र सूत्रे व्यक्तम्।।४।।

यत्-''अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवञ्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते''।। इति, तदिदं यद्यपि परस्य पुंलिङ्गेन निर्देशात् ततः पूर्वम्-''अव्यक्तात् पुरूषः परः'' इति वाक्यानन्तरं नपुंसकग्रह्मपदाप्रयोगाञ्चाव्यक्तपरं प्रतीयते; तथापि परमात्मप्रकरणत्वादस्य सन्दर्भस्य, ''उक्तवा श्रुत्वा च मेधावी ब्रह्मलोके महीयत'' इति ब्रह्मप्राप्तिफलनिर्देशात्, आत्मब्रह्मपदयोः पर्यायत्वेन लिङ्गव्यत्ययेन बहुषु स्थलेष्वात्मनो वा ब्रह्मणो वा निर्देशस्य विद्यमानत्वाञ्च न प्रधानपरमिदं वाक्यमिति सूचयति-*वदतीति चेन्न प्राज्ञो हि प्रकरणात्*।।५।। पूर्वतनवाक्यैकवाक्यता प्रधानपरत्वे नोपपद्यत इति साधयन् उक्ताशङ्कां निवारयां सूत्रविवरण रस्सरम्-* अत्र ब्रम इत्यादिना*।। न केवलं पूर्वतनवाक्यैकवाक्यताविरोधात्, कि[illegible] स्ववाक्यशेषानन्वयादपि नेदं वाक्यं प्रधानपरमित्याह-*न हि प्रधानमात्रमिति*।। ''निचा[illegible]य तन्मृत्युमुखादि'' त्यस्य निचाय्य तदेव मृत्युमुखात् प्रमुच्यत इत्येवार्थः ; ''तमेव विदित्वातिमृत्युमेती'' ति श्रुत्यन्तरादिति भावः। वस्तुतस्तु-अशब्दत्वादिकमपि ब्रह्मसाधारणमेव, इति न तेनापि प्रत्यभिज्ञानसंभव इत्याह-*सर्वेषु वेदान्तेष्विति*।।५।।

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च।।६।। त्रयाणामग्निजीवपरमात्मनामेव ज्ञेयतयोपन्यासः प्रश्नश्चात्र प्रकरणे वर्तते, न तु प्रधानस्यापि; अन्यथाऽर्थेन्द्रियादीनामपि परत्वादिना ज्ञेयत्वकल्पनापत्तिः। तञ्च न युक्तम्; आध्यानायन्ययविरोधात्। तथाच वरदानव्यतिरेकेण प्रश्नोपन्यासादिकल्पनानुपपत्तिरिति सूत्राशयः। तदिदमाह-*इतश्चेत्यादिना*।। पदार्थानाम्=अभिधेयानाम्। तेन लक्ष्यतया जीवपरमात्मनोरेकत्वेऽपि, एकप्रश्नविषयत्वेऽपि वा न विरोधः। तथाच त्वम्पदवाच्यार्थस्य लक्ष्यार्थस्य च जिज्ञासैव-''येयं प्रेते विचिकित्से'' ति वाक्यार्थ इति भावः। *त्रयाणामिति*।। वाच्यार्थभेदमादाय। परमार्थतस्तु द्वयोरेवाग्निपरमात्मनोरिति भावः।।

ननु-स्वेच्छया मृत्युनैवापृष्टमपि किञ्चिदुक्तं स्यादित्यत आह-*वरप्रदानसामर्थ्यादिति*।।

विद्योपदेशे स्वेच्छा न नियामिका भवति; अन्यथा वरत्रयदानं वितथं स्यादिति भावः। अतः=अग्निजीवपरमात्मभ्यः। अन्यस्य=प्रधानादेः। तत्राग्निजीवपरमात्मविषयप्रश्नान् संगृह्णाति–*स त्वमग्निमिति*।। येयं प्रेते इति च*।। एष वरः= येयं प्रेत इति वाक्योपक्षिप्तो वरः। तृतीयः=पितृसौमनस्याग्निविद्यावराभ्यामतिरिक्तः। *इति जीवविषय इति*।। ननु–एवं सति परमात्मविषयं प्रश्नान्तरमेव स्यात्, इत्यत आह–*अन्यत्र धर्मादिति*।। धर्माधर्माद्यतीततया जीवात्मस्वरूपविषयोऽयं प्रश्नः परमात्मविषयोऽपि जीवविषय एव। अत एव तृतीय एव, न तुरीयः।।

इयमत्र प्रकरणशुद्धिः–"येयं प्रेत" इति तृतीयप्रश्ने कृते मृत्युना बहुधा प्रलोभितोऽपि नचिकेता न वरान्तरमवृणोत्, "यतो नान्यो वरस्तुल्य एतस्य कश्चित्" इति वारान्तरं स्पष्टमेव प्रत्याचष्टे, "योऽयं वरो गूढमनुप्रविष्टो नान्यं वरं नचिकेता वृणीते" इत्युपसंहाराञ्च। ततस्तु सन्तुष्टो मृत्युः–आत्मविद्यां स्तौति–"अन्यच्छ्रेयोऽन्यदुतैव प्रेय" इत्यादिना–"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। आध्यात्मयोगाधिगमेन धीरो मत्वा धीरो हर्षशोकौ जहाति" इत्यन्तेन। अस्यां चावस्थायां स्वप्रश्नोत्तरमपश्यन् नचिकेताः पुनरपि स्मारयति प्रश्नेनानेन–"अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताञ्च भव्याञ्च यत्तत् पश्यसि तद्वदे" ति। सति चैवं ज्ञाताज्ञातविवेकन्यायेनाज्ञातात्मतत्त्वमेव मया पृष्टम्, तत्केवलं वद, किमनेन विषयान्तरोपन्यासेनेति नचिकेतोऽभिप्राय इति गम्यते, इति तृतीयप्रश्नस्यैव रूपान्तरम्–"अन्यत्र धर्मादि" ति। ततस्तदुत्तरप्रसङ्गेन "एतद्ध्येयवाक्षरं ब्रह्मे" त्यादि वाक्यजातम्। तथाच नेदं प्रश्नान्तरम्, न वा तृतीयवरविषयाद्विषयान्तरम्–इति। तथाच परमात्मविषयप्रश्नोत्तरं प्रथमम्, अनन्तरं च नचिकेतसाऽपि ज्ञातात्मस्वरूपविवेचनं द्वितीयवल्ल्यां करिष्यते, यतः परमात्मन एव जीवभाव आरोपितस्तत्तदवस्थाभेदेन, नायं परमात्मा मया मृत्युनोक्तो जीवादन्यः, इति "हन्त त इदं प्रवक्ष्यामी" त्यादि वचनम्। तदिदमाह–*प्रतिवचनमपीति*।। प्रथममग्नेः, व्यवहितम्=परमप्रतिवचनेन व्यवहितमपि द्वितीयवल्ल्यां प्रतिपादयिष्यमाणं "हन्त त" इत्यादिवाक्यानन्तरेण–यथाचेत्यादिना। तृतीयमिति यावत्। जीवविषयम्, "न जायत" इत्यादिना "अन्यत्र धर्मादि" त्यव्यवहितोत्तरं प्रतिपाद्यमानम्, द्वितीयमिति यावत्; परमात्मविषयमिति योजना।।

इयमत्र भामती–"हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्।" इत्यनेन व्यवहितं जीवविषयम्–"यथा तु मरणं प्राप्य आत्मा भवति गौतमे" ति। तथाच–गुह्यं सनातनमित्यन्तं परमात्मविषयम्, यथाचेत्यादिजीवविषयमिति विवेकः। तथाच–इदं गुह्यं सनातनं च ब्रह्म, यथाचात्मा मरणं प्राप्य भवति, तथेति शेषः, ते हन्त प्रवक्ष्यामि इति योजना। अस्यां हि योजनायां

ब्रह्मपदस्य बृहदित्याद्यर्थकल्पना न भवति, धर्माधर्माद्यतीतजीवस्वरूपस्यैव ब्रह्मस्वरूपत्वं प्रतिपादितं भवति॥

वार्तिके तु-हन्तेत्यनेन कथं ''यथाच मरणं प्राप्ये'' त्यस्य व्यवधानम्, ''हन्ते'' त्यादिनैव यथाचेत्यस्यैकवाक्यतावगमात्, नचिकेतः! मरणं प्राप्य जीवो यथा भवति, तदिदं गुह्यं ब्रह्म बृहत् सनातनं प्रवक्ष्यामीति योजनासंभवात्, अतः व्यवहितं ''हन्ते'' त्यादिना प्रतिवचनमिति योजनमेव युक्ततरमिति-वर्णितम्, सर्वथा तु न फलभेदो महानत्र विचारे वर्तत इति युक्तयुक्ततरत्वादिनिर्णये विवेकिन एव प्रमाणमिति मत्वा तन्मतोपन्यासमात्रमस्याभिः कृतम्। आत्मविषये किमेकः प्रश्नः, उत द्वौ प्रश्नौ। उभयथापि दोषमनुभा यैक प्रश्नत्वं प्रकारमात्रभेदेन प्रष्टव्यभेदं च विशदमुपपादयति- *अत्राहेत्यादिना*॥ सूत्रे त्रयाणामिति शब्दमुपपादयति -*सूत्रं त्वित्यादिना*॥ प्रधानविषये न प्रश्नः, न वा प्रतिवचनमिति न तस्य ज्ञेयत्वमित्युपसंहरति- *प्रधानकल्पनायामिति*॥ वैषम्यमिति। अतो न तस्य ज्ञेयत्वमिति शेषः॥६॥

यदि प्रधानस्य ज्ञेयत्वमत्रोपक्षेपमात्रेण कल्प्येत, तर्हि महदादीनामपि तत्कल्पनापत्तिः। न च तद्युक्तम्; तज्ज्ञानस्य मोक्षानुपयोगादिति भावः। वस्तुतस्तु न साङ्ख्याभिमतस्याव्यक्तपदार्थस्यात्र ग्रहणम्, तदीयपदार्थक्रमेणाव्यक्तस्यात्रानुपन्यासात्। न हि महान् पदार्थोऽत्र साङ्ख्याभिमतः ; तस्यात्मपरत्वात् साङ्ख्यमते य महत आत्मत्वानङ्गीकारादित्याह सूत्रकारः महद्वच्च पूर्वोक्तमेवार्थ विशदयति भाष्यकारः- *यथा महच्छब्द इत्यादिना*॥७॥ इति प्रथममानुमानिकाधिकरणम्॥

इति प्रदीपः आनुमानिकाधिकरणम् समाप्तम्

भामती

स्यादेतद्–ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मणो लक्षणमुक्तं जन्माद्यस्य यत इति, तच्चेदं लक्षणं न प्रधानादौ गतं येन व्यभिचारादलक्षणं स्यात्, किन्तु ब्रह्मण्वेवेतीक्षतेर्नाशब्दमिति प्रतिपादितम्। गतिसामान्यञ्च वेदान्तवाक्यानां ब्रह्मकारणवादं प्रति विद्यते, न प्रधानकारणवादं प्रतीति प्रपञ्चितमधस्तनेन सूत्रसन्दर्भेण, तत्किमवशिष्यते यदर्थमुत्तरः सन्दर्भ आरभ्यते। न च महतः परमव्यक्तमित्यादीनां प्रधाने समन्वयेऽपि व्यभिचारः। नह्येते प्रधानकारणत्वं जगत आहुः। अपि तु प्रधानसद्भावमात्रम्। न च तत्सद्भावमात्रेण जन्माद्यस्य यत इति ब्रह्मलक्षणस्य किञ्चिद्धीयते। तस्मादनर्थक उत्तरः सन्दर्भ इत्यत आह *ब्रह्मजिज्ञासां प्रतिज्ञाय इति*। न प्रधानसद्भावमात्रं प्रतिपादयन्ति महतः परमव्यक्तमित्यादयः किन्तु जगत्कारणं प्रधानमिति। महतः परमित्यत्र हि परशब्दोऽविप्रकृष्टपूर्वकालत्वमाह। तथा चकारणत्वम्, अजामेकामित्यादीनां तु कारणत्वाभिधानमतिस्फुटम्। एवञ्च लक्षणव्यभिचारापत्तावऽव्यभिचाराय युक्त उत्तरसूत्रसन्दर्भाररम्भ इति।

पूर्वपक्षयति *तत्र य एव इति*। सांख्यप्रवादरूढिमाह *तत्राव्यक्तम् इति*। सांख्यस्मृतिप्रसिद्धेर्न केवलं रुढिरवयवप्रसिद्धयाप्ययमेवार्थोऽवगम्यत इत्याह "न व्यक्त इति। शान्तघोरमूढशब्दादिहीनत्वाच्चेति। श्रुतिरुक्ता स्मृतिश्च साख्यीया। न्यायश्च–

'भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च।
कारणकार्य्यविभगादविभागाद्वैश्वरूप्यस्य।।

कारणमस्त्यव्यक्तम्' इति।

न च महतः परमव्यक्तमिति प्रकरणपरिशेषाभ्यामव्यक्तपदं शरीरगोचरम्, शरीरस्य शान्तघोरमूढरूपशब्दाद्यात्मक्तवेनाव्यक्तत्वानुपपत्तेः। तस्मात्प्रधानमेवाव्यक्तमुच्यत इति प्राप्ते, उच्यते–

नैतदेवं न ह्येतत्काठकं वाक्यम् इति। लौकिकी हि प्रसिद्धी रुढिर्वेदार्थनिर्णये निमित्तं, तदुपायत्वात्। यथाहु:–''य एव लौकिका: शब्दास्त एव वैदिकास्त एव चैषामर्था:'' इति; न तु परीक्षकाणां पारिभाषिकी, पोरुषेयी हि सा न वेदार्थनिर्णयनिबन्धनसिद्धौ निमित्तम् औषधादिप्रसिद्धिवत्। तस्मात् रूढितस्तावन्न प्रधानं प्रतीयते। योगरूढस्त्वन्यत्रापि तुल्य:। तदेवमव्यक्तश्रुतावन्यथासिद्धायां प्रकरणपरिशेषाभ्यां शरीरगोवरोऽयमव्यक्तशब्द:। यथा अस्य तद्गोचरत्वमुपपद्यते, तथाऽग्रे दर्शयिष्यति। तेषु शरीरादिषु मध्ये विषयांस्तदृगोचरान् विद्धि। यथाऽश्वोऽध्वानमालम्ब्य चलति, एवमिन्द्रियहया: स्वगोचरमालम्ब्येति। आत्मा भोक्तेत्याहुर्मनीषिण। कथम्? इन्द्रियमनोयुक्तम् योगो यथा भवति। इन्द्रियार्थमन: सन्निकर्षेण ह्यात्मा गन्धादीनां भोक्ता। प्रधानस्याकांक्षावतो वचनं प्रकरणमिति गन्तव्यं विष्णो: परमं पदं प्रधानमिति तदाकांक्षामवतारयति *तैश्चेन्द्रियादिभिरसंयतैरिति*। असंयमाभिधानं व्यतिरेकमुखेन संयमावदातीकरणम्। परशब्द: श्रेष्ठवचन:।

नन्वान्तरत्वेन यदि श्रेष्ठत्वं तदेन्द्रियाणामेव बाह्येभ्यो गन्धादिभ्य: श्रेष्ठत्वं स्यादित्यत आह *अर्था ये शब्दादय इति*। नान्तरत्वेन श्रेष्ठत्वमपि तु प्रधानतया, तच्च विवक्षाधीनम्, ग्रहेभ्यश्चेन्द्रियेभ्योऽतिग्रहतकयाऽर्थानां प्राधान्यं श्रुत्या विवक्षितमितीन्द्रियेभ्योऽर्थानां प्रधान्यात् परत्वं भवति। प्राणजिह्वावाक्चक्षु: श्रोत्रमनोहस्त्वचो हीन्द्रियाणि श्रुत्याष्टौ ग्रहा उक्ता:। गृह्णन्ति वशीकुर्वन्ति खल्वेतानि पुरुषपशुमिति। न चैतानि स्वरूपतो वशीकर्त्तुमीशते, यावदस्मै पुरुषपशवे गन्धरसनामरूपशब्दकामकर्मस्पर्शान्नोपहरन्ति। अत एव गन्धादयोऽष्टावतिग्रहा:, तदुपहारेण ग्रहाणां ग्रहत्वोपपत्ते:। तदिदमुक्तम्–*इन्द्रियाणां ग्रहत्वं विषयाणामतिग्रहत्वमिति श्रुतिप्रसिद्धेरिति*। ग्रहत्वेनेन्द्रियै: साम्येऽपि मनस: स्वगतेन विशेषेणार्थेभ्य: परत्वमाह *विषयेभ्यश्च मनस: परत्वमिति*। कस्मात् पुमान् रथित्वेनोपक्षिप्तो गृह्यते इत्यत आह *आत्मशब्दादिति*। तत्प्रत्यभिज्ञानादित्यर्थ:। श्रेष्ठत्वे हेतुमाह *भोक्तुश्चेति*। तदनेन जीवात्मा स्वामितया मानुक्त:। अथवा श्रुतिस्मृतिभ्यां हैरण्यगर्भी बुद्धिरात्मशब्देनोच्यत इत्याह *अथवेति*। *पूरिति*। भोग्यजातस्य बुद्धिरधिकरणमिति बुद्धि: पू:, तदेवं सर्वासां बुद्धीनां प्रथमजहिरण्यगर्भबुद्ध्येकनीडतया हिरण्यगर्भबुद्धेर्महत्त्वं च, आपनादात्मत्वं च। अत एय बुद्धिमात्रात् पृथक्करणमुपपन्नम्। नन्वेतस्मिन् पक्षे हिरण्यगर्भबुद्धेरात्मत्वान्न रथिन आत्मनो भोक्तुरत्रोपादानमिति न रथमात्रं परिशिष्यतेऽपि तु रथवानपीत्यत आह *एतस्मिंस्तु पक्ष इति*। यथा हि समारोपितं प्रतिबिम्बं बिम्बान्न वस्तुंतो भिद्यते तथा न परमात्मनो विज्ञानात्मा वस्तुतो भिद्यते इति परमात्मैव रथवानिहोपात्तस्तेन रथमात्रं परिशिष्टमिति। अथ रथादिरूपककल्पनाया शरीरादिवृ किं प्रयोजनमित्यत आह

शरीरेन्द्रियमनोबुद्धिविषयवेदनासंयुक्तस्य हीति। वेदना सुखाद्यनुभवः। प्रत्यर्थमञ्चतीति प्रत्यगात्मेह जीवोऽभिमतस्तस्य ब्रह्मावगतिः। न च जीवस्य ब्रह्मत्वं मानान्तरसिद्धं, येनात्र नागमोऽपेक्ष्येतेत्यत आह *तथा चेति*। वागिति छान्दसो द्वितीयालोपः। शेषमतिरोहितार्थम्।।१।।

पूर्वपक्षिणोऽनुशयवीजनिराकरणपरं सूत्रम् *सूक्ष्मं तु तदर्हत्वात्*। प्रकृतेर्विकाराणामनन्यत्वात् प्रकृतेरव्यक्तत्वं विकार उपचर्य्यते। यथा गोभिः श्रोणीतेति गोशब्दस्तद्विकारे पयसि। अव्यक्तात् कारणाद् विकाराणामनन्यत्वेनाव्यक्तशब्दार्हत्वे प्रमाणमाह *तथा च श्रुतिः इति*। अव्याकृतमव्यक्तमित्यनर्थान्तरम्।। नन्वेवं सति प्रधानमेवाभ्युपेतं भवति, सुखदुःखमोहात्मकं हि जगदेवम्भूतादेव कारणाद्भवितुमर्हति कारणात्मकत्वात्कार्यस्य। यच्च तस्य सुखात्मकत्वं तत्सत्त्वम्, यच्च तस्य दुःखात्मकत्वं तद्रजः, यच्च तस्य मोहात्मकत्वं तत्तमः। तथा चाव्यक्तं प्रधानमेयाभ्युपेतमिति।।२।।

शङ्कानिराकरणार्थ सूत्रम्—तदधीनत्वादर्थवत्।

प्रधानं हि सांख्यानां सेश्वराणामनीश्वराणां वेश्वरात् क्षेत्रज्ञेभ्यो वा वस्तुतो भिन्नं शक्यं निर्वक्तुम्। ब्रह्मणस्त्वियमविद्या शक्तिर्मायादिशब्दवाच्या न शक्या तत्त्वेनान्यत्वेन वा निर्वक्तुम्। इदमेवास्या अव्यक्तत्वं यदनिर्वाच्यत्वं नाम। सोऽयमव्याकृतवादस्य प्रधानवादाद्भेदः। अविद्याशक्तेश्चेश्वराधीनत्वं तदाश्रयत्वात्। न च द्रव्यमात्रमशक्तं कार्यायालमिति शक्तेरर्थवत्त्वं, तदिदमुक्तमर्थवदिति। स्यादेतत्—यदि ब्रह्मणोऽविद्याशक्त्या संसारः प्रतीयते हन्त मुक्तानामपि पुनरुत्पादप्रसङ्गः, तस्याः प्रधानवत्तादवस्थ्यात्, तद्विनाशे वा समस्तसंसारोच्छेदस्तन्मूलाविद्याशक्तेः समुच्छेदादित्यत आह *मुक्तानाञ्च पुनः* बन्धस्य *अनुत्पत्तिः*। कुतः? *विद्यया तस्या बीजशक्तेर्दाहात्*। अयमभिसन्धिः—न वयं प्रधानवदविद्यां सर्वजीवेष्वेकामाचक्ष्महे येनैवमुपालभेमहि किन्त्वियं प्रतिजीवं भिद्यते। तेन यस्यैव जीवस्य विद्योत्पन्ना तस्यैवाविद्याऽपनीयते न जीवान्तरस्य, भिन्नाधिकरणयोर्विद्याविद्ययोरविरोधात्, तत्कुतः समस्तसंसारोच्छेदप्रसङ्गः। प्रधानवादिनां त्वेष दोषाः प्रधानस्यैकत्वेन तदुच्छेदे सर्वोच्छेदोऽनुच्छेदे वा न कस्यचिदित्य-निर्मोक्षप्रसङ्गः प्रधानभेदेऽपि चेत्तदविवेकख्यातिलक्षणाविद्यासदसत्त्वनिबन्धनौ बन्धमोक्षौ तर्हि कृतं प्रधानेन? अविद्यासदसद्भावाभ्यामेव तदुपपत्तेः। न चाविद्योपाधिभेदाधीनो जीवभेदो जीवभेदाधीन-श्चाविद्यौपाधिभेद इति परस्पराश्रयादुभयसिद्धिरिति साम्प्रतम्, अनादित्वाद्बीजाङ्कुरवदु भयसिद्धेः। अविद्यात्वमात्रेण चैकत्वोपचारोऽव्यक्तमिति, चाव्याकृतमिति चेति। नन्वेवमविद्यैव जगद्बीजमिति कृतमीश्वरेणेत्यत आह *परमेश्वराश्रया इति*। नह्यचेतनं चेतनानधिष्ठितं कार्याय पर्याप्तमिति

स्वकार्यं कर्त्तुं परमेश्वरं निमित्ततयोपादानतया चाश्रयते, प्रपञ्चविभ्रमस्य हीश्वराधिष्ठानत्वमहिविभ्रमस्येव रज्ज्वधिष्ठानत्वं तेन यथाऽहिविभ्रमो रज्जूपादान एवं प्रपञ्चविभ्रम ईश्वरोपादानस्तस्माज्जीवाधिकरणाप्यविद्या निमित्ततया विषयतया चेश्वरगाश्रयत इतीश्वराश्रयेत्युच्यते, न त्वाधारतया, विद्यास्वभावे ब्रह्मणि तदनुपपत्तेरिति, अत एवाह *यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः इति*। यस्यामविद्यायां सत्यां शेरत इति लय उक्तः, संसारिण इति विक्षेप उक्तः। *अव्यक्ताधीनत्वाज्जीवभावस्य इति*। यद्यपि जीवाव्यक्तयोरनादित्वेनानियतं पौर्वापर्यं तथाप्यव्यक्तस्य पूर्वत्वं विवक्षित्वैतदुक्तं *सत्यपि शरीरवन्द्रियादीनाम् इति*। गोबलीवर्दपदवदेतद् द्रष्टव्यम्।

आचार्यदेशीयमतमाह *अन्ये तु इति*। एतद् दूषयति *तैस्तु इति*। प्रकरणपारिशेष्ययोरुभयत्र तुल्यत्वान्नैकग्रहणनियमहेतुरस्ति। शङ्कते *आम्नातस्यार्थम् इति*। अव्यक्तपदमेव स्थूलशरीरव्यावृत्तिहेतुर्व्यक्तत्वात्तस्येति शङ्कार्थः। विराकरोति ''नैकबाक्यताधीनत्वात्'' इति। प्रकृतहान्यप्रकृतप्रक्रियाऽप्रसङ्गेनैकवाक्यत्वे सम्भवतिं न वाक्यभेदो युज्यते। न चाकाङ्क्षां विनैकवाक्यत्वमुभयञ्च प्रकृतमित्युभ्यं ग्राह्यत्वेनेहाकाङ्क्षितमित्येकाभिधायकमपि पदं शिरीरद्वयपरम्। न च मुख्यया वृत्त्याऽतत्परमित्यौपचारिक न भवति। यथोपहन्तृमात्रनिराकरणाकाङ्क्षायां काकपदं प्रयुज्यमानं श्वादिसर्वहन्तृपर विज्ञायते। यथाहुः–

काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि नोदितः।
उपघातप्रधानत्वान्न श्वादिभ्यो न रक्षति॥ इति।

ननु न शरीरद्वयस्यात्राकाङ्क्षा, किन्तु दुःशोधत्वात् सूक्ष्मस्यैव शरीरस्य, न तु षाट्कौशिकस्य स्थूलस्य, तद्धि दृष्टबीभत्सतया सुकरं वैराग्यविषयत्वेन शोधयितुमित्यत आह *न चैवं मन्तव्यम इति*। विष्णोः परमं पदमवगमयितुं परं पदमत्र प्रतिपाद्यत्वेन प्रस्तुतं न तु वैराग्याय शोधनमित्यर्थः। अलं वा विवादेन भवतु सूक्ष्मशरीरं परिशोध्यं तथापि न सांख्याभिमतमत्र प्रधानं परमित्यभ्युपेत्याह। *सर्वथापि तु इति*॥३॥

इतोऽपि नायमव्यक्तशब्दः सांख्याभिमतप्रधानपरः। साख्यैः खलु प्रधानाद्विवेकेन पुरुषं निःश्रेयसाय ज्ञातुं वा विभूत्यै वा प्रधानं ज्ञेयत्वेनोपक्षिप्यते, न चेह जानीयादिति वोपासीतेति वा विधिविभक्तिश्रुतिरस्ति, अपि त्वव्यक्तपदमात्रं, न चैतावता सांख्यस्मृतिप्रत्यभिज्ञानं भवतीति भावः॥४॥

ज्ञेयत्वावचनस्यासिद्धिमाशङ्क्य तत्सिद्धिप्रदर्शनार्थं सूत्रम्। निगदव्याख्यातमस्य भाष्यम्॥५॥

वरप्रदानोपक्रमा हि मृत्युनचिकेत:संवादवाक्यप्रवृत्तिरासमाप्ते: कठवल्लीनां लक्ष्यते। मृत्युर्नचिकेतसे कुपितेन पित्रा प्रहिताय तुष्टस्त्रीन् वरान् प्रददौ, नचिकेतास्तु प्रथमेन वरेण पितु: सौमनस्यं वव्रे, द्वितीयेनाग्निविद्यां, तृतीयेनात्मविद्याम्, वराणामेष षरस्तृतीय इति वाचनात्। न तु तत्र वरप्रदाने प्रधानगोचरे स्त: प्रश्नप्रतिवचने। तस्मात्कठबल्लीष्वग्निजीवपरमात्मपरैव वाक्यप्रवृत्तिर्न त्वप्रक्रान्तप्रधानपरा भवितुमर्हतीत्याह *इतश्च न प्रधानस्याव्यक्तशबदवाच्यत्वम् इति*। हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनमित्यनेन व्यवहितं जीवविषयं यथा तु मरणं प्राप्यात्मा भवति गौतमेत्यादिप्रतिवचनमिति योजना। अत्राह चोदक: किं जोवपरमात्मनोरेक एव प्रश्न: किं वान्यो जीवस्य येयं प्रेते मनुष्य इति प्रश्नोऽन्यश्च परमात्मनोऽन्यत्र धर्मादित्यादि:? एक्तवे सूत्रविरोध: 'त्रयाणाम् इति''। भेदे तु सौमनस्यावाप्त्यग्न्यात्मज्ञानबिषयवरत्रयप्रदानानन्तर्भावोऽन्यत्र धर्मादित्यादे: प्रश्नस्य। तुरीयवरान्तरकल्पनायां वा तृतीय इति श्रुतिवाधप्रसङ्ग:। वरप्रधानानन्तर्भावे प्रश्नस्य तद्वत् प्रधानाख्यानमप्यनन्तर्भूत वरप्रदानेऽस्तु महत: परमव्यक्तमित्याक्षेप:।

परिहरति *अत्रोच्यते नैवं वयमिह इति*। वस्तुतो जीवपरमात्मनोरभेदात् प्रष्टव्याभेदैनेक एव प्रश्न:। अत एव प्रतिवचनमप्येकं, सूत्रं त्ववास्तवभेदाभिप्रायम्। वास्तवश्च जीवपरमात्मनोरभेदस्तत्र तत्र श्रुत्युपन्यासेन भगवता भाष्यकारेण दर्शित:। *तथा जीवविषयस्यास्तित्वनास्तित्वप्रश्नस्येत्यादि*। येयं प्रेत इति हि नचिकेतस: प्रश्नमुपश्रुत्य तत्तत्कामविषयमलोभं चास्य प्रतीत्य मृत्युर्विद्याभीप्सिनं नचिकेतसं मन्य इत्यादिना नचिकेतसं प्रशस्य प्रश्नमपि तदीयं प्रशंसन्नस्मिन् पश्ने ब्रह्मैवोत्तरमुवाच। *तं दुर्दर्शम् इति*। यदि पुनर्जीवात्प्राज्ञो भिद्येत जीवागोचर: प्रश्न: प्राज्ञगोचरं चोत्तरमिति किं केन सङ्गच्छेत? अपि च यद्विषयं प्रश्नमुपश्रुत्य मृत्युनैष प्रशंसितो नचिकेता यदि तमेव भूय: पृच्छेत्तदुत्तरे चावदध्यात् तत: प्रशंसा दृष्टार्था स्यात् प्रश्नान्तरे त्वसावस्थाने प्रसारित सत्यदृष्टार्था स्यादित्याह *यत्प्रश्न: इति*। यस्मिन् प्रश्नो यत्प्रश्न:। शेषमतिरोहितार्थम्।।६।।

अनेन सांख्यप्रसिडेवैदिकप्रसिद्धया विरोधात्र सांख्यप्रसिद्धिर्वेद आदर्तव्येत्युक्तम्। सांख्यानां महत्तत्वं सत्तामात्रं पुरुषार्थक्रियाक्षमं सत्तस्य भाव: सत्ता तन्मात्रं महत्तत्वमिति। या या पुरुषार्थक्रिया शब्दाद्युपभोगलक्षणा च सत्त्वपुरुषान्यताख्यातिलक्षणा च सा सर्वा महति बुद्धौ समाप्यत इति महत्तत्वं सत्तामात्रमुच्यत इति।।७।।

इति भामती आनुमानिकाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

प्रथमस्याध्यायस्य

अथ चतुर्थः पादः।

अथ आनुमानिकाधिकरणम्॥१॥

पूर्वपादे स्पष्टास्पष्टब्रह्मलिङ्गानि वाक्यानि विचारितानि। चतुर्थेऽस्मिन् पादेऽस्पष्टब्रह्मलिङ्गानि कानिचिद्वाक्यानि विचार्यन्ते–

।।सू०।। **आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥१॥**

एकेषां कठानां शाखायामाम्नायतेऽस्य विषयः–

'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।। महतः परमव्यक्तमव्यक्तात् पुरुषः परः। पुरुषान्न परं किंचित् सा काष्ठा सा परा गतिः।।' इति।।

अत्र महतः परत्वेन उच्यमानं अव्यक्तशब्दवाच्यं प्रधानं कापिलमुत शरीरं वेति संशयः।।

प्रधानमिति पूर्वपक्षो युक्तः। कथम्। महदवयक्तपुरुषाणां साङ्ख्यतन्त्र एव प्रसिद्धेः, तेषामिह श्रुतौ प्रत्यभिज्ञानाञ्च वपुषो न कश्चिदिह प्रसङ्गः। तस्मात् साङ्ख्यं प्रधानमेव न वपुरिति।।

वपुरिति सिद्धान्तो युक्तः। पूर्वत्र–

'आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च।। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।।'

इत्यात्मशरीरादिषूपासनोपायेषु वशीकार्यत्वाय रथिरथादिरूपकविन्यस्तेषु परिशिष्टस्य शरीराख्यरूपकविन्यस्तस्य अव्यक्तशब्देन गृहीतेः। 'इन्द्रियेभ्यः परिशिष्टस्य 'इन्द्रियेभ्यः परा

ह्यर्था:' इत्यारभ्य 'सा काष्ठा सा परा गति:' इत्यन्तेन वशीकार्यत्वाय ह्युत्ततरं परा उच्यन्ते। तदेतत्–

'यच्छेद्वाङ्‌भनसी प्राास्तद्यच्छेज्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि।।' इति श्रुतिरेवाग्रे दर्शयति। ततोऽव्यक्तशब्देन वपुरत्र प्रतिपाद्यम्।।

ननु प्रधानमव्यंक्तमिति प्रसिद्धम्, कथमिह शरीरमुच्यत इत्याशङ्कायामाह–

।।सू।। सूक्ष्मं तु तदर्हत्वात्।।२।।

सूक्ष्ममित्यव्यक्तमुच्यते। अव्यक्तमेव शरीरावस्थं कार्यार्हत्वात् अव्यक्तशब्देनोच्यते इति युक्तमेव।।

युक्तयन्तरमाह–

।।सू।। तदधीनत्वादर्थवत्।।३।।

आत्मशरीरादिकं परमेश्वराधीनतया अर्थवत् उपासनानिर्वृत्तये भवति। परमेश्वरोऽन्तर्यामी सर्वमात्मादिकं प्रेरयन्नेव चोपासनोपायत्वेन वशीकार्यकाष्ठेति प्राप्यत्वेन च 'सा परा गति:' इति प्रोच्यते। ततोऽव्यक्तमिह शरीरमेव।।

।।सू।। ज्ञेयत्वावचनाच्च।।४।।

यदि सांख्यं प्रंधानमत्राव्यक्तं तदाऽस्य ज्ञेयत्वमुच्येत। न च तदस्ति। ततो न कापिलमव्यक्तम्।।

ज्ञेयत्वमप्यस्योक्तमस्तीत्याशङ्क्य **परिहरति–**

।।सू।। वदतीति चेन्न प्राज्ञो हि प्रकरणात्।।५।।

'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवञ्च यत्। अनाद्यनन्तं महत: परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते' (कठ० ३-१५, १३) इत्यग्रेतनमन्त्र: अस्यापि ज्ञेयतां वदतीति चेत् न, 'यच्छेद्वाङ्‌भनसी प्राज्ञ:' इति प्राज्ञस्यैव पूर्व प्रकृतत्वात्। ततोऽव्यक्तं शरीरमेव।।

प्रधानस्य प्रसङ्ग एव नास्तीत्याह–

।।सू।। त्रयाणामेव चैवमुपन्यास: प्रश्नश्च।।६।।

त्रयाणामुपास्योपासनोपासकानामेवात्र प्रकरणे ज्ञेयतया प्रश्नोपन्यास: क्रियते, न प्रधानादे:। यथा–'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो

हर्षशोकौ जहाति।।' (कठ. २-१२) इत्यादिरुपन्यासः।। 'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीयः' (कठ. १-२१) इति, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात्। अन्यत्र भूताञ्च भव्याञ्च यत्तत्पश्यसि तद्वद'।। (कठ. २-१४) इति च प्रश्नः। तस्मात् प्रकृतत्वादपि शरीरमेवाव्यक्तं न प्रधानम्।।

किंच लिङ्गान्तरमप्यस्तीत्याह–

।।सू।। महद्वञ्च।।७।।

यथेह 'बुद्धेरात्मा महान् परः' (कठ. ३-१०) इत्यत्र न तान्त्रिको महान् भवति आत्मशब्दात्, तथा अव्यक्तशब्दादपि न प्रधानमिति निर्णयः।।

इत्यानुमानिकाधिकरणम्।।१।।

इति श्री कण्ठभाष्य आनुमानिकाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ प्रथमाध्यायस्य चतुर्थः पादः।

अथ आनुमानिकाधिकरणम्।

पूर्वोत्तरपादार्थप्रदर्शनेन सङ्गतिं सूचयति–**पूर्वपाद इति।** प्रथमे पादे स्पष्टब्रह्मलिङ्गानि वाक्यानि विचारितानि। द्वितीयेऽनतिस्पष्टब्रह्मलिङ्गानि। तृतीये स्पष्टास्पष्टब्रह्मलिङ्गानि। चतुर्थे त्वस्मिन् अस्पष्टब्रह्मलिङ्गानि वाक्यानि विचार्यन्त इति ब्रह्मलिङ्गानां स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमत्वक्रमेण पादानामवतार इति भावः।।सू०।। **आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीते-र्दर्शयति च**।।१।। सौत्र'मेकेषा'मिति पदं व्याकुर्वाणस्तदपेक्षितं चाध्याहरन्नेव विषयवाक्यमुदाहरति–**एकेषामिति।** स्मार्तक्रमप्रत्यभिज्ञाव्यक्तशब्दरूढिभ्यां प्रकरणपरिशेषाभ्यां च संशयमाह–**अत्रेति।** इह 'महदव्यक्त'मिति साङ्ख्यस्मृतितत्त्वक्रमप्रत्यभिज्ञा 'महतः परत्वेनोच्यमान' मिति धर्मिविशेषणेन सूचिता। अव्यक्तशब्दस्य प्रधाने रूढत्वेन स्वारस्य'मव्यक्तशब्दवाच्य'मिति धर्मिनिर्देशेन सूचितम्। **अव्यक्तशब्दवाच्यमिति।** अव्यक्तशब्दोदितमित्यर्थः। सिद्धान्ते शरीरस्याव्यक्तशब्दलक्ष्यत्वाङ्गी-कारेणातद्वाच्ये शरीरत्वसंशयायोगात्। पूर्वत्र'त्मानं रथिनं विद्धि शरीरं रथमेव च। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च। इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्'। इत्यात्मशरीरादीनां रथिरथादिभावकल्पनायां शरीरस्य प्रकृतत्वं शरीरातिरिक्तानामिहेन्द्रियादिशब्दैर्गृहीतत्वेन शरीरस्य परिशिष्टत्वं च 'शरीरं वे'ति रथिरथभावकल्पनायां श्रुतौ प्रयुक्तस्य शरीरपदस्य प्रयोगेण सूचितम्। ननु, 'प्रधानमिति पूर्वपक्षो युक्त' इति वचनमयुक्तम्। तस्य निरालम्बनत्वात्। 'महतः परमव्यक्त' मित्यत्र महच्छब्दस्य 'बुद्धेरात्मा महान्पर'इति पूर्वनिर्दिष्टात्मपरत्वेन साङ्ख्यस्मृतिप्रसिद्धतत्वविशेषपरत्त्वशङ्कानास्पदतया स्मार्तक्रमप्रत्यभिज्ञानासिद्धेः। साङ्ख्यपरिभाषा-सिद्धायाः अव्यक्तपदरूढेः नैयायिककल्पितायाः पक्षप्रतिपक्षादिपदरूढेरिवान्यत्र शब्दार्थनिर्णयानु-पयोगित्वात् इत्यभिप्रायेण पृच्छति–**कथमिति। महदव्यक्तपुरुषाणामिति।** अयं भावः। महदव्यक्तं

पुरुष इति क्रमेण उत्तरोत्तरं पराणि तत्त्वानि साङ्ख्यतन्त्र एव प्रसिद्धानि। अतस्तेषामिह प्रत्यभिज्ञा भवन्ती न निह्नोतुं शक्यते। तेनैव क्रमेणात्रापि निर्देशदर्शनात्। सा चोन्मिषन्ती प्रत्यभिज्ञा सर्वमिदं विषयवाक्यं व्याप्नोति। तथा हि-पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च भूतानि पञ्च तन्मात्राः अन्तः करणमहङ्कारो महान्प्रकृतिः पुरुष इति पञ्चविंशतितत्त्वानि साङ्ख्यास्सञ्चक्षते। ततः परं च तत्त्वान्तरं निषेधन्ति। इहापि दश ज्ञानकर्मेन्द्रियाणि। दश भूततन्मात्राः अर्थशब्दोदिताः। मनोऽन्तःकरणबुद्ध्यहङ्काराः। आत्मा। महान् महत्तत्त्वम्। अव्यक्तं प्रकृतिः। पुरुषश्चेति पञ्चविंशतिस्तत्त्वानि निर्दिश्यन्ते। ततः परं च निवार्यते 'सा काष्ठा सा परा गति'रिति। यद्यपि साङ्ख्यैर्महत्तत्त्व एव बुद्धिशब्दः प्रयुज्यते नाहङ्कारे। आत्मशब्दश्च चेतनवाची न महत्तत्त्वे प्रयुज्यते। तथापि प्रत्यभिज्ञापकभूयस्त्वानुसारेण कार्ये कारणोपचारादहङ्कारे बुद्धिशब्दः महत्तत्त्वे व्यापकत्वाभिप्रायेणात्मशब्दः 'यच्छेद्वाङ्मनसी प्राज्ञः तद्यच्छेज्ज्ञान आत्मानी'त्यत्रैव उपरितनमन्त्रे ज्ञानेऽप्यात्मशब्दप्रयोगदर्शनादिति समर्थयितुं शक्यम्। ततश्च स्मार्तक्रमप्रत्यभिज्ञायास्तावन्नासिद्धिः। नाप्यव्यक्तपदरूढेरनिर्णायकत्वम्। प्रत्यभिज्ञया साङ्ख्यतन्त्रसिद्धान्येव तत्त्वानि निर्दिश्यन्त इति निश्चये सति तदन्तर्गताव्यक्तपदे तद्रूढेरेवादरणीयत्वात्। 'न पक्षे न सपक्षे च विपक्षे केवलं स्थितः। चित्रं निस्त्रिंशधूमस्ते प्रतापाग्न्यनुमापकः।' इतिकाव्यश्लोकेऽपि नैयायिकपरिभाषामाश्रित्य प्रवृत्ते पक्षादिशब्दे तदीयरूढेराश्रीयमाणत्वात्। तस्मात्स्मार्तक्रमप्रत्यभिज्ञाव्यक्तपदरूढिभ्यामव्यक्तं प्रधान-मित्येतद्युक्तम्। न 'न्वात्मानं रथिनं विद्धी' त्यादिना रथिरथहयाद्यात्मना निरूपितेष्वात्मादिषु प्रकृतेषु परिशिष्टं शरीरमिहाव्यक्तशब्देन ग्रहणसाकाङ्क्षमास्त इत्याशङ्क्याह-वपुषो **न कश्चिदिह प्रसङ्ग इति।** अयं भावः। प्रधानस्याकाङ्क्षावतः सन्निधावाम्नानं हि प्रकरणम्। तथा च किं तत् परमपदमिति निर्धारणाकाङ्क्षस्य विष्णोः परमपदस्य सन्निधानाम्नान रूपेण प्रकरणेनेन्द्रियादीनि तदीयपरत्व-प्रमितावधितयोपयोगित्वेन तदङ्गानि भवन्तु नाम। तानि रथिरथादिकल्पनायां गृहीतान्येवान्यूना-नतिरिक्तान्यत्रापि ग्राह्याणीति केन प्रकरणेन सिद्ध्यन्ति। न हीन्द्रियादिभिरसंयतैः जीवः पुनःपुनः संसारमेव प्राप्नुयात् संयतैस्तु मुक्तिमिति प्रदर्शनार्थं रथिरथादिरूपेणाङ्गभावमासाद्य निराकाङ्क्षाणीन्द्रियादीनि पुरुषशब्दोक्तपरमपदपरत्वप्रतिपादनेऽङ्गभावमपेक्षन्ते। नापि प्रधानं परमपदं स्वकीयपरत्वप्रतिपादने तेषामवधितयाङ्गभावमपेक्षते। तद्धि 'सा काष्ठे'ति निरतिशयोत्कर्षप्रति-पादनानुसारेण कृत्स्नस्य जगतः परत्वावधितयाङ्गभावपेक्षते। न च कृत्स्नं जगद्रूपकवाक्ये गृहीतम्। शरीरेन्द्रियतद्विषयमनोबुद्धिभोक्तृणामेव तत्र ग्रहणात्। अतस्तदाकाङ्क्षानुसारेण साङ्ख्याभिमतपुरुषा-वरचतुर्विंशतितत्त्वात्मकसकलप्रपञ्चसमर्पकत्वमेवात्रेन्द्रियादिशब्दनां युक्तम्। एतेन प्रकृतत्वाभावेऽपि सन्निधानाद्रूपकवाक्यगतान्येवेन्द्रियादीनि ग्राह्याणीति निरस्तम्। आकाङ्क्षायाः सन्निधानाद्बलीयस्त्वात्। ननु वैदिकस्याङ्गापेक्षस्यान्यत्र निबद्धमपि वैदिकमेवाङ्गजातं ग्राह्यं न त्वनिबद्धमप्यवैदिकमिति

पूर्वतन्त्रनिर्णीतत्वादिह परपदस्य परत्वावधिभूत (रूप) स्वप्रतियोग्यङ्गाकाङ्क्षायां मुक्तिसंसारप्राप्तिवर्णनोपयोगिरूपणार्थतया प्राङ्निबद्धमपि तदेवेन्द्रियादिकं ग्राह्यं न तु क्वचिदङ्गत्वेनानिबद्धमपि साङ्ख्यादितत्त्वजातमिति चेत्। स्यादप्येवं यदि सौर्यादिष्वितिकर्तव्यताकलापस्येवात्र परत्वावधेरिन्द्रियादिकस्याम्नानम्। तस्मात् स्ववाक्याम्नानं निरतिशयपरत्वावध्याकाङ्क्षापूरणसमर्थं रूपितं साङ्ख्यस्मृतिप्रसिद्धचतुर्विशतितत्त्वात्मकं कृत्स्नं जगदस्तीति सन्निधिमात्रलभ्यमाकाङ्क्षापूरणसमर्थं रूपतिमिन्द्रियादिकमग्राह्यमतो नास्त्यत्र शरीरग्रहणप्रसक्तिरिति। उपसंहरति-**तस्मादिति। साङ्ख्यं प्रधानमिति।** सङ्ख्यया बुद्ध्या कल्पितं साङ्ख्यमिति आनुमानिकपदविवरणम्। सङ्ख्याशब्दात् शेषे 'प्राग्दीव्यतोऽण्'। सङ्ख्यानुमानकल्पितं परमेश्वरानधीनं स्वतन्त्रं प्रधानमिहाव्यक्तशब्दोदितमित्यर्थः। सिद्धान्तप्रतिज्ञां दर्शयति-**वपुरिति सिद्धान्तोयुक्त इति।** यद्यपि सूत्रे'न'ेति प्रतिज्ञापदेन नानुमानिकं प्रधानमव्यक्तपदोदितमिति प्रतिज्ञा लभ्यते। तस्यामेव च 'शरीररूपकविन्यस्तगृहीते'रिति सूत्रेण तद्विवरणरूपेण 'पूर्वत्रे'त्यादिभाष्येण च वर्ण्यमानो हेतुः समञ्जसो भवति। तत्त्वव्यक्तपदोदितं वपुरिति प्रतिज्ञायां साध्याविशेषात्। तथापि 'न'ेति सूत्रपदलभ्या हेत्वन्वयिनी प्रतिज्ञा स्पष्टेति मत्वा फलिता सिद्धान्तप्रतिज्ञा दर्शिता। तामेव खल्वाश्रित्य संशयवाक्येऽपि 'शीरीरं वे'ति कोट्यन्तरं दर्शितम्। 'पूर्वत्रे'त्यादिहेतुवचनस्यायमर्थः। पूर्वत्रात्मा शरीरं बुद्धिर्मनः इन्द्रियाणि तद्विषया रूपरसगन्धस्पर्शशब्दाश्चेति षड् रथिरथसारथितदूह्यमानतुरगरज्जुतुरगतन्मार्गात्मना रूपिताः। ते च न काव्य इव शोभार्थं तथा रूपिताः। अध्यात्मप्रकरणत्वात्। किं तु मुक्तयर्थोपासनोपकरणत्वाद्वशीकार्यत्वाय। वशीकृतान्येतानि तदुपकरणानि भवन्ति। अत एव हि तत्रैव श्रूयते 'यस्त्वविज्ञानवान् भवति अयुक्तेन मनसा सह। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः॥ यस्तु विज्ञानवान्भवति युक्तेन मनसा सह। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः॥ यस्त्वविज्ञानवान्भयति अमनस्कः सदा शुचिः। न स तत्पदमाप्नोति संसारं चाधिगच्छति॥ यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यतो भूयो न जायत'इति। एवं वशीकार्यत्वाय रथिरथादिरूपकविन्यस्तानां मध्ये शरीरातिरिक्तानामिन्द्रियादिशब्दैर्गदितत्वेन शरीरस्यैव रूपकविन्यस्तस्याव्यक्तशब्देन ग्राह्यत्वादिति। ननु 'रूपकविन्यस्तशरीरगृहीते'रिति वक्तव्यम्। विशेषणस्य पूर्वनिपातित्वात्। अथोच्येत विवक्षानिबन्धनत्वाद्विशेषणविशेष्यभावस्यात्र रूपकविन्यस्तं विशेष्यं विवक्षितमिति। तथापि प्रसिद्धविपरीतविशेषणविशेष्यभावविवक्षायाः फलं वक्तव्यमित्याशङ्का भाष्ये रथिरथादिरूपक-विन्यस्ते निर्धारणसप्तमीप्रयोगेण निवर्तिता। 'रूपकविन्यस्तशरीरगृहीते'रित्युक्ते शरीराणां मध्ये यद्रूपकविन्यस्तं शरीरं तदेव ग्राह्यं न तु तव्द्यतिरिक्तं शरीरमित्युक्तं स्यात्। तत्र यदि मुक्तयुपयोगि संसारोपयोगि च यद्यावच्छरीरं तत्सर्वं रथत्वेन रूपितं तदा रूपकविन्यस्तव्यतिरिक्तस्य

शरीरस्याभावाद्रूपकविन्यस्तेत्येतदव्यावर्तकमिति 'विशेषणं विशेष्येण बहुल' (पा० २.१.५७ सू) मिति समासः विफलः स्यात्। यदि रूपकविन्यस्तव्यतिरिक्तमपि शरीरमिष्यते तदापि तद्विफलमेव। रूपकविन्यस्तव्यतिरिक्तस्य शरीरस्याव्यक्तपदग्राह्यत्वप्रसक्तयभावात्। 'शरीररूपकविन्यस्तगृहीते'रित्युक्ते तु भाष्यदर्शितेन प्रकारेण रूपकविन्यस्तानामात्मादीनां मध्ये यच्छरीराख्यं रूपकविन्यस्तं तदेव ग्राह्यं न त्वात्मादिकमित्युक्तं स्यात्। तदा शरीरविशेषणं न विफलम्। आत्मादिरूपकविन्यस्तान्तरस्य व्यावर्त्यस्य सत्त्वाद्वक्ष्यमाणरीत्या प्राग्रूपकविन्यस्तानामेव 'इन्द्रियेभ्यः परा ह्यर्था'इति सन्दर्भः परापरभावविवेचनार्थ इत्यव्यक्तपदेन रूपकविन्यस्तान्तरस्य ग्रहणप्रसक्तौ तस्य व्यावर्तनीयत्वाञ्च। तथा च परिशेषप्रदर्शनफलं 'शरीररूपकविन्यस्तगृहीते'रिति सूत्रग्रथनमिति भाष्ये निर्धारणसप्तमीप्रयोगेण दर्शितं भवति। स्यादेतत्। रूपकविन्यस्तानामेवें न्द्रियेभ्य'इत्यादिसन्दर्भो वशीकार्यत्वपरापरभावविवेचनार्थ इत्यस्यार्थस्य सिद्धौ परिशेषदव्यक्तपदेन शरीरं ग्राह्यं स्यात्। सैव कुतं इत्याशङ्कायामाह—**इन्द्रियेभ्य इति।** अयमाशयः। नांय सन्दर्भः पुरुषस्य कृत्स्नजगदपेक्षया परत्वप्रतिपादनार्थः। तथा सति 'विश्वस्मादिन्द्र उत्तर' इतिवत् 'सर्वस्मात्परः पुरुष' इत्येतावत एव वक्तव्यत्वेनेन्द्रियार्थादीनां परापरभाववर्णनवैयर्थ्यप्रसङ्गात्। किं तु तेषामेव परापरभावविवेचनार्थः। स च परापरभावस्तेषां रथिरथादिभावकल्पनाग्रन्थसिद्धायां वशीकर्तव्यतायां प्रधानाप्रधानत्वरूप एव वाच्यः। तथा सत्येव पूर्वग्रन्थेनैकवाक्यतालाभात्। पूर्वग्रन्थे प्राप्यत्वतिरिक्ता वशीकार्या रूपिताः। इहापि परापरभावेन विवेचिताः। सङ्ख्यासाम्येन तत्प्रत्यभिज्ञानाञ्च साङ्ख्यतन्त्रसिद्धतत्त्वेष्वान्तर्गणिकभेदेन सङ्ख्यासाम्योपपादनसम्भवेऽपि श्रुतविभाजकोपाधिभिस्सङ्ख्यासाम्यासम्भवात्। किं च परापरभावविवेचनस्य प्रकृतां वशीकार्यतां विना विषयान्तरं न पश्यामः। ननु, तत्तदुपासनफलभूयस्त्वाल्पीयस्त्वं तद्विषयः स्यात्। 'दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्त्रं त्वाभिमानिकाः। बौद्धा दशसहस्रं तु तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्त्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः। पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते।।' इति हि वदन्ति। तत्र नैवं मनसः इन्द्रियेभ्यः पृथक्परिगणनाभावेन भूततन्मात्रापेक्षया निकृष्टत्वेन तद्विषयत्वे 'अर्थेभ्यश्च परं मन' इत्यस्यानुपपत्तेः। एतेन कारणत्वनिबन्धनं भोक्तारं प्रत्यन्तरङ्गत्वनिबन्धनं वा परत्ववचनमित्यपि शङ्का निरस्ता। इन्द्रियाणामाहङ्कारिकत्वे 'इन्द्रियेभ्यः परा ह्यर्था'इत्यस्य भौतिकत्वे 'अर्थेभ्यश्च परं मन'इत्यस्य चानुपपत्तेः। इन्द्रियेभ्योऽर्थानामन्तरङ्गत्वे तदभावे च तयोरेवानुपपत्तेः। तस्मादिन्द्रियेभ्यः तद्विषया वशीकार्यत्वे पराः। वश्येन्द्रियस्यापि विषयसन्निधौ इन्द्रियविजृम्भणात्। तेभ्यो मनः परम्। मनसि विषयध्यानप्रवृत्तौ विषयासन्निधानेऽपि रागादिविजृम्भणात्। तस्मादपि बुद्धिः परा। अध्यवसायाभावे मनसोऽकिञ्चित्करत्वात्। ततोऽप्यात्मा परः। सर्वस्यापि विषयप्रवृत्तेरात्मेच्छायत्तत्वात्। तत एवात्मा अणुरपि महानिति विशेष्यते। तस्मादपि शरीरं परम्।

तदायत्तत्वात्सर्वासामपि पुरुषप्रवृत्तीनाम्। तस्मादपि परः सर्वान्तर्यामी सर्वप्रेरकः परिपूर्णः शिव इति इन्द्रियादो वशीकार्यतायामुत्तरोत्तरं परा उच्यन्त इत्येव युक्तमिति। 'दर्शयति चे'ति सूत्रशेषं व्याचष्टे-**तदेतदिति।** वशीकार्यत्वे यदुत्तरोत्तरं परत्वमुक्तं तदेतदियं कठवल्लीश्रुतिरेवाग्रे दर्शयति। 'यच्छेद्वाङ्गनसी प्राज्ञस्तद्यच्छेद्ज्ञान आत्मनि। ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि' इति मन्त्रेण दर्शयतीत्यर्थः। अस्य मन्त्रस्यायमर्थः। वागुपलक्षितसर्वज्ञानसाधनेन्द्रियजातं मनसि यच्छेत्। बाह्येन्द्रियव्यापकत्वमुत्सृज्य मनोमात्रेणावतिष्ठेत। विषयविकल्पाभिमुखं तन्मनः आत्मनि निश्चितायां बुद्धौ विषयदोषाध्यवसायरूपायां नियच्छेत्तां बुद्धिं महति प्रत्यगात्मनि नियच्छेत् तदुपादेयताविषयां तत्प्रवणां कुर्यात्। तं च प्रत्यगात्मानं निरुपप्लवे परमात्मनि यच्छेत् तच्छेषताप्रतिपत्तिं कुर्यादिति। कथमयमर्थो लभ्यत इति चेत् पूर्वापरपरामर्शेन वागादिशब्देषु छान्दसव्युत्पत्त्याश्रयणात्। क्वचित्किञ्चिन्नियच्छेदिति कर्माधिकरणयुक्तं हि नियमनं द्वितीयादिवाक्येषूच्यते। अतो वागित्यत्र द्वितीयार्थे प्रथमा। 'सुपांसुलु'गिति द्वितीयायास्सुलुग्वा। 'मनसी'इति छान्दसो दीर्घः। 'इयाडियाजीकाराणामुपसङ्ख्यान'मिति सप्तम्या ईकारो वा। चतुर्थवाक्ये तदिति लिङ्गव्यत्ययः 'सुपां सुलु'गिति लुग्वा। पूर्ववाक्ये सप्तमीनिर्दिष्टस्यानन्तरवाक्ये द्वितीयया निर्देश इति पूर्ववाक्येषु दर्शनेनात्र तत्पदस्यात्मपरत्वात्। नन्वित्थमनेन मन्त्रेण इन्द्रियमनोबुद्ध्यात्मनां वशीकरणक्रम उक्त इत्यस्तु नाम। तावता कथमिन्द्रियार्थमनोबुद्ध्यात्मशरीरपरमात्मनां वशीकार्यतायामुत्तरोत्तरं प्राधान्यं दर्शितं स्यात्। अर्थशरीरयोस्तत्र ग्रहणमेव नास्ति। गृहीतस्यापि परमात्मनः वशीकार्यत्वं नोक्तम्। वशीकार्यत्वेनोक्तानामपि इन्द्रियादीनामुत्तरोत्तरं हेतुर्न......त इति चेतुच्यते। योगकालकर्तव्येन्द्रियादि-नियमनरूपतद्वशीकरणक्रमप्रदर्शनपरोऽयं मन्त्रः। अतः विषयशरीरयोरिहाग्रहणम्। विषयसन्निधान-परिहरणरूपं विषयवशीकरणं हि व्युत्थानकालेऽपि कर्तव्यं हितमितमेध्याशनरूपं शरीरवशीकरणं व्युत्थानकाले तु कर्तव्यं न योगग्रहणेऽपि। अत्रेन्द्रियादीनां वशीकार्यतायां परत्वे 'दर्शयति चे'ति लिङ्गोपन्यासस्य न वैकल्यम्। स्थालीपुलाकन्यायेनापि लिङ्गोपन्यासदर्शनात्। पूर्वतन्त्रे सौर्यादिषु वैदिकीतिकर्तव्यता प्रयाजेप्रयाजे कृष्णलं जुहोती' ति लिङ्गदर्शनादिति समर्थनानन्तरं यत्र 'ऐन्द्राग्नमेकादशकपालं निर्वपेद्यस्सञ्जातायु' रित्यादौ वैदिक्या इतिकर्तव्यताया लिङ्गं न दृश्यते तत्र लौकिकमङ्गजातं स्यादिति शङ्कां 'लिङ्गहेतुत्वादलिङ्गे लौकिकं स्या'दिति (जै०) सूत्रेणोद्भाव्य 'लिङ्गस्य पूर्वत्वाच्चोदनाशब्दसामान्यादेकेनापि निरुध्येत यथा स्थालीपुलाकेने'ति (जै०) सूत्रेण तथैव वर्णितत्वात्। परमात्मनो वशीकार्यत्वमुपासनाफलं निवृत्तिपर्यन्तमिन्द्रियादिनियमनाविच्छेद-सिद्ध्यर्थम्। इन्द्रियादिप्रेरकत्वेनोपास्यत्वं सर्वात्मना तन्नियम्यत्वरूपतच्छेषत्वानुसन्धानात्मकप्रत्यगात्म-वशीकरणोत्तयैवार्थसिद्धं लिङ्गमिन्द्रियादीनां वशीकार्यतायामुत्तरोत्तरपरत्वे लिङ्गं तन्नियमनक्रम-वचनमेव। स्थूलसूक्ष्मसूक्ष्मतरक्रमेणैवोपायोपदेशस्य लक्ष्यवेधाभ्यासादिषु दृष्टत्वात्। तस्मा' दिन्द्रियेभ्यः

परा ह्यर्था' इत्यादिसन्दर्भस्थरूपकवाक्यैक- वाक्यतासामर्थ्यात् तत्पूर्वका'यच्छेद्वाङ्भनसी'इत्यादिलिङ्गदर्शनाञ्च प्राग्रूपकवाक्ये वशीकार्यत्वेनोक्ता-नामिन्द्रियादीनामुत्तरोत्तरं परत्ववर्णनपरतया शरीरातिरिक्तेविष्वन्द्रियादिशब्दैर्गृहीतेषु परिशिष्टं शरीरमव्यक्तपदेन ग्राह्यमिति युक्तमित्युपसंहरति-**ततोऽव्यक्तेति।।** उत्तरसूत्रव्यावर्त्या शङ्कां दर्शयति-**प्रधानमिति।** यद्यपि साङ्ख्यतन्त्रसिद्धतत्त्वगणनप्रत्यभिज्ञानासिध्द्याऽव्यक्तपदस्य प्रधाने तदीया प्रसिद्धिः श्रुताव्यक्तपदार्थनिर्णये न प्रयोजिका, तथापि न व्यक्तमिति यौगिकप्रसिद्धिः प्रधाने सम्भवति न तु शरीर इति शङ्काभिप्रायः।।सू।। **सूक्ष्मं तु तदर्हत्वात्**।।२।। सूक्ष्मपदं व्याचष्टे-**सूक्ष्ममित्यव्यक्तमुच्यत इति।** अव्यक्तमतीन्द्रियं प्रधानम्। साङ्ख्याभिमतप्रधाननिर्देशके पूर्वसूत्रादानुमानिकपदेऽनुवर्तयितुं शक्येऽप्यत्र पदान्तरेण प्रधाननिर्देशो न साङ्ख्याभिमतमनुमानकल्प्यं स्वतन्त्रं प्रधानमिह निर्दिदिक्षितं तदनुमानस्य द्वितीयाध्याये दूषयिष्यमाणत्वेन तस्याप्रामाणिकत्वात् किंत्वस्मदभिमतं 'क्षरं प्रधानममृताक्षरं हरः' 'क्षरात्मानावीशते देव एकः' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' 'संसारमोक्षस्थितिबन्धहेतु' रित्यादिश्रुतिप्रसिद्धं परमेश्वराधीनमिति ज्ञापनाय। तुशब्दमवधारणार्थ-मभिप्रेत्यापेक्षिताध्याहारेण सूत्रं योजयति-**अव्यक्तमेवेति।** सूक्ष्मस्य प्रधानस्य स्थूलावस्थाविशेषः शरीरमिति सूक्ष्मावस्थावाचकपदेन तदेव स्थूलावस्थं लक्ष्यते। परिशेषेण शरीराव्यक्तपदयोरैकार्थ्या-वश्यंभावादिति भावः। ननु तयोरैकार्थ्यावश्यंभावे शरीरपदमव्यक्तलक्षकं किं न स्यादिति शङ्कां 'तदर्हत्वा' दिति सौत्रपदव्याख्यानेन निराकरोति-**कार्यार्हत्वादिति।** उपासननिरसनरूपकार्यार्हं खलु वशीकार्यप्रदर्शकवाक्ये तत्तारतम्यप्रदर्शकवाक्ये च ग्राह्यम्। तत्तु शरीरावस्थमेव न सूक्ष्मावस्थमिति न वैपरीत्यशङ्कावकाश इति भावः। अतः 'शरीररूपकविन्यस्तगृहीते' रित्युक्तं युक्तमित्युपसंहरति-**युक्तमेवेति।।** तत्रैव हेत्वन्तरपरत्वेनोत्तरसूत्रमवतारयति-**युक्तयन्तरमिति।**।सू।। **तदधीनत्वार्थवत्** ।।३।। 'अर्थव' दित्यस्य विशेष्याध्याहारपूर्वकं सूत्रस्याक्षरार्थमुक्त्वा तस्य युत्तयन्तरपर्यवसानप्रदर्शनाय तात्पर्यमाह-**परमेश्वरोऽन्तर्यामीति।** उमासनोपायत्वेन वशीकार्येषूत्तरावधितया परमेश्वरः श्रुतावुच्यते 'सा काष्ठे'ति। तस्य च तथात्वं सर्वान्तर्यामिण इति। तत्प्रेर्यमाणस्य तदधीनस्यैव सतः आत्मशरीरादेरुपासननिर्वर्तनरूपफलकत्वात्। अतो यानि वशीकार्याण्यपेक्ष्य परमेश्वरसवौत्तरावधित्वं प्रदर्शयिषितं तेषा सर्वेषामनुपस्थापनेन तदपेक्षं तत्प्रदर्शयितुं न शक्यमिति शरीरेऽपि केनचित्पदेन ग्राह्ये परिशेषादव्यक्तपदेन तद्ग्रहणमिति भावः। अतोऽव्यक्तपदेन शरीरग्रहणामेति सूत्रस्यावृत्त्या हेत्वन्तरपरत्वमित्यभिप्रेत्याह-**प्राप्यत्वेन चेति।** परमेश्वरः प्राप्यत्वेन चोच्यते 'सा परा गति'रिति। वशीकार्यपरापरभावनिरूपणप्रस्तावे प्राप्यत्ववचनं तदर्थतयैवार्थवद्वक्तुमुचितम्। भवति च शरीरपरमव्यक्तपदमित्यत्रोपपादकस्य परिशेषस्य प्रदर्शनेन तदर्थवत्तदधीनत्वात्परिशेषस्य। अन्यथा रूपकप्रस्तावे'विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद'मिति

पारत्वेन रूपितं परमपदमव्यक्तपदेन गृह्यतामिति शङ्कास्पदत्वेन परिशेषासिद्धेः। तस्मात्परिशेषोपपादनार्थप्राप्यत्ववचनपरामर्शादपि शरीरपरमव्यक्तपदमवसीयत इति भावः। एवं रूपकवाक्ये इन्द्रियादिवशीकरणवाक्यरूपपूर्वापरग्रन्थपर्यालोचनया 'सा काष्ठा सा परा गति' रिति विषयवाक्यान्तर्गतवाक्यद्वयपर्यालोचनाया च न्यायविचारणायां नास्त्यत्र साङ्ख्यतन्त्रसिद्धतत्व-ग्रहणशङ्कावकाश इति समर्थितम्।। ये त्वत्र क्रमिकमहदव्यक्तपुरुषश्रवणमात्रसन्तुष्टाः श्रद्धाजडा मन्यन्ते इदमेव वाक्यं साङ्ख्यतन्त्रस्य मूलं भवितुमर्हति न ह्यवेदमूलमत्यन्ताप्ततमाः कपिलादयो महर्षयः प्रणयेयुरिति, तान्प्रत्याह–सू।। **ज्ञेयत्वावचनाञ्च**।।४।। यदीदमेव वाक्यं साङ्ख्यमतस्य मूलमभविष्यत्, तदा 'निर्गुणपुरुषान्तरज्ञानात्कैवल्य'मिति वदतां साङ्ख्यानामभिमतं प्रधानस्य मुमुक्षुज्ञेयत्वमपि अत्रावक्ष्यत्। तदत्र नोच्यते। विभूतिविशेषप्राप्तये प्रधानस्योपास्यत्वं तस्य च स्वतन्त्रकारणत्वमित्यादि च तेषामभिमतमत्र नोच्यते। अतो नैतन्मूलकं साङ्ख्यतन्त्रमिति श्रद्धेयम्। न हि यन्मूलमेव शास्त्रं प्रमाणयन्ति तत्र तच्छास्त्रवर्णितं नोक्तमिति युज्यते। नन्वसिद्धं ज्ञेयत्वावचनम्। 'अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवञ्च यत्। अनाद्यनन्तं महतः परं ध्रुवं निचाय्यं तं मृत्युमुखात्प्रमुच्यते।।' इत्युत्तरमन्त्र एव हि तस्य ज्ञेयत्वं वदति शब्दादिहीनत्वोक्तया महतः परत्वोक्तया च निचाय्यस्य ज्ञेयस्य प्रधानत्वावगमादित्याशङ्कामुत्थाप्य परिहरतीत्याह–**ज्ञेयत्वमपीति**। श्रुत्योच्यमानमिति शेषः।।सू।। **वदतीति चेन्न प्राज्ञो हि प्रकरणात्**।।५।। ''यच्छेद्वाङ्भ्नसी प्राज्ञ'इति प्राज्ञस्यैव प्राक्प्रकृतत्वा''दिति परिहारसूत्रांशव्याख्यानस्यायमर्थः। अत्र मन्त्रे'तद्यच्छेच्छान्त आत्मनी'ति यस्मिन् शान्त आत्मनि प्रत्यंगात्मनो नियमनमुक्तं यद्विज्ञानायैव च बाह्येन्द्रियमनोबुद्धिप्रत्यगात्मनां संयमनमुक्तं स एव प्राज्ञपरमात्मा निचाय्यत्वेनोच्यते। तस्यैव पश्चात्प्रकृतत्वात्। तस्मान्मन्त्रादधस्तात् 'येषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते। दृश्यते त्वग्न्यया बुद्धया सूक्ष्मया सूक्ष्मदर्शिभि'रिति मन्त्रे प्रकृतत्वादिति। यद्वा'यच्छेद्वाङ्नसी प्राज्ञ'इति मन्त्रे प्राज्ञशब्दः परमेश्वर इत्यभिप्रेत्य प्राज्ञस्य परमेश्वरस्य प्रकृतत्वमुक्तम्। सर्वान्तर्यामी परमेश्वर एवोपासकानुजिघृक्षया तस्य वागादिसंयमनं सम्पादयति 'यमेवैष वृणुते तेन लभ्यः'इति प्रागप्युक्तत्वात् इत्यंस्मिन्नर्थे'यच्छेद्वाङ्ानसी'इति मन्त्रस्य तात्पर्यमिति तदभिप्रायः। शब्दादिहीनत्वमक्षरवाक्ययोः परमात्मनोऽपि प्रसिद्धम्। महतो भोक्तुरात्मनः परत्वं च तस्य प्रसिद्धमेव। नन्वस्तु नाम प्राज्ञस्य प्रकरणं तथापि यथात्रैव 'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुत'मिति मन्त्रे जीवस्य गतिर्वर्णिता। एवं'मशब्द'मिति मन्त्रे प्रधानस्य मुमुक्षुज्ञेयत्ववचनं स्यादित्याशङ्क्याह–सू।। **त्रयाणामेव चैवमुपन्यासः प्रश्नश्च**।।६।। सौत्रस्यैवमितिपदस्य विवरणं–**ज्ञेयतयेति**। उपन्यासः प्रतिपवचनम्। प्रश्नविहित उपन्यासः

प्रश्नोपन्यास:। प्रतिवचनस्य उपास्योपासनोपासकत्रयविषयत्वदर्शनादेव प्रश्नस्य तत्रयविषयत्वं स्फुटमवगन्तव्यमिति प्राथमिकस्यापि प्रश्नस्य सूत्रे पश्चान्निर्देश:। तथैव प्रथमं प्रतिवचनमुदाहरति–**यथाध्यात्मेति।** आदिशब्देन 'मत्वा धीरो हर्षशोकौ जहाती'ति चतुर्थपादो गृह्यते। तावतैव प्रतिवचनस्य तत्रयविषयत्वमवगन्तुं शक्यमित्यभिसन्धाय 'तंदुर्दर्श गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराण'मिति मन्त्रस्य पूर्वार्ध न लिखितम्। अत्र ह्युत्तरार्ध एव 'देवं मत्वे'त्युपास्योपासनयो'रध्यात्मयोगाधिगमेन धीर'इत्युपासकस्य च उपन्यासो दृश्यते। अध्यात्मयोग: उपासकात्मस्वरूपविषयो योग:। **येयं प्रेत इति।** 'येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय:' इति प्रश्न:। एवमत्रोपाख्यायते-वाजश्रवसो महर्षि: सर्ववेदसदक्षिणेन यज्ञेनेष्ट्वा जरद्गवीर्दक्षिणा: प्रयच्छन् बालेन नचिकेतसा पुत्रेणानर्हदक्षिणादाननिमित्तक्रतुवैकल्यात् पितुरनिष्टमाशङ्कमानेन तदनिष्टं स्वात्मप्रतिपादनेनापि क्रतुसम्पत्तिं कारयित्वा निवारणीयमिति मन्यमानेन 'तत मां कस्मै दास्यसी'ति पुन:पुन: पृष्ट्वा बहुवारप्रश्ननिर्बन्धसञ्जातकोपस्य 'मृत्यवे त्वा ददानी'त्युक्तवत: वचनेन नचिकेतास्तथैव मृत्युलोकं गत्वा मृत्योर्द्वारि तिस्रो रात्रीरनश्नन्नुषित्वा प्रवासागतेन मृत्युना ब्राह्मणो यदनश्नन् द्वारि स्थित इति भीतेन त्रीन्वरान्वृणीष्वेति पृष्ट: प्रथमेन वरेण पितुस्सौमनस्यं द्वितीयेनाग्निविद्यां च प्रतिलभ्य अथ 'येयं प्रेत' इति पप्रच्छेति। नायं प्रेत: प्रेतशब्दस्य लोकवेदप्रसिद्ध्या मृतविषयत्वमङ्गीकृत्य मरणानन्तरानुवर्तिजननान्तरानुबन्धिदेहातिरिक्तात्मसद-सद्भावविषयो वर्णनीय:। यथाभूतात्मसद्भावे नचिकेतस: प्रागेव विश्वासवत्त्वात्। अन्यथा पितु: क्रतुवैकल्यदोषपरिहारार्थं 'तात कस्मै मां दास्यसी'ति वचनस्य 'मृत्यवे त्वा ददामी'त्युक्तवत: पितुरनृतदोषपरिहारार्थं स्वयं मृत्युलोकजिगमिषासमये 'सस्यमिव मर्त्य: पच्यते सस्यमिव जायते पुन'रिति वचनस्यानुपपत्ते:। नापि 'न प्रेत्य संज्ञास्ती'ति वाक्यमुखे प्रेत्यशब्दप्रयोगानुसारेण प्रेतशब्दस्य प्रकर्षेण इत: पुनरावृत्तिरहितां गतिं प्राप्त इति योगेन मुक्तविषयत्वमङ्गीकृत्य मुक्तयनन्तरानुबन्धिमलमायादिसकलपाशक्षयपूर्वकं जन्ममृत्युभयशोकाद्यस्पृष्टपरमशिवलोकप्राप्ति-मदात्मसदसद्भावविषयो वर्णनीय:। तत्रापि तस्य प्रागेव विश्वासवत्त्वादेव। अन्यथा 'स्वर्गे लोके न भयं किञ्चनास्ति न तत्र मृत्यु: न जरया बिभेति। उभेतीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोक'इति स्वर्गलोकमहिमवर्णनपूर्वकं 'स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम्। स्वर्गलोका अमृतत्वं भजन्ते एतद्द्वितीयेन वृणे वरेणे'ति स्वर्गसाधनाग्निविद्यावरणानुपपत्ते:। स्वर्गलोको ह्यत्र मुक्तप्राप्य: परमशिवलोक एव। 'देवा ह वै स्वर्गं लोकमगमन्। ते रुद्रमपृच्छ' न्नित्यथर्वशिरसि शिवलोके स्वर्गशब्दप्रयोगदर्शनात् इह स्वर्गलोकशब्दस्याशनायापिपासाजरामृत्युभय-शोकास्पृष्टत्वेन विशेषितत्वाञ्च तस्मै नाचिकेताद्युपदेशानन्तरं तञ्चयनफलवर्णनप्रस्तावे 'स

मृत्युपाशान्पुरतः प्रणुद्य शोकातिगो मोदते स्वर्गलोके'इति तत्फलस्वर्गप्राप्तेस्सकलसंसारपाश-निवृत्तिपूर्वकत्वेन विशेषितत्वाञ्च। न च कर्मणो मुक्तिसाधनत्वं न सम्भवतीति वाच्यम्। उपासनानुग्राहकत्वेन तत्सम्भवात्। तस्मादनिर्णीतविषयस्यास्य प्रश्नस्य प्रतिवचनमालोच्याभिप्रायो वर्णनीयः। प्रतिवचने तु प्रथमं तावत् प्रश्नस्य दुरवगाहविषयत्वं प्रतिपाद्यते। 'देवैरत्रापि विचिकित्सितं पुरा न हि सुज्ञेयमणुरेष धर्म'इति। तदनन्तर'मन्यं वरं नचिकेतो वृणीष्वे'त्युपक्रम्य 'येये कामा दुर्लभा मर्त्यलोके सर्वान् कामान् छन्दतः प्रार्थयस्व। इमा रामास्सरथास्सतूर्या न हीदृशा लम्भनीया मनुष्यैः। आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षी'रित्यन्तसन्दर्भे कृतेन ब्रह्मविद्योपदेशोपयोगिवैराग्यपरीक्षार्थेन प्रलोभनव्रातेन प्रलोभ्यमानस्यापि नचिकेतसः 'श्वो भावा मर्त्यस्य यदन्तकेन सर्वेन्द्रियाणां जरयन्ति तेज'इत्यादिना 'अभिध्यायन् वर्णरतिप्रमोदान् अनतिदीर्घे जीविते को रमेते'त्यन्तेन कृतया विषयनिन्दया विषयवैराग्यमुपलक्ष्य विद्याभीप्सिनं नचिकेतसं 'मन्ये न त्वा कामा बहबोऽलोलुपन्ते'ति मोक्षार्थविद्याभीप्सित्वेन तदुपयोगिदृढवैराग्यवत्त्वेन च प्रशंसा कृतोपलभ्यते। तत'स्तं दुर्दर्शं गूढ'मिति मन्त्रे उपास्योपासनोपासकानामतिसङ्क्षिप्तोपदेशः कृतो दृश्यते। ततस्तदनुसारेण तत्रितयं विविच्य वक्तव्यमिति प्रश्नार्थोऽ'न्यत्र धर्मा'दिति मन्त्रः श्रूयते। तत्रा'न्यत्र धर्मादन्यत्राधर्मा'दिति वैषयिकहर्षशोकहेतुधर्माधर्मविलक्षणस्य तदुभयप्रहाणहेतोरुपासनस्य प्रश्नः। 'अन्यत्रास्मात्कृताकृता'दिति कृतमपि कर्म यस्याकृतप्रायं क्षणभङ्गुरफलं तस्मादैहिकामुष्मिक-कर्मानुष्ठानव्यग्रादमुमुक्षोर्विलक्षणस्य ब्रह्मोपासकस्य प्रश्नः। 'अन्यत्र भूताञ्च भव्याञ्चे'ति भूतादुत्पन्नादतीतात् वर्तमानाञ्च भव्यात् भविष्यतश्च अन्यस्य देवादीनामपि दुरवगाहत्वेन विलक्षणस्योपास्यस्य प्रश्नः। 'यत्तत्पश्यसि तद्वदे'त्यत्र यत्तत्पदयोस्तत्रितयविषयत्वसम्भवात्तदनन्तरं 'तत्ते पदं सङ्ग्रहेण ब्रवीमी'ति प्रतिवचनमुपक्रम्य 'ॐमित्येत'दित्यादिना उपासनसाधनप्रणव-प्रशंसाद्वारा प्रणवेन ब्रह्मोपासने प्रदर्शिते 'न जायते म्रियते वा विपश्चि'दित्यादिना सामान्यत उपासकस्वरूपमुच्यते। विशेषतश्च 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्'। 'विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः।' इत्यादिमन्त्रैः फलपर्यन्तकर्तृस्वरूपं निरूप्यते। 'यमेवैष वृणुते तेन लभ्य' इति परमशिवानु-ग्रहकटाक्षविषय एव उपासनायां मुख्योऽधिकारी। तस्मा एव परमशिवः स्वात्मानं प्रकाशयतीत्युच्यते। तथाभूतश्चाधिकारी मन्दमध्यमोत्तमभावैरवगन्तव्यः। ते भावाः पुराणेषु प्रपञ्चिताः। 'प्रसन्ने सति देवेशे पशोस्तस्मिन्प्रवर्तते। अस्ति नाथो ममेत्यल्पा भक्तिर्मुक्तिपुरस्सरम्। कम्पः स्वेदो ऽश्रुपातश्च कण्ठे च स्वरविक्रिया। आनन्दाद्युपलब्धिश्च भवेदाकस्मिकी तदा। एतैर्व्यस्तैस्समस्तैर्वा लिङ्गैरव्यभिचारिभिः। मन्दमध्योत्तमैर्भावैर्विज्ञेयास्ते नरोत्तमाः।।' इति। उपास्यस्वरूपं तु 'अणोरणीया'नित्यादिना प्रपञ्चेन निरूप्यते। एवं च प्रतिवचनसन्दर्भपर्यालोचनया मुक्तिप्रवृत्तिवचनानन्तरविस्मृतप्रतिवचनार्थतया पुनः

प्रकृतप्रश्नपर्यालोचनया च 'येयं प्रेत'इति प्रश्नस्त्वन्यविषयस्स्यादिति न शङ्क्यम्। त्रीन्वरान्दत्तवन्तं प्रति स्वतन्त्रचतुर्थप्रश्नायोगेन तस्य तृतीयप्रश्नविवरणत्वेनैव योजनीयत्वात्। तस्मादुपास्योपासनोपासकानां त्रयाणामेवात्र सपरिकराणां निरूपणीयत्वात् स्वातन्त्र्येण साङ्ख्यतन्त्रसिद्धतत्वप्रतिपादनस्य मुमुक्षुज्ञेयत्वेन स्वतन्त्रप्रधानवचनस्यात्र नावकाश इति भावः। सूत्रे प्रथमं चशब्दं हेतुसमुच्चयार्थं व्याकुर्वन् सूत्रार्थमुपसंहरति–**तस्मादिति। लिङ्गान्तरमिति।** अव्यक्तं न प्रधानमिति साध्ये हेत्वन्तरमित्यर्थः।।सू।। **महद्वच्च**।।७।।

इति शिवार्कमणिदीपिका आनुमानिकाधिकरणम् समाप्तम्

अथ चमसाधिकरणम्। ॥ सू० ८-१०॥

शाङ्करभाष्यम्

***चमसवदविशेषात्*॥८॥**

पुनरपि प्रधानवाद्यशब्दत्वं प्रधानस्यासिद्धमित्याह। कस्मात्? मन्त्रवर्णात्–''अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः'' (श्वे० ४/५) इति। अत्र हि मन्त्रे लोहितशुक्लकृष्णशब्दै रजः सत्त्वतमांस्यभिधीयन्ते। लोहितं रजः ; रञ्जनात्मकत्वात्। शुक्लं सत्त्वम्; प्रकाशात्मकत्वात्। कृष्णं तमः ; आवरणात्मकत्वात्। तेषां साम्यावस्थाऽवयवधर्मैर्व्यपदिश्यते लोहितशुक्लकृष्णेति। न जायत इति चाजा स्यात्; ''मूलप्रकृतिरविकृतिः'' इत्यभ्युपगमात्॥ नन्वजाशब्दश्छागायां रूढः। बाढम्, सा तु रूढिरिह नाश्रयितु शक्या; विद्याप्रकरणात्। सा च बह्वीः प्रजास्त्रैगुण्यान्विता जनयति। तां प्रकृतिमज एकः पुरुषो जुषमाणः पीयमाणः सेवमानो वाऽनुशेते। तामेवाविद्ययाऽऽत्मत्वेनोपगम्य सुखी दुःखी मूढोऽहमित्यविवेकितया संसरति। अन्यः पुनरजः पुरुष उत्पन्नविवेकज्ञानो विरक्तो जहात्येनां प्रकृतिं भुक्तभोगाम्=कृतभोगापवर्गां परित्यजति। मुच्यत इत्यर्थः। तस्माच्छ्रुतिमूलैव प्रधानादिकल्पना कापिलानामिति। एवं प्राप्ते ब्रूमः–नानेन मन्त्रेण श्रुतिमत्त्वं साङ्ख्यवादस्य शक्यमाश्रयितुम्। न ह्ययं मन्त्रः स्वातन्त्र्येण कञ्चिदपि वादं समर्थयितुमुत्सहते, सर्वत्रापि यया कयाचित्कल्पनयाऽजात्वादिसम्पादनोपपत्तेः साङ्ख्यवाद एवेहाभिप्रेत इति विशेषावधारण-कारणाभावात्। *चमसवत्*॥ यथाहि ''अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः'' (बृ० २/२/३: इत्यस्मिन्मन्त्रे स्वातन्त्र्येणायं नामासौ चमसोऽभिमत इति न शक्यते निरूपयितुम्। सर्वत्रापि यथाकथञ्चिदर्वाग्बिलत्वादिकल्पनोपपत्तेः। एवमिहाप्यविशेष ''अजामेकाम्'' इत्यस्य मन्त्रस्य। नास्मिन्मन्त्रे प्रधानमेवाजाऽभिप्रेतेति शक्यते नियन्तुम्॥८॥

तत्र तु ''इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः'' इति वाक्यशेषाच्चमसविशेषप्रतिपत्तिर्भवति। इह पुनः केयमजा प्रतिपत्तव्येति? अत्र ब्रूमः–

***ज्योतिरुपक्रमा तु तथा ह्यधीयत एके*॥९॥**

परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृतिभूतेयमजा

प्रतिपत्तव्या। तुशब्दोऽवधारणार्थः। भूतत्रयलक्षणैवेयमजा विज्ञेया, न गुणत्रयलक्षणा।। कस्मात्? तथा ह्येके शाखिनस्तेजोऽबन्नानां परमेश्वरादुत्पत्तिमाम्नाय तेषामेव रोहितादिरूपतामामनन्ति—''यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य'' इति, तान्येवेह तेजोऽबन्नानि प्रत्यभिज्ञायन्ते; रोहितादिशब्दसामान्यात्, रोहितादीनां च शब्दानां रूपविशेषेषु मुख्यत्वात्भाक्तत्वाच्च गुणविषयत्वस्य। असन्दिग्धेन च सन्दिग्धस्य निगमनं न्याय्यं मन्यते। तथेहापि ''ब्रह्मवादिनो वदन्ति। किंकारणं ब्रह्म'' (श्वे॰ १/१) इत्युपक्रम्य ''ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्'' (श्वे॰ १/३) इति परमेश्वर्याः शक्तेः समस्तजगद्विधायिन्या वाक्योपक्रमेऽवगमात्। वाक्येशेषेऽपि ''मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'' इति ''यो योनिं योनिमधितिष्ठत्येकः'' (श्वे॰ ४/१०/११) इति च तस्या एवावगमात्र स्वतन्त्रा काचित्प्रकृतिः प्रधानं नामाजामन्त्रेणाम्नायत इति शक्यते वक्तुम्। प्रकरणात्त सैव दैवी शक्तिरव्याकृतनामरूपा नामरूपयोः प्रगवस्थाऽनेनापि मन्त्रेणाम्नायत इत्युच्यते। तस्याश्च स्वविकारविषयेण त्रैरूप्येण त्रैरूप्यमुक्तम्।।९।।

कथं पुनस्तेजोऽबन्नात्मना त्रैरूप्येण त्रिरूपाऽजा प्रतिपत्तुं शक्यते। यावता न तावत्तेजोऽबन्नेष्वजाकृतिरस्ति। न च तेजोबन्नानां जातिश्रवणादजातिनिमित्तोऽप्यजाशब्दः सम्भवतीति। अत उत्तरं पठति—

***कल्पनोपदेशाच्च मध्वादिवदविरोधः*।।१०।।**

नायमजाकृतिनिमित्तोऽप्युजाशब्दः, नापि यौगिकः। किं तर्हि कल्पनोपदेशोऽयम्। अजारूपकक्लृप्तिस्तेजोबन्नलक्षणायाश्चराचरयोनेरुपदिश्यते। यथा हि लोके यदृच्छया काचिदजा रोहितशुक्लकृष्णवर्णा स्याद्बहुबर्करा सरूपबर्करा च, तां च कश्चिदजो जुषमाणोऽनुशयीत, कश्चिच्चैनां भुक्तभोगां जह्यात्, एवमियमपि तेजोब्रन्नलक्षणा भूतप्रकृतिस्त्रिवर्णा बहु सरूपं चराचरलक्षणं विकारजातं जनयति, अविदुषा च क्षेत्रज्ञेनोपभुज्यते, विदुषा च परित्यज्यत इति। न चेदमाशङ्कितव्यम्—एकः क्षेत्रज्ञोऽनुशेतेऽन्यो जहातीत्यतः क्षेत्रज्ञभेदः पारमार्थिकः परेषामिष्टः प्राप्नोतीति । न हींय क्षेत्रज्ञभेदप्रतिपिपादयिषा, किन्तु बन्धमोक्षव्यवस्थाप्रतिपिपादयिषा त्वेषा। प्रसिद्धं तु भेदमनूद्य बन्धमोक्षव्यवस्था प्रतिपाद्यते। भेदस्तूपाधिनिमित्तो मिथ्यऽज्ञानकल्पितो, न पारमार्थिकः ; ''एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा'' इत्यादिश्रुतिभ्यः। *मध्वादिवत्*।। यथा आदित्यस्यामधुनो मधुत्वम्, वाचश्चाधेनोर्धेनुत्वम्, द्युलोकादीनां चानग्नीनामग्नित्वम्, इत्येवंजातीयकं कल्प्यते, एवमिदमनजाया अजात्वं कल्प्यत इत्यर्थः। तस्मादविरोधस्तेजोऽबन्नेष्वजाशब्दप्रयोगस्य।।१०।। इति द्वितीयं चमसवदधिकरणम्।।

इति शाङ्करभाष्यम् चमसाधिकरणम् समाप्तम्

वार्तिकम्

चमसवदविशेषात्।। मा भूदव्यक्तशब्दात् प्रधानाधिगमः, अजामन्त्रात्तु तदधिगमो भविष्यतीति, शाखान्तरीयमन्त्रान्तरमादायेह प्रत्यवस्थीयते। एवं हि शाखान्तरे श्रूयते="अजामेकां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः" इति।।

तत्र सन्देहः—"देवात्मशक्तिं स्वगुणैर्निगूढाम्" "मायां तु प्रकर्तिं विद्यान्मायिनं तु महेश्वरम्" इति प्रकृतेश्वरमायाशक्तिरेवाव्याकृततेजोऽबन्नलक्षणाऽभिधीयते, किं वा परपरिकल्पितं स्वतन्त्रं प्रधानमनूद्यते—इति। कुतः संशयः? ननु पूर्वेणैव न्यायेन गतार्थमेतत्, मैवम्; शब्दमात्रं प्रत्यभिज्ञायते, नार्थ इत्युक्तम्, इह त्वर्थोऽपि प्रत्यभिज्ञायत इत्यस्ति विरोधः। कथमर्थप्रत्यभिज्ञानम्? "लोहितशुक्लकृष्णामि" ति रजआदित्रिगुणात्मकत्वेन विशेषितत्वात्, भोक्तृजीवभेद-सङ्कीर्तनाच्चेति मन्यते स्म। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति हि साङ्ख्यैः प्रधानं स्मर्यते। तद् यद्यप्यजाशब्दात् केवलात् प्रत्यभिज्ञातुं न शक्यते, कुतः? इहापि तद्वत् योगवृत्तेरन्यसाधारणत्वात्; तथापि "लोहितशुक्लकृष्णामि" ति पदसमानाधिकृतात् तस्मात् भवत्येव तत्प्रत्यभिज्ञानम्—इति। लोहितं हि रज उच्यते; रञ्जनात्मकत्वसादृश्यात्, शुक्लम्=सत्त्वम्; स्वच्छसादृश्यात्, कृष्णम्=तमः ; आवरकत्वसादृश्यात्, तैश्च तत्र तत्र तेषु लोहितादिशब्दप्रयोगात्, तवापि मते कार्यरूपाणां कारण उपचाराभ्युपगमात् लक्षणावशक्यकत्वात्। तस्मात् त्रिगुणात्मकत्वाद् अजाया मूलप्रकृतेः साङ्ख्यस्मृतिपठिताया एवेह प्रत्यभिज्ञानं युक्तम्। तस्या अजात्वमपि तैः स्मृतम्— *मूलप्रकृतिरविकृतिरिति*।। अपि चास्मत्पक्षेऽजाशब्दो न स्वार्थं जहाति; योगवृत्त्यङ्गीकरणात्, त्वत्पक्षे तु स्वार्थं जहाति; छागीप्रतिरूपकार्थकत्वाभ्युपगमात्। अपि च तद्भोक्तृभेदोपन्यासोऽपि तत्प्रत्यभिज्ञाकारणम्; साङ्ख्यैस्तद्भेदाङ्गीकरणात्, त्वया च तदनभ्युपगमात्। न चैवं सति प्रकरणबाधः ; श्रुतिलिङ्गवाक्यैस्तद्बाधस्येष्टत्वात्। अजापदं श्रुतिः,

लोहितशुक्लकृष्णामित्यनेन तस्याः समभिव्याहारो वाक्यम्, भोक्तृभेदकथनं लिङ्गमिति द्रष्टव्यम्। ननु पौरुषेयस्मृतिसिद्धं प्रधानं कथमपौरुषेयेण वेदेनानूद्यताम्? नैष दोषः ; पौरुषेयत्वेऽपि स्मृतीनामनादिपरम्परासिद्धत्वात्, कल्पे कल्पे कर्तृमात्रभेदात्, "तद्धैव आहुरसदेवेदमग्न आसीत्" "एकमेवाद्वितीयम्" इत्यसद्वादानुवादवत् तत्सिद्धानुवादस्य वेदेनोपपत्तेः, परन्तु तत्रासद्वादानुवादो दूष्यतया, अत्र तु प्रधानपुरुषानुवाद उपपाद्यतयेति परं भेदः। ननु एवमपि शास्त्रस्यानधिगतार्थत्वाद् अपूर्वार्थत्त्वे सम्भवति नानुवादकत्वकल्पनं मन्त्रस्योचितम्, मैवम्:-

स्मारकत्वेन मन्त्राणामनुवादत्वमिष्यते।
वेदे सर्वत्र तस्मात्तु नानुवादोऽत्र दूषणम्॥

ऋग्यजुः सामलक्षणानां सर्ववैदिकमन्त्राणां प्रमाणान्तरसिद्धानुष्टेयार्थतदङ्गद्रव्यदेवतादिस्मारकत्वेनैव विनियोग इत्युपपादितं मन्त्राधिकरणे। अत्र च प्रधानपुरुषयोर्विवेकख्यातिरनुष्ठेया; अध्यात्माधिकारात्, तत्स्मारकत्वेन मन्त्रस्य विनियोगात्। अनुवादस्तु न दूषणम्। किं तर्हि? भूषणमेव। ननु-"वसन्ताय कपिञ्जलानालभेते" त्यादिमन्त्राणामपूर्वार्थत्वमपि दृष्टम्, सत्यम्; तत्रागत्या तथात्वकल्पनात्, तद्विधायकविध्यन्तरादर्शनात्। न चैतावताऽत्रापि तदपूर्वार्थत्वकल्पनमुचितम्; अत्रानुपपत्तेरभावात्। उपपतिश्चात्रोक्तैव; अन्यतो लब्धप्रधानपुरुषविवेकख्यातिस्मारकत्वसंभवात्, स्मृतिसिद्धानामप्यष्टकादीनाम्-"यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम्। संवत्सरस्य या पत्नी सा नो ह्यस्तु सुमङ्गला॥" इत्यादिवैदिकमन्त्रप्रकाश्यत्वदर्शनात्। अस्तु वाऽजामन्त्रस्यापूर्वार्थत्वम्, तथाप्येतन्मूलैव प्रधानस्मृतिरस्तु, नास्माक काचित् क्षतिरस्ति; उभयथापि प्रधानस्य शब्दवत्त्वसिद्धेः, इत्यधिकाशङ्कासत्त्वादुपपन्नः संशयः। संशयोपपादकत्वेन पूर्वपक्षो व्याख्यातः॥

एवं प्राप्तेऽभिधीयते- *चमसवदविशेषात्*॥ यथा-अर्वाग्बिलश्चमस ऊर्ध्ववुध्नः" इत्यस्मिन् मन्त्रे चमसप्रतिरूपकत्वेनानिर्धारितविशेषस्वरूपं किञ्चिद् वस्तु प्रतीयते। स्वातन्त्र्येणायं नामासौ चमसोऽभिप्रेत इति न निरूपयितुं शक्यते। तत् कस्य हेतोः? सर्वत्रापि यथाकथञ्चिदर्वाग्बिलत्वादिकल्पनासंभवात्, तद्वदिहाप्यजामन्त्रे यदि वाऽजाशब्दो योगेन व्याख्यायताम्, यदि वाऽजात्वकल्पनया, उभयथोभयोरप्यन्यसाधारण्याद् न शक्यते प्रधानमेवानेनाभिधीयत इति निर्णेतुम्। तत्र केयमजा प्रतिपत्तव्या? इति विशेषापेक्षायाम्, यथा चमसविशेषापेक्षायाम्-"इदं तच्छिरः एष अर्वाग्बिलश्चमस ऊर्ध्ववुध्नः" इति वाक्यशेषात्

चमसविशेषप्रतिपत्तिः-"अक्ताः शर्करा उपदधाती" तिवत्, न यः कश्चनान्यश्चमतसोऽपेक्ष्यते, तद्वत् "देवात्मशक्तिं स्वगुणैर्निर्गूढाम्" "मायां तु प्रकृतिं विद्यात्" इति प्रक्रमादेवाजाविशेषप्रतिपत्तौ न या काचनाऽन्या, प्रधानं वाऽनेन निश्चीयते। एतेन-श्रुति लिङ्ग वाक्यविरोधोऽपि-प्रत्याख्यातः ; "आग्नेय्याऽऽग्नीध्रमुपतिष्ठते" इत्यत्र प्रकृताग्नेयीवत् प्रकृताजयाऽपि तेषामुपपत्तेस्तदविरोधात्। अपि च तव मते लोहितादिपदस्य रज आदौ गौणत्वेन श्रुत्यर्थपरित्यागः स्यात्, नास्मन्मते।।८।।

ननु-तवापि मते मायायां रक्तादिरूपाभावात् कथं तदपरित्याग इति-चेत्, मैवम्; *ज्योतिरुपक्रमा तु तथा ह्यधीयत एके*।।९।। तु-शब्दोऽवधारणार्थः। ज्योतिरादिभूतत्रयभावापन्नैवेह पारमेश्वरी मायाऽजात्वेन विवक्षिता; अनर्थहेतुत्वात्, न केवला गुणाः ; स्वतोऽनर्थाहेतुत्वात्, ज्योतिरादीनां तु लोहितादिरूपताम्, एके=छन्दोगा आमनन्ति-"यदग्ने रोहितं रूपं तेजसस्तद्रूपम्, यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये" ति; असन्दिग्धेन शाखान्तरीयेण सन्दिग्धस्यास्य निर्णेतुमुचितत्वात्। तस्माद् नास्मन्मते लोहितादिशब्दस्य स्वार्थपरित्यागोऽस्ति। रज आदिगुणे च गौणत्वात् तत्त्यागः स्यादेवेत्युक्तम्।।९।।

ननु-तेजोऽबन्नभावापन्नाया मायाया लोहितादिरूपत्रयसंभवेऽपि नाजात्वं संभवति। न हि तत्राजाकृतिरस्ति, नाप्यजनिः ; "तत्तेजोऽसृजते" त्यादिनेश्वरात् तज्जनिश्रवणात्, प्रधानस्य जिज्ञास्यत्वेन तत्र योगस्य विद्यमानत्वात्, अन्यतरश्रुतिबाधे च प्रथमानुग्रहस्यैव न्याय्यत्वादिति-चेत्, तत्राह-*कल्पनोपदेशाञ्च मध्वादिवदविरोधः*।।१०।। सूत्रं व्याकरोति-*नायमजाकृतिनिमित्तोऽजाशब्दः, नापि यौगिक इति*।। यदृच्छया=दैवमात्रकारणनेत्यर्थः। न च-उभयश्रुतिविरोध उपक्रमानुरोधो न्याय्य इत्युक्तमिति वाच्यम्; उपक्रमानुरोधे लोहित शुक्लकृष्णाभिति श्रुतित्रयबाधापत्ते बहूनामनुग्रहो न्याय इति न्यायेनाजाश्रुतेरेव बाधस्य युक्तत्वात्, उपक्रमानुरोधस्याविरोधाधीनत्वात्। यदुक्तम्-जीवभेदोपन्यासः प्रधानप्रत्यभिज्ञाने लिङ्गम्-इति, तदनुभाष्य दूषयति-*न चेदमाशङ्कनीयमिति*।। एतेन-यदुक्तम्-मन्त्राणामनुष्ठेयार्थस्मारकत्वेनानुवादस्वाभाव्याद् अस्य च मन्त्रस्य स्मृतविहितप्रधानपुरुषविवेकख्यातिप्रकाशकत्वेन तदनुवादकत्वम्-इति, तत्प्रत्युक्तम्; असिद्धेः, "वसन्ताय कपिञ्जलानालभेत" इत्यादौ व्यभिचारस्य परमते प्रदर्शितत्वात्, मन्त्राधिकरणन्यायस्य याज्यानुवाक्यादिमन्त्राभिप्रायत्वात्। तसमान्नाजामन्त्रे प्रधानप्रत्यभिज्ञानमिति सिद्धम्।।१०।। इति द्वितीयं चमसवदधिकरणम्।।

इति वार्त्तिकम् चमसाधिकरणम् समाप्तम्

प्रदीपः

चमसवदविशेषात्।।८।। अजापदम्, प्रकृतिपरम् वाक्यशेषावगततद्गुणवत्त्वात्, चमसवत्, इत्यजापदार्थनिर्णयार्थत्वात् पादसङ्गतिः। ब्रह्मणि गतिसामान्यसमर्थनं फलं सिद्धान्ते, पूर्वपक्षे तु तदसंभवाक्षेपः, प्रधाने गतिसामान्यसमर्थनं च। पूर्वस्मिन्नधिकरणे साङ्ख्याभिमतैका प्रकृतिर्नाव्यक्तशब्दार्थः, किन्तु प्रतिजीवं नानाविद्या एवाव्यक्तपदार्थ इति शब्दसाम्येऽप्यर्थभेदात् प्रधानपरत्वं निरस्तम्, अत्र त्वर्थतोऽपि एकाजादिशब्दसाम्वाञ्चाक्षेप इत्याक्षेपसङ्गतिरन्तरा।।

अत्रानुसन्धेयानि विषयवाक्यानीमानि–"किं कारणं ब्रह्मे" त्युपक्रम्य प्रवृत्तम्–"ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्।" इति वाक्यम्, "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः। तस्मान् मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।" इति च। अत्र "देवात्मशक्तिमि" त्युपक्रान्तं मायां तु प्रकृतिं विद्यादि" त्यन्तं विषयः। अत्रैका मायैवा "जामेकामि" ति वाक्ये बोध्यते वा, उत साङ्ख्यानां प्रधानं वेति संशयः ; लोहितशुक्लकृष्णत्वोल्लेखात् तेन सत्त्वरजस्तमोगुणात्मकत्वावगमाञ्च समावस्थापन्नसत्त्वरजस्तमोगुणात्मिका प्रकृतिरेव प्रधानपदवाच्याऽत्र प्रत्यभिज्ञायते, तस्येश्वराश्रयत्वाद्युक्तिस्तु कथञ्चन नेयेति पूर्वपक्षः। सिद्धान्तस्तु वाक्यशेषावगतमायैव, ऊर्ध्वबुध्नादिचमसविशेष इवात्राजाशब्दार्थः ; लोहितशुक्लकृष्णादीनामपि तत्र समन्वयसंभवादिति। स्पष्टं चैतद्भाष्ये विवेचितम्। *श्रुतिमूलैव प्रधानादिकल्पनेति*।। श्रुतिर्मूलं यस्याः सा श्रुतिमूलेति विभागः। इदमभ्युपगमवादेन। परमार्थतस्तु साङ्ख्यस्मृतेर्न वेदमूलकत्वम्, किन्तु वेदस्यैवानुमानमूलकत्वमिति मन्तव्यम्। अर्थसाधारण्यमपि मायाविवक्षायां वर्तत इति नाक्षेपावसर इत्याह– *सर्वत्रापीति*।।८।।

ननु–अजात्वं मायाया वर्तताम्, एवमेकत्वमपि समष्टिरूपेण, लोहितशुक्लकृष्णत्वं कथमिति। अतः सूत्रयति– *ज्योतिरुपक्रमा तु तथा ह्यधीयत एके*।।९।। साङ्ख्यानां गुणद्वारेव सिद्धान्तेऽपि

तत्कार्यद्वारा तत्संभव इति न दोष:, यत:—लोहितशुक्लकृष्णाग्निजलान्नात्मका हि सा छान्दोग्यादौ श्रुतेति सूत्राशय:। ज्योतिरादि:=तेजोऽबन्नात्मिका तु लोहितशुक्लकृष्णेति विवक्ष्यते; छान्दोग्ये तेजआदीनां रोहितादिरूपवर्णनादिति सूत्रार्थ:। *परमेश्वरादुत्पन्नेति*॥ अव्यक्तकार्ये शरीरेऽव्यक्तशब्दव्यवस्थावदत्रापि अजाकार्यतेजोऽबन्नात्मिकायां प्रकृतावुत्पन्नायामप्यजाशब्दप्रयोग:, अनेकात्मिकायामप्येकशब्दप्रयोग:, लोहितशुक्लकृष्णात्मत्वं तु स्वत इति विवेक:। तदेतदाह—*भूतत्रयलक्षणेति*॥ ननु—लोहितकृष्णवत्त्वस्योभयत्र साम्ये सति का वा विनिगमना मायापरिग्रह इति? अत आह—*रोहितादीनां च शब्दानामिति*॥ तथाचाजैकपदयोरपि सन्दिग्धयोरसन्दिग्धवाक्यशेषानुसारेणैव निर्णयो युक्त इति भाव:। तदिदमाह—असन्दिग्धेनेति*॥९॥

पूर्वोत्तरवाक्यसन्दर्भोऽपि प्रकृतानुगुण इत्याह—*तथेहापीति*॥ अजाशब्दप्रवृत्तिर्जन्यायामपि कल्पनयोपपद्यत इत्याह—*कल्पनोपदेशाच्च मध्वादिवदविरोध:*॥१०॥ मध्वादीत्यादिपदेनाव्यक्ते शरीरे रथकल्पनाऽपि गृह्यते। तथाच कुत्रचन रथत्वकल्पनम्, कुत्रचनाजात्वकल्पनं च न मायाया अपि विरुद्धम्। ननु न वयमुक्तमन्त्रेणा ''जामेकामि'' ति पूर्वार्धमात्रपर्यालोचनेन साङ्ख्यमतं श्रौतं मन्यामहे, किन्तु ''अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य:।'' इति क्षेत्रज्ञभेदनिर्देशादपीत्याशङ्कायामाह—*न हीयमिति*॥ *प्रतिपिपादयिषेति*॥ तुरेवार्थे। युक्तं चैतत्। ''द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्य: पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीती'' ति जीवपरमात्मनोरेव भेदोऽत्र प्रतिपद्यते, न तु जीवयो:। न ह्येकस्मिन् क्षेत्रे द्वौ क्षेत्रज्ञौ साङ्ख्यानामभिमताविति भाव:। ननु जीवपरमात्मभेदस्यापि कथं मोक्षोपयोगित्वमिति? अत आह—*प्रसिद्धमिति*॥ अन्यत् स्पष्टम्॥१०॥ इति द्वितीयं चमसवदधिकरणम्॥

इति प्रदीप: चमसाधिकरणम् समाप्तम्

भामती

अजाशब्दो यद्यपि छागायां रूढस्तथाप्यध्यात्मविद्याधिकारान्न तत्र वर्तितुमर्हति। तस्माद्रूढेरसम्भवाद्योगेन वर्तयितव्यः। तत्र किं स्वतन्त्रं प्रधानमनेन मन्त्रवर्णेनानूद्यतामुत पारमेश्वरी मायाशक्तिस्तेजोऽवन्नव्याक्रियाकारणमुच्यताम्? किं तावत् प्राप्तं? प्रधानमेवेति। तथाहि यादृशं प्रधानं सांख्यैः स्मर्य्यते तादृशमेवास्मिन्नन्यूनानतिरिक्तं प्रतीयते, सा हि प्रधानलक्षणा प्रकृतिनं जायत इत्यजा च एका च लोहितशुक्लकृष्णा च। यद्यपि लोहितत्वादयो वर्णा न रजःप्रभृतिषु सन्ति, तथापि लोहितं कुसुम्भादि रञ्जयति रजोऽपि रञ्जयतीति लोहितम्। एवं प्रसन्नं पाथः शुक्लं सत्त्वमपि प्रसन्नमिति शुक्लम्। एवमावरकं मेघादि कृष्णं तमोऽप्यावरकमिति कृष्णम्। परेणापि नाव्याकृतस्य स्वरूपेण लोहितत्वादियोग आस्थेयः, किन्तु तत्कार्य्यस्य तेजोऽबन्नस्य रोहितत्वादि कारण उपचरणीयम्। कार्यसारूप्येण वा कारणे कल्पनीयं तदस्माकमपि तुल्यम्। 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इति त्वात्मभेदश्रवणात् सांख्यस्मृतेरेवात्र मन्त्रवर्णै प्रत्यभिज्ञानं न त्वव्याकृतप्रक्रियायाः। तस्यामैकात्म्याभ्युपगमेनात्मभेदा भावात्। तस्मात् स्वतन्त्रं प्रधानं नाशब्दमिति प्राप्तम्। *तेषां साम्यावस्था अवयवधर्मैरिति*। अवयबाः प्रधानस्यैकस्य सत्त्वरजस्तमांसि तेषां धर्मा लोहितत्वादयस्तैरिति। *प्रजास्त्रैगुण्यान्विताः इति*। सुखदुःख-मोहात्मिकाः। तथाहि—मैत्रदारेषु नर्मदायां मैत्रस्य सुखं तत् कस्य हेतोस्तं प्रति सत्त्वसमुद्भवात्। तथा च तत्सपत्नीनां दुःखं तत्कस्य हेतोस्ताः प्रति रजःसमुद्भवात्। तथा चैत्रस्व तामविन्दतो मोहो विषादः स कस्य हेतोस्तं प्रति तमः समुद्भवात्। नर्मदया च सर्वे भावा व्याख्याताः। तदिदं त्रैगुण्यान्वितत्वं प्रजानाम्। अनुशेत इति व्याचष्टे *तामेवाविद्यया इति*। विषया हि शब्दादयः प्रकृतिविकारास्त्रैगुण्येन सुखदुःखमोहात्मान इन्द्रियमनोऽहङ्कारप्रणालिकया बुद्धिरात्वमपसंक्रामन्ति तेन तद्रबुद्धिसत्वं प्रधानविकारः सुखदुःखमोहात्मकं शबदादिरूपेण परिणमते। चितिशक्तिस्त्वपरिणामिन्यप्रति-संक्रमापि बुद्धिसत्त्वादात्मनो विवेकमबुध्यमाना बुद्धिवृत्त्यैव विपर्य्यासेनाविद्यया बुद्धिस्थान् सुखादीन् आत्मन्यभिमन्यमाना सुखादिमतीव बभूव। तदिदमुक्तं सुखी दुःखी मूढोऽहमित्यविवेक्तिया संसरत्येकः। सत्त्वपुरुषान्यताख्यातिसमुन्मूलितनिखिलबासनाविद्यानुबन्धस्त्वन्यो जहात्येनां प्रकृतिं

तदिदमुक्तम् *अन्य: पुन: इति*। भुक्तभोगामिति व्याचष्टे *कृतभोगा- पवर्गाम्*। शब्दाद्युपलब्धिर्भोग:। गुणपुरुषान्यताख्यातिरपवर्ग:। अपवृज्यते हि तया पुरुष इति।

एवं प्राप्तेऽभिधीयते न तावदजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इत्येतदात्मभेदप्रतिपादनपरमपि तु सिद्धमात्मभेदमनूद्य बन्धमोक्षौ प्रतिपादयतीति। स चानूदितो भेद:-

'एको देव: सर्वभूतेषु गूढ: सर्वव्यापी सर्वभूतान्तरात्मा'

इत्यादिश्रुतिभिरात्मैक्तवप्रतिपादनपराभिर्विरोधात्काल्पनिकोऽवतिष्ठते। तथा च न सांख्यप्रक्रियाया: प्रत्यभिज्ञानमित्यजावाक्यं चमसवाक्यवत्परिप्लवमानं न स्वतन्त्रप्रधाननिश्चयाय पर्य्याप्तं, तदिदमुक्तं सूत्रकृता- ''चमसवदविशेषादिति''।।८।।

उत्तरसूत्रमवतारयितुं शङ्कते *तत्र त्विदं तच्छिर इति*। सूत्रमवतारयति *अत्र ब्रूम:*। सर्वशाखाप्रत्ययमेकं ब्रह्मेति स्थितौ शाखान्तरोक्तरोहितादिगुणयोगिनी तेजोबन्नक्षणा जरायुजाण्ड-जस्वेदजोद्भिज्जचतुर्विधभूतग्रामप्रकृतिभूतेयमजा प्रतिपत्तव्या। रोहितशुक्लकृष्णामिति रोहितादिरूपतया तस्या एव प्रत्यभिज्ञानान्त तु सांख्यपरिकल्पिता प्रकृति:, तस्या अप्रामाणिक्तया श्रुतहान्यश्रुत-कल्पनाप्रसङ्गाद्रञ्जनादिना च रोहिताद्युपचारस्य सति मुख्यार्थसम्भवेऽयोगात् तदिदमुक्तं *रोहितादीनां शब्दानाम् इति*। अजापदस्य च समुदायप्रसिद्धिपरित्यागेन न जायत इत्यवयवप्रसिद्ध्याश्रयणे दोषप्रसङ्गात्। अत्र तु रूपककल्पनया समुदायप्रसिद्धेरेवानपेक्षाया: स्वीकारात्। अपि चायमपि श्रुतिकलापोऽस्मदृदर्शनानुगुणो न सांख्यस्मृत्यनुगुण इत्याह *तथेहापि इति*। *किंकारणं ब्रह्मेत्युपक्रम्य इति*। ब्रह्मस्वरूपं तावज्जगत्कारणं न भवति विशुद्धत्वात्तस्य यथाहु:-

पुरुषस्य च शुद्धस्य नाशुद्धा विकृतिर्भवेत्

इत्याशयवतीयं श्रुति: पृच्छति *किंकारणं* यस्य ब्रह्मणो जगदुत्पत्तिस्तत् किकारणं ब्रह्मेत्यर्थ:। ते ब्रह्मविदो ध्यानयोगेनात्मानं गता: प्राप्ता अपश्यन्निति योजना। *यो योनिं योनिम् इति*। अविद्या शक्तिर्योनि: सा च प्रतिजीवं नानेत्युक्तमतो वीप्सोपपन्ना। शेषमतिरोहितार्थम्।।९।।

सूत्रान्तरमवतारयितुं शङ्कते *कथं पुन: इति*। अजाकृतिर्जातिस्तेजोवन्नेषु नास्ति। न च तेजोबन्नानां जन्मश्रवणादजन्मनिमित्तोऽप्यजाशब्द: सम्भवतीत्याह *न च तेजोऽबन्नानाम् इति*।

सूत्रमवतारयति *अत उत्तरं पठति*। ननु किं छागा लोहितशुक्लकृष्णैवान्यादृशीनामपि छागानामुपलम्भादित्यत आह *यदृच्छया इति*। बहुबर्करा बहुशावा। शेषं निगदव्याख्यातम्।।१०।।

इति भामती चमसाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ चमसवदधिकरणम्॥२॥

अप्रकृतत्वादिह न प्रधानप्रस्ताव इति भवतु। अन्यत्र प्रधानमेव कारणत्वेन श्रूयत इत्याशङ्क्याधिकरणमिदमारभ्यते-

॥सू॥ चमसवदविशेषात्॥८॥

श्वेताश्वतरोपनिषदि श्रूयतेऽस्य विषयः-

'अजामेकां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः'॥ ॥इति॥ इह सर्वप्रपञ्चकारणत्वेन जन्मरहितत्वादजेति श्रूयमाणा प्रकृतिः सांख्यसिद्धा परा वा॥

इति संशये सांख्यसिद्धेति वक्तुं युक्तम्। 'अजाम्' इति जन्माभाववचनात्, सर्वप्रजाकारणत्वाञ्च, 'लोहितशुक्लकृष्णाम्' इति वर्णोपलक्षितगुणत्रयावगमाञ्च। तदन्यस्याः कस्याश्चिदेवंविधत्वं न युक्तम्॥

इति प्राप्ते सिद्धान्त उच्यते–न तन्त्रसिद्धा प्रकृतिरिह कारणत्वेनोच्यते। न हि जन्माभावमात्रेण तस्या एव प्रतीतिः। 'अर्वाग्विलश्चमसः' इतिवत् प्रकरणे विशेषकाभावात्। यथा 'इदं तच्छिरः' इति चमसो विशेष्यते। यौगिकाद्विशेषप्रतीतिर्हि विशेषकापेक्षा। ततो न तान्त्रिकी प्रकृतिरिति॥

तन्त्रसिद्धायाः प्रकृतेरन्या कीदृशीत्यत आह-

॥सू॥ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥९॥

ज्योतिरिति परमेश्वर उच्यते। परमेश्वरकारणिकेयमजा प्रकृतिरुच्यते। तथा परमेश्वरकारणिकाया एव प्रतिपादकमेके तैत्तिरीयास्तत्स्वरूपमन्त्रमधीयते। 'अणोरणीयान् महतो महीयान्' इति परमेश्वरमुपक्रम्य 'सप्त प्राणाः प्रभवन्ति' तस्मात्' इत्यादिना प्रपञ्चस्य

परमेश्वरादुत्पत्त्या तदात्मकत्वप्रतिपादनसमये हि 'अजाम्' इति पठन्ति। अतस्तत्प्रत्यभिज्ञानादियमजाऽपि परमेश्वरकारणिकेति निश्चीयते। अतो न तन्त्रसिद्धेति वादो युक्त:।।

ननु परमेश्वरकारणिकेत्यस्या: परमेश्वरकार्यत्वमुच्यते। कथमस्यास्तादृश्या अजामिति वाद इत्याशङ्क्याह–

।।सू।। कल्पनोपदेशाच्च मध्वादिवदविरोध:।।१०।।

कल्पनेति सृष्टिरुच्यते–

'छन्दांसि यज्ञा: क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्ध:।। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'।। इति सृष्ट्युपदेशादजात्वमहेश्वरकार्यत्वयोरविरोध:। तथा हि–प्रलयकाले नामरूपे विहायाचिद्वस्तुरूपा मायाऽपि सूक्ष्मरूपेण महेश्वरस्य शरीरतया तिष्ठतीत्यजा सृष्टिसमये नामरूपोपेता तत्कारणिकेति। यथा आदित्यस्य सृष्टिसमये वस्वादिभोग्यरसाधारत्वेन मधुत्वं कार्यत्वं च, तस्य पुन: प्रलयकाले मध्वादिव्यपदेशानर्हात्यन्तसूक्ष्मरूपेणावस्थानात् अकार्यत्वं च मधुविद्यायां प्रतीयते। 'असौ वा आदित्यो देवमधु.....नैवोदेता नास्तमेता एकल एव मध्ये स्थाता' इति श्रुते:। एवं प्रकृतेरजात्वेश्वरकारणिकात्वयोरविरोध:। तस्मादजा न तन्त्रसिद्धा।। इति चमसवदधिकरणम्।।२।।

इति श्री कण्ठभाष्य चमसाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

तान्त्रिको महात्र भवतीत्यत्र सूत्राभिप्रेतं हेतुमाह—**आत्मशब्दादिति।** व्यापकत्वादियोगादात्मशब्दस्य चेतने रूढेर्बलवत्त्वात् अणावपि जीवे भोक्तृतया प्राधान्याभिप्रायेण महानित्यस्य विशेषणत्वोपपत्तेः। 'महतः परमव्यक्त'मित्यत्र 'महतः परं ध्रुव'मित्यत्र च विशेषणपदेन विशेष्यव्यवहार इत्युपपत्तेः। 'य एतं वैमृधं पूर्णमासेऽनुनिर्वाप्यमपश्य'दित्यादौ विशेषणपदेनापि विशिष्टोपलक्षणदर्शनादिति भावः। अत्र 'महतः परमव्यक्त'मित्यादिमन्त्रे निरीश्वरसाङ्ख्यतन्त्रसिद्धस्य महदव्यक्तपञ्चविंशपुरुषक्रमस्य पञ्चविंशातिरिक्ततत्वान्तरनिषेधस्य च प्रत्यभिज्ञामुपन्यसतः पूर्ववादिनो मते जीवातिरिक्तस्य ब्रह्मणः शशशृङ्गकल्पतया तल्लिङ्गं शशशृङ्गतैक्ष्ण्यकल्पं सिद्धान्ते जीवातिरिक्तब्रह्मोपपादनेन सत्तां प्रापणीयमित्यस्पष्टब्रह्मलिङ्गता। एवमुत्तरेष्वपि वाक्यान्वयाधिकरणपर्यन्तेषु चतुर्ष्वधिकरणेष्वप्यस्पष्टब्रह्मलिङ्गता द्रष्टव्या। प्रकृत्यधिकरणस्य सेश्वरसाङ्ख्यमतनिराकरणार्थतया स्पष्टब्रह्मलिङ्गत्वेऽपि प्रासङ्गिकी सङ्गतिरन्त्याधिकरणस्यातीतकृत्स्नाधिकरणन्यायातिदेशरूपस्य विशिष्य नैतस्मिन्पादे सङ्गत्यपेक्षेति च वक्ष्यामः। ननु समनन्तर एव तृतीयपादान्त्याधिकरणे सुषुप्त्युक्रान्तिसूत्रेण पत्यादिसूत्रेण च सुषुप्तमुक्तोभयावस्थात् जीवात् भिन्नं शिवतत्वरूपं परं ब्रह्मास्तीति प्रसाधितम्। अत्राप्यधिकरणे सौत्रेण 'एकेषा'मिति पदेना 'नुमानिकमपी' त्यपिशब्देन च शाखान्तरप्राप्तस्य कठशाखायामपि प्रकरणान्तरप्राप्तस्य जीवातिरिक्तब्रह्मतत्वस्यानुमतिरेव सूचिता कथं तदपलापेन पूर्वपक्षः। कृत्वा चिन्तयेति भविष्यति। एवं कृत्वाचिन्तारूपमिदमधिकरणम्। अतः 'पुरुषान्नापरं किञ्चि'दिति वाक्यमवलम्ब्य पञ्चविंशातिरिक्तनिषेधोपन्यासमात्रेण शाखान्तरप्रकरणान्तरगत वाक्यानां जीवातिरिक्तब्रह्मपरत्वमाक्षिप्यैवात्र पूर्वपक्षोपपादनं कार्यमित्येवं न भ्रमितव्यमिति प्रदर्शयितुमे 'वानुमानिकमप्येकेषा' मिति सूत्रकृता शाखान्तरप्रकरणान्तरसिद्धब्रह्मानुमतिः सूचिता। अग्रे 'वाक्यान्वया' दिति सूत्रेण तदधिकरणोपयुक्तार्थप्रतिपादनानन्तर 'मन्यांर्थ तु जैमिनि' रिति पूर्वसूत्रानुवृत्तचकारयुक्तेन शाखान्तरप्रकरणान्तरगतवाक्यानां बहूनां जीवातिरिक्ते ब्रह्मणि तत्तदधिकरणोक्तन्यायैरन्वितत्वादपि हेतौ तत्सत्तामपलप्य कृताः पूर्वपक्षाः कर्तुं न युज्यन्त

इत्यर्थान्तरस्यापि प्रतिपादकतया पंचाधिकरणशेषेण कृत्वाचिन्तारूपत्वं स्पष्टीकरिष्यते। कृत्वाचिन्तास्तु न्यायव्युत्पादनार्थास्सिद्धान्तस्थैर्यार्थाश्चेति सर्वं समञ्जसम्।।१।।

इत्यानुमानिकाधिकरणम्।।१।।

अथ चमसवदधिकरणम्।।२।।

पूर्वाधिकरणेन प्रत्युदाहरणसङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति–**अप्रकृतत्वादिति।** इह 'महतः परमव्यक्त'मित्यत्र प्रधाननिर्देशो मा भूत्। प्रकरणस्य प्रश्नोपन्यासाभ्यां त्रिष्वेव नियन्त्रिततत्वात्। ततोऽन्यत्र श्रुत्यन्तरे स्वतन्त्रप्रधानं कारणत्वेंन श्रूयत इत्याशङ्कानिराकरणार्थमिदमधिकरणमारभ्यत इत्यर्थः।।सू।। **चमसवदविशेषात्**।।८।। **इत्यादीति।** 'अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः' इत्युत्तरार्धमादिशब्देन गृहीतम्। अस्य मन्त्रस्य तावदयमर्थः प्रतीयते। काञ्चिच्छागां त्रिवर्णां सरूपबहुबर्करामेकः छागः प्रीयमाणोऽनुवर्तते। अन्यस्तामुपभुक्तां जहातीति लोके सम्भवन्नप्ययमर्थो वेदे विशिष्य चाध्यात्मप्रकरणे न सम्बन्धमर्हतीत्यजाशब्दं योगेन प्रकृतिपरं व्याचक्षाणः सा प्रकृतिः किं साङ्ख्याभिमता स्वतन्त्रा उत सिद्धान्ताभिमता परमेश्वराधीनेति जन्मरहितत्वं परमेश्वरकारणकत्वं च कोटिद्वयबीजमभिप्रेत्य संशयं दर्शयति–**इहेति।** ननु जन्माभाववचनं गौणं नीयतां लोहितादिवचनवदित्याशङ्क्याह–**सर्वेति।** 'बह्वीः प्रजास्सृजमाना' मिति सकलकार्यकारणत्वस्य श्रवणात्तन्निर्वाहाय जन्मरहितत्वं मुख्यमेवाङ्गीकर्तव्यम्। लौहित्यादिवचने तथा मुख्यार्थतात्पर्यग्राहकप्रमाणाभावात्सिद्धान्ताभिमतप्रकृतावपि मुख्यस्य लौहित्यादेरसम्भवाच्च। कुसुम्भसलिलान्धकारगतरञ्जकत्वप्रसन्नत्वावारकत्वगुणयोगादनेकरजस्सत्वतमोगुणेषु लोहितादिशब्दा गौणा इति लोहितादिवचनस्य गुणत्रये तात्पर्यमनुमेयमिति भावः। ननु सिद्धान्तेऽपि प्रकृतेर्जन्मरहितत्वमभ्युपगम्यत इत्याशङ्क्याह-**तदन्यस्या इति।** 'प्रज्ञा च तस्मात्प्रसृता पुराणी'ति परमेश्वरकारणकत्वेन क्लृप्तायाः प्रकतेर्मुख्यजन्मरहितत्वं न सम्भवतीति भावः। तस्मात्साङ्ख्याभिमतप्रकृतिरेवात्र ग्राह्येति पूर्वपक्षमुपसंहरति–**इतीति।** सौत्रेण हेतुवचनेनाभिप्रेतां प्रतिज्ञामध्याहरति-**तन्त्रसिद्धेति।** चमसे यथा विशेषकमस्ति। एवमत्र विशेषकाभावादिति सौत्रस्य हेतोर्व्याकारिष्यमाणस्यासिद्धिमाशङ्क्य परिहरति–**जन्मेति।** जन्मराहित्येऽपि परमेश्वरकारणकत्वं वक्ष्यमाणरीत्या सिद्धान्ताभिमतप्रकृतेस्सम्भवति। अतो जन्माभावश्रवणमात्रान्न साङ्ख्याभिमतप्रकृतिग्रहणे नियामकमित्यभिप्रायः। 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्न्य' इति मन्त्रे चमसशब्दस्य चम्यते अनेनेति योगेन भक्षणसाधनमात्रपरस्य शिरःपरत्वे यथा विशेषकमस्ति 'इदं तच्छिर' इति प्रकरणे वाक्यमेवमत्र न जायत इति योगेनाजन्ममात्रपरस्याजाशब्दस्य साङ्ख्याभिमतप्रकृतिपरत्वे

विशेषकाभावादिति सौत्रं हेतुं व्याचष्टे–**अर्वाग्बिलइति।** ननु यौगिकात् पङ्कजोद्भिदादिशब्दादभिमत-विशेषप्रतीतिः प्रकरणे विशेषकमनपेक्ष्यापि दृष्टं तद्वदिहापि स्यादित्याशङ्क्याह**योगिकादिति।** केवलयौगिको यश्शब्दः तस्मात् यौगिकार्थान्तरविशेषप्रतीतिर्विशेषकापेक्षेत्यर्थः। अतः पङ्कजशब्दस्य पद्मे रूढेरपि सत्त्वादुद्भिज्जत्वे यौगिकार्थस्यैव विशेषाकारत्वेन तदवान्तरविशेषप्रतीत्यपेक्षाभावाञ्च तदुभयव्यावृत्तिः। अतो विशेषकाभावात् तान्त्रिकी प्रकृतिरिहं न ग्राह्येत्युपसंहरति–**तत इति।** विशेषाभावस्सिद्धान्ताभिमतप्रकृतावपि तुल्य इत्याशङ्कामुद्भाव्य तदुत्तरत्वेनोत्तरसूत्रमवतारयति–**तन्त्रसिद्धाया इति**।।सू।। **ज्योतिरुपक्रमा तु तथा ह्यधीयत एके**।।९।। 'तं देवा ज्योतिषां ज्योति' रित्यादिश्रुतिप्रसिद्धेर्ज्योतिश्शब्दो ब्रह्मपर इत्याह–**ज्योतिरिति।** उपक्रमशब्दं कारणपरमभिप्रेत्याह–**परमेश्वर इति।** हिशब्दं भिन्नक्रमयोजनेन हेतुपरं दर्शयन् अस्य मन्त्रस्य शास्त्रान्तरे परमेश्वरकारणिकाया एव प्रकृतेः प्रतिपादकत्वेनाध्ययनादित्यर्थे सूत्रशेषं योजयति-**तथेति।** हेतोरसिद्धिमाशङ्क्य परिहरति–**अणोरिति।** 'अणोरणीया'निति मन्त्रे प्रस्तुतात् परमेश्वरात् प्राणादिरूपस्य सर्वस्य प्रपञ्चस्योत्पत्त्या तदात्मकत्वं प्रतिपाद्यते। 'सप्त प्राणाः प्रभवन्ति तस्मा' दित्यादिना 'यस्माज्ज्यायानपरो नैव कश्चनासे'त्यन्तेन तन्मध्ये 'बह्वीः प्रजा जनयन्तीं सरूपा' इति द्वितीयपादे किञ्चित्पाठभेदेनामुं मन्त्रमधीयते। ततश्च यथा दर्शपूर्णमासप्रकरणपठितं 'ताभ्यामेवमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छ' दिति वाक्यमिन्द्रवृत्तान्तमात्रविषयतया प्रतीयमानमपि प्रकरणानुरोधादिन्द्रेणाग्नीषोमाभ्यां दत्ततयोच्यमानस्यैकादशकपालपुरोडाशद्रव्यकयाग-स्यानुष्ठेयत्वेन प्रतिपादकमङ्गीक्रियते, तथा संसार्यसंसारिजीववृत्तान्तमात्रविषयतया प्रतीयमानो-ऽप्यजामन्त्रः पूर्वापरपरामर्शानुरोधात्तदीयभोगत्यागविषयतयोच्यमानायाः सकलकार्यजनयित्र्याः प्रकृतेः परमेश्वरसृज्यत्वेन प्रतिपादकोऽङ्गीकर्तव्य इत्यर्थः। सूत्रे तुशब्दोऽवधारणार्थः। एवमेवाङ्गीकर्तव्यम्। श्वेताश्वतरोपनिषद्यपि'यो योनिंयोनिमधितिष्ठत्येकः' 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' इत्यादिमन्त्र-पर्यालोचनया परमेश्वराधीनाया एव प्रकृतेः प्रतिपादनमिति प्रतीतेः। अतः 'सृजमाना' मिति सृष्टयै स्वातन्त्र्यप्रतीतेः साङ्ख्याभिमतस्वतन्त्रप्रकृतेः प्रतिपादनमिहाङ्गीकर्तव्यमित्यपि शङ्का निरवकाशा। 'यो योनिं योनिमधितिष्ठत्येक' इति मन्त्रानुसारेण 'आधोरणाधिष्ठितो गजो गच्छती'त्यत्र गच्छतिपदस्येव प्रयोज्यकर्तृत्वलक्षणस्वातन्त्र्यमात्रपरत्वे परप्रेर्यत्वरूपस्वातन्त्र्यपरत्वाप्रतीतेरिति भावः।। जन्मराहित्य-परमेश्वरसृज्यत्वयोर्विरोधशङ्काया उत्तरत्वेनोत्तरसूत्रमवतारयति-**नन्विति**।।सू।। **कल्पनोपदेशाञ्च मध्वादिवदविरोधः**।।१०।। **सृष्टिरुच्यत इति।** 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' 'सर्गादौ भगवान्धाता यथापूर्वमकल्पय'दित्यादिश्रुतिस्मृतिषु कल्पयतिधातोः सृष्टौ प्रयोगदर्शनादिति भावः। सृष्ट्युपदेशवाक्योदाहरणेन सौत्रं हेतुं विशदयन् चशब्दमवधारणार्थं कृत्वा तस्य 'अविरोध' इति प्रतिज्ञयान्वयं दर्शयति–**मायांत्विति।** 'अस्मान्मायी'ति विश्वसृष्ट्युपदेशवाक्यमिहोदाहरणीयम्। तत्र

मायीति निर्दिश्यमानो मायावी सृष्टौ विश्वस्रष्टा महेश्वरशब्दवाच्यत्वेन लोकप्रसिद्धः परमशिव एवेति प्रदर्शनाय 'मायां त्वि'ति तदनन्तरमन्त्रोऽप्युदाहृतः। ननु 'अस्मान्मायी'ति वाक्यात् जन्मराहित्यमहेश्वरसृज्यत्वयोरविरोधो न लभ्यत इत्याशङ्क्य ततस्तल्लाभमुपपादयति–**तथा हीति।** 'मायी'ति विश्वस्त्रष्टुर्मायाविशिष्टत्ववर्णनेन तदानीमप्यविभक्तनामरूपा प्रकृतिः सूक्ष्मरूपेण महेश्वरस्य विशेषणतया तिष्ठतीति प्रदर्शनात् जन्मराहित्यम् 'अस्मा'दिति पञ्चम्यन्तेन सृष्टिसमये मायारूपात् स्वविशेषणात् विश्वं सृजतीति प्रकृतेर्विश्वोपादानत्ववर्णनेन उपादानोपादेयभावेन भेदप्रदर्शनेन तस्या एव कार्यात्मना परमेश्वरकारणकत्वमित्युभयोर्विरोधः ततो लभ्यत इत्यर्थः। **अचिद्वस्तुरूपेति।** सर्गकाले जगत्प्रकृत्याद्यचिद्वस्तुपरिणामवती परप्रकृतिरूपा माया प्रलये परिणामरहिता सती सूक्ष्मरूपेण वर्तत इत्यर्थः। 'मध्वादिव'दिति दृष्टान्तभागं व्याचष्टे–**यथेति।** यथा सूर्यस्य सृष्टिसमये मधुत्वकार्यत्वोदयास्तमयवत्त्वं प्रलयसमये तदभावश्चेत्युभयोरविरोधः। मधुविद्यायां तथा श्रवणात्। एवं प्रकृतेऽप्यविरोध इत्यर्थः॥२॥

इति चमसाधिकरणम्॥२॥

इति शिवार्कमणिदीपिका चमसाधिकरणम् समाप्तम्

अथ सङ्ख्योपसङ्ग्रहाधिकरणम्। ॥सू० ११-१३॥

शाङ्करभाष्यम्

न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च॥११॥

एवं परिहृतेऽप्यजामन्त्रे पुनरन्यस्मान्मन्त्रात्साङ्ख्यः प्रत्यवतिष्ठते। "यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान्ब्रह्माऽमृतोऽमृतम्" (बृ० ४/४/१७) इति। अस्मिन्मन्त्रे पञ्च पञ्चजना इति पञ्चसङ्ख्याविषयाऽपरा पञ्चसङ्ख्या श्रूयते; पञ्चशब्दद्वयदर्शनात्। त एते पञ्चपञ्चकाः पञ्चविंशतिः सम्पद्यन्ते। तथा पञ्चविशतिसङ्ख्यया यावन्तः सङ्ख्येयया आकाङ्क्षयन्ते, तावन्त्येव च तत्त्वानि सांख्यैः सङ्ख्यायन्ते–"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृर्तिन विकृतिः पुरुषः" (साङ्ख्यका० ३) इति। तया श्रुतिप्रसिद्धया पञ्चविंशतिसङ्ख्यया तेषां स्मृतिप्रसिद्धानां पञ्चविंशतितत्त्वानामुपसङ्ग्रहात्प्राप्तं पुनः श्रुतिमत्त्वमेव प्रधानादीनाम्।

ततो ब्रूमः–न सङ्ख्योपसङ्ग्रहादपि प्रधानादीनां श्रुतिमत्त्वं प्रत्याशा कर्तव्या॥ कस्मात्? नानाभावात्। नाना ह्येतानि पञ्चविंशतिस्तत्त्वानि। नैषां पञ्चशः पञ्चशः साधारणो धर्मोऽस्ति, येन पञ्चविंशतेरन्तराले पराः पञ्च पञ्चसङ्ख्या निविशेरन्। न ह्येकनिबन्धनमन्तरेण नानाभूतेषु द्वित्वादिकाः सङ्ख्या निविशन्ते। अथोच्येत–पञ्चविंशतिसङ्ख्यैवेयमवयवद्वारेण लक्ष्यते–यथा "पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुः" इति द्वादशवार्षिकीमनावृष्टिं कथयन्ति, तद्वदिति। तदपि नोपपद्यते, अयमेवास्मिन्पक्षे दोषो, यल्लक्षणाश्रयणीया स्यात्। परश्चात्र पंञ्चशब्दो जनशब्देन समस्तः पञ्चजना इति; पारिभाषिकेण स्वरेणैकपदत्वनिश्चयात्। प्रयोगान्तरे च "पञ्चानां त्वा पञ्चजनानाम्" (तै० १/६/२/२) इत्यैकपद्यैकस्वर्यैकविभक्तिकत्वावगमात्। समस्तत्वाच्च न वीप्सा पञ्च पंच इति। न च पञ्चकद्वयग्रहणं पञ्च पञ्चेति। नच पञ्चसङ्ख्याया एकस्याः पञ्चसङ्ख्यया परया विशेषणं पञ्च पञ्चका इति; उपसर्जनस्य विशेषणेनासंयोगात्॥ नन्वापन्नपञ्चसङ्ख्याका जना एव पुनः पञ्चसङ्ख्यया विशेष्यमाणाः पञ्चविंशतिः प्रत्येष्यन्ते। यथा पञ्च पञ्चपूल्य इति पञ्चबिंशतिपूलाः प्रतीयन्ते, तद्वत्। नेति ब्रूमः। युक्तं यत्पञ्चपूलीशब्दस्य समाहाराभिप्रायत्वात्कतीति

सत्यां भेदाकाङ्क्षायां पञ्च पञ्चपूल्य इति विशेषणम्, इह तु पञ्च जना इत्यादित एव भेदोपादानात्कतीत्यसत्यां भेदाकाङ्क्षायां न पञ्च पञ्चजना इति विशेषणं भवेत्। भवदपीदं विशेषणं पञ्चसङ्ख्याया एव भवेत्, तत्र चोक्तो दोषः। तस्मात्पञ्च पञ्चजना इति न पञ्चविंशतितत्त्वाभिप्रायम्।

अतिरेकाञ्च न पञ्चविंशतितत्त्वाभिप्रायं। अतिरेको हि भवत्यात्माकाशाभ्यां पञ्चविंशतिसङ्ख्यायाः।। आत्मा तावदिह प्रतिष्ठां प्रत्याधारत्वेन निर्दिष्टः ; यस्मिन्निति सप्तमीसूचितस्य ''तमेव मन्य आत्मानम्'' इत्यात्मत्वेनानुकर्षणात्। आत्मा च चेतनः पुरुषः। स च पञ्चविंशतावन्तर्गत एवेति न तस्येवाधारत्वमाधेयत्वं च युज्यते। अर्थान्तरपरिग्रहे च तत्त्वसङ्ख्यातिरेकः सिद्धान्तविरुद्धः प्रसज्येत तथा ''आकाशश्च प्रतिष्ठितः'' इत्याकाशस्यापि पञ्चविंशतावन्तर्गतस्य न पृथगुणदानं न्याय्यम्। अर्थान्तरपरिग्रहे चोक्तं दूषणम्। कथं च सङ्ख्यामात्रश्रवणे सत्यश्रुतानां पञ्चविंशतेस्तत्त्वानामुपसङ्ग्रहः प्रतीयते; जनशब्दस्य तत्त्वेषवरूढत्वात्। अर्थान्तरोपसङ्ग्रहेऽपि सङ्ख्योपपत्तेः।। कथं तर्हि पञ्च पञ्चजना इति? उच्यते-''दिक्संख्ये संज्ञायाम्'' (पा० सू० २/१/५०) इति विशेषणस्मरणात्संज्ञायामेव पञ्चशब्दस्य जनशब्देन समासः। ततश्च रूढत्वाभिप्रायेणैव केचित्पञ्चजना नाम विवक्ष्यन्ते, न साङ्ख्यतत्त्वाभिप्रायेण। ते कतीत्यस्यामाकांङ्क्षायां पुनः पञ्चेति प्रयुज्यते। पञ्चजना नाम ये केचिते, च पञ्चैवेत्यर्थः। सप्तर्षयः सप्तेति यथा।।११।।

के पुनस्ते पञ्चजना नामेति? तदुच्यते-

प्राणादयो वाक्यशेषात्।।१२।।

''यस्मिन्पञ्च पञ्चजनाः'' इत्यत उत्तरस्मिन्मत्रे ब्रह्मस्वरूपनिरूपणाय प्राणादयः पञ्च निर्दिष्टाः-''प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः'' इति। तेऽत्र वाक्येशषगताः संनिधानात्पञ्चजना विवक्ष्यन्ते।। कथं पुन प्राणादियु जनशब्दप्रयोगः? तत्त्वेषु वा कथं जनशब्दप्रयोगः? समाने तु प्रसिद्ध्यतिक्रमे वाक्यशेपवशात्प्राणादय एव ग्रहीतव्या भवन्ति। जनसम्बन्धाञ्च प्राणादयो जनशब्दभाजो भवन्ति। जनवचनश्च पुरुषशब्दः प्राणेषु प्रयुक्तः-''ते वा एते पञ्च ब्रह्मपुरुषाः'' (छा० ३/१३/६) इत्यत्र। ''प्राणो ह पिता प्राणो ह माता'' (छा० ७/१५/१) इत्यादि च ब्राह्मणम्। समासबलाञ्च समुदायस्य रूढत्वमविरुद्धम्।। कथं पुनरसति प्रथमप्रयोगे रूढिः शक्याऽऽश्रयितुम्? शक्योद्भिदादिवदित्याह। प्रसिद्धार्थसंनिधाने ह्यप्रसिद्धार्थः शब्दः प्रयुज्यमानः समभिव्याहारात्तद्विषयो नियम्यते, यथा ''उद्भिदा यजेत'' ''यूपं छिनत्ति'' ''वेदिं करोति'' इति।

तथाऽयमपि पञ्चजनशब्द: समासान्वाख्यानादवगतसंज्ञाभाव: संज्ञ्याकाङ्क्षी वाक्यशेषसमभिव्याहृतेषु प्राणादिषु वर्तिष्यते। कैश्चित्तु देवा: पितरो गन्धर्वा असुरा रक्षांसि च पञ्च पञ्चजना व्याख्याता:। अन्यैश्च चत्वारो वर्णा निषादपञ्चमा: परिगृहीता:। क्वचिच्च ''यत्पञ्चजन्या विशा'' (ऋ० सं० ८/५३/७) इति प्रजापर: प्रयोग: पञ्चजनशब्दस्य दृश्यते। तत्परिग्रहेऽपीह न कश्चिद्विरोध:। आचार्यस्तु–न पञ्चविंशतेस्तत्त्वानामिह प्रतीतिरस्तीत्येवम्परतया ''प्राणादयो वाक्यशेषात्'' इति–जगाद।।१२।।

भवेयुस्तावत्प्राणादय: पञ्चजना माध्यंदिनानाम्, येऽन्नं प्राणादिष्वामनन्ति। काण्वानां तु कथं प्राणादय: पञ्चजना भवेयुर्येऽन्नं प्राणादिषु नामनन्तीति? अत उत्तरं पठति–

***ज्योतिषैकेषामसत्यन्ने*।।१३।।**

असत्यपि काण्वानामन्ने ज्योतिषा तेषां पञ्चसङ्ख्या पूर्येत। तेऽपि हि ''यस्मिन् पञ्च पञ्चजना:'' इत्यत: पूर्वस्मिन्मत्रे ब्रह्मस्वरूपनिरूपणायैव ज्योतिरधीयते–''तदद्रे वा ज्योतिषां ज्योति:'' इति। कथं पुनरुभयेषामपि तुल्यवदिदं ज्योति: पठयमानं समानमन्त्रगतया पञ्चसङ्ख्यया केषाञ्चिद् गृह्यते, केषाञ्चिन्नेति? अपेक्षाभेदादित्या। माध्यन्दिनानां हि समानमन्त्रपठितप्राणादिपञ्च-जनलाभान्नास्मिन्मन्त्रान्तरपठिते ज्योतिष्यपेक्षा भवति। तदलाभात्तु काण्वानां भवत्यपेक्षा। अपेक्षाभेदाञ्च समानेऽपि मन्त्रे ज्योतिषो ग्रहणाग्रहणे; यथा समानेऽप्यतिरात्रे वचनभेदात्षोडशिनो ग्रहणाग्रहणे, तद्वत्। तदेवं न तावत श्रुतिप्रसिद्धि: काचित्प्रधानविषयाऽस्ति। स्मृतिन्यायप्रसिद्धी तु परिहरिप्येते।।१३।। इति तृतीयं नसंख्योपसङ्ग्रहाधिकरणम्।।

इति शाङ्करभाष्यम् सङ्ख्योपसङ्ग्रहाधिकरणम् समाप्तम्

वार्तिकम्

न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाञ्च।। मा भूद् अजामन्त्रे साङ्ख्योक्तसङ्ख्येयप्रत्यभिज्ञानात् प्रधानशब्दवत्त्वम्; पूर्वोक्तन्यायेन तत्र तत्प्रत्यभिज्ञानासिद्धेः, ''यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।'' इत्यस्मिन् मन्त्रे तु तत्त्वसङ्ख्याप्रत्यभिज्ञानेन सङ्ख्येयतत्त्वप्रत्यभिज्ञानाद् अस्ति तस्य शब्दवत्त्वमिति प्रत्यवतिष्ठते। तदिदं प्रत्यवस्थानं साङ्ख्यस्य धृतराष्ट्रपुत्रस्येव शल्यसहायस्य सकृष्णान् पाण्डुपुत्रान् प्रति। तथाचोक्तम्–''हते भीष्मे हते द्रोणे कर्णे च विनिपातिते। आशा बलवती राजन् शल्यो जेष्यति पाण्डवान्।'' इति। ''यस्मिन् पञ्च पञ्चजना'' इत्यत्र सन्दिह्यते–किमत्र पञ्चविंशतिः सङ्ख्या प्रतीयते, उत न–इति। तदर्थं चायं विचारः–किमत्र द्वितीयपञ्चशब्दो जनशब्देन समस्तः, उत न। यद्याद्यः, तदा ''दिक्सङ्ख्ये संज्ञायामि'' ति स्मरणात् पञ्चजनशब्दस्य कस्यचिद् नामधेयत्वात् पञ्च सङ्ख्याया एव विशिष्टपञ्चशब्दात् प्रतीतेर्न पञ्चविंशतिसङ्ख्याप्रतीतिरस्ति; अथासमस्तः, तदा–''पञ्च सप्त च वर्षाण न ववर्ष शतक्रतुरि'' त्यादाविवावयवेनावयविलक्षणादस्ति तत्प्रतीतिः–इति। यदाऽपि तत्प्तीतिः, तदाऽपि किं तया साङ्ख्यानां तत्त्वानि प्रत्यभिज्ञातुं शक्यन्ते, उत नेति भवति संशयः। सहैव तावदेतान् पक्षान् विचारयिष्यामः।।

किं तावत् प्राप्तम्? शक्यन्ते तावत् पञ्चविशत्या साङ्ख्यमात्रप्रतीयमानया साङ्ख्याभिमतानि तत्त्वानि प्रत्यभिज्ञातुम्; अध्यात्माधिकारात्, जनशब्दसामानाधिकरण्याञ्च। अध्यात्माधिकारे हि बृहदारण्यकेऽयं मन्त्रः पठितः। न च तत्र प्रतीयमानया पञ्चविंशतिसङ्ख्ययाऽसति बलवत्प्रमाणान्तरविरोधेऽनध्यात्मसम्बन्धिनः पदार्था अवच्छेत्तुं शक्यन्ते; प्रकरणबाधापत्तेः। न चाध्यात्मसम्बन्धिनस्तत्त्वेभ्योऽन्ये पञ्चविंशतिसङ्ख्यावच्छिन्नाः पदार्थाः कुत्रचित् लोके तन्त्रान्तरे वा प्रसिद्धाः सन्ति, येन न तया साङ्ख्यपठिततत्त्वानामेव प्रत्यभिज्ञानं स्यात्। अपिच जनशब्देनात्र जनसम्बन्धिनः पदार्था लक्ष्यन्ते; स्वार्थासम्भवात्। तत्त्वानि च जनसम्बन्धीनि। अतस्तत्सामानाधिकरण्यात् तत्त्वनिष्ठैव सा सङ्ख्येत्यध्यवसीयते। अतः साङ्ख्याभिमततत्त्वान्येवात्र

पञ्चविंशतिसङ्ख्यावच्छिन्नानि प्रत्यभिज्ञायन्ते–"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः।।" इति; तैस्तेषां पञ्चविंशतीनामेव परिसङ्ख्यातत्वत्। कथं पुनश्च पञ्चविंशतिसङ्ख्या लक्ष्यते? पञ्चपञ्चेति वीप्साबलीदिति ब्रूमः। कथम्? इत्थम्;–यद्यपि पञ्चजनशब्दो द्रव्योपसर्जनीभूतां पञ्चसङ्ख्यां ब्रूते। तथाच यथा–"ते वर्गाः पञ्च पञ्च चे" त्यत्र पञ्चसु कु–चु–टु–तु–पुवर्गेषु वीप्सयोञ्चार्यमाणः पञ्चशब्दः प्रत्येकं तेषु तेषु पञ्चत्वं बोधयन् तद्द्वारा समुदायेषु पञ्चविंशतिसङ्ख्यामुपस्यापयति, एवं जनसम्बन्धिषु प्राण–बुद्धीन्द्रिय–कर्मेन्द्रिय–भूततन्मात्र–प्रकृति–पुरुष–महदहङ्कारमनस्सु जनशब्दोपस्थापितेषु वीप्सया प्रयुज्यमानः पञ्चशब्दः तेषु पञ्चत्वं बोधयन् तद्द्वारा पञ्चविंशतिसङ्ख्यामुपस्थापयति। न च जनशब्दोत्तरपञ्चशब्दस्य समासाद् नास्ति वीप्सेति–वाच्यम्; तेन सह समासाभावात्, स्वरभेदस्याध्यापकभ्रान्त्याऽपि सम्भवात्। न च–आत्माकाशयोरन्तर्भावेण सङ्ख्यापूरणे पृथक् तन्निर्देशानुपपत्तिः ; न्यूनसङ्ख्यापत्तेः, तावनन्तर्भाव्यैव प्रकृतिगुणैस्तत्पूरणे चातिरेकापत्तिरिति–वाच्यम्; तयोरनन्तर्भावेण सङ्ख्यापूरणेऽपि देवदत्तेन सुपुत्रेण मम कुलं प्रतिष्ठितम्, अहं च प्रतिष्ठितः" इति वत् "दश लोका मम पोष्या यज्ञदत्तश्चे" तिवञ्च पृथग् निर्देशोपपत्तेः। यथा हि देवदत्तस्य स्वरस्यय कुल मध्येऽन्तर्भावेऽपि ततः पृथक्कृत्य निर्देशो भवति स्वपुरुषस्तुतये, यथा वा स्वस्य यज्ञदत्तस्य च दशसु मध्येऽन्तर्भावेऽपि पृथक्कृत्य निर्देशः, स्वमहात्म्यज्ञापनाय, तद्वत् पञ्चविंशतिष्वात्माकाशयोस्तदन्तर्भूतात्मस्तुतये तयोः पृथग् निर्देशो न विरुद्ध्यते–इत्थं महाभागधेयो भोक्ता यस्मिन् पञ्चविंशतितत्त्वानि भोगसाधनानि प्रतिष्ठापितानि; तदर्थत्वात् तेषाम्। न च–आकाशस्य स्वातन्त्र्यप्रसिद्धेर्न स तत्र प्रतिष्ठित इति–वाच्यम्; स्वतन्त्रतया प्रसिद्धस्य तस्य तद्भोगसाधनतया प्रतिष्ठितत्वादिति। तस्मात् श्रुतिप्रसिद्धपञ्चविंशतिसङ्ख्यया तदवच्छिन्नानां साङ्ख्यस्मृतिप्रसिद्धतत्त्वानां प्रत्यभिज्ञानात् प्राप्तं पुनः प्रधानादीनां श्रुतिमत्त्वमिति।।

एवं प्राप्ते पठत्याचार्यः–*न सङ्ख्योपसङ्ग्रहादपीति*।।११।। अपिशब्दोऽभ्युपगमवादं द्योतयति। वस्तुतस्तु नात्र पञ्चविंशतिसङ्ख्योपसङ्ग्रहः सम्भवतीति वक्ष्यते। यदि नामात्र पञ्चविंशतिः सङ्ख्योपसंगृह्यते पञ्चपञ्चेति वीप्सया प्रत्येकं पञ्चसङ्ख्याबोधनद्वारा; तथापि न तया साङ्ख्याभिमततत्त्वानि प्रत्यभिज्ञातुं शक्यन्ते। कुतः? तेषां पञ्चशः पञ्चशः साधारणानामभावेन नानाभावात्=तेषु पञ्चविंशत्याः सङ्ख्याया अन्तराले पञ्चत्व–पञ्चकानिवेशात्। न चैकार्थकारितालक्षणमेकं साधारणधर्ममन्तरेण पृथग्भूतेषु पदार्थेषु द्वित्वादिकाः सङ्ख्या निविशन्ते; तासामपेक्षाबुद्धिजन्यत्वात्, अपेक्षायास्त्वेकप्रयोजननिबन्धनाधीनत्वात्। कादिवर्गेषु त्वस्त्येव पञ्चशः साधारणो धर्मो जिह्वामूलीयत्वादिः ; "जिह्वामूले तु कुः प्रोक्त" इत्यादिस्मरणात्। अतो विषमो दृष्टान्तः।।

ननु–अस्त्येव तत्त्वेष्वपि पञ्चशः पञ्चशः साधारणो धर्मः–बुद्धीन्द्रियेषु पञ्चसु तावद् बहिःसाक्षात्कारासाधारणकारणत्वम्, कर्मेन्द्रियेषु वचनादानादिचेष्टाऽसाधारणकारणत्वम्, भूतेषु च परमत इन्द्रियोपादानत्वम्, साङ्ख्यमते च तन्मात्रप्रकृतिकत्वम्, तन्मात्रेषु भूतप्रकृतिकत्वमिति–चेत्, सत्यम्; तथापि प्रकृतिपुरुषमहदहङ्कारमनस्सु नास्ति तेषामुपसङ्ग्राहक एको धर्मः; तेषां परस्परं विलक्षणकार्यकारित्वेन नानाभावात्। तस्माद् युक्तमुक्तम्–न सङ्ख्योपसङ्ग्रहादपि साङ्ख्यतत्वपरिग्रहः; नानाभावात्–इति॥

यद्वा–न सङ्ख्योपसङ्ग्रहादपि–पञ्चपञ्चेति वीप्सया तत्त्वेषु पञ्चशः पञ्चशः पञ्चसङ्ख्योपसङ्ग्रहादपि पञ्चविंशतिः सङ्ख्या प्रतिपत्तुं शक्यते, यया प्रतिपन्नया साङ्ख्याभिमततत्त्वानां प्रत्यभिज्ञानं स्यात्। कुतः? नानाभावात्=साङ्ख्याभिमततत्त्वानां तेषु पञ्चशः पञ्चशः पञ्चसङ्ख्यानिवेशानुपपत्तेः। यद्वा–सङ्ख्या द्वित्वादिका सोपसंगृह्यते येन साधारणेन धर्मेण स सङ्ख्योपसंग्रहः। तेन एवं सूत्रं योज्यम्–न तावदत्र प्रत्यक्षं पञ्चविंशतिः सङ्ख्या श्रूयते; तद्वाचकपदस्याभावात्। किं तर्हि? पञ्चपञ्चेति वीप्सया पञ्चशः पञ्चशस्तेषामुपसङ्ग्रहेण पञ्चविंशतिः सङ्ख्या लक्षणीया। न च तदुपसङ्ग्रहादपि सा प्रत्येतुं शक्यते; तत्त्वानां नानाभूतत्वेन तदुपसङ्ग्रहाभावात्। *अतिरेकाच्च*॥ अपि च न केवलं तत्त्वानां नानाभूतत्वेन पञ्चशः पञ्चश उपसङ्ग्रहाभावात् तदुपलक्षितपञ्चविंशतिसङ्ख्याया अनिवेशस्तेषु; आत्माकाशाभ्यामतिरेकादपि न तस्यास्तेषु समावेशोऽस्ति। साङ्ख्यैर्हि पञ्चविंशतितत्वेष्वन्तर्भूतत्वेनात्माकाशौ पठितौ, अत्र तु पञ्चपञ्चकेभ्यः पृथक्त्वेन। न च–तयोः पञ्चविंशतान्तर्भावेऽपि देवदत्तेन सुपुत्रेण मम कुलं प्रतिष्ठितम्, अहं च प्रतिष्ठित इतिवत् "दश लोका मम पोष्या यज्ञदत्तश्चे" तिवच्च पृथग् निर्देशो न विरुध्यत इति–वाच्यम्; वैषम्यात्। तत्र हि स्वपुत्रादिस्तुतिविषयत्वाद् वाक्यस्य न स्वार्थपरत्वमस्ति। अतोऽवयुत्य वादेऽपि न दोषः। अत्र तु स्वार्थपरत्वमेवास्य वाक्यस्यावश्यमभ्युपगन्तव्यम्, न स्तुतिपरत्वम्; स्तुतिपरत्वे सङ्ख्याभिधानद्वारा साङ्ख्याभिमततत्त्वपरत्वासिद्धेः। तस्मात् स्वार्थपरत्वेऽतिरेकापत्तिरुपपन्ना॥

अथवा–एवं योजना–न पञ्चविंशतिसङ्ख्याऽस्मिन् मन्त्रे पञ्चपञ्चेति वीप्सया लभ्यते। कुतः? उपसङ्ग्रहात् वीप्साया असिद्धेः। उपसङ्ग्रहेणात्र पञ्चशब्दस्य समासं ब्रूमः। तथाच जनशब्देनैकपञ्चशब्दस्य समासाद् न पञ्च पञ्चेति वीप्सा, तदभावाच्च न पञ्चविंशतितत्त्व-सङ्ख्यालाभः ; पञ्चत्वसङ्ख्याया एवावशिष्टपञ्चशब्देन लाभात्। कुतोऽत्र समासो निर्णीयते? भाषिकस्वरेणेति ब्रूमः। न च तत्राध्यापकभ्रान्तिकल्पनं युक्तम; सर्वाध्यापकपरम्परा-सिद्धत्वेनाविगानात्, तथात्वेऽपि भ्रान्तिकल्पनेऽतिप्रसङ्गेन सर्वत्रानाश्वासापत्तेः। यदि ब्रूयादस्तु नाम

जनशब्देन पञ्चशब्दस्य समासः–"पञ्चजनाः" इति; तथापि "पञ्चमूल्य" इत्यत्रेव लभ्येतैवात्र पञ्चविंशतित्वसङ्ख्येति, तत्राह– *अपि नानाभावादिति*।। नानाभावादपि न सङ्ख्याऽत्र पराभिमता परिगृह्यत इति योजना।।

अयमभिप्रायः–युक्तं पञ्चपूल्य इत्यत्र पञ्चानां पूलानां समाहारः "पञ्चपूली" ति समाहारे द्विगुसमासविधानात् समाहारस्य च सङ्ख्येयस्य सङ्ख्यापेक्षत्वेन कतीत्याकाङ्क्षायां पञ्चेति सङ्ख्यान्तरनिवेशादर्थात्तदवयवभूतानां पूलानां पञ्चविंशतित्वसङ्ख्यालाभ इति, इह तु समासान्तरासम्भवात् पञ्च च ते जनाश्चेति कर्मधारयो वाच्यः। तथाच पञ्चत्वसङ्ख्यायोगिषु नानाभूतेषु जनेषु निराकाङ्क्षत्वाद् युगपत् सङ्ख्याद्वयानिवेशाच्च न पञ्चत्वसङ्ख्यान्तरनिवेश इति। नानाभावादिति वा च्छेदः। तत्रायमभिप्रायः–"दिक्सङ्ख्ये संज्ञायाम्" इति संज्ञायामेवात्र समासस्य पाणिनिना स्मरणात् पञ्चजनशब्दस्य कुत्रचिद् रूढत्वेन तदभिधेयस्य नानात्वाभावात् ते कतीति सङ्ख्यापेक्षायां पञ्चेति सङ्ख्यान्वये सप्त सप्तर्षय इतिवत् "पञ्च पञ्चजनाः" इति पञ्चानामेव पञ्चजनानां लाभाद् न पञ्चविंशतिसङ्ख्या तेषु लभ्यते–इति। इतश्च न पञ्चविंशतित्वसङ्ख्याऽत्र लभ्यते; अतिरेकात्। आत्माकाशाभ्यामितिं शेषः। व्याख्यानं पूर्ववत्।।

भाष्यम्– *अथोच्येत पञ्चविंशतिसङ्ख्यैवेयमवयवद्वारेण लक्ष्यत इति*।। ननु–इयमाशङ्कैव न सम्भवति; तत्त्वेषु पञ्चशः पञ्चशः साधारणधर्माभावेनावान्तरसङ्ख्याया अनिवेशादित्युक्तत्वात्। अपिच महासङ्ख्याया अन्तरालेऽवान्तरसङ्ख्या न सम्भवन्ति; अपेक्षाबुद्धिनाशे तासां विनाशात्। एतेन–ताभिर्महासङ्ख्यालक्षणाऽपि–प्रत्युक्ता; साहचर्याभावात् तासां तदवयवत्वासिद्धेः–उच्यते। अयमत्र चोदयितुरभिप्रायः–यदुक्तम्–न ह्येकं निबन्धन मन्तरेण नानाभूतेषु द्वित्वादिकाः सङ्ख्या निविशन्ते–इति, नायमस्ति नियमः ; "पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुरि" त्यत्र न पञ्चानां सप्तानां च वर्षाणामुपसङ्ग्राहकः साधारणः कश्चन धर्मो दृश्यते। अतस्तत्रोपसङ्ग्राहक-धमान्तरेणापि यथाऽपेक्षाबुद्धिजन्याभ्यां तद्व्यङ्ग्याभ्यां वाऽन्तरालवर्तिभ्यां पञ्चत्वसप्तत्वसङ्ख्याभ्यां द्वादशत्वसङ्ख्या लक्ष्यते, तद्वत् प्रकृतेऽप्यपेक्षाबुद्धिजन्याभिस्तद्व्यङ्ग्याभिर्वा पञ्चपञ्चत्व-सङ्ख्याभिः पञ्चविंशतित्वसङ्ख्याः मन्यतामित्यविरोधः। एतेन–यदुक्तम्–महासङ्ख्याया अन्तराले नावान्तरसङ्ख्याः सन्ति; अपेक्षाबुद्धिनाशे तासां नाशात्। तथाच साहचर्याभावाद् न ताभिस्तल्लक्षणा–इति, तदपि–प्रत्युक्तम्; अपेक्षाबुद्धिनाशेन द्वित्वादिसङ्ख्यानाशस्य वैशेषिक-प्रक्रियामात्रत्वेन प्रत्युक्तत्वात्, तत्पक्षेऽपि महासङ्ख्याऽवान्तरसङ्ख्ययोर्जन्यजनकभावसम्बन्ध-सत्त्वात् लक्षणोपपत्तेरिति। तदिदमपेशलम्; उपसङ्ग्राहकसाधारणधर्ममन्तरेणापेक्षाबुद्धिरेवानुदया-दित्युक्तत्वात्, "पञ्च सप्त च वर्षाणी" त्यत्राप्येकबुद्ध्यारूढत्वादिलक्षणसाधाणधर्मस्य

विद्यमानत्वात्, इति स्थितेऽप्यस्मिन् दूषणे तदभ्युपगममार्गेणैव दोषान्तरमुद्भावयति- *अयमेवेति*॥ न चात्र लक्षणाऽपि सम्भवतीत्याह- *परश्चात्र पञ्चशब्द इति*॥ शतपथब्राह्मणस्वरविधायको ग्रन्थो भाषिकनामा; तत्सिद्धत्वात् शाखास्वरोऽपि भाषिक इत्युच्यते। तस्मिन् हि ग्रन्थे ''समासस्ये'' ति सूत्रेण समासस्यान्तोदात्तत्वं विहितम्; ''अनुदात्तं पदमेकवर्जम्'' इति सूत्रेण यस्मिन् पदे उदात्तः स्वरितो वा विधीयते, तमेकं विहाय शिष्टस्यानुदात्तत्वस्मरणाच्च। अत्र च मन्त्रे प्रथमः पञ्चशब्द आद्युदात्तः, द्वितीयः सर्वानुदात्तः, जनशब्दश्चान्तोदात्तोऽध्यापकपरम्परया पठयते। तथाच पञ्चजना इत्यत्रान्त्यस्याकारस्योदात्तत्वम्, इतरेषां वर्णानामनुदात्तत्वं पठयमानं द्वितीयपञ्चशब्दजनशब्दयोः समासं गमयति; समासादृते तदनुपपत्तेः। तदेतदभिप्रेत्योक्तम्- *भाषिकेण स्वरेणैकपदत्व- निश्चयादिति*॥ अपिच निश्चितैकपदभावेन तज्जातीयमन्त्रान्तरेणाप्यत्रैकपदत्वनिश्चय इत्याह- *प्रयोगान्तरे चेति*॥ हे आज्य! त्वा=त्वाम्, पञ्चजनानां कृते गृह्णामीति मन्त्रैकदेशस्यार्थः। भवतु नाम द्वितीयः पञ्चशब्दः पञ्चजनशब्देन समस्तः, ततः किमिति? अत आह- *समस्तत्वाच्च न वीप्सा पञ्चपञ्चेति*॥ अस्तु वा वीप्सा; तथाऽपि नभिमतसंख्यासिद्धिरित्याह- *न च पञ्चकद्वयग्रहणं पञ्च पञ्चेति*॥ वीत्साभ्युपगमेऽपि न सांख्याभिमतपञ्चविंशतिसंख्या लभ्यते, यतः पञ्चपञ्चेति वीप्सायां पञ्चकद्वयस्यैव ग्रहणमिति योजना। ननु-पञ्चपञ्चेति पञ्चत्वसंख्याया एव पञ्चत्वसंख्यान्तरेण विशेषितत्वेन पञ्चविंशतिसंख्यालाभाभावाद् न पञ्चकद्वयग्रहणमिति-चेत्, मैवम्; पञ्चशब्दः संख्योपसर्जनद्रव्यवचनः, तथापि संख्याविशिष्टानामेव जनानां विशेषितत्वेन पञ्चपूल्य इत्यत्रेव प्राप्यत एवात्रापि पञ्चविंशतिसंख्येत्याशङ्कते- *नन्वापन्नपञ्चसंख्याका जना इति*॥ संख्यान्तरविशिष्टानां संख्यान्तरेण निराकांक्षत्वादन्वयासिद्धेः, दृष्टान्ते च समाहारस्यैव तत्साकांक्षतया संख्यान्तरेणाविशेषितत्वात् तस्य चानापन्नसंख्यात्वाद् मैवमिति परिहरति- *नेति ब्रूम इति*॥ ननु-पञ्चत्वसंख्यावच्छिन्नेषु जनेषु यदि न पञ्चत्वसंख्यान्तरं निविशते, निराकांक्षत्वात्, तर्हि ''सविशेषणे विधिनिषेधावि'' तिन्यायेन पञ्चत्वसंख्यायामेव तदन्वयोऽस्तु, तस्याः स्वेनावच्छिन्नतया संख्यान्तरापेक्षत्वादिति, तत्राह- *भवदपीदं विशेषणमिति*॥ *तत्र चोक्तो दोष इति*॥ उक्तं तावद् ''न ह्यन्योपसर्जनतयोपस्थितं विशेषणेन सम्बध्यते; पञ्चशब्दस्य संख्योपसर्जनद्रव्यवचनत्वादि'' ति। विशेषतस्तु-पञ्चजना इत्यत्र समासेन तदाकांक्षया, विशेषाकांक्षायां तु समास एव न स्यात्; असामर्थ्यात्। न हि भवति ऋद्धस्य राजपुरुष इति समासः, अपि तु वृत्तिरेव ऋद्धस्य राज्ञः पुरुष इति; सापेक्षत्वेनासामर्थ्यादित्यर्थः॥

अतिरेकाच्चेति सूत्रावयवं व्याचष्टे- *अतिरकाच्च न पञ्चविंशतितत्त्वाभिप्रायं पञ्चजना इति*॥ पदमित्यनुषज्यते। *यस्मिन्निति*॥ सर्वनाम्नेति शेषः॥ *अर्थान्तरपरिग्रहे चेति*॥ अत्राकाश

इतिपदेनेति शेषः। अपि च–अस्तु वाऽत्र यथाकथञ्चित् पञ्चविंशतिसंख्याश्रवणम्, तथापि न तन्मात्रश्रवणेन सांख्याभिमततत्त्वोपसंग्रहः कर्तुं शक्यते; तेषामशब्दत्वेन निष्प्रमाणकत्वात्। एतेन अध्यात्माधिकरात् तया तेषामुपसंग्रहः–प्रत्युक्तः ; अप्रामाणिकत्वेन तेषामाध्यात्मिकत्वासिद्धे-रित्याह– *कथं च संख्यामात्रश्रवणे सत्युश्रतानां पञ्चविंशतेस्तत्त्वानामुपसंग्रहः प्रतीयत इति*।।

ननु–अस्मिन्नेव वाक्ये जनशब्देन तेषामुपस्थापनाद् अशब्दत्वासिद्धेः समानाधिकरण्यश्रुतेश्च तेषु संख्यान्वयोपपत्तिरिति–चेत्, अत्र वक्तव्यम्–किं जनशब्देन रूढया तत्त्वानामुपस्थितिः, किं वा जनसम्बन्धात् लक्षणया। नाद्य इत्याह– *जनशब्दस्य तेष्वरूढत्वादिति*।। नापि द्वितीय इत्याह– *अर्थान्तरोपसंग्रहेऽपि संख्योपपत्तेरिति*।। पञ्चज्ञानेन्द्रिय पञ्चकर्मेन्द्रिय पञ्चवायु पञ्चमहाभूत महदन्तःकरणचतुष्टयात्मस्वरूपितत्त्वेभ्योऽर्थान्तरभूतेषु श्रौतेषु जनसम्बन्धिषु परिगृहीतेषु पञ्चविंशतित्वसंख्योपपत्तेर्न तत्त्वानामेव नियमेन परिग्रहः सम्भवति; अन्यथाऽन्योन्या-श्रयापत्तेरित्यर्थः। तस्मात् पञ्चजनशब्दस्य योगार्थपरिग्रहेऽपि न पञ्चविंशतित्वसंख्यालाभः ; पञ्चत्वसंख्याविशिष्टेषु जनेषु निराकांक्षत्वात् पञ्चत्वसंख्यान्वयस्य। का तर्हि ''पञ्च पञ्चजनाः'' इति श्रुतेर्गतिः? प्रथमपञ्चशब्दो व्यर्थ इति चेत्, न; स्वाध्यायविधिव्याकोपापत्तेरित्यभिप्रेत्य पृच्छति– *कथं तर्हीति*।। नात्र पञ्चजनशब्दस्य योगार्थो विवक्षितः ; संज्ञायामेव–''दिक्संख्ये संज्ञाया''–मिति विशेषतः समासस्मरणात्। तथाच कति सप्तर्षय इतिवत् कति पञ्चजना नामेत्यपेक्षासत्त्वात् सप्त सप्तर्षय इतिवत् पञ्चपञ्चजनानामन्वयोपपत्तेर्न स्वाध्यायविधिप्रकोपः, न वा तदव्याकोपाय सांख्यतत्त्वविवक्षा, इत्युत्तरमाह– *अत्रोच्यत इत्यादिना*।।११।।

पृच्छति– *के पुनरिति*।। तदुत्तरत्वेन सूत्रमवतारयति– *तदुच्यते प्राणादयो वाक्यशेषादिति*।। ननु–जनेषु तावल्लोके पञ्चजनशब्दो रूढो दृष्टः कथमकस्मात् प्राणादिषु व्याख्यायते? वाक्यशेषादिति चेत्, न; अप्रसिद्धार्थेषूपादान एव तस्य निर्णायकत्वाभ्युपगमात्, अन्यथा लोकवेदाधिकरणविरोधापत्तेरित्याक्षिपति– *कथं पुनः प्राणादिषु जनशब्दप्रयोग इति*।। जनवाचकः शब्दो जनशब्दः, पञ्चजनशब्द इति यावत्। तस्य कथमजनेषु प्राणादिषु प्रयोग इत्यर्थः ; अन्यथा प्रत्यस्तमितावयवार्थे समुदायशब्दार्थे जनशब्दो नास्ति, इत्यपर्यनुयोग एव स्यात्। प्राणादिषु प्रसिद्ध्यभावेऽपि लक्षणया तत्प्रयोगोपपत्तिरिति दर्शयितुं प्रतिबन्दिं गृह्णाति– *तत्त्वेषु वा कथमिति*।। यथा तव मते जनशब्दः प्रसिद्धिमतिक्रम्य जनसम्बन्धिषु तत्त्वेषु वर्तते, एवमस्मन्मते पञ्चजनशब्दो जनापरपर्यायोऽपि जनसम्बन्धात् प्राणादिषु वर्तिष्यत इति साम्यादविरोध इति भावः। ननु–एवं समाने प्रसिद्ध्यतिक्रमे प्राणादय एव गृह्यन्ते, न तत्त्वानीति किं बीजमिति–चेत्, तत्राह– *समाने तु

प्रसिद्धयतिक्रम इति*।। लक्षणाबीजं स्वमतेऽप्यविशिष्टमस्तीति दर्शयति– *जनसम्बन्धाच्चेति*।। जनशब्दभाजः=जनापरपर्यायपञ्चजनशब्भाज इत्यर्थः। ननु–जनापरपर्यायशब्दो लक्षणया प्राणादिषु न क्वापि प्रयुज्यमानो दृष्टः, न चासति प्रयोगदर्शने सम्बनधमात्रात् तत्कल्पनं युक्तम्; अतिप्रसङ्गादिति–चेत्, तत्राह– *जनवचनश्च पुरुषशब्द इति*।। अपि च लोके कर्मादिषूद्भिदा-दिशब्दस्य प्रथमप्रयोगाभावेऽपि समासबलाद् वाक्यशेषबलाच्च रूढिराश्रीयते, अतो लक्षणा-ऽपीत्याह– *समासबलाच्च समुदायस्य रूढत्वमविरुद्धमिति*।। लोकप्रसिद्धिमनुरुध्योत्सूत्रमेव भाष्यकार आह– *कैश्चित्त्विति*।। का तर्हि सूत्रस्य गतिः? तत्राह– *आचार्यस्त्विति*।।१२।।

आशङ्कापूर्वकमुत्तरसूत्रमवतारयति– *भवंयुस्तावदिति*।। *ज्योतिषैकेषामसत्यन्ने*।।१३।। एकेषाम्=काण्वशाखिनामित्यर्थः। निगदव्याख्यातमस्य भाष्यम्।।१३।। इति तृतीयं नसङ्ख्योपसंग्रहाधिकरणम्।।

इति वार्त्तिकम् सङ्ख्योपसङ्ग्रहाधिकरणम् समाप्तम्

प्रदीपः

न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च।। विशेषरूपेण साङ्ख्यप्रक्रियाणामश्रौतत्वेऽपि सामान्यरूपेण पञ्चविंशतितत्त्वानां श्रुतावुल्लेखात् तासां श्रौतत्वमाक्षिप्य निरासार्थमिदमधिकरणम्। तदिदमाह– *एवं परिहृत इत्यादिना*।। अत्र पञ्चपञ्चजनपदार्थविषयिणी चिन्ता, इति पादसङ्गतिः। तदिदमाह– *अस्मिन् मन्त्र इत्यादिना*।।

अत्रानुसन्धेयानि विषयावाक्यानीमानि–''यस्मादर्वाक् संवत्सरोऽहोभिः परिवर्तते। तदेव ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्। यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्। प्राणस्य प्राणमुत चक्षुष श्रक्षरूत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः। ते निचिक्युर्ब्रह्म पुराणमग्रयम्।'' इति। इदं माध्यन्दिनानां पाठक्रमेण। काण्वपाठक्रमस्तु–''प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरि'' त्यन्नपरित्यागेनेत्यविस्मर्तव्यम्।।

अत्र पञ्चजनशब्दस्य पूर्वोत्तरपक्षयोरुभयोरपि रूढयर्थविवक्षाऽसंभवाद् यौगिकार्थग्रहणं समानम्, इति पञ्चजनशब्दस्य समस्तस्यापि पञ्चत्वसङ्ख्याविशिष्टजनपरत्वम्। तत्रापरस्य पञ्चपदस्यान्वये च पञ्चविंशतिजनानां स्मृतिप्रसिद्धानां ग्रहणे पूर्वपक्षः, वाक्यशेषावगतप्राणादिपरिग्रहे सिद्धान्त इति वस्तुस्थितिः। तत्र पूर्वाधिकरणे लोहितशुक्लकृष्णामिति विशेषणवाक्यशेषानुसारेणाजाशब्दार्थो व्यवस्थापितः, अत्र तु न तादृशो वाक्यशेषो विद्यते पञ्चजनशब्दसामानाधिकरण्ययोग्यः ; ''प्राणस्य प्राणमि'' त्यादीनां तदसमानाधिकरणत्वात्, काण्वपाठे चतुर्णामेव निर्देशाच्चेति न वाक्याशेषस्य व्यवस्थापकत्वमित्याक्षेपसङ्गतिरनन्तरा।।

पूर्वपक्षं सङ्गृह्णाति– *अस्मिन् मन्त्र इत्यादिना*।। स्मृतिप्रसिद्धानि पञ्चविंशतितत्त्वानि पञ्च पञ्चजनपदबोध्यान्याह– *मूलप्रकृतिरिति*।। सङ्ख्योपसङ्ग्रहादिति सूत्रावयवं व्याचष्टे– *तया श्रुतिप्रसिद्धयेति*।। तथाच सङ्ख्ययोपसङ्ग्रह इति सौत्रपदविभागः। उपसङ्ग्रहकर्माणि

निर्दिशति– *स्मृतिप्रसिद्धानामित्यादिना*।। पञ्चविंशतित्वेनान्येषां कुत्रापि विभागस्यादर्शनादिति भावः। तथाचोक्तश्रुतिमूलकं साङ्ख्यदर्शनमिति श्रौतत्वं तस्येति फलितमित्याह– *प्राप्तं पुनरिति*।। पञ्च पञ्च कादिवर्गा इत्यादौ पञ्चपञ्चशब्दभ्यां पञ्चविंशतिसङ्ख्यालाभादत्रापि तथेत्याशयः। सिद्धान्तं सङ्गृह्णाति– *तत्र ब्रूम इत्यादिना*।। *नानाभावादिति*।। पञ्चवर्गाणां वर्गत्वेन विभक्तानां पञ्चसङ्ख्यान्तरर्निवेशे तदवयव क त्वादिना पञ्चविंशतित्वं युज्यते, मूलप्रकृत्यादीनां तु न तथाऽवान्तरसमुदायविभागः। पञ्चपञ्चावयवकसमुदायगतविभाजकमूलप्रकृतित्वादिना हि विभागो दृश्यते, इति नात्र पञ्चविशेषितपञ्चजनशब्देनापि पञ्चविंशतेर्ग्रहणमिति न पञ्चविंशतितत्त्वानामुपस्थितिरित्याशयेन समाधत्ते– *नानाभावादित्यादिना*।। *न ह्येकनिबन्धनमिति*।। एकविभाजकधर्ममन्तरेण न निविशन्त इत्यन्वयः। तथाचेयमत्र सूत्रयोजना–सङ्ख्ययोपसङ्ग्रहाद् न साङ्ख्यस्मृतेः श्रौतत्वम्; नानाभावेन सङ्ख्ययोपसङ्ग्रहाभावात्, न केवलं नानाभावेन सङ्ख्ययोपसंग्रहाभावः, किन्तु अतिरेकादपि–इति। एतावता नानाभावेन सङ्ख्ययोपसंग्रहाभावं प्रतिपाद्य, अतिरेकात् सङ्ख्ययोपसंग्रहाभावमुपपादयति– *अतिरेकाच्चेत्यादिना*।। ननु–आत्मन आधारान्तराभावाभिप्रायं स्वाधारत्ववचनमुपपद्यते, इति नात्मनाऽतिरेकः संभवतीत्यत आह– *तथा आकाशश्चेति*।। न ह्याकाशस्याधारान्तराभावः साङ्ख्यानामपि संमतः, इति पञ्चविंशतिसङ्ख्यातिरेकोऽनिवारणीय इति भावः। अस्तु वा–पञ्च पञ्चजना इति पञ्चविंशतितत्त्वानामुपस्थापकम्, एवमपि वेदान्तमतेऽपि पञ्चतन्मात्र दशेन्द्रिय पञ्चप्राणान्तःकरणचतुष्टयमूलाविद्यानां पञ्चविंशतिपदार्थानां स्वीकाराद् न पञ्चविंशतिसङ्ख्या साङ्ख्यानामसाधारणं लिङ्गमिति न दोष इत्याह– *कथं चेति*।। *पञ्चविंशतेस्तत्त्वानामिति*।। साङ्ख्याभिमतानामेवेति शेषः। *अर्थान्तरोपसङ्ग्रहेऽपीति*।। पूर्वोक्तरीत्या वेदान्ताभिमतार्थान्तरपरिग्रहेऽपीत्यर्थः। सङ्ख्योपपत्तेः=पञ्चविंशतिसङ्ख्योपपत्तेः। तथाच पञ्च पञ्चजना इति पञ्चजनशब्दस्य समासेन यथाश्रुतार्थत्वं गृहीत्वैव योजनं युक्तमिति भावः। तदेतदाक्षेपसमाधानाभ्यामुपपादयति– *कथं तर्हीत्यादिना*।। समस्तत्वे कतीत्याकाङ्क्षासंभवे दृष्टान्तः– *सप्तर्षयः सप्तेति*।।११।।

ननु–एवमपि पञ्च पञ्चजनाः के इति निर्वारणं कयमित्याशङ्कासमाधानाभ्यामाह– *के पुनस्त इत्यादिना*।। यद्यपि लोहितशुक्लकृष्णामितिवद् नात्र सामानाधिकरण्यम्; तथापि "प्राणस्य प्राणमि" त्यादिवाक्यशेषे प्राणादीनां पञ्चानामधिष्ठानतयाऽऽत्मा निरूप्यते, इति प्राणादय एव पञ्च "पञ्च पञ्चजना" इति न दोष इति समाधत्ते सूत्रकारः– *प्राणादयो वाक्याशेषादिति*।। वाक्यरूपात् शेषात् वाक्यशेषादिति विभागः। तथाच मूलव्याख्यानविधया वाक्यद्वयस्यापि वाक्यैकवाक्यत्वाद् व्याख्यानानुसारेण मूलनयनं न्याय्यमेवेति भावः। पूर्वत्र पदैकवाक्यता अत्र तु

वाक्यैकवाक्यतेति विवेकः। यद्यपि ''ज्योतिषां ज्योतिरि'' ति ज्योतिरधिष्ठानत्वमपि निर्दिष्टम्; तथापि वाक्यशेषाभिप्रायेण पञ्चाधिष्ठानत्वस्यावयुत्यानुवादः। काण्वपादृष्टया तु पञ्चानामेवाधिष्ठानमात्मेति वस्तुस्थितिः। पञ्चजनशब्दस्य वाक्यशेषवशेन प्राणादौ रूढिकल्पनं न दोषायेति सदृष्टान्तमह- *शक्योद्भिदादीति*।। आदिशब्देन ज्योतिष्टोमादिग्रहणम्। ज्योतिष्टोमशब्दस्य नामत्वं हि ''एतानि वाव तानि ज्योतींषी'' ति वाक्यशेषवशेनैव, इति तेन न्यायेनात्रापि रूढिकल्पनं न दोषायेति भावः। पञ्चजनशब्दस्य प्राणादिपरत्वे नाग्रह इत्युत्सूत्रं मतान्तरमाह- *कैश्चित्त्वित्यादिना*।। आचार्यः=सूत्रकारः।।१२।।

काण्वानां पाठक्रमेणापि न पञ्चत्वसङ्ख्याहानिरधिष्ठेयेष्वित्याह- सूत्रकारः- *ज्योतिषैकेषामसत्यत्र इति*।।१३।। अत्र पाठे-पाठक्रमादर्थक्रमस्य बलीयस्त्वात् ''तदेव ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्'' इति वाक्यस्य ''यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्।'' इत्यस्यानन्तरं योजना, ततः प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरि'' ति वाक्यशेषयोजना। तथाच नास्मिन् पाठेऽवयुत्यानुवादेन योजना विवक्षणीयेति भावः। अर्थक्रमानुसारेणोक्तां योजनामाक्षेपसमाधानाभ्यां समर्थयति- *कथं पुनरित्यादिना*।। उपसंहरति- *तदेवमिति*।। *परिहरिष्येते इति*।। अविरोधाध्याय इति शेषः। तत्र हि श्रुतिविरोधेन साङ्ख्यस्मृतेस्तदीयानां न्यायानां चाप्रामाण्यं स्थापयिष्यते, अत्र तु तयोः प्रामाण्यं गृहीत्वा समन्वयविचार इति मन्तव्यम्।।१३।। इति तृतीयं नसङ्ख्योपसंग्रहाधिकरणम्।।

इति प्रदीपः सङ्ख्योपसङ्ग्रहाधिकरणम् समाप्तम्

भामती

अवान्तरसङ्गतिमाह *एवं परिहृतेऽपि इति*। पञ्चजना इति हि समासार्थः पञ्चसंख्यया सम्बध्यते। न च दिक्संख्ये संज्ञायामिति समासविधानान्मनुजेषु निरूढोऽये पञ्चजनशब्द इति वाच्यम्, तथा सति पञ्च मनुजा इति स्यात्। एवं चात्मनि पञ्चमनुजानामाकाशस्य च प्रतिष्ठानमिति निस्तात्पर्यम्, सर्वस्यैव प्रतिष्ठानात्। तस्माद्रूढेरसम्भवात्तत्त्यागेनात्र योग आस्थेयः। जनशब्दश्च कथञ्चित्तत्त्वेषु व्याख्येयः। तत्रापि किं पञ्च प्राणादयो वाक्यशेषगता विवक्ष्यन्ते उत तदतिरिक्ता अन्य एव वा केचित्? तत्र पौर्वापर्यपर्यालोचनया काण्वमाध्यन्दिनवाक्ययोर्विरोधात्। एकत्र हि ज्योतिषा पञ्चत्वमन्नेनेतरत्र। न च धोडशिग्रहणाग्रहणवद्विकल्पसम्भवः, अनुष्ठानं हि विकल्प्यते न वस्तु। वस्तुतत्त्वकथा चेयं नानुष्ठानकथा, विध्यभावात्। तस्मात्कानिचिदेव तत्वानीह पञ्च प्रयेकं पञ्चसंख्यायोगिनि पञ्चविंशतितत्वानि भवन्ति। सांख्यैश्व प्रकृत्यादीनि पञ्चविंशति तत्त्वानि स्मर्यन्ते इति तान्येवानेन मन्त्रेणोच्यन्त इति नाशब्दं प्रधानादि। न चाधारत्वेनात्मनो व्यवस्थानात् स्वात्मनि चाधाराधेयभावस्य विरोधाद् आकाशस्य च व्यतिरेचनात् त्रयोविंशतिर्जना इति स्यान्न पञ्च पञ्चजना इति वाच्यम्, सत्यप्याकाशात्मनोर्व्यतिरेचने गूलप्रकृतिभागैः सत्त्वरजस्तमोभिः पञ्चविंशतिसंख्योपपत्तेः। तथा च सत्याकाशात्मभ्यां सप्तविंशतिसंख्यायां पञ्चविंशति तत्त्वानीति स्वसिद्धान्तव्याकोप इति चेत्। न मूलप्रकृतित्वमात्रेणैकीकृत्य सत्त्वरजस्तमांसि पञ्चविशति-तत्त्वोपपत्तेः। हिरुग्भावेन तु तेषां सप्तविंशतित्वाविरोधस्तस्मान्नाशाब्दी सांख्यस्मतिरिति प्राप्ते। मूलप्रकृतिः प्रधानम्। नासावन्यस्य विकृतिरपि तु प्रकृतिरेव तदिदमुक्तं *मूला इति। महदहङ्कारः पञ्चतन्मात्राणि प्रकृतिश्च विकृतिश्च। तथाहि–महत्तत्त्वमहङ्कारस्य तत्त्वान्तरस्य प्रकृतिर्मूलप्रकृतेस्तु विकृतिः। एवमहङ्कारतत्वं महतो विकृतिः, प्रकृतिश्च तदेव तामसं सत् पञ्चतन्मात्राणाम्। तदेव सात्त्विकं सत् प्रकृतिरेकादशेन्द्रियाणाम्। पञ्चतन्मात्राणि चाहङ्कारस्य विकृतिराकाशादीनां पञ्चानां प्रकृतिस्तदिदमुक्तं महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकश्च विकारः षोडशसंख्यावच्छिन्नो गणो विकार एव। पञ्चभूतान्यतन्मात्राण्येकादशेन्द्रियाणीति षोडशको गणः। यद्यपि पृथिव्यदयो गोघटादीनां प्रकृतिस्तथापि न ते पृथिव्यादिभ्यस्तत्त्वान्तरमिति न प्रकृतिः। तत्त्वान्तरोपादानत्वं चेह

प्रकृतित्वमभिमतं नोपादानमात्रत्वमित्यविरोधः। पुरुषस्तु कूटस्थनित्योऽपरिणामी न कस्यचित्प्रकृतिर्नापि विकृतिरिति।

एवं प्राप्तेऽभिधीयते– *न संख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्त्वाशङ्का कर्त्तव्या। कस्मात्रानाभावात्। नाना ह्येतानि पञ्चविंशतितत्त्वानि नैषां पञ्चशः पञ्चशः साधारणधर्मोऽस्ति*। न खलु सत्त्वरजसतमोमहदहङ्काराणामेकः क्रिया वा गुणो वा द्रव्यं वा जातिर्वा धर्मः पञ्चतन्मात्रादिभ्यो व्यावृत्तः सत्त्वादिषु चानुगतः कश्चिदस्तिः नापि पृथिव्यप्तेजोवायुघ्राणानां, नापि रसनचक्षुस्त्वक्-श्रोत्रवाचां, नापि पाणिपादपायूपस्थमनसां, येनैकेनासाधारणेनोपगृहीताः पञ्च पञ्चका भवितुमर्हन्ति। पूर्वपक्षैकदेशिनमुत्थापयति *अथोच्येत पञ्चविंशतिसंख्यैवेयम् इति*। यद्यपि परस्यां संख्यायाम-वान्तरसंख्या द्वित्वादिका नास्ति, तथापि तत्पूर्वं तस्याः सम्भवात् पौर्वापर्य्यलक्षणया प्रत्यासत्त्या परसंख्योपलक्षणाथं पूर्वसंख्योपन्यस्यत इति। दूषयति *अयमेवास्मिन् पक्षे दोषः इति*। न च पञ्चशब्दो जनशब्देन समस्तोऽसमस्तः शक्यो वस्तुमित्याह, *परश्चात्र पञ्चशब्द इति*। ननु भवतु समासस्तथापि किमित्यत आह *समस्तत्वाञ्च इति*। अपि च वीप्सायां पञ्चकद्वयग्रहणे दशैव तत्त्वानीति न सांख्यस्मृतिप्रत्यभिज्ञानमित्यसमासमभ्युपेत्याह *न पञ्चकद्वयग्रहणं पञ्च पञ्च इति*। न चैका पञ्चसंख्या पञ्चसंख्यान्तरेण शक्या विशेष्टुम्। पञ्चशब्दस्य संख्योपसर्जनद्रव्यवचनत्वेन संख्याया उपसर्जनतया विशेषणेनासंयोगादित्याह *एकस्याः पञ्चसंख्यायाः इति*। तदेवं पूर्वपक्षैकदेशिनि दूषिते परमपूर्वपक्षिणमुत्थापयति* नन्वापन्नपञ्चसंख्याका जना एव इति*। अत्र तावद्रूढौ सत्यां न योगः सम्भवतीति वक्ष्यते, तथापि यौगिकं पञ्चजनशब्दमभ्युपेत्य दूषयति *युक्तं यत् पञ्चपूलीशब्दस्य इति*। पञ्चपूलीत्यत्र यद्यपि पृथक्त्वैकार्थसमवायिनी पञ्चसख्या-वच्छेदिकास्ति तथापीयं तमुदायिनोऽवच्छिनत्ति, न समुदायं समासपदगम्यमतस्तस्मिन् कति ते समुदाया इत्यपेक्षायां पदान्तराभिहिता पञ्चसंख्या सम्बध्यते पञ्चेति। पञ्चजना इत्यत्र तु पञ्चसंख्ययोत्पत्तिशिष्टया जनानामवच्छिन्नत्वात्समुदायस्य च पञ्चपूलीवदत्राप्रतीतेनं पदान्तराभिहिता संख्या सम्बध्यते। स्यादेतत्–संख्येयानां जनानां मा भूच्छब्दान्तरवाच्यसंख्यावच्छेदः पञ्चसंख्यायास्तु तयावच्छेदो भविष्यति, न हि साप्यवच्छिन्नेत्यत आह *भवदपीदं विशेषणम् इति*। उक्तोऽत्र दोषः। नह्युपसर्जनं विशेषणेन युज्यते, पञ्च शब्द एव तात्वसंख्येयोपसर्जनसंख्यामाह विशेषतस्तु पञ्चजना इत्यत्र समासे। विशेषणपेक्षायां तु न समासः स्यादसामर्थ्यान्नहि भवति ऋद्धस्य राज्ञपुरुष इति समासोऽपि वृतिरेव ऋदस्य राज्ञः पुरुष सापेक्षत्वेनासामर्थ्यादित्यर्थः। *अतिरेकाच्च इति*। अभ्युच्चयमात्रम्। यदि सत्त्वरजस्तमांसि प्रधानेनेकीकृत्यात्माकाशौ तत्त्वेभ्यो व्यतिरिच्येते, तदा सिद्धान्तव्याकोपः। अथ तु सत्त्वरजस्तमांसि मिथो भेदेन विवक्ष्यन्ते, तथापि वस्तुतत्त्वव्यवस्थापने

अधारत्वेनात्मा निष्कृष्यतामाधेयान्तरेभ्यस्त्वाकाशस्याधेयस्य व्यतिरेचनमनर्थकमिति गमयित्वयम्। *कथञ्च संख्यामात्रश्रवणे सति इति*। दिक्संख्ये संज्ञायामिति संज्ञायां समासस्मरणात् पञ्चजनशब्दस्तावदयं क्वचिन्निरूढ:। न च रूढौ सत्यामवयवप्रसिद्धेर्ग्रहणं सापेक्षत्वात्, निरपेक्षत्वाच्च रूढे:। तद्यदि रूढौ मुख्योऽर्थ: प्राप्यते तत: स एव ग्रहीतव्योऽथ त्वसौ न वाक्ये सम्बन्धार्ह: पूर्वापरवाक्यविरोधी वा ततो रूढयपरित्यागेनैव वृत्यन्तरेणार्थान्तर कल्पयित्वा वाक्यमुपपादनीयम्। यथा श्येनेनाभिचरन् यजेतेति श्येनशब्द: शकुनिविशेषे निरूढवृत्तिस्तदपरित्यागेनैव निपत्यादान-सादृश्येनत्थवादिकेन क्रतुविशेषे वर्त्तते, तथा पञ्चजनशब्दोऽवयवार्थयोगानपेक्ष एकस्मिन्नपि वर्त्तते यथा सप्तर्षिशब्दो वसिष्ठ एकस्मिन् सप्तसु च वर्त्तते। न चैव तत्त्वेषु रूढ: पंचविंशतिसंख्यानुरोधेन तत्त्वेषु वर्त्तयितव्य:। रूढौ सत्यां पंचविंशतेरेव संख्याया अभावात् कथं तत्त्वेषु वर्त्तते।।११।।

एवञ्च के ते पञ्चजना इत्यपेक्षायां किं वाक्यशेषगता: प्राणादयो गृह्यन्तामुत पंचविंशतिस्तवग्त्वानीति विशये तत्त्वानामप्रामाणिक्तवात् प्राणादीनाञ्च वाक्यशेषे श्रवणात्तत्परित्यागे श्रुतहान्यश्रुतकल्पनाप्रसङ्गात्प्राणादथ एव पञ्चजना:। न च काण्वमाध्यन्दिनयोर्विरोधान्न प्राणादीनां वाक्यशेषगतानामपि ग्रहणमिति साम्प्रतं, विरीधेऽपि तुल्यबलतया षोडशिग्रयणाग्रहणवद्वि-कल्पोपपत्ते:। न चेयं वस्तुस्वरूपकथाऽपि तूपासनानुष्ठानविधिर्मनसैवानुद्रष्टव्यमिति विधिश्रवणात् *कथं पुन: प्राणादिषु जनशब्दप्रयोग इति*। जनवाचक: शब्दो जनशब्द:, पंचजनशब्द इति यातत्। तस्य कथं प्राणादिष्वजनेषु प्रयोग इति व्याख्येयम्। अन्यथा तु प्रत्यस्तमितावयवार्थे समुदायशब्दार्थे जनशब्दार्थो नास्तीत्यपर्य्यनुयोग एव। रूढयपरितयगेनैव वृत्यन्तरं दर्शयति *जनसम्बन्धाच्च इति*। जनशब्दभाज:, पञ्चजनशब्दभाज:। ननु सत्यामवयवप्रसिद्धौ समुदायशक्तिकल्पनमनुपपन्नं, सम्भवति च पञ्चविंशत्यां तत्त्वेप्ववयवप्रसिद्धिरित्यत आह *समासवलाच्च इति*। स्यादेतत्–समासव-लाच्चेद्रूढिरास्थीयंते, हन्त न दृष्टस्तर्हि तस्य प्रयोगोऽश्वकर्णादिवद् वृक्षादिषु। तथा च लोकप्रसिद्धय-भावान्न रूढिरित्याक्षिपति *कथं पुनरसतीति*। जनेषु तावत् पञ्चजनशब्दस्य प्रथम: प्रयोगो लोकेषु दृष्ट इत्यसति प्रथमप्रयोग इत्यसिद्धमिति स्थवीयस्तयानभिधायाम्युपेत्य प्रथमप्रयोगाभावं समाधत्ते *शक्योद्भिदादिवद् इति*। आचार्य्यदेशीयानां मतभेदेष्वपि न पञ्चविंशतिस्तत्त्वानि सिध्यन्ति। परमार्थतस्तु पञ्चजना वाक्यशेषगता एवेत्याशयवानाह *कैश्चित् तु इति*। शेषमति-रौहितार्थम्।।१२–१३।।

इति भामती सङ्ख्योपसङ्ग्रहाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ संख्योपसंग्रहाधिकरणम्॥३॥

पुनरन्यत्र तन्त्रसिद्धानि पञ्चविंशतिसंख्यानि तत्त्वानि श्रूयन्ते इत्याशङ्क्य तत्परिहर्तुमधिकरणान्तरमारभ्यते–

॥सु॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाञ्च॥११॥

श्रूयतेऽस्य विषयः– 'यस्मिन् पञ्च पञ्चजना' आकाशश्च प्रतिष्ठितः । तमेवं मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्॥' इत्यादिः॥ अत्र 'पञ्च पञ्चजना' इति पदार्थाः किं सांख्यसिद्धानि तत्त्वानि श्रुतिप्रसिद्धानि वेति संशयः॥ पञ्चविंशतिसंख्यायाः सांख्यशास्त्रप्रसिद्धत्वादत्र तदवभासात् सर्वथा पञ्च पञ्चजना इति तान्येव प्रतिपाद्यानि॥ इति प्राप्ते ब्रूमः-इह 'पञ्च पञ्च' इति पञ्चविंशतिसंख्योपसंग्रहादपि न तान्त्रिकाणि तत्त्वानि। 'यस्मिन्' इति यच्छब्दनिर्दिष्ट-परमेश्वराधारत्वममीषां प्रतीयते। तेभ्य एषां पृथग्भावात्, आकशस्य पृथङ्निर्देशेन तत्त्वातिरेकाञ्च। तत्त्वातिरेकस्तत्त्वानामधिकसंख्यत्वम्। अतोऽत्र न पञ्चविंशतितत्त्वप्रसङ्गः॥ किंच, पञ्चविंशति-संख्योपासंग्रहोऽपि न युक्तः। 'दिक्संख्ये संज्ञायाम्' इति संज्ञाविषयो ह्ययं समासः। तस्मात् पञ्चजना नाम केचिञ्च ते हि पञ्च पञ्चजना इत्युच्यन्ते। सप्त सप्तर्षय इतिवत्। अतो न सांख्यतत्त्वप्रसक्तिः॥ के पुनरेत इत्यत आह–

॥सू॥ प्राणादयो वाक्यशेषात्॥१२॥

'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदुः' इति वाक्यशेषात् पञ्चजनसंज्ञकाः प्राणादयः पञ्चेन्द्रियाणीति गम्यते। अतोऽपि न तान्त्रिकतत्त्वप्रसक्तिः॥

पुनरुपपत्तिरुच्यते–

।।सू।। ज्योतिषैकेषामसत्यन्ने।।१३।।

एकेषां काण्वानाम्, 'अन्नस्यान्नम्' इति शब्दाभावे 'तद्देवा ज्योतिषां ज्योतिः' इत्युपक्रमगतेन ज्योतिश्शब्देन पञ्च पञ्चजना इन्द्रियाणीति ज्ञायन्ते। ज्योतिषां ज्योतिः प्रकाशकानामपि प्रकाशकं ब्रह्मेत्युक्त्वा ततः पञ्च पञ्चजना इत्युक्ते हि तानि प्रकाशकानि पञ्चेद्रियाणीति गम्यन्ते।।

इति श्री कण्ठभाष्य सङ्ख्योपसङ्ग्रहाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ संख्योपसंग्रहाधिकरणम्॥३॥

प्रत्युदाहरणसङ्गतिं दर्शयन्नुत्तराधिकरणमवतारयति-**अन्यत्रेति।** अजामन्त्रे प्रकृतिमात्रश्रवणं परमेश्वराधीनप्रकृतिपरत्वेन नीयतां नाम। बृहदारण्यके पञ्चविंशतेस्तत्वानां श्रवणं साङ्ख्यतन्त्रसिद्धेभ्यस्तत्वेभ्योऽन्यत्र नेतुमशक्यम्। न च तत्र 'इन्द्रियेभ्य: परा ह्यर्था' इत्यत्रेवान्तर्गणिकभेदेन पञ्चविंशतिसङ्ख्यालाभ: कथञ्चिदुपपादनीय:। किं तु साक्षादेव तत्प्रतिपादक: शब्दोऽस्तीत्यधिकशङ्कासद्भावात्तत्र पूर्वपक्षमुद्भाव्य परिहर्तुमधिकरणान्तरमारभ्यत इत्यर्थ:।।सू।। **न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च॥११॥** 'यस्मिनपञ्च पञ्चजना आकाशश्च प्रतिष्ठित' इति मन्त्रमात्रस्यात्र प्राधान्येन विचार्यत्वेऽपि 'प्राणस्य प्राण' मित्यादिवाक्यशेषस्य पञ्चजनशब्दापेक्षितार्थसमर्पकत्वं सम्भवति न वेत्येवं तादर्थ्येन विचार्यत्वमस्ति। तस्य तत्समर्पकत्वसम्भवे हि न तन्त्रसिद्धानि तत्वानि ग्राह्याणि। आनुमानिकाधिकरणे प्राकरणिकवाक्यान्तरसमर्पितार्थग्रहणसम्भवे तान्त्रिकार्थग्रहणायोगस्य पूर्वाधिकरणे शाखान्तरप्रतिपन्नार्थग्रहणसम्भवे तदयोगस्य च समर्थिततत्वेन वाक्यशेषसमर्पितार्थग्रहणसम्भवे तदयोगस्य च कैमुतिकन्यायसिद्धत्वात्। तस्य तदयोगे तु 'पञ्च पञ्चजना' इत्यत: पञ्चविंशतिसङ्ख्याप्रतीतिमुपपाद्य तत्सङ्ख्येयानि तन्त्रसिद्धानि तत्वान्येव ग्राह्याणीत्यभिप्रेत्य वाक्यशेषस्यापि सङ्ग्रहार्थमादिपदम्। एवं च वाक्यशेषस्य पञ्चजनशब्दापेक्षितार्थसम्भवासम्भवाभ्यां संशय इत्यभिप्रेत्य संशय दर्शयति-**अत्रेति।** स्यादेतत्। 'पञ्च पञ्चजना' इत्यत: पञ्चविंशतिसङ्ख्याप्रतीतिरसम्बद्धा। तथा हि-यदि 'पञ्चपञ्चे'ति पञ्चकद्वयमुच्यते तदाऽवयवद्वारेण समुदायलक्षणाश्रयणेऽपि दशसङ्ख्यैव निष्पद्यते। 'पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतु:।' इत्यत्र यथा द्वादशसङ्ख्या। यदि तु वीप्सा तदापि पञ्चविंशतिसङ्ख्या न निष्पद्यत एव। 'दशदशैकैकं चमसमनुप्रसर्पन्ती' त्यत्रानुप्रसर्पणीयानां चमसानां दशसङ्ख्यत्वादनुप्रसर्पकाणां पुरुषाणां शतसङ्ख्या निष्पद्यते। एवं जनानामधिकरणानि यदि पञ्च स्यु: तदा प्रत्यधिकरणमाधेया जना: पञ्चसङ्ख्यावीप्सया लभ्यन्त इति तेषां पञ्चविंशतिसङ्ख्या निष्पद्येत। न त्वत्राधिकरणपञ्चकश्रवणमस्ति। ननु पञ्चसङ्ख्यतया

प्रतिपन्नेषु जनेषु पुनः पञ्चसङ्ख्यान्तरविशेषणोपादानमहिम्ना पञ्चविंशतिसङ्ख्या न तावत्पञ्चसङ्ख्या। विशेष्यं विहाय विशेषणयोरनन्वयात्। नापि तद्विशेषिताः। आकाङ्क्षाभावात्। श्रुतविशेषणसजातीयेन तद्विरोधिना च रक्तपदन्यायेनाकाङ्क्षोत्थापनस्याप्यसम्भवात्। न हि 'रक्तो रक्तः पटो भवती' त्यत्र मृण्मयो हिरण्मयो भवती' त्यत्र वा भवत्याकाङ्क्षा। ननु 'पञ्च पञ्चपूल्य' इत्यत्र पञ्चविंशतिपूलाः प्रतीयन्ते तथेहापि स्यात्। नेति ब्रूमः। तत्रापि समस्ता पञ्चसङ्ख्यैव पूलानां विशेषणम्। व्यस्ता तु तत्समाहाराणां समासार्थानाम्। न चात्र तथा समाहारार्थः समासोऽस्ति। पञ्चजन्य इति स्त्रीलिङ्गदर्शनाभावात् इत्याशङ्क्याह–**अत्र तदवभासादिति**। अयमाशयः। अनेनावान्तरसङ्ख्यया विशेषणे सति महासङ्ख्यालाभो यथावयवद्वारेण समुदायलक्षणया वीप्सया वा एवमेकया सङ्ख्यया विशेषितानां सङ्ख्यान्तरेण विशेषणात् संवर्धनेन महासङ्ख्यालाभोऽपि लौकिकवैदिकेषु प्रयोगेषु प्रसिद्धः। यथा 'वयसोवयसस्सप्तदशास्सप्तदशानि ददाति' 'पञ्च पञ्चाशस्त्रिवृतस्संवत्सरा' इति प्रथमान्वितविशेषणसजातीयस्य तद्विरोधिनो वा यत्र विवक्षितमहासङ्ख्यालाभार्थत्वं नास्ति तत्रैव तदनाकाङ्क्षा। वस्तुतस्तु, 'पञ्चजना' इति समस्तमेकं पदमत्र श्रूयमाणस्यान्तानुदात्तस्वरस्य शतपथब्राह्मणस्वरविधायकभाषिकाख्यग्रन्थविहितब्राह्मणपठितमन्त्रत्वनिमित्तानुदात्तरूपतया 'तत्स्थानिना तत्समासस्ये'ति व्याकरणविहितेनान्तोदात्तस्वरेण 'पञ्चानां त्वा पञ्चजनानां यन्त्राय धर्त्राय गृह्णामी'ति श्रुत्यन्तरे समासदर्शनेन चात्रापि समासनिश्चयात्। न च समासेनैकपद्ये ऽपि पञ्चभिर्भूतैर्जायमानेषु मनुष्येषु तस्य प्रसिद्धा रूढिरिहाश्रयितुं युक्ता। पञ्च मनुष्या यस्मिन्प्रतिष्ठिता इत्युक्तया तदधिकरणे कस्यचिदतिशयस्यालाभेन वाक्यस्य निस्तात्पर्यत्वप्रसङ्गात्। न च पञ्च च ते जनाश्चेति 'दिक्संख्ये संज्ञाया' मिति (पा०) सूत्रविहितः समानाधिकरणसमासो युक्तः। पञ्चजनशब्दसंज्ञाविशेषाणां पञ्चसङ्ख्योपलक्षितानां केषाञ्चिज्जनानां क्वचिदपि प्रसिद्धेरभावात्। न च 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनो विदु' रिति वाक्यशेषे श्रुताः प्राणादयः पञ्च तत्संज्ञिनः स्युरिति वाच्यम्। तेषु लोके पञ्चजनसंज्ञाप्रसिध्द्यभावात्। इहैव तत्संज्ञात्वकल्पने कल्पकाभावात्। चक्षुश्श्रोत्रमनस्स्विन्द्रियेषु प्राणवायावन्ने चानुगताનतिप्रसक्त-स्यैकस्य प्रवृत्तिनिमित्तस्याभावात् माध्यन्दिनपाठ इव काण्वपाठे 'अन्नस्यान्न' मित्यस्यानाम्नानेन तत्र पञ्चजनानां लाभाञ्च। तस्मात्समाहारविषयोऽत्र समासस्समाश्रयणीयः। पञ्चजनीति ङीप्रत्यया-भावस्तु गत्यन्तराभावाच्छान्दसत्वेनोपपादनीयः। एवं च यथा 'पञ्च पञ्चपूल्य' इत्यत्र समस्ता पञ्चसङ्ख्यैव पूलाविशेषणं वयस्ता तत्समाहाराणामिति नास्ति नैराकाङ्क्ष्यदोष इत्यस्ति पञ्चविंशतेः पूलानां प्रतीतिः। एवमिहापि न नैराकाङ्क्ष्यदोषः पञ्चविंशतेस्तत्वानां प्रतीतिश्च। एवं छान्दसत्वेन संज्ञायां समानाधिकरणसमासमङ्गीकृत्यापि व्यस्तसमस्तपञ्चसङ्ख्याभ्यां संवर्धनेन पञ्चविंशति-सङ्ख्याप्रतीतिरुपपादयितुं शक्येति तस्मादुत्तरमुक्तम्। अत्र तदवभासादिति क्वचित्पाठः। तस्मिन्पाठे

निवर्तनीयेयमाशङ्का। एवमपि साङ्ख्यतत्वग्रहणमिह न युज्यते। नाभूतेषु तेषु पञ्चशः क्रोडीकारकधर्माभावात् महदन्तानां त्रयोविंशतेस्तत्वानां प्रकृत्याश्रितत्वेन प्रकृतेरनाश्रितत्वेन च तदीयतत्वानामात्मनि प्रतिष्ठितत्वाभावात् अधिकरणेनात्मना पृथगुपात्तेनाकाशेन च पञ्चविंशतिसङ्ख्यातिरेकाच्चेति। तन्निवर्तनप्रकारस्तुस्यादिदं दोषजातं साङ्ख्यतत्त्वग्रहणे। यद्यत्र तव सिद्धान्ते 'पञ्च पञ्चजना' इत्येतदर्थतया ग्रहीतुं योग्याः पञ्चविंशतिरर्थाः पञ्चशः पञ्चशः क्रोडीकारकधर्मशालिनः आकाशेन सहात्मनि प्रतिष्ठिताः केचन स्युः। न च ते सन्ति। तस्माद्यथाकथञ्चित्साङ्ख्यतत्वानामेवेह ग्रहणमुपपादनीयम्। तत्र 'तासां त्रीणि च शतानि षष्टिश्चाक्षराणी' त्यत्र सामिधेन्युदाहरणमेकैकस्मिन् शते षष्टौ च पृथक्पृथक् क्रोडीकारकधर्माभावेऽपि विभज्य वचनवत् 'पञ्चपञ्चे' ति विभज्य वचनं भूतानि पञ्च तन्मात्राणि पञ्च कर्मेन्द्रियाणि पञ्चावशिष्टानि पञ्चेति वा पञ्चशः क्रोडीकारकधर्मास्सन्तीति। अस्ति च चतुर्विंशतेस्तत्वानामात्मनि प्रतिष्ठितत्ववचनं तददृष्टाधीनव्यापारवत्त्वात्तद्भोगार्थत्वाद्वा भाक्तम्। आत्मनस्तद्वचनं 'स्वे महिम्नि प्रतिष्ठित' इतिवत् 'तं शङ्करं सर्वे सुरास्साक्षाञ्च माधव' इत्यत्र माधवस्येवाकाशस्य पृथग्ग्रहणं मुख्यत्वाभिप्रायम्। विनैवमात्माकाशौ गुणसङ्घातरूपां प्रकृतिं सत्वादिगुणभेदेन त्रिधा परिगणय्य वा पञ्चविंशतिसङ्ख्यापादनीयेति। एवं यथाकथञ्चित्साङ्ख्यतत्वान्येव ग्राह्याणि गत्यन्तराभावादित्युपसंहरति–सर्वथेति। 'न सङ्ख्योपसङ्ग्रहादपी' ति सूत्रं सिद्धान्तप्रतिज्ञापरं व्याचष्टे–**पञ्चेति।** वस्तुतः पञ्चद्वयेनात्र पञ्चविंशतिसङ्ख्याप्रतीतिर्नास्त्येव। अभ्युपेत्योच्यते। पञ्चविंशतिसङ्ख्यया सङ्ख्येयानामुपसङ्ग्रहादपि तदुपसङ्गृहीतानि तान्त्रिकाणि तत्वानीति न सिध्यतीत्यर्थः। तत्र हेतुं नानाभावं विवृणोति-**यस्मिन्निति।** नानाभावः पृथत्क्वम्। 'विना नाना हिरुक्पृथ' गिति हि नैखण्टुकाः। पृथक्त्वं चेहात्मप्रतिष्ठितत्वरूपं तान्त्रिकतत्त्वेभ्यो वैलक्षण्यम्। अतिरेकं स्वतन्त्रहेत्वन्तरतया च शब्देनावगमितं व्याचष्टे–**आकाशस्येति।** आकाशग्रहणमधिकरणस्यात्मनोऽप्युपलक्षणम्। न च गत्यन्तराभावात् साङ्ख्यतत्त्वेष्वेवात्मनि प्रतिष्ठितत्ववचनमाकाशस्य पृथग्ग्रहणं च पूर्वपक्षिदर्शितया रीत्यैष्वगत्योपपादनीयमिति वाच्यम्। सप्तविंशतिषड्विंशतितत्ववादिनां मते तदन्तर्गतानि प्रकृत्यन्तानि पञ्चविंशतिस्तत्त्वानि परमाकाशरूपा चिच्छक्तिश्चास्तीति तेषां परमेश्वराश्रितानामक्लेशेन ग्रहणसम्भवात् कठवल्लीषु, 'इन्द्रियेभ्यः परा ह्यर्था' इत्यादिना पुरुषावरत्वेन वर्णितानां ग्रहणसम्भवाञ्च। ज्ञानेन्द्रियकर्मेन्द्रियभूततन्मात्रामनोबुद्धिभोक्तृस्थूलसूक्ष्मशरीरद्वयपरत्वोपपत्तेः। एवमन्तरङ्गशाखान्तरदृष्टसङ्ख्येयोपसङ्ग्रह एव युक्तः। न तु बहिरङ्गाप्रामाणिकसाङ्ख्यकल्पिततत्वोपसङ्ग्रह इति भावः। एवं पञ्चविंशतिसङ्ख्याप्रतीतिसत्त्वेऽपि तत्सङ्ख्येयतया साङ्ख्यतत्त्वग्रहणं न सम्भवतीति समर्थितम्। इदानीं वस्तुतस्तत्प्रतीतिरपि नास्तीति सौत्रेणापिशब्देन ध्वनितं युत्तयन्तरं विवृणोति–**किं**

चेति। अवश्याभ्युपगन्तव्यतव्यतत्त्वपञ्चजनशब्दे समासे 'दिक्सङ्ख्ये संज्ञाया' मिति सूत्रविहितः संज्ञासमास एवेति तावदभ्युपगन्तव्यः। समाहारसमासे स्त्रीप्रत्ययाभावस्यासंज्ञायां संज्ञासमासस्य च छान्दसत्वेन समर्थितस्य शिलष्टत्वात्। न च संज्ञासमासेऽपि व्यस्तसमस्तपञ्चसङ्ख्याभ्यां पञ्चविंशतिसङ्ख्यालाभशङ्कावकाशः। संज्ञासमासे हि समस्तपञ्चशब्दोक्ता सङ्ख्या शाखावदुपलक्षण-भूतसंज्ञिप्रतिपत्त्यर्था न तु संज्ञिकज्ञाप्यविशेषणभूता। अतो यथा सप्तर्षय इति संज्ञासमासे समस्तपदोक्ता सप्तसङ्ख्या न तात्पर्यविषयतया प्रतीयत इति तस्या एव तात्पर्यविषयत्वप्रत्यायनार्थं पृथक्कृत्य पदप्रयोगः पुराणे एवमिहापीति पृथक्पदोक्ता एकैवात्र पञ्चसङ्ख्या। अतोऽपि न साङ्ख्यतत्वग्रहणप्रसक्तिरत्रेति।। ननु पञ्चजनसंज्ञिकाः केचिदिह ग्राह्याः तर्हि केत इति निर्विचिकित्सं 'सन्दिग्धे तु वाक्यशेषा' दिति न्यायात् प्राणदय इति चेन्न। तेष्वनुगतैकसंज्ञाविषयत्वायोगा-दित्याशङ्कोत्तरत्वेनोत्तरसूत्रमवतारयति– **के पुनरिति**।।सू।। **प्राणादयो वाक्यशेषात्**।।१२।। पञ्चजनसंज्ञा तावत् पञ्चसङ्ख्यान् संज्ञिनोऽपेक्षमाणा वाक्यशेषगतान् पञ्चसङ्ख्यान् प्राणादीन् संज्ञित्वेन गृह्णातीति संज्ञिषु तेषु प्रवृत्तिनिमित्तभूतैकधर्मापेक्षायां चक्षुश्श्रोत्रमनोबुद्धिषु क्लृप्तमिन्द्रियत्वं प्राणान्नशब्दयोरपि कल्प्यते। 'विप्रतिषिद्धधर्माणां भूयसां स्यात्सधर्मत्व' मिति न्यायात्। तत्र वायुसम्बन्धित्वात्प्राणशब्दोक्तं वागिन्द्रियमन्नशब्दार्थपृथिवीसम्बन्धित्वादन्नशब्दोदितं घ्राणमद्यतेऽने-नेत्यन्नमिति व्युत्पत्त्या तेन रसनेन्द्रियं ग्राह्यम्। एवं घ्राणरसनयोस्तन्त्रेणोपात्तयोरेकीकारात् पञ्चसङ्ख्या। यथा 'द्वादश मासाः पञ्चर्तव' इत्यत्र हेमन्तशिशिरयोरेकीकारात् 'हेमन्तशिशिरावृतूनां प्रीणामी'ति प्रयाजानुमन्त्रणमन्त्रे समासरूपेणैकपदेनोपात्तयोरेकीकरणादृतूनां पञ्चसङ्ख्या। अतः पञ्चजन-समाससंज्ञाः प्राणादयः पञ्चेन्द्रियाणीति गम्यत इत्येवं वाक्यशेषगताः पञ्चेन्द्रियरूपाः प्राणादयः पञ्च पञ्चजना निश्चीयन्ते। काण्वशाखायामन्नप्राणाभावेन पञ्चजनसङ्ख्या न लभ्यत इत्याशङ्क्य तत्रापि गुणोपसंहारन्यायेनान्नस्य सत्त्वात्तल्लाभोऽस्तीति वक्तुं शक्यत्वेऽपि तदलाभमङ्गीकृत्य तत्रासत्यप्यन्ने पूर्वमन्त्रानुसारेण पञ्चजना इन्द्रियाणीति निश्चेतुं शक्यत इत्युक्तिभङ्ग्योत्तरमन्त्रवत् पूर्वमन्त्रोऽपि विवक्षितार्थनिश्चायकोऽस्तीत्युपपत्त्यन्तरमुत्तरसूत्रेणोच्यत इत्यत आह– **पुनरुपपत्तिरिति।।सू।। ज्योतिषैकेषामसत्यन्ने**।।१३।।

इति शिवार्कमणिदीपिका सङ्ख्योपसङ्ग्रहाधिकरणम् समाप्तम्

अथ कारणत्वाधिकरणम्। ॥सू० १४-१५॥

शाङ्करभाष्यम्

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः॥१४॥

प्रतिपादितं ब्रह्मणो लक्षणम्। प्रतिपादितं च ब्रह्मविषयं गतिसामान्यं वेदान्तवाक्यानाम्। प्रतिपादितं च प्रधानस्याशब्दत्वम्।

तत्रेदमपरमाशङ्क्यते—न जन्मादिकारणत्वं ब्रह्मणो ब्रह्मविषयं वा गतिसामान्यं वेदान्तवाक्यानां प्रतिपत्तुं शक्यम्। कस्मात्? विगानदर्शनात्। प्रतिवेदान्तं ह्यन्यान्यां सृष्टिरुपलभ्यते; क्रमादिवैचित्र्यात्। तथा हि—क्वचित् ''आत्मन आकाशः सम्भूतः'' (तै० २/१) इत्याकाशादिका सृष्टिराम्नायते। क्वचित्तेजआदिका—''तत्तेजोऽसृजत'' (छा० ६/२/३) इति। क्वचित्प्राणादिका—''स प्राणमसृजत प्राणाच्छ्रद्धाम्॥'' (प० ६/४) इति। क्वचिदक्रमेणैव लोकनामुत्पत्तिराम्नायते—''स इमाँल्लोकानसृजत। अम्भो मरीचीर्मरमापः'' (ऐ० उ० ४/१/२) इति, तथा क्वचिदसत्पूर्विका सृष्टिः पठयते—''असद्वा इदमग्र आसीत्ततो वै सदजायत'' (तै० २/७) इति। ''असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्'' (छा० ३/१९/१) इति च। क्वचिदसद्वादनिराकरणेन सत्पूर्विका प्रक्रिया प्रतिज्ञायते—''तद्धैक आहुरसदेवेदमग्र आसीत्'' इत्युपक्रम्य ''कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदगग्र आसीत्'' (छा० ६/२/१/२) इति। क्वचित् स्वयंकर्तृकैव व्याक्रिया जगतो निगद्यते—''तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियत'' (बृ० १/४/७) इति॥ एवमनेकधा विप्रतिपत्तेर्वस्तुनि च विकल्पस्यानुपपत्तेर्न वेदान्तवाक्यानां जगत्कारणावधरणपरता न्याय्या। स्मृति-न्यायप्रसिद्धिभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति॥

एवं प्राप्ते ब्रूमः—सत्यपि प्रतिवेदान्तं सृज्यमानेष्वाकाशादिषु क्रमादिद्वारके विगाने न स्रष्टरि किञ्चिद्विगानमस्ति। कुतः? यथाव्यपदिष्टोक्तेः यथाभूतो ह्येकस्मिन वेदान्ते सर्वज्ञः सर्वेश्वरः सर्वात्मैकोऽद्वितीयः कारणत्वेन व्यपदिष्टस्ततथाभूत एव वेदान्तान्तरेष्वपि व्यपदिश्यते। तद्यथा—''सत्यं ज्ञानमनन्तं ब्रह्म' (तै० २/१) इति। अत्र तावज्ज्ञानशब्दे परेण च तद्विषयेण कामयितृत्ववचनेन

चेतनं ब्रह्म न्यरूपयत्। अपरप्रयोज्यत्वेनेश्वरं कारणमब्रवीत्। तद्विषयेणैव परेणात्मशब्देन शरीरादिकोशपरम्परया चान्तरनुप्रवेशनेन सर्वेषामन्तः प्रत्यगात्मानं निरधारयत्। "बहु स्यां प्रयायेय" (तै॰ २/६) इति चात्मविषयेण बहुभवनानुशंसनेन सृज्यमानानां विकाराणां स्रष्टुरभेदमभाषत। तथा "इदं सर्वमसृजत। यदिदं किञ्च" (तै॰ २/६) इति समस्तजगत्सृष्टिनिर्देशेन प्राक्सृष्टेरद्वितीयं स्रष्टारमाचष्टे। तदत्र यल्लक्षणं ब्रह्म कारणत्वेन विज्ञातम्, तल्लक्षणमेवान्यत्रापि विज्ञायते–"सदेव सोम्येदमग्रआसीदेकमेवाद्वितीयम्" "तदैक्षत बहु स्यां प्रजायेयेति। तत्तेजोऽसृजत" (छा॰ ६/२/१/३) इति। तथा "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन मिषत्। स ईक्षत लोकान्नु सृजै" (ऐ॰ उ॰ ४/१/१/२) इति च, एवञ्जातीयकस्य कारणस्वरूपनिरूपणपरस्य वाक्यजातस्य प्रतिवेदान्तमविगीतार्थत्वात्। कार्यविषयं तु विगानं दृश्यते–क्वचिदाकाशादिका सृष्टिः, क्वचित्तेजआदिकेत्येवंजातीयकम्। नच कार्यविषयेण विगानेन कारणमपि ब्रह्म सर्ववेदान्तेष्वविगीतमधिगम्यमानमविवक्षितं भवितुमर्हतीति शक्यते वक्तुम्; अतिप्रसङ्गात्। समाधास्यति आचार्यः कार्यविषयमपि विगानं "न वियदश्रुतेः" (ब्र॰ सू॰ २/३/१) इत्यारम्भ भवेदपि कार्यस्य विगीतत्वमप्रतिपाद्यत्वात्। न ह्ययं सृष्टयादिप्रपञ्चप्रतिपिपादयिषितः। नहि तत्प्रतिबद्धः कश्चित्पुरुषार्थो दृश्यते, श्रूयते वा। न च कल्पयितुं शक्यते; उपक्रमोपसंहाराभ्यां तत्र तत्र ब्रह्मविषयैर्वाक्यैः साकमेकवाक्यताया गम्यमानत्वात्। दर्शयति च सृष्टयादिप्रपञ्चस्य ब्रह्मप्रतिपत्त्यर्थताम्–"अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्विच्छ" तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ (छा॰ ६/८/४) इति। मृदादिदृष्टान्तैश्च कार्यस्य कारणेनाभेदं वदितुं "मृष्टयादिप्रपञ्चः श्राव्यत इति गम्यते। तथाच सम्प्रदायाविद वदन्ति– "मृल्लोहविस्फुलिङ्गाद्यैः सृष्टिर्या चोदिताऽन्यथा। उपायः सोऽवताराय नास्ति भेदः कथञ्चन॥" (माण्डू॰ का॰ १/१५) इति। ब्रह्मप्रतिपत्तिप्रतिबद्धं तु फलं श्रूयते–"ब्रह्मविदाप्नोति परम्" (तै॰ २/१) "तरति शोकमात्मवित्" (छा॰ ७/१/३) "तमेव विदित्वाऽतिमृत्युमेति" (श्वे॰ ३/८) इति। प्रत्यक्षावगमं चेदं फलम्, "तत्त्वमसि" इत्यसंसार्यात्मत्वप्रतिपत्तौ सत्यां संसार्यात्मत्वव्यावृत्तेः॥१४॥

यत्पुनः कारणविषयं विगानं दर्शितम्–"असद्वा इदमग्र आसीत्" इत्यादि, तत्परिहर्तव्यम्, अत्रोच्यते–

***समाकर्षात्*॥१५॥**

"असद्वा इदमग्र आसीत्" (तै॰ २/७) इति नात्रासन्निरात्मकं कारणत्वेन श्राव्यते। यतः "असन्नेव स भवति। असद् ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद, सन्तमेनं ततो विदुः" इत्यसद्वादापवादेनास्तित्वलक्षणं ब्रह्मान्नमयादिकोशपरम्परया प्रत्यगात्मानं निर्धार्य "सोऽकामयत" इति

तमेव प्रकृतं समाकृष्य सप्रप्रञ्चां सृष्टिं तस्माच्छ्रावयित्वा ''तत्सत्यमित्याचक्षते'' इति चोपसंहृत्य ''तदप्येष: श्लोको भवति'' इति तस्मिन्नेव प्रकृतेऽर्थे श्लोकमिममुदाहरति–''असद्वा इदमग्र आसीत्'' इति। यदि त्वसन्निरात्मकमस्मिन श्लोकेऽभिप्रेयेत, ततोऽन्यसमाकर्षणेऽन्यस्योदाहरणाद-सम्बद्धं वाक्यमापद्येत। तस्मान्नामरूपव्याकृतवस्तुविषय: प्रायेण सच्छब्द: प्रसिद्ध:, इति तद्व्या करणाभावपेक्षया प्रागुत्पत्ते: सदेव ब्रह्मासदिवासीदित्युपचर्यते।। एषैव ''असदेवेदमग्र आसीत्'' (छा॰ ३/१९/१) इत्यत्रापि योजना; ''तत्सदासीत्'' इति समाकर्षणात्। अत्यन्ताभावाभ्युपगमे हि तत्सदासीत् इति किं समाकृष्यते?

''तद्धैक आहुरसदेवेदमग्र आसीत्'' (छा॰ ६/२/१) इत्यत्रापि न श्रुत्यन्तराभिप्रायेणा-यमेकीयमतोपन्यास:, क्रियायामिव वस्तुनि विकल्पस्यासम्भवात्। तस्माच्छ्रुतिपरिगृहीत-सत्पक्षदार्ढयायैवायं मन्दमतिपरिकल्पितस्यासत्पक्षस्योपन्यस्य निरास इति द्रष्टव्यम्। ''तद्धेदं तर्ह्यव्याकृतमासीत्'' (बृ॰ १/४/७) इत्यत्रापि न निरध्यक्षस्य जगतो व्याकरणं कथ्यते, ''स एष इह प्रविष्ट आ नखाग्रेभ्य:'' इत्यध्यक्षस्य व्याकृतकार्यानुप्रवेशित्वेन समाकर्षात्। निरध्यक्षे व्याकरणाभ्युपगमे ह्यनन्तरेण प्रकृतावलम्बिना स इत्यनेन सर्वनाम्ना क: कार्यानुप्रवेशित्वेन समाकृष्येत? चेतनस्य चायमात्मन: शरीरेऽनुप्रवेश: श्रूयते। अनुप्रविष्टस्य चेतनत्व-श्रवणात्–''पश्यंश्चक्षु: श्रृण्वञ्श्रोत्रं मन्वानो मन:'' इति। अपि च यादृशमिदमद्यत्वे नामरूपाभ्यां व्याक्रियमाणं जगत्साध्यक्षं व्याक्रियत, एवमादिसर्गेऽपीति गम्यते; दृष्टविपरीतकल्पनानुपपत्ते:। श्रुत्यन्तरमपि ''अनेन जीवेनात्मनानुप्रविश्य नामरूपे वयाकरवाणि'' (छा॰ ६/३/२) इति साध्यक्षामेव जगतो व्याक्रियां दर्शयति। व्याक्रियत इत्यपि कर्मकर्तरि लकार: सत्येव परमेश्वरे व्याकर्तरि सौकर्यमपेक्ष्य द्रष्टव्य:। यथा लूयते केदार: स्वयमेवेति सत्येव पूर्णके लवितरि। यद्वा कर्मण्येवैष लकारोऽर्थाक्षिप्तं कर्तारमपेक्ष्य द्रष्टव्य:। यथा गम्यते ग्राम इति।।१५।। इति चतुर्थं कारणत्वाधिकरणम्।।

इति शाङ्करभाष्यम् कारणत्वाधिकरणम् समाप्तम्

वार्तिकम्

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।।१४।। वृत्तमनुकीर्तयन् वृत्तवर्तिष्यमाणयोः सङ्गतिं दर्शयति–*प्रतिपादितं ब्रह्मणो लक्षणमिति*।। अस्तु नाम प्रधानस्याशब्दत्वम्, तथापि प्रतिपादितं विगानदर्शनाद् ब्रह्मणो जगज्जन्मादिकारणत्वम्, वेदान्तवाक्यानां च तद्विपयं गतिमसामान्यं न सेद्धुमर्हति। तथाहि–क्वचिदसत्पूर्विकैव सृष्टिः श्रूयते–''असद्वा इदमग्र आसीत्। तता वै सदजायते''ति।। ''असदेवेमग्र आसीत् तत्सदासीत् तत्समभवदि''ति च। क्वचिदसत्पूर्वकत्वनिराकरणेन सत्पर्विका सृष्टिः प्रतिज्ञायते–''तद्धैक आहुरसदेवेदमग्र आसीद्'' इत्युपक्रम्य ''कुतस्तु खलु सोम्यैवं स्यादिति होवाच कथमसतः सज्जायेतेति। सत्त्वेव सोम्येदमग्र आसीदि''ति। क्वचिञ्च स्वयङ्कर्तृकत्वेन व्याक्रिया जगतो निगद्यते–''तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत'' इति। एवमनेकधा विप्रतिपत्तिर्भवति वेदान्तेषु जगत्कारणविषये।।

न केवलं स्रष्टर्येव विप्रतिपत्तिः, सृज्यमानेष्वपि भवति विप्रतिपत्तिः। कुतः? तेषां क्रमाक्रमव्युत्क्रमाम्नानदर्शनात्। क्रमाम्नानं तावत्–''आत्मन आकाशः संभूत'' इत्यादि। अक्रमाम्नानं तु–''स इमांल्लोकानसृजत। अम्भो मरीचीर्मरमाप'' इति, ''तत्सर्वं समभवदि'' ति च। व्युत्क्रमाम्नानं तु–''एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापश्च पृथिवी विश्वस्य धारिणी'' ति। ''प्राणेभ्यो देवा देवेभ्यो लोकाः'' इति च। सृज्यमानविगानं तु स्रष्टरि विगानमावहति; तदधीननिरूपणत्वात् स्रष्टुः। न च परस्परविरुद्धार्थकानां वेदानतवाक्यानां प्रामाण्यमुपपद्यते, न च तदप्रामाण्ये समन्वयस्तेषां ब्रह्मणि सिद्धयति, नापि तदसिद्धौ ब्रह्म कारणं सिद्धेयत्। व्रीहियववाक्यवद् विकल्पार्थत्वात् तेषां विरोधेऽपि प्रामाण्योपपत्तिरिति चेत्, न; वस्तुनि विकल्पानुपपत्तेः, क्रियायामेव तदभ्युपगमात्। तस्माद् न जगत्कारणे वेदान्ताः प्रमाणम्। तथाच प्रमाणान्तरविरोधाभावात् स्मृतिप्रसिद्धं प्रधानमेव जगत्कारणं भविष्यति, इति सकलतन्त्राक्षेपेणदमधिकरणं प्रवर्तते।।

अत्रोच्यते–न वेदान्तानामप्रामाण्यमुत्प्रेक्षितुमपि शक्यते; स्वाध्यायाध्ययनविधिव्याकोपापत्तेरित्यसकृदावेदितत्वात्। न च–वेदान्तानां जपार्थत्वेऽपि तदुपपत्तेर्न व्याकोप इति–वाच्यम्; स्वाध्यायस्य फलवदर्थावबोधपरत्वस्य निसर्गसिद्धत्वात्। ननु–उक्तं वेदान्तवाक्यांना परस्परविरोधाद् नार्थावबोधपरत्वम्–इति, मैवम्; तेषां परस्परविरोधः किं सृज्यमानविषयविप्रतिपत्त्योच्यते, किं वा सृष्टृविषयविप्रतिपत्त्या। तत्र नाद्यः ; सृज्यमानविषयविप्रतिपत्तेः–"न वियदश्रुते" रित्यारभ्याविरोधलक्षणे निराकरिष्यमाणत्वात्। न द्वितीयः ; यथैकस्मिन् वेदान्ते सर्वज्ञत्वादिना व्यपदिष्टस्य ब्रह्मण आकाशादिविषयककारणत्वेनोक्तिः, तथाऽविशेषेण सर्ववेदान्तेष्वपि। अतो नास्ति वेदान्तानां परस्परविगानम्–इति। तदविगानं तु भाष्ये दर्शितम्। भाष्यकारस्तु–क्रमादिद्वारा सृज्यमानविगानं न स्रष्टरि विगानमावहति; क्रमाक्रमव्युत्क्रमैरेकस्यापि कर्तुर्लोकेऽनेककार्यकारित्वदर्शनात्, इति सृज्यमानविगानाभ्युपगमेऽपि न काचित् क्षतिः–इत्याह– *सत्यपि प्रतिवेदान्तमिति*।।

समाधास्यति चाचार्यः कार्यविषयमपि विगानं "न वियदश्रुतेरि" त्यारभ्येति।। ननु–एवं तर्हि स्रष्ट्विषयविगानमपि तत्रैवाचार्येण समाधातव्यम्; अविराधचिन्ताया अविरोधलक्षण एव सङ्गतत्वात्, समन्वये च तदसङ्गतेः, अन्यथा लक्षणसाङ्कर्यापत्तेरिति–चेत्, न; प्रमाणान्तराविरोधस्यैवाविरोधलक्षणार्थत्वात्, श्रूयमाणसृष्टिवैलक्षण्यस्य स्रष्टृवैलक्षण्यलिङ्गत्वेन प्रमाणान्तरत्वात् तदविरोधचिन्तायास्तत्रोपपत्तेः। न चैवं ब्रह्मकारणतायां साक्षात् श्रुतीनां परस्परविप्रतिपत्तौ तासां ब्रह्मणि समन्वयः सिद्धयति, अतस्तदविरोधचिन्तनेनात्र तासां समन्वय एव प्रदर्श्यत इत्यनवद्यम्। इतश्च न कार्यविगानं कारणविगानमावहतीत्याह– *भवेदपि कार्यस्य विगीतत्वमिति*।।१४।।

ननु–मा भूत् कार्यविगानात् कारणे विगानम्, तथापि दर्शितं तासां कारणविषयं विगानं कथं परिहृतं स्यात्? तत्राह सूत्रकारः– *समाकर्षात्*।।१५।। व्याख्यानमस्य भाष्ये।।

एवं वा–"असद्वा इदमग्र आसीत् ततो वै सदजायते" त्यादौ किं जगत्कारणत्वेन "असतः"=अभावस्य व्यपदेशः, किं वा सत एव ब्रह्मणः ; तथा–"तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियते" त्यत्र कर्मकर्तरि लकारदर्शनात् किं निरधिष्ठानं जगत् स्वतो नामरूपाभ्यां व्याक्रियते, किं वा परमेश्वराधिष्ठानेन साधिष्ठानमिति। यद्याद्यः, तर्हि न वेदान्तवाक्यानां ब्रह्मणि गतिसामान्यसिद्धिः। अथ द्वितीयः, तदा तत्सिद्धिरिति।।

किं तावत् प्राप्तम्? अभाव एव–"असद्वा इदमग्रे" इत्यादौ जगतः कारणत्वेन विवक्षितः। कुतः? यथाव्यपदिष्टोक्तेः। "असद्वा इदमग्र आसीदि" ति सत्त्वेन व्यपदिष्टस्यैव "ततो वै सदजायते" ति सत्कारणत्वेनोक्तिर्भवति। न च सतो ब्रह्मणाऽसदिति व्यपदिष्टस्यैव केवलस्य

व्यपदेशः संभवति; विरोधात्, अभावेऽसच्छब्दस्य रूढत्वात् तत्परित्यागेन भावे लक्षणया प्रवृत्त्यनुपपत्तेः। तथा–इदमा व्यपदिष्टस्यैव केवलस्य जगतः–''तन्नामरूपाभ्यां व्याक्रियत'' इति नामरूपव्याकर्तृत्वोक्तिः। तत्र दृष्टान्तः–आकाशादिषु यथेति। यथा ''सत्यं ज्ञानमनन्तं ब्रह्म'' इति व्यपदिष्टस्यैव ब्रह्मणः–''तस्माद्वा एतस्मादात्मन आकाशः संभूतः'' इत्याकाशादिषु कार्येषु कारणत्वोक्तिस्तव मते, तद्वदित्यर्थः।।

एवं प्राप्तेऽभिधीयते– *समाकर्षात्*।। असच्छब्देन ब्रह्मण एवेह व्यपदेशः, तथेदंशब्देन साधिष्ठानस्यैव जगतः ; कुत? समाकर्षात्। शेषं भाष्ये।।१५।। इति चतुर्थं कारणत्वाधिकरणम्।।

इति वार्त्तिकम् कारणत्वाधिकरणम् समाप्तम्

प्रदीपः

कारणत्वेन चाकाशदिषु यथाव्यपदिष्टोक्तेः।।१४।। यथा पूर्वाधिकरणे–''तदेव ज्योतिषां ज्योतिरि' ति पूर्वतनवाक्यसमाकर्षेण पञ्चसङ्ख्यापूरणम्, एवमत्रापि–''सोऽकामयते'' ति वाक्यसमाकर्षेणासत्पदार्थव्यवस्थापनं क्रियत इति दृष्टान्तसङ्गतिः। अत्रापि असदादिपदानां शून्यवादाद्यभिमतकारणस्वरूपत्वमाशङ्क्य सद्रूपब्रह्मणि गतिसामान्यव्यवस्थापनात् पादसङ्गतिरविकला। न ह्यत्र पादे साङ्ख्यमात्रमवलम्ब्य पूर्वोत्तरौ पक्षौ, किन्तु ब्रह्मवादिविरुद्धमतमवलम्ब्य। अत एवोत्तरत्र जीववादमप्यनुसृत्य पूर्वोत्तरौ पक्षौ। अस्मिन्नधिकरणे यद्यपि कारणवाक्यानां कार्यवाक्यानां च परस्परविगानमाशङ्क्यते; तथापि कार्यवाक्यानां विगानस्यापि कारणविगान एव तात्पर्यात् कार्यवाक्यानां च परस्परविगानमाशङ्क्यते; तथापि कार्यवाक्यानां विगानस्यापि कारणविगान एव तात्पर्यात् अविरोधाध्याये कार्यवाक्यानां कार्यविषये विगानस्यैव चिन्तनाञ्च गतिसामान्योपयोगिन्येवेथं कारणवाक्यविगानचिन्तेति समन्वयाध्यायसङ्गतिरप्यविकला। आकाशादिषु=क्रमाक्रमविपरीतक्रमनिर्दिष्टेषु वियदादिषु। विषयसप्तमी। कारणत्वेन यथाव्यपदिष्टस्य ब्रह्मण एव सर्वत्र विवक्षणाद् न कारणवाक्यानां गमिसामान्यविरोध इति सूत्रार्थः।।

अत्रानुसन्धेयानि विषयवाक्यानि, सर्ववेदान्तगतानि कारणवाक्यानि यत्र क्रमाक्रमविपरीतक्रमेण कार्याणाम्, आत्मसदसदादिपदैः, कारणस्य चाम्नानम्, तान्येव। तानि च कानिचन भाष्यकाररेवोदाहरणार्थं संगृहीतानि।।

अत्र पूर्वपक्षः–परस्परविप्रतिपत्तेर्वेदान्तानां कारणस्वरूपे न प्रामाण्यमिति स्मृतिन्यायप्रसिद्धिभ्यां तन्निर्णयः। तत्र चासदेवेत्यसदाम्नानस्याप्यत्र सत्त्वेनाविरोधिन्यायेनासत्कारणवादस्यापि श्रौतत्वं भवितुमर्हति–इति। तदिदमाह– *एवमनेकधेति*।। जगत्कारणावधारणपरता=एकस्मिन् जगत्कारणे तात्पर्यम्। *कारणान्तरेति*।। असदादीत्यर्थः।।

असद्वाक्यमेकं विना सर्वाणि ब्रह्मकारणवादे न विरुद्धानीति यथाव्यपदिष्टोक्तेरितिसूत्रावयवार्थमुपपादयति- *यथाभूतो हीति*।।

कार्यविषयं विगानं कारणविगाने न प्रयोजकमित्याह- *कार्यविषयं त्वित्यादिना*।। सृष्टिवाक्यानां कारणस्वरूप एव तात्पर्येण सृष्टावतात्पर्यात् तदंशेऽप्रामाण्यमिष्टापत्तिपराहतमित्याह- *भवेदपि कार्यस्येत्यादिना*।। अध्यारोपापवादाभ्यां वस्तुनिर्णयात्। अध्यारोपपराणि तु सृष्टिवाक्यानि। न चाध्यारोपपराणां पारमार्थिकं प्रामाण्यमिति भावः। अमुमेवार्थं साम्प्रदायिकवचनोपन्यासेनोपष्टम्भयति- *तथाचेति*।। ननु एवं सति कारणवाक्यानामप्यप्रामाण्यं भवतु; विशिष्टस्य कारणस्यापि मित्यात्वादित्यत आह- *ब्रह्मप्रतिपत्तीति*।।१४।।

अथ- ''असद्वे'' ति वाक्ये विरोधं निरसितुं सूत्रम्- *समाकर्षादिति*।।१५।। अनुवर्तनादित्यर्थः। सदेव कारणमनुवर्तमानं गृहीत्वाऽसत्पदप्रयोग इत्याह- *तस्मान्नामरूपेत्यादिना*।। ''तन्नामरूपाभ्यां व्याक्रियते'' ति कर्मकर्तरि लकारो नाध्यक्षं वारयतीत्याह- *तद्धेदमित्यादिना*।। यदि तु कर्मण्येव लकारः, एवमपि समाकर्षात् कर्ता परमात्मा गम्यत इति न विगानमित्याह- *यद्वेति*।।१५।। इति चतुर्थं कारणत्वाधिकरणम्।।

इति प्रदीपः कारणत्वाधिकरणम् समाप्तम्

भामती

अथ समन्वयलक्षणे केयमकाण्डे विरोधाविरोधचिन्ता? भविता हि तस्याः स्थानमविरोध-लक्षणमित्यत आह *प्रतिपादितं ब्रह्मणो लक्षणमिति*। अयमर्थः नानैकशाखागततत्तद्वाक्यालोचनया वाक्यार्थवगमे पर्यवसिते सति प्रमाणान्तरविरोधेन वाक्यार्थावगतेरप्रामाण्यमाशङ्क्याविरोधव्युत्पादनेन प्राप्तप्रमाण्व्यवस्थापनमविरोधलक्षणार्थः, प्रासङ्गिकं तु तत्र सृष्टिविषयाणां वाक्यानां परस्परमविरोधप्रतिपादनम्, न तु लक्षणार्थः। तत्प्रयोजनं च तत्रैव प्रतिपादयिष्यते। इह तु वाक्यानां सृष्टिप्रतिपादकानां परस्परविरोधे ब्रह्मणि जगद्योनौ न समन्वयः सेद्धुमर्हति। तथा च न जगत्कारणत्वं ब्रह्मणो लक्षणं, न च तत्र गैतिसामान्यम्, न च तत्सिद्धये प्रधानस्याशब्दत्वप्रतिपानं, तस्माद्वाक्यांना विरोधाविरोधाभ्यामुक्तार्थाक्षेपसमाधानाभ्यां समन्वय एवोपपाद्यत इति समन्वयलक्षणे सङ्गतमिदमधिकरणम्।

वाक्यानां कारणे कार्य्ये परस्परविरोधतः।
समन्वयो जगद्योनो न सिध्यति परात्मनि॥

सदेव सोम्येदमग्र आसीदित्यादीनां कारणविषयाणामसद्वा इदमग्र आसोदित्यादिभिर्वाक्यैः कारणविषयैविरोधः, कार्यविषयाणामपि विभिन्नक्रमाक्रमोत्पत्तिप्रतिपाकदकानां विरोधः। तथा कानिचिदन्यर्त्तृकां जगदुत्पत्तिमाचक्षते वाक्यानि, कानिचित्, स्वयंकर्तृकाम्। सृष्टया च तत्कार्य्येण तत्कारणतया ब्रह्म लक्षितम्। सृष्टिविप्रतिपत्तौ तत्कारणतायां ब्रह्मलक्षणे विप्रतिपत्तौ सत्यां भवति तल्लक्ष्ये ब्रह्मण्यपि विप्रतिपत्तिः। तस्माद् ब्रह्मणि समन्वयाभावान्न समन्वयगम्यं ब्रह्म, वेदान्तास्तु कर्त्रादिप्रतिपादनेन कर्मविधिपरतयोपचरितार्था अविवक्षितार्था वा जपोपयोगिन इति प्राप्तम्। क्रमादीत्यादिग्रहणेनाक्रमो गृह्मते।

एवं प्राप्त उच्यते–

सर्गक्रमविवादेऽपि न स स्रष्टरि विद्यते।
सतस्त्वसद्वयो भक्त्या निराकार्य्यतया क्वचित्॥

न तावदस्ति सृष्टिक्रमे विगानं, श्रुतीनामविरोधात्। तथाहि–अनेकशिल्पपर्य्यवदातो देवदत्तः प्रथमं चक्रदण्डादि करोत्यथ तदुपकरणः कुंभं कुंभोपकरणस्त्वाहरत्युदकम्, उदकोपकरणश्च संयवनेन गोधूमकणिकानां करोति पिण्डं, पिण्डोपकरणस्तु पचति धृतपूर्णं, तदस्य देवदत्तस्य सर्वत्रैतस्मिन् र्त्तृत्वाच्छक्यं वक्तुं देवदत्ताच्चक्रादि सम्भूतं तस्माच्चक्रादेः कुम्भादीति। शक्यञ्च देवदत्तात् कुम्भः समुद्भूतस्तस्मादुदकाहरणादीत्यादि। नह्यस्त्यसम्भवः सर्वत्रास्मिन् कार्य्यजाते क्रमवत्यपि देवदत्तस्य साक्षात्कर्तृनुस्यूतत्वात्तथेहापि। यद्यप्याकाशादिक्रमेणैव सृष्टिस्तथाप्या-काशानलानिलादौ तत्र तत्र साक्षात् परमेश्वरस्य कर्तृत्वाच्छक्यं वक्तुं परमेश्वरादाकाशः सम्भूत इति, शक्यं च वक्तुं परमेश्वरादनलः सम्भूत इत्यादि। यदि त्वाकाशाद्वायुर्वायोस्तेज इत्युक्तवा तेजसो वायुर्वायोराकाश इति ब्रूयाद्भवेद्विरोधो न चैतदस्ति। तस्मादमूषामविवादः श्रुतीनाम्। एवं 'स इमान् लोकानसृजत' इत्यक्रमाभिधायिन्यपि श्रुतिरविरुद्धा। एषा हि स्वव्यापारमभिधानक्रमेण कुर्वती नाभिधेयानां क्रमं निरुणद्धि, ते तु यथाक्रमावस्थिता एवाक्रमेणोच्यन्ते। यथा क्रमवन्ति ज्ञानानि जानातीति। तदेवमविगानम्। अभ्युपेत्य तु विगानमुच्यते सृष्टौ खल्वेतद्विगानम्। स्रष्टा तु सर्ववेदान्तवाक्येष्वनुष्यूतः परमेश्वरः प्रतीयते नात्र श्रुतिविगानं मात्रयाप्यस्ति। न च सृष्टिविगानं स्रष्टरि तदधीननिरूपणे विगानमावहतीति वाच्यम्, नह्येष स्रष्टृत्वमात्रेणोच्यतेऽपि तु सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिना रूपेणोच्यते स्रष्टां। तच्चास्य रूपं सर्ववेदान्तवाक्यानुगतम्। तज्ज्ञानं च फलवत्, 'ब्रह्मविदाप्नोति परं' 'तरति शोकमात्मवित्' इति श्रुतेः। सृष्टिज्ञानस्य तु न फलं श्रूयते तेन फलवत्सन्निधावफलं तदङ्गमिति सृष्टिविज्ञानं स्रष्टृब्रह्मविज्ञानाङ्गं तदनुगुणं सद्ब्रह्मज्ञानावतारोपायतया व्याख्येयम्। तथा च श्रुतिः–'अन्नेन सोम्य शुङ्गेनापो मूलमन्विच्छ' इत्यादिका। शुङ्गेनाग्रेण कार्य्येणेति यावत्। तस्मान्न सृष्टिविप्रतिपत्तिः स्रष्टरि विप्रतिपत्तिमावहति। अपि तु गुणे त्वन्याय्यकल्पनेति तदनुगुणतया व्याख्येया। यच्च कारणे विगानमसमद्वा इदमग्र आसीदिति, तदपि तदप्येष श्लोको भवतीति पूर्वप्रकृतं सद्ब्रह्माकृष्यासदेवेदमग्र आसीदित्युच्यमानं त्वसतोऽभिधानेऽसम्बद्धं स्यात्। श्रुत्यन्तरेण च मानान्तरेण च विरोधः। तस्मादौपचारिकं व्याख्येयम्। तद्धैक आहुरसदेवेदमग्र आसीदिति तु निराकार्य्यतयोपन्यस्तमिति न कारणे विवाद इति। सूत्रे चशब्दत्वस्वर्थः पूर्वपक्षं निवर्त्तयति–आकाशादिषु सूज्यमानेषु क्रमविगानेऽपि न स्रष्टरि विगानम्। कुतः? यथैकस्यां श्रुतौ

व्यपदिष्टः परमेश्वरः सर्वस्य कर्त्ता तथैव श्रुत्यन्तरेषूक्तेः, केन रूपेण? कारणत्वेन। अपरः कल्पो यथा व्यपदिष्टः क्रम आकाशादिषु, आत्मन आकाशः सम्भूत आकाशाद्वायुर्वायोरग्निरग्नेरापोऽऽद्भ्यः पृथिवीति, तथैव क्रमस्यानपबाधनेन तत्तेजोऽसृजतेत्यादिकाया अपि सृष्टेरुक्तेर्न सृष्टावपि विमानम।।१४।।

नन्वेकत्रात्मन आकाशकारणत्वेनोक्तिरन्यत्र च तेजः कारणत्वेन तत्कथमविगानमत आह *कारणत्वेन इति*। हेतौ तृतीया, सर्वत्राकाशानलानिलादौ साक्षात्कारणत्वेनात्मनः। प्रपञ्चितं चैतदधस्तात्। व्याक्रियत इति च कर्मकर्त्तरि कर्मणि वा रूपम्। न चेतनमतिरिक्तं कर्त्तारं प्रतिक्षिपति किन्तूपस्थापयति। न हि लूयते केदारः स्वयमेवेति वा लूयते केदार इति वा लवितारं देवदत्तादिं प्रतिक्षिपति, अपि तूपस्थापयत्येव; तस्मात्सर्वमवदातम्।।१५।।

इति भामती कारणत्वाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

।।सू।। **कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः**।।१४।।

यथाऽऽकाशादिषु कार्यवर्गेषु कारणत्वेन सर्वत्र वेदान्तवाक्येषु 'असद्वा इदमग्र आसीत्' 'तद्वेदं तर्ह्यव्याकृतमासीत्' इत्यादिषु अनिर्ज्ञातविशेषेणु च 'आत्मा वा इदमेक एवाग्र आसीत्' इति विशेषवाक्यनिर्दिष्टस्यैवोक्तेर्न तान्त्रिकाव्याकृतग्रहणं, तथाऽत्र विशेषवाक्यदृष्टानामिन्द्रियाणामेवोक्तेर्न तान्त्रिकतत्त्वग्रहणम्।।

तत्र तान्त्रिकतत्त्वग्रहणायोगः कथमित्यत आह–

।।सू।। **समाकर्षात्**।।१५।।

'सोऽकामयत बहु स्याम्' इति पूर्वनिर्दिष्टस्य सर्वज्ञस्यैव 'असद्वा इदमग्र आसीत्' इति समाकर्षात् पूर्वनिर्दिष्टस्याव्याकृतस्यैव 'स एष इह प्रविष्ट आनखाग्रेभ्यः' इति समाकर्षाञ्च यथा स एवावगम्यते तथात्रापि समाकर्षात् पञ्चजनानामिन्द्रियत्वावगतिरिति न विरोधः।।

इति संख्योपसंग्रहाधिकरणम्।।३।।

इति श्री कण्ठभाष्य कारणत्वाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

काण्वशाखायां 'अन्नस्यान्न' मित्यस्य पाठाभावेऽपि शाखान्तरगुणोपसंहारेण लभ्यस्तदर्थोऽस्त्येव। न च काण्वशाखायां पाठाभावमात्रेण शाखान्तरेऽन्यार्थनिश्चयः। येन काण्वशाखायां शाखान्तरात्तदर्थग्रहणम्। दर्शितं हि पूर्वसूत्रे पञ्चसङ्ख्याविशेषितान् कांश्चिदप्रसिद्धान् पञ्चजनसंज्ञायास्संज्ञिनो निर्दिश्यानन्तरं प्राणादीनां पञ्चानां पाठात्त एव संज्ञिन इत्यवधारणे सति तेषु प्रवृत्तिनिमित्तैक्येन एकसंज्ञाविषयत्वनिर्वाहाय 'भूयसां स्यात्सधर्मत्व' मिति न्यायेन चक्षुःश्रोत्रमनस्सु त्रिष्ववगतमिन्द्रियत्वमेव प्रवृत्तिनिमित्तं ग्रहीतुं प्राणान्नशब्दयोरपि इन्द्रियपरत्वमन्नशब्दस्य तन्त्रेण घ्राणरसनग्राहकत्वं च कल्प्यत इति। एवं च निर्णीतार्थशाखान्तरवाक्यानुसारेण काण्वशाखायामपि प्राणादिशब्दानां वागिन्द्रियादिरर्थः शाखान्तरादुपसंहृतः। अन्नशब्दार्थत्वेन तेषां पञ्चसङ्ख्या चेति निश्चये न काचिदनुपपत्तिः। निर्णीतार्थशाखान्तरवाक्यानुसारेणार्थनिश्चयो हि न्यायविद्भिराख्यायते न त्वनिर्णीतार्थवाक्यानुसारेण निर्णीतवाक्यार्थत्यागः। एवं काण्वशाखायामपि शाखान्तर इवान्नस्य सत्त्वेऽपि तदभावमभ्युपेत्योच्यत इत्यभिप्रेत्य काण्वानां शाखायामन्नस्याभावे 'यस्मादर्वाक्संवत्सरोऽहोभिः परिवर्तते तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत' मिति पूर्वमन्त्रप्रकृतषष्ठ्यन्तज्योतिश्शब्देन पञ्चजना इन्द्रियाणीति निर्णीयते। तथा च काण्वशाखायां वाक्यशेषान्निर्णयालाभेऽपि उपक्रमात्तन्निर्णयो लभ्यत इत्येतदर्थपरतया सूत्रं व्याचष्टे–**एकेषामिति।** ननु 'ज्योतिषा' मित्याम्नानेन पञ्चजना इन्द्रियाणीति कथं निर्णीयते। तस्य द्वितीयान्तज्योतिश्शब्दोदितब्रह्माधीनस्वकार्याणां ज्योतिषां समर्पकस्य पञ्चेन्द्रियमात्रपरत्वेन सङ्कोचे स्वतो हि नास्याकाङ्क्षा। तस्याप्यसङ्कोचेन 'तस्य भासा सर्वमिदं विभाती' ति श्रुत्यन्तरे ब्रह्माधीनस्वकार्यकतयावगतेष्वादित्यादिषु सर्वेष्वपि ज्योतिष्षु वृत्त्युपपत्तेः तस्य पञ्चज्योतिर्मात्रपरत्वेऽपि गार्हपत्यादिपञ्चाग्निपरत्वोपपत्तेश्च। किं च। पञ्चजनशब्दस्य पूर्वमन्त्रे बहुवचननिर्दिष्टेषु पर्यवसाननियमेऽपि न ज्योतिश्शब्दनिर्दिष्टेषु पर्यवसाननियमः, अहश्शब्दनिर्दिष्टेष्वपि पर्यवसानोपपत्तेरित्याशङ्कानिरासेन उक्तमर्थमुपपादयति–**ज्योतिषां ज्योतिरिति।** अयमाशयः। ज्योतिश्शब्दस्याकाङ्क्षाविरहेऽपि पञ्चजन–

शब्दस्य स्वसंज्ञिविशेषाकाङ्क्षया सन्निधानात् ज्योतिषां संज्ञित्वमवसीयते। ज्योतिश्शब्दश्च प्रकाशकार्थः। 'आदित्येनैवायं ज्योतिषास्त' इत्यादिश्रुत्यन्तरे तस्य तदर्थत्वेनैव प्रयोगदर्शनात्। तेषां पञ्चजनशब्दविशेषणपञ्चसङ्ख्यावच्छेदश्चावश्यंभावी। ततो नादित्यादिज्योतिरन्तरग्रहणप्रसक्तिः। आदित्यादिषु। पञ्चसङ्ख्याप्रतीत्यभावात् गार्हपत्यादिषु हविर्ग्रहणादिवैदिककार्यविनियुक्तेषु प्रकाश-कार्यप्रसिद्ध्यभावाच्च। अह्नि तु पञ्चजनशब्दसंज्ञित्वेन ग्रहणं न युज्यते। पञ्चानामह्नामधि-करणमित्युक्तया कस्यचिदतिशयस्यालाभादिति।। एवं मन्त्रान्तरपर्यालोचनायां पञ्चजना इन्द्रियाणीति निर्णयान्न तान्त्रिकतत्वग्रहणमिति प्रसाधितमर्थं दृष्टान्तमुखेनोपपादयितुं सूत्रम्।।सू।। **कारणत्वेन चाकाशादिषु यथा व्यपदिष्टोक्तेः** ।।१४।। **'असद्वा इदमग्र** आसी' दितिं वाक्ये तावदनभिव्यक्तयभिप्रायेण सद्वस्तुपर एवासच्छब्दो वक्तव्यः। अत्यन्तासतः कारणत्वायोगात्। 'तद्धेदं तर्ह्यव्याकृतमासी' दिति वाक्येऽप्यव्याकृतशब्दस्तु साक्षादेवानभिव्यक्तपरः। व्यक्तीकृतं हि लोके व्याकृतमित्युच्यते इत्यभिप्रेत्य यथा तत्रासदव्याकृतशब्दाभ्यामनभिव्यक्तसामान्यवाचिभ्यामा-काशादिषु कारणत्वेन विशेषवाक्यनिर्दिष्टस्यात्मन एवोक्तेः न तान्त्रिकाव्यक्तग्रहणम् एवमिहापि पञ्चजना इत्यनेन सामान्यतः केषाञ्चित्संज्ञिनां समर्पकेण विशेषवाक्यदृष्टानामिन्द्रियाणामेवोक्तेर्न तान्त्रिकतत्वग्रहणमिति साध्याहारंसूत्रं व्याचष्टे—**यथेति।** स्यादेतत्। दृष्टान्तदार्ष्टान्तिकयोरुभयोरत्रापि तान्त्रिकतत्वग्रहणाभावोक्तिर्न युज्यते। तथा हि—तैत्तिरीयके तावदसत्पूर्विका सृष्टिराम्नायते। **'असद्वा इदमग्र** आसीत् ततो वै सदजायते' ति। तथा बृहदारण्यकेऽपि 'असदेवेदमग्र आसीत्तत्सदासी' दिति। न चासतः कारणत्वायोगादुभयत्राप्यसच्छब्दः सत्येव योज्य इति वाच्यम्। सत इवासतोऽपि कारणत्वसम्भवात्। सत्त्वस्य दण्डत्वादिवत्कारणतावच्छेदकत्वाभावेनानपेक्षिततत्वात्। छान्दोग्ये त्वसत्कारणत्वपक्षप्रतिक्षेपेण सत्पूर्विका सृष्टिः प्रतिज्ञायते। 'तद्धैकआहुरसदेवेदमग्र आसीत् एकमेवाद्वितीयं तस्मादसतः सज्जायत इति कुतस्तु खलु सोम्यैवं स्यात् इति होवाच कथमसतः सज्जायेतेति सत्त्वेव सोम्येदमग्र आसी' दिति। अव्याकृतवाक्ये तु स्वयंकर्तृका जगद्व्याक्रिया निगद्यते 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' इति। अत्र हि कर्मकर्तरि लकारः न तु कर्मणि। कर्त्राक्षेपगौरवात्। ननु, कर्मकर्तरि लकारपक्षेऽप्यविशिष्टः कर्त्राक्षेपः। कर्त्रा क्रियमाणमेव यत् कर्म स्वगुणैस्सुकरं भवति तदेव हि सौकर्यमपेक्ष्य कर्तृत्वेन विवक्ष्यमाणं कर्मकर्त्रित्युच्यते। यथाहुः—'क्रियमाणं तु यत्कर्म स्वयमेव प्रसिद्ध्यति। सुकरैस्स्वगुणैर्युक्तं कर्मकर्त्रिति तद्विदु'रिति। मैवम्। 'प्रलूयते केदारस्स्वयमेवे' त्यादौ कर्त्रन्तरसद्भावेऽपि 'भिद्यते कुसूलेने' त्यादौ तदभावस्य महाभाष्ये समर्थितत्वेन कर्मकर्तरि लकारे कर्त्रन्तरनियमाभावात्। तन्नियमाभावे च 'व्याक्रियते' त्यत्र 'भिद्यते कुसूलेने' ति उदाहरणानुरोध एव युक्तः। अन्यथा कर्त्राक्षेपगौरवप्रसङ्गात्। एवं

तत्तत्कारणवाक्यस्वारस्यपर्यालोचनायामवर्जनीयो विरोध इति तत्परिहारेण प्रामाण्यसंरक्षणांर्थ सर्वेषां कारणवाक्यानां सर्वज्ञकपिलादिमहर्षिपरिगृहीतजगत्कारणप्रधान एव पर्यवसानं कल्पयितुं युक्तम्। वरमध्ययनविधिपरिगृहीतानां वैदिकशब्दानामलौकिकत्वाश्रयेणापि 'सृण्येव जर्भरी' त्यादिमन्त्राणामिव प्रामाण्यसंरक्षणम्। तस्मात् दृष्टान्ते तान्त्रिकग्रहणाभावसिद्धिमत् कारणं तावदयुक्तम्। तथा दार्ष्टान्तिकेऽपि पञ्चजना इत्यस्योत्तरमन्त्रानुसारेणार्थनिर्णये हि मनस्साहित्येन घ्राणरसनयोरेकीकरणेन च पञ्चेन्द्रियाण्यर्थतया लभ्यन्ते। पूर्वमन्त्रानुसारेण तु बाह्यान्येव पञ्चेन्द्रियाणि तदर्थतया लभ्यन्ते। पञ्चसङ्ख्यानुरोधेनैव ज्योतिश्शब्दस्येन्द्रियेषु पर्यवसानसमर्थनात् बाह्येन्द्रियेष्वेव पञ्चसङ्ख्याप्रसिद्धिसत्त्वात्। पूर्वोत्तरमन्त्रानादरेण 'यस्मिन्पञ्च पञ्चजना' इति मन्त्रस्वारस्यमात्रानुसारेण तु मनुष्यास्तदर्थतया लभ्यन्ते। लोकप्रसिद्धाया रूढेः प्रबलत्वात् पञ्चसङ्ख्यायाश्च चतुर्वर्णानुलोमप्रतिलोमरूपावान्तरप्रभवविषयत्वाङ्गीकारेण व्यक्तिमात्रविषयतया वाक्यस्य निस्तात्पर्यत्वशङ्कापरिहारसम्भवाञ्च। ततश्चात्रापि पूर्वोत्तरमध्यमन्त्रस्वारस्यपर्यालोचनायामवर्जनीयो विरोध इति तत्परिहारेण प्रामाण्यसंरक्षणार्थं 'पञ्चजना' इत्यस्य छान्दसरूपाश्रयणेन सर्वज्ञकपिलादिपरिगृहीतपञ्चविंशतितत्वपरत्वकल्पनमेव युक्तम्। तस्मात् दृष्टान्ते दार्ष्टान्तिके च तान्त्रिकतत्वग्रहणाभाववर्णनं नोपपद्यत इत्याशङ्कोत्तरत्वेनोत्तरसूत्रमवतारयति– **तान्त्रिकेति**।।सू।। **समाकर्षात्**।।१५।। तैत्तिरीये 'सत्यं ज्ञानमनन्तं ब्रह्मे' ति सद्रूपं ब्रह्म प्रकृत्य तस्मादाकाशाद्युत्पत्तिमभिधाय 'असन्नेव स भवती'ति श्लोकेन तस्यासत्यत्वपक्षं निराकृत्य तस्य कामनापूर्वकसकलजगत्स्रष्टृत्वं चोक्त्वा 'तत्सत्यमित्यचक्षते' इति चोपसंहृत्य 'तदप्येष श्लोको भवती' त्यनया तस्मिन्नर्थे श्लोकोऽयमित्यवतारिकया तदेव सद्रूपं ब्रह्मानुकृष्य, 'असद्वा इदमग्र आसी' दिति पठ्यमानः श्लोकः कथमसत्कारणपरः स्यात्। अतस्सत्समाकर्षणानुरोधादसच्छब्दः सत्येवानभिव्यक्तयभिप्रायो लाक्षणिकः कल्पनीयः। 'असदेवेदमग्र आसी' दिति बृहदारण्यकश्रुतावपि 'तत्सदासीदिति' तत्पदेनासच्छब्दोक्तं समाकृष्य सद्भावविधानादत्यन्तासतश्च 'नासतो दृष्टत्वा'दिति न्यायेनासद्रूपतापत्त्ययोगादसच्छब्दः पूर्ववल्लाक्षणिकः कल्पनीयः। 'तद्धेदं तर्ह्यव्याकृतमासी' दित्यनन्तरं 'स एष इह प्रविष्ट आनखाग्रेभ्यः पश्यन् चक्षुः शृण्वन् श्रोत्रं मन्वानो मन' इति वाक्ये 'स एष' इत्यव्यवहितप्रकृतमव्याकृतं समाकृष्य तस्यान्तः प्रविष्टसर्वान्तर्यामिपुरुषत्वाभिधानादव्याकृतशब्देनाव्यक्तं ब्रह्मोक्तम्। 'व्याक्रियते'ति कर्मणि लकारः सौकर्यविवक्षया। सत्येव कर्त्रन्तरे कर्मकर्तरि लकारः कल्पनीयः। तथा प्रकृतविषयवाक्येऽपि 'तद्देवा ज्योतिषां ज्योति' रिति पूर्वं ब्रह्माधीनस्वकार्यतया षष्ठ्यन्तेनैकेन ज्योतिश्शब्देन सङ्क्षिप्य निर्दिष्टानामेव प्राणस्य चक्षुषः श्रोत्रस्य मनसोऽन्नस्येति षष्ठ्यन्तैः पदैस्समाकृष्य विशिष्य ब्रह्माधीनस्वकार्यत्वं प्रतिपाद्यत इत्यवगमात्।

पञ्चजनशब्दविशेषणपञ्चसङ्ख्यावशात् पञ्चेन्द्रियरूपतया वाक्यशेषेण प्रतिपाद्यत इति कल्पनीयम्। एवं तर्हि, पूर्वमन्त्रमात्रपरामर्शेन बाह्यान्येवेन्द्रियाणि 'पञ्चजनाः' स्युरिति तावता 'पञ्च पञ्चजना' इत्यस्य विवक्षितार्थत्वलाभात् 'ज्योतिषैकेषामसत्यन्न' इति पूर्वमन्त्रमात्रपरामर्शस्य उपपत्त्यन्तरत्वोक्ति-र्विरुद्ध्यते। नैष दोषः। यद्यप्युत्तरमन्त्रपर्यालोचनया 'पञ्च पञ्चजना' इत्यस्य मनस्साहित्येन घ्राणरसनयोरेकीकरणेन पञ्चेन्द्रियपरता न स्यात्। तथापि पूर्वमन्त्रमात्रपर्यालोचनया पञ्चेन्द्रियपरतया स्यादेव। एवमपि न साङ्ख्यतत्वग्रहणप्रत्याशेति कृत्वाचिन्तया साङ्ख्यतत्वग्रहणशङ्कानिराकरणमात्रे तस्योपपत्त्यन्तरताया उक्तत्वात्। यत्तु पञ्चजनमन्त्रस्वारस्यानुरोधेन चत्वारो वर्णा वर्णान्तरप्रभवाश्चेति पञ्च मनुष्याः पञ्चजनाः प्रतीयन्त इत्युक्तम्। तन्न। मनुष्येषु पञ्चसङ्ख्यायाः पुरुषबुद्ध्युपस्थापनीयेन ब्राह्मणत्वाद्युपाधिना निर्वहणीयतया तेषु पञ्चशब्दस्वारस्याभावात् तत्स्वारस्यानुरोधेन पञ्चजनशब्दो 'दिक्सङ्ख्ये संज्ञाया' मिति (पा०) समानाधिकरणसमासेन कासाञ्चित्पञ्चसङ्ख्योपलक्षितव्यक्तीनां संज्ञेति कल्पनया चरमश्रुतपञ्चजनशब्दस्वारस्यबाधनस्यैवोचितत्वात्। एवमेव जैमिनिनापि 'प्राजापत्यो नैवारश्चरुः सप्तदशशरावो भवती'ति विहिते सप्तदशशरावपरिमाणव्रीह्यादिद्रव्यके चरौ 'चतुरो मुष्टीन्निर्वपती' त्यस्यातिदेशतः प्राप्तौ तत्र सङ्ख्यामुष्टयन्यतरबाधेऽवश्यंभाविनि प्रथमश्रुत-सङ्ख्याबाधपरिहाराय मुष्टिबाधोऽङ्गीकृतः। तस्माद्दृष्टान्ते दार्ष्टान्तिके च विरोधाभावान्न साङ्ख्यतत्वग्रहणाशङ्कावकाश इत्यभिप्रेत्य पूर्वसूत्राद्यथाशब्दानुवृत्तिं कृत्वा दृष्टान्ते दार्ष्टान्तिके च 'समाकर्षा'दिति सूत्रपदं साध्याहारं व्याचष्टे-**सोऽकामयतेति। इति न विरोध इति।** दृष्टान्ते दार्ष्टान्तिके च नास्ति विरोध इत्यर्थः। समुच्चयेऽपि दृष्टान्तेऽपि विरोधाभावस्यात्रैवोपपादनीयत्वात्। न चैवं सत्यकृत्वा यथाशब्दानुवृत्तिं साक्षादेवोभयत्राप्यविरोधोपपादनार्थमिदं सूत्रं व्याख्यायतामिति वाच्यम्। पूर्वसूत्रमपि न केवलं दृष्टान्तेन प्रकृतार्थस्योपपादनार्थम्। किं तु दृष्टान्तीकरणव्याजेन कारणवाक्यानां ब्रह्मपरत्वस्याप्युपपादनार्थमिति पूर्वसूत्रशैथिल्यानुवर्तनात्। अन्यथा तेषां परस्परविरोधेनार्थानिर्णयप्राप्तावाप्तपरिगृहीतं प्रधानमेवार्थ इति साङ्ख्यप्रत्याशानवकाशीकरणालाभात्। न चैवं सति कारणवाक्यानामुक्तरीत्या प्रधानमेवार्थ इति पूर्वपक्षनिरासार्थमधिकरणान्तरमेवानेन सूत्रद्वयेन क्रियतामिति वाच्यम्। तावता पञ्चजनमन्त्रे पूर्वापरमन्त्रयोस्तस्य च स्वारस्यानुरोधेन विरोधं प्रदर्श्य तत्र साङ्ख्यप्रसिद्धसङ्ख्याप्रवेशस्यानवकाशीकरणालाभेन उभयत्रापि तत्प्रवेशानवकाशीकरणार्थ 'मितराण्यपि रक्षांसि पेतुर्वानरकोटिषु। रजांसि समारोत्थानि तच्छोणितनदीष्विवे' ति समुच्चयोप-मारीत्या लाघवेन युगपदुभयोपपादकतया व्याख्यातृसूचितत्वात्। एवं च दृष्टान्तेन कारणवाक्येषु तन्नयायेन दार्ष्टान्तिके विरोधोत्थापनेन साङ्ख्यप्रत्यवस्थानार्थमाद्यसूत्रं तदूर्ध्वोत्थितशङ्कासमाधानार्थं द्वितीयमिति श्लिष्यते। न च प्रथमसूत्रे 'व्यपदिष्टोक्ते' रित्यनेन चेतनकारणवादिबहुकारण-

वाक्यानुरोधन्यायस्य सूचिततया तेनैव तदूर्ध्वशंकोत्थानानवकाश इति वाच्यम्। वाक्यानुरोधन्यायस्य 'वाक्यान्वया'दिति सूत्रेण स्फुटीकरिष्यमाणतया ततः प्राक् तत्तत्पूर्वपक्षविरोधिबहुवाक्य-सद्भावमाच्छाद्य कृत्वाचिन्तया पञ्चाधिकरणप्रवृत्तिरिति प्राग्वर्णिततत्वात्। तस्मात्पूर्वाधिकरणशेष एवेदं सूत्रद्वयमिति सर्वमवदातम्।।३।।

॥ इतिसङ्ख्योपसङ्ग्रहाधिकरणम् ॥३॥

इति शिवार्कमणिदीपिका कारणत्वाधिकरणम् समाप्तम्

अथ बालाक्यधिकरणम्। ॥ सू० १६-१८॥

शाङ्करभाष्यम्

***जगद्वाचित्वात् *॥१६॥**

कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे श्रूयते–''यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्यः'' (कौ० ब्रा० ४/१९) इति। तत्र किं जीवो वेदितव्यत्वेनोपदिश्यते; उत मुख्यः प्राणः, उत परमात्मेति विशयः।

किं तावत्प्राप्तम्? प्राण इति। कुतः? ''यस्य वैतत्कर्म'' इति श्रवणात्, परिस्पन्दलक्षणस्य च कर्मणः प्राणाश्रयत्वात्, वाक्यशेषे च ''अथास्मिन्प्राण एवैकधा भवति'' इति प्राणशब्ददर्शनात्, प्राणशब्दस्य च मुख्ये प्राणे प्रसिद्धत्वात्। ये चैते पुरस्ताद्बालाकिना ''आदित्ये पुरुषश्चन्द्रमसि पुरुषः'' इत्येवमादयः पुरुषा निर्दिष्टास्तेषामपि भवति प्राणः कर्त्ता; प्राणावस्थाविशेषत्वादादित्यादिदेवतात्मनाम्, ''कतम एको देव इति स ब्रह्म त्यदित्याचक्षते'' (बृ० ३/९/९) इति श्रुत्यन्तरप्रसिद्धेः। जीवो वाऽयमिह वेदितव्यतयोपदिश्यते। तस्यापि धर्माधर्मलक्षणं कर्म शक्यते श्रावयितुम्–''यस्य वैतत्कर्म'' इति। सोऽपि भोक्तृत्वाद्भोगोपकरणभूतानामेतेषां पुरुषाणां कर्तोपपद्यते। वाक्यशेषे च जीवलिङ्गमवगम्यते। यत्कारणं वेदितव्यतयोपन्यस्य पुरुषाणां कर्तुर्वेदानायोपेतं। बालाकि प्रति बुबोधयिषुरजातशत्रुः सुप्तं पुरुषमामन्त्र्यामन्त्रणशब्दाश्रवणात्प्राणादीनामभोक्तृत्वं प्रतिबोध्य यष्टिघातोत्थानात्प्राणादिव्यतिरिक्तं जीवं भोक्तारं प्रतिबोधयति। तथा परस्तादपि जीवलिङ्गमवगम्यते–''तद्यथा श्रेष्ठो स्वैर्भुङ्क्ते यथा या स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मान एतमात्मानं भुञ्जन्ति'' (कौ० ब्रा० ४/२०) इति। प्राणभृत्त्वाञ्च जीवस्योपपन्नं प्राणशब्दत्वम्। तस्माज्जीवमुख्यप्राणयोरन्यतर इह ग्रहणीयो, न परमेश्वरः ; तल्लिङ्गानवगमादिति।

एवं प्राप्ते ब्रूमः–परमेश्वर एवायमेतेषां पुरुषाणां कर्ता स्यात्। कस्मात्? उपक्रमसामर्थ्यात्। इह हि बालाकिरजातशत्रुणा सह ''ब्रह्म ते ब्रवाणि'' इति संवदितुमुपचक्रमे। स च कतिचिदादित्याद्यधिकरणान्पुरुषानमुख्यब्रह्मदृष्टिभाज उक्त्वा तूष्णीं बभूव। तमजातशत्रुः ''मृषा वै खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणि'' इत्यमुख्यब्रह्मवादितयाऽपोद्य तत्कर्तारमन्यं वेदितव्यतयोपचिक्षेप। यदि

सोऽप्यमुख्यब्रह्मदृष्टिभाक् स्यात्, उपक्रमो बाध्येत। तस्मात्परमेश्वर एवायं भवितुमर्हति। कर्तृत्वं चैतेषां पुरुषाणां न परमेश्वरादन्यस्य स्वातन्त्र्येणावकल्पते। ''यस्य वैतत्कर्म'' इत्यपि नायं परिस्पन्दलक्षणस्य धर्माधर्मलक्षणस्य वा कर्मणो निर्देशः ; तयोरन्यतरस्याप्यप्रकृतत्वात्, असंशब्दितत्वाच्च। नापि पुरुषाणामयं निर्देशः ; ''एतेषां पुरुषाणां कर्ते'' त्येव तेषां निर्दिष्टत्वात्, लिङ्गवचनविगानाच्च। नापि पुरुषविषयस्य करोत्यर्थस्य क्रियाफलस्य वाऽयं निर्देशः ; कर्तृशब्देनैव तयोरुपात्तत्वात्। पारिशेष्यात्प्रत्यक्षसंनिहितं जगत् सर्वनाम्नैतच्छब्देन निर्दिश्यते। क्रियते इति च तदेव जगत्कर्म।। ननु जगदप्यप्रकृतमसंशब्दितं च। सत्यमेतत्, तथाप्यसति विशेषोपादाने साधारणेनार्थेन संनिहितवस्तुमात्रस्यायं निर्देश इति गम्यते, न विशिष्टस्य कस्यचित्। विशेषसंनिधानाभावात्। पूर्वत्र च जगदेकदेशभूतानां पुरुषाणां विशेषोपादानादविशेषितं जगदेवेहोपादीयत इति गम्यते।। एतदुक्तं भवति—य एतेषां पुरुषाणां जगदेकदेशभूतानां कर्ता, किमनेन विशेषेण, यस्य कृत्स्नमेव जगदविशेषितं कर्मेति। वाशब्द एकदेशावच्छिन्नकर्तृत्वव्यावृत्त्यर्थः। ये बालाकिना ब्रह्मत्वाभिमताः पुरुषाः कीर्तितास्तेषामब्रह्मत्वख्यापनाय विशेषोपादानम्। एवं ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगतः कर्ता वेदितव्यतयोपदिश्यते। परमेश्वरश्च सर्वजगतः कर्ता सर्ववेदान्तेष्ववधारितः।।१६।।

जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम्।।१७।।

अथ यदुक्तम् वाक्यशेषगताज्जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च तयोरेवान्यतरस्येह ग्रहणं न्याय्यम् न परमेश्वरस्येति, तत्परिहर्तव्यम्। अत्रोच्यते—परिहृतं चैतत् ''नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्'' (ब्र॰ सू॰ १/१/३१) इत्यत्र। त्रिविध ह्यत्रोपासनमेवं सति प्रसज्येत—जीवोपासनम्, मुख्यप्राणोपासनम्, ब्रह्मोपासनं चेति। न चैतन्न्याय्यम्। उपक्रमोपसंहाराभ्यां हि ब्रह्मविषयत्वमस्य वाक्यस्यावगम्यते। तत्रोपक्रमस्य तावद् ब्रह्मविषयत्वं दर्शितम्। उपसंहारस्यापि निरतिशयफलश्रवणाद् ब्रह्मविषयत्वं दृश्यते—''सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद''इति।। नन्वेवं सति प्रतर्दनवाक्यनिर्णयेनैदमपि वाक्यं निर्णीयेत। न निर्णीयेत; ''यस्य वैतत्कर्मे'' इत्यस्य ब्रह्मविषयत्वेन तत्रनिर्धारितत्वात्। तस्मादत्र जीवमुख्यप्राणशङ्का पुनरुत्पद्यमाना निवर्त्यते। प्राणशब्दोऽपि ब्रह्मविषयो दृष्टः—''प्राणबन्धनं हि सोम्य मनः'' (छा॰ ६/८/२) इत्यत्र। जीवलिङ्गमप्युपक्रमोपसंहारयोर्ब्रह्मविषयत्वादभेदाभिप्रायेण योजयितव्यम्।।१७।।

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।।१८।।

अपि च नैवात्र विवदितव्यम्—जीवप्रधानं वेदं वाक्यं स्यात्, ब्रह्मप्रधानं वेति; यतोऽन्यार्थं जीवपरामर्शं ब्रह्मप्रतिपत्त्यर्थमस्मिन् वाक्ये जैमिनिराचार्यो मन्यते; कस्मात्? प्रश्नव्याख्यानाभ्याम्।

प्रश्नस्तावत्सुप्तपुरुषप्रतिबोधनेन प्राणादिव्यतिरिक्ते जीवे प्रतिबोधिते पुनर्जीवव्यतिरिक्तविषयो दृश्यते–"क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत्कत एतदागात्" (कौ॰ ब्रा॰ ४/१९) इति। प्रतिवचनमपि "यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिनप्राण एवैकधा भवती" इत्यादि, "एतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः" (कौ॰ ब्रा॰ ४/२०) इति च। सुषुप्तिकाले च परेण ब्रह्मणा जीव एकतां गच्छति। परस्माच्च ब्रह्मणः प्राणादिकं जगज्जायत इति वेदान्तमर्यादा। तस्माद्यत्रास्य जीवस्य निःसम्बोधतास्वस्छतारूपः स्वाप उपाधिजनितविशेषविज्ञानरहितं स्वरूपम्, यतस्तद्भ्रंशरूपमागमनम्, सोऽत्र परमात्मा वेदितव्यतया श्रावित इति गम्यते।। अपि चैवमेके शाखिनो वाजसनेयिनोऽस्मिन्नेव बालाक्यजातशत्रुसंवादे स्पष्टं विज्ञानमयशब्देन जीवमाम्नाय तद्व्यतिरिक्तं परमात्मानमामनन्ति–"य एष विज्ञानमयः पुरुषः क्वैष तदाभूत्कुत एतदागात्" (बृ॰ २/१/१६) इति प्रश्ने। प्रतिवचनेऽपि "य एषोऽन्तर्हृदय आकशस्तस्मिञ्शेते" इति। आकाशशब्दश्च परमात्मनि प्रयुक्तः–"दहरोऽस्मिन्नन्तराकाशः" (छा॰ ८/१/१) इत्यत्र। "सर्व एत आत्मनो व्युञ्चरन्ति" इति चोपाधिमतामात्मनामन्यतो व्युञ्चरणमामनन्तः परमात्मानमेव कारणत्वेनामनन्तीति गम्यते। प्राणनिराकरणस्यापि सुषुप्तपुरुषोत्थापनेन प्राणादिव्यतिरिक्तोपदेशोऽज्युच्चयः॥१८॥ इति पञ्चमं बालाक्यधिकरणम्॥

इति शाङ्करभाष्यम् बालाक्यधिकरणम् समाप्तम्

वार्तिकम्

जगद्वाचित्वात्।।१६।। इह हैरण्यगर्भमतद्योतककर्मशब्दस्य ब्रह्मानुगुण्येन वर्णितत्वात् पादसङ्गतिः। एकस्मिन् वाक्ये सच्छब्दानुरोधेनासच्छब्दो व्याख्यायताम्, वाक्यभेदे तु न ब्रह्मशब्दानुरोधात् कर्मशब्दो व्याख्येय इत्यधिकरणसङ्गतिः। कौषीतकिब्राह्मणे श्रूयते–''यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्म स वै वेदितव्यः'' इति।।

तत्र संशयः–किमिह हिरण्यगर्भात्मा प्राणो वेदितव्यत्वेनोपदिश्यते, किं वा भोक्ता जीवः, आहोस्वित् परं ब्रह्म–इति। तदर्थं चायमन्यः संशयः–किमत्र ''यस्य वैतत् कर्मे'' ति कर्मशब्देन परिस्पन्दलक्षणा क्रियोच्यते, किं वा कार्यम्–इति। कार्यपक्षे किमेतच्छब्दः पूर्वोपात्तपुरुषाणां परामर्शी, उत प्रत्यक्षोपात्तजगत्परामर्शी।।

किं तावत् प्राप्तम्? प्राण एवेह वेदितव्यत्वेनोपदिश्यते। कुतः? ''यस्य वैतत् कर्मे'' ति प्राणलिङ्गदर्शनात्। अत्र हि परिस्पन्दनात्मिका क्रिया कर्मशब्देनोच्यते; तत्र कर्मशब्दस्य रूढत्वात्, न 'क्रियते' इति व्युत्पत्त्या क्रियमाणं वस्तु; रूढौ संभवन्त्यां योगस्यानादरणीयत्वात्, 'रूढिर्योगमपहरती' ति न्यायात्। परिरूपन्दश्च क्रियाशक्त्यात्मकस्य प्राणस्य धर्मः। अतो भवति तत्प्राणस्य लिङ्गम्। अस्तु वा प्राणशब्दो यौगिकः, तथापि पूर्वोपात्तचन्द्रादित्यादिपुरुषाणामेव तेन परिग्रहात्, एतच्छब्दसामानाधिकरण्यात्, तस्य च संनिहितपरामर्शित्वात्, तत्पुरुषाणां च प्राणमहिमत्वेन श्रुत्यन्तरप्रसिद्धेः, प्राणकार्यत्वप्रसिद्धेः। अपि च वाक्यशेषे तस्य स्वशब्देन परामर्शो भवति–''अथास्मिन् प्राण एवैकधा भवती'' ति, मुख्ये प्राणे प्राणशब्दस्य प्रसिद्धत्वात्, सोऽपि प्राणपरिग्रहे लिङ्गम्। एतेन–प्राणशब्दमत्र ब्रह्मेति–अपास्तम्; मुख्यलक्षणयोर्मुख्यस्य न्याय्यत्वात्। यदपि–उपक्रमे ''ब्रह्म ते ब्रवाणी'' ति ब्रह्मपदं तत्र श्रूयते, तदपि मुख्यप्राणे न विरुध्यते; ''स ब्रह्म त्यदित्याचक्षत'' इति श्रुत्यन्तरे ब्रह्मपदप्रयोगस्य मुख्यप्राणे प्रसिद्धेः, ब्रह्मसंनिहिततया सगुणस्यापि ब्रह्मणो ब्रह्मशब्दभाक्त्वात्।।

ननु–वेदितव्यतयोपन्यस्तस्य पुरुषाणां कर्तर्वेदनायोपगतं बालाकिं प्रति बुबोधयिषुरजातशत्रुः 'बृहन् पाण्डरवासाः सोमराजन्' इति प्राणदेवतानाम्ना सुप्तपुरुषमामन्त्र्य........तदधीनवागादिदेवतानां मन्त्रणाश्रवणादभोक्तृत्वं प्रतिबोध्य यष्टिघातेन तमुत्थाप्य प्राणादिदेवताव्यतिरिक्तं भोक्तारं जीवं प्रतिबोधयति, तत् कथमुच्यते–प्राण एवात्र वेदितव्यतयोपदिश्यते–इति?

एवं तर्हि जीव एवास्तु वेदितव्यः। तस्य च धर्माधर्मलक्षणकर्मकारित्वादुपपद्यते तत्र ''यस्य वैतत् कर्मे'' ति श्रवणम्। भोक्तृत्वाञ्च भवति भोगोपकरणानामादित्यादिपुरुषाणां स्वादृष्टद्वारा कर्ता। प्राणभृत्त्वाञ्चोपपन्नं जीवस्य प्राणशब्दत्वम्; ब्रह्माभिन्नत्वाञ्च ब्रह्मशब्दत्वम्। अस्ति चान्यद् वाक्यशेषे जीवलिङ्गम्–''तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा श्रेष्ठिनं स्वा भुञ्जन्त एवमेवैष प्राज्ञ आत्मैतैरात्मभिर्भुङ्क्ते'' इति। तस्मात् जीव एवात्र वेदितव्यतयोपदिश्यते, न परमेश्वरः ; तल्लिङ्गानुपलब्धेः, जीवमुख्यप्राणलिङ्गविरोधाञ्च।।

एवं प्राप्तेऽभिधीयते–परमेश्वर एवात्रादित्यादिपुरुषाणां कर्ता। अतः स एव वेदितव्यतयोपदिश्यते। कुतः? उपक्रमसामर्थ्यात्। अस्मिन् ब्राह्मणवाक्ये ''ब्रह्म ते ब्रवाणी'' ति बालाकिरजातशत्रुणा सह ब्रह्म संवदितुमुपक्रम्य कतिचिदब्रह्मरूपान् ब्रह्मदृष्टिभाज आदित्यादि पुरुषानुक्त्वा तूष्णीं बभूव। तं बालाकिममुख्यब्रह्मवादित्वात्–''मृषा वै खलु मा संवदिष्ठा ब्रह्म ते ब्रवाणी'' ति मृषावादित्वेनापोद्य पुनरन्यं पुरुषाणां कर्तारमुपचिक्षेप। सोऽपि यदि पूर्ववदमुख्यब्रह्मदृष्टिभागेव स्यात्, न मुख्यं ब्रह्म, तदाऽन्यस्यान्यस्मिन् प्रकरणे निर्दिष्टत्वाद् बालाकेरिवाजातशत्रोरपि मृषावादित्वप्रसङ्गाञ्चोपक्रमो बाध्येत। न चैतद् युक्तम्। तस्मात् परमेश्वर एव भवितुमर्हत्यादित्यादिपुरुषाणां कर्ता। न चादित्यादिपुरुषकर्तृत्वमपि स्वातन्त्र्येण श्रूयमाणं परमेश्वरादन्यस्यावकल्पते; प्राणात्मनो हिरण्यगर्भस्य जीवस्य चेश्वराधीनव्यापारत्वेनास्वतन्त्रत्वात्।।

यदप्युक्तम्–''यस्य वैतत् कर्मे'' त्यत्र कर्मशब्देन रूढेः परिस्पन्दो गृह्यते, लक्षणया तत्कार्यौ वा धर्माधर्मौ, न चैषां ब्रह्मणि संभवोऽस्ति–इति, तदप्यसत्; परिस्पन्दतत्कार्यधर्माधर्मलक्षणकर्मणो- रिहाप्रकृतत्वात्, तच्छब्देनानुपात्तत्वाञ्च, प्रकृतार्थान्वयायोग्यतवाञ्च कर्मशब्देन ग्रहणासिद्धेः, तस्य प्रकृतार्थान्वययोग्यार्थान्तरसंभवाञ्च, रूढयसंभवे योगस्याप्युपेतत्वात्। न च–योगार्थत्वेऽपि कर्मशब्देन पूर्वोपात्तपुरुषाणां निर्देश इति–वाच्यम्; ''एतेषां पुरुषाणां कर्ते'' त्यनेनैव तेषां निर्देशात् पौनरुक्त्यादतिस्थूलत्वाञ्च पुनस्तन्निर्देशकल्पनस्यायुक्तत्वात्। अपि च यदि पुरुषाणामत्र परामर्शः स्यात्, तदा ''यस्य वैतत् कर्मे'' त्येकवचनव्यक्तिरसङ्गता ननु; ''यस्य वैतत् कर्मे'' ति सर्वनाम्नो निर्दिश्यमानलिङ्गसङ्ख्यानुसारित्वात्। ननु–मा भूत् कर्मशब्देन पुरुषाणां कार्यभूतानामभिधानम्;

पौनरुक्त्यात् पुरुषविषयकृतेः तत्फलस्य वा तदुत्पत्तेस्तेनाभिधानं भविष्यति; तयोः पूर्वमनुपात्तत्वेनापूर्वत्वादिति-चेत्, न; कर्तारमभिदधता कर्तृशब्देनैव तयोरुपक्षेपात् पूर्वमनुपात्तत्वासिद्धेः। तस्मात् परिशेषात् प्रत्यक्षसंनिहितं जगदेव निर्विशेषितमेतदाऽभिधीयते; निर्विशेषितस्यैतदः प्रत्यक्षसंनिहितवस्तुमात्रवाचित्वात्। तच्च कार्यत्वात् कर्मेत्युच्यते। न च परमेश्वरादन्यस्य जगत् कार्यं भवतीत्यसकृदावेदितम्। तदिदमुक्तं सूत्रकृता-*जगद्वाचित्वात्*।। एतत्कर्मशब्दयोरिति शेषः। ननु-त्वदीयव्याख्यानेऽपि न पौनरुक्त्यात् निस्तारः ; "यस्य वैतत् कर्म" त्यनेनैव पुरुषाणामपि कर्तृत्वलाभात् "एतेषां पुरुषाणां कर्ते" ति वाक्यवैयर्थ्यादिति-चेत्, न; ब्राह्मणपरिव्राजकन्यायेन सामान्यविशेषाभ्यां जगत्कर्तृत्वव्यपदेशोपपत्तेः। तदेतद् दर्शयति स्म भाष्यकारः-*एतदुक्तं भवतीत्यादिना*।।१६।।

जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम्।।१७।। यदुक्तम्-वाक्यशेषे जीवमुख्यप्राणयोर्लिङ्गदर्शनाद् न परं ब्रह्मात्र वेदितव्यतयोपदिश्यते-इति, परिहृतमेतत्- "नोपासात्रैविध्यादाश्रितत्वादिह तद्योगादि" त्यत्र। शेषं भाष्ये। प्रतर्दनवाक्यनिर्णयेन गतार्थत्वमस्याधिकरणस्याशङ्क्याधिकविषयसत्वेनागतार्थत्वमाह-*नन्वित्यादिना*।।१७।।

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके।।१८।। व्याख्यानम्=प्रश्नस्य प्रतिवचनम्; प्रतिवचनस्य प्रश्नव्याख्यानरूपत्वात्; प्रश्नप्रतिवचनाभ्यामिति यावत्। शेषं भाष्ये। ननु-उक्तम्-प्राणशब्दोऽपि प्राणभृत्त्वात् जीवे वर्तिष्यते-इति, तथाच नानेन प्रतिवचनेन ब्रह्मसिद्धिः, इत्याशङ्क्य तत्रासंभवत्प्रतिवचनवाक्यशेषमुदाहरति-*एतस्मादात्मन इति*।। अपि च सर्ववेदान्तसिद्धोऽयमर्थः-यत् सुषुप्ते जीवस्य ब्रह्मैकत्वगमनमित्याह-*सुषुप्तकाले चेति*।। तत्र ब्रह्मभावापत्तावुपपत्तिमुपसहांरव्याजेनाह-*तस्मादिति*।। यत्र=परमात्मनीत्यर्थः। निस्सम्बोधः=विशेषविज्ञानाभाव इत्यर्थः। चिदेकरसस्यात्मनोऽन्तः करणाद्युपाधिजनितविशेषविज्ञानरूपत्वमस्वस्थता नाम, अतस्तदपायो भवति जीवस्य स्वस्थतेत्याह-*स्वस्थतारूप इति।। तदेव विशदीकृत्य दर्शयति-उपाधिजनितविशेषविज्ञानरहितं स्वरूपमिति*।।

"अपि चैवमेके" इति सूत्रावयवं व्याचष्टे-*अपि च एवमेके शाखिन इति*।। ननु-आकाशस्यैव शयनस्थानत्वं वाजसनेयिन आमनन्ति, न परमात्मनः-इति, नेत्याह- *आकाशशब्दश्च परमात्मनि प्रयुक्त इति*।। *प्राणनिराकरणस्यापीति*।।१८।। इति पञ्चमं बालाक्यधिकरणम्।।

इति वार्त्तिकम् बालाक्यधिकरणम् समाप्तम्

प्रदीपः

जगद्वाचित्वात्।।१६।। पूर्वाधिकरणेष्विव वाक्यशेषतः, पूर्वतनवाक्यतः समाकर्षाद्वा न कर्मपदार्थनिर्णयो भवतीति यथाश्रुतमेवार्थमादाय वाक्ययोजना कर्तव्या, इति नैतस्याधिकरणस्य विषयवाक्यं ब्रह्मपरं भवितुमर्हतीत्याक्षेपसङ्गतिः। कर्मपदार्थव्यवस्थापनद्वारा ब्रह्मणि गतिसामान्यावधारणात् पादसङ्गतिः।।

अत्रानुसन्धेयानि विषयवाक्यानि तु–कौषीतकिब्राह्मणचतुर्थाध्यायगतानि–''गार्ग्यो ह वै बालाकिरनूचानः संस्तब्ध आस सोऽयमुशीनरेषु संवसन् मत्स्येषु कुरुपाञ्चालेषु काशीविदेहेष्विति स हाजातशत्रुं काश्यमेत्योवाच ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः सहस्रं दद्मस्त एतस्यां वाचि जनको जनक इति वा जना धावन्तीति'' इत्युपक्रम्य ''स होवाच बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मतस्मिन् समवादयिष्ठा बृहन्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्धेति वा अहमुपासे'' इति बालाक्यजातशत्रुसंवादस्य पुन ''र्य एवैष चन्द्रमसि'' ''य एवैष विद्युति'' ''य एवैष स्तनयित्नौ'' ''य एवैंष आकाशे'' ''य एवैष वायौ'' ''य एवैषोऽग्नौ'' ''य एवैषोऽप्सु'' ''य एवैष आदर्शे'' ''य एवैष प्रतिश्रुत्कायाः'' ''य एवैष शब्दः'' ''य एवैषच्छायायाम्'' ''य एवैष शारीरः'' ''य एवैष प्राज्ञः'' ''य एवैष दक्षिणेऽक्षन् पुरुषः'' ''य एवैष सव्येऽक्षन् पुरुषः'' इति क्रमेणादित्यादिपुरुषस्य ब्रह्मत्वेऽभिहिते तन्निरासे चाजातशत्रुणा कृते ''तूष्णींभूते च बालाकौ एतावन्नु'' इत्यजातशत्रुणा पृष्टे ''एतावद्धी'' ति प्रत्युत्तरिते च बालाकिनाऽनन्तरमाम्नातानि वाक्यानीमानि–''तं होवाचाजातशत्रुर्मृषा वै किल मा संवदिष्ठा ब्रह्म ते ब्रवाणीति स होवाच यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत् कर्म स वेदितव्य इति तत उ ह बालाकिः समित्पाणिः प्रतिचक्रामोपायानीति तं होवाचाजातशत्रुः प्रतिलोमरूपमेव स्यात् यत् क्षत्रियो ब्राह्मणमुपनीयतैहि व्येव त्वा ज्ञापयिष्यामीति तं ह पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषमीयतुस्तं हाजातशत्रुरामन्त्रयाञ्चक्रे बृहत्पाण्डरवासः सोमराजन्निति स उ ह तूष्णीमेव शिश्ये तत उ हैनं यष्टया विचिक्षेप स तत एव समुत्तस्थौ तं होवाचाजातशत्रुः क्वैष एतद बालाके पुरुषोऽशयिष्ट

क्वैतदभूत् कुत एतदागादिति तदु ह बालाकिर्न विजज्ञौ। तं होवाचाजातशत्रुर्यत्रैष एतद् बालाके पुरुषोऽशयिष्ट यत्रतदभूद्यत एतदागात् हिता नाम नाडयो हृदयात् पुरीततमभिप्रतन्वन्ति यथा सहस्रधा केशो विपाटितस्तावदण्व्यः पिङ्गलस्याणिम्ना तिष्ठन्ते शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तथैनं वाक् सर्वैर्नामभिः सहाप्येति....मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुद्ध्यते यथाऽग्नेर्ज्वलतो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकास्तद्यथा क्षुरः क्षुरध्याने हितः स्यात् विश्वम्भरो वा विश्वम्भरकुलाय एवमेवैष प्राज्ञ आत्मेदं शरीरमनुप्रविष्ट आ नखाग्रेभ्यः। तमेतमात्मानमेतमात्मनोऽन्ववस्यति यथा श्रेष्ठिनं स्वास्तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा श्रेष्ठिनं स्वा भुञ्जन्त एवमेवैष प्राज्ञ आत्मेतैरात्मभिर्भुङ्क्ते। यथा श्रेष्ठिनं स्वाः'' इत्यादीनि।।

एतान्येव वाक्यानि सर्वाणि बृहदारण्यकद्वितीयाध्यायोऽप्याम्नायन्ते प्रायेण। केवलम्–''स होवाच बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत् कर्म स वै वेदितव्य'' इति वाक्यमात्रं तत्र नाम्नायते। अतोऽत्र मध्यपठितं तद् वाक्यं किं गोचरयतीति संशयः। संशयबीजं तु–''ब्रह्म ते ब्रवाणी'' त्युपक्रमः, कर्मशब्दश्च।।

कर्मशब्देन क्रिया परिस्पन्दलक्षणा यदि विवक्ष्यते, तर्हि मुख्यप्राणो वेदितव्यः ; तत्र ''अथास्मिन् प्राण एवैकधा भवती'' त्यादीनामन्वयसम्भवात्। स ह्यादित्यादीनां पुरुषाणां कर्ताऽपि भवति। ब्रह्मशब्दोऽपि तत्रान्यत्र प्रसिद्धः। न ह्यत्र निरस्येषु प्राणोऽप्याम्नायते, इत्येकः पक्षः।।

अपरस्तु–वाक्यशेषे श्रेष्ठिदृष्टान्तेत भोक्तृत्वाम्नानात्, आदित्यानां भोगोपकरणत्वेन तत्कर्तृत्वात् सुप्तत्व-यष्टिक्षेपाधीनोत्थानात्मकजागराद्यवस्थावत्त्वाञ्च जीव एवात्र वेदितव्य इति। यद्यपि–''य एवैष शारीरः पुरुषः'' ''य एवैष प्राज्ञ आत्मा येनैतत्सुप्तः स्वप्नमाचरती'' ति जीव एव प्रक्रान्तः, न ब्रह्म प्रकान्तमित्यजातशत्रुणा बालाकिवाग् निरस्ता; तथापि नैतन्निरसनं सुषुप्तपुरुषविषयम्, किन्तु जागरितस्वप्नावस्थजीवविषयम्। अत्र तु सुषुप्तो जीवो वेदितव्यतया मन्यते। अत एव–निरस्तोऽपि जीवः स्वप्नमाचरती'' ति प्रक्रियते ''न कञ्चन स्वप्नं पश्यती'' ति चाम्नायते, इति न विरोध इति पूर्वपक्षः।।

तमिमं विशंद प्रतिपादयति–*प्राण इतीत्यादिना–जीवो वाऽयमित्यादिना च*।। ननु–प्रतर्दनाधिकरणेन गतार्थमित्यत आह–*न परमेश्वरः ; तल्लिङ्गनवगमादिति*।। तत्र हि ब्रह्मलिङ्गमप्यस्तीति तेन लिङ्गान्तराणामन्यथानयनं कृतम्, न तु तथाऽत्र वर्तते; ''ब्रह्म ते ब्रवाणी'' ति तु बालाकिवचनम्, नाजातशत्रोरपि। न चान्यवाक्येनान्यस्य नियमनं युक्तम्; ''यो वै बालाक'' इति वाक्यं हि बालाकेरजातशत्रुसविधे ब्रह्मोपदेशार्थं प्रतिक्रमात् पूर्वमेव वर्तत इति ब्रह्मोपदेशप्रतिज्ञया

नेदं वाक्यमजातशत्रुणा प्रयुक्तम्। प्रतर्दनाधिकरणे तु–इन्द्रस्यैव सर्वाणि वचनानीत्यधिकाऽऽशङ्का-वारणेनेदमधिकरणं सार्थकमिति भावः। इयमत्र भामत्याः सिद्धान्तकारिका–

''मृषावादिनमापोद्य बालाकिं ब्रह्मवादिनम्।
राजा कथमसम्बन्धं मिथ्या वा वक्तुमर्हति॥''

इति। एतेन–उपक्रमपरामर्शोपसंहाराणां ब्रह्मविषयत्वाद् विना बालाकिप्रश्नं स्वयमजातशत्रुणा प्रयुक्तस्य वाक्यस्यापि ब्रह्मपरत्वमेव स्वीकर्तव्यम्, प्रश्नसत्त्वासत्त्वे अकिञ्चित्करे। अत एव भूम्नोऽपि ब्रह्मत्वमिति–प्रतिपाद्यते। तदिदं सर्वमभिप्रेत्याह– *उपक्रमसामर्थ्यादित्यादिना*॥ उपक्रमोपसंहारयोरैक्ये सम्भवति तत्परित्यागायोगाद् ब्रह्मैव प्रक्रान्तमादित्यादिपुरुषाणां कर्तृत्वेनोपदिश्यत इति वक्तव्यमित्यभिप्रायेणोक्तमर्थं विशदयति–*इह हीत्यादिना*॥ एतेषां पुरुषाणां कर्तृत्वं ब्रह्मलिङ्गमत्र वर्तत इत्याह–*कर्तृत्वं चेति*॥ ''यस्य वैतत् कर्म'' ति वाक्यशेषेणापि कर्मपदेन जगतो वर्णनाद् ब्रह्मलिङ्गमवगम्यत इत्याह–*यस्येत्यादिना*॥ एतत्पदवैयर्थ्यात कर्मपदेन न रूढ्यर्थग्रहणमित्याह–*पारिशेष्यादित्यादिना*॥ *एतच्छब्देनेति*॥ जगतः प्रकृतत्वमुपपादयति–*तथापीत्यादिना*॥ विशेषेण सामान्योपस्थापनादिति भावः॥

ननु–एवं सति ''य एतेषां पुरुषाणामि'' त्यंशवैयर्थ्यमित्यत उक्तं वाक्यद्वयं व्याचष्टे–*एतदुक्तं भवतीति*॥ विशेषोपादानप्रयोजनमाह–*ये बालाकिनेति*॥ तथाच बालाकिवाक्यार्थानां सर्वेषामनुवादपूर्वकं तदनुक्तस्यैवार्थस्य बोधनमत्र विवक्षितमिति सूचनं विशेषोपादानप्रयोजनमिति भावः। निगदमस्य भाष्यम्॥१६॥

जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम्॥१७॥ ननु–एवं सति प्रकृतेऽपि ब्रह्मलिङ्गमपि वर्तत इति प्रतर्दनाधिकरणेन गतार्थतेत्याशङ्क्य समाधत्ते–*नन्वेवं सतीति*॥१७॥

जीवलिङ्गानामन्यार्थत्वोपपादनार्थं सूत्रम्– *अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके इति*॥१८॥ प्रश्नव्याख्यानाभ्याम्=प्रश्नप्रतिवचनाभ्याम्। बृहदारण्यकद्वितीयाध्यायगतानां वाक्यानां ब्रह्मपरत्वं निर्धारितमिति तदेकवाक्यतानुपपत्त्याऽपि सर्वस्य प्रकरणस्य ब्रह्मपरत्वं स्वीकर्तव्यमिति भावः। अस्मिन् ब्राह्मणे–प्राण एवैकधेति वर्णितम्, तत्र तु आकाशे शेत इति। प्राणदस्य ब्रह्मपरत्वमेव युक्तमित्याह–*आकाशशब्दश्चेति*॥१८॥ इति पञ्चमं बालाक्यधिकरणम्॥

इति प्रदीपः बालाक्यधिकरणम् समाप्तम्

भामती

ननु ब्रह्म ते ब्रवाणीति ब्रह्माभिधानप्रकरणादुपसंहारे च सर्वान् पाप्मनोऽपहत्य सर्वेषाञ्च भूतानां श्रेष्ठयं स्वाराज्यं पर्य्येति य एवं वेदेति निरतिशयफलश्रवणाद् ब्रह्मवेदनादन्यस्य तदसम्भवात्। आदित्यचन्द्रादिगतपुरुषक्तृत्वस्य च यस्य वैतत्कर्मेति चास्यासत्यवच्छेदे सर्वनाम्ना प्रत्यक्षसिद्धस्य जगत: परामर्शेन जगत्कर्तृत्वस्य च ब्रह्मणोऽन्यत्रासम्भवात्कथं जीवमुख्यप्राणाशङ्का? उच्यते–ब्रह्म ते ब्रवाणीति बालाकिना गार्ग्येण ब्रह्माभिधानं प्रतिज्ञाय तत्तदादित्यादिगताब्रह्मपुरुषाभिधानेन न तावद् ब्रह्मोक्तम्। यस्य चाजातशत्रोर्यो वै बालाके एतेषां पुरुषाणां कर्त्ता यस्य वैतत् कर्मेति वाक्यं न तेन ब्रह्माभिधानं प्रतिज्ञातम्। न चान्यदीयेनोपक्रमेणान्यस्य वाक्यं शक्यं नियन्तुम्। तस्मादजातशत्रोर्वाक्यसन्दर्भपौर्वापर्यालोचनया योऽस्यार्थ: प्रतिभाति, स एव ग्राह्य:। अत्र च कर्मशब्दसतावद् व्यापारे निरूढवृत्ति: कार्येषु क्रियत इति व्युत्पत्त्या वर्त्तेत। न च रूढौ सत्यां व्युत्पत्तिर्युक्ताश्रयितुम्। न च ब्रह्मण उदासीनस्यापरिणामिनो व्यापारवत्ता। वाक्यशेषे चाथास्मिन् प्राण एवैकधा भवतीति श्रवणात्परिस्पन्दलक्षणस्य च कर्मणो यत्रोपपत्ति:, स एव वेदितव्यतयोपदिश्यते। आदित्यादिगतपुरुषकर्तृत्व च प्राणस्योपपद्यते हिरण्यगर्भरूपप्राणावस्थाविशेषत्वादादित्यादिदेवतानां क्तम एको देव: प्राण इति श्रुते:। उपक्रमानुरोधेन चोपसंहारे सर्वशब्द: सर्वान् पाप्मन इति च सर्वेषां भूतानामिति चापेक्षिकवृत्तिबहून् पाप्मनो बहूनां भूतानामित्येवं परो द्रष्टव्य:। एकस्मिन् वाक्ये उपक्रमानुरोधादुपसंहारो वर्णनीय:। यदि तु दृप्तबालाकिमब्रह्मणि ब्रह्माभिधायिनमपोह्याजातशत्रोर्वचनं ब्रह्मविषयमेवान्यथा तु तदुक्ताद्विशेषं विवक्षोरब्रह्माभिधानमसम्बद्धं स्यादिति मन्यते, तथापि नैवद् ब्रह्माभिधानं भवितुमर्हति, अपि तु जीवाभिधानमेव, यत्कारणं वेदितव्यतयोपन्यस्तस्य पुरुषाणां क्तुर्वेदनायोपेतं बालाकिं प्रति बुबोधयिषुरजातशत्रु: सुप्तं पुरुषमामन्त्र्यामन्त्रणशब्दाश्रवणात् प्राणादीनामभोक्तृत्वमस्वामित्वं प्रतिबोध्य यष्टिघातोत्थानात् प्राणादिव्यतिरिक्तं जीवं भोक्तारं स्वामिनं प्रतिबोधयति परस्तादपि तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा त्वा: श्रैष्ठिनं भुञ्जन्ति एमवेवैष प्रज्ञात्मैतैरात्मविभर्भुङ्क्ते एवमेते आत्मान एनमात्मानं भुञ्जन्तीति श्रवणात्। यथा श्रेष्ठी प्रधान: पुरुष: स्वैर्भृत्यै: करणभूतैर्विषयान् भुङ्क्ते यथा वा स्वा भृत्या: श्रेष्ठिनं भुञ्जन्ति, ते हि

श्रेष्ठिनमशनाच्छादनादिग्रहणेन भुञ्जन्ति, एवमेवैष प्रज्ञात्मा जीव एतैरादित्यादिगतैरात्मभिर्विषयान् भुङ्क्ते। ते ह्यादित्यादय आलोकदृष्टयादिना साचिव्यमाचरन्तो जीवात्मानं भोजयन्ति, जीवात्मानमपि यजमानं तदुत्सृष्टहविरादानादिनादित्यादयो भुञ्जन्ति, तस्माज्जीवात्मैव ब्रह्मणोऽभेदाद् ब्रह्मेह वेदितव्यतयोपदिश्यते। यस्य वैतत् कर्मेति जीवप्रयुक्तानां देहेन्द्रियादीनां कर्म जीवस्य भवति। कर्मजन्यत्वाद्वा धर्माधर्मयोः कर्मशब्दवाच्यत्वं रूढयनुसारात्। तौ च धर्माधर्मौ जीवस्य धर्माधर्माक्षिप्तत्वाच्चादित्यादीनां भौगोपकरणानां तेषु जीवस्य कर्तृत्वमुपपन्नम्। उपपन्नं च प्राणभृत्त्वातज्जीवस्य प्राणशब्दत्वम्। ये च प्रश्नप्रतिवचनं क्वेष एतत् बालाके पुरुषोऽशयिष्ट यदा सुप्तः स्वप्नं न कञ्चन पश्यतीति। अनयोरपि न स्पष्टं ब्रह्माभिधानमुपलभ्यते। जीवध्यतिरेकश्च प्राणात्मनो हिरण्यगर्भस्याप्युपपद्यते, तस्माज्जीवप्राणयोरन्यतर इह ग्राह्यी न परमेश्वर इति प्राप्तम्।

एवं प्राप्ते उच्वते–

मृषावादिनमापोंद्य बालाकिं ब्रह्मवादिनम्।
राजा कथमसम्बद्धं मिथ्या वा वक्तुमर्हति॥

यथा हि केनचिन्मणिलश्रणज्ञमानिना काचे मणिरेव वेदितव्य इत्युक्ते परस्य काचोऽयं मणिर्न, तल्लक्षणायोगादित्यभिधाय आत्मनो विशेषं जिज्ञापयिषोरतत्त्वाभिधानमसम्बद्धम्। अमणौ मण्यभिधानं न पूर्ववादिनो विशेषमापादयति स्वयमपि मृषाभिधानात्। तस्मादनेनोत्तरवादिना पूर्ववादिनो विशेषमापादयता मणितत्त्वमेव वक्तव्यम्। एवमजातशत्रुणा दृप्तबालाकेरब्रह्मवादिनो विशेषमात्मनो दर्शयता जीवप्राणाभिधाने असम्बद्धमुक्तं स्यात्। तयोर्वाऽब्रह्मणोर्ब्रह्माभिधाने मिथ्याभिहितं स्यात्। तथा च न कश्चिद्विशेषो बालाकेर्गार्ग्याददजातशत्रोर्भवेत्। तस्मादनेन ब्रह्मतत्त्वमभिधातव्यं तथा सत्यस्य न मिथ्यादद्यम्। तस्माद् ब्रह्म ते ब्रवाणीति ब्रह्मणोऽपक्रमात्सर्वान् पाप्मनोऽपहत्य सर्वेषाञ्च भूतानां श्रैष्ठयं स्वाराज्यं पर्य्येति य एवं वेदेति च सति सम्भवे सर्वश्रुतेरसङ्कोचान्निरतिशयेन फलेनोपसंहाराद् ब्रह्मवेदनादन्यतश्च तदनुपपत्तेरादित्यादिपुरुषर्त्तृत्वस्य च स्वातन्त्र्यलक्षणस्य मूख्यस्य ब्रह्मण एव सम्भवादन्येषां हिरण्यगर्भादीनां तत्पारतन्त्र्यात् क्वैष एतद्बालाके इत्यादेर्जीवाधिकरणभवनापादानप्रश्नस्य यदा सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति इत्यादेरुत्तरस्प च ब्रह्मण्वेवोपपत्तेर्ब्रह्मविषयत्वं निश्चीयते। अथ कस्मान्न भवतो हिरण्यगर्भगोचरे एव प्रश्नोत्तरे तथा च नैताभ्यां ब्रह्मविधयत्वसिद्धिरित्येतन्निराचिकीर्षुः पठति *एतस्मादात्मनः प्राणा यथायतनं प्रतिष्ठन्त इति*। एतदुक्तं भवति–आत्मैव जीव प्राणादीनामधिकरण नान्यदिति। यद्यपि च जीवो नात्मनो भिद्यते तथाप्युपाध्यवच्छिन्नस्य परमात्मनो

जीवत्वेनोपाधिभेदाद् भेदमारोप्यधाराधेयभावो द्रष्टव्यः। एवं च जीवभवनाघारत्वमपादानत्वं च परमात्मन उपपन्नम्। तदेवं बालाक्यजातशत्रुसंवादवाक्यसन्दर्भस्य ब्रह्मपरत्वे स्थिते यस्य वैतत्कर्मेति व्यापाराभिधाने न सङ्गच्छत इति कर्मशब्दः कार्याभिधायी भवति, एतदिति सर्वनामपरामृष्टं च तत्कार्यं, सर्वनाम चेदं सन्निहितपरामर्शि, न च किञ्चिदिह शब्दोक्तमस्ति सन्निहितम्। न चादित्यादिपुरुषाः सन्निहिता अपि परामर्शार्हा बहुत्वात् पुंल्लिङ्गत्वाच्च। एतदिति चैकस्य नपुंसकस्याभिधानादेतेषां पुरुषाणां कर्तेत्यनेनेव गतार्थत्वाच्च। तस्मादशब्दोक्तमपि प्रत्यक्षसिद्धं सम्बन्धार्हं जगदेव परामृष्टव्यम्।

एतदुक्तं भवति–अत्यल्पमिदमुच्यते एतेषामादित्यादिगतानां जगदेकदेशभूतानां कर्तेति, किन्तु कृत्स्नमेव जगद्यस्य कार्यमिति वाशब्देन सूच्यते। जीवप्राणशब्दौ च ब्रह्मपरौ जीवशब्दस्य ब्रह्मोपलक्षणपरत्वात् न पुनर्ब्रह्मशब्दो जीवोपलक्षणपरस्तथा सति हि बह्वसमञ्जसं स्यादित्युक्तम्। न चानधिगतार्थावबीधनस्वरसस्य शब्दस्याधिगतबोधनं युक्तम्। नाप्यनधिगतेनाधिगतोपलक्षणमुपपन्नम्। न च सम्भवत्येकवाक्यत्वे वाक्यभेदो न्याय्यः। वाक्यशेषानुरोधेन च जीवप्राणपरमात्मोपासनात्रय-विधाने वाक्यत्रयं भवेत्, पौर्वावर्य्यपर्य्यालोचनया तु ब्रह्मोपासनपरत्वे एकवाक्यतैव। तस्मान्न जीवप्राणपरत्वमपि तु ब्रह्मपरत्वयोचेति सिद्धम्। स्यादेतत्–निर्दिश्यन्तां पुरुषाः कार्यास्तद्विषया तु कृतिरनिर्दिष्टा तत्फलं वा कार्यस्योत्पत्तिस्ते यस्येदं कर्मेति निर्देक्ष्येते ततः कुतः पौनरुक्तयमित्यत आह *नापि पुरुषविषयस्य इति*। कर्तृशब्देनैव कर्तारमभिदधता तयोरुपात्तत्वादाक्षिप्तत्वान्नहि कृतिं विना कर्त्ता भवति नापि कृतिर्भावनापराभिधाना भूतिमुत्पत्तिं विनेत्यर्थः। ननु यदीदमा जगत्परामृष्टं ततस्तत्रान्तर्भूताः पुरुवा अपीति य एतेषां पुरुषाणामिति पुनरुक्तमत आह *एतदुक्तं भवति–य एषां पुरुषाणाम् इति*।।१६–१७।।

ननु प्राण एवैकधा भवतीत्यादिकादपि वाक्याज्जीवातिरिक्तः कुतः प्रतीयत इत्यतो वाक्यान्तरं पठति *एतस्मादात्मनः प्राणः इति*। अपि च सर्ववेदान्तसिद्धमेतदित्याह *सुषुप्तिकाले च इति*। वेदान्तप्रक्रियायामेवोपपत्तिमुपसंहारव्याजेनाह *तस्माद्यत्रास्य*। आत्मनो यतो निःसम्बोधोऽतः स्वच्छतारूपमिव रूपमस्येति स्वच्छतारूपो न तु स्वच्छतैव लयविक्षेवसंस्कारयोस्तत्र भावात् समुदाचरद्वृत्तिविक्षेपाभावमात्रेणोपमानम्। एतदेव विभजते *उपाधिभिः* अन्तः करणदिभिः। *जनितं* यद्विशेषविज्ञानं घटपटादिविज्ञानं तद्रहितं स्वरूपमात्मनः, यदि विज्ञानमित्येवोच्येत ततस्तदविशिष्टमनवच्छिन्नं सद्ब्रह्मैव स्यात्तच्च नित्यमिति नोपाधिजनितं नापि तद्रहितं स्वरूपं ब्रह्मस्वभावस्याग्रहाणात्। अत उक्तं *विशेषेति*। यदा तु लयलक्षणाविद्योपबृंहितो विक्षेपसंस्कारः समुदाचरति तदा विशेषविज्ञानोत्पादात् स्वप्नजागरावस्थातः परमात्मनो रूपाद् भ्रंशरूपमागमनमिति। न

केवलं कौषीतकिब्राह्मणे वाजसनेयेऽप्येवमेव प्रश्नोत्तरयोर्जीवव्यतिरिक्तमामनन्ति परमात्मानमित्याह *अपि चैवमेक इति*। नन्वत्राकाशः शयनस्थानं तत् कुतः परमात्मप्रत्यय इत्यत आह *आकाशशब्दश्च इति*। न तावन्मुख्यस्याकाशस्यात्माधारत्वसम्भवः। यदपि च द्वासप्ततिसहस्रहिताभिधाननाडीसञ्चारेण सुषुप्त्यवस्थायां पुरीतदवस्थानमुक्तं तदप्यन्तः करणस्य। तस्माद् दहरोऽस्मिन्नन्तराकाश इतिवदाकाशशब्दः परमात्मनि मन्तव्य इति। प्रथमं भाष्यकृता जीवनिराकरणाय सूत्रमिदमवतारितं तत्र मन्दधियां नेदं प्राणनिराकरणायेति बुद्धिर्मा भूदित्याशयवानाह *प्राणनिराकरणस्यापि इति*। तौ ह बालाक्यजातशत्रु सुप्तं पुरुषमाजग्मतुस्तमजातशत्रुर्नामभिरामन्त्रयाञ्चक्रे बृहत्पाण्डुरवासः सोमराजन्निति। स आमन्त्र्यमाणो नोत्तस्थौ। तं पाणिनापेषं बोधयाञ्चकार। स होत्तस्थौ स होवाचाजातशत्रुर्यत्रैष एतत् सुप्तोऽभूदित्यादि. सोऽयं सुप्तपुरुषोत्थापनेन प्राणादिव्यतिरिक्तोपदेश इति॥१८॥

इति भामती बालाक्यधिकरणम् समाप्तम।

श्री कण्ठभाष्य

अथ जगद्वाचित्वाधिकरणम्।।४।।

गतः सांख्यतत्त्वाशङ्काप्रसङ्गः। पुनरपि जीवात् परमेश्वरस्यान्यभावमुपपादयति

।।सू।। जगद्वाचित्वात्।।१६।।

श्रूयतेऽस्य विषयः कौषीतकिब्राह्मणोपनिषदि–'ब्रह्म ते ब्रवाणि' इत्युपक्रम्य 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य' इत्यादिकः।।

इह वेद्यत्वेन श्रुतः परमेश्वरो जीवो वेति संशयः।।

'य एवैष आदित्ये पुरुषस्तमेवाहमुपासे य एवैष चन्द्रमसि पुरुषो य एवैष विद्युति' इत्यादिपूर्ववाक्यसंदर्भे प्रकृतादित्यादिसकलपुरुषकर्तृत्वस्य जीवेऽपि विद्यमानत्वात्, कर्मशब्दस्यापूर्ववाचित्वात् अपूर्वस्य तदर्थत्वात् निर्धूतसकलकर्मसंबन्धे परमेश्वरे तदयोगात् जीव एवायमिति पूर्वः पक्षः।।

सिद्धान्तस्तु–कर्मशब्दस्य एतच्छब्दसामानाधिकरण्येन क्रियत इति व्युत्पत्त्या च जगद्वाचित्वात् जगत्कार्यवान् परमेश्वर एवात्र प्रतिपाद्यः। न हि जीवे सकलजगत्कर्तृत्वसंभवः।।

पुनराशङ्क्य परिहरति–

।।सू।। जीवमुख्यप्राणलिङ्गान्नेति चेत् तद्व्याख्यातम्।।१७।।

'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्राज्ञ आत्मा एतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मान एतमात्मानं भुञ्जन्ति' इति 'यदा सुप्तः स्वप्नं न कंचन पश्यति अथास्मिन् प्राण एवैकधा भवति' इति जीवमुख्यप्राणलिङ्गदर्शनान्नासौ परमेश्वर इति न वाच्यम्। पूर्वत्र प्रतर्दनविद्यायां व्याख्यातत्वात्। इहापि पूर्वापरपर्यालोचनया ब्रह्मपरत्वे स्थिते तदनुरूपतया अन्यानि लिङ्गानि

नेतव्यानि। पूर्वत्र हि उपक्रमे 'ब्रह्म ते ब्रवाणि' इति ब्रह्मोपक्षिप्तम्। मध्ये च 'यस्यवैतत्कर्म' इति सकलजगत्कर्तृत्वमुक्तम्। परत्र चोपसंहारे 'सर्वान् पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद' इति ब्रह्मोपासनैकान्तं सर्वपाप्मापहतिपूर्वकं स्वाराज्यफलमुक्तम्। एवमस्य प्रकरणस्य ब्रह्मपरत्वनिश्चये जीवमुख्यप्राणलिङ्गानि तत्परतयैव नेतव्यानि॥.

पक्षान्तरमुच्यते–

॥सू॥ अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके॥१८॥

'तौ ह सुप्तं पुरुषमाजग्मतुस्तं हाजातशत्रुरामन्त्रयांचक्रे बृहन् पाण्डरवासः सोमराजन्निति स ह तूष्णीमेव शिश्ये तदुहैनं यष्ट्या व्याचिक्षेप स तत एव समुत्तस्थौ' इत्यत्र प्राणनामभिरामन्त्रणेऽपि तदश्रवणेन ततः परं यष्टिघाते सत्युत्थानेन च प्राणाद्यतिरिक्तजीवसद्भावप्रतिपादनं तदतिरिक्तपरमेश्वरप्राज्ञोपासनार्थमिति 'क्वैष एतद्बालाके पुरुषोऽशयिष्टक वा एतदभूत् कुत एतदागात्' इति प्रश्नात्' यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवति' इति 'सता सोम्य तदा संपन्नो भवति' इत्यादिवाक्यान्तरसमानार्थात् तत्प्रतिवचनाञ्चावगम्यते। एके वाजसनेयिनः विस्पष्टमस्मिन् बालाक्यजातशत्रुसंवादे एतत्समानार्थमधीयते। तत्र हि 'यत्रैष एतत् सुप्तोऽभूद्य एष विज्ञानमयः पुरुषः क्वैष तदाऽभूत् कुत एतदागात्' इति प्रश्नः। 'यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदैषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते' इति प्रतिवचनम्। तस्मात् परमेश्वर एवायं सकलजगत्कर्तेति सिद्धम्॥

इति जगद्वाचित्वाधिकरणम्॥४॥

इति श्री कण्ठभाष्य बालाक्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

पेटिकासङ्गतिमाह—**गत इति**। अतीताधिकरणत्रये पूर्वपक्षतया शङ्काद्वयं प्रसक्तम्। 'महतः परमव्यक्तम्' 'अजामेकां' 'यस्मिन्पञ्चपञ्चजना' इति मन्त्राः तन्त्रसिद्धाव्यक्तादीनि प्रतिपादयन्तीत्येका शङ्का। तदनुबन्धिनी जीवादन्यः परमेश्वरो नाम नास्तीत्यपरा। आद्ये तावद्विषयवाक्ये प्रथमशङ्कोपयोगिनीं तान्त्रिकमहदव्यक्तपुरुषक्रमप्रत्यभिज्ञामुपन्यस्यतः पूर्वपक्षिणः 'पुरुषान्नापरं किञ्चि'दिति वाक्यं पञ्चविंशाज्जीवात्परस्य तत्वान्तरस्य निषेधकमिति स्पष्ट एव तत्र परमेश्वरप्रतिक्षेपः। द्वितीये विषयवाक्ये स्वतन्त्रप्रकृतिपरत्वशङ्का परमेश्वरप्रतिक्षेपपर्यन्ता। परमेश्वरसत्त्वे तदधीनत्वावश्यंभावेन स्वातन्त्र्यायोगात्। तृतीयेऽपि तथैव तत्र पूर्वपक्षे पञ्चविंशतेस्तत्वानां परमेश्वराधीनत्वात् परमेश्वरानङ्गीकाराञ्च खलु 'नानाभावादतिरेकाञ्चे'ति दूषणमुक्तम्। तत्राद्यशङ्काप्रसङ्गो निवृत्तः। इदानीमुत्तराधिकरणद्वयेन कयोश्चिद्विषयवाक्ययोर्मुक्तयंर्थ वेदितव्यतया मुक्तप्राप्यतया चोपदिश्यमानं ब्रह्म जीव इति पूर्वपक्षकरणेन पुनरपि जीवादन्यः परमेश्वरो नाम नास्तीति द्वितीयाशङ्कामुद्भाव्य जीवादन्यस्य परमेश्वरस्य सद्भाव उपपाद्यत इत्यर्थः। **अन्यभावमिति**। परमेश्वरविशेषणस्यान्यशब्दस्य सद्भाववाचिभावशब्दोपसर्जनत्वेन प्रयोगस्य 'शिवस्य भागवत'इति शिवविशेषणस्य भगवच्छब्दस्य भक्तिमत्पुरुषार्थकतद्धितोपसर्जनत्वेन प्रयोगस्येव साधुत्वं द्रष्टव्यम्। यद्वा। पूर्वपादान्त्याधिकरणे परमेश्वर एव नास्तीति शङ्का स जीवाभिन्न इति शङ्का चेति शङ्काद्वयं 'पत्यादिशब्देभ्यः' (ब्र० १-३-४४) 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति (ब्र० १-३-४३) सूत्रद्वयेन परमेश्वरे तस्य जीवाद्भेदे च साधकप्रदर्शनेन निराकृतं न तु तत्रोभयत्रापि बाधकं तत्र निराकृतमिति तन्निराकरणार्थमयं पाद आरब्धः। एतदेवास्य पादस्यास्पष्टब्रह्मलिङ्गत्वम्। परमेश्वरानङ्गीकारेण तस्य जीवाद्भेदानङ्गीकारेण च पूर्वपक्षाणां परमेश्वरप्रतिक्षेपपर्यन्तत्वं तत्र परमेश्वरसद्भावे 'पत्यादिशब्देभ्य' इत्यव्यवहितसूत्रप्रदर्शितसाधकबाधकत्वशङ्कास्पदानां 'महतः पर' 'मजामेकां' 'यस्मिन्पञ्चे' ति मन्त्राणां यथावदर्थवर्णनया तेषां निरीश्वरसाङ्ख्याभिमत-तत्वविषयत्वशङ्काप्रसङ्गोऽधिकरणत्रयेण निराकृतः। इदानीं तस्य जीवाद्भेदेऽव्यवहितसूत्रप्रदर्शित-साधके बाधकशङ्कास्पदस्य कौषीतकिब्राह्मणस्य यथावदर्थनिर्णयात् तस्य ततो भेद उपपाद्यत

इत्यवतारिकाग्रन्थस्यार्थः। तत्र पुनरपीत्युक्तेरयं भावः। एतदधिकरणविषयवाक्यगते 'यथा सुप्तः स्वप्नं न कञ्चन पश्यती' त्यादावसाधारणाधेयत्वलक्षणभेदव्यपदेशो भेद उपपादयिष्यते। 'अन्यार्थं तु जैमिनि' (ब्र० सू०) रिति सूत्रेण व्यपदेशेन पूर्वमपि भेद उपपादितः। 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति तस्य सूत्रस्य श्रुतिगतसर्वविधसौषुप्तिकभेदविषयत्वात्। तत्र 'ब्रह्म ते ब्रवाणी'त्युपक्रम्य 'यस्य वैतत्कर्म स वेदितव्य' इति कर्मसम्बन्धिनो जीवस्य वेदितव्यत्वोपदेशो जीवपरमेश्वरयोरभेद एवोपपद्यमानस्तयोर्भेदबाधकशङ्का तत्र निराकृतेति तन्निराकरणपूर्वकं तेनात्र भेदोपपादनमिति। एवं चेयमवतारिका एतदधिकरणमात्रविषया। न तु पूर्वव्याख्यान इवोत्तराधिकरणविषयापि। उत्तराधिकरणविषयवाक्यस्य सुषुप्त्युत्क्रान्तिसूत्रविषय त्वाभावेन तस्य 'पुनरपी' त्यस्यानन्वयात्। अत एव तत्र पृथगवतारिका करिष्यते। तस्मिन्पक्षेऽन्यभावोऽन्यत्वं भेद इति यावत्। एवं च पूर्वव्याख्याने मा भूत् प्रागुदाहरणविषयवाक्येषु द्वितीयाशङ्कावकाशः, इह तु स्यादिति पूर्वाधिकरणत्रयेण उत्तराधिकरणद्वयस्य प्रत्युदाहरणसङ्गतिः। द्वितीयव्याख्याने तु पूर्वाधिकरणत्रयस्य पत्यादिसूत्रेण उत्तराधिकरणद्वयस्य सुषुप्त्युत्क्रान्तिसूत्रेणाक्षेपिकी सङ्गतिः। पूर्वाधिकरणसङ्गतिस्तु पत्यादिसूत्राक्षेप-समाधानानन्तरं सन्निहित सुषुप्त्युत्क्रान्तिसूत्राक्षेपसमाधानमित्यवसरसंगतिलक्षणेति द्रष्टव्यम्।।सू।।

जगद्वाचित्वात्।।१६।। अत्रेयं विषयशुद्धिः। अजातशत्रुर्नाम काशिराजः स्वसमीपमागत्य 'ब्रह्म ते ब्रवाणी'त्युक्तवन्तं बालाकिं गार्ग्यं 'सहस्त्रं दद्म एतस्यां वाचि जनको जनक इति जना धावन्ती'ति प्रशस्य बालाकिना 'य एवैष आदित्ये पुरुषस्तमेवाहमुपास' इत्यादिभिर्वाक्यैर्ब्रह्मत्वेनोपदिष्टा-नादित्यचन्द्रविद्युत्स्तनयित्न्वादिगतान्पुरुषानब्रह्मत्वेन तदुक्तयनन्तरमेव प्रत्याख्याय ततस्तूष्णींभूते तस्मिन् 'किमेतावदेव तव ज्ञान'मिति पृष्ट्वा तेनैतावदेवेत्यभिहिते 'मृषा वै किल मा समावादयिष्ठाः ब्रह्म ते ब्रवाणी' त्युक्तया तमपोद्य 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वेदितव्य'इति स्वयमुपदिदेश। अत्र यो वेदितव्य उपदिष्टः उपसंहारे च 'स पूर्वानात्मनोऽपहत्य स पूर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेदे'ति यद्वेदनस्य फलं वर्णितं स जीवः परमेश्वरो वेति कर्मशब्दरूढियोगाभ्यां संशयमाह-**इहेति।** नन्वेतेषां पुरुषाणां कर्तेति श्रुतं प्रकृत्यादित्यमण्डलादिगतपुरुपकर्तृत्वं जीवे न सम्भवतीति कथं पूर्वपक्ष इत्याशङ्क्य तत्र तत्सम्भावयति-**य एवेति।** अयमाशयः। आदित्यादिपुरुषास्तावदालोकदानादिना जीवस्योपकारकाः। 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष प्राज्ञ आत्मा एतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मानः एतमात्मानं भुञ्जन्ती'ति वाक्यशेषे यथा प्रधानपुरूषः स्वकीयैर्भृत्यादिभिर्भोगसाध-नान्युपहरद्भिः हेतुभिर्भोगान्भुङ्क्ते यथा च ते भोगसाधनान्युपहरन्तः प्रधानपुरुषं पालयन्ति तथा वेदितव्यत्वेनोपदिष्टः आत्मा प्रकृतैरादित्यादिपुरुषैर्भुङ्क्ते ते च तं पालयन्तीत्युक्तत्वात्। एवं च ये यस्य

भोगोपकरणभूतास्ते तददृष्टजन्या इति आदित्यादिपुरुषोत्पत्त्यनुकूलादृष्टहेतुकृतिमान् जीवः कथं तेषां कर्तेति व्यपदेशं न लभेत। कार्यानुकूलकृतिमत्त्वं हि कर्तृत्वम्। न च कृतावदृष्टाद्वारकत्वं विशेषणम्। गौरवात्। न च तदुपादानगोचरापरोक्षज्ञानादिमत एव तत्कर्तृत्वमिति नियमः। तदभावेऽपि 'चैत्रशब्दं करोती' त्यादिव्यवहारदर्शनादिति। ननु, सकलपुरुषकर्तृत्वं जीवेऽपि सम्भवतु नाम, तथापि जीवगतं तद्ग्राह्यं न परमेश्वरगतमित्यत्र किं नियामकमित्याशङ्क्य मूलयुक्तिमाह–**कर्मशब्दस्येति।** स्यादेतत्। कर्मशब्दस्यापूर्वे यथा रूढिरस्ति तथा क्रियत इति व्युत्पत्त्या कार्यमात्रे योगोऽप्यस्ति। न च रूढिप्राबल्याद्योगो न ग्राह्य इति शङ्कनीयम्। कर्मशब्दस्य चलनेऽपि रूढिसत्त्वेन चलनापूर्वरूढ्योर्विनिगमनाविरहात्परस्परकलहायमानयोर्लब्धोन्मेषस्य योगस्येह प्रबलत्वात्। तथा च 'यस्य वैतत्कर्मे' त्यस्य प्रत्यक्षादिसन्निधापितं सकलं लगद्यस्य कार्यमित्यर्थः पर्यवस्यतीति ब्रह्मलिङ्गसमर्पकमिदं कर्मपदमित्याशङ्क्याह-**अपूर्वस्येति।** आदित्यादिपुरुषकर्तृत्वं वेदितव्यपुरुषस्य कीदृशं विवक्षितमित्याशङ्कायामपूर्वद्वारकं विवक्षितमित्याकाङ्क्षितार्थनिरूपणार्थतया कर्मशब्दस्यापूर्व-रूढिरिहोपयुज्यते। स्वतस्तदाकाङ्क्षाविरहेऽप्यपूर्वद्वारकमिह कर्तृत्वं विवक्षितमिति ज्ञापनार्थतया वा सोपयुज्यते न तु चलनरूढिः। जीवस्याणुत्वेन चलत्वं सम्भवदपि तत्प्रतिपादनस्य प्रकृतोपयोगित्वा-भावात् तदुपयोग्यर्थग्रहणे सम्भवत्यनर्थपरत्वकल्पनायोगात् जीवस्य चलनवत्त्वोपदेशेन कस्यचिद-प्यतिशयस्यालाभाञ्च। तथाच विनिगमनासिद्धेः कार्यसामान्ययोगादपूर्वरूढेः प्रबलत्वात् 'यस्य वैत'दिति वाक्यस्य सकलजगद्यस्य कार्यमित्यर्थकल्पने 'यो वै बालाक एतेषां पुरुषाणां कर्ते'ति पृथङ्निर्देशवैयर्थ्यप्रसङ्गेन योगपरिग्रहस्यायुक्तत्वात् कर्मशब्दस्यापूर्वार्थत्वेन व्यवस्थितजीव-लिङ्गसमर्पकमेव कर्मपदं स्यादित्यभिप्रायः। ननु, तस्यापूर्वार्थत्वाङ्गीकारेऽपि नेष्टसिद्धिः। अपूर्वस्यापि पापपुण्यात्मकस्य परमेश्वरक्रोधप्रसादतया जीवधर्मत्वाभावादित्याशङ्कायाम 'पूर्वस्य तदर्थत्वा' दित्येतदेव उत्तरम्। पूर्वस्मिन्पक्षे अपूर्वस्याहूतादित्यादिपुरुषकर्त्रर्थत्वेनोक्तत्वादित्यर्थः। अस्मिन्पक्षे जीवार्थत्वात्तद्गतसुखदुःखभोगार्थत्वादित्यर्थः। अत्रायमभिप्रायः। यद्यप्यपूर्वं तत्स्वरूपपर्यालोचनायां परमेश्वरगतं, तथापि तदपूर्वहेतुकर्मानुष्ठातृजीवार्थं भवति एवं तदर्थसम्बन्धेनैव च पुण्यपापरूपस्य तस्य चैत्रीयत्वादिव्यवहारः 'अस्य पुण्यमस्य पाप'मिति। तेनैव च सम्बन्धेन चैत्रादीनां तद्वत्त्वव्यवहारः 'पुण्यवानयं पापवानय'मिति। न त्वाश्रयाश्रयिभावेन। यथा गोधनादीनां चैत्रीयत्वादिव्यवहारः। चैत्रादीनां गोधनादिमत्त्वव्यवहारश्च स्वस्वामिभावसम्बन्धेनैव। 'अस्य गावोऽस्य धनं' 'गोमान् धनवानि'ति। तस्मा'द्यस्य वैतत्कर्मे'ति व्यपदेशो जीव एवोपपद्यते। ननु, परमेश्वरेऽप्युपपद्यते। परमेश्वरे पुराणादिषु तपश्चर्यादेः प्रसिद्धतया तज्जन्यापूर्वाङ्गीकारसम्भवात्। न च तस्य वैयर्थ्यम्। 'भोगमात्रसाम्यलिङ्गाच्चे'ति (ब्र०) सूत्रे परमेश्वरस्यापि भोगोऽस्तीत्यङ्गीकृतत्वेन तदर्थत्वोपपत्तेः। तद्भोगस्य सङ्कल्पमात्रोपनेयत्वेऽपि सङ्कल्पोपनेयसकलभोगानां राज्ञां स्वहस्तेन

पुष्पिकैकादिकं निर्माय तदुपभोगवत् लीलया तपश्चर्याद्यपूर्वं तत्सम्पाद्य तत्फलभोग इति परमेश्वरतपश्चर्यादिवचनानुसारेण कल्पनोपपत्तेः अपूर्वजनककर्मानुष्ठानाय तत्तज्जीवशरीरेन्द्रियाणां तेन तेन जीवेनेव परमेश्वरेणापि प्रेर्यत्वेनापूर्वस्य तत्तज्जीवभोगार्थत्ववत् परमेश्वरभोगार्थ-त्वस्याप्यङ्गीकारोपपत्तेश्चेत्याशङ्क्याह **निर्धूतेति**। सर्वथा निर्धूतसकलकर्मबन्ध एव परमेश्वरः। 'न कर्मणा वर्धते नो कनीया'निति श्रुतेः। अवतारविशेषैस्तस्य तपश्चर्यादिकं तत्र कर्मणि प्रवर्तनेन लोकानुग्रहार्थमिति पुराणादिष्वेव प्रसिद्धम्। कर्मानुष्ठानायतत्ततत्तज्जीव- शरीरेन्द्रियप्रवृत्तीनां यद्यपि तस्य तस्य जीवस्येव परमेश्वरस्यापि शरीरेन्द्रियप्रवृत्तीनां प्रेरकत्वं भवत्येव। तस्य सर्वशरीरकत्वात् सर्वस्वामित्वाञ्च। तथापि जीव इव ममेदं कर्म फलाय भूयादित्यभिसन्धाय तन्न करोति। अवाप्तसमस्तकामत्वात्। किं तु तस्य तस्य जीवस्य फलाय भूयादित्यभिसन्धायेति तत्तदपूर्वस्य न जीवार्थत्ववत् परमेश्वरार्थत्वमपि प्रसज्यत इति भावः। स्यादेतत्। कर्मशब्दस्यापूर्व इवि तत्साधनेष्वप्यस्ति प्रयोगः 'अयं सत्कर्माण्यनुतिष्ठति अयं निन्दितकर्माण्यभ्यस्यती'ति। एवं चेह कर्मशब्दः सत्कर्मपरः। यस्येति षष्ठ्याराध्याराधकसम्बन्धविषयेति परमेश्वरेऽपि 'यस्य वैत'दिति वाक्यं सुयोजम्। कर्मशब्दस्य सत्कर्मणि सङ्कुचिततायास्तवाप्यभिमतत्वात्। अवश्यं च वेदितव्यत्वोपदेशः परमेश्वर एव योजनीयः। 'ब्रह्म ते ब्रवाणी'त्युपक्रमानुरोधादित्याशङ्कामवधारणेन व्यावर्तयन् पूर्वपक्षमुपसंहरति-**जीव एवायमिति**। अयमाशयः। आदित्यादिपुरुषान् वाक्यशेषोपदिष्ट-योगोपनायकतया परिपालकत्वेन वक्ष्यमाणान् प्रति श्रुतकर्तृत्वभावः सत्कर्मणि सङ्कोचस्समूलोऽस्मत्पक्षे। त्वत्पक्षे तु अमूलः। तस्माद्वाक्यशेषसमर्पितजीवलिङ्गानुरोधाञ्च मुक्तयंर्थ वेदितव्यत्वेनोपदिष्टः पुरुषः जीव एवेति ततोऽन्यः परमेश्वरनामा मुक्तयंर्थ वेदितव्यो नास्ति। तत्सत्त्वे तस्यैव वेदितव्यतयोपदेशप्रसङ्गात्। ब्रह्मोपक्रमस्तु नानुरोद्धव्यः। येन हि बालाकिना 'ब्रह्म ते ब्रवाणी'ति प्रतिज्ञातं न तेन ब्रह्मोक्तम्। अन्यदन्यदेव हि **तेनोक्तम्**। येनाजातशत्रुणा वेदितव्यः पुरुष उपदिष्टः न तेन ब्रह्माभिधानं प्रतिज्ञातम्। किमर्थं तर्हि 'ब्रह्म ते ब्रवाणी'ति बालाकिवचनं शशशृङ्गं प्रदर्शयामीति वचनवन्निरर्थकमुपन्यस्तमुपक्रमे। असद्वादवत् पूर्वपक्ष इति तन्निराकरणार्थम्। तद्वदस्य निराकरणं न दृश्यत इति चेत् दृश्यत एव वाक्यच्छाया। 'ब्रह्म ते ब्रवाणी'ति प्रतिज्ञातवता बालाकिनोपदिष्टान्पुरुषान् तत्तत्स्वरूपप्रदर्शनेनाब्रह्मतया निराकृत्य ततः परं ब्रह्मत्वेन वक्तव्यस्याभावात्तूष्णीं भूते तस्मिन् कर्मसम्बन्धिनमेव पुरुषं मोक्षाय वेदितव्यतयोपन्यस्यन् अजातशत्रुस्तदतिरेकेण मुमुक्षुभिर्ज्ञातव्यं ब्रह्म नाम किञ्चिन्नास्तीति मन्यत इत्येव हि स्पष्टतरं प्रतीयते। यथा 'रसवादिनं ब्रवाणी'ति प्रतिज्ञातवतोदाहृतान्पुरुषान् विप्रलम्भकत्वादितत्तद्दृष्टान्त-प्रख्यापनेन प्रत्याख्याय ततः परमुदाहरणीयपुरुषाभावात्तूष्णीं भूते तस्मिन् राजानमेव धनार्थिभिरुप

सर्पणीयमुपन्यस्यन् उत्तरवादी रसवादी नाम कोऽपि नास्तीत्येव मन्यत इति प्रतीयते। यदि हि वेदितव्यपुरुषोपदेशो ब्रह्मवदश्रोष्यत तदानीमादित्यादिपुरुषाः ब्रह्माणि न भवन्ति। किं तु 'एषां कर्ता पुरुषो ब्रह्मे' ति बालाकिवचनगतोपक्रमानुसारेण राजवचनात्प्रथमावतारानुसारेण पूर्वपक्षात् द्वितीयावतारिकानुसारेण ब्रह्मोपक्रमो जीवस्य वेति तस्य तत्त्वोपदेशेन जीवपरमेश्वरयोरभेदावसायाञ्चरमश्रुतसौषुप्तिकभेदव्यपदेश औपाधिकभेदविषयः पर्यवस्यन् अतात्विकभेदे प्रमाणमिति पूर्वोक्त इति पूर्वपक्षे प्राप्ते सिद्धान्तयति–**कर्मशब्दस्येति।** 'यस्य वैतत्कर्मे' त्यत्रैतच्छब्दस्तावत्प्रत्यक्षादिसन्निधापितसकलजगद्वाची। न ह्यत्र किञ्चित्तेन परामर्ष्टुं योग्यम् आदित्यादिपुरुषकर्तृत्वसम्बन्धप्रतिपादनापेक्षं प्रकृतम्। अस्ति चे 'दथ यदतः परो दिवो ज्योति' रित्यत्र यच्छब्दवत् प्रकृते व्यवस्थित एतच्छब्दः स्वसमानाधिकरणं कर्मपदमपि तत्परं नयेत्। पूर्ववाक्योक्तमादित्यादिपुरुषकर्तृत्वं प्रति द्वारतया निर्वाहकत्वेनापूर्वं बुद्धिस्थमिति चेत्। न। जगदेकदेशभूतादित्यादिकीर्तनेन तदेकदेशि जगत् बुद्धिस्थमित्यपि वक्तुं शक्यत्वात्। उभयोर्बुद्धिस्थत्वसम्भवे चैतत्पदस्यासङ्कुचितजगत्परामर्शकल्पनस्यैव युक्तत्वात् नापूर्वपरत्वकल्पनमादित्यादिपुरुषकर्तृत्वोपपादकतया। जगत्परामर्शस्यापि प्रकृतोपयोगित्वात्। तस्मादेतत्पदमसङ्कोचनेन प्रत्यक्षादिसन्निधापितसकलजगद्वाचीति तत्समानाधिकरणं कर्मपदमपि तद्वाचीत्येवाभ्युपगन्तव्यम्। किं च कर्मपदं क्रियत इति व्युत्पत्त्या यौगिकत्वादपि सकलजगद्वाचि न त्वपूर्वमात्रवाचि। अन्यत्रापि योगस्याविशेषात् क्वचित्सङ्कोचकल्पनायोगात्। न च वाच्यं रूढिप्राबल्यादपूर्वमात्रपरं कर्मपदं, तत्समानाधिकरणमेतत्पदमपि तत्समानविषयमेव, सर्वनाम्नां प्रकृतपरामर्शित्वेनेव प्रकरिष्यमाणपरामर्शित्वेनापि सङ्कुचितवृत्तित्वस्या 'थैष ज्योति' रित्यादौदृष्टत्वादिति। सर्वसाधारणयोगेनैवापूर्वेऽपि वृत्तिसम्भवे तस्यासाधारण्येन तत्र रूढिकल्पनायोगात्। 'वर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः' इति बर्हिराज्याधिकरणे हि बर्हिश्शब्दस्य लवनादिसंस्कृतेषु दर्भेष्वाज्यशब्दस्य उत्पवनादिसंस्कृते घृते च सार्वभौमशिष्टप्रयोगे सत्यपि क्वाचित्कं तयोः दर्भघृतजातिमात्रे प्रयोगमवलम्ब्य तेनैव संस्कृतप्रयोगनिर्वाहात् तयोस्संस्काररूपप्रवृत्तिनिमित्तान्तरं न कल्पनीयमित्युक्तम्। 'एकदेशेऽपि यो दृष्टः शब्दो जातिनिबन्धनः। तदत्यागात्र तस्यास्ति निमित्तान्तरकल्पने 'ति। इह कर्मशब्दस्य योगनिमित्तः कार्यमात्रे प्रयोगोऽपि सार्वभौमः शिष्टसम्मत इति तेनैवापूर्वेऽपि प्रयोगे निर्वहति कस्तत्र विशिष्य शक्तिकल्पनावकाशः। यद्यपि 'बर्हिर्लुनाति' 'आज्यमुत्पुनाती' त्यादिविधिषु बर्हिराज्यशब्दयोर्दर्भघृतवाचित्वमवश्यमाश्रयणीयम्। संस्कृतवाचित्वे लवनोत्पवनादिसंस्कारविधौ सति तत्संस्कृतेषु बर्हिराज्यप्रवृत्तिस्तत्प्रवृत्तौ च सत्यां बर्हिराज्योद्देशेन लवनाद्युत्पवनादिसंस्कारविधिरिति अन्योन्याश्रयप्रसङ्गात्। न च यथा च 'यूपं छिनत्ती' त्यादिवाक्येषु छेदनादिसंस्कारस्यैव यूपशब्दार्थतया यूपोद्देशेन

छेदनादिविध्यसम्भवेऽपि छेदनादिभिर्यूपं कुर्यादिति विधिराश्रितः, तथात्रापि लवनादिभिर्बर्हिः कुर्यादुत्पवनादिभिराज्यं कुर्यादिति विधिराश्रयितुं शक्यः। तत्र 'पालाशे पशुं बन्धाति' 'पालाशो यूपो भवती'त्यादिवाक्यान्तरलब्धं पालाशादिकं यूपं कुर्यादित्यर्थवर्णनवदिह दर्भान् लवनादिभिर्बर्हिः कुर्यात् घृतमुत्पवनादिभिराज्यं कुर्यादित्यर्थवर्णनासम्भवात्। तत्र पालाशादीनामिवात्र दर्भाणां घृतस्य च प्राकरणिकवाक्यान्तरैरसमर्पितत्वात् इत्यादिका यद्यपि युक्तिरस्ति बर्हिराज्याधिकरणे। तथापि सामान्यशक्तयापि विशेषप्रयोगर्वाहे विशेषेऽपि पृथक्शक्तिर्न कल्पनीयेत्येषापि युक्तिरविशिष्टैव। न हि पार्थशब्दः सामान्यशक्तया पाण्डवेष्विव विशिष्यार्जुनेऽपि कविभिः प्रयुज्यते, कार्यशब्दः सामान्यशक्तया सर्वेषु कार्येष्विव विशिष्य लिङर्थेऽपि प्राभाकरैः प्रयुज्यते, द्रव्यशब्दः सामान्यशक्तया पृथिव्यादिषु सर्वेष्विव विशिष्य धनेऽपि लौकिकैः प्रयुज्यते इति पार्थादिशब्दानामर्जुनादिषु विशिष्यापि शक्तिराश्रयणीया। अस्तु वा कर्मशब्दस्य विशिष्यापूर्वे रूढिः। तथाप्यत्र क्रियत इति कर्मेति योग एवाश्रयणीयः। 'एतेषां पुरुषाणां कर्ते' ति प्रकृतं कर्तारं यस्येति परामृश्य तत्सम्बन्धिनः कर्मशब्देन निर्देशात्। न हि 'कर्तृकर्मभावः' 'कर्तृकर्मव्यपदेश' इत्यादिप्रयोगेषु कर्तृशब्दसमभिव्याहृतेऽपि कर्मशब्दे रूढ्युन्मेषोऽस्ति। अपि चात्र कर्मशब्दस्यापूर्वरूढ्यङ्गीकारे 'यस्य कर्म स वेदितव्य'इत्येतावदेव वक्तव्यं स्यात्। एतच्छब्दो वाशब्दश्चेत्युभयमनर्थकं स्यात्। योगाङ्गीकारे तु सार्थकं भवति। तदा हि वेदितव्यपुरुषस्य प्रागुक्तादित्यादिपुरुषकर्तृत्वदृढीकरणाय सकलजगत्कर्तृत्वपरं 'यस्य वैतत्कर्मे'ति वाक्यमिति तदैतच्छब्दः प्रत्यक्षादिसन्निधापित-सकलजगदुपस्थापको वाशब्दः एकदेशावच्छिन्नकर्तृत्वव्यावृत्यर्थं च भवति। तस्मात्पदद्वयसार्थक-त्वायैकस्य पदस्य रूढित्याग एव युक्तः। योगपक्षे 'यो वै बालाक एतेषां पुरुषाणां कर्ते' ति वाक्यमेव व्यर्थं स्यात्। ततो वरं पदद्वयवैयर्थ्यमिति चेन्न। बालाकिना ब्रह्मत्वेन कीर्तितानां पुरुषाणामब्रह्मत्वख्यापनेन तस्य सप्रयोजनत्वात्। अपि च 'यो वै बालक' इत्यादिवाक्यद्वयमपि यच्छब्दोपबन्धादनुवादरूपं विज्ञायते। तत्र ब्रह्मपरत्वेन श्रुत्यन्तरेषु बुद्धिस्थानि 'चक्षोः सूर्यो अजायत, चन्द्रमा मनसो जातः' 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्'इत्यादीनि प्रथमवाक्यस्य पुरोवादकानि। 'छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वर'मिति यद्यद्भूतं भविष्यद्वर्तमानरूपं कार्यं वेदवाक्यान्तरैरेवावगम्यते तत्सर्वमनितरसाधारणमहेश्वरशब्दवाच्येन परमेश्वरेण सृज्यमिति प्रतिपादयत् श्वेताश्वतरवाक्यद्वयमस्य पुरोवादः। पुरोवादानुसारेणापि कर्मशब्दस्य क्रियत इति योगेन जगद्वाचित्वं युक्तम्। एवं चासङ्कुचितसकलजगत्कर्तृत्वस्य जीवानां मध्ये क्वचिदप्यसम्भवात् परमेश्वर एवात्र प्रतिपाद्यत इति सिद्धम्। तन्निष्कर्ष एव वाक्यशेषे जीवलिङ्गं दृश्यत इत्याशङ्कानिराकरणार्थत्वेनोत्तरसूत्रमवतारयति–**पुनरिति**।।सू।। **जीवमुख्यप्राणलिङ्गान्नेति**

चेत्तव्द्याख्यातम्।।१७।। **'एतैरात्मभिर्शुङ्क्ते' इति।** वाक्यशेषे श्रेष्ठिदृष्टान्तोपपादितमादित्यादि-पुरुषहेतुकभोक्तृत्वमेकं जीवलिङ्गम्। 'अथास्मिन्प्राण एवैकधा भवती'ति वाक्यशेषे सप्तम्यन्तनिर्दिष्टे वेदितव्यपुरुषाश्रयत्वेनोक्तः प्राणोऽन्यज्जीवलिङ्गम्। अनयोराद्यं मुख्यम्। तद्धि निर्विचिकित्सं जीवासाधारणम्। द्वितीयं त्वमुख्यम्। यतः प्राणस्य ब्रह्माश्रितत्वमपि 'यस्मिन्द्यौः पृथिवी चान्तरिक्षं' 'पञ्चपञ्चजना' इति मन्त्रयोः प्रतिपन्नम्। ततश्चोपकरणोपकरणिभावसम्बन्धेनाश्रितः प्राणः जीवलिङ्गमिति तावत्पर्यन्तविवक्षा त्वत्र भोक्तृत्वरूपस्फुटतरजीवलिङ्गसमभिव्याहारेण निगमयितव्येति परमुखनिरीक्षणवत्त्वात् द्वितीयलिङ्गस्यामुख्यत्वम्। एवं च 'जीवमुख्यप्राणलिङ्गान्नेति चे'दिति सूत्रांशस्य भोक्तृत्वरूपान्मुख्यजीवलिङ्गात् प्राणरूपादुपपादनीयादमुख्यजीवलिङ्गाच्च जीव एवात्र प्रतिपाद्यो वाच्य इति न परमेश्वरः प्रतिपाद्य इत्यर्थमभिप्रेत्य तत्परतया व्याचष्टे-**एतैरिति।** जीवलिङ्गान्मुख्यप्राणलिङ्गाच्च परमेश्वरो न प्रतिपाद्य इति सूत्रार्थमभिप्रेत्यैतद्भाष्यं प्रवृत्तमिति तु न व्याख्येयम्। यतः 'प्राण एवैकधा भवती'ति प्राणविषयिणी श्रुतिरिहोपन्यस्ता न तु तल्लिङ्गं किञ्चित्। तथा यदि वेदितव्यः पुरुषः जीवो मुख्यप्राणो वेति पूर्वपक्षद्वयमिहानुचितं भवेत्। तत् 'वेद्यत्वेन श्रुतः पुरुषः परमेश्वरो जीवो वे'ति द्विकोटिकसंशयप्रदर्शकभाष्यविरुद्धम्। अपि च विषयवाक्ये प्राणपूर्वपक्षस्य नास्त्यवकाशः। तत्र ह्यजातशत्रुणा वेदितव्यतयोपदिष्टस्यादित्यादि-पुरुषाणां कर्तुर्वेदनायोद्युक्तं बालाकिं प्रतिबुबोधयिषुरजातशत्रुः सुप्तं पुरुषं प्राणनामभिरामन्त्र्य सुषुप्तिकाले सव्यापारस्यापि प्राणस्य भोक्तृत्वं प्रतिषिध्य यष्टिघातेनोत्थापनात् तव्द्यतिरिक्तं जीवं भोक्तारं प्रत्यबोधयदिति श्रूयते। तेन प्राणव्यतिरिक्तो यष्टिघातेनोत्थापितो जीवोऽत्र वेदितव्यपुरुषत्वेन प्रागुपदिष्ट इति सूचने श्रुत्यभिप्रायमवलम्ब्य जीवपूर्वपक्ष एक एव सम्भवतीति यथोक्त एव भाष्यार्थः। एवं च यद्यपि भोक्तृवत् प्राणवच्च यष्टिघातोत्थानमपि जीवलिङ्गं 'जीवमुख्यप्राणलिङ्गा'दित्यनेन सङ्गृहीततया व्याख्यातुमुचितं, तथाप्युत्तरसूत्रे तस्य लिङ्गस्य गत्यन्तरमपि वर्णयितुं प्रवृत्ते तद्विषयं भविष्यतीति तदत्र न गृहीतम्। अत्रापि सूत्रे परिहारांशव्याख्याने तदनुरूपतयान्यलिङ्गानि नेतव्यानीति बहुवचनेन तस्यापि गतिर्वर्णयिष्यत एवेति 'तव्द्याख्यात'मिति परिहारांशं व्याचष्टे-**पूर्वत्रेति।** 'प्राणस्तथानुगमा' दि (ब्र० सू०) त्यधिकरणे प्रतर्दनविद्याप्रकरणं पूर्वापरपर्यालोचनया ब्रह्मपरमवगम्यत इति तदनुरोधेन तदन्तर्गतान्यप्यन्यलिङ्गानि ब्रह्मणि नेतव्यानीत्युपपादितम्। 'उपासात्रैविध्यादाश्रितत्वादिह तद्योगात्'इदमपि प्रकरणं तेनैव व्याख्यातम्। इदमपि हि पूर्वापरपर्यालोचनया ब्रह्मपरमवसीयते। कथम्। 'ब्रह्म ते ब्रवाणी' त्युपक्रमस्तावत् ब्रह्मपरः। न चासद्वादवत् निराकरणार्थं तदुपक्रमः। 'ब्रह्म ते ब्रवाणी' त्युक्तवत्येव गार्ग्ये सर्वेष्वपि ब्रह्मज्ञेषु जनको वदान्य इति तस्मै ब्रह्मोपदेष्टुं तत्सकाशमेव धावत्सु मह्यं ब्रह्मोपदेष्टुमयमागत इति हृष्टेनाजातशत्रुणा 'सहस्त्रं दद्म एतस्यां वाचि जनको जनक इति जना धावन्ती'ति कृतस्य

सहस्रगोदानप्रतिज्ञानस्य श्रवणाद्गार्ग्येणोपदिष्टेषु आदित्यादिषु पुरुषेषु प्रत्याख्यातेषु ततः परमविज्ञानात्तूष्णीं भूते च गार्ग्ये तं 'प्रत्येतावदेव तव ज्ञान'मिति पृष्ट्वा 'एतावद्धी'ति तस्य प्रतिवचनानन्तरमेव 'मृषा वै किल मा समवादयिष्ठाः ब्रह्म ते ब्रवाणी'ति अजातशत्रुणा तद्वचने मृषात्वस्य ख्यापितत्वाञ्च। यदि हि जीवातिरिक्तं ब्रह्मनाम किञ्चिन्नास्तीत्यभिमन्यमानस्तभिमन्यमानस्तन्निराकरणप्रवृत्तो राजाभविष्यत्तदा 'ब्रह्म ते ब्रवाणी'ति तद्वचनश्रवणेन हृष्टस्तस्मै सहस्त्रगोदानं न प्रत्यज्ञास्यत। बालाकेर्वक्तव्यपुरुषान्तरसद्भावेऽपि तत्प्रतिज्ञाया मृषात्वं राजा प्रतिज्ञाकालमारभ्यैव मन्येतेत्येतावदिति प्रश्नपूर्वकमेतावदेवेत्युत्तरमनपेक्ष्य ततः प्रागेव तन्मृषात्वमुदघाटयिष्यत्। तस्मात्स्वयं ब्रह्मज्ञः पुनरपि तदीयाधिकविशेषग्रहणे श्रद्धावानेव'ब्रह्म ते ब्रवाणी'ति वचनश्रवणमात्रेण हृष्टस्तस्मै सहस्रगोदानं प्रतिजज्ञे। तेन चाब्रह्मस्वादित्यादिपुरुषेषु ब्रह्मत्वेनोपन्यस्यमानेषु किमयं गार्ग्यः स्थूलारुन्धतीन्यायेनाब्रह्माणि ब्रह्मत्वेनोपादिक्षत् किं वा भ्रान्त्येति निश्चेतुमशन्कुवन् उदाहृतब्रह्मप्रतिवचनेन तस्य भ्रान्तत्वं निश्चित्य तदनन्तरमेव प्रतिज्ञाया मृषात्वमुद्घाटयामासेति च युज्यते। एतेन रसवादिकथनप्रत्याख्यातृवचनदृष्टान्तमवलम्ब्य 'यो वै बालाक' इत्यादेस्साङ्ख्यप्रतिज्ञातब्रह्मनिराकरणपरत्वकल्पनमपि निरस्तम्। 'यो वै बालाक' इत्यादेर्गार्ग्यप्रतिज्ञातब्रह्मान्यविषयत्वावगमे हि स दृष्टान्तः क्रमते। तस्य तत्प्रतिज्ञातब्रह्मविषयत्वमेव समर्थितम्। एवं च यथा केनचिन्मणितत्वज्ञानाभिमानिना काचं प्रदर्श्य मणिरेष इत्युक्ते काचोऽयं न मणिरिति तं प्रत्याख्याय तत आत्मनो विशेषं जिज्ञापयिषतान्येन पारमार्थिको मणिः प्रदर्श्यते। एवं राज्ञा ब्रह्मोपदिश्यत इति मणितत्वविद्वचनदृष्टान्त एवात्र क्रमते। एवं तावदुपक्रमस्य मध्ये परामर्शस्य ब्रह्मविषयत्वं स्थितम्। तथा 'सर्वान्पाप्मनोऽपहत्येत्ये'तावत्युपसंहारोऽपि तद्विषय एव। जरामृत्युशोकादिसकलपापापहतिपूर्वकं शिवस्यात्मरूपं स्वाराज्यं हि शिवाख्यस्य परब्रह्मणः वेदेनादेव श्रुत्यन्तरेषु प्रसिद्धम्। एवं च यथा प्रतर्दनविद्यायामन्यलिङ्गानि त्रिविधोपासनतात्पर्येण ब्रह्मणि नीतानि एवमिहापि तानि तथैव ब्रह्मणि नेतव्यानीति तात्पर्यार्थः।। उत्तरसूत्रमवतारयति-**पक्षान्तरमुच्यत इति**। पूर्वसूत्रे यष्टिघातोत्थापनेन जीवलिङ्गं भोक्तृत्वादिलिङ्गात् जीवशरीरब्रह्मोपासनार्थत्वेन नीतम्। इदानीं तत् जीवातिरिक्तपरमेश्वरप्रतिबोधनार्थमित्युत्तरग्रन्थपर्यालोचनावश्यंस्थायि पक्षान्तरमुच्यत इत्यर्थः।।सू।। **अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके**।।१८।। अन्यार्थमित्येतद्विशेष्याध्याहारपूर्वकं व्याचष्टे-**तौ हेति**। राज्ञा वेदितव्यतयोपदिष्टस्यादित्यादिपुरुषाणां कर्तुर्वेदनाय गार्ग्योपसत्तिप्रतिपादनानन्तरं श्रूयते 'तं हपाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषमीयतुस्तं हाजातशत्रुरामन्त्रयाञ्चक्रे बृहन् पाण्डरवासः सोमराजन्निति स इह तूष्णीमेव शिश्ये तदुहैनं यष्टया व्याचिक्षेप स ततएव समुत्तस्था'विति। अत्र बृहन्नित्यादिनामभिः प्राणस्यामन्त्रणम्। प्राणः खलु बृहन्महान् श्रेष्ठः असपत्नो वा। पाण्डरवर्णा आपोऽस्य वासस्त्वेनोपचरिताः। शरीरं वा। प्राणविद्यायां 'प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चे' ति तस्य

श्रैष्ठ्यश्रवणात् 'किं मे वास' इति प्राणप्रश्ने 'आपो वास' इत्युत्तरश्रवणाच्च। सप्तान्नब्राह्मणे 'स एषोऽसपत्नः इत्यथैतस्य प्राणस्यापः शरीर'मित्यसपत्नत्वापृशरीरकत्वश्रवणाद्वा। सोमश्चायमुपचारात्। सप्तान्नब्राह्मण एव 'ज्योतीरूपमसौ चन्द्र' इति श्रवणात्। राजा च। 'प्राणो वै सम्रा' डिति श्रवणात्। एवं प्राणनामभिरामन्त्रणेऽपि असत्थानप्रदर्शनं प्राणान्यत्वज्ञापनार्थम्। सुषुप्तिदशायामुपरतव्यापारेभ्यः शरीरेन्द्रियेभ्यः अन्यत्वं सुज्ञानमिति तस्यामपि दशायामनुपरतव्यापारात्प्राणादन्यत्वमेव हि ज्ञापनीयम्। एवं प्राणनाभिरामन्त्रणेऽपि अनुत्थानस्य यष्टिघातेनोत्थानस्य च प्रदर्शनेनान्वयव्यतिरेकाभ्यां यत् कैमुतिकन्यायेन स्थूलसूक्ष्मदेहातिरिक्तजीवपसद्भावप्रतिपादनं तदन्यार्थं जीवातिरिक्तपरमेश्वर-प्रतिपादनार्थमेवेति जैमिनिराचार्यो मन्यते इत्यर्थः। सूत्रे तुशब्दः अस्य जीवलिङ्गस्य पूर्वसूत्रदर्शित-गतिव्यावृत्त्यर्थः। जैमिनिग्रहणमस्य पक्षस्य जैमिन्यभिमतत्वेन युक्ततरत्वज्ञापनार्थमित्येतद्भाष्ये स्पष्टत्वान्नोक्तम्। 'प्रश्नव्याख्यानाभ्या' मिति हेतुं व्याचष्टे–**क्वैष एतदिति।** यष्टिघातेनोत्थापनानन्तरं 'क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागा' दिति राज्ञा गार्ग्यं प्रति कृतः प्रश्नः। यद्यपि यत्राशयिष्ट तत्रैव यावत्प्रबोधमभूदिति प्रबोध्यमानस्तत एवागादिति चार्थात्सिध्यन्नर्थो न पृथक्प्रश्नमर्हति, तथापि जीवस्य सुषुप्तेः प्राक् स्वपतोऽधिकरणतया सुषुप्तस्य यावत्प्रबोध-मधिकरणतया यष्टिघातोत्थापनानन्तरं तदुत्थानापादानतया च जीवातिरिक्तपरमेश्वरसद्भावं दृढीकर्त्तुं त्रेधा प्रश्नः। गार्ग्ये पृष्टं सुषुप्तजीवाधिकरणमविजानति 'हिता नाम हृदयस्य नाड्य' इत्यादिना'तासु तदा भवति यदा सुप्तः स्वप्नं न कंचन पश्यती' त्यन्तेन 'तत्रैतत् सुप्तस्समस्तस्सम्प्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सृप्तो भवति ताभिः प्रत्यवसृप्य पुरीतति शेत' इत्यादिश्रुत्यन्तरानुसारात् जीवसुषुप्त्यधिकरणं हृदयावच्छिन्नं ब्रह्मं प्राप्तुर्मार्गे तदधिगन्तव्यासु नाडीषूपसर्पणमुक्त्वा 'अथास्मिन्प्राण एवैकधा भवती' ति राज्ञैव कृतं स्वपृष्टार्थविवरणम्। तस्य व्याख्यानमिदं च सुषुप्तजीवस्य ब्रह्मणि लयप्रतिपादकम्। 'सता सोम्य तदा सम्पन्नो भवती' ति श्रुत्यन्तरसमानार्थत्वात्। तथा चास्मिन्वेदितव्यतयोपदिष्टे परब्रह्मणि जीवः सुषुप्तौ लीनौ भवतीति तदर्थो ग्राह्यः। यदर्थके पूर्वसूत्रे सूत्रकृता प्रतर्दनविद्यावदिहापि त्रिविधमुपासनं विवक्षितमिति तन्निर्वाहकं प्राणे प्राणशरीरक इति ब्रह्मविशेषणम्। एताभ्यां प्रश्नव्याख्यानाभ्यां जीवातिरिक्तः परमेश्वरोऽत्र प्रतिपाद्योऽवसीयत इति भावः। 'अपि चैवमेक' इति सूत्रशेषं व्याचष्टे–**एक इति।** अपि च वाजसनेयिनोऽस्मिन्प्रकरणे स्पष्टमेतत् समानार्थवाक्यजातमधीयते। 'यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागा' दिति अत्र प्रश्नः। 'यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषस्तदैषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत' इति व्याख्यानम्। अत्र निर्दिष्टं जीवस्य सुषुप्त्यधिकरणं ब्रह्मेति स्पष्टम्। आकाशशब्देन तन्निर्देशात् तस्य ब्रह्मणि श्रुत्यन्तरेषु प्रसिद्धतरत्वात् अस्याकाशशब्दस्य एतत्स्थाने कौषीतकिब्राह्मणपठितस्य प्राणशब्दस्य एकार्थस्य

वक्तव्यतया तयोर्ब्रह्मविषयत्वावश्यंभावाञ्च। ब्रह्मविषयत्व एव हि तयोरैकार्थ्यं 'माकाशस्तल्लिङ्गात' 'अत एव प्राण' इति सूत्रदर्शितन्यायतश्श्रुत्यन्तरेष्ववगतम्। अतोऽत्र जीवप्रतिपादनस्य जीवातिरिक्त-परमेश्वरप्रतिबोधनार्थत्वं युक्तमिति भावः। अतः परमेश्वरसद्भावे तस्य जीवाद्भेदे वा न विवदितव्यमित्यभिप्रेत्याधिकरणमुपसंहरति–**तस्मादिति**।।४।।

इति जगद्वाचित्वाधिकरणम्।।४।।

इति शिवार्कमणिदीपिका बालाक्यधिकरणम् समाप्तम्

अथ वाक्यान्वयाधिकरणम्। ॥सू० १९-२२॥

शाङ्करभाष्यम्

***वाक्यान्वयात्*॥१९॥**

बृहदारण्यके मैत्रेयीब्राह्मणेऽधीयते–"न वा अरे पत्युः कामाय"–इत्युपक्रम्य "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्" (बृ० ४/५/६) इति, तत्रैतद्विचिकित्स्यते–किं विज्ञानात्मैवायं द्रष्टव्यश्रोतव्यत्वादिरूपेणोपदिश्यत, आहोस्वित्परमात्मेति? कुतः पुनरेषा विचिकित्सा? प्रियसंसूचितेनात्मना भोक्त्रोपक्रमाद्विज्ञानात्मोपदेश इति प्रतिभाति। तथाऽत्मविज्ञानेन सर्वविज्ञानोपदेशात्परमात्मोपदेश इति। किं तावत्प्राप्तम्? विज्ञानात्मोपदेश इति।। कस्मात्? उपक्रमसामर्थ्यात्। पतिजायापुत्रवित्तादिकं हि भोग्यभूतं सर्वं जगदात्मार्थतया प्रियं भवतीति, प्रियसंसूचितं भोक्तारमात्मानमुपक्रम्यानन्तरमिदमात्मनो दर्शनाद्युपदिश्यमानं कस्यान्यस्यात्मनः स्यात्? मध्येऽपि "इदं महद्भूतमनन्तमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति" इति प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन ब्रुवन्विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयति। तथा "विज्ञातारमरे केन विजानीयाद्" इति कर्तृवचनेन शब्देनोपसंहरन्विज्ञानात्मानमेवेहोपदिष्टं दर्शयति। तस्मादात्मविज्ञानेन सर्वविज्ञानवचनं भोक्त्रर्थत्वाद्भोग्यजातस्यौपचारिकं द्रष्टव्यमिति।। एवं प्राप्ते ब्रूमः–परमात्मोपदेश एवायम्। कस्मात्? *वाक्यान्वयात्*।। वाक्यं हीदं पौर्वापर्येणावेक्ष्यमाणं परमात्मानं प्रति अन्वितावयवै लक्ष्यते।। कथमिति? तदुपपाद्यते–"अमृतत्वस्य तु नाशाऽस्ति वित्तेन" इति याज्ञवल्क्यादुपश्रुत्य "येनाहं नामृता स्या किमंह तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहि" इत्यमृतत्वमाशासानाया मैत्रेय्या याज्ञवल्क्य आत्मविज्ञानमिदमुपदिशति। न चान्यत्र परमात्मविज्ञानादमृतत्वमस्तीति श्रुतिस्मृतिवादा वदन्ति। तथाचात्मविज्ञानेन सर्वविज्ञानमुच्यमानं नान्यत्र

परमकारणविज्ञानान्मुख्यमवकल्पते। नचैतदौपचारिकमाश्रयिंतु शक्यम्; यत्कारणमात्मविज्ञानेन सर्वविज्ञानं प्रतिज्ञायानन्तरेण ग्रन्थेन तदेवोपपादयति–''ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद'' इत्यादिना। यो हि ब्रह्मक्षत्रादिकं जगदात्मनोऽन्यत्र स्वातन्त्र्येण लब्धसद्भावं पश्यति, तं मिथ्यादर्शिनं तदेव मिथ्यादृष्टं ब्रह्मक्षत्रादिकं जगत्पराकरोतीति भेददृष्टिमपोद्य ''इदं सर्वं यदमात्मा'' इति सर्वस्य वस्तुजातस्यात्माव्यतिरेकमवतारयति। दुन्दुभ्यादिदृष्टान्तैश्च (बृ॰ ४/५/८) तमेवाव्यतिरेकं द्रढयति ''अस्य महत्तो भूतस्य निःश्वसितमेतद्यदृग्वेदः'' (वृ॰ ४/५/११) इत्यादिना च प्रकृतस्यात्मनो नामरूपकर्मप्रपञ्चकारणतां व्याचक्षाणः परमात्मानमेनं गमयति। तथैवैक्रायनप्रक्रियायामपि (बृ॰ ४/५/१२) सविषयस्य सेन्द्रियस्य सान्तः करणस्य प्रपञ्चस्यैकायनमनन्तरमबाह्यं कृत्स्नं प्रज्ञानघनं व्याचक्षाणः परमात्मानमेनं गमयति। तस्मात्परमात्मन एवायं दर्शनाद्युपदेश इति गम्यते॥१९॥

यत्पुनरुक्तम्–प्रियसंसूचितोपक्रमाद्विज्ञानात्मन एवायं दर्शनाद्युपदेश–इति, अत्र ब्रूमः–

***प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः*॥२०॥**

अस्त्यत्र प्रतिज्ञा–''आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति'' ''इदं सर्वं यदयमात्मा'' इति च। तस्याः प्रतिज्ञायाः सिर्द्धिं सूचयत्येतल्लिङ्गम्–यत्प्रियसंसूचितस्यात्मनो द्रष्टव्यतवादिसङ्कीर्तनम्। यदि हि विज्ञानात्मा परमात्मनोऽन्यः स्याततः परमात्मविज्ञानेऽपि विज्ञानात्मा न विज्ञात इत्येकविज्ञानेन सर्वविज्ञानं यत्प्रतिज्ञातम्, तद्धीयेत। तस्मात्प्रतिज्ञासिद्धयर्थं विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रमणमित्याश्मरथ्य आचार्यो मन्यते॥२०॥

***उत्क्रमिष्यत एवंभावादित्यौडुलोमिः॥२१॥**

विज्ञानात्मन एव देहेन्द्रियमनोबुद्धिसङ्घातोपाधिसम्पर्कात्कलुषीभूतस्य ज्ञानध्यानादिसाधनानुष्ठानात् सम्प्रसन्नस्य देहादिसङ्घातादुत्क्रमिष्यतः परमात्मैक्योपपत्तेरिदमभेदेनोपक्रणमित्यौडुलोभिराचार्यो मन्यते। श्रुतिश्चैवं भवति–''एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते'' (छा॰ ८/२/३) इति। क्वचिञ्च जीवाश्रयमपि नामरूपं नदीनिदर्शनेन ज्ञापयति–''यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्'' (मुण्ड॰ ३/२/८) इति। यथा लोके नद्यः स्वाश्रयमेव नामरूपं विहाय समुद्रमुपयन्ति, एवं जीवोऽपि स्वाश्रयमेव नामरूपं विहाय परं पुरुषमुपैतीति हि तत्रार्थः प्रतीयते दृष्टान्तदार्ष्टान्तिकयोस्तुल्यतायै॥२१॥

अवस्थितेरिति काशकृत्स्नः॥२२॥

अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमिदमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते। तथाच ब्राह्मणम्–''अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि'' (छा॰ ६/३/२) इत्येवंजातीयकं परस्यैवात्मनो जीवभावेनावस्थानं दर्शयति। मन्त्रवर्णश्च–''सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन्यदास्ते'' (तै॰ आ॰ ३/१२/७) इत्येवञ्जातीयकः। न च तेजःप्रभृतीनां सृष्टौ जीवस्य प्रथक्सृष्टिः श्रुता, येन परस्मादात्मनोऽन्यस्तद्विकारो जीवः स्यात्॥ काशकृत्स्नस्याचार्यस्याविकृतः परमेश्वरो जीवो नान्य इति मतम्। आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतम्; तथापि ''प्रतिज्ञासिद्धेरिति'' सापेक्षत्वाभिधानात्कार्यकारणभावः कियानप्यभिप्रेत इति गम्यते। औडुलोमिपक्षे पुनः स्पष्टमेवावस्थान्तरपेक्षौ भेदाभेदौ गम्येते। तत्र काशकृत्स्नीयं मत श्रुत्यनुसारीति गम्यते, प्रतिपिपादयिषितार्थानुसारात्, ''तत्त्वमसि'' इत्यादिश्रुतिभ्यः। एवं च सति तज्ज्ञानादमृतत्वमवकल्पते। विकारात्मकत्वे हि जीवस्याभ्युपगम्यमाने विकारस्य प्रकृतिसम्बन्धे प्रलयप्रसङ्गान्न तज्ज्ञानादमृतत्वमवकल्पेत। अतश्च स्वाश्रयस्य नामरूपस्यासम्भवादुपाध्याश्रयं नामरूपं जीव उपचर्यते। अत एवोत्पत्तिरपि जीवस्य क्वचिदग्निविस्फुलिङ्गोदाहरणेन श्राव्यमाणोपाध्याश्रयैव वेदितव्या॥ यदप्युक्तम्–प्रकृतस्यैव महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन दर्शयन् विज्ञानात्मन एवेदं द्रष्टव्यत्वं दर्शयतीति। तत्रापीयमेव त्रिसूत्री योजयितव्या *प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः*॥ इदमत्र प्रतिज्ञातम्–''आत्मनि विदिते सर्वं विदितं भवति'' ''इदं सर्वं यदयमात्मा'' (बृ॰ २/४/६) इति च। उपादितं च; सर्वस्य नामरूपकर्मप्रपञ्चस्यैकप्रसवत्वात्देकप्रलयत्वाञ्च, दुन्दुभ्यादिदृष्टान्तैश्च कार्यकारणयोरव्यतिरेक-प्रतिपादनात्। तस्या एव प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गम्–यन्महतो भूतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं विज्ञानात्मभावेन कथितमित्याश्मरथ्य आचार्यो मन्यते। अभेदे हि सत्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञातमवकल्पत इति।

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः॥ ''उत्क्रमिष्यतो विज्ञानात्मनो ज्ञानध्यानादिसामर्थ्यात् सम्प्रसन्नस्य परेणात्मनैक्यसम्भवादिदमभेदाभिधानमित्यौडुलोमिराचार्यो मन्यते।

अवस्थितेरिति काशकृत्स्नः॥ अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्था-नादुपपन्नमिदमभेदाभिधानमिति काशकृत्स्न आचार्यो मन्यते।

ननूच्छेदाभिधानमेतत्–''एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति'' (बृ० २/४/१२) –इति, कथमेतदभेदाभिधानम्? नैष दोषः ; विशेषविज्ञानविनाशभिप्रायमेतद्विनाशाभिधानम्, नात्मोच्छेदाभिप्रायम्। ''अत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञाऽस्ति'' इति पर्यनुयुज्य स्वयमेव श्रुत्याऽर्थान्तरस्य दर्शितत्वात्–''न वा अरेऽहं मोहं ब्रवीम्यविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवति'' इति। एतदुक्तं भवति–कूटस्थनित्य एवायं विज्ञानघन आत्मा, नास्योच्छेदप्रसङ्गोऽस्ति। मात्राभिस्त्वस्य भूतेन्द्रियलक्षणाभिरविद्याकृताभिरसंसर्गो विद्यया भवति। संसर्गाभावे च तत्कृतस्य विशेषविज्ञानस्याभावान्न प्रेत्य संज्ञाऽस्तीत्युक्तमिति। यदप्युक्तम्–''विज्ञातारमरे केन विजनीयात्'' इति कर्तृवचनेन शब्देनोपसंहाराद्विज्ञानात्मन एवेदं द्रष्टव्यत्वमिति, तदपि काशकृत्स्नीयेनैव दर्शनेन परिहरणीयम्। अपि च ''यत्रहि द्वैतमिव भवति तदितर इतरं पश्यति'' (बृ० २/४/१३) इत्यारभ्याविद्याविषये तस्यैव दर्शनादिलक्षणं विशेषविज्ञानं प्रपञ्च्य ''यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्'' इत्यदिना विद्याविषये तस्यैव दर्शनादिलक्षणस्य विशेषविज्ञानस्याभावमभिदधाति। पुनश्च विषयाभावेऽपि आत्मानं विजानीयाद् इत्याशङ्क्य ''विज्ञातारमरे केन विजानीयात्'' इत्याह। ततश्च विशेषविज्ञानाभावोपपादनपरत्वाद्वाक्यस्य विज्ञानधातुरेव केवलः सम्भूतपूर्वगत्या कर्तृवचनेन तृचा निर्दिष्ट इति गम्यते। दर्शितं च पुरस्तात् काशकृत्स्नीयस्य पक्षस्य श्रुतिमत्त्वम्। अतश्च विज्ञानात्मपरमात्मनोरविद्याप्रत्युपस्थापितनामरूपरचितदेहाद्युपाधिनिमित्तो भेदो, न पारमार्थिक इत्येषोऽर्थः सर्वैर्वेदान्तवादिभिरभ्युपगन्तव्यः। ''सदेव सोम्येदमग्र असीदेकमेवाद्वितीयम्'' (छा० ६/२/१) ''आत्मवेदं सर्वम्'' (छा० ७/२५/२) ''ब्रह्मैवेदं सर्वम्'' (मुण्ड० २/२/११) ''इदं सर्वं यदयमात्मा'' (बृ० २/४/६) ''नान्योऽतोऽस्ति द्रष्टा'' (वृ० ३/७/२३) ''नान्यऽतोऽस्ति द्रष्टृ'' (बृ० ३/८/११) इत्येवंरूपाभ्यः श्रुतिभ्यः। स्मृतिभ्यश्च–''वासुदेवः सर्वमिति'' (गी० ७/१९) ''क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत'' (गी० १३/२) ''समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्'' (गी० १३/२७) इत्येवंरूपाभ्यः, भेददर्शनापवादाञ्च– ''अन्योऽसवन्योऽहमस्मीति न स वेद यथा पशुः'' (बृ० १/४/१०) ''मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति'' (बृ० ४/४/१९) इत्येवञ्जातीयकात्। ''स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म'' (बृ० ४/४/२५) इति चात्मनि सर्वविक्रियाप्रतिषेधात्, अन्यथा च मुमुक्षूणां निरपवादविज्ञानानुपपत्तेः, सुनिश्चितार्थत्वानुपपत्तेश्च।। निरपवादं हि विज्ञान सर्वाकाङ्क्षानिवर्तकमात्मविषयमिष्यते; ''वेदान्तविज्ञानसुनिश्चितार्थाः'' (मुण्ड० ३/२/६) इति च श्रुतेः, ''तत्र को मोहः कः शोक एकत्वमनुपश्यतः'' (ईशा० ७) इति च। स्थितप्रज्ञलक्षणस्मृतेश्च (गी० २/५४)। स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषये सम्यग्दर्शने क्षेत्रज्ञः परमात्मेति नाममात्रभेदात् 'क्षेत्रज्ञोऽयं परमात्मनो भिन्नः' 'परमात्माऽयं क्षेत्रज्ञाद्भिन्नः' इत्येवञ्जातीयक आत्मभेदविषयो

निर्बन्धो निरर्थकः। एको ह्ययमात्मा नाममात्रभेदेन बहुधाऽभिधीयत इति। नहि ''सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायाम्'' (तै० २/१) इति काञ्चिदेवैकां गुहामधिकृत्यैतदुक्तम्। न च ब्रह्मणोऽन्यो गुहायां निहितोऽस्ति; ''तत्सृष्ट्वा तदेवानुप्राविशत्'' (तै० २/६) इति स्रष्टुरेव प्रवेशश्रवणात्। ये तु निर्बन्धं कुर्वन्ति, ते वेदान्तार्थं बाधमानाः श्रेयोद्वारं सम्यग्दर्शनमेव बाधन्ते। कृतकमनित्यं च मोक्षं कल्पयन्ति। न्यायेन च न सङ्गच्छन्त इति।।२२।। इति षष्ठं वाक्यान्वयाधिकरणम्।।

इति शाङ्करभाष्यम्.वाक्यान्वयाधिकरणम् समाप्तम्

वार्तिकम्

वाक्यान्वयात्।।१९।। यदि पूर्वत्र ब्रह्मोपक्रमाद् ब्रह्मपरत्वं वाक्यस्य व्याख्यायते, इहापि तर्हि जीवोपक्रमाद् जीवपरत्वमस्तु, इति सङ्गतिः।।

जीवब्रह्मलिङ्गाभ्यां संशयमुपपादयितुं तद्वीजं पृच्छति– *कुतः पुनरेषा विचिकित्सेति*।। तद्वीजं दर्शयति– *प्रियसंसूचितेनेत्यादिना*।।

संशयमुपपाद्य पूर्वपक्षमारचयति– *किं तावत्प्राप्तमित्यादिना*।। येनोपक्रमोपसंहारौ, यस्य च मध्ये परामर्शः, स एव तस्य वाक्यस्यार्थ इति सर्वत्र समधिगतम्। अत्र जीवात्मनैवोपक्रमोपसंहारौ, मध्ये च परामर्शो दृश्यते। कुतः? उपक्रमोपसंहारपरामर्शवाक्ये जीवस्यैवान्वयदर्शनात् स एव वाक्यार्थो भवितुमर्हति। ननु–"आत्मनो वा अरे दर्शनेने" त्यादिनाऽऽत्मविज्ञानेन सर्वविज्ञानोपदेशो जीवात्मपक्षे न घटते; जीवात्मनोऽसर्वात्मत्वादिति–चेत्, नैष दोषः ; भोग्यप्रपञ्चस्य भोक्त्रर्थत्वेन तद्धीनत्वाद् उपचारेण भोक्तृस्तुत्युपपत्तेः। तस्माद् जीवात्मैवात्र द्रष्टव्यत्वेनोपदिश्यते–इति।।

एवं प्राप्तेऽभिधीयते–मैत्रेयीं प्रति याज्ञवल्क्येन परमात्मैव द्रष्टव्यतयोपदिश्यते। कुतः? वाक्यान्वयात्=एतस्य वाक्यस्य प्रतिपदं प्रत्यवान्तरवाक्यं च ब्रह्मण्येवान्वयो दृश्यते, नान्यत्र। स च "अमृतत्वस्य तु नाशाऽस्ति वित्तेने" त्यादिना भाष्येण प्रपञ्चितः।।१९।।

यदुक्तम्–उपक्रमादिभिर्विज्ञानात्मन एव दर्शनाद्युपदेशः–इति, तत्र ब्रूम– *प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः।।२०।। सत्यं प्रियससूंचितविज्ञानात्मन एवोपक्रम्य दर्शनाद्युपदेश "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति, न सोऽब्रह्मपरतां वाक्यस्य बोधयितुं शक्नोति; वाक्यान्वयविरोधादेव। किं तर्हि? वक्ष्यमाणप्रतिज्ञामेव लिङ्गतया साधयति। कथम्? अत्र हि आत्मविज्ञानेन सर्वविज्ञानम्, आत्मनः सार्वात्म्यं च प्रतिज्ञातम्–"आत्मनि वा अरे दृष्टे श्रुते मते विज्ञाते सर्वमिदं विज्ञातं भवती" ति, "इदं सर्वं यदयमात्मे" ति च। सा च प्रतिज्ञा तदा सिद्ध्येयत्, यदि जीवः परमात्मनो न भिन्नो भवेत्। भिन्नत्वे हीयं न स्यात्; अन्यविज्ञानेनान्यविज्ञानासंभवात्

परमात्मविज्ञानेन सर्वविज्ञानासिद्धेः, सर्वात्मत्वासिद्धेश्च; अन्यस्यान्यात्मत्वासंभवात्। तस्मादुपक्रमे जीवात्मनो द्रष्टव्यत्वादिगुणसंकीर्तनं परमात्मना तदभेदं सूचयत् भवत्युक्तप्रतिज्ञा-सिद्धेर्लिङ्गमित्याश्मरथ्यनामाऽऽचार्यो मन्यते स्म। *विज्ञानात्मपरमात्मनोरभेदांशेनोपक्रमणमिति*।। अनेन भाष्येणास्य मते जीवपरमात्मनोर्भेदांशोऽपि भाविकोऽस्तीति सूच्यते। एतच्चाग्रे स्पष्टीकरिष्यते।।२०।।

आचार्यदेशीयमतान्तरमाह– *उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः*।।२१।। यद्यपि संसारदशायां जीवः परमात्मनोऽत्यन्तं भिन्नः, सदा देहेन्द्रियमनोबुद्धिसङ्घातोपाधिसंपर्ककलुषितत्वात्; तथापि– "एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" "यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" इत्यादिश्रुतेः ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य मरणकालेऽस्मात् कार्यकरण-सङ्घातादुत्क्रमिष्यतो जीवस्य परमात्मनैक्यभावाद् भविष्यद्वृत्त्या तत्कार्यकरणसङ्घातानपेक्षमुक्तम-भेदेनोपक्रमणम्। तथाचाहुः पाञ्चरात्रिकाः–"आ मुक्तेर्भेद एव स्याद् जीवस्य च परस्य च। मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः।" इति, इत्यौडुलोमिराचार्यो मन्यते स्म।।२१।।

तदेवामाचार्यदेशीयमतद्वयमुपन्यस्याचार्यमतमाह सूत्रकारः- *अवस्थितेरिति काशकृत्स्नः* ।।२२।। एतद् भाष्यकारो व्याचष्टे– *अस्यैवेति*।। अस्मिन्नर्थे प्रमाणमुदाहृतम्– *तथाच ब्राह्मणमिति*।।

ननु–आकाशादिवत् परमात्मनो विकार एव जीवः किं न स्यात्? विकारपक्षेऽपि विकार विकारिणोर्भेदाभेदादभेदांशमादायोदाहृतश्रुतीनामुपपत्तेः। तथाचाश्मरथ्यमतमेवाचायमतम्, न काश-कृत्स्नमतमित्याशङ्क्याह– *न च तेजः प्रभृतीनामिति*।। काशकृत्स्नमतमेव श्रौतत्वादुपादेयम्, नाश्मरथ्यादिमतमिति दर्शयितुं तद् विवेचयति– *काशकृत्स्नस्याचार्यस्येति*।। "अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि" "स इह प्रविष्टः" इत्यादिश्रुतिरविकृतस्यैव परमेश्वरस्य जीव रूपेणावस्थानं हेतुत्वेन वदति, अतोऽविकृत एव परमेश्वरो मिथ्याभिमानाद्, जीवः, नाकाशादिवद् विकार इति काशकृत्स्नोऽभिप्रैतीति गम्यते; अन्यथाऽवस्थितेरिति हेतोरसामञ्जस्यापत्तेः। आश्मरथ्यस्त्वाचार्यः प्रतिज्ञासिद्धिसूचनायाभेदाभिधानमिति प्रतिज्ञासिद्धि-मपेक्ष्याभेदाभिधानं वदन् आकाशदिवद् जीवस्यापि ब्रह्मविकारत्वं कियदभिप्रैतीति गम्यते। "यथा हि ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेदे" ति ब्रह्मविकाराणां ब्रह्मक्षत्रादिजातीनां तदभेदप्रदर्शनं प्रतिज्ञासिद्धयर्थम्, तद्वत्; अन्यथा काशकृत्स्नवदेव सापेक्षाभिधानं न कुर्यात्। तदिदमुक्तम्– *तथापि "प्रतिज्ञासिद्धेरि" ति सापेक्षाभिधानात् कार्यकारणभावः कियानभिप्रेत इति गम्यत इति*।।

कियानिति औडुलोमिमतापेक्षया। तेन कार्यकारणभावाभ्युपगमात्, अत्यन्तविलक्षणस्यापि जीवस्य ज्ञानध्यानादिपरिपाकवशेन ब्रह्मभावेनावस्थाविशेषे परिणामाभ्युपगमात्, अत्यन्तविलक्षणस्य नहुषादिशरीरस्याधर्मविशेषपरिपाकवशाद् अजगरादिभावेन परिणामवत्। *अवस्थान्तरापेक्षौ भेदाभेदाविति*।। संसारदशायां जीवस्य ब्रह्मणा भेदः, मोक्षदशायां चाभेदः, इत्यवस्थान्तरमपेक्ष्य भेदाभेदौ भवत इत्यर्थः।।

मतानि विभज्य काशकृत्स्नीयमतस्योपादेयत्वं दर्शयति *तत्र काशकृत्स्नीयं मतमेवेति*।। तत्र=मतभेदेषु मध्य इत्यर्थः। श्रुत्यनुसारित्वे हेतुमाह– *प्रतिपिपादयिषितार्थानुसारादिति*।। श्रुत्या प्रतिपिपादयिषितोऽर्थः=जीवब्रह्मणोरैक्यम्, तदनुसारि काशकृत्यस्नीयमतमित्यर्थः। ननु–ऐक्यं श्रुत्या प्रतिपिपापादयिषितमिति कुतोऽध्यवसीयते? तत्राह– *तत्त्वमसीत्यादिश्रुतिभ्य इति*।। यथाच ''तत्त्वमसी'' त्यादिवाक्यानामात्मैक्यपरत्वम्, तथोक्तमधस्तात्। न केलवं श्रौतमेवेदं मतम्, औपपत्तिकमपीत्याह– *एवञ्च सतीति*।। अन्यथा ब्रह्मप्रतीकज्ञानत्वसम्पदादिरूपत्वेन मिथ्याज्ञानत्वात् ततोऽविद्याऽनिवृत्तेर्न मोक्षो भवेदित्याशयः। इतश्च न मोक्ष इत्याह– *विकारात्मकत्वे हीति*।। *विकारस्य प्रकृतिसम्बन्ध इति*।। प्रकृत्याऽत्यन्ताभेदसम्बन्ध इत्यर्थः। ननु–यदि जीवः साक्षाद् ब्रह्मैव ते, न विकारः, कथं तर्हि तस्य नामरूपाश्रयत्वं प्रत्यक्षसिद्धमुपपद्यते? कथं वाऽग्निविस्फुलिङ्गदृष्टान्तपूर्वकतद्विकारत्वश्रवणमिति? अत आह– *अतश्च स्वाश्रयस्य नामरूपस्यासम्भवादिति*।। चोऽवधारणे। अमृत्वाभावप्रसङ्गादेवेत्यर्थः।।

यदपि–मध्ये परामर्शो जीवस्य द्रष्टव्यत्वे पूर्वपक्षिणा लिङ्गम्–उदाहृतम्, तदप्यनुभाष्य त्रिसूत्र्यैव परिहरति– *पदप्युक्तमिति*।। जीवेनोपसंहारमपि काशकृत्स्नीयमतमेवोपोद्बलयतीत्याह– *यदपयुक्तं विज्ञातारमित्यादिना*।। ऐकान्तिके ह्यात्मैक्ये ''केन कं पश्येत्'' इत्यात्मनोऽन्ये कर्मकरणे ''विज्ञातारमरे केन विजानीयात्'' इत्यात्मनः कर्मत्वं च शक्यं निषेद्धुम्, भेदाभेदद्वैताश्रयणमसमंञ्जसं स्यात्। अतो युक्तम्– ''काशकृत्स्नीयेनैव दर्शनेने'' त्यवधारणम्–इति। न केवलं काशकृत्स्नीयदर्शनाश्रयणेन विज्ञातृत्वमात्मनो भूतपूर्वगत्याऽऽश्रीयते, श्रुतिवाक्यपौर्वापर्यपर्यालोचनयाप्ययमर्थोऽवधार्यत इत्याह– *अपिव यत्र हि द्वैतमिव भवतीति*।। ननु–काशकृत्स्नीयमतमेव सिद्धान्तत्वेन किमिति गृह्यते, नान्येषाभाचार्याणां मतम्? तत्राह– *दर्शितं चेति*।। स्मृतिमत्त्वं पुनः श्रुतिप्रबन्धोपन्यासमुखेनाह– *अतश्च विज्ञानात्मपरमात्मनोरिति*।। आतश्चेति पाठे=अवश्यमेवेत्यर्थः। जीवब्रह्मणोरत्यन्तभेदपक्षे तद्विरोधमुद्भावयति– *स वा एष महानज इति*।। ''अविकार्योऽयमुच्यते'' इत्यादिस्मृतिविरोधोऽपि द्रष्टव्यः उभयपक्षसाधारणदोषमाह उपलक्षणमेतत्– ''अन्यथा चेति*। अविकार्योऽयुमच्चते इत्यादिस्मृतिविरोधोऽपि द्रष्टव्यः

उभयपक्षसाधारणदोषामाह। अत्यन्तभेदे भेदाभेदे च तत्त्वमस्यादिवाक्यजनितमत्यन्ताभेदविषयं विज्ञानं सापवादमनिश्चितार्थं च स्यात्; अवस्तुविषयत्वात्। न चैतद् युक्तम्; ततो मोक्षानुपपत्तेः, अनभ्युपगमाञ्चेत्यर्थः। निरपवादं हि ज्ञानं सर्वाकाङ्क्षानिवर्तकम्। आत्मनोरत्यन्ताभेदे कथं तयोर्बुद्धि व्यपदेशभेदौ स्यातामिति चेत्, मैवम्; आविद्यकनामरूपोपाधिकत्वात् तयोरित्यभिप्रेत्याह– *स्थिते च क्षेत्रज्ञपरमात्मैकत्वविषये सम्यग्दर्शन इति*।। *नाममात्रभेदेनेति*।। नामभेदोऽपि बिम्ब-प्रतिबिम्वयोरिवाविद्योपाधित इति मन्तव्यम्। नाममात्रेणैव तयोर्भेदः, न तत्त्वत इत्येव श्रुत्यारूढं कृत्वा दर्शयति– * न हि सत्यमित्यादिना*।। *काञ्चिदेवैकां गुहामिति*।। किन्तु बुद्धितोऽन्यामिति शेषः। ननु–सत्यज्ञानादिरूपाद् ब्रह्मणोऽन्यदेव तर्हि जीवचैतन्यं बुद्धिगुहानिहितमस्तु, 'तयोरन्यः पिप्पलं स्वाद्वत्ती'' ति श्रुत्यन्तरादिति–चेत्, मैवमित्याह– *न च ब्रह्मणोऽन्य इति*।। ''तयोरन्यः'' इति श्रुतेः परत्वस्य पूर्वमेव दर्शितत्वादित्याशयः।।

ये तु=आश्मरथ्यादयः। अत्यन्तभेदे परिणामादिवादं गृहीत्वेति शेषः। ननु–विकारित्वेऽपि ब्रह्मणो नानित्यत्वं कृतकत्वं वा भविष्यति; परिणामित्वाभ्युपगमादिति–चेत्, तत्राह– *न्यायेन चेति*।। परिणामित्वस्यानित्यत्वकृतकत्वव्याप्यत्वादित्याशयः।।२२।। इति षष्ठं वाक्यान्वयाधि-करणम्।।

इति वार्त्तिकम् वाक्यान्वयाधिकरणम् समाप्तम्

प्रदीपः

वाक्यान्वयात्।।१९।। ''न वा अरे पत्युः कामाये'' त्युपक्रम्याम्नातम्–''आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमि'' ति वाक्यम्, परमात्मपरम्, तत्तात्पर्यवत्त्वादिति सौत्रो न्यायः। अत्रात्मपदार्थनिर्धारणेन गतिसामान्यव्यवस्था क्रियत इति पादसङ्गतिः। ''ब्रह्म ते ब्रवाणी'' त्युपक्रमसामर्थ्यात् पूर्वत्र ब्रह्मविवक्षयामपि प्रकृते ''न वा अरे पत्युः कामाये'' ति प्रियसंसूचितेन भोक्त्राऽऽत्मनोपक्रमसामर्थ्याद् न ब्रह्मपरत्वम्, किन्तु विज्ञानात्मपरत्वमित्याक्षेपसङ्गतिरनन्तरा।

अत्रानुसन्धेयानि विषयवाक्यानि बृहदारण्यकचतुर्थाध्यायगतानीमानि याज्ञवल्क्येन मैत्रेयीं प्रत्युपदिश्यमानानि। तानि यथा–''सा होवाच मैत्रेयी येनाह नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे विब्रूहीति। स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधद्धन्त तर्हि भवत्येतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति। स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायाः कामाय जाया प्रिया भवत्यात्मनस्तु कामाय जाया प्रिया भवति...न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विज्ञातं भवति। ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादाद्योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद देवास्तं परादुर्योऽन्यत्रान्मनो देवान् वेद भूतानि तं परादुर्योऽन्यत्रात्मनो भूतानि वेद सर्वं तत् परादाद्योऽन्यत्रात्मनः सर्वं वेदेदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा। स यदा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद् ग्रहणाय दुन्दुभेर्ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः। ... ...स यथाऽर्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्यर्ग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च

भूतान्यस्यैतानि सर्वाणि निःश्वसितानि।... ...स यथा सैन्धववनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरेऽहमात्माऽनन्तरोऽबाह्यः कृत्स्नो विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।... ... ...अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा. .. ..यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् केन कं जिघ्रेत्... ... ...येनेदं सर्वं विजानाति तत्केन विजानीयात् स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गो न हि सज्जते सितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादित्युक्तानुशासनाऽसि मैत्रेय्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यो विजहार'' इति।।

अत्रोपक्रमे भोक्तः, उपसंहारे विज्ञातारमिति विज्ञातुरुपदेशाद् उपक्रमोपसंहारयोर्जीवपरत्वमिति पूर्वपक्षकोटिः। अमृतत्वानुशासनप्रश्नः, अमृतत्वेनोपसंहारः, मध्ये सार्वात्मयद्युपदेश इत्युपक्रमपरामर्शोपसंहाराणां परमात्मनि स्वारस्यात् परमात्मपरत्वमिति सिद्धान्तकोटिः। विज्ञात्रादिपदेनानुवादस्तु न ब्रह्मवादविरोधीत्यनुपदमेव सूत्रकार एव विशदयिष्यति मतत्रयोपन्यासेन, इति न जीवस्योपक्रमोपसंहाराविति हृदयम्। भाष्यमस्य निगदम्।।१९।।

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः।।२०।। ब्रह्मणो विज्ञानात्मनाऽभेदस्यापि सत्त्वेन विज्ञानात्मनोपक्रमः। कथमभेदः? प्रतिज्ञासिद्धेः=एवं सत्येव आत्मविज्ञानेन सर्वविज्ञानप्रतिज्ञा सिद्ध्येत्, नान्यथा। तथाचाकाशादीनामिव जीवस्यापि ब्रह्मकार्यत्वमभिप्रेत्याश्मरथ्यमतम्। तदिदमुक्तम्– *अस्त्यत्रेत्यादिना*।। *अभेदांशेनेति*।। कार्यकारणयोर्भेदाभेदस्वीकारादिति भावः।।२०।।

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः।।२१।। औडुलोमिराचार्यस्तु उत्क्रमिष्यत एवम्भावं भाविनमभिप्रेत्य विज्ञानात्मनोपक्रम इति मन्यते स्म। अत्र प्रमाणं श्रुतिमुदाहरति– *एष सम्प्रसाद इति*।। अस्याः श्रुतेरुक्तोचार्यमतरीत्या विवरणम्– *यथा लोक इति*।। तथाचैतन्मते मुक्तिरुत्क्रमणापेक्षेति सिद्धान्त इति भावः। स्वेन रूपेण=चितितन्मात्रेणेत्यर्थः। तथाच सूत्रम्–''चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः'' इति। अयं च पक्षो भेदवादेन। यतः परमात्मनः प्राप्यत्वमुत्क्रमणापेक्षं मन्यते। तदिदमाह– *परं पुरुषमुपैतीति हि तत्रार्थ इति*।।२१।।

*अवस्थितेरिति काशकृत्स्नः।।२२।। ब्रह्मण एव जीवभावेनावस्थानाद् भेदस्य कल्पितत्वादत्यन्ताभेद एव जीवब्रह्मणोरिति काशकृत्स्नमतम्। अत्र प्रमाणं श्रुतिः– *अनेन जीवेनात्मनेति*।। तत्र प्रथममते व्याकरणात् पूर्वं जीवभावोल्लेखोऽनुपपन्नः, द्वितीयमते वर्तमानकालेऽपि जीवस्य परमात्मत्ववर्णनात् तदुपपत्तिः। एकविज्ञानेन सर्वविज्ञानं

वस्तुगत्याऽभेदेऽप्युपपद्यत इति न प्रथममतोपष्टम्भकश्रुतेरत्र विरोधः। ''एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाये'' ति श्रुतेर्दहराधिकरणादौ मुखं व्यादाय स्वपितीतिवद् योजनाश्रयणात्तु न द्वितीयमतोपष्टम्भकश्रुतिविरोधः। अत इदमेव मतं सिद्धान्त इति। ननु–कथमिदं ज्ञायते सूत्रकारस्येदमेव मतं विवक्षितमिति–चेत्, अत्र ब्रूमः–''नात्मा श्रुतेर्नित्यत्वाञ्च ताभ्यः'' इति स्पष्टमात्मनित्यत्वश्रवणेन हेतुना तदनुत्पत्त्यादेः साधनाद् न प्रथमं मतं सूत्रकाराभिमतम्। एवम्–''कार्यं बादरिरस्य गत्युपपत्तेः'' इति कार्यब्रह्मप्राप्तावेव गत्यपेक्षाया वर्णनात् परब्रह्मप्राप्तौ गत्यनपेक्षासूचनात्, ''स्वेन रूपेणे'' त्यत्र स्वं रूपं ब्राह्मं रूपमपि, न तु जैवमात्रमिति ''एवमप्युपन्यासादविरोधं बादरायणः'' इति सूत्रेण केवलस्यौडुलोमिमतस्य मुक्तौ सूत्रकारैरस्वीकाराञ्च न द्वितीयमते सूत्रकाराणामाशयः, किन्तु आत्मनित्यत्वादिसाधनाद् उत्क्रमणानपेक्षत्वस्य मुक्तौ व्यवस्थापनाञ्च तृतीयं मतमेव सूत्रकाराणां मतमिति। न केवलं सूत्रस्वारस्यम्, किन्तु श्रुतिस्वारस्यमपि प्रथमतृतीययोस्तृतीयमेव योग्यमित्यत्र वर्तत इत्याह– *न च तेजः प्रभृतीनामिवेति*।। ''एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे'' त्यादौ सर्वत्र सृष्टिप्रकरणे प्राणादीनामेवोत्पत्तिश्रवणादिति भावः। द्वितीयतृतीययोरपि तृतीयस्यैवौचित्ये कारणं सूचयति– *औडलोमिपक्षे पुनरिति*।।

''अत्र ब्रह्म समश्नुते'' इत्यवस्थान्तरानपेक्षत्वस्य मोक्षे प्रतिपादनात् तन्मते तद्विरोध इति हृदयम्। मोक्षसाधनज्ञानविषयत्वायोगादपि नाश्मरथ्यादिमतं युक्तमित्याह– *विकारात्मकत्वे हीति*।। ननु–''यथाऽग्नेर्ज्वलतो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठन्त प्राणेभ्यो देवा देवेभ्यो लोका'' इति जीवस्यापि सृष्टिः कौषीतकिब्राह्मण आम्नायत इत्यत आह– *अत एवोत्पत्तिरपीति*।। अपिशब्देन विनाशस्य ग्रहणम्। तथाच–''अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा'' इति वाक्यमनुत्पत्तेरप्युपलक्षणमिति प्रकृतप्रकरणविरोधादा-मरथ्याचार्यमतं न युक्तमिति भावः। अधिकं वार्तिकादौ द्रष्टव्यम्।।

यद्यपि–''अथातो ब्रह्मजिज्ञासा'' इत्यत्रैवात्मा वा अरे द्रष्टव्य इति वाक्यस्यापि विषयत्वाद् जीवात्मपरमात्मत्वे जिज्ञासाया एवानुपपत्तेरुक्तं वायमात्मानमधिकृत्य प्रवृत्तं विषयवाक्यतया गृहीतम्, अत एव शास्त्रयोनित्वाधिकरणे–''अस्य महतो भूतस्य निःश्वसितमि'' त्युक्तमात्मानमधिकृत्य प्रवृत्तं विषयवाक्यतया गृहीतम्, अन्यथा तु तस्य ब्रह्मसर्वज्ञत्वसाधकत्वमेव न स्यात्; तथापीत एवाकृष्य तत्र पूर्वोत्तरपक्षौ प्रवर्तितौ, इति जिज्ञासाधिकरणविषयो न जीवातिरिक्तं ब्रह्म, किन्तु तदभिन्नमित्युपसंहारार्थत्वादस्याधिकरणस्य, गतिसामान्यमुपक्रमोपसंहाराभ्यामद्वितीये ब्रह्मण्येव, न तु सगुण इति फलितम्।।

अनेन च–अथातो ब्रह्मजिज्ञासा, शास्त्रयोनित्वात्, तत्तु समन्वयादिति त्रिसूत्र्या उपसंहारः क्रियते। अत एव–वाक्यान्वयादिति समन्वयसूत्रगतस्यान्वयपदस्यात्र प्रयोगः।।

नन्वेवं सति–जन्माद्यस्य यत इति सूत्रेण किम्? एकविज्ञानेन सर्वविज्ञानस्यात्यन्ताभेदमादायैव वर्णनादिति–चेत्, न; न हि सर्वत्रात्यन्ताभेदेन सर्वविज्ञानम्; आकाशादीनां ब्रह्मविकारत्वाङ्गीकारेण ब्रह्मजगतोः कार्यकारणभावेनैव प्रतिज्ञासिद्धेर्निर्वाहात्। तथाच ब्रह्मजगतोर्बाधायां सामानाधिकरण्यम्, जीवब्रह्मणोस्त्वत्यन्ताभेदे सामानाधिकरण्यमिति वस्तुस्थितिः। तथाच–भेदव्यपदेशो ब्रह्मणः स्वकार्यदृष्टयैव, अथवा तदुपाधिकदृष्टयैव, न तु जीवस्वरूपदृष्टयेति सूचनार्थं जन्माधिकरणमिति भावः।।२२।। इति षष्ठं वाक्यान्वयाधिकरणम्।।

इति प्रदीपः वाक्यान्वयाधिकरणम् समाप्तम्

भामती

ननु मैत्रेयीब्राह्मणोपक्रमे याज्ञवल्क्येन गार्हस्थ्याश्रमादुत्तमाश्रमं यियासता मैत्रेय्या भार्याया: कात्यायन्या सहार्थसंविभागकरण उक्ते मैत्रेयी याज्ञवल्क्यं पतिममृतत्वार्थिनी पप्रच्छ–यन्नु म इयं भगो: सर्वा पृथ्वी वित्तेन पूर्णा स्यात्किमहं तेनामृता स्यामुत नेति। तत्र नेति होवाच याज्ञवल्क्य:। यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेन। एवं वित्तेनामृतत्वाशा भवेद्यदि वित्तसाध्यानि कर्माण्यमृतत्वाय युज्येरन्। तदेव तु नास्ति, ज्ञानसाध्यत्वादमृतत्वस्य। कर्मणां च ज्ञानविरोधिनां तत्सहभावित्वानुपपत्तैरिति भाव:। सा होवाच मैत्रेयी येनाहं नामृता स्यां किमंह तेन कुर्यां यदेव भगवान् वेद तदेव में ब्रूहि। अमृतत्वसाधनमिति शेष:। तत्रामृतत्वसाधनज्ञानोपन्यासाय वैराग्यपूर्वक्तवात्तस्य रागविषयेषु तेषु तेषु पतिजायादिषु वैराग्यमुत्पादयितुं याज्ञवल्क्यो न वा अरे पत्यु: कामायेत्यादिवाक्यसन्दर्भमुवाच। आत्मौपाधिकं हि प्रियत्वमेषं न तु साक्षात् प्रियाण्येतानि, तस्मादेतेभ्य: पतिजायादिभ्यो विरम्य यत्र साक्षात्प्रेम स एवात्मा वा अरे द्रष्टव्य: श्रोतव्यो मन्तव्यो निदिध्यासितव्य:। वाशब्दोऽवधारणे। आत्मैव द्रष्टव्य: साक्षात्कर्तव्य:। एतत्साधनानि च श्रवणादीनि विहितानि श्रोतव्य इत्यादिना। कस्मात्? आत्मनो वारे दर्शनेन श्रवणादिसाधनेनेदं जगत्सर्व विदितं भवतीति वाक्यशेष:।

यतो नामरूपात्मकस्य जगतस्तत्वं पारमार्थिकं रूपमात्मैव भुजङ्गस्येव समारोपितस्य तत्त्वं रज्जुस्तस्मादात्मनि विदिते सर्वमिदं जगत्तत्त्वं विदितं भवति रज्ज्वामिव विदितायां समारोपितभुजङ्गस्य तत्त्वं विदितं भवति, यतस्तस्मादात्मैव द्रष्टव्यो न तु तदतिरिक्तं जगत् स्वरूपेण द्रष्टव्यम्। कुत:? यतो ब्रह्म तं परादाद् ब्रह्मणजातिब्राह्मणोऽहमित्यभिमान इति यावत् । परादात्, पराकुर्यात्, अमृतत्वपदात्। कं? योऽन्यत्रात्मनो ब्रह्म ब्राह्मणजातिं वेद। एवं क्षत्रादिष्वपि द्रष्टव्यम्। आत्मैव जगतस्तत्त्वं न तु तदतिरिक्तं तदित्यत्रैव भगवती श्रुतिरुपपत्तिं दृष्टान्तप्रबन्धेनाह। यत् खलु यद्ग्रहं विना न शक्यते ग्रहीतुं तत्ततो न व्यतिरिच्यते। यथा रजतं शुक्तिकाया भुजङ्गो वा रज्जो: दुन्दुभ्यादिशब्दसामान्याद्वा

तत्तच्छब्दभेदाः, न गृह्यन्ते च चिद्रूपग्रहणं विना स्थितिकाले नामरूपाणि, तस्मान्न चिदात्मनो भिद्यन्ते तदिदमुक्तं *स यथा दुन्दुभेर्हन्यमानस्य इति*। दुन्दुभिग्रहणेन तद्गतं शब्दसामान्यमुपलक्षयति। न केवलं स्थितिकाले नामरूपप्रपञ्चश्चिदात्मातिरेकेणाग्रहणाच्चिदात्मनो न व्यतिरिच्यतेऽपि तु नामरूपोत्पत्तेः प्रागपि चिद्रूपावस्थानात् तदुपादानत्वाच्च नामरूपप्रपञ्चस्थ तदनतिरेकः, रज्जूपादानस्येव भुजङ्गस्य रज्जोरनतिरेक इत्येतद् दृष्टान्तेन साधयति भगवती श्रुतिः। स यथार्द्रैवोऽग्नेरभ्याहितस्य पृथग्धमूा विनिश्चरन्त्येवं वा अरेऽस्य महतो भूतस्य निःश्तसितमेतद्यदृग्वेद इत्यादिना चतुर्विधो मन्त्र उक्तः, इतिहास इत्यादिनाऽष्टविधं ब्राह्मणमुक्तम्।

एतदुक्तं भवति—यथाग्निमात्रं प्रथममवगम्यते क्षुद्राणां विस्फुलिङ्गानामुपादानम्। अथ ततो विस्फुलिङ्गा व्युच्चरन्ति न चैतेऽग्नेस्तत्त्वान्यत्त्वाभ्यां शक्यन्ते निर्वक्तुम्। एवमृग्वेदादयोऽप्यल्पप्रयत्नात् ब्रह्मणो व्युच्चरन्तो न ततस्तत्त्वान्यत्त्वाभ्यां निरुच्यन्ते ऋगादिभिर्नामोपलक्ष्यते, यदा च नामधेयख्येयं गतिस्तदा तत्पूर्वकस्य रूपधेयस्य कैव कथेति भावः। न केवलं तदुपादानत्वात्ततो न व्यतिरिच्यते नामरूपप्रपञ्चः, प्रलयसमये च तदनुप्रवेशात्ततो न व्यतिरिच्यत। यथा सामुद्रमेवाम्भः पृथिवीतेजः-सम्पर्कात् काठिन्यमुपगतं सैन्धवखिल्यः, स हि स्वाकरे समुद्रे क्षिप्तोऽम्भ एव भवत्येवं चिदम्भोधौ लीनं जगच्चिदेव भवति न तु ततोऽतिरिच्यत इति। एतद्दृष्टान्तप्रबन्बेनाह *स यथा सर्वासामपाम् इत्यादि*। दृष्टान्तप्रबन्धमुक्तवा दार्ष्टान्तिके योजयति *एवं वा अरे इदं महद् इति*। वृहत्त्वेन ब्रह्मोक्तम्। इदं ब्रह्मेत्यर्थः। भूतं सत्यम्, अनन्तं नित्यम्, अपारं सर्वगतं, विज्ञानघनो विज्ञानैकरस इति यावत्। एतेभ्यः कार्यकारणभावेन व्यवस्थितेभ्यो भूतेभ्यः समुत्थाय साम्येनोत्थय कार्यकरणसङ्घातस्य ह्यवच्छेदाद् दुःखित्वशोक्तिवादवच्छिन्ने चिदात्मनि तद्विपरीतेऽपि प्रतीयन्ते यथोदकप्रतिबिम्बिते चन्द्रमसि तोयगताः कम्पादयस्तदिदं साम्येनोत्थार्न, यदा त्वागमाचार्य्योपदेशपूर्वक-मनननिदिध्यासनप्रकर्षपर्य्यन्तजोऽस्य ब्रह्मस्वरूपसाक्षात्कार उपावर्त्तते, तदा निर्मृष्टनिखिल-सवासनाविद्यामलस्य कार्य्यकरणसङ्घातभूतस्य विनाशे तान्येव भूतानि नश्यन्त्यु तदुपाधिश्चिदात्मनः खिल्यभावो विनश्यति। ततो न प्रेत्य कार्य्यकरणभूतनिवृत्तौ रूपगन्धादिसंज्ञास्तीति। न प्रेत्य संज्ञास्तीति संज्ञामात्रनिषेधादात्मा नास्तीति मन्यमाना सा मैत्रेयी होवाच, अत्रैव मा भगवानमूमुहन्मोहितवान् न प्रेत्य संज्ञास्तीति। स होवाच याज्ञवल्क्यः स्वाभिप्रायं द्वैते हि रूपादिविशेषसंज्ञानिबन्धनो दुःखित्वाद्यभिमानः। आनन्दज्ञानैकरसब्रह्माद्वयानुभवे तु तत् केन कं पश्येत् ब्रह्म वा केन विजानीयात् नहि तदास्य कर्मभावोऽस्ति स्वप्रकाशत्वात्। एतदुक्तं भवति—न संज्ञामात्रं मया व्यासेधि किन्तु विशेषसंज्ञेति। तदेवममृतत्वफलेनोपक्रमान्मध्ये चात्मविज्ञानेन सर्वविज्ञानं

प्रतिज्ञाय तदुपपादनाद्, उपसंहारे च महद्भूतमनन्तमित्यादिना च ब्रह्मरूपाभिधानाद् द्वैतनिन्दया च चाद्वैतगुणकीर्त्तनाद् ब्रह्मैव मैत्रेयोब्राह्मणे प्रतिपाद्यं न जीवात्मेति नास्ति पूर्वपक्ष इत्यनारभ्यमेवेदमधिकरणम्।

अत्रोच्यते–भोक्तृत्वज्ञातृताजीवरूपोत्थानसमाधये मैत्रेयीब्राह्मणे पूर्वपक्षेणोपक्रमः कृतः। पतिजायादिभोग्यसम्बन्धो नाभोक्तुर्ब्रह्मणो युज्यते नापि ज्ञानर्क्तृत्वमकर्त्तुः साक्षाच्च महतो भूतस्य विज्ञानात्मभावेन समुत्थानाभिधानं विज्ञानात्मन एव द्रष्टव्यत्वमाह। अन्यथा ब्रह्मणो द्रष्टव्यत्वपरेऽस्मिन् ब्राह्मणे तस्य विज्ञानात्मत्वेन समुत्थानाभिधानमनुपयुक्तं स्यात्तस्य तु द्रष्टव्यत्वमुपयुज्यते इत्युपक्रममात्रं पूर्वपक्षः कृतः। *भोक्त्रर्थत्वाच्च भोग्यजातस्येति* तदुपोद्बलनमात्रम्। सिद्धान्तस्तु निगदव्याख्यातेन भाष्येणाक्तेः॥१९॥

तदेवं पौर्वापर्य्यालोचनया मैत्रेयीब्राह्मणस्य ब्रह्मदर्शनपरत्वे स्थिते भोक्त्रा जीवात्मनोपक्रममाचार्य्यदेशीयमतेन तावत्समाधत्ते सूत्रकारः– *प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः*। यथा हि वह्नेर्विकारा व्युच्चरन्तो विस्फुलिङ्गा न वह्नेरत्यन्तं भिद्यन्ते तद्रूपनिरूपणत्वान्नापि ततोऽत्यन्तमभिन्नावह्नेरिव परस्परव्यावृत्त्यभावप्रसङ्गात्, तथा जीवात्मानोऽपि ब्रह्मविकारा न ब्रह्मणोऽत्यन्तं भिद्यन्ते चिद्रूपत्वाभावप्रसङ्गान्नाप्यत्यन्तं न भिद्यन्ते परस्परं व्यावृत्त्यभावप्रसङ्गात्, सर्वज्ञं प्रत्युपदेशवैयर्थ्याच्च। तस्मात् कथञ्चिद्भेदो जीवात्मनामभेदश्च। तत्र तद्विज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्धये विज्ञानात्मपरमात्मनोरभेदमुपादाय परमात्मनि दर्शयितव्ये विज्ञानात्मनोपक्रम इत्याश्मरथ्य आचार्य्यो मेने॥२०॥

आचार्यदेशीयान्तरमतेन समाधत्ते–उत्क्रमिष्यत एवंभावादित्यौडुलोमिः। जीवो हि परमात्मनोऽत्यन्तं भिन्न एव सन् देहेन्द्रियमनोबुद्ध्युपधानसम्पर्कात्सर्वदा कलुषस्तस्य च ज्ञानध्यानादिसाधनानुष्ठानात् सम्प्रसन्नस्य देहेन्द्रियादिसङ्घातादुत्क्रमिष्यतः। परमात्मनैक्योपपत्तेरिदमभेदेनोपक्रमणम्। एतदुक्तं भवति–भविष्यन्तमभेदमुपादाय भेदकालेऽप्यभेद उक्तः, यथाहु। पाञ्चरात्रिकाः–

आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च।
मुक्तस्य तु न भेदोऽस्ति भेदहेतोरभावतः॥ इति।

अत्रैव श्रुतिमुपन्यस्यति *श्रुतिश्चैवम इति*। पूर्वं देहेन्द्रियाद्युपाधिकृतं कलुषत्वमात्मन उक्तं, सम्प्रति स्वाभाविकमेव जीवस्य नामरूपप्रपञ्चाश्रयत्वलक्षणं कालुष्यं पार्धिवानामणूनामिव श्यामत्वं

केवलं पाकेनेव ज्ञानध्यानादिना तदपनीय जीवः परात्परतरं पुरुषमुपैतीत्याह *क्वचिच्च जीवाश्रयमपि इति*। नदीनिदर्शनं यथा सोम्येमा नद्य इति।।२१।।

तदेवमाचार्य्यदेशीयमतद्वयमुक्तवात्रापरितुष्यन्नाचार्यमतमाह सूत्रकारः—अवस्थितेरिति काशकृत्स्नः। एतद् व्याचष्टे *अस्यैव परमात्मनः इति*। न जीव आत्मनोऽन्यो नापि तद्विकारः किन्त्वात्मैवाविद्योपधानकल्पितावच्छेदः, आकाश इव घटमणिकादिकल्पितावच्छेदो घटाकाशो मणिकाकाशो न तु परमाकाशादन्यस्तद्विकारो वा। ततश्च जीवात्मनोपक्रमः परमात्मनैवोपक्रमस्तस्य ततोऽभेदात्। स्थूलदर्शिलोकप्रतीतिसौकर्यायौपाधिकेनात्मरूपेणोपक्रमः कृतः। अत्रैव श्रुतिं प्रमाणयति *मथा च इति*। अथ विकारः परमात्मनो जीवः कस्मान्न भवत्याकाशादिवदित्याह *न च तेजः प्रभृतीनाम् इति*। नहि यथा तेजः प्रभृतीनामात्मविकारत्वं श्रूयते एवं जीवस्येति। आचार्यत्रयमतं विभजते *काशकृत्स्नस्याचार्यस्य इति*। आत्यन्त्किे सत्यभेदे कार्यकारणभावाभावात् अनात्यन्तिकोऽभेद आस्थेयस्तथा च कथञ्चिद भेदोऽपीति तमास्थाय कार्यकारणभाव इति। किपानपीत्युक्तं मतत्रयमुक्त्वा काशकृत्स्नीयमतं साधुत्वेन निर्द्धारयति *तत्र तेषु मध्ये काश कृत्स्नीयं मतम् इति*। आत्यन्तिके हि जीवपरमात्मनोरभेदे तात्त्विकेऽनाद्यविद्योपाधिकल्पितो भेदस्तत्त्वमसीति जीवात्मनो ब्रह्मभावतत्त्वोपदेशश्रवणमनननिदिध्यासनप्रकर्षपर्यन्तजन्मना साक्षात्कारेण विद्यया शक्यः समूलकाषं कषितुं रज्ज्वामहिविभ्रम इव रज्जुतत्त्वसाक्षात्कारेण, राजपुत्रस्येव च म्लेच्छकुले वर्द्धमानस्यात्मनि समारोपितो म्लेच्छभावो राजपुत्रोऽसीति आप्तोपदेशेन। न तु मृद्विकारः शरावादिः शतशोपि मृग्मृदिति चिन्त्यमानस्तज्जन्मना मृद्भावसाक्षात्कारेण शक्यो निवर्तयितुं, तत् कस्य हेतोः? तस्यापि मृदो भिन्नामिन्नस्य तात्त्विक्तवात्, वस्तुनस्तु ज्ञानेनोच्छेत्तुमशक्यत्वात्, सोऽयं प्रतिपिपादयिषितार्थानुसारः। अपि च जीवस्यात्मविकारत्वे तस्य ज्ञानध्यानादिसाधनानुष्ठानात् स्वप्रकृतावप्यये सति नामृतत्वस्याशास्तीत्यपुरुषार्थत्वममृतत्वप्राप्तिश्रुतिविरोधश्च। काशकृत्स्नमते त्वेतदुभयं नास्तीत्पाह *एवञ्च सति इति*। ननु यदि जीवो न विकारः किन्तु ब्रह्मैव, कथं तर्हि तस्मिन्नामरूपाश्रयत्वश्रुतिः कथश्च यथाग्नेः क्षुद्रा विस्फुलिङ्गा इति ब्रह्मविकारश्रुतिरित्याशङ्कामुपसंहारव्याजेन निराकरोति *अतञ्च स्वाश्रस्य इति*। यतः प्रतिपिपादयिषितार्थानुसारश्चामृतत्वप्राप्तिश्च विकारपक्षे न सम्भवतः, अतश्चेति योजना। द्वितीयपूर्वपक्षवीजमनयैव त्रिसूत्र्यापाकरोति *यदप्युक्तम् इति*। शेषमतिरोहितार्थ व्याख्यातार्थञ्च। तृतीयपूर्वपक्षवीजनिरासे काशकृत्स्नीयेवेत्यवधारणं तन्मताश्रयणेनैव तस्य, शक्यनिरासत्वात्। ऐकान्तिके ह्यद्वैते आत्मनोऽन्यकर्मकरणे केन कं पश्येदिति केन कं पश्येदिति आत्मनश्च कर्मत्वं विज्ञातारमरे केन

विजानीयादिति शक्यं निषेद्धुंम। भेदाभेदपक्षे वैकान्तिके वा भेदे सर्वमेतदद्वैताश्रयम-शक्यमित्यवधारणस्यार्थः। न केवलं काशकृत्स्नीयदर्शनाश्रयणेन भूतपूर्वगत्या विज्ञातृत्वमपि तु श्रुतिपौर्वापर्यपर्यालोचनयाप्येवमेवेत्याह *अपि च यत्र हि इति*। कस्मात् पुनः काशकृत्स्नस्य मतमास्थीयते नेतरेषामाचार्याणामित्यत आह *दर्शितं तु पुरस्ताद् इति। काशकृत्स्नीयस्य मतस्य श्रुतिप्रबन्धोपन्यासेन पुनः श्रुतिमत्त्वं स्मृतिमत्त्वं चोपसंहारोपक्रममाह *अतश्च इति*। क्वचित्पाठ आतश्चेति, तस्यावश्यं चेत्यर्थः। जननजरामरणभीतयो विक्रियास्तासां सर्वासां महानज इत्यादिना प्रतिषेधः परिणामपक्षेऽन्यस्य चान्यभावपक्षे ऐकान्तिकाद्वैतप्रतिपादनपरा एकमेवाद्वितीयमित्यादयो द्वैतदर्शननिन्दापराश्चान्योऽसावन्योऽहमस्मीत्यादयो जन्मजरादिविक्रियाप्रतिषेधपराश्चैष महानज इत्यादयः श्रुतय उपरुध्येरन्। अपि च यदि जीवपरमात्मनोर्भेदाभेदावास्थोयेयातां ततस्तयोर्मिथो विरोधात्समुच्चयाभावादेकस्य बलीयस्त्वे नात्मनि निरपवादं विज्ञानं जायेत, बलीयसैकेन दुर्बलपक्षावलम्बिना ज्ञानस्य बाधतात्। अथ त्वगृह्यमाणविशेषतया न बलाबलावधारणं, ततः संशये सति न सुनिश्चितार्थमात्मनि ज्ञानं भवेत् सुनिश्चितार्थं च ज्ञानं मोक्षोपायः श्रूयते ''वेदान्सविज्ञानसुनिश्चितार्थाः'' इति। तदेतदाह *अन्यथा मुमुक्षूणाम् इति*। एक्तवमनुपश्यत इति श्रुतिर्न पुनरेक्तवानेक्तवे अनुपश्यत इति। ननु यदि क्षेत्रज्ञपरमात्मनोरभेदो भाविकः, कथं तर्हि व्यपदेशबुद्धिभेदौ क्षेत्रज्ञः परमात्मेति? कथञ्च नित्यशुद्धबुद्धमुक्तस्वभावस्य भगवतः संसारिता? अविद्याकृतनामरूपोपाधिवशादिति चेत्, कस्येयमविद्या? न तावज्जीवस्य, तस्य परमात्मनो व्यतिरेकाभावात्। नापि परमात्मनस्तस्य विद्यैकरसस्याविद्याश्रयत्वानुपपत्तेः। तदत्र संसारित्वा-संसारित्वविद्याविद्यावत्त्वरूपविरुद्धधर्मसंसर्गाद् बुद्धिव्यपदेशभेदाच्चस्ति जीवेश्वरयोर्भेदीऽपि भाविक इत्यत आह *स्थिते च परमात्मक्षेत्रज्ञात्मैकत्वे इति*। न तावद्भेदाभेदावेकत्र भाविकौ भवितुमर्हत इति विप्रपञ्चितं प्रथमे पादे। द्वैतदर्शननिन्दया चैकान्तिकाद्वेतप्रतिपादनपराः पौर्वापर्यालोचनया सर्वे वेदान्ताः प्रतीयन्ते। तत्र यथा बिम्बादवदातात्तात्त्विके प्रतिविम्बानामभेदेऽपि नीलमणिकृपाण-कानाद्युप्रधान्भेदात् काल्पनिको जीवानां भेदो बुद्धिव्यपदेशभेदौ वर्तयति-इदं बिम्बमवदातमिमानि च प्रतिविम्बानि नीलोस्पलपलाशश्यामलानि वृत्तदीर्घादिभेदभाञ्जि बहूनीति, एवं परमात्मनः शुद्धस्वभावाज्जीवानामभेद ऐकान्तिकेऽप्यनिर्वचनीवानाद्यविद्योपघानभेदात् काल्पनिको जीवानां भेदो बुद्धिव्यपदेशभेदावयं च परमात्मा शुद्धविज्ञानानन्दस्वभावः, इमे च जीवा अविद्याशोक-दुःखाद्युपद्रवभाज इति वर्तयति। अविद्योपधानं च यद्यपि विद्यास्वभावे परमात्मनि न साक्षादस्ति, तथापि तत्प्रतिविम्बकल्पजीवद्वारेण परस्मिन्नुच्यते। न चैवमन्योन्याश्रयो जीवविभागाश्रयाविद्या, अविद्याश्रयश्च जीवविभाग इति बीजाङ्कुरवदनादित्वात्। अत एव कामुद्दिश्यैष ईश्वरो

मायामारचयत्यनर्थिकामुद्देश्यानां सर्गादौ जीवानामभावात्, कथं चात्मानं संसारिणं विविधवेदनाभाजं कुर्यादित्याद्यनुयोगो निरवकाशः न खल्वादिमान् संसारो नाप्यादिमानविद्याजीवविभागो येनानुयुज्येतेति। अत्र च नामग्रहणेनाविद्यामुपलक्षयति। स्यादेतत्–यदि न जीवाद् ब्रह्म भिद्यते हन्त जीवः स्फुट इति ब्रह्मापि तथा स्यात्तथा च निहितं गुहायामिति नोपपद्यत इत्यत आह *नहि सत्यम् इति*। यथा हि विम्वस्य मणिकृपाणादयो गुहा एवं ब्रह्मणोऽपि प्रतिजीवं भिन्ना अविद्या गुहा इति। यथा प्रतिविम्बेषु भासमानेषु विम्बं तदभिन्नमपि गुह्यमेवं जीवेषु भासमानेषु तदभिन्नमपि ब्रह्म गुह्यम्। अस्तु तर्हि ब्रह्मणोऽन्यद् गुह्यमित्यत आह *न च ब्रह्मणोऽन्यः इति*। ये त्वाश्मरथ्यप्रभृतयः *निबंन्धं कुर्वन्ति ते वेदान्तार्थम् इति*। ब्रह्मणः सर्वात्मना भागशो वा परिणामाभ्युपगमे तस्य कार्यत्वादनित्यत्वाच्च तदाश्रितो मोक्षोऽपि तथा स्यात्। यदि त्वेवमपि मोक्षं नित्यमकृतकं ब्रूयुस्तत्राह *न्यायेन इति*। एवं ये नदीसमूद्रनिदर्शनेनामुक्तेर्भेदं मुक्तस्य चाभेदं जीवस्यास्थिषत, तेषामपि न्यायेनासङ्गतिः, न जातु घटः पटो भवति। ननूक्तं यथा नदी समुद्रो भवतीति। का पुनर्नद्यभिमताऽऽयुष्मतः। किं पाथः परमाणव उतैषां संस्थानभेद, आहोस्वित्तदारब्धोऽवयवी? तत्र संस्थानभेदस्य वाऽवयविनो वा समुद्रनिवेशे विनाशात्, कस्य समुद्रेणैक्ता? नदीपाथः परमाणूनान्तु समुद्रपाथः परमापुश्यः पूर्वावस्थितेभ्यो भेद एव नाभेदः, एवं समुद्रादपि तेषां भेद एव।

ये तु काशकृत्स्नीयमेव मतमास्थाय जीवं परमात्मनोंऽशमाचख्युस्तेषां कथं 'निष्फलं निष्क्रियं शान्तम्' इति न श्रुतिविरोधः? निष्फलमिति सावयवत्वं व्यासेधति, न तु सांशत्वम्। अंशश्च जीवः परमात्मनो नभस इव कर्णनेमिमण्डलावच्छिम्नं नभः शब्दश्रवणयोग्यं वायोरिव च शरीरावच्छिन्नः पञ्चवृत्तिः प्राण इति चेत्, न तावन्नभो नभसोंऽशस्तस्व तत्त्वात्। कर्णनेमिमण्डलावच्छिन्नमंश इति चेत् हन्त तर्हि प्राप्ताप्राप्तविवेकेन कर्णनेमिमण्डलं वा तत्संयोगो वेत्युक्तं भवति। न च कर्णनेमिमण्डलं तस्यांशतस्तस्य ततो भेदात्। तत्संयोगो नभोधर्मत्वात्तस्यांश इति चेत्, न, अनुपपत्तेः। नभोधर्मत्वे हि तदनवयवं सर्वत्राभिन्नमिति तत्संयोगः सर्वत्र प्रथेत। नह्यस्ति सम्भवोऽनवयवमव्याप्य वर्त्तत इति। तस्मात्तत्रास्ति चेद्व्याप्यैव, न चेद्व्याप्नोति तत्र नास्त्येव। व्याप्यैवास्ति केवलं प्रतिसम्बन्ध्यधीननिरूपणतया न सर्वत्र निरूप्यत इति चेत्, न नाम निरूप्यताम। तत्संयुक्तं तु नभः श्रवणयोग्यं मर्वत्रास्तीति सर्वत्र श्रवणप्रसङ्गः। न च भेदाभेदयोरन्यतरेणांशः शक्यो निर्वक्तुम्। न चोभाभ्यां, विरुद्धयोरेकत्रासमवायादित्युक्तम्। तस्मादनिर्वचनीयानाद्यविद्यापरिकल्पित एवांशो नभसो न भाविक इति युक्तम्। न च काल्पनिको ज्ञानमात्रायत्तजीवितः कथमविज्ञायमानोऽस्ति, असंश्चांशः कथं शब्दश्रवणलक्षणाय कार्याय कल्पते? न जातु रज्ज्वामज्ञायमान उरगो भयकम्पादिकार्य्याय पर्याप्त इति वाच्यम, अज्ञातत्वासिद्धेः। कार्य्यव्यङ्ग्यत्वादस्य । कार्योत्पादात् पूर्वमज्ञातं कथं

कार्योत्पादाङ्गमिति चेत्, न, पूर्वपूर्वकार्योत्पादव्यङ्ग्यत्वादसत्यपि ज्ञाने तत्संस्कारानुवृत्तेरनादित्वाच्च कल्पनातत्संस्कारप्रवाहस्य। अस्तु वानुपपत्तिरेव कार्यकारणयोर्मायात्मकत्वात्। अनुपपत्तिर्हि मायामुपोद्बलयति। अनुपपद्यमानार्थत्वान्मायायाः। अपि च भाविकांशवादिनां मते भाविकांशस्य ज्ञानेनोच्छेत्तुमशक्यत्वान्न ज्ञानध्यानसाधनो मोक्षः स्यात् तदेवमाकाशांश इव श्रोत्रमनिर्वचनीयम्। एवं जीवो ब्रह्मणोंऽश इति काशकृत्स्नीवं मतमिति सिद्धम्।।२२।।

इति भामती वाक्यान्वयाधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ वाक्यान्वयाधिकरणम्॥५॥

सर्वत्र जीवेश्वरयोरेकशब्दविषयत्वे प्रतीयमाने तत्सामानाधिकरण्यं कथमि त्येतन्निरूपणायेद-मधिकरणमारभ्यते–

॥सू॥ वाक्यान्वयात्॥१९॥

बृहदारण्यके श्रूयतेऽस्य विषयः–'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति' इत्यारभ्य 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यादि श्रूयते॥

इह 'आत्मनस्तु कामाय' इत्यादिवाक्यैः भोगप्रीतियुक्ततया आत्मनः संसारित्वावगमात् अत्र प्रतिमाद्यमानो जीवः॥

इति सन्देहेन पूर्वपक्षे प्राप्ते–सिद्धान्तयामः परमेश्वर इति। कुतः 'अमृतत्वस्य तु नाशास्ति वित्तेन' 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्' 'इदं सर्वं यदयमात्मा' इत्यादेः, 'येनेदं सर्वं विजानाति तं केन विजानीयात्' इत्यवसानस्य कृत्स्नस्य वाक्यस्य परमेश्वरेऽन्वयात् भोगप्रीतियुक्तस्य जीवस्यानुवादेन परमेश्वरप्रतिपादनादविरोधः॥

कथमिह सर्वत्र जीवशब्देन परमेश्वराभिधानमिति चेत् तदिदं मतान्तरेणोपपादयति–

॥सू॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः॥२०॥

'आत्मनि खल्वरे दृष्टे' इत्यादिनोक्तस्यैकविज्ञानेन सर्वविज्ञानस्य सिद्धये जीवस्य तत्कार्यतया तदव्यतिरिक्ततां ज्ञापयितुं जीवशब्देन परमेश्वरस्याभिधानमित्याश्मरथ्यो मन्यते॥

।।सू।। उत्क्रमिष्यत एवंभावादित्यौडुलोमिः।।२१।।

उत्क्रमिष्यतो मुक्तस्य परमेश्वरस्वरूपभावादात्मशब्देन परमेश्वराभिधानमित्यौडुलोमिर्मेने।।

।।सू।। अवस्थितेरिति काशकृत्स्नः।।२२।।

'य आत्मनि तिष्ठन्' इत्यादिश्रुतेर्जीवात्मनि परमेश्वरस्यात्मतया अवस्थानाज्जीवशब्दवाच्यत्वं परमेश्वरस्येतिं काशकृत्स्नो मेने। इदमेव मतं सूत्रकारस्य। मतद्वयमुपन्यस्य तद्विरोधेनैतदभिधानात् अन्यस्यानभिधानाञ्च निश्चीयते। प्रबलश्रुत्यानुगुण्यं चात्र संभवति। तथा हि–**अथर्वशिरसि** सर्वचिदचिदनुप्रवेशात् परमेश्वरस्य सर्वशब्दवाच्यत्वमिति श्रूयते। प्रथमखण्डे 'देवा ह वै स्वंर्ग लोकमगमंस्ते देवा रुद्रमपृच्छन् को भवानिति। सोब्रवीत्–अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त इति। सोऽन्तरादन्तरं प्राविशद्दिशां चान्तरं स प्राविशत् सोऽहं नित्यानित्यो ब्रह्माहं ब्रह्माहं प्राञ्चः प्रत्यञ्चोऽहं दक्षिणाञ्चोदञ्चोऽहमधश्चोर्ध्वं च दिशश्च विदिशश्चाहं पुमानहं स्त्री चाहं गायत्र्यहं सावित्र्यहं त्रिष्टुब्जगत्यनुष्टुप् चाहं छन्दोऽहं गार्हपत्योऽहं दक्षिणाग्निराहवनीयोऽहं सत्योऽहं गौरहं गार्यहं ज्येष्ठोऽहं श्रेष्ठोऽहं वरिष्ठोऽहमापोऽहं तेजोऽहमृग्यजुःसामाथर्वाङ्गिरसोऽहं क्षरमहमक्षरमहं गुह्योऽहमरण्योऽहं पुष्करमहं पवित्रमहमग्रं च मध्यं च बहिश्च पुरस्ताज्ज्योतिरित्यहमेव सर्वं च मां यो वेद स सर्वान् देवान् वेद' इत्यन्तेन। द्वितीयखण्डे च सर्वानुप्रवेशादेव 'यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः' इत्यारभ्य ब्रह्मविष्णुमहेश्वरोमाविनायकादिसर्वप्रपञ्चवाच्यत्वं प्रतिपाद्यते। तथा सर्वश्रुतिसामरस्यविचारे सर्वेषां चिदचिद्वस्तूनामन्तर्यामितया अनुप्रविष्टः सर्वशरीरः सर्वशब्दवाच्यः परमेश्वरः शिव इति विज्ञायते। अतः काशकृत्स्नमतमेव श्रुतिसूत्रमहांभियुक्तसम्मतमिति समञ्जसम्।।

इति वाक्यान्वयाधिकरणम्।।५।।

इति श्री कण्ठभाष्य वाक्यान्वयाधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

अथ वाक्यान्वयाधिकरणम्।।५।।

उत्तराधिकरणमवतारयति–**सर्वत्रेति।** उदाहरिष्यमाणे मैत्रेयीब्राह्मणे सर्वत्र आदिमध्यावसानेषु जीवेश्वरयोरेकशब्दविषयत्वं प्रतीयते। जीवपरत्वेन सम्प्रतिपन्नानामीश्वरपरत्वमीश्वरपरत्वेन संप्रतिपन्नानां जीवपरत्वम्। एवमेकशब्दविषयत्वे प्रतीयमाने जीवेश्वरयोरन्यतर एव परिशिष्यत इत्यन्तरः प्रत्याख्यातो भवति। तत्र प्रत्यक्षसिद्धजगत्प्रत्याख्यानायोगादीश्वरस्यैव प्रत्याख्यानं पर्यवस्यति, जीवेश्वरयोरभेदो वा पर्यवस्यति। एवमीश्वरस्य तत्र जीवाद्भेदस्य बाधकं तज्जीवेश्वरवाचित्वेन सम्प्रतिपन्नशब्दानां सामानाधिकरण्यमुपपादयितुं शक्यमित्याशङ्क्य तदुपपादनायाधिकरणमारभ्यत इत्यर्थः। अनेन माभूज्जीवाधिकरणवाक्यमीश्वरे तद्भेदे वा बाधकम्। इदं तु बाधकं स्यात्। सामानाधिकरण्यस्यान्यथा निर्देष्टुमशक्यत्वादित्याशङ्क्य प्रत्युदाहरणसङ्गतिर्दर्शिता भवति। तदुपपादनार्थमधिकरणमारभ्यत इत्यर्थः।।सू।। **वाक्यान्वयात्**।।१९।। बृहदारण्यके मैत्रेयीब्राह्मणे याज्ञवल्क्यः स्वयं प्रविव्रजिषया मैत्रेयीकात्यायन्योस्स्वभोर्ययार्वित्तसंविभागं चिकीर्षन् वित्तेन किममृतत्वं प्राप्तुं शक्यमिति मैत्रेय्या पृष्टो 'यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यात् अमृतत्वस्य तु नाशास्ति वित्तेने'त्युक्त्वा 'येनाहं नामृता स्यां किमहं तेन कुर्या यदेव भगवान्वेद तदेव मे ब्रूही'ति तथा पुनरमृतत्वसाधनं पृष्टो 'न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवती'त्यादिभिः 'न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवती'त्यन्तैर्वाक्यैः पतिजायापुत्रमित्रपश्वादि सर्वं भोगार्थतयैव प्रियं भवति तं पत्यादिसर्वभोक्तारमात्मानमुपक्रम्य 'आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इत्यमृतत्वसाधनमात्मदर्शनं दर्शनसाधनानि श्रवणादीनि चोपदिश्य 'आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदित'मित्यात्मविज्ञानेन सर्वविज्ञानमुक्त्वा 'स यथाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्त्येवं वा अरे अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः सामवेद अथर्वाङ्गिरसः

पुराणं विद्या उपनिषदः श्लोकास्सूत्राणि अनुव्याख्यानानि इष्टं द्रुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निश्वसितानी'ति तस्य नामरूपात्मकसकल-प्रपञ्चकारणत्वं प्रदर्श्य 'यथा सैन्धवघनोऽनन्तरोऽबाह्यःकृत्स्नो रसघनः एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ती' ति स्वोत्पत्तिविनाशविशेषविज्ञानाभावानुक्त्वा 'एतावदरे खल्वमृतत्व' मिति वर्णितस्यैतस्यात्मनो वेदनममृतत्वसाधनमित्युपसञ्जहारेति श्रूयते। अत्र 'आत्मा वा अरे द्रष्टव्य' इत्यादिना निर्दिष्टस्तावदात्मा परमेश्वरः प्रतीयते। अमृतत्वार्थिन्यै मैत्रेय्यै तद्दर्शनाद्युपदेशात्त-द्विज्ञानेनामृतत्ववर्णनात्तस्य नामरूपात्मकसकलप्रपञ्चोपादानत्वप्रतिपादनाञ्च। 'स यथा सैन्ध घ्यन'इत्यादिनोक्तस्तु जीवः प्रतीयते। 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यती'ति देहाकारपरिणतभूतोपाधिकोत्पत्तिविनाशवत्त्ववचनात् 'न प्रेत्य संज्ञास्ती'ति मोक्षदशायां देहाकारपरिणामभूतसङ्घातेनैकीकृत्य देवोऽहं मनुष्योऽहमित्यादि ज्ञानं संसारदशायामिवास्य नास्तीत्युपन्यासाञ्च। एवमिह प्रतीयमानजीवेश्वरसामानाधिकरण्यनिर्देशे 'आत्मा वा अरे द्रष्टव्य' इति प्रकृतस्यैवात्मनः 'एवं वा अरे अयमात्मे'ति इदमात्मशब्दाभ्यां परामर्शात्। चतुर्थे मैत्रेयीब्राह्मणे 'एवं वा इदं महद्भूतमनन्तमपार'मिति विज्ञानघनवाक्य एव च तैस्सामानाधिकरण्येन निर्दिश्येते। महद्भूतमनन्तमपार'मिति शब्दानां ब्रह्मपरत्वात्। सर्वविज्ञानवाक्यादिगतैरात्मादिशब्दैस्ततो भिन्नविभक्तिकानां जीवविषयशब्दानां सामानाधिकरण्याभावेऽप्येकविषयत्वमविचलमेव। प्रतीतौ सत्यामपि जीवेश्वरयोरन्यतर एवात्र प्रतिपाद्यः नोभावप्यभेदेनेति व्यवस्थापनीयम्। तयोर्भेदस्य प्रबलानेकश्रुत्यन्तरसिद्धत्वादिति स्थिते किं जीवोऽत्र प्रतिपाद्यः उत परमेश्वर इति संशयप्रकारः सूत्राधतारिकायां सूचितत्वात् इह भाष्ये न लिखितः। ननु नास्त्यत्र पूर्वपक्षावकाशः उपक्रमोपसंहारपरामशः ब्रह्मपरे महावाक्ये दृष्टानामन्यलिङ्गानां तत्तच्छरीरकब्रह्मोपासनार्थत्वस्य प्रतर्दनाधिकरणवर्णितस्य पूर्वाधिकरणेऽपि स्थापितत्वात् इहापि अमृतत्वसाधनवेदनेनोपक्रमस्य तेनोपसंहारस्य मध्ये दुन्दुभ्यादिवाक्यानां च ब्रह्मपरत्वस्य स्पष्टत्वादित्याशङ्क्य पूर्वपक्षमुपपादयति-**इहेति**। अयमाशयः। 'न वा अरे पत्युः कामाये'त्यादिवाक्येषु स्वभोगार्थे पत्यादिप्रीतियुक्ततया प्रतिपाद्यमानस्तावदात्मा जीव एव। न च तत्रापि पूर्वाधिकरणोदाहृतस्य भोक्तृत्वादेरिव भोगार्थप्रीतेर्जीवद्वारा तच्छरीरकपरमेश्वरान्वयो वक्तुं शक्य इति वाच्यम्। तथा सति प्रसिद्धिद्योतकवैशब्दस्वारस्यभङ्गप्रसङ्गात्। जीवगतस्वभोगार्थप्रतिपत्त्या हि लोके प्रसिद्धं न तु तस्य जीवद्वारा परमेश्वरान्वितत्वमपि। तदपि श्रौतव्युत्पत्तिमतां प्रसिद्धमिति चेन्न। अनधीतिनीमविचारित-श्रुत्यर्था केवलममृतार्थिना पत्या सह चिरसंवासेन लब्धान्तःकरणशुद्धिं स्वयमप्यमृतत्वार्थिनीं मैत्रेयीं

प्रति तद्बुद्ध्युपारूढाया लोकप्रसिद्धेरेव द्योतनीयत्वात्। न च वैशब्दमात्रस्य स्वारस्यभङ्गोऽस्तु परमेश्वरविषयाणामुपक्रमोपसंहारपरामर्शानामनुरोध्यत्वादिति वाच्यम्। 'आत्मा वा अरे द्रष्टव्य' इत्यादिना वक्ष्यमाणस्यात्मैव द्रष्टव्य इत्यस्योपपादनार्थः खलु 'न वा अरे पत्युः कामाये'त्यादिसन्दर्भः। अतस्स यद्विषयत्वेन तदुपपादको भवति तद्विषयो वर्णनीयः। न च जीवधर्मस्य परमेश्वरपर्यन्तं च प्रतिपादकत्वेन तदुपपादको भवति। भवति तु स्वात्मन्यनुभूतस्य स्वभोगार्थत्वेनैव पत्यादीनां प्रियत्वस्योपोद्बलकत्वेन। 'प्रसिद्धं ह्येतत्तवापि मैत्रेयि यत्पत्यादयो जायादीनां पत्यादिप्रयोजनाय प्रिया न भवन्ति किं तु स्वप्रयोजनायैव। अतः पत्यादिकं परित्यज्य स्वात्मैव द्रष्टव्य' इति। अतोऽयं सन्दर्भो मैत्रेयीसम्मतियोग्यलोकप्रसिद्धार्थानुवादपर इत्येवं वर्णनीयम्। अत एव हि पतिजायादिवाक्येषु पतिवाक्यस्य प्राथम्यम्। मैत्रेयीं प्रति तदनुभवसाक्षिकमर्थं प्रथममुपन्यस्ते तद्दृष्टान्तेनार्थान्तराण्यपि तत्सम्मतियोग्यानि कर्तव्यानीति। ननु, स्वात्मभोगाय पत्यादीनां प्रियत्ववचनं पत्यादीन्परित्यज्य केवलमात्मस्वरूपमन्वेष्टव्यमित्यत्रोपपादकं न भवति। प्रियमेव ह्यन्वेष्टव्यं न तु प्रिययुक्तं स्वरूपमिति चेत् यथा प्रियवियुक्तमात्मस्वरूपमेवानेनोपपादितं भवति तथा निरूपयामः। सर्वेषामपि स्वात्मा प्रियः पतिजायादयोऽपि प्रियाः इत्यनुभवसाक्षिकमेतत्। तत्र पतिजायादीनां प्रियत्वं पतित्वादिप्रयुक्तं न भवति किं तु स्वात्मप्रयुक्तमित्यस्मिन्नर्थे तेषां स्वेष्टसम्पादकत्वदशायामिव स्वानिष्टसम्पादकत्वदशायां प्रियत्वादर्शनेन सर्वसम्प्रतिपत्तियोग्ये वर्ण्यमाने स्वात्मनः पतिजायादीन्प्रति इष्टसम्पादकत्वदशायां चाविशेषेण प्रियस्य पतिजायाद्यपेक्षयातिशयपुरुषार्थत्वं तावल्लभ्यते। तेन चात्मानात्मनोर्लोक-प्रसिद्ध्यनुसारेण मुख्यगौणपुरुषार्थत्वरूपं तत्वमालोच्य गौणं परित्यज्य मुख्यमेवाश्रयेदित्ययमर्थो लभ्यत एव। तस्मात्पतिजायादिवाक्यसन्दर्भे अविचले जीवपरत्वे तदुपपाद्यमात्मनो द्रष्टव्यत्वादिवचनं तद्विषयमवतिष्ठत इत्युत्तरसन्दर्भस्यापि तद्विषयतावश्यंभावात्। तद्विज्ञानेन सर्वविज्ञानवचनं 'शिवे पूजिते सर्वे देवाः पूजिता भवन्ती'ति वचनं यथा सर्वेषां देवानां पूजया यादृशं फलमवाप्यते तत्सर्वं शिवपूजाफले महार्णवे शीकरनिकरवदन्तर्भवतीत्येवं फलतः सर्वदेवानां पूजितत्वपरं गौणमेवमन्येषां प्रकृतिमहदहङ्कारभूतेन्द्रियाणां प्रत्येकं श्रवणमननाभ्यां जगत्तत्वनिश्चयपूर्वकमुासनेन यावत्फलं भवति तत्सर्वं पुरुषोपासनफलेऽन्तर्भवतीत्यभिप्रायं गौणं वर्णनीयम्। अत एवाहुः 'दश मन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिकास्तु शतं पूर्णं सहस्रं त्वाभिमानिकाः। बौद्धा दश सहस्राणि तिष्ठन्ति विगतज्वराः। पूर्णं शतसहस्रं तु तिष्ठन्त्यव्यक्तचिन्तकाः। पुरुषं निर्गुणं प्राप्य कालसङ्ख्या न विद्यते।' इति। 'स यथार्द्रैधोऽग्ने'रित्यादिनोक्तं सर्वोपादानत्वं तु जीवाधिकृतप्रधानविषयं योजनीयम्। तत्रार्द्रेन्धनविशिष्टस्याग्नेर्धूमोपादानत्वदृष्टयाङ्गीकृतम्। न च तत्राग्निर्धूमोपादानं किंत्वार्द्रेन्धनमेव। तदुत्कर्षेणैव धूमोत्कर्षदर्शनात्। एवं दार्ष्टान्तिकभागेनापि आर्द्रेन्धनकल्पप्रकृतिविशिष्टस्याग्निकल्पस्य चेतनस्य

प्रपञ्चोपादानत्वं वर्ण्यमानदृष्टान्तानुसारात् 'दध्ना जुहोती'ति विधानमिव विशेषणे सङ्क्रामतीति। 'एतावदरे खल्वमृतत्व' मित्येतत्तु प्रकृतिविविक्तजीवज्ञानस्य मोक्षसाधनत्वाभिप्रायेण सुयोजम्। तस्मान्मैत्रेयीब्राह्मणे जागदुपादानप्रकृतिविशिष्टत्वेन मोक्षार्थं प्रकृतिविविक्ततया ज्ञातव्यत्वेन च जीव एव प्रतिपाद्य इति पूर्वपक्षं निष्कर्षति-**जीव इति।** 'सन्देहेन पूर्वपक्षे प्राप्ते' इत्यत्र जीव इति पूर्वपक्षे प्राप्त इत्यन्वयः। 'सन्देहेने'त्यवतारिकायां सूचिताकारस्याधिकरणाङ्गसन्देहस्यानुवादः। नन्ववधारणेन पूर्वपक्ष इति भाष्याभिप्रायः। 'भोगप्रीतियुक्ततयात्मनः संसारित्वावगमा'दिति प्राग्जीवत्वे निर्णीते पूर्वपक्षहेतोर्दर्शितत्वात्। 'वाक्यान्वया'दिति सूत्रस्य मैत्रेयीब्राह्मणे प्रतिपाद्यः परमेश्वर इत्यध्याहृतेन साध्येन तत्रादिमध्यावसानवाक्यानां परमेश्वरविषयत्वादिति सूत्रहेतोरन्वयमभिप्रेत्य सिद्धान्तयति-**परमेश्वर इतीति।** अत्र 'इत्यारभ्ये'त्यन्तेनामृतत्वोपायप्रार्थनारूपं पुरस्तादुपदेष्टव्यत्वस्य ब्रह्मलिङ्गमुपक्रम गतं दर्शितम्। 'इत्यादे'रित्यन्तेन सर्वविज्ञानप्रतिज्ञानं जगदुपादानत्वमित्यादि मध्यावसानगतं ब्रह्मलिङ्गजातं दर्शितम्। 'इत्यवसानस्ये' त्यन्तेन 'येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानाती'त्यादि ह्युपसंहारगतं ब्रह्मलिङ्गं दर्शितम्। यद्यपि षष्ठे मैत्रेयीब्राह्मणे 'एतावदरेऽमृतत्व'मिति ब्रह्मलिङ्गान्तरश्रवणमस्ति तथापि तदुपक्रमस्थलिङ्गत्वेन प्राग्दर्शितमिति तद्विहाय चतुर्थे मैत्रेयीब्राह्मणे 'येनेदं सर्व' मित्यादिना दर्शितम्। जीवः स्वान्तर्यामितया स्थितेन येन परमेश्वरेण आदृतज्ञानशक्तिकस्सन्निदं संर्व विजानाति तं परमेश्वरं केनोपायेन विजानीयात्। सर्वस्य विज्ञातारं तं परमेश्वरं केनोपायेन विजानीयात्। तद्दर्शने तत्प्रसादहेतुं प्रागुक्तं श्रवणमननपूर्वकमुपासनमेकमुपायं विहाय न किञ्चिदप्युपायान्तरमस्तीत्यभ्यासेन प्रतिपाद्यमानं दुरधिगमत्वलिङ्गं दर्शितम्। नन्वस्तूपक्रमादीनां ब्रह्मणि स्वारस्यं तथापि पतिजायादिवाक्यस्य भोगप्रीतियुक्तजीवविषयतायाः अपाकर्तुमशक्यत्वात् अनन्यथासिद्धजीवलिङ्गानुसारेण जीव एव प्रकृतिविविक्तो मुमुक्षुभिर्द्रष्टव्यं परं ब्रह्म तदतिरेकेण तत्रास्तीति मैत्रेयीब्राह्मणस्य तात्पर्यं वर्णनीयमिति तत्रैव ब्रह्मलिङ्गत्वाभिमतं सर्वं योजनीयमित्याशङ्क्याह-**भोगप्रीतियुक्तस्येति।** पतिजायादिजीव-विषयत्वावश्यंभावमात्रेण द्रष्टव्यादिवाक्यानामपि तद्विषयत्वावश्यंभावे हि सर्ववेदान्तप्रतिष्ठितं जीवातिरिक्तस्य परब्रह्मणः परमेश्वरस्य मुमुक्षुभिर्ज्ञातव्यत्वं जगदुपादानत्वाद्यनुकूलं वक्तव्यमिति शङ्क्येतापि न तु सोऽस्ति। पजिजायादिवाक्ये भोगप्रीतियुक्ततया जीवस्यानुवादः उत्तरवाक्येषु मुमुक्षुद्रष्टव्यत्वादिना परमेश्वरस्य प्रतिपादनमिति सिद्धिसङ्गत्युपपत्तेः। जीवानुवादस्य परमेश्वर-प्रतिपादनस्य कथमेकवाक्यता घटत इति चेत् इत्थम्। यस्मात्पतिजायादयः पतिजायादिप्रयोजनाय प्रिया न भवन्ति किं तु स्वप्रयोजनायैव। तस्माद्यस्यामृतस्वरूपस्वप्रयोजनस्य पतिजायादिविषयो रागः प्रतिकूलस्तस्य सिद्धिमपेक्षमाणेन पतिजायादिभ्यो विरज्य परमेश्वर एव द्रष्टव्य इति। नन्वेवं सति

एकस्यैवात्मशब्दस्य पतिजायादिवाक्यगतस्य जीवोऽर्थः, तदुत्तरवाक्यगतस्य परमेश्वर इत्यर्थभेदः स्यात्। नायं दोषः। पतिजायादिवाक्यस्य जीवपरत्वे द्रष्टव्यवाक्यस्य 'यदा चर्मवदाकाश' मित्यादिश्रुत्यन्तरानुसारेण परमेश्वरपरत्वे चावश्यवक्तव्ये 'स्याच्चैकस्य ब्रह्मशब्दव'दिति न्यायेन तदर्थभेदाङ्गीकारस्योचितत्वात्। एवं द्रष्टव्यवाक्यस्य परमेश्वरपरत्वे तदुत्तरवाक्यानां तत्परत्वं स्वत एवायाति। ननु सर्वविज्ञानप्रतिज्ञादिकं परमात्मविषयतां प्राप्नोतु नाम, 'तान्येवानुविनश्यती' त्यादिजीवपरामर्शः कथं तद्विषयतां प्राप्नुयादित्याकाङ्क्षायां तत्र स्वाभिमतं प्रकारं प्रदर्शयिष्यन्मतान्तरेण तावदुपपादयतीत्याह-**कथमिहेति। सर्वत्रेति।** 'एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति अविनाशी वा अरे अयमात्मानुच्छित्तिधर्मे 'त्येतेषु वाक्येष्वित्यर्थः। यद्वा। प्रतर्दनाधिकरणविषयवाक्ये पूर्वाधिकरणविषयवाक्ये चेत्यर्थः।।सू।। **प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः।।२०।।** सर्वविज्ञानस्य प्रतिज्ञासिद्ध्यर्थस्य जीवपरमेश्वरयोः कार्यकारणभावकृतस्यैक्यस्य लिङ्गं तज्ज्ञापनार्थं जीववाचिशब्दैः परमेश्वराभिधानमिति पूर्वाधिकरणे विषयवाक्ययोः शास्त्रान्तरस्थप्रतिज्ञासिद्ध्यर्थमिति भावः। ।।सू।। **उत्क्रमिष्यत एवंभावादित्यौडुलोमिः।।२१।।** संसारदशायां जीवस्य परमेश्वराद्भेदेऽपि मोक्षदशायां तद्भावप्राप्तेः जीवशब्दैः परमेश्वराभिधानमिति औडुलोमिमतमिति सूत्रं व्याचष्टे-**उत्क्रमिष्यत इति।।सू।। अवस्थितेरिति काशकृत्स्नः।।२२।।** जीवेष्वन्तर्यामितया परमेश्वरस्यावस्थितेस्तन्नियम्यत्वेन तच्छरीरभूतानां जीवानां शब्दाश्शरीरिपरमेश्वरपर्यन्ताः, अतो जीवशब्दैः परमेश्वराभिधानमिति काशकृत्स्नमतमिति सूत्रार्थमभिप्रेत्य व्याचष्टे-**य आत्मनीति।** परस्परविरुद्धेषु त्रिष्वेतेषु मतेषु सूत्रकारस्य किमभिमतमित्याशङ्कायां तन्निर्धारयति-**इदमेवेति।** जीवानां कार्यत्वस्य 'नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः (ब्र० २-३-१७) इत्यधिकरणे निराकरिष्यमाणत्वान्मुक्तावागन्तुकरूपाभिनिष्पत्तेः 'संपद्याविर्भावः स्वेन शब्दात् (ब्र० ४-४-१) इत्यधिकरणे निराकरिष्यमाणत्वात्सर्वशब्दानां परमात्मपर्यन्तत्वस्य'चराचरव्यपाश्रयस्तु स्या'दित्य (ब्र० २-३-१६ सू०) धिकरणे प्रसाधयिष्यमाणत्वाच्च काशकृत्स्नमतमेव स्वाभिमतमिति पूर्वं मतद्वयोपन्यासपूर्वकं तदभिधानेन तदनन्तरमन्यस्यानभिधानेन च सूत्रकृत्सूचयामासेति भावः। नन्वेवं सतीदं सूत्रत्रयं व्यर्थम्। इदं हि न पूर्वमतद्वयस्यानभिमतत्वज्ञापनार्थम्। नापि काशकृत्स्नमतस्य स्वमतत्वज्ञापनार्थम्। उदाहृताधिकरणैरेव तदुभयसिद्धेरित्याशङ्क्य स्वाभिमतस्य काशकृत्स्नमतस्य प्रबलश्रुत्यन्तरानुगुण्येनापि प्राबल्यसूचनार्थमिति दर्शयितुमाह-**प्रबलेति।** अथर्वशिरसि 'सोन्तरादन्तरं प्राविश' दित्यनेन दिगन्तर्गतं सर्वासु दिक्षु स्थितं रुद्रः प्राणिनां शरीरान्तरात्प्राणादेरप्यन्तरं चेतनवर्गमन्तर्यामितया प्राविशदित्युक्तम्। 'दिशां चान्तरं स प्राविश'दित्यनेन दिगन्तर्गतं सर्वासु दिक्षु स्थितमचेतनवर्गमन्तर्यामितया प्राविशदित्युक्तम्। ततः 'सोऽहं नित्यानित्यः ब्रह्माहं ब्रह्माह' मित्यादिना

प्रथमखण्डशेषेण 'यो वै रुद्रस्स भगवान् भूर्भुवस्स्वः यश्च ब्रह्मे' त्यादिना द्वितीयखण्डेन च शिवस्य सर्वान्तर्यामितया सर्वशरीरकत्वप्रयुक्तं सर्वशब्दवाच्यत्वं दर्शितम्। तथा 'यो योनिंयोनिमधितिष्ठत्येको यस्मिन्निदं सञ्चविचैति विश्वम्। एवं स देवो भगवान्वरेण्यो यानिस्वभावानधितिष्ठत्येकः। सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः। घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम्। एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये सन्निविष्टः। 'यो रुद्रो अग्नावप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश।' 'नमस्स्रोतस्याय च द्वीप्याय चे' त्यादिब्रह्मकर्मकाण्डगतसर्वश्रुतिसामरस्यविचारे सर्वेषां चेतनानामन्तर्यामितया तान्यनुप्रविष्टोऽन्तर्यामित्वादष्टमूर्तिरन्तर्यामिब्राह्मणादिषु पञ्चभूतचन्द्रसूर्यसकलचेतनरूपाष्टमूर्तित्वप्रसिद्धेश्च सर्वशरीरकः 'इमा रुद्राय स्थिरधन्विने गिर' इति श्रुतेश्च सर्वशब्दवाच्यश्च शिवोऽवधार्यत एव। यत एवं तस्मात काशकृत्स्नमतमेव समञ्जसमित्युपसंहरति-**अत इति। श्रुतिसूत्रेति।** श्रुतिसूत्राण्युदाहृतानि। महाभियुक्तसूक्तयः स्मृतिपुराणानि। तथा हि—मानवधर्मशास्त्रोपसंहारे तावत् 'प्रशासितारं सर्वेषामणीयांसमणोरपि। रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं पर'मिति सर्वेषां नियन्तारं पुरुषं प्रस्तुत्य 'एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम्। इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वत'मिति तेषुतेषु वेदभागेषु तस्याग्न्यादिशब्दैर्व्यवहारमुपन्यस्य सर्वेषां तेषामविरोधसिद्ध्यर्थं मेष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः। जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रव'दिति श्लोकेन तस्य सर्वनियन्तृत्वं राज्ञः प्रजानियन्तृत्वमिव ताटस्थ्येन स्थितस्य न सम्भवति किं तु जीववर्गस्य स्वस्वशरीरनियन्तृत्वमिव नियम्यानि व्याप्य स्थितस्येति वर्णयांबभूवे। तेन सर्वेषां तच्छरीरत्वसूचनात् तस्य स्वशरीरभूताग्न्यादिशब्दवाच्यत्वमुपपादितं भवति। शिवस्याग्निशब्देन व्यवहारस्तावत् 'अग्निं पुरातनयित्लोरचित्तात्' 'रुद्रो वा एष यदग्नि'रित्यादिश्रुतिभागेषु 'किमेभिरमरैरन्यैः पूजितैरध्वरे फलम्। राजा चेदध्वरस्यास्य न रुद्रः पूज्यते त्वया। द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः। घोरा चान्या शिवा चान्या ते चैव शतधा पुन'रित्यादिशिवपुराणमहाभारतादिवचनोपनीतशिवतात्पर्येषु प्रसिद्धः। इन्द्रशब्देन व्यवहारः अथर्वशिरसि ईशाननामनिर्वचनानन्तरपठिते 'अभि त्वा शूर नोनुम'इति मन्त्रे प्रसिद्धः। एवं शब्दान्तरैर्व्यवहारोऽप्युदाहरणीयः। 'पञ्चभिर्व्याप्य मूर्तिभि'रित्यनेन वियदादिभूतरूपाः शिवस्याष्टमूर्त्यन्तर्गताः पञ्चब्रह्मरूपा वा मूर्तयो विवक्षिताः। मानवधर्मशास्त्रोपक्रमस्य शिवपरत्वमस्माभिः शिवतत्वविवेके निपुणतरमुपपादितमिति नोपसंहारस्य शिवपरत्वे तद्विरोध श्शङ्कनीयः। तथा कात्यायनगृह्ये 'नदीरमुपपादितमिति नोपसंहारस्य शिवपरत्वे तद्विरोधश्शङ्कनीयः। तथा कात्यायनगृह्ये 'नदीमुत्तरिष्यन्नभिमन्त्रयते नमो रुद्रायाप्सुषदे स्वस्ति मा संपारयेति वनस्पतिमारोक्ष्यन्नभिमन्त्रयते नमो रुद्राय वनस्पतिषदे स्वस्ति मा सम्पारये'त्यादिना

नदीतरुगिरिनदीचतुष्पथश्मशानगोष्ठाक्रमणेषु तदधिष्ठातृत्वेन तत्रतत्र सन्निहितस्य रुद्रस्य नमस्कारमन्त्रान्विधायैवमन्यत्रापि 'नमो रुद्रायेत्येव ब्रूया' दित्यन्याक्रमणेष्वपि सामान्यतस्तन्नमस्कारमन्त्रं विधाय 'रुद्रो ह्येवैतत्सर्व'मिति तदनन्तरवाक्येन रुद्रस्य सर्वाधिष्ठातृत्वे 'सर्वो वै रुद्र' इति श्रुतिः प्रमाणत्वेन स्मारिता। तेन 'सर्वो वै रुद्रः सर्वं खल्विदं ब्रह्मे' त्यादिसर्वपदसामानाधिकरण्यं विशिष्य तत्तद्वाचकपदसामानाधिकरण्यं च सर्वाधिष्ठातृत्वप्रयुक्त-सर्वशरीरकृतमिति दर्शितं भवति। आश्वलायनसूत्रे शिवं प्रस्तुत्य 'सर्वाणि ह वा एतस्य नामधेयानि भवन्ती'ति साक्षादेव सर्वेषां नाम्नां तत्र पर्यवसानं वर्णितम्। तथा शिवपुराणे 'विग्रहं देवदेवस्य विश्वमेतञ्चराचरम्। तदेवं न विजानन्ति पशवः पाशगौरवा' दिति विश्वस्य शिवविग्रहत्वं लोकानां तदज्ञानं चोक्त्वा तदज्ञानादेव वेदेषु परब्रह्मणशिवस्य तत्रतत्र तत्तद्वस्तुरूपत्वोक्तिं तत्तद्वस्त्वधि-पतित्वोक्तिं च दृष्ट्वा क्षुभितहृदयाश्शास्त्रकारा भिन्नभिन्नहृदया भिन्नप्रस्थानावलम्बिनो जाताः। वस्तुतश्शिवस्सर्वशरीरकः सर्वस्याप्यधिपतिरिति तत्तच्छब्दैरपि व्यपदेष्टुं शक्यः। तदधिपतित्वेनापि नात्र कश्चिद्विरोध इति प्रपञ्चितं 'तमेकमेव बहुधा वदन्ति यदनन्तकम्। अजानन्तः परं भावमविकल्पं महर्षय' इत्यादिना 'केचित्संसारिणं प्राहुस्तमसंसारिणं परे। स्वतन्त्रमपरे प्राहुरस्वतन्त्रं परे विदुः।। घोर इत्यपरे प्राहुस्सोम्यमेव परे विदुः। रागवन्तं परे प्राहुर्वीतरागमथापरे। निष्क्रियं तं परे प्राहुस्सक्रियं चेतरे जनाः। निरिन्द्रियं परे प्राहुस्सेन्द्रियं च तथापरे।' इत्यादिविकल्पप्रदर्शनपूर्वकम् 'एवं विकल्प्यमानेषु याथार्थ्यं परमेष्ठिनः। नाध्यवस्यन्ति मुनयो नानाप्रत्ययकारणात्। ये पुनस्सर्वभावेन प्रपन्नाः परमेश्वरम्। ते विजानन्त्ययत्नेन शिवं परमकारण'मित्यन्तेन। एवमन्यत्राप्युदाहार्यम्। तस्मात्स्थितमिदं श्रुतिसूत्रस्मृतिपुराणानुग्रहार्थं काशकृत्स्नमतमेव साधीय इति। अथोदाहृतेष्वर्थवशिरोवाक्येषु व्याख्येयांशान्व्याकुर्मः। पुरा ब्रह्मादयो देवाः परब्रह्मणः परमशिवस्य तत्त्वं स्वयं निश्चेतुमशन्कुवन्तः तमेवादिगुरुं प्रक्ष्याम इति निश्चित्य निरतिशयसुखात्मकतया स्वर्गशब्दाभिधेयं तस्य लोकं गत्वा तमपृच्छन् कः कीदृक्स्वरूपो भवानिति स भगवानब्रवीत् सृष्टेः प्रागहमेक एवासं सृष्टनन्तरमिदानीं सृष्टप्रपञ्चात्मना वर्ते संहारकाले च सृष्टेः प्रागिव भविष्यामि कल्पान्तरे स्रक्ष्यमाणपदार्थात्मना वा भविष्यामि मदतिरिक्तः कोऽपि नास्तीति 'नान्यः कश्चिन्मत्तो व्यतिरिक्त' इत्यन्तवाक्यार्थः स्पष्टः। तथा 'सोऽहं नित्यानित्य' इत्यादेरपि तत्र सामान्यतो नित्यानित्यस्वरूपत्वमुक्त्वा 'ब्रह्माह' मित्यनेन परब्रह्मतया नित्यरूपं विवृतम्। 'ब्रह्म ह'मिति केचित्पाठमङ्गीकृत्याहमित्यर्थे हमितिशब्दः, 'हंसस्सोऽह'मिति दर्शनात् शकन्ध्वादित्वाद्वा सन्धिरिति वदन्ति। तदनन्तरमनित्यपत्वविवरणम्। तत्र 'ब्रह्माह'मिति पुंलिङ्गेन, ब्रह्मशब्देन हिरण्यगर्भरूपत्वमुक्तम्। 'प्राञ्चोऽह'मित्यादिभि 'र्विदिशश्चाह' मित्यन्तैर्वाक्यैः प्रागाद्यूर्ध्वान्तसकलदिगन्तर्गतवस्तुजातरूपत्वं सकलदिग्रूपत्वं चोक्तम्। सावित्री देवता।

गायत्र्यादयश्चत्वारश्छन्दोविशेषाः। छन्दस्सामान्यतश्छदोमात्रम्। गार्हपत्यादयस्त्रयोऽग्नयः। सत्यः सत्यवचनम्। अर्शादित्वादच्प्रत्ययेन सत्यवचनशीलो वा। गौः प्रसिद्धा। गौरी पार्वती कन्या वा। ज्येष्ठो वयोऽधिकः। श्रेष्ठो भूम्यैश्वर्यादिभिः प्रशस्तः। वरिष्ठः उरुतरः। अप्तेजोग्रहणं भूतमात्रोपलक्षणम्। ऋगादयश्चत्वारो वेदाः। क्षरं प्रधानम्। अक्षरं जीवसामान्यम्। गुह्यो गुप्तधर्मः। अरण्यं चम्पकारण्यादिकम्। पुष्करं तीर्थविशेषः। पवित्रं ततोऽन्यत् पावनवस्तुसामान्यं गङ्गादिकम्। अग्रं च मध्यं च चकारादादिश्च। सर्वस्य पदार्थजातस्य बहिश्च चकारादन्तश्च। पुरस्ताज्ज्योतिः प्राच्यामुद्यन्नादित्यः। एवमनेकात्मकोऽप्यहमेक एव। सर्वे च मां सर्वेऽपि पदार्थाः मामेवानुवर्तन्ते। मदेकवश्या इति यावत्। एवं मां यो वेद स सर्वान्देवान्वेद वेदात्मकत्वात्सर्वेषां देवानामिति। एवं तावत्प्रथमखण्डेन तत्तदनुप्रवेशप्रयुक्तं तत्तच्छब्दवाच्यत्वं प्रदर्शितम्। तथा द्वितीयखण्डेऽपि 'यो वै रुद्रस्स भगवान्यश्च ब्रह्मा तस्मै वै नमो नमः' इत्यादिभिर्मन्त्रैर्विशिष्य ब्रह्मविष्णुमहेश्वरोमा-विनायकस्कन्देन्द्राग्निभूर्भुवस्सुवर्महर्जनस्तपस्सत्यपृथिव्यप्तेजोवाय्वाकाशसूर्यचन्द्रनक्षत्रग्रहप्राण-कालयममृत्युभूतरूपतां सामान्यतो भूतभवद्भविष्यदात्मकतां च प्रदर्श्य 'यञ्च विश्वं यञ्च कृत्स्नं यञ्च सर्व' मित्यभ्यासेन सर्वात्मकत्वं च प्रदर्श्य तेन सर्वशब्दवाच्यत्वमुपपाद्य 'यो वै रुद्रस्स भगवान् यञ्च सत्यं तस्मै वै नमो नम' इति मन्त्रेण 'ब्रह्माह' मित्युपक्रान्तपरब्रह्मरूपतयोपसंहृतम्। तेन यथा शिवस्य परब्रह्मरूपतया ब्रह्मशब्दवाच्यत्वम् एवं सर्वान्तर्यामित्वेन हिरण्यगर्भादिशरीरकतया तत्तच्छब्दवाच्यत्वं चेति दृष्टान्तमुखेनोपपादनार्थमादावन्ते च ब्रह्मवाचिसत्यशब्दनिर्देशः। एवं तावत्सर्वान्तर्यामितया सर्वशब्दवाच्यत्वमनेन खण्डद्वयेनावगम्यत इति निर्विवादम्। सर्वान्तर्यामित्वं च 'सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं स प्राविश' दित्यनेनोच्यत इत्यपि निर्विवादम्। तेन शिवस्य सर्वान्तर्यामित्वमुच्यत इति। अत्र केचन विवदन्ते। इदं खलु शिववाक्यम्। तेन स्वस्यान्तर्यामित्वमुच्यते चेदहं प्राविशमिति निर्देशापत्तिः। अतः स्वस्मादन्यस्यैव कस्यचित्सर्वान्तर्यामित्वमुपदिश्य वामदेववत् सर्वात्मोपदेश इति शिवेनैव स्वकीयसार्वात्म्योपदेशरूपखण्डद्वयस्यापि तात्पर्यं विवृतमिति तदन्य एवान्तर्यामीति निश्चीयते। न च 'सोऽन्तरा' दिति श्रुतिवाक्यमेव, प्रागितिकरणेन शिववाक्यस्य समाप्तत्वादिति शङ्कनीयम्। 'सोऽहं नित्यानित्य' इत्युत्तरत्रापि शिववाक्यानुवृत्त्या प्राक् तत्समाप्त्यसिद्धेः। अन्यथा 'सोऽहं नित्यानित्य' इत्यादौ पुनस्सोऽब्रवी'दिति वाक्याध्याहारप्रसङ्गात्। 'नान्यः कश्चिन्मत्तो व्यतिरिक्त'इतीत्येतदनन्तरं श्रूयमाण इतिशब्दस्तु 'दिशश्चान्तरं स प्राविश' दित्येतदनन्तरान्वयितया यस्मात्सोऽन्तर्यामी शरीरतोऽन्तरात् प्राणादेरप्यन्तरमभ्यन्तरं जीववर्गं सर्वा दिशः तदन्तर्गतं वस्तुजातं चान्तर्यामितया प्राविशत्तस्माद्धेतोः मम सार्वात्म्योपदेश उपपन्नः। मदीयाहंशब्दानां तत्पर्यन्तत्वादिति हेत्वर्थोऽस्तु। 'धर्म धर्मेण तर्पयामि स्वेन तेजसे' त्यन्तं

कृत्स्नशिववाक्यानन्तरान्वयी समाप्त्यर्थो वास्तु। अध्याहाराद्व्यवहितान्वयस्य ज्यायस्त्वादिति। तेषां विवादः 'को भवा'निति श्रुतिगतप्रश्नवाक्योपन्यासेनैव निरस्यते। न हि शिवं प्रति देवैस्तत्स्वरूपे पृष्टे तेन तदन्यस्य कस्यचित्सार्वात्म्यमुत्तरवाक्येनोपदिष्टमिति सङ्घटते। न च प्रश्नवाक्यस्यापि तद्विषयत्वं कल्प्यम्। 'को भवा'निति भवच्छब्देन तदन्तर्यामिणं पृच्छतां देवानामुत्तरवाक्यस्थाहंशब्दस्यापि तत्पर्यवसायित्वं स्पष्टमेवेति तत्र तान्प्रति उपपादनीयाभावादुक्तार्थोपपादकतया परोक्तरीत्या 'सोऽन्तरा'दित्यादेरन्वयासम्भवेन तदापि तदसङ्घटनतादवस्थ्यात्। तस्मात् प्रश्नतदुत्तरतदुपपादकसर्वानुप्रवेशवाक्यानां सङ्घटनाय 'को भवा'निति देवैश्शिवस्वरूपं पृष्टम्। शिवेनापि सर्वात्मकं स्वकीयं तत्वमुपदिष्टम्। कथं शिवस्य सार्वात्म्यं तद्व्यतिरिक्तजगदवभासनादिति देवानामसम्भवाशङ्काव्युदसनाय तदुपपादकं 'सोऽन्तरा'दित्यादिवाक्यमित्येव सङ्घटयितुमुचितम्। 'सोऽन्तरा'दित्यादि शिववाक्यं वास्तु। न च शिववाक्यत्वे पूर्वं 'मह'मिति परामृष्टस्य स्वात्मनः 'स' इत्यनेन परामर्शानुपपत्तिः। 'अह'मित्यनेन स्वान्तर्यामी परामृष्ट इति परपक्षेऽपि तदनुपपत्तेस्तुल्यत्वात्। यत्र यस्यानुपचारिताहंपदप्रयोगः तत्र स्वान्तर्यामिणि तत्पदप्रयोगोपपत्तौ तथैव स्वस्मिन्नपि तत्प्रयोगोपपत्तेः। गीतासु 'तमेव शरणं गच्छ माद्याजी मां नमस्कुरु' इत्यादेरेकविषयत्वे परस्यापि सम्प्रतिपत्तिसत्त्वाच्च। 'सोहं नित्यानित्य' इत्युत्तरवाक्ये तच्छब्दसमानाधिकरणाहंशब्दप्रयोगदर्शनेनात्राप्यहमित्यध्याहारोपपत्तेः। 'प्राविश'दिति तु छान्दसः पुरुषव्यत्यय इत्युपपद्यते। श्रुतिवाक्यत्वेऽपि 'सोऽन्तरा' दित्यादे 'स्सोऽहं नित्यानित्य' इत्यादौ पुनस्सोऽब्रवीदित्यध्याहारप्रसङ्गो नापतति। इतिशब्दवत् सोऽन्तरादित्यादेरपि कृत्स्नशिववाक्यसमाप्तौ तत्समाप्त्यर्थस्येतेरनन्तरं निवेशनसम्भवात्। 'न वा अजीविष्यमिमा न खादन्निति होवाच कामो म उदपान' मित्यादिश्रुतिषु किञ्चिद्वक्तृकवाक्यमध्यगतस्यापि 'इति होवाचे'त्यादेस्तदन्ते श्रुतिवाक्यत्वेनान्वयस्य दृष्टत्वाच्च। ननु 'सोऽन्तरा' दित्यादेश्शिववाक्यान्ते निवेशने तस्य तदन्तर्धानप्रतिपादनपरत्वं कल्पयितुं युक्तम्। तदनन्तरं 'ततो देवा रुद्रं नापश्य' न्निति तददर्शनप्रतिपादनार्थं तदुपपादकस्य तदन्तर्धानप्रतिपादकस्यापेक्षितत्वात्। लिङ्गपुराणे 'सोऽब्रवीद्भगवान्रुद्रो ह्यहमेकः पुरातनः। आसं प्रथममेवाहं वर्तामि च सुरोत्तमाः। भविष्यामि च लोकेऽस्मिन्मत्तो नान्योऽस्ति कश्चन। नित्यानित्योऽहमनघ' इत्युपक्रम्य 'धर्मं धर्मेण सर्वं च तर्पयामि स्वतेजसा। इत्युक्त्वा भगवान्रुद्रस्तत्रैवान्तरधीयत। नापश्यंस्तु ततो देवा' इत्यादिना तथैवोपबृंहितत्वादिति चेत्सत्यम्। भाष्यकारस्य त्वयमभिप्रायः। यथैवादर्शनोपपादकं तदन्तर्धानप्रतिपादनमपेक्षितं तथा 'नान्यः कश्चिन्मत्तो व्यरितिक्त' इत्युक्तयुपपादकं सर्वानुप्रवेशसर्वशरीरकत्वप्रतिपादनमपेक्षितमेव। ततश्च 'सोऽन्तरादन्तरं प्राविश' दिति वाक्येन 'तदस्य त्रिविधं रूपं स्थूलं

सूक्ष्ममतः परम्। अस्मदाद्यमरैर्दृश्यं स्थूलं सूक्ष्मं तु योगिभिः। ततः परं तु यन्नित्यं ज्ञानमानन्दमद्वयम्। तन्निष्ठैस्तत्परैर्भक्तैर्दृश्यं तद्धतमास्थितैः॥' इति शिवपुराणादिवर्णितरूपत्रयमध्ये देवदृश्यं स्थूलं रूपं विहाय ततोऽन्तरात्सूक्ष्मादप्यन्तरं तत्परं रूपं प्राविशदित्येवमन्तर्धानं प्रतिपाद्यते। 'दिशश्चान्तरं स प्राविश' दित्यनेन सर्वान्तर्यामित्वं प्रतिपाद्यत इत्यतो न कोऽपि विरोध इत्यलं विस्तरेण॥

॥ इति वाक्यान्वयाधिकरणम्॥५॥

इति शिवार्कमणिदीपिका वाक्यान्वयाधिकरणम् समाप्तम्

अथ प्रकृत्यधिकरणम्। ॥सू० २३-२७॥

शाङ्करभाष्यम्

प्रकृतिश्च प्रतिज्ञादृष्टानतानुपारोधात्।२३॥

यथाऽभ्युदयहेतुत्वाद्धर्मो जिज्ञास्यः, एवं निःश्रेयसहेतुत्वाद् ब्रह्म जिज्ञास्यमित्युक्तम्। ब्रह्म च ''जन्माद्यस्य यतः'' (ब्र० २/१२) इति लक्षितम्। तच्च लक्षणं घटरुचकादीनां मृत्सुवर्णादिवत्प्रकृतित्वे कुलालसुवर्णकारादिवन्निमित्तत्वे च समानममित्यतो भवति विमर्शः– किमात्मकं पुनर्ब्रह्मणः कारणत्वं स्यादिति? तत्र निमित्तकराणमेव तावत्केवलं स्यादिति प्रतिभाति। कस्मात्? ईक्षापूर्वककर्तृत्वश्रवणात्। ईक्षापूर्वकं हि ब्रह्मणः कर्तृत्वमवगम्यते; ''स ईक्षाञ्चक्रे'' (प्र० ६/३) ''स प्राणमसृजत'' (प्र० ६/४) इत्यादिश्रुतिभ्यः। ईक्षापूर्वकं च कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु दृष्टम्। अनेककारकपूर्विका च क्रियाफलसिद्धिर्लोके दृष्टा। स च न्याय आदिकर्तर्यपि युक्तः सङ्क्रमयितुम्, ईश्वरत्वप्रसिद्धेश्च। ईश्वराणां हि राजवैवस्वतादीनां निमित्तकारणत्वमेव केवलं प्रतीयते, तद्वत्परमेश्वरस्यापि निमित्तकारणत्वमेव युक्तं प्रतिपतम्।। कार्यं चेदं जगत्सावयवमचेतनमशुद्धं च दृश्यते, कारणेनापि तस्य तादृशेनैव भवितव्यम्, कार्यकारणयोः सारूप्यदर्शनात्। ब्रह्म च नैवंलक्षणमवगम्यते; ''निष्फलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्'' (श्वे० ६/१९) इत्यादिश्रुतिभ्यः। पारिशेष्याद् ब्रह्मणोऽन्यदुपादानकारणमशुद्धयादिगुणकं स्मृतिप्रसिद्धमभ्युपगन्तव्यम्; ब्रह्मकारणत्वश्रुतेर्निमित्तत्वमात्रे पर्यवसानादिति।।

एवं प्रासे ब्रूमः–प्रकृतिश्चोपादानकारणं च ब्रह्माभ्युपगन्तव्यं निमित्तकारणं च, न केवलं निमित्तकारणमेव। कस्मात्? प्रतिज्ञादृष्टान्तानुपरोधात्। एवं प्रतिज्ञादृष्टान्तौ श्रौतौ नोपरुध्येते।। प्रतिज्ञा तावत्–''उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्'' (छा० ६/१/२) इति। तत्र चैकेन विज्ञातेन सर्वमन्यदविज्ञातमपि विज्ञातं भवतीति प्रतीयते। तच्चोपादानकारणविज्ञाने सर्वविज्ञानं सम्भवत्युपादानकारणाव्यतिरेकात्कार्यस्य। निमित्तकारणा- व्यतिरेकस्तु कार्यस्य नास्ति; लोके तक्ष्णः प्रासादव्यतिरेकदर्शनात्। दृष्टान्तोऽपि–''यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं

स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्'' इत्युपादानकारणगोचर एवाम्नायते। तथा ''एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्'' ''एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्यात्'' (छा० ६/१/४/५/६) इति च।। तथाऽन्यत्रापि ''कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति'' (मुण्ड० १/१/२) इति प्रतिज्ञा। ''यथा पृथिव्यामोषधयः सम्भवन्ति'' (मुण्ड० १/१/७) इति दृष्टान्तः। तथा ''आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्'' इति प्रतिज्ञा। ''स यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्शब्दाञ्शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः'' (बृ० ४/५/६/८) इति दृष्टान्तः। एवं यथासम्भवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधनौ प्रत्येतव्यौ।

यत इतीयं पञ्चमी ''यतो वा इमानि भूतानि जायन्ते'' इत्यत्र ''जनिकर्तुः प्रकृतिः'' (पा० सू० ४/३०) इति विशेषस्मरणात्प्रकृतिलक्षण एवापादाने द्रष्टव्या। निमित्तत्वं त्वधिष्ठात्रन्तराभावादधिगन्तव्यम्। यथा हि लोके मृत्सुवर्णादिकमुपादानकारणं कुलालसुवर्णकारादीनधिष्ठातृनपेक्ष्य प्रवर्तते, नैवं ब्रह्मण उपादानकारणस्य सतोऽन्योऽधिष्ठातापेक्ष्योऽस्ति; प्रागुत्पत्तेरेकमेवाद्वितीयमित्यवधरणात्। अधिष्ठात्रन्तराभावोऽपि प्रतिज्ञादृष्टान्तानुपरोधादेवोदितो वेदितव्यः। अधिष्ठातरि ह्युपादानादन्यस्मिन्नभ्युपगम्यमाने पुरप्येकविज्ञानेन सर्वविज्ञानस्यासम्भवात् प्रतिज्ञादृष्टान्तोपरोध एव स्यात्। तस्मादधिष्ठात्रन्तराभावादात्मनः कर्तृत्वमुपादानान्तराभावाच्च प्रकृतित्वम्।।२३।।

कुतश्चात्मनः कर्तृत्वप्रकृतित्वे? *अभिध्योपदेशाच्च*।।२४।।

अभिध्योपदेशश्चात्मनः कर्तृत्वप्रकृतित्वे गमयति–''सोऽकामयत बहु स्या प्रयायेये'' ति, ''तदैक्षत बहु स्यां प्रजायेय'' इति च। तत्राभिध्यानपूर्विकायाः स्वातन्त्र्यप्रवृत्तेः कर्तेति गम्यते। बहु स्यामिति प्रत्यगात्मविषयत्वाद् बहुभवनाभिध्यानस्य प्रकृतिरित्यपि गम्यते।।२४।।

***साक्षाच्चोभयाम्नानात्।।२५।।**

प्रकृतित्वस्यायमभ्युच्चयः। इतश्च प्रकृतिर्ब्रह्म; यत्कारणं साक्षाद् ब्रह्मैव कारणमुपादायोभौ प्रभवप्रलयावाम्नायेते–''सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति'' (छा० १/९/१) इति। यद्धि यस्मात्प्रभवति, यस्मिंश्च प्रलीयते, तत्तस्योपादानं प्रसिद्धम्। यथा व्रीहियवादीनां पृथिवी। साक्षात इति चोपादानान्तरानुपादानं दर्शयत्याकाशादेवेति। प्रत्यस्तमयश्च नोपादानादन्यत्र कार्यस्य दृष्टः।।२५।।

आत्मकृतेः परिणामात्॥२६॥

इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्मप्रक्रियायाम् "तदात्मानं स्वयमकुरुत" (तै० २/७) इत्यात्मनः कर्मत्वं कर्तृत्वं च दर्शयति–"आत्मानमिति कर्मत्वम्, "स्वयमकुरुतेति" कर्तृत्वम्॥ कथं पुनः पूर्वसिद्धस्य सतः कर्तृत्वेन व्यवस्थितस्य क्रियमाणत्वं शक्यं सम्पादयितुम्? परिणामादिति ब्रूमः। पूर्वसिद्धोऽपि हि सन्नात्मा विशेषेण विकारात्मना परिणमयामा सात्मानमिति। विकारात्मना च परिणामो मृदाद्यासु प्रकृतिषूपलब्धः। स्वयमिति च विशेषणान्निमित्तान्तरानपेक्षत्वमपि प्रतीयते॥ *परिणामदिति वा पृथक्सूत्रम्। तस्यैषोऽर्थः–इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्मण एव विकारात्मना परिणामः सामानाधिकरण्येनाम्नायते–"सच्च त्यच्चाभवत्। निरुक्तं चानिरुक्तं च" (तै० २/६) इत्यादिनेति॥२६॥

योनिश्च हि गीयते॥२७॥

इतश्च प्रकृतिर्ब्रह्म, यत्कारणं ब्रह्म योनिरित्यपि पठयते वेदान्तेषु–"कर्तारमीशं पुरुषं ब्रह्मयोनिम्" (मुण्ड० ३/१/३) इति, "यद्भूतयोनिं परिपश्यन्ति धीराः" (मुण्ड० १/१/६) इति च। योनिशब्दश्च प्रकृतिवचनः समधिगतो लोके–"पृथिवी योनिरोषधिवनस्पतीनाम्" इति। स्त्रीयोनेरप्यस्त्येवावयवद्वारेण गर्भं प्रत्युपादानकारणत्वम्। क्वचित्स्थानवचनोऽपि योनिशब्दो दृष्टः–"योनिष्ट इन्द्र निषदे अकारि" (ऋ० सं० १/१०४/१) इति। वाक्यशेषात्त्वत्र प्रकृतिवचनता परिगृह्यते–"यथोर्णनाभिः सृजते गृह्णते च" (मु० १/१/७) इत्येवञ्जातीयकात्। एवं प्रकृतित्वं ब्रह्मणः प्रसिद्धम्॥ यत्पुनरिदमुक्तम्णीक्षापूर्वकं कर्तृत्वं निमित्तकारणेष्वेव कुलालादिषु लोके दृष्टम्, नोपादानेष्वित्यादि, तत्प्रत्युच्यते–न लोकवदिह भवितव्यम्। न ह्ययमनुमानगम्योऽर्थः। शब्दगम्यत्वात्त्वस्यार्थस्य यथाशब्दमिह भवितव्यम्। शब्दश्चेक्षितुरीश्वरस्य प्रकृतित्वं प्रतिपादयतीत्यावोचाम्। पुनश्चैतत्सर्वं विस्तरेण प्रतिवक्ष्यामः॥२७॥

इति शाङ्करभाष्यम् प्रकृत्यधिकरणम् समाप्तम्

वार्तिकम्

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्।।२३।। ''ईक्षतेर्नाशब्दम्'' इत्यारभ्य निरीश्वरप्रधानकारणतावादस्य श्रुतिमत्त्वं निराकृतम्। अनेन च सेश्वरप्रधानकारणतावादस्य श्रुतिमत्त्वं निराक्रियते, इति दर्शयितुं पुनर्मध्येपादमादितः सङ्गतिकीर्तनम्– *यथाऽभ्युदयहेतुत्वादित्यादिना*।।

लक्षणसूत्रेणास्य सङ्गतिं दर्शयितुं तत्कीर्तनमिति केचित्। तन्न; वैफल्यात्। ''ब्रह्म च जन्माद्यस्य यतः'' इति लक्षितमि' त्यादिना हि भाष्येण लक्षणसूत्रेणास्य सङ्गतिरस्य प्रदर्श्यते। न चात्रादिसूत्रेण लक्षणसूत्रस्य सङ्गत्यनुवादः केनचिदप्यंशेनोपयुज्यते। न चानुपयुक्तकथनं युक्तम्; निष्प्रयोजनत्वात्, अस्मन्मते त्वेतस्य विचारस्य सप्रयोजनत्वप्रदर्शनाय तत्सङ्कीर्तनं युक्तम्, इति न वैफल्यम्। अत एव सप्रयोजनब्रह्मविजिज्ञासा कीर्तिता।।

इदमत्र विचार्यते–यत्–''यतो वा इमानि भूतानि जायन्ते'' इति श्रूयमाणं जगद्धेतुत्वम्, तत् किं निर्विशेषसामान्याभावाद् निमित्तमात्रमादाय विश्राम्यति कुलालस्येव घटादेः, किं वाऽविशेषश्रुतेः सुखादेरिवात्मनो निमित्तत्ववदुपादानत्वमादायापि–इति। तत्र यद्याद्यः, तदोपादानगोचरकृतिमतः कर्तृत्वदर्शनाद् निरुपादानभावं कार्यासंभवाञ्च तदन्यथानुपपत्त्योपादाने कल्प्यमाने दृष्टानुसारात् कार्यानुरूपमेव तत् कल्प्यते। तादृशं च प्रधानम्, इति साक्षाच्छ्रुत्या प्रधानसिद्ध्यभावेऽपि श्रुतार्थापत्त्या पूर्ववत् प्रधानसिद्धिः। अथ द्वितीयः ; तदाऽनुपपत्तेरभावाद् न तत्सिद्धिः–इति।।

ननु–लक्षणसूत्र एव जन्मादिपदेन जन्मस्थितिभङ्गं सूत्रयताऽऽचार्येणाभिन्ननिमित्तोपादानत्वं ब्रह्मणः सूचितम्; अन्यथा जन्मादित्रितयग्रहणमनर्थकं स्यात्, जन्ममात्रग्रहणेन निमित्तभावलाभादित्युक्तत्वादिति–चेत्, सत्यम्; तत्र सिद्धवत्कारेणोक्तस्य तस्यैव परीक्षाऽत्र क्रियत इत्यदोषः।।

किं तावत् प्राप्तम्? यदि वेदान्तपठितं जगत्कारणं न प्रधानम्, कुतः? ईक्षत्यधिकरणसिद्धन्यायविरोधात्, अस्तु नामैवम्; तथापि न प्रधानासिद्धिः ; श्रुतार्थापत्त्या तत्सिद्धेः।

श्रुतार्थापत्तिश्च पूर्वमेव दर्शिता। एतेन–श्रुतपरित्यागेनाश्रुतकल्पनम्–निरस्तम्; श्रुतसिद्ध्यर्थत्वादश्रुतकल्पनाया:।।

ननु–श्रुतस्यैव निमित्तत्ववदुपादानत्वोपपत्तौ नाश्रुतोपादानान्तरकल्पनं युक्तम्; अनुपपत्तेरभावात्, कल्पनागौरवप्रसङ्गाच्चेति–चेत्, न; चेतनस्याचेतनोपादानत्वानुपपत्तेस्तदभावासिद्धेः, प्रामाणिकगौरवस्यादोषत्वात्। ननु–चेतनस्यात्मनोऽचेतनसुखाद्युपादानत्वमीश्वरस्येवात्र न विरुद्ध्यते, न; सुखादेः प्राधानिकत्वेनाऽऽत्मोपादानत्वासिद्धेः। तस्मात् प्रेक्षापूर्वकारित्वात् कुलालादिवद् निमित्तत्वमात्रं ब्रह्मणः ; तावताऽपि तत्कारणताश्रुतिपर्यवसानात् उपादानं तु प्रधानमेव; कार्यानुरूपत्वादिति।।

एवं प्राप्त इदमुच्यते–*प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति*।। प्रेक्षापूर्वककर्तृत्वश्रवणाद् निमित्तं ब्रह्मेत्यभ्युपगतं भवता, तथोपादानमपि ब्रह्मेत्यवश्यमभ्युपगन्तव्यम्। कुतः? प्रतिज्ञादृष्टान्तानुपरोधप्रसङ्गात्, अन्यथा प्रतिज्ञादृष्टान्तौ नोपरुध्येताम्। प्रतिज्ञा तावत्–"उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवती" त्येवमादिः। दृष्टान्तश्च–"यथा सोम्येकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्" इत्यादिः। एतौ पुनरुपादानतासंग्रहे ब्रह्मणो घटेते; उपादानाभिन्नत्वादुपादेयस्य, निमित्तकारणाविषयत्वदर्शनाच्च नैमित्तिकस्य। यत इति पञ्चमीश्रुतिरपि ब्रह्मण उपादानत्व उपपद्यते; "जनिकर्तुः प्रकृतिः" इत्युपादानकारणे स्मरणात्। न च–एतावता ब्रह्मणोऽन्यत् निमित्तं भविष्यतीति–वाच्यम्; तस्यैव चेतनत्वात् प्रागुत्पत्तेः–"एकमेवाद्वितीयमि" त्यद्वितीयत्वावधारणाच्च निमित्तत्वात्, अन्यथा पूर्ववत् प्रतिज्ञादृष्टान्तयोरनुपरोधप्रसङ्गः। उपादानादन्यस्मिन् हि तदधिष्ठातर्यभ्युपगम्यमान एकविज्ञानेन सर्वविज्ञानासंभव एव स्यात्। तस्मादात्मनोऽधिष्ठात्रन्तराभावात् कतृत्वम्, उपादानान्तराभावाच्चोपादानत्वमिति।।२३।।

अभिध्योपदेशाच्च।।२४।। इतश्चात्मनः कर्तृत्वं प्रकृतित्वं च श्रुतेर्गम्यते; यतः–"सोऽकामयत बहु स्यां प्रजायेये" ति "तदैक्षत बहु स्यां प्रजायेये" ति चेत्येवमाकारमभिध्यानमात्मन उपदिशति श्रुतिः। तत्र "सोऽकामयते" त्यनेन स्वातन्त्र्यं लक्ष्यते, "बहु स्यामि" त्यनेनोपादानत्वम्–इति।।२४।।

साक्षाच्चोभयाम्नानात्।।२५।। यत् लक्षणसूत्रेऽवादिष्म–जन्मस्थितिभङ्गमिति त्रितयग्रहणेनाभिन्ननिमित्तोपादानत्वं सूचितम्–इति, तदितः समुत्थितम्। सूत्राक्षरव्याख्यानं भाष्ये। प्रकृतिरित्युपलक्षणम्, निमित्तमपीति द्रष्टव्यम्।।२५।।

आत्मकृतेः परिणामात्॥२६॥ आत्मविषयिणी कृतिः, आत्मकृतिः ; तस्या इत्यर्थः। तदेतद् व्याख्याय दर्शयति– *यत्कारणमिति*॥ यस्मात् कारणादित्यर्थः। सूत्रावयवं व्याख्यातुमाकाङ्क्षा-मुत्थापयति– *कथं पुनरिति*॥ परिणामशब्दोऽत्र विवर्तमभिप्रेत्य प्रयुक्त इति द्रष्टव्यम्; निरवयवस्य परिणामासंभवात्॥

एकवाक्यत्वेन व्याख्याय 'परिणामात्' इति पृथक् सूत्रत्वेन संप्रति व्याचष्टे– *परिणामात् इति वा पृथक् सूत्रमिति*॥२६॥

योनिश्च हि गीयते॥२७॥ सुगममस्य भाष्यम्। पूर्वपक्षबीजमनुभाष्य दूषयति– *यत्पुनरित्यादिना*॥ *प्रतिवक्ष्यामः*॥ स्मृतिन्यायविरोधं परिहरन्तो वयमिति शेषः। अत्र तु श्रुतितदर्थापत्तिविरोधः परिहृतः, इति न तेनास्य पौनरुक्त्यमिति॥२७॥ इति सप्तमं प्रकृत्यधिकरणम्॥

इति वार्त्तिकम् प्रकृत्यधिकरणम् समाप्तम्

प्रदीपः

तदेवं जिज्ञासाधिकरणाद्यर्थमुपसंहृत्य जन्माधिकरणार्थमप्युपसंहर्तुं सूत्रम्- *प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्*।।२३।। पूर्वाधिकरणं जीवस्य ब्रह्मणा प्रतिज्ञादृष्टान्तावनपेक्ष्याप्यभेदः साधितः, अत्र तु प्रतिज्ञादृष्टान्तावपेक्ष्यैव जगद्ब्रह्मणोरभेदः साध्यते, इति प्रत्युदाहरणसङ्गतिः। जन्माद्यधिकरणोपसंहारत्वात् तेनापि सङ्गतिरविकला। एतेन-जन्माद्यस्य यत इत्यस्यानन्तरमेवास्याधिकरणस्य निवेशापत्तिरिति-परास्तम्; जीवविषये न प्रतिज्ञासिद्धया ब्रह्माभेदः, किन्त्वन्यत्रैवेति सूचनार्थत्वेनात्रापि सङ्गतेः। इदमेवाभिप्रेत्योक्तं भामत्याम्-"अत्र च लक्षणस्य सङ्गतिमुक्त्वा लक्षणेनास्य सङ्गतिरुक्ते" ति। यत इति हेतुपञ्चम्या अभिन्ननिमित्तोपादानमर्थः, न तु केवलं निमित्तकारणमिति विचारात् पादसङ्गतिः, सर्वेषां कारणवाक्यानां ब्रह्मणि गतिसामान्योपपादनाञ्च। प्रकृतिश्चेति चकारात् निमित्तमपीति मन्यते। अभिन्ननिमित्तोपादानमित्यर्थः। संशयबीजं दर्शयति- *तञ्चेत्यादिना*।। इयमत्र भामतीपूर्वपक्षकारिका-

ईक्षापूर्वककर्तृत्वं प्रभुत्वमसरूपता।
निमित्तकारणेष्वेव नोपादानेषु कर्हिचित्।।

इति। अत्र निमित्तकारणत्वे ब्रह्मणो हेतुत्रयं संगृहीतम्। तत्र प्रथमं हेतुं सविवरणं निर्दिशति भाष्यकारः- *ईक्षापूर्वकेत्यादिना* संक्रमयितुमित्यन्तेन*।। द्वितीयस्य हेतोर्मूलं भाष्यम्- *ईश्वरत्वप्रसिद्धेश्चेत्यादि*।। तृतीयहेतुमूलं भाष्यं तु- *कार्यं चेतत्यादि* *इत्यादिश्रुतिभ्य इत्यन्तम्*।। ननु तर्हि किं निरुपादानकमेव जगत्? नेत्याह- *पारिशेष्याददिति*।। निमित्तकारणत्वस्य ब्रह्मणि सिद्धत्वाद् अर्थतस्तदनुपादानत्वादित्यर्थः।। इमे अत्र भामतीसिद्धान्तकारिके-

न मुख्ये सम्भवत्यर्थे जघन्या वृत्तिरिष्यते।
न चानुमानिकं युक्तमागमेनापवादितम्।।

सर्वे हि तावद्वेदान्ताः पौर्वापर्येण वीक्षिताः।
एकान्तिकाद्वैतपरा द्वैतमात्रनिषेधतः॥

इति। तत्र प्रथमं सूत्रं व्याचष्टे भाष्यकारः– *प्रकृतिश्चेत्यादिना*॥ वेदान्तभेदेन प्रतिज्ञावाक्यं दृष्टान्तवाक्यं च ब्रह्माभिन्ननिमित्तोपादानतागमकं संगृह्णाति– *प्रतिज्ञा तावदित्यादिना*॥ *एवं प्रतिवेदान्तं प्रतिज्ञादृष्टान्तौ प्रकृतित्वसाधनौ प्रत्येतव्यावित्यन्तेन*॥ ननु–एकविज्ञानेन सर्वविज्ञानस्यार्थवादत्वमिति, नेत्याह– *तञ्चोपादानेत्यादि*॥ तथाच मुख्यार्थबाधापत्तिर्निमित्त-कारणतामात्र इति भावः। *आत्मनि खल्विति*॥ एतेन–प्रधानोपादानतावादः श्रुत्यैव प्रतिरुद्ध इति सूच्यते। सूत्रे चकारस्य हेतुसमुञ्चायकत्वमप्यभिप्रेत्याह– *यत इतीयमिति*॥ तथाच साक्षात् प्रकृतित्वाम्नानमपि सिद्धान्तयुक्तिः। ''साक्षाञ्चोभयाम्नानादि'' त्यत्र तूभयाम्नानम्, अत्र तु प्रकृतित्वमात्रस्येति विवेकः। ब्रह्मणो निमित्तत्वं पूर्वपक्षिणामपि सम्मतम्, परन्तु न तदत्र करणत्वरूपम्, किन्त्वधिष्टात्रन्तराभावरूपमित्याह– *निमित्तत्वं त्विति*॥ *अद्वितीयमिति*॥ चेतनान्तररहितमित्यर्थः। एतादृशमेव निमित्तत्वमत्र विवक्षितमित्यत्र किं कारणमिति चेत, प्रतिज्ञादृष्टान्तानुपरोध एवेत्याह– *अधिष्ठात्रन्तराभावोऽपीति*॥ तमेवोपपादयति– *अधिष्ठातरीति*॥ तथाचाधिष्ठात्रन्तराभावे सत्युपादानत्वमभिन्ननिमित्तोपादानत्वमिति फलितमित्याह– *तस्मादिति*॥ *अधिष्ठान्नन्तराभावादिति*॥ अनेन दोषविधयाऽविद्यारूपनिमित्तकारणान्तरसत्त्वेऽपि न दोष इति सूच्यते॥२३॥

अभिध्योपदेशाञ्च॥२४॥ बहुभवनसङ्कल्पोपदेशादिपि प्रकृतित्वमुपादानत्वं चेति सूत्रार्थः। अत्र सङ्कल्पेन कर्तृत्वम्, बहुभवनेन प्रकृतित्वमित्यर्थः। तदेतदाह– *तत्राभिध्यानेति*॥ एतेन–अधिष्ठात्रन्तराभावे सत्युपादानत्वं प्रधानस्यापि साधारणमिति–प्रत्युक्तम्; उपादानगोचरापरोक्षज्ञानवत्त्वस्यापि निमित्तत्वरूपत्वात्। ब्रह्मण ईक्षणं तु स्वयं चैतन्यरूपत्वेन, स्वोपाधिमायापरिणामवृत्तिमादाय वा बोध्यम्॥२४॥

साक्षाञ्चोभयाम्नानात्॥२५॥ उपादानान्तरं निमित्तान्तरं चानपेक्ष्य प्रकृतित्व-निमित्तत्वोभयोम्नानादपि ब्रह्मणोऽभिन्ननिमित्तोपादानत्वमिति सूत्रार्थः। अत्र ''साक्षात्पदप्रयोगात् प्रकृतिकारणत्वेन तच्छरीरकस्यापि कारणत्वव्यपदेशमात्रमिति मतं व्यावर्त्यते। अन्यथा निमित्तत्व-मप्यन्यदीयमेवेति सिद्धानते पर्यवसानापत्त्या न ब्रह्म निमित्तम्, उपादानं वा स्यादिति मन्तव्यम्। आम्नानं दर्शयति– *सर्वाणि ह वेति*॥ *आकाशादेवेति*॥ आकाशपदवाच्यब्रह्मातिरिक्तस्य कस्यापि कारणस्याभावोऽवधारणेन गम्यत इति भावः। निमित्तातिरिक्तोपादानमित्यर्थः। इदमेव

भाष्यमवलम्ब्याविद्याया निमित्तत्वमात्रम्, नोपादानत्वमपीति मन्यते भामतीकारैः, मतान्तरे तु ब्रह्मातिरिक्तोपादानान्तरसत्त्वादवधारणानुपपत्तिः॥२५॥

आत्मकृतेः परिणामात्॥२६॥ परिणमयितृत्वात् स्वस्यैव कार्यात्मना कृतिराम्नायमाना स्वस्य प्रकृतित्वं निमित्तत्वं च सूचयति। ''अभिध्योपदेशादि'' त्यत्र बहुभवनसङ्कल्प उक्तः, अत्र तु स्वस्यैव स्वयं सृज्यमानत्वं प्रतिपाद्यते। स्वस्यैव कार्यात्मनोत्पत्तिर्हि प्रकृतित्वं विना नोपपद्यते, अकुरुतेति कर्तृत्वं च न निमित्तत्वं विनेत्युभयसिद्धिरिति भावः॥

ननु–''परिणामादि'' ति पदं सूत्रे व्यर्थमित्यतो योगविभागेन व्याचष्टे–*परिणामादिति*॥ परिणामो नामात्र विवर्त इति वार्तिककारः। ननु भाष्यकारैरपि ब्रह्मण एव विकारात्मना परिणाम इति परिणामपदस्यैव प्रयोगात् विवर्तपरतया व्याख्यानं न युक्तमित्यत आह–*सञ्चेति*॥ इत्यादिनेत्यादिपदेन–''सत्यं चानृतं च सत्यमभवदि' ति वाक्यशेषस्य परिग्रहः। अत्र हि ब्रह्मणः सत्यस्य सत्यात्मनाऽनृतात्मना च भावः प्रतिपाद्यते; सत्यस्यानृतभावो हि न मुख्यपरिणामपक्षे सम्भवति, किन्तु गौणपरिणामपक्ष एव; कारणसमसत्ताककार्यताया एव परिणामपदार्थत्वात्। तथाच कारणात् सत्यात् कार्य सत्यं न्यूनसत्ताकम्, कार्यमनृतं च न्यूनसत्ताकम्, इति कारणविषमसत्ताककार्यत्वरूपविवर्ताभिप्रायेणैवात्र परिणामपदमिति भावः। ननु विवर्ते परिणामपदप्रयोगः कुत इत्यत आह–*सामानाधिकरण्येनेति*॥ अभेदेनेत्यर्थः। कारणाभिन्नत्वं कार्यस्य परिणामविवर्तसाधारणं परिणामपदार्थ इति भावः ; अन्यथा ह्यत्र भाष्ये सामानाधिकरण्येनेति पदं वितथं स्यादिति भावः॥२६॥

योनिश्च हि गीयते॥२७॥ बहुषु स्थानेषु ब्रह्म योनिशब्देन चाम्नायते यतः, ततोऽपि तस्य प्रकृतित्वं स्वीकर्तव्यमिति सूत्रार्थः। कर्तृयोनिपदघटितानि तत्तद्वाक्यान्युदाहरति–*कर्तारमीशं पुरुषं ब्रह्म योनिमिति*॥ पूर्वपक्षयुक्तीरनुभाष्य निराकरोति–*यत्पुनरिति*॥ *न लोकवदिति*॥ औपनिषदत्वाद् ब्रह्मणो यथाश्रुत्येव तत्स्वीकारः, नानुमानाद्यनुसारेणापीति भावः। तदिदमाह–*न हीति*॥ *पुनश्चेति*॥ अनन्तराध्याये तदनन्यत्वाद्यधिकरणेष्वित्यर्थः॥२७॥ इति सप्तमं प्रकृत्यधिकरणम्॥

इति प्रदीपः प्रकृत्यधिकरणम् समाप्तम्

भामती

स्यादेतद्–वेदान्तानां ब्रह्मणि समन्वये दर्शिते समाप्तं समन्वयलक्षणमिति किमपरमवशिष्यते यदर्थमिदमारभ्यत इति शङ्कां निराकर्त्तु सङ्गतिं दर्शयन् अवशेषमह *यथाभ्युदय इति*। अत्र च लक्षणस्य सङ्गतिमुक्त्वा लक्षणेनास्याधिकरणस्य सङ्गतिरुक्ता। एतदुक्तं भवति–सत्यं जगत्कारणे ब्रह्मणि वेदान्तानामुक्तः समन्दयस्तत्र कारणभावस्योभयथा दर्शनाज्जगत्कारणत्वं ब्रह्मणः किं निमित्तत्वेनैव, उतोपादानत्वेनापि? तत्र कदि प्रथमः पक्षस्तत उपादानकारणानुसरणे सांख्यस्मृतिसिद्धं प्रधानमप्युपेयम्। तथा च जन्माद्यस्य यत इति ब्रह्मलक्षणमसाधु, अतिव्याप्तेः प्रधानेऽपि गतत्वात्। असम्भवाद्वा। यदि तूत्तरः पक्षस्ततो नातिव्याप्तिर्नाप्यव्याप्तिरिति साधु लक्षणम्। सोऽयमवशेषः। तत्र–

ईक्षापूर्वकर्त्तृत्वं प्रभुत्वमसरूपता।
निमित्तकारणेष्वेव नोपादानेषु कर्हिचित्॥

तदिदमाह *तत्र निमित्तकारणमेव तावद् इति*। आगमस्य कारणमात्रे पर्यवसानादनुमानस्य तद्विशेषनियममागमो न प्रतिक्षिपत्यपि त्वनुमन्यत एवेत्याह *पारिशेषयाद् ब्रह्मणोऽन्यद् इति*। ब्रह्मोपादानत्वस्य प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसङ्गात्सांख्यस्मृतिप्रसिद्धमानुमानिकं प्रधानं शिष्यत इति। एकविशानेन च सर्वविज्ञानप्रतिज्ञानम् 'उत तमादेशम्' इत्यादिना यथा सोम्यैकेन मुत्पिण्डेनेति च दृष्टान्तः, परमात्मनः प्राधान्यं सूचयतः। यथा सोमशर्मणैकेन ज्ञातेन सर्वे कठा ज्ञाता भवन्ति।

एवं प्राप्त उच्यते–प्रकृतिश्च। न केवलं ब्रह्म निमित्तकारणं, कुतः? प्रतिज्ञादृष्टान्तयोरनुपरोधात्। निमित्तकारणत्वमात्रे तु तावुपरुध्येयाताम् तथाहि–

न मुख्ये सम्भवत्यर्थे जधन्या वृत्तिरिष्यते।
स चानुमानिकं युक्तमागमेनापबाधितम्॥

सर्वे हि तावद्वेदान्ताः पौर्वापर्य्येण वीक्षिताः।
ऐकान्तिकाद्वैतपरा द्वैतमात्रनिषेधतः।।

तदिहापि प्रतिज्ञादृष्टान्तौ मुख्यार्थावेव युक्तौ न तु यजमानः प्रस्तर इतिवद् गुणकल्पनया नेतव्यौ तस्यार्थवादस्यातत्परत्वात्। प्रतिज्ञादृष्टान्तवाक्ययोस्त्वद्वैतरपरत्वादुपादानकारणात्मकत्वाच्चोपादेयस्य कार्यजातस्योपादानज्ञानेन तज्ज्ञानोपपत्तेः। निमित्तकारणं तु कार्यादत्यन्तभिन्नमिति न तज्ज्ञाने कार्यज्ञानं भवति। अतो ब्रह्मोपादानकारणं जगतः। न च ब्रह्मणोऽन्यन्निमित्तकारणं जगत इत्यपि युक्तम्। प्रतिज्ञादृष्टान्तोपरोधादेव। नहि तदानीं ब्रह्मणि ज्ञाते सर्वं विज्ञातं भवति। जगन्निमित्तकारणस्य ब्रह्मणोऽन्यस्य सर्वमध्यपातिनस्तज्ज्ञानेनाविज्ञानात्। यत इति च पञ्चमी न कारणमात्रे स्मर्यते, अपि तु प्रकृतौ जनिर्तुः प्रकृतिरिति। ततोऽपि प्रकृतित्वमवगच्छामः। दुन्दुभिग्रहणं दुन्दुभ्याघातग्रहणं च तद्‌गतशब्दत्वसामान्योपलक्षणार्थम्।।२३।।

अनागतेच्छासङ्कल्पोऽभिध्या। एतया खलु स्वातन्त्र्यलक्षणेन क्वर्तृत्वेन निमित्तत्वं दर्शितम्। बहु स्यामिति च स्वविषयतयोपादानत्वमुक्तम्।।२४।।

आकाशादेव ब्रह्मण एवेत्यर्थः। साक्षादिति चेति सूत्रावयवमनूद्य तस्यार्थं व्याचष्टे *आकाशादेव* इति श्रुतिर्ब्रह्मणो जगदुपादानत्वमवधारयन्ती उपादानान्तराभावं साक्षादेव दर्शयतीति साक्षादिति सूत्रावयवेन दर्शितमिति योजना।।२५।।

प्रकृतिग्रहणमुपलक्षणं निमित्तमित्यपि द्रष्टव्यं, कर्मत्वेनोपादानत्वात्कर्तृत्वेन च तत्प्रति निमित्तत्वात्। *कथ पुनः इति*। सिद्धसाध्ययोरेकत्रासमवायो विरोधादिति। *परिणामादिति ब्रूमः इति*। पूर्वसिद्धस्याप्यनिर्वचनीयविकारात्मना परिणामोऽनिर्वचनीयत्वाद्भेदेनाभिन्न इवेति सिद्धस्यापि साध्यत्वमित्यर्थः। एकवाक्यत्वेन व्याख्याय परिणामादित्यवच्छिद्य व्याचष्ठे *परिणामदिति वा इति*। सच्च त्यच्चेति द्वे ब्रह्मणो रूपे। सच्च सामान्यविशेषेणापरोक्षतया निर्वाच्यं पृथिव्यप्तेजोलक्षणम्। त्यच्च परोक्षमत एवानिर्वाच्यमिदन्तया वाय्वाकाशलक्षणं, कथं च तद्‌ब्रह्मणो रूपं, यदि तस्य ब्रह्मोपादानं, तस्मात्परिणामाद् ब्रह्म भूतानां प्रकृतिरिति।।२६।।

पूर्वपक्षिणोऽनुमानमनुभाष्यागमविरोधेन दूषयति *यत्पुनः इति*। एतदुक्तं भवति। ईश्वरो जगतो निमित्तकारणमेवेक्षापूर्वकजगत्कर्तृत्वात् कुम्भकर्तृकुलालवत्। अत्रेश्वरस्यासिद्धेराश्रयासिद्धो हेतुः पक्षश्चाप्रसिद्धविशेष्यः। यथाहुर्नानुपलब्धे न्यायः प्रवर्तत इति। आगमात्तत्सिद्धिरिति चेत्, हन्त तर्हि यादृशमीश्वरमागमो गमयति तादृशोऽभ्युपगन्तव्यः। स च निमित्तकारणं चोपादानकारणं

चेश्वरमवगमतीति। विशेष्याश्रयग्राह्यागमविरोधान्नानुमानमुदेतुमर्हतीति, इति कुतस्तेन निमित्तत्वावधारणेत्यर्थः। इयं चोपादानपरिणामादिभाषा न विकाराभिप्रायेणापि तु यथा सर्पस्योपादानं रज्जुरेवं ब्रह्म जगदुपादानं द्रष्टव्यम्। न खलु नित्यस्य निष्कलस्य ब्रह्मणः सर्वात्मनैकदेशेन वा परिणामः सम्भवति नित्यत्वादनेकदेशत्वादित्युक्तम्। न च मृदः शरावादयो भिद्यन्ते न चाभिन्ना न वा भिन्नाभिन्नाः किन्त्वनिर्वचनीया एव। यथाह श्रुतिः ''मृत्तिकेत्येव सत्यम्'' इति। तस्माददृैतोपक्रमादुपसंहाराच्च सर्व एव वेदान्ता ऐकान्तिकाद्वैतपराः सन्तः साक्षादेव क्वचिदद्वैतमाहुः, क्वचिद् द्वैतनिषेधेन, क्वचिद् ब्रह्मोपादानत्वेन जगतः। एतावतापि तावद्भेदो निषिद्धो भवति, न तूपादानत्वाभिधानमात्रेण विकारग्रह आस्थेयः। नहि वाक्यैकदेशस्यार्थोऽस्तीति।।२७।।

इति भामती प्रकृत्यधिकरणम् समाप्तम्

श्री कण्ठभाष्य

अथ प्रकृत्यधिकरणम्॥६॥

पूर्वं 'जन्माद्यस्य यतः' इति द्वितीयाधिकरणे 'यतो वा इमानि श्रूतानि' इति पञ्चमीश्रुत्युदाहरणेन परमेश्वरस्य जगदुपादानत्वं सामान्येन निरूपितम्। तद्विशेषतः समर्थयितुमिदमधिकरणमारभ्यते–

॥सू॥ प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्॥२३॥

'तस्माद्वा एतस्मादात्मन आकाशः संशूतः' 'द्यावाशूमी जनयन् देव एकः' इत्यादिवाक्यान्यस्य विषयः॥

एतेषु प्रसिद्धमुभयकारणत्वं ब्रह्मणो युक्तं न वेति संदेहः। संदेहश्च निमित्तस्य कुलालादेरुपादानमृत्पिण्डादिभावादर्शनात् उपादानस्य मृत्पिण्डादेर्निमित्तकुलालादिभावादर्शनात् कथमेतस्मिन्निमित्तत्वमुपादानत्वं च जगत्कार्य प्रतीति।

पूर्वपक्षस्तु जगत्सृष्टौ निमित्तमेव, नोपादानमिति। कुतः। असंभवात्। न हि घटं निर्मिमाणः कुलालः स्वयमेव मृत्पिण्डीभूय घटं करोति। पटं वा कुविन्दः। यदि कर्तुमीहते, तन्न संभवत्येव। अतो निमित्तभूतस्य ब्रह्मण उपादानत्वं न संभाव्यते। निष्प्रयोजनं च निमित्तस्यैवोपादानत्वकल्पनं, विनाऽपि तत्कल्पनं कार्यनिष्पत्तेः, कुलालस्य मृत्पिण्डादन्यत्वेऽपि घटनिष्पत्तिदर्शनात्, ततो ब्रह्म निमित्तमेव, न तूपादानमपीति॥

अत्रोच्यते–जगतो निमित्तमुपादानं च ब्रह्मैव। 'स्तब्धोऽस्युत तमादशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' इति श्रुत्या येनादेष्ट्रा निमित्तशूतेन विज्ञातेन चिदचिद्रूपं सर्वं जगद्विज्ञातं भवतीत्यादेष्टृविज्ञानेन सर्वविज्ञानप्रतिज्ञानात्, 'यथैकेन मृत्पिण्डेन विज्ञातेन सर्वमिदं मृण्मयं विज्ञातं स्यात्' इति तदुपपादकमृत्पिण्डदृष्टान्तानुपरोधाञ्च ब्रह्मणो निमित्तमात्रत्वे तद्विज्ञानेन सकलप्रपञ्चविज्ञानं न संभवति। तथा हि–कुलालज्ञानेन घटादि कार्यं न ज्ञायते, किंतु तदुपादानमृत्पिण्डज्ञानेन। अतो निमित्तस्य ब्रह्मण उपादानत्वे तत् संभवतीति ब्रह्मैवोपादानमपि॥

आदिश्यते अनेनेत्यादेशशब्दादादेष्टृभूतं ब्रह्माच्यते। न तदर्थान्तरत्वमुपादानस्येति ज्ञापयितुं हेत्वन्तरमाह–

।।सू।। अभिध्योपदेशाच्च।।२४।।

'तदैक्षत बहु स्यां प्रजायेय' इति निमित्तभूतस्यैक्षितुः सर्वज्ञस्य ब्रह्मण एव विचित्रजगदाकारेण बहुभवनसंकल्प उपदिश्यते। अतो निमित्तादनन्यदुपादानम्।

ननु 'विश्वाधिको रुद्रो महर्षिर्हिरण्यगर्भं पश्यत जायमानम्' इति विश्वोत्तीर्ण एव परमेश्वरो निमित्तभूतः स्वव्यतिरिक्तप्रकृतौ स्वसंकल्पेन जायमानं सकलदेवेप्रथमं हिरण्यगर्भं सृष्टमनुग्रहदृष्ट्या पंश्यतीति विज्ञायते, कथमस्य विश्वाकारत्वं प्रकृतिरूपत्वेन संभवति। 'मायां तु प्रकृतिं विद्यात्' इति मायायाः प्रकृतित्वं श्रूयते। 'तस्माद्विराडजायत। विराजो अधि पूरुषः' इति पुरुषस्य प्रकृतित्वमाम्नायते। अतस्तयोरेव प्रकृतित्वेन जगदाकारत्वमुचितमित्यत आह–

।।सू।। साक्षाच्चोभयाम्नानात्।।२५।।

साक्षात् प्रत्यक्षमेव वेदान्तभागेषु परमेश्वरस्य प्रकृतित्वेन जगदाकारत्वं निमित्तत्वेन जगत्पतित्वं च श्रूयते। तथाहि–'विश्वाधिको रुद्रः' इत्यादिना यथा विश्वाधिकत्वमवगम्यते, तथा 'सर्वो वै रुद्रः' इत्यादिना प्रकृतित्वाद्विश्वरूपत्वमपि श्रूयते। शतरुद्रीये–'नमो हिरण्यबाहवे' इत्यारभ्य 'कुलुञ्चानां पतये' इत्यन्तेन विश्वाधिपत्यं ततश्च 'नमः पर्ण्याय च पर्णशद्याय च' इत्येतत्पर्यन्तेन जगदाकारत्वं च परमेश्वरस्य श्रूयते। प्रदेशान्तरे च 'ब्रह्म वनं ब्रह्म स वृक्ष आसीत्' 'ब्रह्माध्यतिष्ठद्भुवनानि धारयन् 'इत्युभयश्रुतिः। अथर्वशिरसि च प्रथमंद्वितीयखण्डयोर्जगंदाकारत्वं, तदुपरि जगदीश्वरत्वं च। ततः प्रत्यक्षमुभयाम्नानाज्जगच्च जगदीश्वरश्च प्रकृतिमित्तत्त्वेन परं ब्रह्म परमेश्वरः शिव इति युक्तमेव।।

किंच प्रमाणान्तरमस्तीत्याह–

।।सू।। आत्मकृतेः।।२६।।

'तदात्मानं स्वयमकुरुत' इति स्वस्यैव जगदाकारत्वेन कृतिरवगम्यते परमेश्वरस्य। अतः स एवोपादानं निमित्तं च।।

नन्वज्ञानविकारास्पदहेयप्रपञ्चरूपेण प्रकृतिभावेन कथं वर्तते निरस्तसमस्तदोषलवकङ्को निस्सीममङ्गलगुणरत्नाकरो निरङ्कुशनित्यसिद्धवैभवः प्रपञ्चातीतः परमशिव इत्यत आह–

।।सू।। परिणामात्।।२७।।

नित्यशुद्धानन्दस्य निरतिशयमङ्गलस्वभावस्यापि निमित्तस्य परमशिवस्य। प्रकृतित्वेन जगदाकारत्वं युक्तमेव, चिदचिदाकारेण परिणामात्। हन्त कारणविकाररूपो हि परिणामः, पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणाम इति कथं परमेश्वरोऽनर्थधर्मात् परिश्रूयत इति चेत्–सत्यं, यथा निमित्तस्य प्रकृतित्वेऽपि न विकारादिस्पर्शः तथा परिणामः संभवति। कोऽयमपूर्वः परिणामः? कुतुहलिनो वयं तच्छ्रवणे, विविच्यतामिति चेत्, शृणु, विवेचयामः–

'यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी॥' इति। यस्मिन् काले विगतचन्द्रसूर्यादितेजस्कतया दिवारात्रिविभागशून्यं नामरूपविशेषराहित्येन स्थूलसूक्ष्मचेतनाचेतनसदसद्व्यक्तिव्यवस्थारहितं सर्वमिदं तमोशूतमवर्तत, तदा शिव एवाद्वितीयः केवलः स्वाविभागापन्नचिदचिच्छक्तिः स्वप्रकाशः परिशिष्टोऽभूत्। तदक्षरं तदेव तदानीं क्षररहितं नाशरहितं परं वस्तु, तत् सवितुर्वरेण्यं, तत् सवितुरादित्यस्य पूर्वं तेजः प्रदत्वेन वरेण्यमन्तर्वर्ति तेजस्तदपि तदेव। तस्मात् तादृशात् स्वविलीनस्वेतरनिखिलचिदचित्प्रपञ्चात् अद्वितीयात् पुराणी नित्यसिद्धा तत्कालतमोऽपनोदिनी महास्फुरणरूपा परमा प्रज्ञा ज्ञानशक्तिः प्रसृता प्रावर्तत। ततः 'सोऽकामयत। बहु स्याम्' इति नामरूपादिविभागरहितसूक्ष्मचिदचिद्वस्तुशरीरकः कारणावस्थः परमेश्वरः संविभक्तनामरूपचिदचिद्वस्तुशरीरको भवेयमिति संकल्पमकरोत्। ततश्च 'इदं सर्वमसृजत। यदिदं किंच' इति स्वशरीरभूतं सूक्ष्मचिदचिद्वस्तु स्वस्माद्विभज्य, 'तत्सृष्ट्वा। तदेवानुप्राविशत्' इति स्वतो विभक्ते चिदचिद्वस्तुनी स्वयमात्मतया प्रविश्य 'सञ्च त्यञ्चाभवत्' इत्यादिना सदसत्प्रपञ्चरूपेण बहुधा परिणतोऽभवदिति पुरुषस्य बालत्वयुवत्वादिवत् ब्रह्मणो जगच्छरीरिणः कारणत्वं कार्यत्वं च॥

'मायां तु प्रकृतिं विद्यान्मायिन तु महेश्वरम्। तस्यावयभूतेन व्याप्तं सर्वमिदं जगत्॥' इति श्रवणान्मायायाः सकलप्रकृतित्वं, तद्विशिष्टत्वं महेश्वरस्य तदवयवशूतेनाशभूतेन तदीयचिच्छक्तिशकलेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजगद्व्याप्तिश्चावगम्यते। यथा केवलाच्छरीराल्लोमनखाद्यत्पत्तिर्न संभवति आत्मनश्च तथा न केवलं मायाया जगदुत्पत्तिः महेश्वराञ्च किंतु मर्त्याच्छरीरिणः केशनखाद्युत्पत्तिवत् मायिनः परमेश्वरात् सकलचेतनाचेतनप्रकृतिः पुरुषोऽभिव्यक्तो भवति। तद्रूपादीश्वरादव्यक्तचतुर्मुखद्युत्पत्तिः। तथा च श्रुतिरीश्वरस्य पुरुषरूपत्वमभिधत्ते 'पुरुषो वै रुद्रः' इति। ततः समुचितं चिदचिद्विशिष्टः परमेश्वरः कारणं कार्यं च तत्तदवस्थाविशेषादिति॥

इति श्री कण्ठभाष्य प्रकृत्यधिकरणम् समाप्तम्

शिवार्कमणिदीपिका

सङ्गतिं सूचयन्नुत्तराधिकरणमवतारयति–**पूर्वमिति। सामान्येन निरूपितमिति।** सामान्येन श्रुतिगतपञ्चमीमात्रसमर्पितं मतान्तरनिराकरणपुरस्सरं विशिष्य व्यवस्थापितमुपादानत्वं जगज्जन्मादेर्लक्षणस्य निरूपकं घटकं कृतमित्यर्थः। अन्यनिष्ठस्य जन्मादेरुपादानामपादेयभाव-सम्बन्धेनोपलक्षणतया ब्रह्मक्षणमुपादानत्वं लक्ष्ये लक्षणघटकमिति भावः। निरूप्यते अनेनेति करणार्थे व्युत्पन्नघञन्तान्निरूपशब्दात्तत्करोतिण्यन्तात् क्तप्रत्यये 'निष्ठायां सेटी' ति णिलोपे च सति निरूपितशब्दः उक्तोर्थे साधुः। **विशेषतः समर्थयितुमिति।** कर्तैव केवलं परमेश्वरः। उपादानं तु प्रधानमिति सेश्वरसाङ्ख्यमतनिराकरणपूर्वकं ब्रह्मण उपादानत्वं समर्थयितुमित्यर्थः।। एवं च यद्यप्येतदधिकरणविषयवाक्यानि ब्रह्मणो जगदुभयविधकारणत्वप्रतिपादकानि स्पष्टब्रह्मलिङ्गान्येव। पूर्वपक्षे ब्रह्मप्रतिक्षेपाभावात्। तथापि निरीश्वरसाङ्ख्यनिराकरणमिति प्रासङ्गिकी पादसङ्गतिरिति भावः। समनन्तराधिकरणसङ्गतिस्तु सर्वविज्ञानप्रतिज्ञायाः निखिलजगदुपादानत्वस्य चा क्षेपरूपा स्पष्टैव। प्रसक्तं सेश्वरसाङ्ख्यनिराकरणम्।।सू० **प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्।।२३।।** ननु ब्रह्मणः कर्तृत्वं पूर्ववादिनाप्यङ्गीकृतम्। उपादानत्वं श्रुत्यैव प्रतिज्ञादृष्टान्ताभ्यामुपपादितम्। अतो न युक्तत्वकोटिरुन्मिषतीत्याशङ्क्य दृष्टान्ताभ्यामुपपादयति–**सन्देहश्चेति।** लोकदृष्टिमुपपादयन्नेव पूर्वपक्षयति **पूर्वपक्षस्त्विति।** ननु लोके कुलालादीनां घटादिकर्तृणां तदुपादानत्वं मा स्म भूत्। तेषां तदुपादानत्वग्राहकप्रमाणाभावात्। इह तु जगत्कर्तुरेव सतः परब्रह्मणस्तदुपादानत्वमिति प्रतिज्ञादृष्टान्ताभ्यामुपपाद्यमानं किमिति त्यक्तव्यम्। यदि कर्तुरुपादानत्वं लोके न दृष्टमिति कर्तुरुपादानस्य च भेद एव दृष्ट इति च तव्द्यतिरिच्येत तदा लोके कतिपयकार्यकर्तुः कार्यान्तरकर्तृत्वं न दृष्टमिति'दं सर्वमसृजते'त्यादिश्रुतिप्रतिपन्नं ब्रह्मणस्सर्वकर्तृत्वमपि परित्यक्तव्यं स्यात्। अतः श्रुतिप्रतिपन्नत्वाविशेषादलोकदृष्टं ब्रह्मणस्सर्वकर्तृत्वमिव सर्वोपादानत्वमप्यङ्गीकरणीय-मित्याशङ्क्याह–**अत इति।** कुलालस्येव कर्तुर्ब्रह्मणोऽप्युपादानत्वं न सम्भवत्येव। कर्तृकर्मभाव-विरोधस्याविशेषात् ततः प्रजापतेः स्ववपोत्खनन इवे ब्रह्मणो जगन्निमाणे कर्तृत्वमेव। उपादानश्रुतयः

विरोधादौपचारिकतया नेया इति भावः। ननु कर्तुरुपादानत्वे नास्ति विरोधः। ऊर्णनाभौ दर्शनात्। न हि दृष्टेऽनुपपत्तिर्नाम। न च वाच्यमूर्णनाभेर्देह एव तदुपादानं स तु केवलं तन्तुष्विति। 'यथोर्णनाभिस्सृजते गृह्णते चे' ति श्रुतो तन्तून्सत्रष्टुरूर्णनाभेरेव तल्लयाधारत्वप्रतिपादनेन प्रत्यक्षसंवादिना तदुपादानत्वस्यापि सिद्धेः। तल्लयाधारस्य तदुपादानत्वनियमात्। एवं च श्रुतिसिद्धोर्णनाभि-दृष्टान्तानुसारेण ब्रह्मणोऽपि जगत्कर्तुरुपादानत्वं कल्प्यते। ऊर्णनाभौ कर्तुरुपादानत्वं दृष्टमिति लौकिकव्याप्त्यापि तत्कल्प्यते। तथा सति छान्दोग्यादिश्रुतप्रतिज्ञाश्रुतीनामपि मुख्यार्थपरत्वं लभ्यत इत्याशङ्क्याह–**निष्प्रयोजनं चेति**। चेन निरालम्बनत्वं समुञ्चीयते। अयं भावः। ब्रह्मण उपादानत्वमभ्युपगच्छताऽपि 'मायां तु प्रकृतिं विद्या' दिति श्रुत्यनुसारेण परिणामिन्या मायाया उपादानत्वमभ्युपगम्यते। अतो निष्प्रयोजनं ब्रह्मणोऽप्युपादानत्वकल्पनम्। जगदाकारेण परिणममानायां मायायां निर्विकारं ब्रह्माप्युपादानमिति वचो निरालम्बनं च। कार्याकारेण परिणामित्वं ह्युपादानत्वम्। अन्यथा मृदि घटाकारेण परिणममानायां तदाकारेणापरिणममानं भूतलमपि तदुपादानं कल्प्येत। एतेन तल्लयाधारस्य तदुपादानत्वं नियतमित्यपि प्रत्युक्तम्। घटलयाधारस्यापि भूतलस्य तदनुपादानत्वात् उक्तनियमभङ्गे च न तन्तुसृष्टौ कर्तुरूर्णनाभेश्चेतनस्योपादानत्वं, किं तु जडस्य तदीयलालाजलस्यैवेति कर्तुरुपादानत्वनियममाश्रित्य जगत्कर्तुस्तदुपादानत्वकल्पनमपि प्रत्युक्तम्। घटादिकर्तुस्तदुपादानचादर्शनेन व्यभिचाराञ्च। यत्तु प्रतिज्ञादृष्टान्तादिमुख्यत्वानुसारेण परमेश्वरस्योपादानत्वमभ्युपगम्यत इति तदपि न सम्यक्। ब्रह्मज्ञाने सत्यपि वियदादीनां मृत्पिण्डादिज्ञाने सत्यपि घटशरावादीनां च संशयविषयत्वेनानुभूयमानानां मुख्यदृष्टया ज्ञातत्वासम्भवात् प्रतिज्ञावाक्ये 'अश्रुतममतमविज्ञात'मिति ब्रह्मश्रवणादिषु सत्स्वप्यश्रुतत्वाद्युपन्यासेन दृष्टान्तवाक्ये घटशरावादिवन्मृत्पिण्डादेरपि मृदादेः कार्यविशेषतया तदुपादानस्य ज्ञानेन घटादीनां ज्ञातत्वोपन्यासेन च प्रतिज्ञादृष्टान्तयोरमुख्यत्वस्य श्रुत्यैव स्फूटीकरणाश्च। तदमुख्यत्वाभ्युपगमस्तावन्न दोषः। 'यतो वा इमानि भूतानी'त्यादिपञ्चमी तु कारणसामान्यविषया। 'जनिकर्तुः प्रकृति' रिति (पा० १.४.३०.) सूत्रे 'पुत्रात्प्रमोदो जायते' इत्यपि वैयाकरणैरुदाहृतत्वेन प्रकृतिग्रहणस्य कारणसामान्यपरत्वात्। तस्योपादानपरत्वपक्षेऽपि सा हेतुपञ्चमीत्यङ्गीकारोपपत्तेः। 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य'इति (पा० ४.३.८१.) सूत्रे हेतुसामान्येऽपि पञ्चम्यस्त्विति वैयाकरणैरेव ज्ञापकस्योपन्यस्तत्वात्। 'तदैक्षत बहु स्यां प्रयायेये'ति ब्रह्मणस्स्रक्ष्यमाणतेजः प्रभृतिरूपेण स्वस्य बहुभवनजननविषयः सङ्कल्पस्तु तेजः प्रभृत्यनुपादानत्वेन ततो भेदेऽपि स्वकीयत्वप्रयुक्ताभेदोपचारकृतः इत्यन्यत्र श्रुतिशैलीदर्शनेनावसीयते। 'प्रजायेमहि उग्रः प्रजाभिः अग्ने यन्मे तनुवा ऊनं तन्म आपृणेत्याह यन्मे प्रजायै पशूनामूनं तन्म आपूरयेति वावैतदाहे'त्यादिमन्त्रार्थवादा हि प्रजापशुरूपेण स्वस्यैव जनने स्वस्यैव प्रजापश्वात्मत्वं चावेदयन्ति।

न हि तत्र शरीरावयवद्वारा कथञ्चित्प्रजोपादानत्वकल्पनेऽपि पशूपादानत्वं कल्पयितुं शक्यम्। तस्माद्यथा पुरुषस्य गवाश्वादयः पशव इति तेषां जननं तदीयजननत्वेन तेषां वैकल्यं तच्छरीरवैकल्यत्वेन च तत्रोपचरितमित्थं पशुपतेः परमेश्वरस्य स्रक्ष्यमाणतेजः प्रभृत्यभिमानिजीवाः पशव इति तेषां जननबहुभावौ तदीयत्वेनोपचरितावित्येवावसीयते। 'सर्वो हि रुद्र'इत्यादिश्रुतिषु परमेश्वरस्य विश्वात्मत्वप्रतिपादनं तु व्यापकस्य तत्रतत्र स्थित्वा तत्तन्नियमयतः स्वनियम्यसर्वशरीरकतया सर्वशब्दवाच्यत्वादुपपद्यते। 'तदात्मानं स्वयमकुरुते' त्येत 'द्यदायदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यह' मितिवदुपपद्यते। 'ध्यात्वा मुनिर्गच्छति भूतयोनि'मिति योनिशब्दस्तु परमेश्वरस्य सर्वभूताधारत्वादुपपद्यते। न हि योनिशब्दः उपादाननियतः। 'योनिष्ट इन्द्र निषदे अकारी'ति स्थानेऽपि तत्प्रयोगदर्शनादिति। पूर्वपक्षमुपसंहरति **तत इति।** सूत्रगतं प्रकृतिपदं चकारं च व्याचक्षाणः सिद्धान्तप्रतिज्ञां दर्शयति—**उच्यते निमित्तमिति।** 'प्रतिज्ञादृष्टान्तानुपरोधा'दिति हेतुं विवृणोति—**तमादेशमित्यादिना।** ननु प्राधान्याभिप्रायं सर्वविज्ञानप्रतिज्ञानमौपचारिकमित्याशङ्क्याह—**ब्राह्मण इति।** ब्रह्मणो निमित्तत्वमात्रेऽभ्युपगम्यमाने तद्विज्ञानेन सकलप्रपञ्चविज्ञानमुच्यमानमौपचारिकं स्यात्। न चेष्टापत्तिः। श्रुतिसन्दर्भविरोधापत्तेः। एवं हि तत्रोपाख्यायते। उद्दालको महर्षिः स्वपुत्रं श्वेतकेतुं स्वनियोगाद्द्वादशवर्षाणि गुरुकुले स्थित्वा सर्वान्वेदानधीत्य प्रतिनिवृत्तं वैदुष्यगर्वेण स्तब्धमविनीतोऽयमप्राप्तब्रह्मविद्य इति निश्चित्य तं विनीतं ब्रह्मविदं च कर्त्तुं 'यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञान'मिति पृष्ट्वा कथमेकेन श्रुतेन सर्वं श्रुतं मतं विज्ञातं स्यात् कथमिदमाश्चर्यमुपपद्यते इत्याशयवता श्वेतकेतुना पुनः पृष्टो मृत्पिण्डादिदृश्टान्तैस्तदुपपाद्य 'नवै नूनं भगवन्तस्त एतदवेदिषुर्यद्येतदवेदिष्यन्कथं मे नावक्ष्य'न्निति 'भगवांस्त्वेव मे तद्ब्रवीत्वि' ति तेन पुनः पृष्टः तथा 'सोम्येति' प्रतिज्ञाय 'सदेव सोम्येदमग्र आसी' दित्याद्युपदेशेति। अत्र हि प्रतिज्ञाया गौणत्वे प्रधानज्ञानेन सर्वमन्यदप्रधानं फलतो विदितप्रायं भवतीत्यस्यार्थस्य लोकसिद्धत्वात्तदुपपत्तिं पश्यतः 'कथं नु भगवस्स आदेश' इति प्रश्नस्तदुत्तरवाक्ये मृद्घटादिदृष्टान्तैस्तदुपपादनं चासमञ्जसं स्यात्। तस्माद्यथा तन्मुख्यं भवति तथा समर्थनीयम्। 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीय'मित्यत्र सत्पदं सूक्ष्मचिदचिद्विशिष्टवस्तुपरम्। अन्यथा ब्रह्मातिरिक्तस्य जीववर्गस्यान्यस्य कस्यचन सत्त्वेनावधारणविरोधात्। तस्मात्पृथग्भूतवस्त्वन्तरव्यवछेदकत्वेन समर्थनीयत्वात् तज्ज्ञाने च तत्कार्यं सर्वमपि जगद्विषयो भवति। कार्यद्रव्यस्य कारणानन्यत्वात्। तत्र स्थौल्यापत्तिः परं न विषयीभवति। अतस्तेनाकारेण संशयविषयत्वमश्रुतत्वादिश्रवणं चोप पद्यत इति। इत्थं प्रतिज्ञामुख्यत्वोपपादन-प्रकारमभिप्रेत्यैव भाष्ये हेतुविचारवाक्ये चिदचिद्विशिष्टं सर्वं जगदिति विशेषितम्। स्थूलचिद-चित्प्रकारकब्रह्मात्मकं सर्वकार्यमिति तस्यार्थः। एवं प्रतिज्ञानुपरोधात् ब्रह्मोपादानमभ्युपगन्त-

व्यमित्युपपाद्य दृष्टान्तानुपरोधादपि तथाभ्युपगन्तव्यमित्यमुमंशं मृत्पिण्डस्य घटशरावादीनां च मृत्कार्यान्तरत्वेन तस्य तदुपादानत्वाभावात्तदुपादानत्वेऽप्युपादानादुपादेयस्य भिन्नद्रव्यत्वेन तज्ज्ञानिनो ज्ञातत्वासम्भवात्तत्सम्भवेऽपि एकपिण्डज्ञानेन सकलमृण्मयज्ञानासम्भवाच्चोपादानज्ञानेन तत्कार्याणां ज्ञातत्वविषयतया दृष्टान्तवचनं न मुख्यमुपपादयितुं शक्यम्। किंतु 'देवदत्त एवं भोजयितव्य' इति देवदत्तभोजनव्याख्यानानन्तरमेतेन यज्ञदत्तभोजनं व्याख्यातमिति अव्याख्याते व्याख्यातत्ववचनवदेक-प्रकारकत्वविषयतया गौणं समर्थनीयम्। एवं च दार्ष्टान्तिकवचनमपि गौणं स्यादित्याशङ्कानिवर्तनेनोपपादयति–**तथा हीति।** अत्र ब्रह्मणि केवलनिमित्तत्वे तज्ज्ञानात्सकलज्ञानं न सम्भवति किं तूपादानत्वे सत्येवेति स्वप्रतिज्ञातार्थानुगुणतया कुलालज्ञानादिदृष्टान्तोपन्यासे श्रुतावप्येवमेव दृष्टान्तो दार्ष्टान्तिकानुगुणतया यथा तदुपपादको भवति तथा नेतव्यः। अतो दृष्टान्तस्य प्रकारैक्यविषयत्वे दार्ष्टान्तिकस्य प्राधान्यविषयत्वे चोक्तप्रकारेण तदुपपादकत्वायोगात् दृष्टान्तदार्ष्टान्तिकावप्युपादानविषयावेव योजनीयाविति सूच्यते। अत्रायमाशयः। 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मित्यस्य दृष्टान्तोपपादनार्थस्य मृद उपादानात्तद्विकाराणां घटादीनामनन्यत्वव्यवस्थापनार्थत्वेनारम्भणाधिकरणे व्याख्यास्यमानत्वात्तदन्वयानुरोधेन दृष्टान्त-स्तावदुपादानज्ञानेनोपादेयानां ज्ञातत्वविषय एव वक्तव्यः। न च मृदेव घटादीनामुपादानं न तु मृत्पिण्डः घटादिषु मृदाकारस्येव पिण्डाकारस्यानुवृत्त्यभावादिति वाच्यम्। मृत्पिण्ड एव घटः कृत इति व्यवहारानुसारेण घटाद्युपादानत्वात्। न चोपादानगतयावदाकारानुवृत्तिरुपादेये नियता दध्नि क्षीरस्य भेदवत् यावदाकारानुवृत्त्यभावेऽपि लौकिके 'ऋषभोपानहोर्ज्य' इति व्याकरण (पा० ५.१.१४.) सूत्रे च क्षीरस्य दध्नि वत्सस्य ऋषभे चोपादानत्वव्यवहारात् मृत्पिण्डगतमृत्स्वरूपकिञ्चिदा-कारानुवृत्तिर्घटादिष्वस्त्येव। एवं च 'सर्वं मृण्मयं विज्ञातं स्या'दित्यत्र सर्वशब्द एकेन मृत्पिण्डेनेति प्राग्गृहीतैकमृत्पिण्डविकारघटशरावादिसामस्त्यपरो युक्तः। एवं दृष्टान्तस्य मुख्यत्वव्यवस्थितौ तद्गौणत्वमुखेनापतत् दार्ष्टान्तिकस्य गौणत्वमपि प्रत्याख्यातं भवतीति। ननूक्तरीत्या सौत्रहेतुना ब्रह्मण उपादानत्वसिद्धावपि न सूत्रे चकारसमुच्चितनिमित्तत्वसिद्धिरित्याशंक्य 'येनादेष्ट्रा निमित्तभूतेने' ति हेतुविवरणवाक्यगतयत्पदार्थविशेषणसूचितात्तमादेशमिति श्रुतिगतप्रतिज्ञावाक्यगतादेशशब्देन विशेष्य-निर्देशात्तत्सिद्धिमुपपादयन् तस्यार्थमाह–**आदिश्यतेऽनेनेति।** अयमादेशशब्दः प्रशासितृपरः। 'त'मिति सर्वनाम्नो वस्तुविशेषसमर्पकविशेष्यपदसापेक्षत्वात्। यद्यपि कर्त्रर्थघञ्प्रत्ययो नास्ति। 'अकर्तरि च कारके संज्ञाया' मिति (पा. ३.३.१९.सू०) तद्विधानात्। तथाप्यादिश्यते प्रशिष्यतेऽनेनेति कर्तुस्साधकतमत्वविवक्षया करणार्थव्युत्पन्नघञन्तोऽयमादेशशब्द इति भावः।। निमित्तोपादानाभेदे हेत्वन्तरपरेणोत्तरसूत्रेणापि निर्देश आदेशशब्दस्य निमित्तपर्यवसात्विज्ञापक इत्यभिप्रेत्योत्तरसूत्र-मवतारयति–**इति ज्ञापयितुमाहेति।।**सू।। **अभिध्योपदेशाच्च।।**२४।। **अतो निमित्तादनन्य-**

दुपादानमिति। अत्रायं भावः। यद्यपि मन्त्रार्थवादेषु स्वामिनः स्वकीयैः पशुपुत्रादिभिरभेदोपचारो दृष्टः। तथाप्युपादानोपादेयभावो न तात्त्विकाभेदमभिप्रेत्य। यद्विज्ञानेन सर्वविज्ञानं प्रतिज्ञातं तस्य प्रपञ्चेन निरूपणार्थं प्रवृत्ते मानान्तरागोचरविषये 'तदैक्षत बहु स्यां प्रजायेये'ति श्रवणे नोपचारकल्पना युक्ता। अत ईक्षिता जगतो निमित्तं यः परमेश्वरः स एव जगदुपादानमिति 'तदैक्षते'ति बहुभवनसङ्कल्पोपदेशात्सिध्यति। प्रतिज्ञातार्थप्रपञ्चनपरवाक्यस्य निमित्तोपादानाभेदपरत्वव्यवस्थितौ प्रतिज्ञावाक्येऽपयुपादानत्वेन वर्ण्यमानस्य निमित्तत्वमप्यपेक्षणीयमित्यादेशशब्दस्यादेष्टृपरत्वमपीत एव सिद्ध्यतीति।। उत्तरसूत्रव्यावर्त्यां शङ्कां दर्शयति—**स्वव्यतिरिक्तेति।** ननु, मन्त्रे 'जायमान'मित्येतावदेव श्रूयते। न तु स्वस्मिन्परस्मिन्वेति विशेषः श्रूयते। कथं स्वव्यतिरिक्तप्रकृतिस्थान इति व्याख्यातम्। उच्यते। तस्मिन्नेव मन्त्रे विश्वाधिकत्वेन वर्ण्यमानस्य विश्वाकारत्वं न सम्भवति। विश्वजीवसमष्टिरूपहिरण्यगर्भोपादानत्वे च विश्वाकारत्वमवर्जनीयम्। श्रूयते च श्रुत्यन्तरेषु माया पुरुषश्चेत्युपादानान्तरम्। अतस्तस्मात् जायमानत्वमेव श्रुत्यर्थ इत्यभिप्रेत्य तथा व्याख्यातम्। अत एव मन्त्रार्थकथने विश्वोत्तीर्णत्वेन विशेषितः। उपादानान्तरसद्भावे च श्रुत्यन्तरोदाहरणं कृतम्।।सू।।
साक्षाच्चोभयाम्नानात्।।२५।। **प्रकृतित्वेनेति।** नन्वन्तर्याम्यधिकरणे चान्तर्यामिभावेन जगदाकारत्वं तत एव 'सर्वो वै रुद्र'इत्यादिश्रुतिषु जगद्वाचिभिश्शब्दैः परमेश्वरस्य निर्देश इति चोक्तम्। इह कथं सर्वोपादानत्वेन जगदाकारत्वादिति। नैष दोषः। उभयथाप्युदाहृतश्रौतनिर्देशोपपत्तेः अनयोः प्रकारयोर्यं कञ्चित्प्रकारमादाय उदाहृताधिकरणेषूद्भावितशङ्कासमाधानसम्भवाच्च। पूर्वं तथोक्तमिदानी-मित्थमुच्यते। तथा च सूक्ष्मचिदचिद्विशिष्टः परमेश्वर उपादानं स्थूलचिदचिद्विशिष्टः कार्यमिति कारणशरीरे च विशेष्यभावेन चेतनाचेतनात्मकप्रपञ्चानुप्रवेशोऽन्तर्यामिभावेन वेत्युभयथाप्यविशिष्टे परमेश्वरस्य तदनुप्रवेशे प्रपञ्चवाचिनां शब्दानां नीलादिशब्दवदप्रधानभूतविशेषणवाचितया वा देवमनुष्यादिशब्दवच्छरीरवाचितया वा परमेश्वरपर्यन्तत्वलाभादुभयथापि श्रुतिषु प्रपञ्चवाचिभिश्शब्दैः परमेश्वरस्य निर्देश उपपद्यते। यथा कथञ्चित्तदुपपत्तौ च कथं जीववाचिशब्दैः परमेश्वराभिधानमिति पूर्वाधिकरणशङ्कासमाधानं सम्भवति। विश्वोत्तीर्णस्य कथं विश्वाकारत्वमित्यन्तर्याम्यधिकरणे तदधिकरणकृतशङ्कासमाधानमपि विश्वान्तर्यामितया विश्वोपादानतया वा विश्ववाचकशब्दानां परमेश्वरे प्रयोगेण विश्वाकारत्वावसायाल्लभ्यते। विश्वोत्तीर्णत्वं च, विश्वाकारत्वस्याप्याम्नातस्य त्यागायोगादिति। न चोभयोर्विरोधः। जीवेषु देवमनुष्यत्वाद्याकारत्वस्य देवमनुष्यादिशरीरे-भ्योऽधिकत्वस्य च समावेशात्। हेयवस्त्वनुप्रवेशप्रयुक्तदोषप्रसङ्गशङ्का तु 'न स्थानतोऽपी'त्यधिकरणे सूत्रकृतैव निराकरिष्यते। एवं यत्रोभयथा श्रुत्यर्थसम्भवः उभयथापि तत्रतत्र सङ्गतिश्च तत्र क्वचिदधिकरणे कस्यचित्प्रकारस्योक्तिः अन्यत्र प्रकारान्तरस्य इत्येषा शैली पूर्वमीमांसकानामपि दृश्यते। यथा 'दर्शपूर्णमासयोरुपस्तृणात्यभिघारयति द्विर्हविषोऽवद्यति चतुरवत्तं जुहोती'ति श्रूयते। तत्र

चतुरवत्तवाक्ये अवत्तहोमविधिः ततोऽर्थप्राप्तमवदानमनूद्य व्यवदानवाक्ये हविषो द्विरवदातव्यमिति विधिः उपस्तरणाभिघारणव्यवदानगतप्रचयशब्दसङ्ख्यानुवादश्चतुरवत्तवाक्ये चतुश्शब्द इति व्यवदानवाक्ये द्वित्वविशिष्टहविरवदानविधिः उपस्तरणाभिघारणव्यवदानविधिप्राप्तं चतुरवत्तमनूद्य चतुरवत्तवाक्ये होममात्रविधिरिति वा नात्र पक्षद्वयेऽपि कश्चिद्गौरवलाघवकृतो विशेषोऽस्ति। तत्राद्यः प्रकारः 'संयुक्ते तु प्रक्रमात्तदन्तं स्या'दिति पञ्चमाध्यायाधिकरणे दर्शितः। द्वितीयः प्रकारः 'उत्पत्तितादर्थ्याच्चतुरवत्तं प्रधानस्ये'ति दाशमिकाधिकरणे दर्शितः। तत्र परस्परविरोध-माशङ्क्योभयथापि श्रुत्यर्थसम्भवात् उभयथापि तत्तदधिकरणपूर्वपक्षप्राप्तशङ्कासमाधानसम्भवाच्च तत्र तथैवोक्तमिहैवमुक्तमिति प्रपञ्चितं दशमाध्यायतन्त्ररत्ने। सैव शैली भाष्यकृदनुसृतेति न कश्चिद्दोषः। एवमन्यत्रापि एकस्य श्रुतिवाक्यस्य तत्रतत्र भिन्नभिन्नार्थप्रदर्शने विरोधसमाधानप्रकारा उन्नेयाः। इह त्वेवमपि विरोधशङ्कासमाधानं सम्भवति। यथा बृहत्त्वमात्रेण प्रवृत्तिनिमित्तेन परमेश्वरे ब्रह्मशब्दस्य प्रवृत्तौ प्रकरणोपपदादिसङ्कोचकाभावात् स्वरूपतो गुणतश्च बृहत्वं तस्य लभ्यत इति क्वचित्परमेश्वरस्य स्वरूपबृहत्त्वे प्रमाणत्वेनोपन्यस्तमेव ब्रह्मपदमन्यत्र तस्य गुणबृहत्त्वेऽपि प्रमाणत्वेनोपन्यस्यते। तथा तस्मिन् पृथक् प्रसिध्द्या विशेषणभूतचेतनाचेतनात्मक-प्रपञ्चान्तर्गतस्वसाधारणाकारेण प्रवृत्तिनिमित्तेन तस्मिन्प्रवर्तमानस्य 'सर्वो वै रुद्रः' 'प्राञ्चोऽहं प्रत्यञ्चोऽह'मित्यादितत्तद्वस्तुवाचकशब्दजातस्य तस्मिन्प्रवृत्तौ सङ्कोचकाभावाद्वाक्यान्तरानुसाराच्च सर्वोपादानत्वेन सर्वान्तर्यामितया सर्वशरीरत्वेन च स्वापृथक्सिद्धप्रपञ्चाकारविशिष्टत्वं तस्य ततो लभ्यत इति प्रागन्तर्यामितया सर्वाकारतायां प्रमाणत्वेनोपन्यस्तमेवात्र सर्वोपादानतया सर्वाकारतायां प्रमाणत्वेनोपन्यस्य इति न कश्चिद्विरोध इति 'साक्षाच्चोभयम्नाना'दितीदं (ब्र० १.४.२५) सूत्रं शङ्काद्वयपरिहारार्थत्वेनावतारितम्। तत्र विश्वाधिकस्य कथं विश्वाकारत्वमिति शङ्का विश्वाधिकत्ववद्विश्वाकारत्वस्याप्याम्नानादुभयोश्च विरोधाभावादिति परिहृता। ब्रह्म निमित्तमेव न तूपादानमपि, मायापुरुषयोरुपादानयोः श्रवणादिति शङ्कासमाधानबलादेव निमित्तत्ववदुपादानत्वमपि ब्रह्मणोऽङ्गीकरणीयम्। श्रुतिबलान्मायापुरुषयोरिव ब्रह्मणोऽप्युपादानत्वसम्भवादित्यभिप्रेत्य परिहरति–**ब्रह्म वनमिति।** निमित्तोपादानाभेदाङ्गीकरणाय 'किंस्विद्वनं क उ स वृक्षआसीत्, यतो द्यावापृथिवी निष्टतक्षुः, मनीषिणो मनसा पृच्छतेदुतत्, यदध्यतिष्ठद्भुवनानि धारय' न्निति मन्त्रेण श्रुतिरेव परमेश्वरेण कर्त्रा जगति स्रष्टव्ये तक्ष्णा रथे निर्मातव्ये वनाध्यक्ष इव किमुपादानात् कुतः प्रदेशादानीतं, जगद्धारयित्रा च परमेश्वरेण नृत्यद्दारुपुत्रिकादिधारकेण सूत्रधारेण सूत्रमिव किं वाधिष्ठितमिति प्रश्नमवतारयामास। तत्र 'द्यावापृथिवी' इत्यनेन सर्वाणि भुवनान्युच्यन्ते। अग्रे 'भुवनानि धारय'न्निति श्रवणात्। भुवनग्रहणं च तनुभुवनभोगोपकरणभोक्तृणां सर्वेषामप्युपलक्षणम्। एकस्मिन्नेव परमेश्वरे 'निष्टतक्षु' रिति छान्दसं बहुवचनम्। अनन्तरमन्त्रेण अस्य प्रश्नस्योत्तरमुच्यते

'ब्रह्म वनं ब्रह्म स वृक्ष आसीत्। यतो द्यावापृथिवी निष्टतक्षुः। मनषिणो मनसा विब्रवीमि वः। ब्रह्माध्यतिष्ठद्भुवनानि धारय'न्निति। ब्रह्मैव जगत्कर्तृभूतमुपादानं तदधिकरणं च। जगद्धारणे च सूत्रवदत्तदेवाधिष्ठेयमिति मन्त्रार्थः। **अथर्वशिरसीति**। ननु, प्रथमशङ्कासमाधानार्थेयं श्रुतिः प्रागेवोदाहर्तव्या। उच्यते। यथाथर्वशिरसि प्रथमद्वितीयखण्डयो'र्ब्रह्माह'मित्यारभ्य विश्वाकारत्वं, पञ्चमखण्डे 'एको रुद्रो न द्वितीयाय तस्थे य इमं लोकमीशत ईशनीयु'रित्यादौ विश्वेश्वरत्वं चोक्तम्। तस्मादथर्वशिरसि विश्वाधिकत्वविश्वाकारत्वोभयाम्नानं चास्तीत्येतदुदाहरणेन शङ्काद्वयस्यापि समाधानं लभ्यत इत्यभिप्रेत्यात्रेयं श्रुतिरुदाहृता। अथर्वशिरः श्रुत्युदाहरणमानन्दवल्लयादीना-मप्युपलक्षणम्। आनन्दवल्लयां हि 'इदं सर्वमसृजत यदिदं किंचे' ति कर्तृत्व 'मात्मन आकाशस्संभूत' इत्युपादानत्वं चाम्नातम्। एवमन्यत्राप्युदाहार्यम्। यत्तु'आत्मन आकाश'इत्यादि पञ्चम्याः कारणसामान्यं विषयः, जनिकर्तृसूत्रे प्रकृतिपदमपि तद्विषयमिति मतं तदयुक्तम्। 'मायां तु प्रकृतिं विद्यात्' 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधा' दित्यादिवेदवैदिकव्यवहारेषु 'तदर्थं विकृतेः प्रकृता'विति व्याकरण (पा० ५.१.१२.) सूत्रे च प्रकृतिपदस्योपादान एव प्रयोगदर्शनात् कार्याभिन्ने 'मृत्स्वभावो घट' इति कार्यस्वभावतया व्यवह्रियमाणे चोपादाने स्वभावशक्तयेव कारणसामान्ये ततः प्रयोगनिर्वाहस्यासम्भवे तद्वाचित्वाङ्गीकारे तत्र शक्तयन्तरकल्पनापत्तेः। क्लृप्तशक्तया प्रयोगनिर्वाहसम्भवे च शक्तयन्तरकल्पनायोगात्। न च निमित्तकारणमपि यस्य कस्यचित्स्वभाव इति शक्यम्। कारणे स्वभाववाशिब्दप्रयोगस्य कार्यं प्रति स्वभावत एव निर्वाह्यत्वात्। अन्यथा घटस्य मृत्पिण्डः प्रकृतिरित्यादिव्यवहारासामञ्जस्यप्रसङ्गात्। अत एव घटस्य समवायिकारणं मृत्पिण्ड इति नैयायिका अपि घटसमवायित्वेन स्वाभ्युपगतमृत्पिण्डमेव तस्य समवायिकारणं व्यवहरन्ति। न तु यत्किञ्चित्समवायि दण्डादिकमपि। ननु, तथापि जनिकर्तृसूत्रे प्रकृतिपदं कारणसामान्यलक्षकं स्यादिति चेन्न। अत्र प्रकृतिपदेन कारणसामान्यस्यैव विवक्षितत्वे 'ध्रुवमपायेऽपादान'मिति सूत्रादवधिपरस्य पदस्यानुवर्तमानतया तेनैव जायमानं प्रत्यवधिभूतस्य कारणसामान्यस्य लाभेनास्य वैयर्थ्यप्रसङ्गात् 'कारक' इत्यधिकृतस्य पदस्य कारणसामान्यवाचिनो निर्धारणसप्तम्यन्त-स्यानन्वयप्रसङ्गाच्च। न हि 'कारणानां मध्ये यदुपादानकारण' मितिवत 'कारणानां मध्ये यत्कारण'मित्येतदन्वितार्थं भवति। किं च 'तत आगत'इत्यधिकारे पठिते 'हेतुमनुष्येभ्योऽन्यतरस्यां रूप्य'इति (पा० ४.३.८१) सूत्रे हेतुवाचिभ्यो मनुष्यवाचिभ्यश्च शब्देभ्यः 'तत आगत'इत्यर्थे रूप्यप्रत्ययविधायके हेतुवाचिशब्देभ्यः पञ्चमी न सम्भवति। हेतोरागमनस्य हेतुहेतुमद्भावरूपतया तद्विवक्षायां 'हेता'विति (पा० २.३.२३) सूत्रेण तृतीयया भाव्यत्वात् कथं पञ्चमीति शङ्कायां यदयं 'तत आगत' इति प्रथमक्लृप्तपञ्चम्यन्तस्यार्थमागमहेतुत्वेन सूत्रे विशिनष्टि। तत एव हेतुहेतुमद्भावे पञ्चम्यपि भवतीति ज्ञापयतीति कारणसामान्ये पञ्चमीं ज्ञापकेन शाब्दिकास्समर्थयामासुः। अन्ये तु

'विभाषा गुणेऽस्त्रिया'मिति (पा० २.३.२५) सूत्रेण गुणवचनशब्देभ्यो हेतौ पञ्चम्या विहितत्वादिह सूत्रे हेतुश्रवणस्य तद्विषयतया जाडयादागत जाड्यरूप्यमित्येतत्सूत्रोदाहारणसम्भवात् नैतज्ज्ञापकं हेतौ पञ्चमीसम्भवे। किं तु 'विभाषा गुणेऽस्त्रिया'मिति (पा० १.३.२५.) सूत्रे विभाषेति योगविभागेन अगुणवचनेभ्य: तत्रतत्र पञ्चमी दृश्यत इत्येव तां समर्थयामासु:। नैवं समर्थनीयं स्यात्। यदि जनिकर्तृसूत्रे प्रकृतिपदं कारणसामान्यपरं स्यात्। ननु, महाभाष्ये 'गोलोमाविलोमभ्यो दूर्वा जायन्त' इति जनिकर्तृसूत्रस्योदाहरणं प्रदर्श्य 'अपक्रामन्ति तास्तेभ्य:'इत्यादिना दूर्वोद्गमावधिभूतेभ्यो गोलोमाविलोमभ्य: पञ्चमी 'ध्रुवमपायेऽपादान' मिति (पा० १.४.२४) सूत्रत: सिध्यतीति तत्सूत्रं प्रत्याख्यातम्। तथा व्याख्यानं तदा घटते। यद्युदाहरणे गोलोमाविलोमशब्दौ दूर्वोद्गमनिमित्ततया तदध: स्थितेषु तदुद्गमावधिभूतेषु गोलोमाविलोमैकदेशेषु वर्तेते। तस्य दूर्वाकारपरिणततदेकदेशपरत्वे हि तथाभूतैकदेशानां दूर्वापक्रमणावधित्वाभावेन सूत्रप्रत्याख्यानं न घटते। अतो महाभाष्यछायया प्रकृतिपदं कारणसामान्यपरमवसीयत इति चेत्। उच्यते। गोलोमाद्येकदेशस्य दूर्वाकारपरिणामे तदाकारपरिणततदध: स्थितैकदेशसाधारण्येन गोलोमादिमात्रं तदुपादानम्। व्यवहारानुरोधात्। न हि द्वित्रैस्तन्तुभिरारब्धे खण्डपटे पटाकारबहिर्देशस्य तन्तूनामेकदेशस्य सद्भावेऽपि तन्तव: पटोपादानमिति न व्यवह्रियन्ते। कैयटेन च लोमादीनां दूर्वाद्यवधित्वमभ्युपगम्य सूत्रप्रत्याख्यानं लोकदृष्टयैव न तु तान्त्रिकमर्यादयेति व्याचक्षाणेनास्य सूत्रस्य उपादानाविषयत्वमाविष्कृतम्। तद्यथा–'अपक्रामन्ति ता' इति प्रसिध्द्याश्रयणेनैतदुच्यते। लोकेहि यद्यस्माज्जायते तत्तस्मान्निर्गच्छतीत्युच्यते। तन्त्राश्रयास्तु प्रक्रिया भिद्यन्ते। वैशेषिकदर्शने 'परमाण्वादिसमवेतं कारणेभ्योऽपृथग्देशं कार्यमुत्पद्यत इति नास्ति कार्यस्यापक्रम' इति। अत्र हि जायमानं कार्यं यस्मात्कारणान्निर्गच्छतीति लोकदृष्टिरस्ति तदेवास्य विषय: न तु दण्डचक्रादिसाधारणं सर्वं कारणमिति लोकदृष्टिप्रदर्शकवाक्येनाविष्कृतम्। वैशेषिकमर्यादाप्रदर्शकवाक्येन तु परमाण्वादि-समवेतकार्योदाहरणेन विशिष्योपादानविषयत्वमप्याविष्कृतम्। तेन यतो दूर्वाद्यध:स्थितात् गोलोमाद्येकदेशात् दूर्वादिकमपक्रामतीति लोकदृष्टिरस्ति सोऽपि तदुपादानमिति कैयटस्याप्याशय उन्नीयते। स्यादेतत्। 'आत्मन आकाशस्सम्भूत' इत्यादौ मा भूत् जनिकर्तृसूत्रत: पञ्चमी अन्यतो भविष्यतीति चेत्। कुत: विवेचनीयम्। न तावत् 'ध्रुवमपायेऽपादान'मिति (पा० १.४.२४.) सूत्रत:। सर्वत्र परिपूर्णस्य ब्रह्मण: पर्णपतने वृक्षस्येव प्रपञ्चोत्पत्ताववधित्वासम्भवात्। 'भीत्रार्थाना'मित्यादिसूत्राणां तु नास्त्याशङ्कावकाश:। हेतुपञ्चमी भविष्यतीति चेन्न। हेतौ पञ्चमीविधानाभावात्। 'हेतुमनुष्येभ्य' इति ज्ञापकस्य शाब्दिकैरेव दूषितत्वात्। तस्मिन्सूत्रे 'समादागतं समरूप्य' मिति वृत्तिकारदर्शितोदाहरणगतपञ्चम्या: उपादानविषयत्वोपपत्ते: 'विभाषा गुणेऽस्त्रिया' मित्यादि (पा० २.३.२५) सूत्रे योगविभागेनापि हेतौ पञ्चमी न कल्पनीया। उपादानपञ्चम्यैव

सर्वप्रयोगनिर्वाहोपपत्तेः। 'पुत्रात्प्रमोदो जायत' इति कश्चित्प्रयोगस्तु निमित्तकारणे उपादानत्वारोपात् भविष्यति समनन्तरापत्ये गोत्ररूपाध्यारोपादिव रामो जामदग्न्यः व्यासः पाराशर्य इति गोत्रापत्यविहितप्रत्ययान्तव्यवहारः। अस्तु वा यथाकथञ्चित् हेतौ पञ्चमी। तथाप्युपपदविभक्तितः कारकविभक्तेर्बलीयस्त्वात् उपादानविषयैवात्र पञ्चमी ग्राह्या। तस्माद्युक्तमुक्तं 'साक्षाच्चोभयाम्नाना' दिति।। पूर्वसूत्रयोः विषयैः प्रतिज्ञादृष्टान्ताभिध्योपदेशैः शिवस्य निमित्तोपादानत्वोभयमाक्षेपतः सिध्यति। 'ब्रह्म वन' मित्यादिभिस्तु श्रुतित एवेत्यभिप्रेत्य साक्षादिति विशेषितम्।।सू।। **आत्मकृतेः।।२६।। तदात्मानमिति।** यद्यप्येषा श्रुतिः पूर्वसूत्र एवोदाहर्तुं शक्या, तथाप्यतिस्पष्टार्थतया निरपेक्षेति पृथक्सूत्रिता। अत एवात्र सूत्रे नैरपेक्ष्यद्योतनार्थमेव चशब्दाप्रयोगः। यत्तु 'तदात्मानं सृजाम्यह' मित्यादिवदियं श्रुतिरुपपद्यत इत्युक्तं तन्न। तत्रापि निमित्तोपादानभावसिध्यविशेषात्। इयांस्तु विशेषः। तत्रावताररूपेण स्वात्मनः स्वेन सृष्टिरुच्यते, इह प्रपञ्चरूपेणेति।। सर्वज्ञस्य निर्विकारस्य निरतिशयपुरुषार्थरूपस्य परमस्वतन्त्रशिवस्य किञ्चिज्ज्ञसङ्कोचविकासादिविकारस्य दुःखद्वेषभयादि-कलुषितपरतन्त्रैकस्वभावचित्प्रपञ्चरूपेण विविधविकारास्पददुःखस्वभावसंसारपाशात्मका-चित्प्रपञ्चरूपेण च परिणामरूपं जगदुपादानत्वं न सम्भवतीति शङ्कोत्तरत्वेनोत्तरसूत्र-मवतारयति–**नन्विति।।सू।। परिणामात्।।२७।।**

इति शिवार्कमणिदीपिका प्रकृत्यधिकरणम् समाप्तम्

जन्म — ६-११-१९३७

जन्मस्थानम् — ग्रामः — रोहटः, मण्डलम् सोनीपतः (हरियाणा)।

शिक्षा — शास्त्री १९५३, पञ्जाबविश्वविद्यालये सर्वप्रथमः, एम.ए १९६३ दिल्ली विश्वविद्यालयः, पी.एच.डी. १९७० दिल्ली विश्वविद्यालयः।

अध्ययनक्षेत्रम् — साहित्यशास्त्रम्, व्याकरणम् च।

प्रकाशितानि शोधपत्राणि — दिल्ली विश्वविद्यालयदक्षिणपरिसरे समवेतानां परिचर्चानां पुस्तकाकारेषु प्रकाशनेषु बहवो लेखाः।

प्रकाशितो ग्रन्थः — अभिधाविमर्शः, दिल्ली १९८० आचार्यो दण्डी (राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितः)

कार्यक्षेत्रम् — दिल्ली विश्वविद्यालयस्थे, हिन्दूमहाविद्यालये,

प्राध्यापकः — १९६९-१९८६

प्रवाचकः — १९८७-१९८८

गुरुकुलकांगड़ी विश्वविद्यालये प्राचार्यो विभागाध्यक्षश्च —१९८८-१९८९

वर्तमाने हिन्दूमहाविद्यालये प्रवाचकः।

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp — 450.00

Bhagavata Mahapurana-
4vols — 2304 pp — Set 1500.00

Bhavishya Mahapurana
3vols — 1400 pp — Set 1200.00

Brahma Mahapurana
728 pp — 450.00

Devi Bhagavata Mahapurana
1154 pp — 800.00

Ganesha Purana
832 pp — 1993 — 450.00

Garuda Mahapurana
668 pp — 400.00

Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp — 2vols — set 900.00

Kurma Mahapuran
298 pp — 300.00

Linga Mahapurana
774 pp — 400.00

Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp — 450.00

Narada Mahapurana
932 pp — 600.00

Padma Mahapurana
2381pp — 4vols — set 1600.00

Shiva Mahapurana
1504 pp — 2vols — set 900.00

Shiva Mahapurana (Small Type)
412 pp — 400.00

Skanda Mahapurana
5600 pp — 8 vols — set 4000.00

Skanda Mahapurana (small type)
1452 pp — 3vols — set 1500.00

Vamana Mahapurana
472 pp — 400.00

Vayu Mahapurana
540 pp — 400.00

Vishnudharmottara Mahapurana
1246 pp — 900.00

Vishnu Mahapurana-with two commentaries
680 pp — 500.00

विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
2 vols — Press

Maha Bhagavat Devipurana
Press

Ekamara Purana
490 pp — 150.00

Kalki Purana
316pp — 120.00

Kuber Purana (Text With Study) — Press

Narasimha Purana
380 pp — 100.00

Saura Purana
290 pp — 100.00

Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 — Rs. 124.00

Vasuki Purana
260 pp — 100.00

Ashtadasha Purana Darpana Contents of 18 Puranas
432 pp — 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana – *H.H. Wilson*
1065 pp — 2 vols — Set 500.00

Matsya Purana – *N.S. Singh*
1252 pp — 2 vols — 500.00

Narasimha Purana —*Dr.S.Jena*
750 pp — 400.00

Kalika Purana
Prof. Biswanarayan Shastri
1770 pp — 3vols — set 900.00

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)